THE

RIG-VEDA SAMHITÁ.

SIXTH ASHṬAKA

WITH

PADA PÁṬHA

AND

SÁYANÁCHÁRYA'S BHÁSHYA

EDITED BY

MAHÂMAHOPÂDHYÂYA RÂJÂRÂM SHÂSTRI BODAS,

SANSKRIT SHÂSTRI, ELPHINSTONE COLLEGE,

AND

SHIWARÂM SHÂSTRI GORÊ,

Teacher in the Gokuldas Tejpal Sanskrit Seminary.

BHARATIYA VIDYA BHAVAN LIBRARY S. N.......

PUBLISHED BY

TOOKÂRÂM TÂTYÂ

FOR THE BOMBAY THEOSOPHICAL PUBLICATION FUND

Bombay:

PRINTED AT THE GANPAT KRISHNAJI PRESS.

Shaka 1811.

[All Rights Reserved.]

श्रीः

ऋक्संहिता

सायणाचार्यविरचितभाष्यसंहिता

पदपाठयुताच.

इयंच

तत्त्वविवेचकग्रंथप्रसारकसमित्याप्रेरितः तुकारामतात्याभिख्यः,

गणपतकृष्णाजीमुद्रायंत्रालयाधिपतिः आत्मारामकान्होबाभिख्यः,

इत्येताभ्या

वोडसोपाह्वमहामहोपाध्यायराजारामशास्त्रि,

गोरेइत्युपाभिधशिवरामशास्त्रिभ्यांशोधयित्वा

मुंबय्यां

गणपतकृष्णाजीमुद्रायंत्रालयेमुद्रयित्वा

प्रकाशिता.

तस्याअयंषष्ठोऽष्टकः

शकाब्दा १८११

एतत्पुस्तकस्य स्वामित्व
मुनिरसगजेंदुमिते (१८६७) सन् सङ्कवत्सरे कृतराजकीय
पंचविंशतितम (२५) नियमानुसारतोऽस्ताधारणीकृतम्

BHARTIYA VIDYA ... S. N. ... LIBRARY

S. N. LIBRARY

॥ श्रीगणेशाय नमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममे तमहंवंदे विद्यातीर्थमहेश्वरं ॥ १ ॥

इत्थंपंचमाष्टकं व्याख्यायेदानीं ऋषिच्छन्दोदेवताविनियोगप्रदर्शनपुरःसरं षष्ठस्य प्रथमोध्यायोव्याख्यातुमारभ्यते । अष्टममण्डलस्य द्वितीयेनुवाके षट्सूक्तानि जातानि । यइन्द्रेति त्रयस्त्रिंशदृचं सप्तमं सूक्तं कण्वगोत्रस्य पर्वताख्यस्यार्षं औष्णिहमैन्द्रम् । तथाचानुक्रांतम्—यइन्द्रत्रयस्त्रिंशत्पर्वतऔष्णिहंत्विति । महाव्रतेनिष्केवल्ये औष्णिहतृचाशीतौ इदमादिके द्वे सूक्ते । तथैवपंचमारण्यकेसूत्र्यते—औष्णिहीतृचाशीतिर्यइन्द्रसोमपातमइति सूक्ते इति । दशमेहनि निष्केवल्ये आदितः षळृचः शंसनीयाः । सूत्र्यतेहि—यइंद्रसोमपातमइति षळुष्णिहइति । आभिप्लविकेपूक्थेषु तृतीयसवने ब्रह्मशस्त्रे आद्यस्तृचोवैकल्पिकोनुरूपः सूत्रितंच—यइन्द्रसोमपातमएन्द्रनोगधीति । तृतीयपर्यायेच्छावाकशस्त्रेप्ययमेवतृचोनुरूपः सूत्रितंच—इन्द्रःसुतेषुसोमेषु यइन्द्रसोमपातमइति ।

तत्र प्रथमा—

ॐम् यइन्द्रसोमपातमोमदःशविष्ठचेतति ।
येनाहंसिन्य१त्रिणंतमीमहे ॥ १ ॥

यः । इन्द्र । सोमऽपातमः । मदः । शविष्ठ । चेतति ।
येन । हंसि । नि । अत्रिणम् । तम् । ईमहे ॥ १ ॥

हे इन्द्र यस्त्वं सोमपातमः अतिशयेन सोमस्य पाता हे शविष्ठ बलवत्तम शवइति बलनाम तस्माद्विनंतादातिशायनिकइष्ठन् विन्मतोर्लुक् टिलोपः हे इंद्रशेन्द्र तस्य तव सोमपानजनितोमोमदश्चेतति सम्यग्जानाति वृत्रवधादीनि कार्याणि कर्तुं यइत्यस्य चेततीत्यनेनापि संबंधात् यद्वृत्तान्नित्यमिति तिङ् न निहन्यते । अथवैतदेवंवाक्यम् हे बलवत्तमेन्द्र सोमपातमः सोमस्यपातृतमोयस्त्वं मदः सोमैर्मादयितव्यः तर्पणीयः सन् चेतति पुरुषव्यत्ययः चेतसि सम्यग्जानासि मदोनुपसर्गे इति मदेः कर्मण्यप् । येन सोमपानजनितेन मदेन अत्रिणमत्तारं रा-

क्षत्रादिकं निर्हंसि निकृष्टां हिंसां प्रापयसि तं मदं तादृक्षदोषेतं त्वां वा ईमहे याञ्चाकर्मा- यम् याचामहे। यद्वा ई गतौ दैवादिकः छांदसोविकरणस्य लुक् ईयामहे उपगच्छामः स्तु- तिभिः संभजामहइत्यर्थः ॥ १ ॥

अथ द्वितीया-

येना॒दश॑ग्व॒मध्रि॑गुं वे॒पय॑न्तं॒ स्व॑र्णरम् । येना॑ समु॒द्रमावि॑था॒ तमी॑महे ॥ २॥

येन॑ । दश॑ऽग्वम् । अध्रि॑ऽगुम् । वे॒पय॑न्तम् । स्वः॑ऽनरम् ।
येन॑ । स॒मु॒द्रम् । आवि॑थ । तम् । ई॒म॒हे॒ ॥ २ ॥

हे इन्द्र येन सोमपानजनितेन मदेन 'दशग्वं' ये दशभिर्मासैः सत्रासनं परिसमाप्य निरगमन् ते दशग्वा अंगिरसः। तेषामन्यतमं अध्रिगुं अधृतगमनं अनिवारितगतिं एतत्संज्ञं च ऋषिं वेपयंतं तमांसि वर्जयंतं स्वर्णरं सर्वस्य नेतारं सूर्यं च आविथ वृत्रादेर्दस्योरपनयनेन ररक्षिथ। येन च मदेन समुद्रमुदधिं अंतरिक्षं वा आविथ ररक्षिथ त्वदीयं मदं तद्वंतं त्वां वा ईमहे याचामहे। मदे हि सति हृष्टःसन् इन्द्रोबहुधनं प्रयच्छति अतस्तत्कारणस्य मदस्य याञ्चो- पपन्ना ॥ २॥

अथ तृतीया-

येन॒ सिन्धुं॑ म॒हीर॒पो रथाँ॑इव प्रचो॒दयः॑ । पन्था॑मृ॒तस्य॒ यात॑वे॒ तमी॑महे ॥ ३॥

येन॑ । सिन्धु॑म् । म॒हीः । अ॒पः । रथा॑न्ऽइव ।
प्र॒ऽचो॒दयः॑ । पन्था॑म् । ऋ॒तस्य॑ । यात॑वे । तम् । ई॒म॒हे॒ ॥ ३ ॥

हे इन्द्र महीर्महतीरपः वृष्टयुदकानि सिन्धुं स्यन्दनशीलांनदीं समुद्रं वा प्रति येन सोमपान- जन्येन मदेन प्रचोदयः प्रेरयसि। तत्रदृष्टान्तः—रथाँइव यथा रथिनोरथान् स्वाभिलषितदेशग- मनाय प्रेरयति तद्वत् ऋतस्य यज्ञस्य पन्थां पन्थानं मार्गं यातवे यातुं प्राप्तुं तं मदमीमहे याचामहे ॥ ३॥

अथ चतुर्थी-

इ॒मं स्तोम॑म॒भिष्ट॑ये घृ॒तं न पू॒तम॑द्रिवः । येना॒ नु स॒द्य ओज॑सा व॒वक्षि॑थ ॥ ४॥

इमम् । स्तोमम् । अभिष्टये । घृतम् । न । पूतम् ।
अद्रिऽवः । येन । नु । सद्यः । ओजसा । ववक्षिथ ॥ ४ ॥

हे अद्रिवोवज्रवन्निन्द्र घृतंन घृतमिव मन्त्रपूतमाज्यमिव पूतंशुद्धं इममस्मदीयं स्तोमं स्तोत्रं बुध्यस्वेतिशेषः । किमर्थं अभिष्टये अभिप्राप्त्यै इष्टस्य धनादेरस्माकं लाभायेत्यर्थः । येन स्तोत्रेण स्तूयमानः सन् ओजसात्मीयेन बलेन सद्यस्तदानीमेव स्तुतिसमयएव नु क्षिप्रं ववक्षिथास्मान्वहसि अभिलषितं प्रापयसि इमं स्तोममित्यन्वयः ॥ ४ ॥

अथ पञ्चमी—

इमंजुषस्वगिर्वणःसमुद्रइवपिन्वते।इन्द्रविश्वाभिरूतिभिर्ववक्षिथ॥५॥१॥

इमम् । जुषस्व । गिर्वणः । समुद्रःऽइव । पिन्वते ।
इन्द्र । विश्वाभिः । ऊतिऽभिः । ववक्षिथ ॥ ५ ॥ १ ॥

हे गिर्वणोगिरां स्तुतीनां संभक्तः यद्वा स्तुतिभिः संभजनीयेन्द्र इमं स्तोमं मया क्रियमाणं जुषस्व सेवस्व सच स्तोमः समुद्रइव समुद्रोयथा चन्द्रोदयं प्राप्य पिन्वते वर्धते अभिधेयस्येन्द्रगुणगणस्याधिक्येन तत्प्रतिपादिकास्तुतिरपि विरूढा भवतीत्यर्थः । पूर्वस्यामृचि ववक्षिथेत्यनेन युक्तो येनेतिशब्दोत्रापि सामर्थ्यात्तेन संबध्यते अतएवास्य तिङ्ङतिङइति निघाताभावः । हे इंद्र येन स्तोमेन हेतुना विश्वाभिर्व्याप्ताभिरूतिभीरक्षाभिः ववक्षिथ वहसि श्रेयांस्यस्मान्प्रापयसि वहेःसन्नन्ताल्लिटि अमन्त्रइति निषेधादामभावे थलि लिटि रूपमेतत्॥५॥

॥ इति षष्ठस्य प्रथमे प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी—

योनोदेवःपरावतःसखित्वनायमामहे । दिवोनवृष्टिंप्रथयन्ववक्षिथ॥६॥

यः । नः । देवः । पराऽवतः । सखिऽत्वनाय । ममहे ।
दिवः । न । वृष्टिम् । प्रथयन् । ववक्षिथ ॥ ६ ॥

योनोदेवो दानादिगुणयुक्तइंद्रः परावतःपरावतात् दूरात् द्युलोकादागत्य नोस्माकं सखित्वनाम सखित्वाय मामहे धनानि प्रददौ मंहतेर्दानकर्मणएतद्रूपं । यद्वा अस्माभिः पूज्यते मह-

पूजायाम् अस्माच्छान्दसः कर्मणिलिट् । उत्तरार्धर्चः प्रत्यक्षकृतः हे इन्द्र दिवोन वृष्टिं दिवः सकाशात् वृष्टिमिव प्रथयन् अस्मदीयानि धनानि विस्तारयन् यस्त्वं ववक्षिथ अस्मान्वोढुमिच्छसि तादृशं त्वां स्तौमीति शेषः ॥ ६ ॥

अथ सप्तमी—

ववक्षुरस्यकेतवउतवज्रोगभस्त्योः । यत्सूर्योनरोदसीअवर्धयत् ॥ ७ ॥

ववक्षुः । अस्य । केतवः । उत । वज्रः । गभस्त्योः ।
यत् । सूर्यः । न । रोदसी इति । अवर्धयत् ॥ ७ ॥

अस्येन्द्रस्य केतवः प्रज्ञानानि अस्मत्स्तुतिविषयाणि यद्वा रथे उत्क्षिप्ताः पताकाः केतवः ववक्षुरवहन् अस्मान् श्रेयांसि प्रापयन् । उतापिच गभस्त्योः बाहुनामैतत् इन्द्रस्य हस्तयोरवस्थितोवज्रश्चावहत् यद्यदा अयमिन्द्रः सूर्योन सर्वस्य प्रेरकआदित्यइव रोदसी द्यावापृथिव्यौ वृष्ट्यादिप्रदानेनावर्धयत् तदानीमित्यर्थः ॥ ७ ॥

अथाष्टमी—

यदिप्रवृद्धसत्पतेसहस्रंमहिषाँअघः । आदित्तइन्द्रियंमहिप्रवावृधे ॥ ८ ॥

यदि । प्रऽवृद्ध । सत्ऽपते । सहस्रम् । महिषान् ।
अघः । आत् । इत् । ते । इन्द्रियम् । महि । प्र । ववृधे ॥ ८ ॥

हे प्रवृद्ध प्रकर्षेणमहन् हे सत्पते सतामनुष्ठातॄणां पालयितरिन्द्र सहस्रं सहस्रसंख्याकान् महिषान्महन्नामैतत् महतोऽसुरान् वृत्रादीन् यदि यदा अघः अवधीः हन्तेश्छान्दसमेतद्रूपम् । यद्वा घस्लृअदने लुङिरिति प्रत्ययसेति चेर्लुक् । आदित् अनंतरमेव हे इन्द्र ते तव इन्द्रियं वीर्यं महि महदत्युरुं सत्प्रवावृधे प्रकर्षेण वर्धते ॥ ८ ॥

अथ नवमी—

इन्द्रःसूर्यस्यरश्मिभिर्न्यर्शसानमोषति । अग्निर्वनेवसासहिःप्रवावृधे ॥ ९ ॥

इन्द्रः । सूर्यस्य । रश्मिऽभिः । नि । अर्शसानम् ।
ओषति । अग्निः । वनाऽइव । ससहिः । प्र । ववृधे ॥ ९ ॥

अयमिन्द्रः सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य रश्मिभिः किरणैः करणभूतैः अर्शसानं अर्तेर्गुणः शुट्चेति ऋगतावित्यस्मादसानच्प्रत्ययः शुडागमश्च अयं केवलोप्यर्विराङ्पूर्वोर्थोद्दृष्टव्यः आङ्पूर्वश्च बाधनेवर्तते यथा आर्तिमार्वोरिति । अर्शसानं बाधमानं मन्देहादिकमसुरं न्योपति नितरां दहति उपदाहे ।तत्रदृष्टांतः--अग्निर्वनेव यथा वनान्यरण्यानि दावानलोभस्मसात्करोति तद्वत् । एवं सासहिः शत्रूणामभिभवनशीलइन्द्रः प्रवावृधे प्रकर्षेण वर्धते ॥ ९ ॥

अथ दशमी--

इ॒यं त॑ ऋ॒त्विया॑वती धी॒तिरे॑ति॒ नवी॑यसी ।
स॒प॒र्यन्ती॑ पुरुप्रि॒या मिमी॑त॒ इत् ॥ १० ॥ २ ॥

इ॒यम् । ते॒ । ऋ॒त्विय॑ऽवती । धी॒तिः । ए॒ति॒ । नवी॑यसी ।
स॒प॒र्यन्ती॑ । पु॒रु॒ऽप्रि॒या । मिमी॑ते । इत् ॥ १० ॥ २ ॥

हे इन्द्र ते त्वां इयं पुरोवर्तिनी मया क्रियमाणा धीतिः स्तुतिः एति गच्छति कीदृशी ऋत्वियावती ऋतौ वसंतादिकाले अनुष्ठेयं यज्ञकर्म ऋत्वियं तद्वती नवीयसीअतिशयेनाभिनवा स्तुतिः सपर्यंती पूजयन्ती पुरुप्रिया पुरु बहुळं प्रीणयित्री सती मिमीतइव इन्द्रगतान्गुणान् परिच्छिनत्त्येव माहात्म्यं प्रख्यापयत्येव सेयमित्यन्वयः । अनुमीयमानेन यच्छब्देनच योगात् मिमीत इत्यस्य निघाताभावः। यद्वा सपर्यन्ती पुरुप्रियेतीदमपि एतीत्यनेन संबंधनीयं अतः पूर्वपदस्य भिन्नवाक्यस्थत्वात् समानवाक्ये युष्मदस्मदादेशायकव्याइति वचनात्तदपेक्षया निघाताभावे सत्यभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ १० ॥

॥ इति पञ्चस्य प्रथमे द्वितीयोवर्गः ॥ २ ॥

अथैकादशी--

गर्भो॑ य॒ज्ञस्य॑ देव॒युः क्रतुं॑ पुनीत आनु॒षक् ।
स्तोमै॒रिन्द्र॑स्य वावृधे॒ मिमी॑त॒ इत् ॥ ११ ॥

गर्भः॑ । य॒ज्ञस्य॑ । दे॒व॒ऽयुः । क्रतु॑म् । पु॒नी॒ते॒ ।
आ॒नु॒षक् । स्तोमैः॑ । इन्द्र॑स्य । व॒वृ॒धे॒ । मिमी॑ते । इत् ॥ ११ ॥

यज्ञस्य यद्व्यस्येन्द्रस्य गर्भोगरिता स्तोता गृशब्दे अर्तिगृभ्यांभन् यद्वा यजेर्भाव एव नङ्प्रत्ययः यागस्य गर्भोगृहीता अनुष्ठाता देवयुः देवं दानादिगुणयुक्तमिन्द्रमा-

त्मनइच्छन् आनुषगनुषक्कं आनुपूर्व्येण संततं यथा भवति तथा क्रतुं प्रज्ञापकं सोमं पुनीते दशापवित्रेण शोधयति इन्द्रपानार्थमितिशेषः। यद्वा यज्ञस्य गर्भोदीक्षितः। पुनर्वा एतमृत्विजोगर्भंकुर्वन्तीत्यादिब्राह्मणम्। सदेवकामः क्रतुं ज्योतिष्टोमादिकं आनुषक् आनुपूर्व्येणामैतत्। यद्वाहयास्कः— आनुषगिति नामानुपूर्व्यस्येति। सः स्तोता इन्द्रस्य कर्मणि षष्ठी इन्द्रविषयैः स्तोमैः स्तोत्रैर्ववृधे वर्धते यद्वा वृधिना प्रयोज्यव्यापारवाचिना प्रयोजकव्यापारोलक्ष्यते। स्तोमैः स्तोत्रैः तमिन्द्रं वर्धयति सच स्तोमैर्मिमीतइव इन्द्रस्य गुणजातं परिच्छिनत्त्येव अनुगतार्थो भवतीत्यर्थः॥ ११॥

अथ द्वादशी—

सुनिर्मित्रस्य॑पप्रथइन्द्रः॑सोम॑स्यपी॒तये॑।
प्राची॒वाशी॑वसुन्व॒तेमिमी॑त॒इत्॥ १२॥

सुनिः। मि॒त्रस्य॑। प॒प्र॒थे। इन्द्रः॑। सोम॑स्य। पी॒तये॑।
प्राची॑। वाशी॑ऽइव। सु॒न्व॒ते। मिमी॑ते। इत्॥ १२॥

मित्रस्य मित्रभूतस्य स्तोतुः सनिर्धनस्य दाता इन्द्रः सोमस्य पीतये पानाय पप्रथे प्रथितोविस्तीर्णशरीरोबभूव यथा पीतोबहुलः सोमउदरेन्तर्भवति तथा प्रवृद्धशरीरोबभूवेत्यर्थः। तत्र प्रथने दृष्टांतः—प्राची प्रांचती प्रकर्षेण स्तुत्यगुणगणं प्राप्नुवती वाशीव वाङ्नामैतत् स्तुतिरूपा वाक् सुन्वते। षष्ठ्यर्थे चतुर्थीवक्तव्येतिचतुर्थी। सुन्वतः सोमाभिषवं कुर्वतोयजमानस्य संबंधिनी यथा स्तुत्यगुणबाहुल्येन विस्तीर्णाभवति तथेन्द्रः पप्रथइत्यर्थः। प्रथिताच सा मिमीतइव इन्द्रमाहात्म्यं यथावत्परिच्छिनत्त्येव॥ १२॥

अथ त्रयोदशी—

यंविप्रा॑उ॒क्थवा॑हसो॒भिप्र॒म॒न्दुरा॒यवः॑।
घृ॒तंनपि॑प्य॒आ॒सन्यृ॒तस्य॒यत्॥ १३॥

यम्। विप्राः॑। उ॒क्थऽवा॑हसः। अ॒भि॒ऽप्र॒म॒न्दुः।
आ॒यवः॑। घृ॒तम्। न। पि॒प्ये॒। आ॒सनि॑। ऋ॒तस्य॑। यत्॥ १३॥

१ ऐ०ब्रा० १. ३. १ २ नि० ६. १४।

विप्रामेधाविनः उक्थवाहसः उक्थानां शस्त्राणां वोढारः प्रापयितारः आयवोमनुष्याः यमिन्द्रं अभिप्रमन्दुः अभि प्रकर्षेण मादयन्ति मदेर्व्यत्ययेन परस्मैपदं द्विर्वचनपरेण छन्दसिवेतिवचनात् द्विर्वचनाभावः। तस्येन्द्रस्य आसनि आस्ये पद्दन्नित्यादिना आस्य शब्दस्यासन्नादेशः घृतंन घृतमिव शुद्धं पिप्ये सेचनेन वर्धये प्यायतेश्छान्दसोलिट् लिङ्यङोश्चेतिपीभावः। किंतद्धविः ऋतस्य यज्ञस्य संबंधि यत्सोमलक्षणं हविरस्ति तदित्यर्थः॥१३॥

अथ चतुर्दशी–

उतस्वराजेअदितिःस्तोममिन्द्रायजीजनत्।
पुरुप्रशस्तमूतयऋतस्ययत्॥ १४ ॥

उत। स्वऽराजे। अदितिः। स्तोमम्। इन्द्राय।
जीजनत्। पुरुऽप्रशस्तम्। ऊतये। ऋतस्य। यत्॥ १४ ॥

उतापिच अदितिरदीनादेवमाता अखंडनीयस्तोतावा स्वराजे स्वयमेव राजमानायेन्द्राय पुरुप्रशस्तं बहुलमुत्कृष्टं यद्वा पुरुभिर्बहुभिः प्रशंसितव्यं स्तोमं स्तोत्रं जीजनत् अजीजनत् अजनयत्। किमर्थं ऊतये रक्षणार्थं यत्स्तोत्रं ऋतस्य सत्यस्य वा संबंधि भवति तं स्तोममित्यन्वयः॥ १४ ॥

अथ पंचदशी–

अभिवह्नयऊतयेनूषतप्रशस्तये।
नदेवविव्रताहरीऋतस्ययत्॥ १५ ॥ ३ ॥

अभि। वह्नयः। ऊतये। अनूषत। प्रऽशस्तये। न।
देव। विऽव्रता। हरी इति। ऋतस्य। यत्॥ १५ ॥ ३ ॥

वह्नयोवोढारऋत्विजः ऊतये रक्षणार्थं प्रशस्तये प्रशस्त्यर्थंच अभ्यनूषत इन्द्रमभ्यस्तुवन् नु स्तुतौ कुटादिः हे देव दानादिगुणयुक्तेन्द्र नेति संप्रत्यर्थे संप्रति विव्रता विविधकर्माणौ हरी तदीयावश्वौ ऋतस्य यज्ञस्य सत्यस्य वा संबंधि यत् स्तोत्रं हविर्वा विद्यते तदभिलक्ष्य त्वां वहतइतिशेषः॥ १५॥

॥ इति षष्ठस्य प्रथमे तृतीयोवर्गः॥ ३ ॥

हे सत्पते सतां पालयितरिन्द्र सुन्वतः सोमाभिषवं कुर्वतोयजमानस्य यद्वा यद्विवा वृधोसि वर्धयिता भवसि वृधेरन्तर्णीतण्यर्थादिगुपधलक्षणः कः। यस्यच यजमानस्य उक्थे शस्त्रे वा शंसिते सति रण्यसि रमसे एवमपि इन्दुभिरस्मदीयैरेवसोमैः सम्यग्रमस्व ॥ १८ ॥

अथैकोनविंशी—

देवंदेवंवोवसइन्द्रमिन्द्रंगृणीषणि ।
अधायज्ञायतुर्वणेव्यानशुः ॥ १९ ॥

देवम्ऽदेवम् । वः । अवसे । इन्द्रम्ऽइन्द्रम् । गृणीषणि ।
अध । यज्ञाय । तुर्वणे । वि । आनशुः ॥ १९ ॥

हे ऋत्विग्यजमानाः वोयुष्माकमवसे रक्षणाय देवं देवमिन्द्रं इन्द्रं दानादिगुणयुक्तं इन्द्रः बहुषु देशेषु युगपत्प्रवृत्तेषु यागेषु तत्रतत्र हविःस्वीकरणाय बहूनि शरीराण्याददानः स्वयमेकोप्यनेकःसन् तत्रतत्र सन्निधत्ते तथाचनिगमांतरं—इन्द्रोमायाभिः पुरुरूपईयतइति[1]। तदपेक्षयेयं वीप्सा बहुविभज्य वर्तमानं सर्वं तमिन्द्रं गृणीषणि अहं स्तौमि गृणातेर्लिङि छान्दसमेतद्रूपम्। यद्वा कारकमेवैतत् गृणीषणि स्तवनेच्छायां सत्यां अधानंतरं सर्वमिन्द्रं मदीयाः स्तुतयः व्यानशुर्व्याप्नुवन्ति किमर्थं तुर्वणे तूर्णं संभजनाय यज्ञाय यागार्थं। यद्वा क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। यज्ञं यष्टव्यं तुर्वणे शत्रूणां हिंसितारं तूर्णसंभजनं वा ॥१९॥

अथ विंशी—

यज्ञेभिर्यज्ञवाहसंसोमेभिःसोमपातमम् ।
होत्राभिरिन्द्रंवावृधुर्व्यानशुः ॥ २० ॥ ४ ॥

यज्ञेभिः । यज्ञऽवाहसम् । सोमेभिः । सोमऽपातमम्।
होत्राभिः । इन्द्रम् । ववृधुः । वि । आनशुः ॥ २० ॥ ४ ॥

यज्ञेभिर्यज्ञैर्यजमानसाधनैर्हविर्भिर्यज्ञवाहसं यज्ञे वोढव्यं प्रापणीयं यज्ञैर्यागैः यज्ञानां यजमानानां फलस्य प्रापयितारं वा अथवा यज्ञवाहसं यज्ञेनप्राप्यं न केवलमेकेन यज्ञेन अपितु सर्वैरित्याह यज्ञेभिरिति एवं सोमेभिः सोमपातमं सर्वेषां सोमानां पातृतममिन्द्रं

---

1 ऋ० सं० ४. ७. ३३.।

आदित् अनंतरमेव हर्यता हर्यतौ कांतौ हर्यगतिकान्त्योः भृमृदृशीत्यादिना औणादिकःअतच् प्रत्ययः ईदृशौ हरी अश्वौ ते त्वां ववक्षतुः आवहताम् ॥ २५ ॥

॥ इति पष्ठस्य प्रथमे पञ्चमोवर्गः ॥ ५ ॥

अथ षड्विंशी–

यदावृत्रंनदीवृतंशवसावज्रिन्नवधीः ।
आदित्तेहर्यताहरीववक्षतुः ॥ २६ ॥

यदा । वृत्रम् । नदीऽवृतम् । शवसा । वज्रिन् । अवधीः । आत् ।
इत् । ते । हर्यता । हरी इति । ववक्षतुः ॥ २६ ॥

हे वज्रिन् वज्रवन्निन्द्र नदीवृतं नदीनां नयआपः श्रूयतेहि–अहावनदताहतेतस्मादानद्यो-नामस्थेति[1] । वाआवृण्वंतं वृत्रमवर्षणशीलंमेघमसुरं वा यदा यस्मिन्काले शवसा बलेनावधीरहिं-सीः शिष्टं समानं ॥ २६ ॥

अथ सप्तविंशी–

यदातेविष्णुरोजसात्रीणिपदाविचक्रमे ।
आदित्तेहर्यताहरीववक्षतुः ॥ २७ ॥

यदा । ते । विष्णुः । ओजसा । त्रीणि । पदा । विऽचक्रमे । आत् ।
इत् । ते । हर्यता । हरी इति । ववक्षतुः ॥ २७ ॥

हे इन्द्र ते तव अनुजोविष्णुर्व्यापनशीलोदेवः ओजसा बलेन यदा यस्मिन्काले त्रीणि पदा पदानि पदत्रयरूपेण त्रीन् लोकान् विचक्रमे विक्रांतवान् परिच्छिन्नवान् गतमन्यत् ॥ २७ ॥

अथाष्टाविंशी–

यदातेहर्यताहरीवावृधातेदिवेदिवे ।
आदित्तेविश्वाभुवनानियेमिरे ॥ २८ ॥

यदा । ते । हर्यता । हरी इति । ववृधाते इति । दिवेऽदिवे । आत् ।
इत् । ते । विश्वा । भुवनानि । येमिरे ॥ २८ ॥

---

1 तै० सं० ५.६.१.

हे इन्द्र त्वदीयौ हर्यता हर्यतौ कांतौ हरीहरणशीलावश्वौ दिवेदिवे प्रतिदिवसं यदा यस्मिन्काले ववृधाते प्रवृद्धौ बभूवतुः। आदित् अनंतरमेव ते त्वया विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि येमिरे नियम्यन्तेस्म ॥ २८ ॥

अथैकोनत्रिंशी—

यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे ।
आदित्ते विश्वा भुवनानि येमिरे ॥ २९ ॥

यदा । ते । मारुतीः । विशः । तुभ्यम् । इन्द्र । निऽयेमिरे । आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ २९ ॥

हे इन्द्र तुभ्यं त्वदर्थं मारुतीर्मारुत्यः मरुद्रूपाः ते त्वदीयाः विशः प्रजाः यदा यस्मिन्काले नियेमिरे नियच्छन्ति भूतजातानि । अन्यद्गतम् ॥ २९ ॥

अथ त्रिंशी—

यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः ।
आदित्ते विश्वा भुवनानि येमिरे ॥ ३० ॥

यदा । सूर्यम् । अमुम् । दिवि । शुक्रम् । ज्योतिः । अधारयः । आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ ३० ॥

हे इन्द्र अमुं विप्रकृष्टं शुक्रं निर्मलं ज्योतिर्द्योतमानं सूर्यं सर्वस्य प्रेरकं शोभनवीर्यं वा आदित्यं दिवि द्युलोके जगतः प्रकाशनाय यदा यस्मिन्काले अधारयः धारितवानसि। समानमन्यत् ॥ ३० ॥

अथैकत्रिंशी—

इमान्त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः ।
जामिं पदेव पिप्रतीं प्राध्वरे ॥ ३१ ॥

होत्राभिः स्तुतिभिः वावृधुः स्तोतारोवर्धयन्ति ताश्च क्रियमाणाः स्तुतयः व्यानशुः तमिन्द्रं व्याप्नुवन्तिच अश्नोतेर्व्यत्ययेन परस्मैपदम् ॥ २० ॥

॥ इति षष्ठस्य प्रथमे चतुर्थोवर्गः ॥ ४ ॥

अथैकविंशी–

म॒हीर॑स्य॒प्रणी॑तयः पू॒र्वीरु॒तप्रश॑स्तयः ।
विश्वा॒वसू॑निदा॒शुषे॒व्या॑नशुः ॥ २१ ॥

म॒हीः । अ॒स्य॒ । प्रऽनी॑तयः । पू॒र्वीः । उ॒त । प्रऽश॑स्तयः ।
विश्वा॑ । वसू॑नि । दा॒शुषे॑ । वि । आ॒न॒शुः॒ ॥ २१ ॥

अस्येन्द्रस्य प्रणीतयः प्रणयनानि धनानां प्रकृष्टप्रापणानि महीर्महत्यः महान्ति भवन्ति उतापिच अस्य प्रशस्तयः प्रशंसनीयाः कीर्तयः पूर्वीर्बह्व्योविस्तृततमाभवन्ति तादृग्विधाः दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय दातुं विश्वा विश्वानि सर्वाणि वसूनि धनानि व्यानशुर्व्याप्नुवन्ति ॥ २१ ॥

अथ द्वाविंशी–

इन्द्रं॑वृ॒त्राय॒हन्त॑वेदे॒वासो॑दधिरेपु॒रः ।
इन्द्रं॒वाणी॑रनूषता॒सम्ओज॑से ॥ २२ ॥

इन्द्र॑म् । वृ॒त्राय॑ । हन्त॑वे । दे॒वासः॑ । द॒धि॒रे॒ । पु॒रः ।
इन्द्र॑म् । वाणीः॑ । अ॒नू॒ष॒त॒ । सम् । ओज॑से ॥ २२ ॥

देवासोदेवाः वृत्राय हन्तवे वृत्रमावरकमसुरं हंतुं हंतेस्तुमर्थे तवेन्प्रत्ययः इममिन्द्रं पुरोदधिरे पुरस्तात् स्वामित्वेनाधारयन् वाणीः वाण्यः स्तुतिरूपावाचश्च इममेवेन्द्रमनूषत स्तुवन्ति किमर्थं सं समीचीनाय ओजसे बलार्थं यथा वृत्रवधानुगुणमुत्कृष्टं बलमस्यजायते तथास्तुवन्तीत्यर्थः ॥ २२ ॥

अथ त्रयोविंशी–

म॒हान्तं॑महि॒नाव॒यं॒स्तोमे॑भि॒र्हव॑नश्रु॒त॑म् ।
अ॒र्कैर॒भिप्रणो॑नुमः॒समोज॑से ॥ २३ ॥

महान्तम् । महिना । वयम् । स्तोमेभिः । हवनऽश्रुतम् । अर्कैः ।
अभि । प्र । नोनुमः । सम् । ओजसे ॥ २३ ॥

महिना महिम्ना महान्तं सर्वेभ्योधिकं हवनश्रुतं हवनस्याह्वानस्य श्रोतारमिन्द्रं वयं स्तोमेभिः स्तोमैः त्रिवृत्पञ्चदशादिभिः अर्कैः अर्चनसाधनैः शस्त्रैश्च अभिप्रणोनुमः आभिमुख्येन प्रकर्षेण पुनःपुनः स्तुमः ॥ २३ ॥

अथ चतुर्विंशी—

नयंविविक्तोरोदसीनान्तरिक्षाणिवज्रिणम् ।
अमादिदस्यतित्विषेसमोजसः ॥ २४ ॥

न । यम् । विविक्तः । रोदसी इति । न । अन्तरिक्षाणि । वज्रिणम् ।
अमात् । इत् । अस्य । तित्विषे । सम् । ओजसः ॥ २४ ॥

यं वज्रिणं वज्रवन्तमिन्द्रं रोदसी द्यावापृथिव्यौ नविविक्तः नपृथक्कुरुतः स्वसमीपात् पृथक्कर्तुं नशक्नुतः द्यावापृथिव्यौ व्याप्य यइन्द्रोवर्धते इत्यर्थः विचिर्पृथग्भावे अन्तरिक्षाणि अन्तराक्षांतानि द्यावापृथिव्योर्वर्तमानानि गंधर्वादीनां स्थानानिच यन्नपृथक्कुर्वन्ति अस्येन्द्रस्य अमादित् अमति रुजति शत्रूननेनेत्यमोबलं बलादेव सर्वं तित्विषे सर्वं जगद्दीप्यते । किमर्थं ओजसः बलस्य संगमाय । यद्वा ओजःशब्दाद्विहितस्य विनो बहुलंछन्दसीतिलुक् ओजस्विनो बलवतोस्येन्द्रस्येति योज्यम् । समित्युपसर्गः सतित्विषइत्यनेन संबध्यते ॥ २४ ॥

षोडशिशस्त्रे यदिन्द्रपृतनाज्यइति तृचः स्तूयतेहि—यदिन्द्रपृतनाज्येयन्तेअस्तुहर्यतइत्यौष्णिहवार्हतौतृचाविति ।

तृचे प्रथमा सूक्ते पञ्चविंशी—

यदिन्द्रपृतनाज्येदेवास्त्वादधिरेपुरः ।
आदित्तेहर्यताहरीववक्षतुः ॥ २५ ॥ ५॥

यत् । इन्द्र । पृतनाज्ये । देवाः । त्वा । दधिरे । पुरः । आत् । इत् ।
ते । हर्यता । हरी इति । ववक्षतुः ॥ २५ ॥ ५ ॥

हे इन्द्र पृतनाज्ये संग्रामनामैतत् पृतनाः सेनाः अजंति गच्छन्त्यस्मिन्निति वा पृतना जीयतेत्रेति वा पृतनाज्यं संग्रामस्तत्र त्वा त्वां यद्यदा देवाः पुरोदधिरे वृत्रहननाय पुरतोधारयन्

इमाम् । ते । इन्द्र । सुऽस्तुतिम् । विप्रः । इयर्ति । धीतिऽभिः ।
जामिम् । पदाऽइव । पिप्रतीम् । प्र । अध्वरे ॥ ३१ ॥

हे इन्द्र विप्रो मेधावी स्तोता अध्वरे यज्ञे इमां पुरोवर्तिनीं पिप्रतीं पूजयन्तीं प्री-णयन्तीं वा सुष्टुतिं शोभनां स्तुतिं धीतिभिः कर्मभिः परिचरणैः सार्धं ते त्वां प्रेयर्ति प्रेरयति प्रगमयति । जामिं पदेव यथा बंधुभूतं पुरुषं उत्कृष्टानि पदानि स्थानानि प्रा-पयति तद्वत् ॥ ३१ ॥

अथ द्वात्रिंशी—

यदस्य धामनि प्रिये समीचीनासो अस्वरन् ।
नाभा यज्ञस्य दोहना प्राध्वरे ॥ ३२ ॥

यत् । अस्य । धामनि । प्रिये । समऽईचीनासः । अस्वरन् ।
नाभा । यज्ञस्य । दोहना । प्र । अध्वरे ॥ ३२ ॥

अध्वरे यज्ञे अस्येन्द्रस्य धामनि स्थाने तेजसि वा प्रिये प्रीणयितव्ये सति समी-चीनासः संगताः स्तोतारः यद्यदा प्रास्वरन् प्रकर्षेणास्तुवन्, स्वृशब्दोपतापयोः। अयाळिन्द्र-स्यप्रिपाधामानीतिहिनिगमः । कस्मिन्देशे नाभा नाभौ पृथिव्या नाभिस्थानीये मध्ये यज्ञ-स्य यजनसाधनस्य सोमस्य दोहना दोहने दोहनाधिकरणेभिषवस्थाने वेद्यामित्यर्थः तदा-नीं धनं प्रदेहीति उत्तरत्र संबंधः ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः ।
होतेव पूर्वचित्तये प्राध्वरे ॥ ३३ ॥ ६ ॥

सुऽवीर्यम् । सुऽअश्व्यम् । सुऽगव्यम् । इन्द्र । दद्धि । नः ।
होताऽइव । पूर्वऽचित्तये । प्र । अध्वरे ॥ ३३ ॥ ६ ॥

तै० ब्रा० २.५.११.।

सुवीर्यं शोभनवीर्योपेतं स्वश्व्यं शोभनेनाश्वसंघेन च युक्तं सुगव्यं शोभनगोसंघयुक्तंच धनं हे इन्द्र नोस्मभ्यं दृद्धि ददस्व। ददद्दाने अनुदात्तेत् व्यत्ययेन परस्मैपदम् छांदसः शपोलुक्। अहं च अध्वरे यागे होतेव यथा मानुषोहोता ऋत्विक् स्तौति एवमेव पूर्वचित्तये पूर्वमज्ञानाय अन्येभ्यः स्तोतृभ्यः पूर्वमेवास्मत्स्तोत्रपरिज्ञानाय प्राशंसिषमिति शेषः॥ ३३॥

॥ इति पष्ठस्य प्रथमे षष्ठोवर्गः॥ ६॥

॥ इत्यष्टमे मण्डले द्वितीयोनुवाकः॥ २॥

तृतीयेनुवाकेऽष्टसूक्तानि तत्रेन्द्रःसुतेष्विति त्रयस्त्रिंशदृचं प्रथमं सूक्तं काण्वस्य नारदस्यार्षमौष्णिहमैन्द्रं तथाचानुक्रांतम्–इन्द्रःसुतेषु नारदइति। महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ पूर्वसूक्तेनसहोक्तोविनियोगः। तृतीयेपर्यायेच्छावाकशस्त्रे इन्द्रःसुतेष्वितितृचः स्तोत्रियः सूत्यतेहि–इन्द्रःसुतेषुसोमेषु यइन्द्रसोमपातमइति।

तत्र प्रथमा–

इन्द्रः॑सु॒तेषु॒सोमे॑षु॒क्रतुं॑पुनीतउ॒क्थ्य॑म्।
वि॒देद्वृ॒धस्य॒दक्ष॑सोम॒हान्हिषः॥ १॥

इन्द्रः॑। सु॒तेषु॑। सोमे॑षु। क्रतु॑म्। पु॒नी॒ते॒। उ॒क्थ्य॑म्। वि॒दे।
वृ॒धस्य॑। दक्ष॑सः। म॒हान्। हि। सः॥ १॥

सोमेषु सुतेष्वभिषुतेषु सत्सु इन्द्रस्तान्पीत्वा क्रतुं कर्मणां कर्तारं उक्थ्यं स्तोतारंच पुनीते शोधयति। यद्वा सोमेष्वभिषुतेषु उक्थ्याख्यं क्रतुं यागं तैः सोमैः पुनीते यजमानैः पूतं कारयति। किमर्थं वृधस्य वर्धकस्य दक्षसोबलस्य विदे लाभाय सवादशइन्द्रोमहान् हि महान् खलु अवएवं कर्तुं शक्नोतीतिभावः॥ १॥

अथ द्वितीया–

स॒म॒र्थमे॑व्यो॒मनि॑दे॒वानां॒सद॑नेवृ॒धः।
सु॒पा॒रः सु॒श्रव॑स्तम॒ः सम॑प्सु॒जित्॥ २॥

सः । प्रथमे । विऽओमनि । देवानाम् । सदने । वृधः । सुऽपारः ।
सुश्रवःऽतमः । सम् । अप्सुऽजित् ॥ २ ॥

सइन्द्रः प्रथमे प्रथिते विस्तीर्णे मुख्ये वा व्योमनि विशेषेणरक्षके देवानां सदने सीदंत्यस्मिन्निति सदनं स्थानंस्वर्गाख्यं तत्र स्थितः सन् वृधोयजमानानां वर्धयिता भवति। तथा सुपारः सुष्ठु पारयिता प्रारब्धस्य सम्यक्परिसमापयिता सुश्रवस्तमः अतिशयेन शोभनं श्रवोन्नं यशो-वा यस्य सतथोक्तः समप्सुजित् सम्यक् अप्सूदकेषु प्राप्येषु सत्सु तद्विघातिनोवृत्रादेर्जेता यद्वा आपइत्यंतरिक्षनाम अंतरिक्षे वर्तमानानामसुराणां जेता तमह्वइत्युत्तरत्रसंबंधः ॥ २ ॥

अथ तृतीया—

तमह्वेवाजसातयइन्द्रंभरायशुष्मिणम् ।
भवानःसुम्नेअन्तमःसखावृधे ॥ ३ ॥

तम् । अह्वे । वाजऽसातये । इन्द्रम् । भराय । शुष्मिणम् । भव । नः ।
सुम्ने । अन्तमः । सखा । वृधे ॥ ३ ॥

तं पूर्वोक्तगुणं शुष्मिणं बलवंतमिन्द्रं वाजसातये यज्ञानामन्नानां वा सातिर्लाभोयस्मिन् तादृशाय भराय संग्रामाय यद्वा भ्रियंते तस्मिन् हवींषीति भरोयज्ञः प्रायेण संग्रामनामानि यज्ञनामत्वेन च दृश्यंते भराय यज्ञार्थं अह्वे आह्वये । लिपिसिचिह्वश्च आत्मनेपदेष्वन्यतरस्यामिति ह्वयतेश्छान्दसे लुङि च्लेरङादेशः । हे इन्द्र त्वं सुम्ने सुखे धनेषा लिप्सिते सति नोस्माकं अंतमः अंतिकतमः सन्निकृष्टतमोभव । तमेतादेश्चेति अन्तिकशब्दस्य तादिलोपः । तथा वृधे वर्धनार्थं च सखा समानख्यानोमित्रभूतोभव ॥ ३॥

अथ चतुर्थी—

इयन्तइन्द्रगिर्वणोरातिःक्षरतिसुन्वतः ।
मन्दानोअस्यबर्हिषोविराजसि ॥ ४ ॥

इयम् । ते । इन्द्र । गिर्वणः । रातिः । क्षरति । सुन्वतः । मन्दानः ।
अस्य । बर्हिषः । वि । राजसि ॥ ४ ॥

हे गिर्वणः गीर्भिः स्तुतिभिर्वननीय संभजनीयेन्द्र ते तुभ्यं त्वदर्थं इयं पुरोवर्तिनी सुन्वतः सोमाभिषवं कुर्वतोयजमानस्य संबन्धिनी रातिः ऋत्विग्भिः दीयमाना सोमाहुतिः क्षरति आहवनीयं प्रतिगच्छति त्वंच तया मन्दानोमन्दमानोमोदमानः तृप्यन् अस्य बर्हिषोपरस्य विराजसि विशेषेणेशिषे। राजतिरैश्वर्यकर्मा ॥ ४ ॥

अथ पञ्चमी—

नूनंतदिन्द्रदद्धिनोयत्त्वासुन्वन्तईमहे ।
रयिंनश्चित्रमाभरास्वर्विदम् ॥ ५ ॥ ७ ॥

नूनम् । तत् । इन्द्र । दद्धि । नः । यत् । त्वा । सुन्वन्तः । ईमहे ।
रयिम् । नः । चित्रम् । आ । भर । स्वःऽविदम् ॥ ५ ॥ ७ ॥

हे इन्द्र नूनमवश्यं तद्धनं नोस्मभ्यं दद्धि ददस्व ददतेर्दाने व्यत्ययेन परस्मैपदम् छांदसः शपोलुक् । यद्धनं त्वा त्वां सुन्वंतः सोममभिषुण्वंतोवयं ईमहे । अपिच चित्रं चायनीयं स्वर्विदं सर्वस्य लंभकं यद्वा स्वर्गस्य वेदितारं आस्तिकं रयिं पुत्रं नोस्मभ्यमाभराहर॥ ५॥

॥ इति षष्ठस्य प्रथमे सप्तमोवर्गः ॥ ७ ॥

अथ षष्ठी—

स्तोतायत्तेविचर्षणिरतिप्रशर्धयद्गिरः ।
वयाइवानुरोहतेजुषन्तयत् ॥ ६ ॥

स्तोता । यत् । ते । विऽचर्षणिः । अतिऽप्रशर्धयत् । गिरः ।
वयाःऽइव । अनु । रोहते । जुषन्त । यत् ॥ ६ ॥

हे इन्द्र विचर्षणिर्विशेषेण द्रष्टा स्तोता ते तुभ्यं त्वदर्थं गिरः स्तुतीः यद्यदा अतिप्रशर्धयत् अतिशयेन प्रशर्धयित्रीरकरोत् शत्रूणां प्रसहनसमर्थाः । शृधुप्रसहने । यद्यदाच ता गिरः जुषंत त्वामसेवन्त अप्रीणयन् वा । तदा वयाइव शाखाइव यथा एकस्मिन्वृक्षे प्रद्वाः शाखाउपरि प्ररोहंति तथा अनुरोहते स्तुत्या सर्वेगुणाः त्वयि प्ररोहन्ति ॥ ६ ॥

अथ सप्तमी—

प्रत्नवज्जनयागिरःशृणुधीजरितुर्हवम् ।
मदेमदेववक्षिथासुकृत्वने ॥ ७ ॥

प्रत्नऽवत् । जनय । गिरः । शृणुधि । जरितुः । हवम् । मदेऽमदे ।
ववक्षिथ । सुऽकृत्वने ॥ ७ ॥

हे इन्द्र प्रत्नवत् पुरा यथा स्तोतृभ्योपेक्षितफलप्रदानेन स्तुतीर्जनयसि एवमिदानीमपि गिरः स्तुतीर्जनयोत्पादय जरितुः स्तोतुः हवमाह्वानंच शृणुधि शृणु जानीहि। तादृशस्त्वं मदेमदे सोमेन तर्पणेतर्पणे सति सुकृत्वने शोभनकर्त्रे यजमानाय ववक्षिथापेक्षितं फलं वहसि ददासीत्यर्थः ॥ ७ ॥

अथाष्टमी—

क्रीळन्त्यस्यसूनृताआपोनप्रवतायतीः ।
अयाधियायउच्यतेपतिर्दिवः ॥ ८ ॥

क्रीळन्ति । अस्य । सूनृताः । आपः । न । प्रऽवता । यतीः ।
अया । धिया । यः । उच्यते । पतिः । दिवः ॥ ८ ॥

अस्येन्द्रस्य सूनृताः प्रियसत्यात्मिकावाचः क्रीळन्ति विहरन्ति तत्रदृष्टांतः—प्रवता प्रवणेन मार्गेण यतीर्गच्छन्त्यआपोन आपइव यथानिम्नोन्नतेन पथा गच्छन्त्यआपउत्पतननिपतनेन विहरन्ति तद्वत् दिवः स्वर्गस्य पतिः पालयिता यइन्द्रः अया अनया धिया स्तुत्या उच्यते प्रतिपाद्यते अस्येन्द्रस्येत्यन्वयः ॥ ८ ॥

अथ नवमी—

उतोपतिर्यउच्यतेकृष्टीनामेकइद्वशी ।
नमोवृधैरवस्युभिःसुतेरण ॥ ९ ॥

उतो इति । पतिः । यः । उच्यते । कृष्टीनाम् । एकः । इत् ।
वशी । नमःऽवृधैः । अवस्युऽभिः । सुते । रण ॥ ९ ॥

उतो अपिच वशी वशयिता एकइव् एकएव कृष्टीनां मनुष्याणां पतिः पालयितेति य-इन्द्रउच्यते कैः नमोवृधैः नमसा स्तोत्रेण हविषा वा वर्धयितृभिः अवस्युभिः रक्षणेच्छुभिः सत्वं पूर्वोक्ते सुतेभिषुते सोमे रण रमस्व । यद्वा हे स्तोतः तमिन्द्रं सुते सोमे स्तुहि रणतिः शब्दार्थः ॥ ९ ॥

अथ दशमी–

स्तुहिश्रुतंविपश्चितंहरीयस्यंप्रसक्षिणा ।
गन्तारादाशुषोगृहंनमस्विनः ॥ १० ॥ ८ ॥

स्तुहि । श्रुतम् । विपःऽचितम् । हरी इति । यस्य । प्रऽसक्षिणा ।
गन्तारा । दाशुषः । गृहम् । नमस्विनः ॥ १० ॥ ८ ॥

हे स्तोतः विपश्चितं विशिष्टज्ञानं श्रुतं विश्रुतं प्रख्यातं तमिन्द्रं स्तुहि प्रशंस । यस्येन्द्रस्य हरी अश्वौ प्रसक्षिणा शत्रूणां प्रसहनशीलौ नमस्विनोहविष्मतः दाशुषोदत्तवतोयजमानस्य गृहं गंतारा गमनशीलौच तमिन्द्रं स्तुहीति संबंधः गमेस्ताच्छीलिकस्तृन् ॥ १० ॥

॥ इति षष्ठस्य प्रथमेऽष्टमोवर्गः ॥ ८ ॥

अथैकादशी–

तूतुजानोमहेमतेश्वेभिःप्रुषितप्सुभिः ।
आयाहियज्ञमाशुभिःशमिद्धिते ॥ ११ ॥

तूतुजानः महेऽमते । अश्वेभिः । प्रुषितप्सुऽभिः । आ । याहि ।
यज्ञम् । आशुऽभिः । शम् । इत् । हि । ते ॥ ११ ॥

हे महेमते महते फलाय मतिर्बुद्धिर्यस्यासौ महेमतिः अलुक् छान्दसः सतादृश हे इन्द्र तूतुजानस्त्वरमाणः सन् प्रुषितप्सुभिः स्निग्धरूपैराशुभिः शीघ्रगामिभिरश्वेभिः अश्वैर्यज्ञमस्मदीयमायाह्यागच्छ । हि यस्मात्ते तव तस्मिन् मखे शमित् सुखं विद्यतएव अतआगच्छेत्यर्थः ॥ ११ ॥

अथ द्वादशी—

इन्द्रं॑शविष्ठसत्पते॒र॒यिंगृ॒णत्सु॑धारय ।
श्र॒वः॑सू॒रिभ्यो॑अ॒मृतं॑वसु॒त्वनम् ॥ १२ ॥

इन्द्र॑ । श॒वि॒ष्ठ॒ । स॒त्ऽप॒ते॒ । र॒यिम् । गृ॒ण॒त्ऽसु॑ ।
धा॒र॒य॒ । श्रवः॑ । सू॒रिऽभ्यः॑ । अ॒मृत॑म् । व॒सु॒ऽत्वनम् ॥ १२ ॥

हे शविष्ठ बलवत्तम सत्पते सतां पालयितरिन्द्र गृणत्स्वस्मासु रयिं धनं धारयाऽव- स्थापय । अपिच सूरिभ्यः स्तोतृभ्योऽमृतमनश्वरं वसुत्वनं व्याप्तिमत् श्रवोन्नं यशोवा दे- हीति शेषः ॥ १२ ॥

अथ त्रयोदशी—

हवे॑त्वा॒सूर॒उदि॑ते॒हवे॑म॒ध्यन्दि॑नेदि॒वः ।
जु॒षा॒णइ॑न्द्र॒सप्ति॑भि॒र्न॒आग॑हि ॥ १३ ॥

हवे॑ । त्वा॒ । सूरे॑ । उत्ऽइ॑ते । हवे॑ । म॒ध्यन्दि॑ने । दि॒वः ।
जु॒षा॒णः । इ॒न्द्र॒ । सप्ति॑ऽभिः । नः॒ । आ । ग॒हि॒ ॥ १३ ॥

हे इन्द्र सूरे सूर्ये उदिते उदयं प्राप्ते सति प्रातःसवने त्वा त्वां हवे आह्वये । तथा दिवोदिवसस्य मध्यन्दिने मध्यभागे माध्यन्दिने सवने त्वां हवे आह्वये । हे इन्द्र सत्वं जु- षाणः प्रीयमाणः सन् सप्तिभिः सर्पणशीलैरश्वैर्नोस्मानागत्यागच्छ ॥ १३ ॥

अथ चतुर्दशी—

आतू॒ग॑हि॒प्रतु॒द्र॑व॒मत्स्वा॑सु॒तस्य॒गोम॑तः ।
तन्तुं॑तनुष्व॒पूर्व्यं॒यथा॑वि॒दे ॥ १४ ॥

आ । तु । ग॒हि॒ । प्र । तु । द्र॒व॒ । मत्स्व॑ । सु॒तस्य॑ ।
गोऽम॑तः । तन्तु॑म् । त॒नु॒ष्व॒ । पू॒र्व्यम् । यथा॑ । वि॒दे ॥ १४ ॥

हे इन्द्र तु क्षिप्रमागह्यागच्छ आगत्यच तु क्षिप्रं भद्रव सोमोयत्र निवसति तं देशं प्रति शीघ्रं गच्छ । गत्वाच गोमतः गोविकारैः पयःप्रभृतिभिः श्रयणद्रव्यैर्युक्तस्य सुतस्याभिषुतस्य सोमस्य पानेन मत्स्व माद्य हृष्टोभव । तदनंतरं यथा अहं विदे उपलभे तथा पूर्व्यं पूर्वैःकृतं तंतुं विस्तृतं यज्ञं तनुष्व सम्यङ्निष्पादय फलोत्पादनसमर्थं कुर्वित्यर्थः ॥ १४ ॥

अथ पंचदशी–

यच्छ॒क्रासि॑परा॒वति॒यद॑र्वा॒वति॑वृत्रहन् ।
यद्वा॑समु॒द्रेअन्ध॑सोऽवि॒तेद॑सि ॥ १५ ॥ ९ ॥

यत् । श॒क्र॒ । असि॑ । प॒रा॒ऽवति॑ । यत् । अ॒र्वा॒ऽवति॑ । वृ॒त्र॒ऽह॒न् ।
यत् । वा॒ । स॒मु॒द्रे । अन्ध॑सः । अ॒वि॒ता । इत् । अ॒सि॒ ॥ १५ ॥ ९ ॥

हे शक्रेन्द्र परावति दूरदेशे यद्यदि असि भवसि हे वृत्रहन् यद्यदिवा अर्वावति समीपे भवसि वर्तसे यद्वा यदिवा समुद्रे जलधारेंतरिक्षे वा वर्तसे तस्मात्सर्वस्मात्स्थानादागत्य अन्धसः अन्नस्य सोमलक्षणस्य पानेन अवितेदसि रक्षितैव भवसि ॥ १५ ॥

॥ इति पष्ठस्य प्रथमे नवमो वर्गः ॥ ९ ॥

अथ षोडशी–

इन्द्रं॑वर्ध॑न्तुनो॒गिर॒इन्द्रं॑सु॒तास॒इन्द॑वः ।
इन्द्रे॑ह॒विष्म॑ती॒र्विशो॑अरा॒णिषुः ॥ १६ ॥

इन्द्र॑म् । व॒र्ध॑न्तु॒ । नः॒ । गिरः॑ । इन्द्र॑म् । सु॒तासः॑ ।
इन्द॑वः । इन्द्रे॑ । ह॒विष्म॑तीः । विशः॑ । अ॒रा॒णि॒षुः॒ ॥ १६ ॥

नोस्माकं गिरः स्तुतिरूपावाचः इन्द्रं वर्धन्तु वर्धयन्तु सुतासोभिषुताः इन्दवः सोमाश्चास्मदीयास्तमिन्द्रं वर्धयन्तु हविष्मतीर्हविष्मत्यः हविर्भिश्चरुपुरोडाशादिभिर्युक्ताः विशः प्रजाः तस्मिन्निन्द्रे अराणिषुररंसिषुः ॥ १६ ॥

अथ सप्तदशी—

तमिद्विप्रांअवस्यवःप्रवत्वतीभिरूतिर्भिः ।
इन्द्रंक्षोणीरवर्धयन्वयाईव ॥ १७ ॥

तम् । इत् । विप्राः । अवस्यवः । प्रवत्वतीभिः ।
ऊतिऽभिः । इन्द्रम् । क्षोणीः । अवर्धयन् । वयाःऽइव ॥ १७ ॥

विप्रामेधाविनः अवस्यवोरक्षणकामाः स्तोतारः तमित् तमेवेन्द्रं प्रवत्वतीभिः प्रकर्षेणागन्त्रीभिः ऊतिभिस्तृप्तिकरीभिराहुतिभिः स्तुतिभिर्वा वर्धयन्ति तथा क्षोणीः क्षोण्यः क्षोणीति पृथिवीनाम तदुपलक्षिताः सर्वे लोकावयाइव वृक्षस्य शाखाइव तदधीनाः सन्तोवर्धयन्वर्धयन्ति ॥ १७ ॥

अथाष्टादशी—

त्रिकद्रुकेषुचेतनंदेवासोयज्ञमंत्नत ।
तमिद्वर्धन्तुनोगिरःसदावृंधम् ॥ १८ ॥

त्रिऽकद्रुकेषु । चेतनम् । देवासः । यज्ञम् । अत्नत ।
तम् । इत् । वर्धन्तु । नः । गिरः । सदाऽवृधम् ॥ १८ ॥

त्रिकद्रुकेषु त्रिकद्रुकानाम ज्योतिर्गौरायुरिति त्रीण्याभिप्लविकान्यहानि तेषु देवासो देवाः चेतनं चेतयितारमिन्द्रं यज्ञं यष्टव्यं अत्नत अतन्वताकुर्वत तनोतेर्लङि छान्दसोविकरणस्य लुक् तनिपत्योश्छन्दसीत्युपधालोपः । तमित् तमेवेन्द्रं नोस्माकं गिरः स्तुतयश्च वर्धन्तु वर्धयन्तु । कीदृशं सदावृधं सर्वदास्तोतॄणां वर्धयितारम् ॥ १८ ॥

अथैकोनविंशी—

स्तोतायत्तेअनुंव्रतउक्थान्यृंतुथादधे ।
शुचिःपावकउच्यतेसोअद्भुतः ॥ १९ ॥

स्तोता । यत् । ते । अनुंऽव्रतः । उक्थानि । ऋतुऽथा ।
दधे । शुचिः । पावकः । उच्यते । सः । अद्भुतः ॥ १९ ॥

हे इन्द्र यत् यस्य ते तव स्तोता अनुव्रतः अनुकूलकर्मासन् ऋतुथा ऋतुषु कालेकाले उक्थानि शस्त्रादि दधे विधत्ते करोति लोपस्तआत्मनेपदेष्वितितलोपः। परोर्वचः परोक्षस्तुतः। सइन्द्रः अद्भुतः आश्चर्यभूतः शुचिः शुद्धः पावकोन्येषामपिशोधकइति उच्यते स्तोतृभिः स्तूयते ॥ १९ ॥

अथ विंशी–

तदिद्रुद्रस्यचेततियह्वंप्रत्नेषुधामसु ।
मनोयत्राविततद्दधुर्विचेतसः ॥ २० ॥ १० ॥

तत् । इत् । रुद्रस्य । चेतति । यह्वम् । प्रत्नेषु । धामऽसु ।
मनः । यत्र । वि । तत् । दधुः । विऽचेतसः ॥ २० ॥ १० ॥

तदिद् तदेव रुद्रस्य रुत् दुःखं तस्य द्रावयितुरीश्वरस्य यह्वं अपत्यं मरुत्संघात्मकं यद्वा रुद्रशब्देन लक्षणया मरुद्गणउच्यते रुद्रस्य रुद्रपुत्रस्य मरुद्गणस्य यह्वं महन्नामैतत् महत्तदेवबलं प्रत्नेषु चिरंतनेषु धामसु पृथिव्यादिस्थानेषु चेतति ज्ञायते वर्तते यत्र यस्मिन्बलविषये विचेतसो-विशिष्टज्ञानाः स्तोतारः तत्प्रसिद्धं मनोमननसाधनं स्तोत्रं विदधुः कुर्वन्ति तदित्यन्वयः ॥२०॥

॥ इति पञ्चस्य प्रथमे दशमोवर्गः ॥१०॥

अथैकविंशी–

यदिमेसख्यमावरइमस्यपाह्यन्धसः ।
येनविश्वाअतिद्विषोअतारिम ॥ २१ ॥

यदि । मे । सख्यम् । आऽवरः । इमस्य । पाहि ।
अन्धसः । येन । विश्वाः । अति । द्विषः । अतारिम ॥ २१॥

हे इन्द्र मे मम सख्यं सखित्वं यद्यावरः यदि आभिमुख्येन वृणुयाः तर्हि इमस्य अस्य हलिलोपाभावश्छान्दसः पुरोवर्तिनः अंधसः अन्नस्य सोमलक्षणस्य स्वांशं पाहि पिब। अंधसइति कर्मणि वा षष्ठी पिबतेश्छान्दसोविकरणस्य शपोलुक्।येन त्वत्पीतेन सोमेन हेतुना वयं विश्वाः सर्वाद्विषोद्वेष्ट्रीः शत्रुसेनाः अत्यतारिम अतितरेम अतिक्रामेम ॥ २१ ॥

अथ द्वाविंशी–

कृदात॑इन्द्रगिर्वणःस्तोताभ॑वातिशन्त॑मः ।
कृदानोगव्ये॒अश्व्ये॒वसौद॑धः ॥ २२ ॥

कृदा । ते॒ । इन्द्र॒ । गिर्वणः । स्तोता । भ॒वाति॒ ।
शम्ऽतमः । कृदा । नः । गव्ये । अश्व्ये । वसौ । दुधः ॥ २२ ॥

हे गिर्वणोगिरां स्तुतीनां संभक्तरिन्द्र ते तव स्तोता शंतमः सुखतमोतिशयेनसुखवान्, कदा कस्मिन्काले भवाति भवेत् कदा कस्मिंश्च काले नोस्मान् गव्ये गोसमूहे अश्व्ये अश्वसंघे वसौ निवासभूतेन्यस्मिन्नपि धने दधः धारयेः ॥ २२ ॥

अथ त्रयोविंशी–

उतते॒सुष्टु॑ताहरी॒वृष॑णावहतो॒रथ॑म् ।
अजुर्य॑स्य॒मदिन्त॑मं॒यमीम॑हे ॥ २३ ॥

उ॒त । ते॒ । सुऽस्तुता । हरी॒ इति॑ । वृष॑णा । व॒ह॒तः ।
रथ॑म् । अ॒जु॒र्य॑स्य॑ । म॒दिन्त॑मम् । यम् । ईम॑हे ॥ २३ ॥

उतापिच हेइन्द्र सुष्टुता शोभनस्तुतौ वृषणा वृषणौ कामानां वर्षितारौ हरी अश्वौ अजुर्यस्य जरारहितस्य ते तव रथं इदानीं वहतः अस्मन्निकटं प्रापयतः मदिन्तमं अतिशयेन मदवन्तं यं त्वां धनं ईमहे याचामहे तस्य तवहरयस्त्वयः ॥ २३ ॥

अथ चतुर्विंशी–

तमी॑महेपुरुष्टु॒तंय॒ह्वंप्र॒त्नाभि॑रू॒तिभिः॑ ।
निब॒र्हिषि॑प्रि॒ये॑सद॒दध॑द्वि॒ता ॥ २४ ॥

तम् । ईम॒हे॒ । पु॒रु॒ऽस्तुतम् । य॒ह्वम् । प्र॒त्नाभिः॑ ।
ऊ॒तिऽभिः॑ । नि । ब॒र्हिषि॑ । प्रि॒ये । स॒द॒त् । अध॑ । द्वि॒ता ॥ २४ ॥

यद्वं महांतं पुरुष्टुतं बहुभिः स्तुतमिन्द्रं मन्द्राभिः पुराणीभिः ऊतिभिस्तृप्तिकरीभिः सोमाहुतिभिर्हेतुभिः ईमहे याचामहे सचेन्द्रः प्रिये प्रीतिकरे बर्हिषि आस्तीर्णे दर्भे निषदन् निषीदतु हविःस्वीकरणायोपविशतु अधानंतरं द्विता द्वैधं वर्तमानानि चरुपुरोडाशादीनि सोमलक्षणानिच हवींषि स्वीकरोत्विति शेषः ॥ २४ ॥

अथ पंचविंशी—

वर्धस्वासुपुरुष्टुतऋषिष्टुताभिरूतिभिः ।
धुक्षस्वंपिप्युषीमिषमवाचनः ॥ २५ ॥ ११ ॥

वर्धस्व । सु । पुरुऽस्तुत । ऋषिऽस्तुताभिः । ऊतिऽभिः ।
धुक्षस्व । पिप्युषीम् । इषम् । अव । च । नः ॥ २५ ॥ ११ ॥

हे पुरुष्टुत बहुभिः स्तुतेन्द्र ऋषिस्तुताभिः ऋषिभिर्मंत्रदर्शिभिः पुरा स्तुताभिः ऊतिभीरक्षाभिः सु सुष्ठु वर्धस्वास्मान्वर्धय। यद्वा ऋषिभिरित्यादिवाभिः ऊतिभिः स्तुतिभिः त्वं वर्धस्व वृद्धिं प्राप्नुहि। नोस्मभ्यंच पिप्युषीं प्रवृद्धां इषं इष्यमाणमन्नं अवधुक्षस्व अवाङ्मुखमस्मदभिमुखं धुक्षस्व क्षारय देहीत्यर्थः ॥ २५ ॥

॥ इति पष्ठस्य प्रथमे एकादशोवर्गः ॥ ११ ॥

अथ षड्विंशी—

इन्द्रत्वमवितेदसीत्थास्तुवतोअद्रिवः ।
ऋतादियर्मितेधियंमनोयुजम् ॥ २६ ॥

इन्द्र । त्वम् । अविता । इत् । असि । इत्था । स्तुवतः । अद्रिऽवः ।
ऋतात् । इयर्मि । ते । धियम् । मनःऽयुजम् ॥ २६ ॥

हे अद्रिवः वज्रवन्निन्द्र त्वं इत्था इत्थमनेन प्रकारेण स्तुवतः स्तोत्रं कुर्वतोयजमानस्य अवितेदसि रक्षितैवभवसि। यतएवमतःकारणात् अहमपि ऋतायज्ञाद्धेतोः मनोयुजं मनसा मनोयोगेन स्तोत्रेण प्राप्यां ते त्वदीयां धियमनुग्रहबुद्धिं इयर्मि प्राप्नोमि। यद्वा ऋतात्सत्यभूताद् त्वत्तः स्तोत्रेण युक्तं त्वत्प्रीतिकरं कर्माहं प्राप्नोमि ॥ २६॥

अथ सप्तविंशी–

इहत्यासधमाद्यायुजानःसोमपीतये ।
हरीइन्द्रप्रतद्वसूअभिस्वर ॥ २७ ॥

इह । त्या । सधऽमाद्या । युजानः । सोमऽपीतये । हरी इति ।
इन्द्र । प्रतद्वसू इति प्रतत्ऽवसू । अभि । स्वर ॥ २७ ॥

हे इन्द्र इहास्मिन्यागे सोमपीतयेसोमपानायाभिस्वराभिगच्छ । किंकुर्वन् त्या त्यौ तौ प्रसिद्धौ सधमाद्या त्वया सह हविर्भिर्मादयितव्यौ तर्पयितव्यौ प्रतद्वसू प्राप्तवसू विस्तीर्णधनौ ईदृशौ हरी त्वदीयावश्वौ युजानः रथेन संयोजयन् ॥ २७ ॥

अथाष्टाविंशी–

अभिस्वरन्तुयेतवरुद्रासःसक्षतश्रियम् ।
उतोमरुत्वतीर्विशोअभिप्रयः ॥ २८ ॥

अभि । स्वरन्तु । ये । तव । रुद्रासः । सक्षत । श्रियम् ।
उतो इति । मरुत्वतीः । विशः । अभि । प्रयः ॥ २८ ॥

अभिस्वरंतु अभिगच्छंतु ते । हे इन्द्र तवानुचराः रुद्रासोरुद्रपुत्रा येमरुतः संति । अपिच ते श्रियं श्रयणीयमिमं यज्ञं सक्षत सचंतु प्राप्नुवन्तु । उतो अपिच मरुत्वतीर्मरुद्भिर्युक्ताः विशः अन्यापि दैवीःप्रजाः प्रयः अन्ननामैतत् अस्मदीयं हविर्लक्षणमन्नमभिगच्छन्तु ॥ २८ ॥

अथैकोनत्रिंशी–

इमाअस्यप्रतूर्तयःपदंजुषन्तयद्दिवि ।
नाभायज्ञस्यसन्दधुर्यथाविदे ॥ २९ ॥

इमाः । अस्य । प्रऽतूर्तयः । पदम् । जुषन्त । यत् । दिवि ।
नाभा । यज्ञस्य । सम् । दधुः । यथा । विदे ॥ २९ ॥

अस्येन्द्रस्य संबंधिन्यः इमाः पूर्वोक्तामरुदादिरूपाः प्रजाः प्रतूर्तयः प्रकर्षेण शत्रूणां हिंसित्र्यः पदं स्थानं जुषंत असेवन्त । दिवि द्युलोके यत्स्थानं अन्यैर्दुःप्रापमस्ति

तत्पदमित्यर्थः । अपिच ताः यज्ञस्य ज्योतिष्टोमादेः नाभा नाभौ नाभिस्थानीये हविर्धाने उत्तरवेद्यां वा संदधुः संनिदधते । यथा येन प्रकारेण विदे विन्दे अपेक्षितं धनं लभे तथेत्यर्थः । यद्वा विदे ज्ञानाय यथास्माकं वरं ज्ञानं भवति तथेत्यर्थः ॥ २९ ॥

अथ त्रिंशी–

अयंदीर्घायचक्षसेप्राचिप्रयत्यध्वरे ।
मिमीतेयज्ञमानुषग्विचक्ष्य ॥ ३० ॥ १२ ॥

अयम् । दीर्घाय । चक्षसे । प्राचि । प्रऽयति । अध्वरे ।
मिमीते । यज्ञम् । आनुषक् । विऽचक्ष्य ॥ ३० ॥ १२ ॥

प्राचि प्राचीने प्रागायते यज्ञगृहे अध्वरे हिंसारहिते यज्ञे प्रयति गच्छति प्रवर्तमाने सति अयमिन्द्रः प्रवर्तमानं तं यज्ञं आनुषक् आनुषक्तमानुपूर्व्येण विचक्ष्य विशेषेण दृष्ट्वा मिमीते निष्पादयति किमर्थं दीर्घायायताय चक्षसे दर्शनाय । यद्वा द्रष्टव्याय फलाय ॥३०॥

॥ इति पञ्चस्य प्रथमे द्वादशोवर्गः ॥ १२ ॥

अथैकत्रिंशी–

वृषायमिन्द्रतेरथउतोतेवृषणाहरी ।
वृषात्वंशतक्रतोवृषाहवः ॥ ३१ ॥

वृषा । अयम् । इन्द्र । ते । रथः । उतो इति । ते । वृषणा ।
हरी इति । वृषा । त्वम् । शतक्रतो इति शतऽक्रतो । वृषा । हवः ॥३१॥

हे इन्द्र ते त्वदीयः अयं रथः वृषा कामानां वर्षिता उतो अपिच तव हरी अश्वौ वृषणा वृषणौ वर्षितारौ हे शतक्रतो बहुकर्मन् बहुप्रज्ञेन्द्र त्वं च वृषा वर्षिता कामानां तथा हवस्त्वद्विषयमाह्वानं च वृषा वर्षिता त्वद्विषयमाह्वानमपि कामान्वर्षति किमु वक्तव्यं त्वदीयारथादयोवर्षन्तीति भावः ॥ ३१ ॥

अथ द्वात्रिंशी–

वृषाग्रावावृषामदोवृषासोमोअयंसुतः ।
वृषायज्ञोयमिन्वसिवृषाहवः ॥ ३२ ॥

वृषा । ग्रावा । वृषा । मदः । वृषा । सोमः । अयम् ।
सुतः । वृषा । यज्ञः । यम् । इन्वसि । वृषा । हवः ॥ ३२ ॥

ग्रावा अभिषवसाधनपाषाणः वृषा वर्षिता कामानां हे इन्द्र त्वदीयः सोमपानजन्योमदश्च वृषा वर्षिता सुतस्त्वदर्थमभिषुतोयं सोमश्च वृषा वर्षिता यं यज्ञमिन्वसि त्वं प्राप्नोषि सच यज्ञोवृषा अभीष्टस्य फलस्य वर्षिता त्वदीयोहवश्च वृषा ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

वृषात्वावृषणंहुवेवज्रिञ्चित्राभिरूतिभिः ।
वावन्थहिप्रतिष्टुतिंवृषाहवः ॥ ३३ ॥ १३ ॥

वृषा । त्वा । वृषणम् । हुवे । वज्रिन् । चित्राभिः ।
ऊतिऽभिः । ववन्थ । हि । प्रतिऽस्तुतिम् । वृषा । हवः ॥३३॥१३॥

हे वज्रिन् वज्रवन्निन्द्र वृषणं वृषाणं वर्षितारं त्वा त्वां वृषा वर्षिता हविषामासेक्ताऽहं चित्राभिश्चायनीयाभिः नानाविधाभिर्वा ऊतिभिस्तृप्तिकरीभिःस्तुतिभिः हुवे आह्वये । हि यस्मात् त्वं प्रतिष्टुतिं त्वामभिलक्ष्य कृतं स्तोत्रं ववन्थ वनसि संभजसि अतस्त्वदीयोहवआह्वानं वृषा वर्षिता। यद्वा हवोह्वातव्योवृषा वर्षिता त्वां यस्मात् स्तुतिं वनसि तस्मात् त्वां हुवइत्यर्थः॥३३॥

॥ इति पञ्चमस्य प्रथमे त्रयोदशोवर्गः ॥ १३ ॥

यदिन्द्राहमिति पञ्चदशर्चं द्वितीयं सूक्तं गोषूक्त्यश्वसूक्तिनोः काण्वगोत्रयोरार्षं गायत्रमैन्द्रं तथाचानुक्रान्तम्— यदिन्द्रपञ्चोना गोषूक्त्यश्वसूक्तिनौ काण्वायनाविति । महाव्रते निष्केवल्यएतत्सूक्तम् । तथैव पञ्चमारण्यकेसूत्र्यते—यदिंद्राहंयथात्वं प्रसम्राजंचर्षणीनामितिसूक्ते इति । तृतीये पर्याये ब्रह्मशस्त्रेपीदंसूक्तं सूत्रितंच—यदिन्द्राहंयतेमहइति।

तत्र प्रथमा—

यदिन्द्राहंयथात्वमीशीयवस्वएकइत् । स्तोतामेगोषखास्यात्॥१॥

यत् । इन्द्र । अहम् । यथा । त्वम् । ईशीय । वस्वः । एकः ।
इत् । स्तोता । मे । गोऽसखा । स्यात् ॥ १ ॥

हे इन्द्र यथा त्वं एकइव एकएव केवलं वस्वोवसुनोधनस्य ईशिषे एवमपि यद्यदि अहं ईशीय ऐश्वर्ययुक्तःस्याम् तदानीं मे मम स्तोता गोसखा स्यात् गोभिः सहितोभवेत् ईश्वरस्य तव स्तोता कुतोहेतोः गोः सहितोन भवेत् अपितु भवेदित्यभिप्रायः ॥ १॥

अथ द्वितीया–

शिक्षेयमस्मैदित्सेयंशचीपतेमनीषिणे । यदहंगोपतिःस्याम् ॥ २॥

शिक्षेयम् । अस्मै । दित्सेयम् । शचीऽपते । मनीषिणे । यत् । अहम् । गोऽपतिः । स्याम् ॥ २ ॥

हे शचीपते शक्तिमन्निन्द्र अस्मै मनीषिणे मनसईशित्रे स्तोत्रे दित्सेयं दातुमिच्छेयम् तदनंतरं शिक्षेयं प्रार्थितं धनं दद्यां च । यद्यदि अहं गोपतिः गवामधिपतिः स्यां भवेयम् त्वत्प्रसादादितिशेषः ॥ २ ॥

अथ तृतीया–

धेनुष्टइंद्रसूनृतायजमानायसुन्वते । गामश्वंपिप्युषीदुहे ॥ ३ ॥

धेनुः । ते । इन्द्र । सूनृता । यजमानाय । सुन्वते । गाम् । अश्वम् । पिप्युषी । दुहे ॥ ३ ॥

हे इन्द्र ते तव सूनृता स्तुतिरूपा पाग्धेनुः दोग्ध्री गौर्भूत्वा सुन्वते सोमाभिषवं कुर्वते यजमानाय गामश्वं च उपलक्षणमेतत् गवाश्वादिकं सर्वमभिलषितं दुहे दुग्धे । किंकुर्वती पिप्युषी तमेव प्रवर्धयित्री ॥ ३ ॥

अथ चतुर्थी–

नतेवर्तास्तिराधसइन्द्रदेवोनमर्त्यः । यद्दित्ससिस्तुतोमघम् ॥ ४ ॥

न । ते । वर्ता । अस्ति । राधसः । इन्द्र । देवः । न । मर्त्यः । यत् । दित्ससि । स्तुतः । मघम् ॥ ४ ॥

हे इन्द्र ते तव राधसो धनस्य स्तोतृभ्यो दातव्यस्य वर्तो निवारको देवो नास्ति न विद्यते। न मर्त्यः मनुष्योपि निवारको नास्ति। स्तुतः स्तोतृभिः प्रख्यापितगुणः सन् यन्मघं मघं मंहनीयं धनं दित्ससि त्वं दातुमिच्छसि ॥ ४ ॥

अथ पञ्चमी–

यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि॥५॥१४॥

यज्ञः। इन्द्रम्। अवर्धयत्। यत्। भूमिम्। वि। अवर्तयत्।
चक्राणः। ओपशम्। दिवि ॥ ५ ॥ १४ ॥

यज्ञो यजमानैरनुष्ठीयमानो यागः इन्द्रं देवमवर्धयत् श्रूयते हि–इन्द्र इदं हविरजुषतावीवृधत महोज्यायोऽकृतेति[1]। स इन्द्रो यद्यस्माद्भूमिं पृथिवीं व्यवर्तयत् वृष्ट्यादिप्रदानेन विशेषेण वर्तमानामकरोत्। किं कुर्वन् दिव्यन्तरिक्षे मेघं ओपशं उपेत्य शयानं चक्राणः कुर्वन् यद्वा आत्मनि समवेतो वीर्यविशेष ओपशः तमन्तरिक्षे कुर्वन् ॥ ५ ॥

॥ इति पष्ठस्य प्रथमे चतुर्दशो वर्गः ॥ १४ ॥

अथ षष्ठी–

वावृधानस्य ते वयं विश्वा धनानि जिग्युषः। ऊतिमिन्द्रा वृणीमहे॥६॥

वावृधानस्य। ते। वयम्। विश्वा। धनानि। जिग्युषः। ऊतिम्।
इन्द्र। आ। वृणीमहे ॥ ६ ॥

हे इन्द्र वावृधानस्य वर्धमानस्य विश्वा विश्वानि सर्वाणि धनानि शत्रुसंबंधीनि जिग्युषो जितवतस्ते तव ऊतिं रक्षां वयमावृणीमहे आभिमुख्येन संभजामहे ॥ ६ ॥

चातुर्विंशिकेहनि प्रातःसवने मरुत्वतीयशस्त्रे व्यन्तरिक्षमतिरदित्ययं पर्यासस्तृचः सूत्र्यते हि–व्यन्तरिक्षमतिरत्स्यावाश्वस्य सुष्वत इति तृचाः पर्यासा इति। अहर्गणेषु द्वितीयादिष्वहःस्वपि तस्यैव तस्मिन्नेव शस्त्रेऽयं पर्यासस्तृचः सूत्रितं च–पर्यासाकद्रुर्होरहः शस्यानीति होत्रकाद्वितीयादिष्वेवेति।

[1] तै० ब्रा० ३.५.९.।

तत्र प्रथमा सूक्ते सप्तमी—

व्यं१न्तरिक्षमतिरन्मदेसोमस्यरोचना । इन्द्रोयदभिनद्वलम् ॥ ७॥

वि । अन्तरिक्षम् । अतिरत् । मदे । सोमस्य । रोचना । इन्द्रः ।
यत् । अभिनत् । वलम् ॥ ७ ॥

सोमस्यपानेन मदे हर्षे सति रोचना रोचमानमन्तरिक्षं अयमिन्द्रोव्यतिरत् व्यवर्धयत् य॰
त् यस्मात्कारणात् वलं आवृत्य स्थितमसुरं मेघं वा अभिनत् व्यदारयत् ॥ ७ ॥

अथाष्टमी—

उद्गाआजदङ्गिरोभ्यआविष्कृण्वन्गुहासतीः । अर्वाञ्चंनुनुदेवलम् ॥८॥

उत् । गाः । आजत् । अङ्गिरःऽभ्यः । आविः । कृण्वन् ।
गुहा । सतीः । अर्वाञ्चम् । नुनुदे । वलम् ॥ ८ ॥

अंगिरोभ्यऋषिभ्यः वलानुचरैः पणिभिरपहृतागाः उदाजत् उदगमयत् किंकुर्वन् गुहा
गुहायां बिले सतीः विद्यमानाः यथा नदृश्यन्ते तथा पणिभिर्गूढाः ता गाः आविष्कृण्वन् प्रका-
शयन् अपिच पणीनां अधिपतिं वलमसुरमपि अर्वाञ्चमवोमुखं नुनुदे प्रेरितवान् ॥ ८ ॥

अथ नवमी—

इन्द्रेणरोचनादिवोदृळ्हानिदृंहितानिच । स्थिराणिनपराणुदे ॥ ९॥

इन्द्रेण । रोचना । दिवः । दृळ्हानि । दृंहितानि । च । स्थिराणि ।
न । पराऽनुदे ॥ ९ ॥

दिवोद्युलोकस्य संबंधीनि रोचना रोचमानानि देवगृहात्मकानि नक्षत्राणि इन्द्रेण दृढा-
नि दृढावयवानि बलवन्ति कृतानि दृंहितानि च दृढीकृतानि यथा एकत्रैवभस्येनावतिष्ठन्ते त-
थाकृतानीत्यर्थः । यद्वा वृह दृहि वृहि वृद्धौ दृंहितानि वर्धितानीत्यर्थः । अपिच स्थिराणि
स्थास्नूनि दृढानि तानि न पराणुदे परानोदनीयानि नभवन्ति न केनापि स्थानात्प्रच्यावयितुं
शक्यानीत्यर्थः नुदप्रेरणे अस्मात्कर्मार्थइति केन्प्रत्ययः ॥ ९ ॥

अथ दशमी—

अपामूर्मिर्मदन्निव स्तोमइन्द्राजिरायते । विते मदाअराजिषुः ॥१०॥१५॥

अपाम् । ऊर्मिः । मदन्ऽइव । स्तोमः । इन्द्र । अजिरऽयते । वि । ते । मदाः । अराजिषुः ॥ १० ॥ १५ ॥

अपां समुद्राणामूर्मिस्तरंगः मदन्निव यथा माद्यन् उपर्युपरिजायते हे इन्द्र स्तोमस्त्वदीयं स्तोत्रं तथा अजिरायते अजिरः क्षिप्रगामी सइवाचरति । अपिच ते त्वदीया मदाः स्तोत्रजन्याः सोमपानजन्याश्च विअराजिषुः विशेषेण राजन्ते दीप्यन्ते ॥ १० ॥

॥ इति षष्ठस्य प्रथमे पञ्चदशोवर्गः ॥ १५ ॥

अथैकादशी—

त्वंहिस्तोमवर्धनइन्द्रास्युक्थवर्धनः । स्तोतॄणामुतभद्रकृत् ॥ ११ ॥

त्वम् । हि । स्तोमऽवर्धनः । इन्द्र । असि । उक्थऽवर्धनः । स्तोतॄणाम् । उत । भद्रऽकृत् ॥ ११ ॥

हे इन्द्र त्वं हि त्वं खलु स्तोमवर्धनः स्तोमेन त्रिवृत्पञ्चदशादिना वर्धनीयोसि तथा उक्थवर्धनः उक्थैः शस्त्रैर्वर्धनीयश्च त्वमेवासि । उतापिच स्तोतॄणामस्माकं भद्रकृत् भद्रस्य कल्याणस्य फलस्य कर्तापि त्वमेवासि ॥ ११ ॥

अथ द्वादशी—

इन्द्रमित्केशिनाहरीसोमपेयायवक्षतः । उपयज्ञंसुराधसम् ॥ १२ ॥

इन्द्रम् । इत् । केशिना । हरी इति । सोमऽपेयाय । वक्षतः । उप । यज्ञम् । सुऽराधसम् ॥ १२ ॥

केशिना केशिनौ मूर्धजानि लोमानि केशास्तद्वन्तौ हरी अश्वौ सुराधसं शोभनधनं इन्द्रमित् इन्द्रमेव यज्ञमुपास्मद्यज्ञं प्रति सोमपेयाय सोमपानार्थं वक्षतः वहतां यद्वा यज्ञं यष्टव्यमिदं उपवहताम् ॥ १२ ॥

अथ त्रयोदशी—

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः ॥१३॥

अपाम् । फेनेन । नमुचेः । शिरः । इन्द्र । उत् । अवर्तयः ।
विश्वाः । यत् । अजयः । स्पृधः ॥ १३ ॥

पुरा किलेन्द्रोऽसुरान् जित्वा न मुचिमसुरं ग्रहीतुं न शशाक सच युध्यमानस्तेनासुरेण जगृहे सच गृहीतमिन्द्रमेवमवोचत् त्वां विसृजामि रात्रावह्नि च शुष्केणार्द्रेण चायुधेन यदि मां माहिंसीरिति । सइन्द्रस्तेनविसृष्टः सन् अहोरात्रयोः संधौ शुष्कार्द्रविलक्षणेन फेनेन तस्यशिरश्चिच्छेद अयमर्थोऽस्यां प्रतिपाद्यते—हे इन्द्र अपां फेनेन वज्रीभूतेन नमुचेरसुरस्य शिरः उदवर्तयः शरीरादुद्गतमवर्तयःअच्छैत्सीरित्यर्थः । कदेतिचेत् यत्दा विश्वाः सर्वाः स्पृधः स्पर्धमानाः आसुरीः सेनाः अजयः जितवानसि ॥ १३ ॥

अथ चतुर्दशी—

मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥१४॥

मायाभिः । उत्ऽसिसृप्सतः । इन्द्र । द्याम् । आऽरुरुक्षतः । अव ।
दस्यून् । अधूनुथाः ॥ १४ ॥

हे इन्द्र मायाभिः उत्सिसृप्सतः सर्वत्र प्रसरतः द्यां आरुरुक्षतः द्युलोकं आरोहतः दस्यून् शत्रून् उपक्षपून् अवाधूनुथाः अवाङ्मुखं प्रेरितवानसि ॥ १४ ॥

अथ पञ्चदशी—

असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥१५॥१६॥

असुन्वाम् । इन्द्र । सम्ऽसदम् । विषूचीम् । वि । अनाशयः ।
सोमऽपाः । उत्ऽतरः । भवन् ॥ १५ ॥ १६ ॥

हे इन्द्र त्वं सोमपाः सोमस्य पाता भूत्वा उत्तरः उत्कृष्टतरोभवन् असुन्वां सोमाभिषवहीनां संसदं जनसंहतिं विषूचीं परस्परविरोधेन विषु नाना गच्छीं व्यनाशयः विशेषेण नाशयसि ॥ १५ ॥

॥ इति पञ्चमस्य प्रथमे षोडशोवर्गः ॥ १६ ॥

तम्वभीति नवोदशर्चं तृतीयं सूक्तं औष्णिहमैन्द्रं पूर्वोक्ताविवऋषी तथाचानुक्रम्यते—तम्वभिसप्तौष्णिहमिति । महाव्रते निष्केवल्ये औष्णिहतृचाशीतावुत्तमावर्जमेतत्सूक्तम् सूत्र्यते हि—तम्वभिप्रगायतेत्युत्तमामुद्धरतीति । आभिप्लविकेपृष्ठ्येषु तृतीयसवने ब्रह्मशस्त्रे आद्यस्तृचोवैकल्पिकोनुरूपः सूत्रितश्च—तम्वभिप्रगायततवयमुत्वामपूर्व्ये ति ।

तत्र प्रथमा—

तम्वभिप्रगायतपुरुहूतंपुरुष्टुतम् । इन्द्रंगीर्भिस्तविषमाविवासत ॥१॥

तम् । ऊँ इति । अभि । प्र । गायत । पुरुऽहूतम् । पुरुऽस्तुतम् ।
इन्द्रम् । गीःऽभिः । तविषम् । आ । विवासत ॥ १ ॥

पुरुहूतं बहुभिराहूतं पुरुष्टुतं बहुभिःस्तुतं तमु तमेवेन्द्रं हे स्तोतारः अभिप्रगायत अभिमुखं प्रकर्षेणस्तुध्वम् एतदेवस्पष्टयति तविषं महान्तमिन्द्रं गीर्भिर्वाग्भिः आविवासत परिचरत॥१॥

अथ द्वितीया—

यस्यद्विबर्हसोबृहत्सहोदाधाररोदसी । गिरीँरज्राँअपःस्वर्वृषत्वना ॥२॥

यस्य । द्विऽबर्हसः । बृहत् । सहः । दाधार । रोदसी इति ।
गिरीन् । अज्रान् । अपः । स्वः । वृषऽत्वना ॥ २ ॥

द्विबर्हसः द्वयोःस्थानयोः परिवृढस्य यस्येन्द्रस्य बृहन्महत् सहोबलं रोदसी द्यावापृथिव्यौ दाधार धारयति छान्दसोदित् तुजादित्वादभ्यासदीर्घः तथा अज्रान् क्षिप्रगमनान् गिरीन्

पर्वतान् मेघान् वा स्वः सरणशीला अपउदकानिच वृषत्वना वीर्येण यस्येन्द्रस्य बलंधारयति त-न्नावस्थापयति तम्बभीति पूर्वया संबंधः सत्वमित्युत्तरया वा ॥ २ ॥

अथ तृतीया—

सराजसिपुरुष्टुतँएकोवृत्राणिजिघ्नसे । इन्द्रजैत्राश्रवस्याचयन्तवे॥३॥

सः । राजसि । पुरुऽस्तुत । एकः । वृत्राणि । जिघ्नसे । इन्द्र । जैत्रा । श्रवस्या । च । यन्तवे ॥ ३ ॥

हे पुरुष्टुत बहुभिः स्तुतेन्द्र सपूर्वोक्तगुणस्त्वं राजसि दीप्यसे ईशिषे वा अपिच त्वमेकः सहायरहितः केवलएवसन् वृत्राण्यावरकाणि शत्रुजातानि जिघ्नसे हतवानसि । किमर्थं जैत्रा जैत्राणि जेतव्यानि धनानि श्रवस्या श्रवस्यानि श्रवणीयान्यन्नानि यद्वा श्रवणार्हाणि यशांसि च यंतवे यन्तुं नियन्तुं स्वाधीनं कर्तुम् ॥ ३ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्रह्मशस्त्रे तंतेमदमिति तृचोवैकल्पिकःस्तोत्रियः सूत्र्य-तेहि—तंतेमदंगृणीमसितम्वभिप्रगायतेति ।

तत्राद्या सूक्ते चतुर्थी—

तंतेमदंगृणीमसिवृषणंपृत्सुसासहिम् । उलोककृत्नुमद्रिवोहरिश्रियम्॥४॥

तम् । ते । मदम् । गृणीमसि । वृषणम् । पृत्ऽसु । ससहिम् । ऊँ इति । लोकऽकृत्नुम् । अद्रिऽवः । हरिऽश्रियम् ॥ ४ ॥

हे अद्रिवोवज्रवन्निन्द्र ते त्वदीयं तं मदं सोमपानजनितं हर्षं गृणीमसि गृणीमः प्रशंसामः गृशब्दे क्र्यादिः प्वादीनांह्रस्वः इदंतोमसीति मसइकारागमः । कीदृशं वृषणं वर्षितारं कामानां पृत्सु संग्रामेषु सासहिं शत्रूणामभिभवितारं लोककृत्नुं लोकस्य स्थानस्य कर्तारं हरिश्रियं ह-रिभ्यामश्वाभ्यां श्रयणीयं सेव्यं उशब्दः समुच्चये पदपूरणे वा ॥ ४ ॥

अथ पंचमी—

येनज्योतींष्यायवेमनवेचविवेदिथ ।
मन्दानोअस्यबर्हिषोविराजसि ॥ ५ ॥ १७ ॥

येनं । ज्योतींषि । आयवें । मनवे । च । विवेदिथ । मुन्दानः ।
अस्य । बर्हिषः । वि । राजसि ॥ ५ ॥ १७ ॥

हे इन्द्र येनात्मीयेन मदेन आयवे और्वशेयाय मनवे विवस्वतः पुत्राय च ज्योतींषि सूर्यादीनि वृत्रादिभिरावृतानि तद्वधेन विवेदिथ अलंभयःप्रज्ञापितवान् प्रकाशितवानसीत्यर्थः तेन मदेन मन्दानोमोदमानस्त्वं अस्य बर्हिषा वृद्धस्य यज्ञस्य विराजसि विशेषेणेशिषे । यद्वा अस्येति तृतीयार्थेषष्ठी अनेन बर्हिषा वृद्धेन हृष्यन् विराजसि विशेषेण दीप्यसे ॥ ५ ॥

॥ इति षष्ठस्य प्रथमे सप्तदशोवर्गः ॥ १७ ॥

अथ षष्ठी—

तद्द्याचित्तउक्थिनोनुष्टुवन्तिपूर्वथां । वृषपत्नीरपोजयादिवेदिवे ॥ ६ ॥

तत् । अद्य । चित् । ते । उक्थिनः । अनुं । स्तुवन्ति । पूर्वऽथा ।
वृषऽपत्नीः । अपः । जय । दिवेऽदिवे ॥ ६ ॥

हे इन्द्र ते त्वदीयं तत्प्रसिद्धं बलं अद्याचित् अद्यापि पूर्वथा पूर्वस्मिन्काले इव उक्थिनः शस्त्रिणः स्तोतारःअनुष्टुवन्ति क्रमेण प्रशंसन्ति तत्तं वृषपत्नीः वृषा वर्षिता पर्जन्यः पतिर्यासां तादृशीरपः दिवेदिवे प्रतिदिवसं जय स्वायत्तंकुरु ॥ ६ ॥

अथ सप्तमी—

तवृत्यादिन्द्रियंबृहत्तवशुष्ममुतक्रतुम् । वज्रंशिशातिधिषणावरेण्यम्॥७॥

तवं । त्यत् । इन्द्रियम् । बृहत् । तवं । शुष्मम् । उत । क्रतुम् ।
वज्रंम् । शिशाति । धिषणा । वरेण्यम् ॥ ७ ॥

हे इन्द्र तव त्यत् तत्प्रसिद्धं इन्द्रियमिन्द्रस्यलिंगं बृहत्प्रभूतं वीर्यं धिषणा स्तुतिः शिशाति निशयति तीक्ष्णीकरोति । तथा तव त्वदीयं शुष्मं शोषकं बलं उतापिच क्रतुं प्रज्ञानं बलं कर्म वा वरेण्यं वरणीयं वज्रमायुधंच स्तुतिः तीक्ष्णीकरोति ॥ ७ ॥

अथाष्टमी—

तवद्यौरिन्द्रपौंस्यंपृथिवीवर्धतिश्रवः । त्वामापःपर्वतासश्चहिन्विरे ॥८॥

नवं । द्यौः । इन्द्र । पौंस्यम् । पृथिवी । वर्धति ।
श्रवः । त्वाम् । आपः । पर्वतासः । च । हिन्विरे ॥ ८ ॥

हे इन्द्र तव त्वदीयं पौंस्यं बलं द्यौः वर्धति वर्धयति त्वदीयं श्रवो यशः पृथिवी वर्धयति वृधेर्ण्यन्ताल्लटि शपि छन्दस्युभयथेत्यार्धधातुकत्वाण्णेरनिटीतिणिलोपः तं त्वां आप उदकान्यन्तरिक्षाणि पर्वतासः पर्वताः पर्ववन्तोमेघाश्च गिरयश्चवा हिन्विरे प्रीणयन्ति स्वामित्वेन मामुवन्ति वा ॥ ८ ॥

अथ नवमी–

त्वांविष्णुर्बृहन्क्षयोमित्रोगृणातिवरुणः ।
त्वांशर्धोमदत्यनुमारुतम् ॥ ९ ॥

त्वाम् । विष्णुः । बृहन् । क्षयः । मित्रः । गृणाति ।
वरुणः । त्वाम् । शर्धः । मदति । अनु । मारुतम् ॥ ९ ॥

हे इन्द्र बृहन्महान् क्षयोनिवासहेतुर्विष्णुर्मित्रोवरुणश्च त्वां गृणाति स्तौति तथा मारुतं मरुत्संबंधि शर्धोबलं त्वामनु मदति तव मदमनुलक्ष्य पश्चान्माद्यति त्वामनु मादयति वा ॥ ९ ॥

अथ दशमी–

त्वंवृषाजनानांमंहिष्ठइन्द्रजज्ञिषे ।
सत्राविश्वास्वपत्यानिदधिषे ॥ १० ॥ १८ ॥

त्वम् । वृषा । जनानाम् । मंहिष्ठः । इन्द्र । जज्ञिषे ।
सत्रा । विश्वा । सुऽअपत्यानि । दधिषे ॥ १० ॥ १८ ॥

हे इन्द्र वृषा वर्षिता त्वं जनानां देवजनानां मध्ये मंहिष्ठोदातृतमोजज्ञिषे प्रादुर्भवसि।अतएव विश्वा सर्वाणि स्वपत्यानि शोभनैः पुत्रादिभिः सहितानि सत्रा सह दधिषे । यद्वा स्तोतृतमोजज्ञिषे प्रादुर्भवसि अतएव विश्वा सर्वाणि दातुं धारयसि ददासि वा ॥ १० ॥

॥ इति पञ्चस्य प्रथमेष्टादशोवर्गः ॥ १८ ॥

अथैकादशी—

सुत्रात्वंपुरुष्टुतुँएकोवृत्राणितोशसे ।
नान्यइन्द्रात्करणंभूयंइन्वति ॥ ११ ॥

सुत्रा । त्वम् । पुरुऽस्तुत । एकः । वृत्राणि । तोशसे ।
न । अन्यः । इन्द्रात् । करणम् । भूयः । इन्वति ॥ ११ ॥

हे पुरुष्टुत बहुभिः स्तुतेन्द्र त्वमेकोसहायएवसन् सत्रा महन्नामैतत् महान्ति वृत्राणि शत्रुजातानि यद्वा सत्रेति सहार्थे सहैव युगपदेव एकयत्नेनैव तोशसे हिनस्सि तोशतिर्वधकर्मा अकर्तुं शक्नानीतिभावः। अपिचास्मादिन्द्रादन्यः कश्चिद्भूयोबहुतरं करणं कर्म वृत्रवधादिकं न इन्वति प्राप्नोति इन्द्रएव कर्तुं शक्नोतीतिभावः ॥ ११ ॥

अथ द्वादशी—

यदिन्द्रमन्मशस्त्वानानाहवन्तऊतये ।
अस्माकेभिर्नृभिरत्रास्वर्जय ॥ १२ ॥

यत् । इन्द्र । मन्मऽशः । त्वा । नाना । हवन्ते ।
ऊतये । अस्माकेभिः । नृऽभिः । अत्र । स्वः । जय ॥ १२ ॥

हे इन्द्र यद्यस्मिन् संग्रामे त्वा त्वां मन्मशः मन्मना मननीयेन स्तोत्रेण नाना बहुप्रकारं हवन्ते आह्वयन्ति। किमर्थं ऊतये रक्षायै। अत्रास्मिन् संग्रामे अस्माकेभिः अस्माकैरस्मदीयैरेव नृभिर्नेतृभिः स्तोतृभिः आहूतः सन् स्वः शत्रुबलं जयाभिभव ॥ १२॥

अथ त्रयोदशी—

अरंक्षयायनोमहेविश्वारूपाण्याविशन् ।
इन्द्रंजैत्रायहर्षयाशचीपतिम् ॥ १३ ॥ १९ ॥

अरम् । क्षयाय । नः । महे । विश्वा । रूपाणि । आऽविशन् । इन्द्रम् । जैत्राय । हर्षय । शचीऽपतिम् ॥ १३ ॥ १९ ॥

हे स्तोतः महे महते नोस्माकं क्षयाय गृहनामैतत् गृहाय तादर्थ्ये चतुर्थी गृहार्थं अ-रमलं पर्याप्तं विश्वा विश्वानि व्याप्तानि रूपाणि इन्द्रगतानि गुणजातानि आविशन् स्तुत्या-व्यामुवन् शचीपतिं शचीतिकर्मनाम कर्मणां पालकं यद्वा शच्या इन्द्राण्याभर्तारं तमेवेन्द्रं जैत्राय जेतव्यधनार्थं हर्षय तोपय स्तुत्यापरिचरणेनवेति शेषः ॥ १२ ॥

॥ इति पष्ठस्य प्रथमे एकोनविंशोवर्गः ॥ १९ ॥

प्रसम्राजमिति द्वादशर्चं चतुर्थं सूक्तं इरिंविठिनाम्नः काण्वस्यार्षं गायत्रमैन्द्रं अनुक्रम्यतेहि—प्रसम्राजं द्वादशेरिंविठिरिति । अतिरात्रेद्वितीयेपर्यायेच्छावाकशस्त्रे एतत्सूक्तं सूत्रितं च—प्रसम्राजमुपक्रमस्वाभरेति। महाव्रतेपि निष्केवल्ये एतदादिकेदेसूक्ते उपरितनस्यान्त्यं द्वृचं वर्जयित्वा तथैवपंचमारण्यकेसूत्रितम्—प्रसम्राजंचर्षणीनामितिसूक्ते उत्तरस्योत्तमे उद्धरतीति।

तत्र प्रथमा—

प्रसम्राजंचर्षणीनामिन्द्रंस्तोतानव्यंगीर्भिः ।
नरंनृषाहंमंहिष्ठम् ॥ १ ॥

प्र । सम्ऽराजम् । चर्षणीनाम् । इन्द्रम् । स्तोत ।
नव्यम् । गीःऽभिः । नरम् । नृऽसहम् । मंहिष्ठम् ॥ १ ॥

चर्षणीनां मनुष्याणां मध्ये सम्राजम् सम्यग्राजमानं यद्वा मनुष्याणामधीश्वरमिन्द्रं हे स्तोतारः प्रस्तोत प्रकर्षेणस्तुत । कीदृशं गीर्भिः स्तुतिभिर्नव्यं स्तुत्यं नरं नेतारं नृषाहं नृणां शत्रुमनुष्याणां अभिभवितारं मंहिष्ठं दातृतमं ॥ १ ॥

अथ द्वितीया—

यस्मिन्नुक्थानिरण्यन्तिविश्वानिचश्रवस्या । अपामवोनसमुद्रे॥२॥

यस्मिन् । उक्थानि । रण्यन्ति । विश्वानि ।
च । श्रवस्या । अपाम् । अवः । न । समुद्रे ॥ २ ॥

यस्मिन्निन्द्रे उक्थानि शस्त्राणि रण्यंति रमंते विश्वानि सर्वाणि श्रवस्या श्रवस्यानि श्रवणीयानि हविर्लक्षणानि अन्नानिच रमन्ते तत्रदृष्टांतः—समुद्रे उदधौ अपामुदकानां अवोन अवति गच्छतीत्यवस्तरंगजालं तद्यथा समुद्रेन्तर्भवति तथारण्यन्तीत्यर्थः ॥ २ ॥

अथ तृतीया—

तंसुष्टुत्याविवासेज्येष्ठराजंभरेकृत्नुम् । महोवाजिनंसनिभ्यः ॥३॥

तम् । सुऽस्तुत्या । आ । विवासे । ज्येष्ठऽराजम् ।
भरे । कृत्नुम् । महः । वाजिनम् । सनिऽभ्यः ॥ ३ ॥

तमिन्द्रं सुष्टुत्या शोभनया स्तुत्या आविवासे परिचरामि कीदृशं ज्येष्ठराजं ज्येष्ठेषु प्रशस्यतमेषु देवेषु मध्ये राजमानम् राजतेः सत्सूद्विषेतिक्विप् भरे संग्रामे महोमहतः वृत्रवधादेः कर्तुं कर्तारं वाजिनमन्नवंतं बलवन्तं वा । किमर्थं सनिभ्योधनेभ्यः धनलाभायेत्यर्थः ॥ ३ ॥

अथ चतुर्थी—

यस्यानूनागभीरामदाउरवस्तरुत्राः । हर्षुमन्तःशूरसातौ ॥ ४ ॥

यस्य । अनूनाः । गभीराः । मदाः । उरवः ।
तरुत्राः । हर्षुऽमन्तः । शूरऽसातौ ॥ ४ ॥

यस्येन्द्रस्य मदाः सोमपानजनिताः अनूनाः अन्यूनाः गभीराः गांभीर्योपेताः उरवोविस्तीर्णाः तरुत्राः शत्रूणां तारकाः शूरसातौ शूरसंभजनीये संग्रामे हर्षुमन्तोहर्षयुक्ताः संग्रामोत्सुकाभवन्ति तमिन्द्रमिति पूर्वयोत्तरया वा संबंधः ॥ ४ ॥

अथ पंचमी—

तमिद्धनेषुहितेष्वधिवाकायहवन्ते । येषामिन्द्रस्तेजयन्ति ॥ ५ ॥

तम् । इत् । धनेषु । हितेषु । अधिऽवाकाय ।
हवन्ते । येषाम् । इन्द्रः । ते । जयन्ति ॥ ५ ॥

धनेषु हितेषु शत्रुषु निहितेषु प्राप्तेषु सत्सु तमित् तं पूर्वोक्तगुणमेवेन्द्रं अधिवाकाय अधिवचनाय पक्षपातवचनाय हवन्ते स्तोतारआह्वयन्ति। तत्रच येषां पक्षे इन्द्रोवर्तते तएव जयन्ति। जयेन तानि धनानि लभंते नान्ये ॥ ५ ॥

अथ षष्ठी—

तमिच्च्यौत्नैरार्यन्तितंकृतेभिश्चर्षणयः। एषइन्द्रोवरिवस्कृत् ॥६॥२०॥

तम्। इत्। च्यौत्नैः। आर्यन्ति। तम्। कृतेभिः।

चर्षणयः। एषः। इन्द्रः। वरिवःऽकृत् ॥ ६ ॥ २० ॥

तमित् तमेवेन्द्रं च्यौत्नैर्बलकरैः स्तोत्रैः आर्यन्ति आर्यमधिपं ईश्वरं कुर्वन्ति चर्षणयोमनुष्याः कृतेभिः कृतैः कर्मभिश्च आर्यन्ति एषएवंगुणकइन्द्रोवरिवस्कृत् धनस्य कर्ता भवति स्तोतॄणाम् ॥ ६ ॥

॥ इति षष्ठस्य प्रथमे विंशोवर्गः ॥२०॥

अथ सप्तमी—

इन्द्रोब्रह्मेन्द्रऋषिरिन्द्रःपुरुपुरुहूतः। महान्महीभिःशचीभिः॥७॥

इन्द्रः। ब्रह्मा। इन्द्रः। ऋषिः। इन्द्रः। पुरु।

पुरुऽहूतः। महान्। महीभिः। शचीभिः ॥ ७ ॥

अयमिन्द्रोब्रह्मा परिवृढः सर्वेभ्योधिकः सएवेन्द्रऋषिर्द्रष्टा सर्वस्यार्थजातस्य सइन्द्रः पुरु बहुलं पुरुहूतोबहुभिराहूतश्च महीभिर्महतीभिः शचीभिः क्रियाभिः वृत्रवधादिरूपाभिः महान्प्रभूतो भवति ॥ ७ ॥

अथाष्टमी—

सस्तोम्यःसहव्यःसत्यःसत्वातुविकूर्मिः। एकश्चित्सन्नभिभूतिः ॥ ८ ॥

सः। स्तोम्यः। सः। हव्यः। सत्यः। सत्वा।

तुविऽकूर्मिः। एकः। चित्। सन्। अभिऽभूतिः ॥ ८ ॥

सपूर्वोक्तइन्द्रः स्तोम्यः स्तोमार्हः स्तुत्यर्हः सएव हव्योह्वातव्यश्च सत्यः सत्सुसाधुः अवितथस्वभावोसत्वा शत्रूणामवसादयिता तुविकूर्मिः बहुकर्मा यतएवातः कारणात् एकश्चित्सन् असहायोपिभवन् अभिभूतिः शत्रूणामभिभविता तिरस्कर्ता भवति ॥ ८ ॥

अथ नवमी–

तमर्केभिस्तंसामभिस्तंगायत्रैश्चर्षणयः । इन्द्रंवर्धन्तिक्षितयः ॥ ९ ॥

तम् । अर्केभिः । तम् । सामऽभिः । तम् । गायत्रैः ।
चर्षणयः । इन्द्रम् । वर्धन्ति । क्षितयः ॥ ९ ॥

चर्षणयोद्रष्टारोमंत्राणां क्षितयोमनुष्यास्तमिन्द्रं अर्केभिरर्चनसाधनैर्यजूरूपैः मंत्रैर्वर्धन्ति वर्धयन्ति तथोद्गातारः सामभिर्गानविशिष्टैर्मंत्रैस्तंवर्धयन्ति तथा गायत्रैर्गायत्र्यादिछन्दोयुक्तैः शस्त्ररूपैरप्रगीतैर्मंत्रैः तमेवेन्द्रं होतारोवर्धयन्ति ॥ ९ ॥

अथ दशमी–

प्रणेतारंवस्योअच्छाकर्तारंज्योतिःसमत्सु । सासह्वांसंयुधामित्रान् ॥ १० ॥

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योतिः ।
समत्ऽसु । ससह्वांसम् । युधा । अमित्रां ॥ १० ॥

वस्योवसीयः प्रशस्तं वसु धनं अच्छाभिमुख्येन प्रणेतारं प्रापयितारं समत्सु संग्रामेषु शत्रुनिरसनेन ज्योतिःप्रकाशं जयलक्षणं कर्तारं करणशीलं करोतेःताच्छीलिकस्तृन् । कुतइत्यतआह युधा युद्धेन अमित्रान् शत्रून्ससह्वांसमभिभूतवंतं एवंगुणकमिन्द्रं वर्धयन्तीतिशेषः ॥ १० ॥

अथैकादशी–

सनःपप्रिःपारयातिस्वस्तिनावापुरुहूतः । इन्द्रोविश्वाअतिद्विषः ॥ ११ ॥

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा ।
पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥ ११ ॥

पप्रिः भाता पूरयिता पुरुहूतोबहुभिराहूतः सइन्द्रः विश्वाः सर्वाद्विषोद्वेष्ट्रीः प्रजाः नोस्मान् नावा तरणसाधनेन स्वस्ति क्षेमेण अतिपारयाति अतिशारयतु ॥ ११ ॥

अथ द्वादशी–

सत्वंनइन्द्रवाजेभिर्दशस्याचगातुयाचं।अच्छाचनःसुम्नंनेषि॥१२॥२१॥

सः। त्वम्। नः। इन्द्र। वाजेभिः। दशस्य।

च। गातुऽय। च। अच्छं। च। नः। सुम्नम्। नेषि॥ १२ ॥२१॥

हे इंद्र सतादृशस्त्वं नोस्मभ्यं वाजेभिर्बलैः दशस्यच धनं प्रयच्छच। दशस्यतिर्दानकर्मा। गातुय च गातुं मार्गं अस्मभ्यमिच्छ च गातुशब्दात् छंदसिपरेच्छायामिति क्यच् नच्छन्दस्यपुत्रस्येति दीर्घनिषेधः। तथा नोस्मान्सुम्नं सुखं चाच्छ नेषि अभिप्रापय ॥ १२ ॥

॥ इति षष्ठस्य प्रथमे एकविंशोवर्गः ॥ २१ ॥

आयाहीति पंचदशर्चं पञ्चमं सूक्तम्. इरिंबिठेरार्षमैन्द्रं चतुर्दशीबृहती पञ्चदशीसतोबृहती आदितस्त्रयोदशगायत्र्यः। अनुकम्यतेहि–आयाहिपंचोना प्रगाथांतमिति। अन्त्यंप्रगाथं वर्जयित्वा शिष्टस्य महाव्रतेउक्तोविनियोगः। ज्योतिष्टोमे प्रातःसवने ब्राह्मणाच्छंसिनः आज्यशस्त्रे स्तोत्रियानुरूपार्थाः तथानंतराः सप्तर्चश्च शंसनीयाः सूत्र्यतेहि–आयाहिसुषुमाहितइतिषट् स्तोत्रियानुरूपावनन्तराःसप्तेति। चातुर्विंशिकेहनि प्रातःसवने आग्नेयस्त्रोत्स्मिन्नेवशस्त्रे षळहस्तोत्रियसंज्ञकआवापार्थः सूत्रितञ्च–आयाहिसुषुमाहितइन्द्रमिद्गाथिनोबृहदिति।

तत्र प्रथमा–

आयाहिसुषुमाहितइन्द्रसोमंपिबाइमम्। एदंबर्हिःसदोमर्म ॥ १॥

आ। याहि। सुसुम। हि। ते। इन्द्र। सोमम्।

पिब। इमम्। आ। इदम्। बर्हिः। सदः। मर्म ॥ १ ॥

हे इन्द्र त्वमायाह्यागच्छ ते त्वदर्थं सुषुमाहि अभिषुतवंतः खलु सोमं वयं। तमिममभिषुतं सोमं पिब। तदर्थं मम मदीयं इदं बर्हिर्वेद्यामास्तीर्णं आसदः आसीद अभिनिषीद ॥१॥

अथ द्वितीया–

आत्वाब्रह्मयुजाहरीवहतामिन्द्रकेशिना। उपब्रह्माणिनःशृणु ॥२॥

आ। त्वा। ब्रह्मऽयुजा। हरी इति। वहताम्।

इन्द्र। केशिना। उप। ब्रह्माणि। नः। शृणु ॥ २ ॥

हे इन्द्र ब्रह्मयुजा ब्रह्मणा मंत्रेण युज्यमानौ केशिना केशिनौ केशवन्तौ हरी हरणशीलावश्वौ त्वा त्वां आवहतां अभिमापयताम्। त्वंचास्मद्यज्ञमुपेत्य नोस्माकं ब्रह्माणि स्तोत्राणि शृणु स्तोत्राणि गृहाण सम्यक् चित्ते धारय ॥ २ ॥

अथ तृतीया—

ब्रह्माणंस्त्वावयंयुजासोमपामिन्द्रसोमिनंः । सुतावन्तोहवामहे ॥३॥

ब्रह्माणंः । त्वा । वयम् । युजा । सोमऽपाम् ।
इन्द्र । सोमिनंः । सुतऽवंन्तः । हवामहे ॥ ३ ॥

हे इन्द्र ब्रह्माणोब्राह्मणावयं त्वा त्वां युजा योग्येन स्तोत्रेण हवामहे आह्वयामहे। कथंभूतं सोमपां सोमस्य पातारं । कीदृशावयं सोमिनः सोमयुक्ताः सुतवन्तः अभिषुतैश्च सोमैरुपेताः ॥ ३ ॥

अथ चतुर्थी—

आनोयाहिसुतावंतोस्माकंसुष्टुतीरुपं । पिबासुशिप्रिन्नन्धंसः॥४॥

आ । नः । याहि । सुतऽवंतः । अस्माकंम् ।
सुऽस्तुतीः । उपं । पिबं । सु । शिप्रिन् । अन्धंसः ॥ ४ ॥

हे इन्द्र सुतवतः अभिषुतसोमयुक्तान् नोस्मानायाह्यभिगच्छ ततोस्माकं संबंधीनि सुष्टुतीः शोभनानि स्तोत्राणि उपगच्छ जानीहि। हे सुशिप्रिन् शोभनशिरस्त्राण शोभनहनुकवेन्द्र अन्धसः अन्नस्य सोमलक्षणस्य स्वांशलक्षणं भागं पिब यद्वा कर्मणिषष्ठी अंधोस्मदीयं सोमं पिब ॥ ४ ॥

अथ पञ्चमी—

आतेसिञ्चामिकुक्ष्योरनुगात्राविधांवतु ।
गृभायजिह्वयामधुं ॥ ५ ॥ २२ ॥

आ । ते । सिंचामि । कुक्ष्योः । अनुं । गात्रा । वि । धावतु ।
गृभाय । जिह्वया । मधुं ॥ ५ ॥ २२ ॥

हे इन्द्र ते तव कुक्ष्योरुदरयोः आसिञ्चामि सोमानवनयामि कुक्षी सोमेन पूरयामीत्यर्थः। इन्द्रस्यहि द्वे उदरे। तथाचश्रूयते—ओभाकुक्षीपृणता वार्त्रघ्नं च माघोनंचेति[1]। यद्वा एकस्यैवोदरस्य सव्यदक्षिणभेदेन ऊर्ध्वाधोभागभेदेनवा द्वित्वम् सचासिक्तः सोमः गात्रा गात्राणि शरीरावयवानि हस्तपादादीनि सर्वाण्यनुक्रमेण विधावतु व्याप्नोतु त्वञ्च मधु मधुरं मयासिच्यमानं सोमं जिह्वया रसनेन्द्रियेण गृभाय गृहाण। छन्दसि शायजपीति ग्रहउत्तरस्यश्नः शायजादेशः हृग्रहोर्भइति भत्वम्॥ ५॥

॥ इति पष्ठस्य प्रथमे द्वाविंशोवर्गः॥ २२॥

अथ षष्ठी—

स्वादुष्टेअस्तुसंसुदेमधुमान्तन्वेतव। सोमःशमस्तुतेहृदे॥ ६॥

स्वादुः। ते। अस्तु। सम्ऽसुदे। मधुऽमान्। तन्वे। तव। सोमः।

शम्। अस्तु। ते। हृदे॥ ६॥

संसुदे सम्यक् सुष्ठु दात्रे हे इन्द्र ते तुभ्यं मधुमान् माधुर्यवानयं सोमः स्वादुरस्तु रुचिकरोभवतु तव तन्वे शरीराय च स्वादुरस्तु। ते तव हृदे हृदयायच ससोमः शमस्तु सुखजनकं भवतु॥६॥

अथ सप्तमी—

अयमुत्वाविचर्षणेजनीरिवाभिसंवृतः। प्रसोमइन्द्रसर्पतु॥ ७॥

अयम्। ऊँ इति। त्वा। विऽचर्षणे। जनीःऽइव। अभि।

सम्ऽवृतः। प्र। सोमः। इन्द्र। सर्पतु॥ ७॥

हे विचर्षणे विद्रष्टरिन्द्र जनीरिव जनयोजायाइव तायथा शुक्रैर्वस्त्रैः संवृताभवन्ति एवं संवृतः पयःप्रभृतिभिः श्रयणद्रव्यैरावृतोयं सोमः अभिप्रसर्पतु अभिगच्छतु उइतिपूरकः॥ ७॥

अथाष्टमी—

तुविग्रीवोवपोदरःसुबाहुरन्धसोमदे। इन्द्रोवृत्राणिजिघ्नते॥ ८॥

तुविऽग्रीवः। वपाऽउदरः। सुऽबाहुः। अन्धसः। मदे।

इन्द्रः। वृत्राणि। जिघ्नते॥ ८॥

---

1 बृहदारण्यके।

तुविग्रीवः विस्तीर्णकंधरः वपोदरः पीवरोदरः यथा बहवः सोमाः पीता अन्तर्भवन्ति तथा विस्तृतउदरइत्यर्थः सुबाहुः शोभनबाहुः एवंगुणकइन्द्रः अंधसोन्नस्य सोमात्मकस्य मदे हर्षेसति वृत्राणि शत्रुजातानि जिघ्नते हिनस्ति ॥ ८ ॥

अथ नवमी—

इन्द्रप्रेहिपुरस्त्वंविश्वस्येशानओजसा । वृत्राणिवृत्रहञ्जहि ॥ ९॥

इन्द्र । प्र । इहि । पुरः । त्वम् । विश्वस्य । ईशानः । ओजसा ।
वृत्राणि । वृत्रऽहन् । जहि ॥ ९ ॥

हे इन्द्र ओजसा बलेन विश्वस्य सर्वस्य जगतः ईशानः स्वामी भवन् त्वं पुरः अस्माकं पुरस्तात्प्रेहि प्रगच्छ प्राप्नुहि । हे वृत्रहन् वृत्राणामावरकाणां शत्रूणां हन्तः वृत्राणि अस्मदीयानि शत्रुजातानि जहि विनाशय ॥ ९ ॥

अभ्युदयेष्टौ इन्द्रस्य प्रदातुः दीर्घस्तेअस्त्वंकुशइत्यनुवाक्या सूत्र्यतेहि—दीर्घस्तेअस्त्वंकुशो भद्रातेहस्तासुकृतोतपाणीइति ।

सैषा सूक्ते दशमी—

दीर्घस्तेअस्त्वंकुशोयेनावसुप्रयच्छसि । यजमानायसुन्वते॥१०॥२३॥

दीर्घः । ते । अस्तु । अंकुशः । येन । वसु । प्रऽयच्छसि ।
यजमानाय । सुन्वते ॥ १० ॥ २३ ॥

हे इन्द्र वे तव अंकुशः सृणिः आकर्षणसाधनमायुधं दीर्घोस्तु आयतोभवतु । यथा दूरस्थमपि वस्तुव्याप्नोति तथा आयामवान्भवत्वित्यर्थः येनांकुशेन सुन्वते सोमाभिषवं कुर्वते यजमानाय वसु धनमाहृत्य प्रयच्छसि ददासि ॥ १० ॥

॥ इति प्रथमस्य प्रथमे त्रयोविंशोवर्गः ॥ २३ ॥

द्वितीयपर्यायेपि होतुःशस्त्रे आर्यंतइन्द्रेति स्तोत्रियस्तृचः सतिर्थंच—अयन्तइन्द्रसोमोयन्ते-मानुषेजने इति ।

तत्राद्या सूक्ते एकादशी—

अयंतइन्द्रसोमोनिपूतोअधिबर्हिषि । एहीमस्यद्रवापिब ॥ ११॥

अयम् । ते । इन्द्र । सोमः । निऽपूतः । अधि । बर्हिषि । आ ।
इहि । ईम् । अस्य । द्रव । पिब ॥ ११ ॥

हे इन्द्र ते तुभ्यं त्वदर्थं अयं सोमोबर्हिष्यधि वेद्यामास्तीर्णे दर्भे निपूतः नितरांदशापवित्रेण शोधितः अभिषवादिसंस्कारैः संस्कृतइत्यर्थः । ईं इदानीं अस्य इमं सोमं प्रति एहि आगच्छ आगत्य यत्र रसात्मकः सोमोहूयते तं देशं प्रति द्रव शीघ्रंगच्छ तदनंतरं तं सोमं पिब ॥ ११॥

अथ द्वादशी—

शाचिगोशाचिपूजनायंरणायतेसुतः । आखण्डलप्रहूयसे ॥१२॥

शाचिगो इति शाचिऽगो । शाचिऽपूजन । अयम् । रणाय । ते ।
सुतः । आखण्डल । प्र । हूयसे ॥ १२ ॥

हे शाचिगो शाचयः शक्तागावोयस्यासौ शाचिगुः । यद्वा शच व्यक्तायां वाचि अस्मादौणादिकइञ्प्रत्ययः शाचयोव्यक्ताः प्रख्याता गावोरश्मयोगावएववा यस्यतादृश । हे शाचिपूजन पूज्यतेऽनेनेति पूजनं स्तोत्रादि प्रख्यातपूजन ते तव रणाय रमणाय सुखजननाय अयं सोमः सुतोभिषुतः । यतः कारणात् हे आखंडल शत्रूणामाखंडयितः प्रहूयसे प्रकृष्टाभिः स्तुतिभिराहूयसे अतः आगत्य इमं सोमं पिबेति भावः ॥ १२ ॥

अथ त्रयोदशी—

यस्तेशृङ्गवृषोनपात्प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्रआमनः ॥१३॥

यः । ते । शृङ्गऽवृषः । नपात् । प्रनपादिति प्रऽनपात् । कुण्डऽपाय्यः ।
नि । अस्मिन् । दध्रे । आ । मनः ॥ १३ ॥

हे शृंगवृषोनपात् शृंगवृषा नाम कश्चिदृषिः तस्यचेन्द्रः स्वयं पुत्रतयाजज्ञइत्याख्यायिका। नपादित्यपत्यनाम शृंगवृषःपुत्र। यद्वा शृणन्ति हिंसन्तीति शृंगाणि रश्मयः तैर्वर्षतीति शृंगवृडादित्यः तस्य नपातयितः स्वकीये स्थानेवस्थापयितः सुबामंत्रितइति षष्ठ्यंतस्य परांगवद्भावेनामंत्रितानुप्रवेशात् समुदायस्याष्टमिकं सर्वानुदात्तत्वम्। ईदृश हे इन्द्र ते तव संबंधी प्रणपात् प्रकर्षेण नपातयिता रक्षिता कुंडपाय्यः कुंडैः पीयते अस्मिन् सोमइति कुंडपाय्यः क्रतुविशेषः क्रतौ कुंडपाय्यसंचाय्याविति पिबतेरधिकरणे यत्प्रत्ययोयुगागमश्चनिपात्यते एतत्संज्ञोयः क्रतुरस्ति अस्मिन् कुंडपाय्ये क्रतौ मनः स्वान्तं आनिदध्रे अभितोवर्तमानाः कुंडपायिनामानऋषयः पुरा निदधिरे सम्यक् त्वदेवत्यंक्रतुमनुष्ठितवन्तइत्यर्थः। दधातेर्लिटि इरयोरे इतिरेभावः॥१३॥

अथ चतुर्दशी—

वास्तोष्पतेध्रुवास्थूणांसत्रंसोम्यानाम्।
द्रप्सोभेत्तापुरांशश्वतीनामिन्द्रोमुनीनांसखा॥ १४॥

वास्तोः। पते। ध्रुवा। स्थूणा। अंसत्रम्। सोम्यानाम्। द्रप्सः।
भेत्ता। पुराम्। शश्वतीनाम्। इन्द्रः। मुनीनाम्। सखा॥ १४॥

हे वास्तोष्पते गृहपते स्थूणा गृहाधारभूतस्तंभः ध्रुवा स्थिरा भवतु सोम्यानां सोमार्हाणां सोमसंपादिनां वास्माकं अंसत्रं अंसत्राणं अंसोपलक्षितस्य कृत्स्नशरीरस्य त्रायकं रक्षकं बलं भवतु। अपिच द्रप्सः द्रवणशीलः सोमः तद्वान् अर्शआदित्वादच्प्रत्ययः शश्वतीनां बह्वीनां पुरामसुरपुरीणां भेत्ता विदारयिता एवंभूतइन्द्रोमुनीनामृषीणामस्माकं सखा मित्रभूतोभवतु॥१४॥

अथ पञ्चदशी—

पृदाकुसानुर्यजतोगवेषणएकःसन्नभिभूयसः।
भूर्णिमश्वंनयत्तुजापुरोगृभेन्द्रंसोमस्यपीतये॥१५॥२४॥

पृदाकुऽसानुः। यजतः। गोऽएषणः। एकः। सन्। अभि। भूयसः।
भूर्णिम्। अश्वम्। नयत्। तुजा। पुरः। गृभा। इन्द्रम्।
सोमस्य। पीतये॥ १५॥ २४॥

पृदाकुसानुः पृदाकुः सर्पः तद्वत् सानुः समुच्छ्रितः तद्वदुन्नतशिरस्कइत्यर्थः। यद्वा पृदाकुवत्सानुः संभजनीयः सयथा बहुभिर्मणिमन्त्रौषधादिभिः संसेव्योनाल्पैः एवमिन्द्रोपि बहुभिःस्तोत्रादिभिः यज्ञैः सेव्य इत्यर्थः। यजतोयष्टव्यः गवेषणोगवामेषयिता मापयिता एवंगुणकोयइन्द्रः एकः सन् असहायः केवलएवसन् भूयसोबहुतरान् शत्रून् अभिभवति। भूर्णि भरणशीलं अश्वं व्यापुवन्तं तमिन्द्रं सोमस्य पीतये पानार्थं पुरः अस्माकं पुरस्तात् नयत् नयति प्रापयति। सामर्थ्यात् स्तोतेतिलभ्यते। केन साधनेन तुजा क्षिप्रगामिना गृभा ग्रहणसाधनेन स्तोत्रेण। यद्वा अश्वमिति लुप्तोपममेतत् यथा वोढारमश्वं दुर्ग्रहं पाशेनानयन्ति एवमुक्तेन प्रकारेण महानुभावमिन्द्रं स्तुत्या स्तोता आनयतीत्यर्थः॥ १५॥

॥ इति पञ्चस्य प्रथमे चतुर्विंशोवर्गः॥ २४॥

इदंहेति द्वाविंशर्चं षष्ठं सूक्तं इरिंबिठेरार्षं उष्णिक् छंदस्कं उत्तमैषा अश्विदेवताका शमग्निरित्येषाग्निसूर्यवायुदेवताका शिष्टाआदित्यदेवताकाः। तथाचानुक्रम्यते—इदंहद्व्यधिकादित्यमौष्णिहमष्टम्यश्विन्यांपराग्निसूर्यानिलानामिति। गतोविनियोगः।

तत्र प्रथमा—

इदंहनूनमेषांसुम्नंभिक्षेतमर्त्यः। आदित्यानामपूर्व्यंसवीमनि॥१॥

इदम्। ह। नूनम्। एषाम्। सुम्नम्। भिक्षेत। मर्त्यः।
आदित्यानाम्। अपूर्व्यम्। सवीमनि॥ १॥

इदंह इदानीं खलु नूनमवश्यं आदित्यानां अदितेः पुत्राणामेषां देवादीनां मित्रादीनां सवीमनि प्रसवे प्रेरणेसति मार्योमनुष्यः स्तोता अपूर्व्यमभिनवं सुम्नं सुखकरं धनं भिक्षेत याचेत नकालांतरे॥१॥

अथ द्वितीया—

अनर्वाणोह्येषांपन्थाआदित्यानाम्। अदब्धाःसन्तिपायवःसुगेवृधः॥२॥

अनर्वाणः। हि। एषाम्। पन्थाः। आदित्यानाम्। अदब्धाः।
सन्ति। पायवः। सुगेऽवृधः॥ २॥

एषां आदित्यानां पंथाः पन्थानोमार्गाः सुपांसुलुगिति जसःसुः अनर्वाणः अप्रत्यृताः पैरैरप्रतिगताः अतएव अदब्धाः अहिंसिताश्च सन्ति भवन्ति । हि यस्मादेवं तस्मात्पायवः पालयितारस्तेमार्गाः सुगेवृधः सुगमे सुखे विषये वर्धका भवन्तु ॥ २ ॥

अथ तृतीया–

तत्सुनःसविताभगोवरुणोमित्रोअर्यमा ।
शर्मयच्छन्तुसप्रथोयदीमहे ॥ ३ ॥

तत् । सु । नः । सविता । भर्गः । वरुणः । मित्रः । अर्यमा । शर्म ।
यच्छन्तु । सऽप्रर्थः । यत् । ईमहे ॥ ३ ॥

सवित्रादयश्चत्वारोदेवाः सप्रथः सर्वतः पृथु विस्तीर्णं तच्छर्म सुखं गृहं वा नोस्मभ्यं सुष्ठु यच्छंतु ददतु । यच्छर्म ईमहे वयं याचामहे ॥ ३ ॥

अथ चतुर्थी–

देवेभिर्देव्यदितेरिष्टभर्मन्नागहि । स्मत्सूरिभिःपुरुप्रियेसुशर्मभिः॥४॥

देवेभिः । देवि । अदिते । अरिष्टऽभर्मन् । आ । गहि । स्मत् ।
सूरिऽभिः । पुरुऽप्रिये । सुशर्मऽभिः ॥ ४ ॥

हे देवि दानादिगुणयुक्ते हे अरिष्टभर्मन् अहिंसितभरणे हे पुरुप्रिये बहुभिः प्रीयमाणे हे एवंगुणविशिष्टे अदिते सूरिभिः प्राज्ञैः सुशर्मभिः सुसुखैः देवेभिर्देवैः आत्मीयैः पुत्रैः सार्धं स्मदितिनिपातः शोभनार्थः स्मत् शोभनं यथा भवति तथा आगहि आगच्छ ॥ ४ ॥

अथ पञ्चमी–

तेहिपुत्रासोअदितेर्विदुर्द्वेषांसियोतवे ।
अंहोश्चिदुरुचक्रयोनेहसः ॥ ५ ॥ २५ ॥

ते । हि । पुत्रासः । अदितेः । विदुः । द्वेषांसि । योतवे । अंहोः ।
चित् । उरुऽचक्रयः । अनेहसः ॥ ५ ॥ २५ ॥

अदितेः पुत्रासः पुत्राः तेहि ते खलु मित्रादयोदेवाः द्वेषांसि द्वेष्टॄणि राक्षसादीनि योतवे पृथक्कर्तुं विदुः जानन्ति विदोलटोवेति विदउत्तरस्यझेरुसादेशः । तथा उरुचक्रयः विस्तीर्णस्य कमर्णः कर्तारोनेहसः अनाहंतारो रक्षकास्ते अंहोश्चिद् आहननशीलात्पापादपि योतवे पृथक्कर्तुमस्मान् जानन्ति ॥ ५॥

॥ इति पञ्चस्य प्रथमे पञ्चविंशोवर्गः ॥ २५ ॥

अथ षष्ठी—

अदि॑ति॒र्नो॒दिवा॑प॒शुमदि॑ति॒र्नक्त॒मद्व॑याः ।
अदि॑तिःपा॒त्वंह॑सःस॒दावृ॑धा ॥ ६ ॥

अदि॑तिः । नः॒ । दिवा॑ । प॒शुम् । अदि॑तिः । नक्त॑म् । अद्व॑याः ।
अदि॑तिः । पा॒तु॒ । अंह॑सः । स॒दाऽवृ॑धा ॥ ६ ॥

नोस्माकं पशुं अदितिरदीना अखंडनीयावा देवमाता दिवा अहनि पातु रक्षतु । तथा अद्वयाः बाह्याभ्यंतरभेदेन प्रकारद्वयरहिताः सर्वदैकप्रकारा कपटरहिता सा अदितिः नक्तं रात्रौ च अस्मदीयं गवादिपशुजातं रक्षतु तथास्मानपि अंहसः पापात् पातु रक्षतु । केनसाधनेन सदावृधा सर्वदा वृद्धिमतात्मीयेन रक्षणेन ॥ ६ ॥

अथ सप्तमी—

उ॒तस्यानो॒दिवा॑म॒तिरदि॑तिरू॒त्याग॑मत् ।
साशन्ता॑ति॒मय॑स्कर॒दप॒स्रिधः॑ ॥ ७ ॥

उ॒त । स्या । नः॒ । दिवा॑ । म॒तिः । अदि॑तिः । ऊ॒त्या । आ । ग॒म॒त् ।
सा । शम्ऽता॑ति । मयः॑ । क॒र॒त् । अप॑ । स्रिधः॑ ॥ ७ ॥

उतापिच स्या सा पूर्वोक्तामतिर्मंत्री मंतव्या स्तोतव्या वा अदितिरूत्या रक्षणार्थं दिवा अहनि नोस्मानागमत् आगच्छतु आगत्य च शंताति शांतिकरं मयः सुखं सादितिः करत् करोतु । स्रिधोबाधकान् शत्रूंश्चापगमयतु स्रिधिर्बाधनार्थः शिवशमरिष्टस्यकरइति शंशब्दात्करणेर्थे तातिल्प्रत्ययः ॥ ७ ॥

अथाष्टमी–

उतत्यादैव्याभिषजाशंनंःकरतोअश्विना ।
युयुयातामितोरपोअपस्रिधः ॥ ८ ॥

उत । त्या । दैव्या । भिषजा । शम् । नः । करतः । अश्विना ।
युयुयाताम् । इतः । रपः । अप । स्रिधः ॥ ८ ॥

उतापिच त्या तौ प्रसिद्धौ दैव्या देवेषुभवौ भिषजा चिकित्सकौ ईदृशावश्विना अश्विनौ नोस्माकं शं सुखं रोगाणां शमनं वा करतः कुरुताम्। इतोस्मत्तः रपः पापं युयुयातां पृथक्कुर्यातां स्रिधः शत्रूंश्चापगमयताम् ॥ ८ ॥

अथ नवमी–

शमग्निरग्निभिःकरच्छंनंस्तपतुसूर्यः ।
शंवातोवात्वरपाअपस्रिधः ॥ ९ ॥

शम् । अग्निः । अग्निऽभिः । करत् । शम् । नः । तपतु । सूर्यः ।
शम् । वातः । वातु । अरपाः । अप । स्रिधः ॥ ९ ॥

अग्निभिः स्वविभूत्या विभिन्नैर्गार्हपत्यादिभिः अग्निर्देवः शं करत अस्माकं रोगशांतिं सुखंवा करोतु। सूर्यः सर्वस्य प्रेरकआदित्यश्च नोस्माकं शंसुखं यथाभवति तथा तपतु प्रदीप्यताम्। वातोवायुश्च अरपाः अपापः सन् शं यथा भवति तथा वातु अनुवर्ततां। स्रिधः शत्रूंश्च एतेग्न्यादयः अपगमयन्तु ॥ ९ ॥

अथ दशमी–

अपामीवामपस्रिधमपसेधतदुर्मतिम् ।
आदित्यासोयुयोतनानोअंहसः ॥ १० ॥ २६ ॥

अप । अमीवाम् । अप । स्रिधम् । अप । सेधत ।
दुःऽमतिम् । आदित्यासः । युयोतन । नः । अंहसः ॥ १० ॥ २६ ॥

हे आदित्याः अमीवां रोगं अपसेधत अस्मत्तोपगमयत स्रिधं चापसेधकं शत्रुं चापसेधत दुर्मतिं अस्माकं दुःखस्य मंतारं चापसेधत । अपिच हे आदित्यासः आदित्याः नोस्मानंहसः पापात् युयोतन पृथक्कुरुत । यौतेर्लोटि छान्दसः शपःश्लुः तप्तनप्तनथनाश्चेति तस्यतनबादेशः पित्वादनुदात्तत्वे धातुस्वरः शिष्यते आमन्त्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानत्वेन पदादपरत्वान्निघातोनभवति ॥ १० ॥

॥ इति पञ्चस्य प्रथमे षड्विंशोवर्गः ॥ २६ ॥

अथैकादशी—

युयोताशरुमस्मदाँआदित्यासउतामतिम् ।
ऋधग्द्वेषःकृणुतविश्ववेदसः ॥ ११ ॥

युयोत । शरुम् । अस्मत् । आ । आदित्यासः ।
उत । अमतिम् । ऋधक् । द्वेषः । कृणुत । विश्वऽवेदसः ॥ ११ ॥

हे आदित्यासः आदित्याः शरुं हिंसकं अस्मदा अस्मत्तश्च युयोत पृथक्कुरुत । उतापिच अमतिं दुर्बुद्धिंच पृथक्कुरुत हे विश्ववेदसः सर्वधनाः सर्वज्ञावा द्वेषोद्वेष्टॄन् शत्रून् ऋधक् पृथक् कृणुत कुरुत अस्मत्तोवियोजयत ॥ ११ ॥

अथ द्वादशी—

तत्सुनःशर्मयच्छतादित्यायन्मुमोचति ।
एनस्वन्तंचिदेनसःसुदानवः ॥ १२ ॥

तत् । सु । नः । शर्म । यच्छत । आदित्याः । यत् ।
मुमोचति । एनस्वन्तम् । चित् । एनसः । सुऽदानवः ॥ १२ ॥

हे आदित्याः तच्छर्म सुखं नोस्मभ्यं सु सुष्ठु यच्छत दत्त । हे सुदानवः शोभनदानाः युष्मदीयं यच्छर्म एनस्वंतं चित् पापिनमपि स्तोतारं एनसः पापात् मुमोचति मोचयति तद्यच्छतेत्यन्वयः ॥ १२ ॥

अथ त्रयोदशी—

योनःकश्चिद्रिरिक्षतिरक्षस्त्वेनमर्त्यः ।
स्वैःषएवैरिरिषीष्टयुर्जनः ॥ १३ ॥

यः । नः । कः । चित् । रिरिक्षति । रक्षःऽत्वेन । मर्त्यः ।
स्वैः । सः । एवैः । रिरिषीष्ट । युः । जनः ॥ १३ ॥

यः कश्चिन्मर्त्योमनुष्यो नोस्मान्रक्षस्त्वेन रक्षोभावेन पिशाचाद्यात्मना रिरिक्षति जिहिंसिषति रिषहिंसायामितिधातुः समनुष्यः स्वैरेवैरात्मीयैरेव चेष्टितैः रिरिषीष्ट हिंसितोभूयात्। सजनोयुः याता अपगमनशीलश्च भवतु। यद्वा सजनः स्वैरेव गमनैः युः दुःखं गच्छन् हिंसितोभवतु ॥१३॥

अथ चतुर्दशी—

समित्तमघमश्नवद्दुःशंसंमर्त्यंरिपुम् ।
योअस्मत्रादुर्हणावाँउपद्वयुः ॥ १४ ॥

सम् । इत् । तम् । अघम् । अश्नवत् । दुःऽशंसम् ।
मर्त्यम् । रिपुम् । यः । अस्मऽत्रा । दुःऽहनावान् । उप । द्वयुः ॥१४॥

दुःशंसं दुष्कीर्तिं रिपुं शत्रुं तं मर्त्यं मनुष्यं इत् एवमघं पापं समश्नवत् सम्यग्व्याप्नोतु। योमर्त्यः अस्मत्रा अस्मासु अस्मद्विषये दुर्हणावान् दुष्टहननवानुपजायते द्वयुः द्वाभ्यां प्रकाराभ्यां युक्तश्च भवति। अयमर्थः—प्रत्यक्षकृतोहितं वदति परोक्षकृतस्त्वहितं तादृशः कपटोद्वयुरित्युच्यते यश्चास्मद्विषये कपटोभवति तमपि पापं व्याप्नोत्विति ॥ १४ ॥

अथ पञ्चदशी—

पाकत्रास्थनदेवाहृत्सुजानीथमर्त्यम् ।
उपद्वयुंचाद्वयुंचवसवः ॥ १५ ॥ २७ ॥

पाकऽत्रा । स्थन । देवाः । हृत्ऽसु । जानीथ । मर्त्यम् ।
उप । द्वयुम् । च । अद्वयुम् । च । वसवः ॥ १५ ॥ २७ ॥

हे देवा दानादिगुणयुक्ता आदित्यायूयं पाकत्रा पाकेषु विपक्वप्रज्ञेषु स्तोतृषु स्थन भवथ। यद्वा प्रथमार्थेत्रापत्ययः पाकत्राः पाकाः परिपक्वज्ञानाः भवथ। यतएवं अतः कारणात् हृत्सु आलीपेषु हृदयेषु द्वयुं द्विप्रकारयुक्तं कपटिनं च अद्वयुं च तद्विलक्षणं कापट्यरहितं च मर्त्यं मनुष्यं उपेत्य हे वसवोवासका जानीथ अवगच्छथ ॥ १५ ॥

॥ इति षष्ठस्य प्रथमे सप्तविंशोवर्गः ॥ २७ ॥

अथ षोडशी–

आशर्मपर्वतानामोतापांवृणीमहे।
द्यावाक्षामारेअस्मद्रपस्कृतम् ॥ १६ ॥

आ। शर्म। पर्वतानाम्। आ। उत। अपाम्। वृणीमहे ॥
द्यावाक्षामा। आरे। अस्मत्। रपः। कृतम् ॥ १६ ॥

पर्वतानां मेघानां गिरीणां वा संबंधि शर्म सुखं वयं आवृणीमहे आभिमुख्येन संभजामहे। उतापिच अपामुदकानां च हे द्यावाक्षामा द्यावापृथिव्यौ अस्मदारे अस्मत्तोविप्रकृष्टेदेशे रपः पापं कृतं कुरुतं अस्मत्तोवियोजयतमित्यर्थः ॥ १६ ॥

अथ सप्तदशी–

तेनोभद्रेणशर्मणायुष्माकंनावावसवः।
अतिविश्वानिदुरितापिपर्तन ॥ १७ ॥

ते। नः। भद्रेण। शर्मणा। युष्माकम्। नावा। वसवः।
अति। विश्वानि। दुःऽइता। पिपर्तन ॥ १७ ॥

हे वसवोवासयितारआदित्याः तेपूर्वोक्तगुणा यूयं भद्रेण शोभनेन शर्मणा सुखेन युष्माकं नावा नोस्मान् विश्वानि सर्वाणि दुरिता दुर्गमनानि अति पिपर्तन पिपृत अतिपारयत ॥१७॥

अथाष्टादशी–

तुचेतनायतत्सुनोद्राघीयआयुर्जीवसे।
आदित्यासःसुमहसःकृणोतन ॥ १८ ॥

तुचे । तनाय । तत् । सु । नः । द्राघीयः । आयुः ।
जीवसे । आदित्यासः । सुऽमहसः । कृणोतन ॥ १८ ॥

हे आदित्यासः अदितेःपुत्राः सुमहसः शोभनतेजस्काः नोस्माकं तुचे पुत्राय तनाय तनयाय पौत्राय च जीवसे जीवनाय द्राघीयोदीर्घतमं तत्प्रसिद्धमायुः जीवितं सु सुष्ठु कृणोतन कुरुत ॥ १८ ॥

अथैकोनविंशी–

यज्ञोहीळोवोअन्तरआदित्याअस्तिमृळत ।
युष्मेइद्वोअपिष्मसिसजात्ये ॥ १९ ॥

यज्ञः । हीळः । वः । अन्तरः । आदित्याः । अस्ति । मृळत ।
युष्मे इति । इत् । वः । अपि । स्मसि । सऽजात्ये ॥ १९ ॥

हे आदित्याः हीळः हीडिर्गत्यर्थः गंतव्यः प्राप्तव्योस्माभिः अनुष्ठितोयज्ञोवोयुष्माकमंतरोस्ति अंतिकेवर्तमानोभवति । अतोस्मान्मृळत सुखयत वोयुष्माकं सजात्ये सजातत्वे ज्ञातित्वे बान्धवे वर्तमानावयं युष्मेइव युष्मास्वेव अपि स्मसि सर्वदा भवामोपि इदंतोमसिः ॥ १९ ॥

अथ विंशी–

बृहद्वरूथंमरुतांदेवंत्रातारमश्विना ।
मित्रमीमहेवरुणंस्वस्तये ॥ २० ॥

बृहत् । वरूथम् । मरुताम् । देवम् । त्रातारम् ।
अश्विना । मित्रम् । ईमहे । वरुणम् । स्वस्तये ॥ २० ॥

मरुतां देवानां स्वामिनं त्रातारं पालयितारं देवमिन्द्रं अश्विना अश्विनौ च मित्रं वरुणं च बृहत्प्रौढं वरूथं शीतातपादिनिवारकं गृहं स्वस्तये अविनाशाय ईमहे याचामहे ॥ २० ॥

अथैकविंशी–

अनेहोमित्रार्यमन्नृवद्वरुणशंस्यम् ।
त्रिवरूथंमरुतोयन्तनश्छर्दिः ॥ २१ ॥

अनेहः । मित्र । अर्यमन् । नृऽवत् । वरुण । शंस्यम् ।
त्रिऽवरूथम् । मरुतः । यन्त । नः । छर्दिः ॥ २१ ॥

हे मित्र हे अर्यमन् हेवरुण हे मरुतः ते सर्वे यूयं अनेहः अहिंसितं नृवत् नृभिः पुत्रादिभिरुपेतं शंस्यं स्तुत्यं त्रिवरूथं त्रयाणां शीतातपवर्षाणां निवारकं यद्वा त्रिभूमिकं छर्दिर्गृहं नः अस्मभ्यं यन्त यच्छत दत्तेत्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

येचिद्धिमृत्युबन्धवआदित्यामनवःस्मसि ।
प्रसूनआयुर्जीवसेतिरेतन ॥ २२ ॥ २८ ॥

ये । चित् । हि । मृत्युऽबन्धवः । आदित्याः । मनवः ।
स्मसि । प्र । सु । नः । आयुः । जीवसे । तिरेतन ॥ २२ ॥ २८ ॥

हे आदित्याः येचित् येच वयं मनवोमनुष्याः हि यस्मात् मृत्युबन्धवः स्मसि मृत्योर्मरस्यबन्धुभूताः मत्यासन्नमरणाभवामः। अतोहेतोः तेषां नोस्माकं जीवसे जीवनाय चिरकालावस्थानाय आयुर्जीवितं सुप्रतिरेतन शोभनं प्रवर्धयत ॥ २२ ॥

॥ इति षष्ठस्य प्रथमेष्टाविंशोवर्गः ॥ २८ ॥

तंगूर्धयेति सप्तत्रिंशदृचं सप्तमं सूक्तं काण्वस्य सोभरेरार्षं प्रथमतृतीयाययुजः ककुभः द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः पितुर्नेपुत्र एषा सप्तविंशी द्विपदा विंशत्यक्षराविराट् यमादित्यासइत्येषा चतुस्त्रिंशीउष्णिक् यूयंराजानएषा पंचत्रिंशी सतोबृहती अदान्मइत्येषा ककुप् उतमइत्येषा सप्तत्रिंशीपंक्तिः षट्त्रिंशी सप्तत्रिंशीच त्रसदस्युनाम्नोराज्ञोदानस्तुतिरूपत्वात्तद्देवताके चतुस्त्रिंशीपंचत्रिंश्यौ आदित्यदेवताके शिष्टाआग्नेय्यः । तथाचानुक्रान्तम्–तंगूर्धयसप्तत्रिंशत्सोभरिराग्नेयं काकुभं प्रागाथंह पितुर्नद्विपदा अंत्येककुप्पंक्ती त्रसदस्योर्दानस्तुतिस्तत्पूर्वे उष्णिक्सतोबृहत्यावादित्येष्यदति । गतः सूक्तविनियोगः ।

तत्र प्रथमा–

तंगूर्धयास्वर्णरंदेवासोदेवमरतिंदधन्विरे । देवत्राहव्यमोहिरे ॥ १ ॥

तम् । गूर्धय । स्वःऽनरम् । देवासः । देवम् । अरतिम् ।
दधन्विरे । देवऽत्रा । हव्यम् । आ । ऊहिरे ॥ १ ॥

हे स्तोतः तं प्रसिद्धमग्निं गूर्धय स्तुहि गूर्धयतिःस्तुतिकर्मा कीदृशं स्वर्णरं सर्वस्य नेतारं सर्वैर्यजमानैः कर्माद्यै नीतं वा अथवा स्वर्गं प्रति हविषां नेतारं देवासः दीव्यन्ति स्तुवन्तीति देवाः ऋत्विजः देवं दानादिगुणयुक्तं अरतिम् अर्यं स्वामिनम्। यद्वा अभिप्राप्तव्यं दधन्विरे धन्वन्ति गच्छंति स्तुत्यादिभिः प्राप्नुवन्ति। धविर्गत्यर्थः। प्राप्य च तेनाग्निना देवत्रा देवान् देवमनुष्येत्यादिना द्वितीयार्थे त्रा प्रत्ययः हव्यं चरुपुरोडाशादिलक्षणं हविः आऊहिरे अभिप्रापयन्ति वहेर्यजादित्वात्सम्प्रसारणम्॥ १ ॥

अथ द्वितीया--

विभूतरातिंविप्रचित्रशोचिषमग्निमीळिष्वयन्तुरम् ।
अस्यमेधस्यसोम्यस्यसोभरेप्रेमध्वरायपूर्व्यम् ॥ २ ॥

विभूतऽरातिम् । विप्र । चित्रऽशोचिषम् । अग्निम् ।
ईळिष्व । यन्तुरम् । अस्य । मेधस्य ।
सोम्यस्य । सोभरे । प्र । ईम् । अध्वराय । पूर्व्यम् ॥ २ ॥

ऋषिरात्मानं संबोध्य स्तुतौ प्रेरयति।हे विप्र मेधाविन् सोभरे एतत्संज्ञकऋषे अध्वराय यागाय ईमिममग्निं प्रईळिष्व प्रस्तुहि।कीदृशं विभूतरातिं व्याप्तधनं प्रभूतदानं वा चित्रशोचिषं चायनीयतेजस्कं विचित्रदीप्तिकं वा सोम्यस्य सोमसाध्यस्य अस्य मेधस्य यज्ञस्य यंतुरं नियंतारं पूर्व्यं चिरन्तनम्॥ २ ॥

आग्निष्टविकेपूक्थ्येषु तृतीयसवने प्रशास्तुःशस्त्रे यजिष्ठंत्वेत्यादिकौ प्रगाथौ वैकल्पिकौ स्तोत्रियानुरूपौ सचितश्च--यजिष्ठंत्वावृमहेयःसमिधायआहुतीति ।

तत्रायां सूक्ते तृतीया--

यजिष्ठंत्वाववृमहेदेवंदेवत्राहोतारममर्त्यम्। अस्ययज्ञस्यसुक्रतुम्॥३॥

यजिष्ठम् । त्वा । ववृमहे । देवम् । देवऽत्रा ।
होतारम् । अमर्त्यम् । अस्य । यज्ञस्य । सुऽक्रतुम् ॥ ३ ॥

हे अग्ने यजिष्ठं यष्टृतमं त्वा त्वां ववृमहे वृणीमहे संभजामहे। कीदृशं त्वां देवत्रा देवेषु मध्ये देवं अतिशयेन दानादिगुणयुक्तं होतारं देवानामाह्वातारं अमर्त्यमविनाशं अस्य यज्ञस्य यागस्य सुक्रतुं सुष्ठु कर्तारम् ॥ ३ ॥

अथ चतुर्थी—

ऊर्जोनपातंसुभगंसुदीदितिमग्निंश्रेष्ठशोचिषम् ।
सनोमित्रस्यवरुणस्यसोअपामासुम्नंयक्षतेदिवि ॥ ४ ॥

ऊर्जः । नपातम् । सुऽभगम् । सुऽदीदितिम् । अग्निम् ।
श्रेष्ठऽशोचिषम् । सः । नः । मित्रस्य । वरुणस्य ।
सः । अपाम् । आ । सुम्नम् । यक्षते । दिवि ॥ ४ ॥

ऊर्जोन्नस्य नपातं नपातयितारं यद्वा नप्तारं चतुर्थम्। हविर्लक्षणेनान्नेन आपोजायन्ते अद्भ्यओषधिवनस्पतयः तेभ्यएवजातइति चतुर्थत्वं। नभ्राण्नपादिति नञःप्रकृतिभावः। सुभगं शोभनधनम् सुदीदितिं सुष्ठु दीपयितारं श्रेष्ठशोचिषं प्रशस्यतमतेजस्कं अग्निं स्तौमीतिशेषः। सवाहशोग्निः नोस्मदर्थं दिवि द्योतमाने देवयजने द्युलोकेवा मित्रस्य देवस्य वरुणस्यच सुम्नं सुखम् आ अभिलक्ष्य यक्षते यजतु तथा सोग्निरपामब्देवानां सुम्नमभियजतु ॥ ४ ॥

अथ पञ्चमी—

यःसमिधायआहुतीयोवेदेनददाशमर्तोअग्नये ।
योनमसास्वध्वरः ॥ ५ ॥ २९ ॥

यः । सम्ऽइधा । यः । आऽहुती । यः । वेदेन । ददाश ।
मर्तः । अग्नये । यः । नमसा । सुऽअध्वरः ॥ ५ ॥ २९ ॥

इयं पाकयज्ञप्रशंसापरेति भगवताश्वलायनेन व्याख्याता। योमर्तोमनुष्यः समिधा पालाशादिनेध्मेन अग्नये अग्न्यर्थं ददाश परिचरति यश्च आहुती आहुत्या आज्यादिसाध्यया परिचरति यश्च वेदेन वेदाध्ययनेन ब्रह्मयज्ञेन परिचरति यश्चस्वध्वरः शोभनेनाध्वरेण ज्योतिष्टोमादिना युक्तःसन नमसा अन्नेन चरुपुरोडाशादिना अग्नये ददाशः अग्न्यर्थं परिचरति तस्येदर्वन्तइत्युत्तरत्रसंबन्धः ॥ ५ ॥

॥ इति षष्ठस्य प्रथमे एकोनविंशोवर्गः ॥ २९ ॥

अथ षष्ठी—

तस्येदर्वन्तोरंहयन्तआशवस्तस्यद्युम्नितमंयशः।
नतमंहोदेवकृतंकुतश्चननमर्त्यकृतंनशत् ॥ ६ ॥

तस्य । इत् । अर्वन्तः । रंहयन्ते । आशवः ।
तस्य । द्युम्निऽतमम् । यशः । न । तम् । अंहः ।
देवऽकृतम् । कुतः । चन । न । मर्त्यऽकृतम् । नशत् ॥ ६ ॥

यः पूर्वोक्तः तस्येव तस्यैव आशवोव्यापनशीलाः अर्वन्तःअश्वाः रंहयंते वेगंकुर्वन्ति शत्रून्प्रसहन्वइत्यर्थः। द्युम्नितमं दीप्तिमत्तमं यशः कीर्तिश्च तस्यैवभवति यद्वा द्युम्नमिति धननाम धनवत्तमं यशोन्नंच तस्यभवति। अपिच देवकृतं देवैःकृतं अंहः पापं कुतश्चन कस्मादपि हेतोः तं न नशत् न प्राप्नोति न मर्त्यकृतं मनुष्यैः कृतम् ॥ ६ ॥

अथ सप्तमी—

स्वग्नयोवोअग्निभिःस्यामसूनोसहसऊर्जापते। सुवीरस्त्वमस्मयुः ॥ ७ ॥

सुऽअग्नयः । वः । अग्निऽभिः । स्याम । सूनो इति । सहसः ।
ऊर्जाम् । पते । सुऽवीरः । त्वम् । अस्मऽयुः ॥ ७ ॥

हे सहसःसूनो बलस्यपुत्र अग्निर्हि बलेन मथ्यमानोजायते हे ऊर्जापते अन्नानां हविर्लक्षणानां स्वामिन् अग्ने वः वचनव्यत्ययः तव अवयवभूतैरग्निभिर्गार्हपत्यादिभिर्वयं स्वग्नयः शोभनाग्निकाः स्याम भवेम। सुवीरः शोभनैः वीरैरुपेतस्त्वंच अस्मयुः अस्मान्कामयमानोभव ॥ ७ ॥

अथाष्टमी–

प्रशंसमानोअतिथिर्नमित्रियोग्नीरथोनवेद्यः ।
त्वेक्षेमासोअपिसन्तिसाधवस्त्वंराजारयीणाम् ॥ ८ ॥

प्रऽशंसमानः । अतिथिः । न । मित्रियः । अग्निः । रथः । न । वेद्यः ।
त्वे इति । क्षेमासः । अपि । सन्ति । साधवः । त्वम् । राजा ।
रयीणाम् ॥ ८ ॥

प्रशंसमानः स्तुवन् अतिथिर्न अतिथिरिव यद्वा व्यत्ययेन कर्मणि कर्तृप्रत्ययः प्रश- स्यमानः सोग्निर्मित्रियः मित्राणां स्तोतॄणां हितोभवति। तथा रथोन रथइव वेद्योलंभनीयः अभीष्टफलसाधनत्वेन ज्ञातव्योवा। उत्तरोर्धर्चः प्रत्यक्षकृतः। हे अग्ने त्वे त्वयि साधवः साधकाः समीचीनाः क्षेमासोधारणान्यपि सन्ति भवन्ति। तथा त्वं रयीणां धनानामेव राजा ईश्वरोभव- सि ॥ ८॥

अथ नवमी–

सोअद्धादाश्वध्वरोग्नेमर्तःसुभगसप्रशंस्यः ।
सधीभिरस्तुसनिता ॥ ९ ॥

सः । अद्धा । दाशुऽअध्वरः । अग्ने । मर्तः । सुऽभग । सः ।
प्रऽशंस्यः । सः । धीभिः । अस्तु । सनिता ॥ ९ ॥

हे अग्ने योमर्तोमनुष्यः दाश्वध्वरः दत्तयज्ञोभवति सः अद्धा सत्यनामैतत् सत्यफलोभ- वतु। हे सुभग शोभनधनाग्ने सएव प्रशंस्यः प्रशंसनीयः श्लाघनीयश्च भवतु तथा सधीभिः कर्मभिः स्तोत्रैर्वा सनिता संभजनशीलोस्तु भवतु ॥ ९ ॥

अथ दशमी–

यस्यत्वमूर्ध्वोअध्वरायतिष्ठसिक्षयद्वीरःससाधते ।
सोअर्वद्भिःसनितासविपन्युभिःसशूरैःसनिताकृतम् ॥ १० ॥२०॥

यस्यं । त्वम् । ऊर्ध्वः । अध्वरायं । तिष्ठसि । क्षयत्ऽवीरः ।
सः । साधते । सः । अर्वत्ऽभिः । सनिता । सः । विपन्युऽभिः ।
सः । शूरैः । सनिता । कृतम् ॥ १० ॥ ३० ॥

हे अग्ने यस्य यजमानस्य अध्वराय यागनिष्पादनाय त्वमूर्ध्वउद्युक्तः सन् तिष्ठसि अवतिष्ठसे सयजमानः क्षयद्वीरः निवसद्भिरित्वरैर्वा वीरैः पुत्रादिभिरुपेतः सन् साधते सर्वकर्तव्यं साधयति । तदेव विवृणोति सतादृशोजनः अर्वद्भिरश्वैः कृतं निष्पादितं जयादिकं सतादृशोजनः विपन्युभिः मेधाविभिः कृतंच स सनिता भवति शूरैः शौर्योपेतैर्भृत्यैः कृतंच ससनिता संभजनशीलोभवति ॥ १० ॥

॥ इति षष्ठस्य प्रथमे त्रिंशोवर्गः ॥ ३० ॥

अथैकादशी–

यस्याग्निर्वपुर्गृहेस्तोमंचनोदधीतविश्ववार्यः ।
हव्यावावेविषद्विषः ॥ ११ ॥

यस्यं । अग्निः । वपुः । गृहे । स्तोमंम् । चनः । दधीत ।
विश्वऽवार्यः । हव्या । वा । वेविषत् । विषः ॥ ११ ॥

यस्य यजमानस्य गृहे विश्ववार्योविश्वैर्वरणीयः वपुः रूपनामैतत् रूपवान् दीप्तिमानग्निः स्तोमं स्तोत्रं चनोन्नंच हविर्लक्षणं दधीत धारयेत् । यस्यच हव्या वाशब्दः समुच्चये हव्यानि हवींषिच विषः व्याप्तान् देवान् वेविषत् प्रापयेत् विषॄव्याप्तौ अस्माद्यङ्लुकि रूपमेतत् । सयजमानइति पूर्वत्रसंबंधः ॥ ११ ॥

अथ द्वादशी–

विप्रस्यवास्तुवतःसहसोयहोमक्षूतमस्यरातिषु ।
अवोदेवमुपरिमर्त्यंकृधिवसोविविदुषोवचः ॥ १२ ॥

विप्रस्य । वा । स्तुवतः । सहसः । यहो इति । मक्षुऽतमस्य ।
रातिषु । अवःऽदेवम् । उपरिऽमर्त्यम् । कृधि । वसो इति ।
विविदुषः । वचः ॥ १२ ॥

हे सहसोयहो बलस्यपुत्राग्ने विप्रस्य मेधाविनः स्तुवतः स्तोतुर्वा रातिषु हविर्दानेषु मक्षुतमस्य शीघ्रतमस्य यष्टुर्वा विविदुषोज्ञातव्यस्य अभिज्ञस्य वचोवचनं हे वसो वासकाग्ने अवोदेवं देवानामवस्तात्। उपरिमर्त्यं मर्त्यानामुपरिष्टाच्च कृधि कुरु सर्वं नभःप्रदेशं व्यापयेतियावत्॥१२॥

अथ त्रयोदशी–

योअग्निंहव्यदातिभिर्नमोभिर्वासुदक्षमाविवासति।
गिरावाजिरशोचिषम्॥ १३॥

यः। अग्निम्। हव्यदातिऽभिः। नमःऽभिः। वा। सुऽदक्षम्।
आऽविवासति। गिरा। वा। अजिरऽशोचिषम्॥ १३॥

योयजमानः हव्यदातिभिः हविषां दानैर्नमोभिर्नमस्कारैर्वा सुदक्षं शोभनबलमग्निं आविवासति परिचरति गिरावा स्तुत्या वा अजिरशोचिषं क्षिप्रगामितेजस्कं तमग्निं परिचरति सः समृद्धोभवतीतिशेषः॥ १३॥

अथ चतुर्दशी–

समिधायोनिशितीदाशददितिंधामभिरस्यमर्त्यः।
विश्वेत्सधीभिःसुभगोजनाँअतिद्युम्नैरुद्नइवतारिषत्॥१४॥

सम्ऽइधा। यः। निऽशिती। दाशत्। अदितिम्। धामऽभिः।
अस्य। मर्त्यः। विश्वा। इत्। सः। धीभिः। सुऽभगः।
जनान्। अति। द्युम्नैः। उद्नःऽइव। तारिषत्॥ १४॥

योमर्त्योमनुष्यः अस्याग्नेर्धामभिः शरीरैः गार्हपत्यादिरूपेण विभज्य वर्तमानैः सार्धं अदितिं अखंडनीयं तमेवाग्निं निशिती निशितया निशानसाधनया प्रज्वलनहेतुभूतया समिधा दाशत् परिचरेत्। सोग्निः धीभिः कर्मभिर्बुद्धिविशेषैर्वा सुभगः सन् विश्वेत् सर्वानेव जनान् द्युम्नैर्द्योतमानैरन्नैर्यशोभिर्वा उद्नइव उदकानीव अतितारिषत् अतितरेत् अतिक्रामेत्॥ १४॥

अथ पञ्चदशी–

तदग्नेद्युम्नमाभरयत्सासहत्सदनेकंचिदत्रिणम्।
मन्युंजनस्यदूढ्यः॥ १५॥ ३१॥

तत्। अग्ने। द्युम्नम्। आ। भर। यत्। सुसहत्। सदने। कम्।
चित्। अत्रिणम्। मन्युम्। जनस्य। दुःऽध्यः॥ १५॥ ३१॥

हे अग्ने तत् द्युम्नं आभरास्मभ्यमाहर मत्सदने गृहे वर्तमानं कंचित्कमपि अत्रिणमत्तारं राक्षसादिकं सासहत् अत्यर्थमभिभवेत्। तथा दूढ्यः दुर्धियः पापबुद्धेः शत्रुजनस्य मन्युं क्रोधं यच्च द्युम्नमभिभवेत तदाहरेत्यन्वयः। ध्यैचेति पृषोदरादिपाठात् दुरोरेफस्य उत्वम् उत्तरपदादेष्टुत्वंच॥ १५॥

॥ इति प्रथमस्य प्रथमे एकत्रिंशोवर्गः॥ ३१॥

अथ षोडशी—

येनचष्टेवरुणोमित्रोअर्यमायेननासत्याभगः।
वयंतत्तेशवसागातुवित्तमाइन्द्रत्वोताविधेमहि॥ १६॥

येन। चष्टे। वरुणः। मित्रः। अर्यमा। येन। नासत्या।
भगः। वयम्। तत्। ते। शवसा। गातुवित्ऽतमाः।
इन्द्रत्वाऽऊताः। विधेमहि॥ १६॥

येनाग्नेयेन तेजसा वरुणोदेवः चष्टे प्रकाशयति येनच मित्रः अर्यमा च चष्टे येनच नासत्याश्विनौच चक्षाते भगोभजनीयएतत्संज्ञोदेवश्च चष्टे। शवसा बलेन गातुवित्तमाः गातोर्गातव्यस्य स्तोत्रस्य ज्ञातृतमाः। यद्वा गंतव्यस्य मार्गस्य लब्धतमाः इन्द्रत्वोताः इन्द्रेण ईश्वरेण त्वया ऊताराक्षिताः संतोवयं हे अग्ने ते त्वदीयं तत् तेजः विधेमहि परिचरेमहि॥ १६॥

अथ सप्तदशी—

तेघेदग्नेस्वाध्योयेत्वाविप्रनिदधिरेनृचक्षसम्।
विप्रासोदेवसुक्रतुम्॥ १७॥

ते। घ। इत्। अग्ने। सुऽआध्यः। ये। त्वा। विप्र। निऽदधिरे।
नृऽचक्षसम्। विप्रासः। देव। सुऽक्रतुम्॥ १७॥

हे अग्ने तवेव तएवखलु स्वाध्यः शोभनाध्यानाभवन्ति हे विप्र मेधाविन् देवद्योतमानाग्ने ये विप्रासोविप्राः मेधाविनऋत्विजः नृचक्षसं नृणां चेष्टारं सुक्रतुं सुकर्माणं शोभनप्रज्ञं वा त्वा त्वां निदधिरे निदधति यागार्थं गार्हपत्यादिस्थानेषु आधानसंस्कारेण स्थापयन्ति तेषेदित्यन्वयः ॥ १७ ॥

अथाष्टादशी–

तइद्वेदिंसुभगतआहुतिंतेसोतुंचक्रिरेदिवि ।
तइद्वाजेभिर्जिग्युर्महद्धनंयेत्वेकामंन्येरिरे ॥ १८ ॥

ते । इत् । वेदिम् । सुऽभग । ते । आऽहुतिम् । ते । सोतुम् ।
चक्रिरे । दिवि । ते । इत् । वाजेभिः । जिग्युः । महत् । धनम् ।
ये । त्वे इति । कामम् । निऽएरिरे ॥ १८ ॥

हे सुभग शोभनधनाग्ने तइद् तएव यजमानाः त्वयागाय वेदिं चक्रिरे कुर्वन्ति तदनन्तरं ते यजमानाः आहुतिं चरुपुरोडाशादिसाध्यां दीक्षणीयादिषु कुर्वन्ति । ततः दिवि द्योतमाने सौत्येहनि सोतुं सोममभिषोतुं चक्रिरे उद्योगं कुर्वन्ति । अनुष्ठितयज्ञास्तइद् तएव वाजेभिर्वाजैः बलैः महत्प्रभूतं धनं जिग्युर्जयन्ति शत्रुभ्योलभन्ते कुतइत्यतआह ये यजमानाः हे अग्ने त्वे त्वयि कामं अभिलाषं न्येरिरे नितरांगच्छन्ति त्वामादरातिशयेन स्तुवन्तीत्यर्थः ॥ १८ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तृशस्त्रे भद्रोनइतिप्रगाथोवैकल्पिकस्तोत्रियः । सूत्र्यतेहि–भद्रोनोअग्निराहुतोभद्रोनोअग्निराहुतइति ।

तत्राद्या सूक्ते एकोनविंशी–

भद्रोनोअग्निराहुतोभद्रारातिःसुभगभद्रोअध्वरः ।
भद्राउतप्रशस्तयः ॥ १९ ॥

भद्रः । नः । अग्निः । आऽहुतः । भद्रा । रातिः । सुऽभग । भद्रः ।
अध्वरः । भद्राः । उत । प्रऽशस्तयः ॥ १९ ॥

आहुतोहविर्भिस्तर्पितोग्निः नोस्माकं भद्रः कल्याणोभवतु हे सुभग शोभनधनाग्ने भद्रा कल्याणी रातिः दानं चास्मकं भवतु भद्रः कल्याणोध्वरोयागश्च भवतु उतापिच भद्राः कल्याण्यः प्रशस्तयः प्रशंसाः स्तुतयश्च भवन्तु ॥ १९ ॥

अथ विंशी—

भ॒द्रं मनः॑ कृणुष्व वृत्र॒तूर्ये॒ येना॑ स॒मत्सु॑ सा॒सहः॑ ।
अव॑ स्थि॒रा त॑नुहि॒ भूरि॒ शर्ध॑तां व॒नेमा॑ ते अ॒भिष्टि॑भिः ॥ २० ॥ ३२ ॥

भ॒द्रम् । मनः॑ । कृ॒णु॒ष्व॒ । वृ॒त्र॒ऽतूर्ये॑ । येन॑ । स॒मत्ऽसु॑ । सा॒सहः॑ ।
अव॑ । स्थि॒रा । त॒नु॒हि॒ । भूरि॑ । शर्ध॑ताम् । व॒नेम॑ । ते॒ ।
अ॒भिष्टि॑ऽभिः ॥ २० ॥ ३२ ॥

हे अग्ने वृत्रतूर्ये संग्रामे भद्रं शोभनं मनः कृणुष्वास्माकं कुरु । येन मनसा त्वं समत्सु संग्रामेषु सासहः भृशं शत्रूनभिभवसि अपिच शर्धतामभिभवतां शत्रूणां भूरि भूरीणि बहूनि स्थिरा स्थिराणि दृढान्यपि अवतनुहि अवांचि कुरु पराजितानि कुर्वित्यर्थः । वयं चाभिष्टिभिरभ्येषणसाधनैर्हविर्भिः स्तोत्रैश्च ते त्वां वनेम संभजेमहि । यद्वा ते तव प्रसादात् अभिष्टिभिरभीष्टैः फलैः वनेम संगच्छेमहि ॥ २० ॥

॥ इति पष्ठस्य प्रथमे द्वात्रिंशोवर्गः ॥ ३२ ॥

अथैकविंशी—

ईळे॑ गि॒रा मनु॑र्हितं॒ यं दे॒वा दू॒तम॑र॒तिं न्ये॑रि॒रे ।
यजि॑ष्ठं हव्य॒वाह॑नम् ॥ २१ ॥

ईळे॑ । गि॒रा । मनुः॑ऽहितम् । यम् । दे॒वाः । दू॒तम् । अ॒र॒तिम् ।
नि॒ऽए॒रि॒रे । यजि॑ष्ठम् । ह॒व्य॒ऽवाह॑नम् ॥ २१ ॥

गिरा वाचा स्तुतिरूपया मनुर्हितं मनुना प्रजापतिना यजमानेन आहितं तमग्निं ईळे स्तौमि । कीदृशं यजिष्ठं यष्टृतमं हव्यवाहनं हविषां वोढारं अरतिं अर्यं ईश्वरं वा दूतं देवानां दूत्येवर्तमानं यमग्निं देवान्येरिरे नितरां प्रेरयन्ति ॥ २१ ॥

अथ द्वाविंशी—

तिग्मजंम्भाय तरुणाय राजते प्रयो गायस्यग्नये ।
यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥ २२ ॥

तिग्मऽजंम्भाय । तरुणाय । राजते । प्रयः । गायसि । अग्नये ।
यः । पिंशते । सूनृताभिः । सुऽवीर्यम् । अग्निः । घृतेभिः ।
आऽहुतः ॥ २२ ॥

तिग्मजंभाय तीक्ष्णज्वालाय तरुणाय नित्ययूने जरामरणरहिताय राजते राजमानायाग्नये प्रयोहविर्लक्षणमन्नं गायसि हे स्तोतः प्रवृद्धिं प्रयच्छेत्यर्थः । योग्निः सूनृताभिः प्रियसत्यात्मिकाभिः वाग्भिः स्तुतो घृतेभिर्घृतैराज्यैराहुतोभिहुतश्चसन् सुवीर्यं शोभनवीर्यं पिंशते आश्लेषयति स्तोतृभिः संयोजयति पिशअवयवे तस्माअग्नयेइत्यन्वयः ॥ २२ ॥

आभिप्लविकेपूक्थ्येषु प्रशास्तुः शस्त्रे यदाभद्रोनइति प्रगाथःस्तोत्रियः तदानीं यदीघृतेभिरिति प्रगाथोनुरूपः । सूक्तंतु पूर्वमेवोदाहृतम् ।

तत्राद्या सूक्ते त्रयोविंशी—

यदी घृतेभिराहुंतो वाशीमग्निर्भरंत उच्चावं च ।
असुंरइव निर्णिजम् ॥ २३ ॥

यदि । घृतेभिः । आऽहुंतः । वाशीम् । अग्निः । भरंते । उत् ।
च । अवं । च । असुंरःऽइव । निःऽनिजंम् ॥ २३ ॥

घृतेभिर्घृतैराहुतोभिहुतोयमग्निः यदि यदा यस्मिन्काले वाशीं वाङ्नामैतत् वाचं शब्दं उच्च ऊर्ध्वं च अवच अवाक्च भरते संपादयति । यद्वा वाशीं वाशनशीलां शब्दकारिणीं ज्वालां उद्भरते उद्धरति उद्गमयत्यूर्ध्वमुखं अवच भरते अवाङ्मुखंच हरत्युपसंहरति । असुरइव रश्मीनां क्षेप्ता सूर्योयथा निर्णिजं आत्मीयं रूपं उपरितनेषु लोकेषु प्रकाशयोद्गमयति अधस्तनेषुच अवाङ्मुखं गमयति तद्वत् उच्चनीचभावनयाग्निस्तेजउद्गमयति तं स्तुमइति शेषः ॥ २३ ॥

अथ चतुर्विंशी—

योहव्यान्यैरयतामनुर्हितोदेवआसासुगन्धिना ।
विवासतेवार्याणिस्वध्वरोहोतादेवोअमर्त्यः ॥ २४ ॥

यः । हव्यानि । ऐरयत । मनुःऽहितः । देवः । आसा । सुऽगन्धिना ।
विवासते । वार्याणि । सुऽअध्वरः । होता । देवः । अमर्त्यः ॥ २४ ॥

[1]योमनुर्हितोमनुना प्रजापतिना आहितोदेवोद्योतमानोग्निः सुगंधिना शोभनगंधयुक्तेन आसा आस्येन हव्यान्यस्मदीयानि हवींषि ऐरयत देवान्प्रति प्रेरयति स्वध्वरः शोभनयज्ञः होता देवानामाह्वाता देवोदीप्यमानः अमर्त्योमरणरहितः सोग्निः वार्याणि वरणीयानि धनानि विवासते परिचरते यजमानाय प्रयच्छतीतिशेषः ॥ २४ ॥

अथ पञ्चविंशी—

यदग्नेमर्त्यस्त्वंस्यामहंमित्रमहोअमर्त्यः । सहसःसूनवाहुत ॥२५॥३२॥

यत् । अग्ने । मर्त्यः । त्वम् । स्याम् । अहम् । मित्रऽमहः ।
अमर्त्यः । सहसः । सूनो इति । आऽहुत ॥ २५ ॥ ३२ ॥

हे सहसः सूनो बलस्यपुत्र आहुत घृतैरभिहुत हे मित्रमहः अनुकूलदीप्तिमन् अग्ने मर्त्योमरणधर्माहं यद्यदि त्वंस्यां त्वदुपासनया त्वद्रूपमापन्नोभवेयं । ये यथा यथोपासते ते तदेव भवन्तीतिश्रुतेः । तर्ह्यहं अमर्त्योमरणधर्मरहितोदेवस्त्वं भवेयमिति ॥ २५ ॥

॥ इति पठस्य प्रथमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथ षड्विंशी—

नत्वारासीयाभिशस्तयेवसोनपापत्वायसन्त्य ।
नमेस्तोतामतीवानदुर्हितस्यादग्नेनपापया ॥ २६ ॥

---

1 बृहदारण्यके.

न । त्वा । रासीय । अभिऽशंस्तये । वसो इति । न । पापऽत्वाय ।
सन्त्य । न । मे । स्तोता । अमतिऽवा । न । दुःऽहितः । स्यात् ।
अग्ने । न । पापया ॥ २६ ॥

हे वसो वासकाग्ने त्वा त्वां अभिशस्तये अभिशंसनाय मिथ्यापवादाय हिंसायैच न रासीय नाक्रोशयेयम् । रासृशब्दे हे सन्त्य संभजनीयाग्ने पापत्वाय पापत्वाय त्वां न रासीय मे मदीयः स्तोताच अनभिमतवचनेन त्वां नाक्रोशयतु अतएव अमतीवा अमतिरशोभनाबुद्धिस्तद्वान् अपिच दुर्हितः शत्रुः हे अग्ने अस्माकं नस्यात् न भवतु अतएव पापया अशोभनया बुद्ध्या सनबाधताम् ॥ २६ ॥

अथ सप्तविंशी–

पितुर्नपुत्रःसुभृतोदुरोणआदेवाँएतुप्रणोहविः ॥ २७ ॥
पितुः । न । पुत्रः । सुऽभृतः । दुरोणे । आ । देवान् ।
एतु । प्र । नः । हविः ॥ २७ ॥

पितुर्न पुत्रः पितुः पुत्रइव अस्माकं सुभृतः सुष्ठु भर्ता । यद्वा पित्रा पुत्रइव अस्माभिः सम्यग्भृतः हविर्भिः पोषितोयमग्निः पुत्रइव अस्माकं सुभृतः दुरोणे यज्ञगृहे देवान् आ अभिलक्ष्य नोस्माकं हविः प्रैतु प्रगमयतु यद्वा । अग्निरेत्वागच्छतु अस्मदीयं हविश्च देवान्प्राप्नोतु ॥२७॥

अथाष्टाविंशी–

तवाहमग्नऊतिभिर्नेदिष्ठाभिःसचेयजोषमावसो । सदादेवस्यमर्त्यः ॥२८॥
तवं । अहम् । अग्ने । ऊतिऽभिः । नेदिष्ठाभिः । सचेय । जोषम् ।
आ । वसो इति । सदा । देवस्यं । मर्त्यः ॥ २८ ॥

हे वसो वासकाग्ने नेदिष्ठाभिरन्तिकतमाभिः ऋजुगामिनीभिर्वा देवस्य तवोतिभीरक्षाभिः मर्त्योमनुष्योहं स्तोता सदा सर्वदा जोषमासचेय प्रीतिमभिसेवेय ॥ २८॥

अथैकोनत्रिंशी–

तवक्रत्वासनेयंतवरातिभिरग्नेतवप्रशस्तिभिः ।
त्वामिदाहुःप्रमतिंवसोममाग्नेहर्षस्वदातवे ॥ २९ ॥

तवं । क्रत्वा । सनेयम् । तवं । रातिऽभिः । अग्ने । तवं । प्रशस्तिऽभिः ।
त्वाम् । इत् । आहुः । प्रऽमतिम् । वसो इति । मर्म । अग्ने ।
हर्षस्व । दातवे ॥ २९ ॥

हे अग्ने तव क्रत्वा त्वदीयेन परिचरणरूपेण कर्मणा सनेयं त्वां संभजेयम् एतदेवविशदयति तव रातिभिस्त्वदीयैर्हविर्दानैश्च सनेयं तथा तव प्रशस्तिभिः प्रशंसनैः स्तोत्रैश्च त्वां संभजेयम् अस्यैव संभजने किंकारणं तदाह । हे वसो वासकाग्ने मम स्तोतुः प्रमतिं प्रकृष्टबुद्धिं रक्षकं स्वामिनं त्वामेव आहुः ब्रह्मवादिनः कथयन्ति अतः हे अग्ने दातवे दातुं हर्षस्व हृष्टोभव हर्षयुक्तःसन् बहुधनं प्रयच्छेत्यर्थः ॥ २९ ॥

पूर्वोक्तेएव प्रशास्तुः शस्त्रे प्रसोअग्नइति प्रगाथोवैकल्पिकोनुरूपः सूत्र्यतेहि—प्रसोअग्नेतवोतिभिरग्निर्वोवृधन्तमिति ।

तत्राद्या सूक्ते त्रिंशी—

प्रसोअ॑ग्ने॒तवो॒तिभिः॑सु॒वीरा॑भिस्तिरते॒वाज॑भर्मभिः ।
यस्य॒त्वंस॒ख्यमा॒वरः॑ ॥ ३० ॥ ३४ ॥

प्र । सः । अग्ने । तवं । ऊतिऽभिः । सुऽवीराभिः । तिरते ।
वाजभर्मऽभिः । यस्य । त्वम् । सख्यम् । आऽवरः ॥ ३० ॥ ३४ ॥

हे अग्ने तवोतिभीरक्षाभिः सयजमानः प्रतिरते प्रवर्धते । ऊतयोविशेष्यन्ते सुवीराभिः शोभनावीराः पुत्रादयोयासु तास्तथोक्ताः वाजभर्मभिः वाजानामन्नानां बलानां वा भर्म भरणं यासु तादृशीभिः हे अग्ने त्वं यस्य यजमानस्य सख्यं सखित्वं मित्रत्वं आवरः अभिवृणोषि सतिरतइत्यन्वयः ॥ ३० ॥

॥ इति प्रथमस्य प्रथमे चतुस्त्रिंशोवर्गः ॥ ३४ ॥

अथैकत्रिंशी—

तवं॒द्रप्सोनील॑वान्वा॒शऋ॒त्वियइन्धा॑नःसिष्ण॒वाद॑दे ।
त्वंम॒हीना॑मु॒षसा॑मसिप्रि॒यःक्ष॒पोवस्तु॑षुराजसि ॥ ३१ ॥

तव॑ । द्र॒प्सः । नील॑ऽवान् । वा॒शः । ऋ॒त्वियः॑ । इन्धा॑नः ।
सि॒ष्णो॒ इति॑ । आ । द॒दे॒ । त्वम् । म॒ही॒नाम् । उ॒षसा॑म् । अ॒सि॒ ।
प्रि॒यः । क्ष॒पः । वस्तु॑षु । रा॒ज॒सि॒ ॥ ३१ ॥

हे सिष्णो सिषिः सेचनार्थः सोमेनासिच्यमानाग्ने द्रप्सोद्रवणशीलः नीलवान् शकटनीडेवस्थानात्तद्वान् वाशः कान्तः शब्दायमानोवा ऋत्वियः ऋतौ वसन्तादिकालविशेषे भवः इन्धानः संदीपयन् एवंभूतः तव सोमः आददे तुभ्यं होमायाध्वर्युणा आदीयते। अपिच त्वं महीनां महतीनामुपसां प्रियोमित्रभूतोसि उषसि हि अग्नयोहोमाय प्रज्वाल्यन्ते । तथा क्षपः क्षपायारात्रेः संबंधिषु वस्तुषु राजसि प्रकाशसे । यद्वा रात्रिसंबंधीनि वस्तूनि पदार्थजातानि त्वं प्रकाशयसि ॥ ३१ ॥

अथ द्वात्रिंशी—

तमाग॑न्म॒ सोभ॑रयः स॒हस्र॑मुष्कं स्वभि॒ष्टिमव॑से ।
स॒म्राजं॒ त्रास॑दस्यवम् ॥ ३२ ॥

तम् । आ । अ॒ग॒न्म॒ । सोभ॑रयः । स॒हस्र॑ऽमुष्कम् । सु॒ऽअ॒भि॒ष्टिम् ।
अव॑से । स॒म्ऽराज॑म् । त्रास॑दस्यवम् ॥ ३२ ॥

सोभरयः ऋषयोवयं अवसे रक्षणाय तमग्निं आगन्म हविर्भिः स्तुतिभिश्च प्राप्ताअभूम । कीदृशं सहस्रमुष्कं मुष्णन्ति तमांस्यपहरन्तीति मुष्कानि तेजांसि बहुतेजस्कं स्वभिष्टिं शोभनाभ्येषणं सम्राजं सम्यग्राजमानं त्रासदस्यवं त्रसदस्युर्नाम राजर्षिः तस्य स्तोत्रफलेन संबंधिनम् ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

यस्य॑ ते अग्ने अ॒न्ये अ॒ग्नय॑ उप॒क्षितो॑ व॒याइ॑व ।
विपो॒ न द्यु॒म्ना नि यु॒वे जना॑नां॒ तव॑ क्ष॒त्राणि॑ व॒र्धय॑न् ॥ ३३ ॥

यस्य॑ । ते॒ । अ॒ग्ने॒ । अ॒न्ये । अ॒ग्नयः॑ । उ॒प॒ऽक्षितः॑ । व॒याःऽइ॑व ।
विपः॑ । न । द्यु॒म्ना । नि । यु॒वे॒ । जना॑नाम् । तव॑ । क्ष॒त्राणि॑ ।
व॒र्धय॑न् ॥ ३३ ॥

हे अग्ने यस्य ते तव अन्ये अग्नयः वयाइव वृक्षस्य शाखाइव उपक्षितः समीपे निवसन्तोभवन्ति जनानां जनिमत्तां मनुष्याणां मध्ये अहं तस्य तव क्षत्राणि बलानि स्तुत्या वर्धयन् विशेन स्तोतृनामैतत् अन्ये स्तोतारइव द्युम्ना द्योतमानानि अन्नानि यशांसि वा नियुवे नितरां प्राप्नोमि त्वत्प्रसादाल्लभेयमित्यर्थः ॥ ३३ ॥

अथ चतुस्त्रिंशी–

यमा॑दित्यासोअद्रुहः॒पा॒रंनय॑थ॒मर्त्य॑म् ।
म॒घोनां॒विश्वे॑षांसुदानवः ॥ ३४ ॥

यम् । आ॒दि॒त्या॒सः॒ । अ॒द्रु॒हः॒ । पा॒रम् । नय॑थ । मर्त्य॑म् ।
म॒घोना॑म् । विश्वे॑षाम् । सु॒ऽदा॒न॒वः॒ ॥ ३४ ॥

हे अद्रुहः अद्रोग्धारः हे सुदानवः हे आदित्यासः अदितेः पुत्रामित्रादयः मघोनां हविष्मतां विश्वेषां सर्वेषां मध्ये यं मर्त्यं मनुष्यं यजमानं पारं नयथ आरब्धस्य कर्मणः समाप्तिं प्रापयथ सबतफलं लभतइत्यर्थः ॥ ३४ ॥

अथ पञ्चत्रिंशी–

यू॒यंरा॑जानः॒कंचि॑च्चर्षणीसहः॒क्षय॑न्तं॒मानु॑षाँ॒अनु॑ ।
व॒यंतेवो॒वरु॑ण॒मित्रार्य॑मन्त्स्यामेदृ॒तस्य॑र॒थ्यः॑ ॥ ३५ ॥

यू॒यम् । रा॒जा॒नः॒ । कम् । चि॒त् । च॒र्ष॒णि॒ऽस॒हः॒ । क्षय॑न्तम् ।
मानु॑षान् । अनु॑ । व॒यम् । ते । वः॒ । वरु॑ण । मित्र॑ । अर्य॑मन् ।
स्याम॑ । इत् । ऋ॒तस्य॑ । र॒थ्यः॑ ॥ ३५ ॥

हे राजानोराजमानाः हे चर्षणीसहः शत्रुभूतानामभिभवितारः आदित्याः यूयं मानुषाँ अनु मनुष्यान्यजमानाननुलक्ष्य क्षयन्तं क्षपयन्तं कंचित्कमपि शत्रुं सर्वमपि शत्रुवर्गं अभिभवथेतिशेषः । यद्वा मनुष्येषु यजमानेषु क्षयन्तं स्तुतीनामीश्वरं कंचित्कमपिस्तोतारं मा यूयंगच्छत । हे वरुण हे मित्र हे अर्यमन् ते तादृशावयं वोयुष्माकं संबंधिनः ऋतस्य यज्ञस्य रथ्यः स्याम नेतारोभवेम ॥ ३५ ॥

अथ षट्त्रिंशी–

अदा॑न्मेपौरुकु॒त्स्यः॑प॒ञ्चा॒श॒तं॑त्र॒सद॑स्युर्व॒धूना॑म् ।
मंहि॑ष्ठोअ॒र्यः॑सत्प॑तिः ॥ ३६ ॥

अदा॑त् । मे॒ । पौ॒रु॒ऽकु॒त्स्यः॑ । प॒ञ्चा॒श॒तम् । त्र॒सद॑स्युः ।
व॒धूना॑म् । मंहि॑ष्ठः । अ॒र्यः । सत्ऽप॑तिः ॥ ३६ ॥

इदमादिकेन प्रगाथेन त्रसदस्योर्दानमृषिः प्रशंसति। पौरुकुत्स्यः पुरुकुत्सपुत्रस्त्रसदस्युः मे मह्यं वधूनां पञ्चाशतं अदात् दत्तवान्। कीदृशः मंहिष्ठोदातृतमः अर्यः अभिगंतव्यः स्वामीवा सत्पतिः सतां श्रेष्ठानां स्तोतॄणां पालयिता ॥ ३६ ॥

अथ सप्तत्रिंशी–

उ॒तमे॑प्र॒यियो॑र्व॒यियोः॑सु॒वास्त्वा॒अधि॒तुग्व॑नि ।
ति॒सृ॒णां॑स॒प्त॒ती॒नां॑श्या॒वः॑प्र॒णे॒ता॒भु॒व॒द्वसु॒र्दिया॑नां॒पतिः॑ ॥ ३७॥ ३५॥

उ॒त । मे॒ । प्र॒यियोः॑ । व॒यियोः॑ । सु॒ऽवास्त्वाः॑ । अधि॑ ।
तुग्व॑नि । ति॒सृ॒णाम् । स॒प्त॒ती॒नाम् । श्या॒वः । प्र॒ऽने॒ता ।
भु॒व॒त् । वसुः॑ । दिया॑नाम् । पतिः॑ ॥ ३७ ॥ ३५ ॥

अप्येतत् यदुक्तं अपि यदेतत् वक्ष्यमाणं इत्युतशब्दः एवमुभयंतं संभावयति मेमह्यं प्रयियोः प्रयायते प्रगम्यते येन तत्प्रयियुर्धनमश्वादि तस्य प्रयियोर्धनस्य वहद्दात्। ताभिः कन्याभिः सह वयियोः ऊयते येन तद्वयियु वस्त्रादि तस्यच वहद्दात्। तिसृणां सप्ततीनां गवां श्यावः श्यामवर्णोवृषः श्यामवर्णानां प्रणेता प्रकर्षेणनेता अग्रतोगामी भुवद्वसुः भावयिता वसूनाम् प्रशस्तः पूजितलक्षणः दियानां दानार्हाणां गवांपतिः ताश्च गाएतत्संख्यायुक्ताः एतद्गुणयुक्ताश्च मत्यमदात् कपुनरसावदात् सुवास्त्वाः सुष्टु निवासायानद्याः अधितुग्वनि तीर्थेधि एतद्दात् मत्यम् । सुवास्तुर्नामनदी तुग्वतीर्थं भवेतीति निरुक्तं। अस्याऋचोव्याख्यानं निरुक्तटीकायामुद्धृतम् ॥ ३७ ॥

॥ इति पष्ठस्य प्रथमे पंचत्रिंशोवर्गः ॥ ३५ ॥

१ नि० ६. २२

आगन्तेति षड्विंशत्यृचमष्टमं सूक्तम् काण्वस्य सोभरेरार्षम् मारुतं प्रथमाद्यायुजः ककुभः द्वितीयादियुजः सतोबृहत्यः अनुक्रम्यते हि—आगन्त षड्विंशतिर्मारुतमिति । गतो विनियोगः ।

तत्र प्रथमा—

आगन्तामारिषण्यतप्रस्थावानोमापस्थातासमन्यवः ।
स्थिराचिन्नमयिष्णवः ॥ १ ॥

आ । गन्त । मा । रिषण्यत । प्रऽस्थावानः । मा ।
अप । स्थात । सम्ऽमन्यवः । स्थिरा । चित् । नमयिष्णवः ॥ १ ॥

हे प्रस्थावानः प्रस्थातारः प्रगन्तारः मरुतः आगन्त अस्मानागच्छत मारिषण्यत अनागमनेनास्मान्माहिंस्त । हे समन्यवः समानतेजस्काः समानक्रोधा वा स्थिराचित् स्थिराणि दृढान्यपि पर्वतादीनि हे नमयिष्णवो नमनशीलाः कंपयितारः मापस्थात अस्मत्तोपेत्यान्यत्र मातिष्ठत अस्मास्वेव तिष्ठतेत्यर्थः ॥ १ ॥

अथ द्वितीया—

वीळुपविभिर्मरुतऋभुक्षणआरुद्रासःसुदीतिभिः ।
इषानोअद्यागतापुरुस्पृहोयज्ञमासोभरीयवः ॥ २ ॥

वीळुपविऽभिः । मरुतः । ऋभुक्षणः । आ । रुद्रासः ।
सुदीतिऽभिः । इषा । नः । अद्य । आ । गत ।
पुरुऽस्पृहः । यज्ञम् । आ । सोभरिऽयवः ॥ २ ॥

हे ऋभुक्षणः महान्तः उरुभासमाननिवासा वा हे रुद्रासो रुद्राः रुद्रपुत्राः ईदृशाः हे मरुतः सुदीतिभिः शोभनदीप्तिकैः वीळुपविभिः रथनेमयः पवयः वीळु दृढाः पवयो येषु तादृशैः रथैरागत आगच्छत । एतदेव विवृणोति—हे पुरुस्पृहः बहुभिः स्पृहणीयाः ईप्सितव्याः सोभरीयवः सोभरिरपि मां कामयमानाः सन्तः अद्य इदानीं यज्ञं अस्मदीयं यागं इषा अस्मभ्यं दातव्येन अन्नेन सह आगत आगच्छत शीघ्रं कालविलंबं माकुरुत ॥ २ ॥

अथ तृतीया–

विद्माहिरुद्रियाणांशुष्मंमुग्रंमरुतांशिमीवताम् ।
विष्णोरेषस्यमीळ्हुषाम् ॥ ३ ॥

विद्म । हि । रुद्रियाणाम् । शुष्मम् । उग्रम् । मरुताम् ।
शिमीऽवताम् । विष्णोः । एषस्य । मीळ्हुषाम् ॥ ३ ॥

रुद्रियाणां रुद्रपुत्राणां शिमीवतां कर्मवतां विष्णोर्व्याप्तस्य एषस्य एषणीयस्य वृष्ट्युद-
कस्य मीळ्हुषां सेक्तॄणां मरुतां उग्रमुद्गूर्णं शुष्मं बलं विद्महि जानीमः खलु ॥ ३ ॥

अथ चतुर्थी–

विद्वीपानिपापतंतिष्ठंदुच्छुनोभेयुजन्तरोदसी ।
प्रधन्वान्यैरतशुभ्रखादयोयदेजथस्वभानवः ॥ ४ ॥

वि । द्वीपानि । पापतन् । तिष्ठत् । दुच्छुना । उभे इति ।
युजन्त । रोदसी इति । प्र । धन्वानि । ऐरत ।
शुभ्रऽखादयः । यत् । एजथ । स्वऽभानवः ॥ ४ ॥

द्वीपानि द्वयोः पार्श्वयोः आपो येषु तानि उदकमध्यस्थलानि द्व्यंतरुपसर्गेभ्योऽपईदितीत्वम्
ऋक्पूरित्यादिनाऽकारः समासान्तः । तानिच विपापतन् अत्यर्थं मरुद्वेगेन विपतन्ति । तिष्ठत्
स्थावरं चान्यद्वृक्षजातं दुच्छुना दुःखेन युज्यते उभे रोदसी द्यावापृथिव्यावपि युजंत ते मरु-
तः स्वागमनजनितेन कंपनेन योजयन्ति । परोर्धर्चः परोक्षकृतः धन्वानि गमनशीलान्युदकानिच
मैरत प्रगच्छंति हे शुभ्रखादयः शोभनायुधाः शोभनहविष्काचा हे स्वभानवः स्वायत्तदीप्तयः
यूयं यद्यदा एजथ कंपयथ तदा एतत्पूर्वोक्तं सर्वं निष्पाद्यते इत्यर्थः ॥ ४ ॥

अथ पञ्चमी–

अच्युताचिद्वोअज्मन्नानानदतिपर्वतासोवनस्पतिः ।
भूमिर्यामेषुरेजते ॥ ५ ॥ ३६ ॥

अच्युता । चित् । वः । अज्मन् । आ । नानदति ।
पर्वतासः । वनस्पतिः । भूमिः । यामेषु । रेजते ॥ ५ ॥ ३६ ॥

हे मरुतोवोयुष्माकं अज्मन् अज्मनि संग्रामे गमनेसति अच्युताचित् च्यावयितुमशक्याअपि पर्वतासः पर्वतामेघा गिरयोवा वनस्पतिः जातावेकवचनं वनस्पतयोवृक्षाश्च आनानदति अभितोभृशं शब्दायंते। अपिच यामेषु युष्मदीयेषु गमनेषु निमित्तेषु भूमिः पृथिवीच रेजते कंपते ॥ ५ ॥

॥ इति पञ्चस्य प्रथमे षट्त्रिंशोवर्गः ॥ ३६ ॥

अथ षष्ठी—

अमायवोमरुतोयातवेद्यौर्जिहीतउत्तराबृहत् ।
यत्रानरोदेदिशतेतनूष्वात्वक्षांसिबाह्वोजसः ॥ ६ ॥

अमाय । वः । मरुतः । यातवे । द्यौः । जिहीते ।
उत्ऽतरा । बृहत् । यत्र । नरः । देदिशते । तनूषु ।
आ । त्वक्षांसि । बाहुऽओजसः ॥ ६ ॥

हे मरुतोवोयुष्माकं अमाय बलाय यातवे यातुं द्यौर्द्युलोकः बृहदन्तरिक्षं विसृज्य उत्तरा उद्गततरा जिहीते गच्छति युष्मदागमनाद्भीतासती युष्मदीयमंतरिक्षं स्थानं परित्यज्यऊर्ध्वं पलायतइत्यर्थः । यत्र यस्मिन्नन्तरिक्षे बाह्वोजसः बाह्वोरोजोबलं येषां तादृशानरोनेतारोमरुतः त्वक्षांसि दीप्तान्याभरणानि तनूष्वात्मीयेषु शरीरेषु आदेदिशते आदिष्टानि धृतानि कुर्वन्ति । यद्वा तनूषु विस्तृतासु मेघरथास्वप्सुत्वक्षांसि तनूकृतानि तीक्ष्णीकृतान्यायुधानि मेघोच्छेदनाय आदेदिशते पुनःपुनरादिशन्ति तद्बृहदंतरिक्षं जिहीतइत्यन्वयः ॥ ६ ॥

अथ सप्तमी—

स्वधामनुश्रियंनरोमहित्वेषाअमवन्तोवृषप्सवः ।
वहन्तेअह्रुतप्सवः ॥ ७ ॥

स्वधाम् । अनु । श्रियम् । नरः । महि । त्वेषाः । अमऽवन्तः ।
वृषऽप्सवः । वहन्ते । अह्रुतऽप्सवः ॥ ७ ॥

नरोनेतारोमरुतः स्वधामनु स्वधेत्यन्ननाम हविर्लक्षणमन्नमनुलक्ष्य श्रियं शोभां महि महत्यौढं वहन्ते धारयन्ति । कीदृशाः तेषां दीप्ताः अमवन्तोबलवन्तः वृषप्सवोवर्षणरूपाः अह्रुतप्सवः अकुटिलरूपाश्च ॥ ७ ॥

अथाष्टमी–

गोभिर्वाणोअज्यतेसोभरीणांरथेकोशेहिरण्यये ।
गोबन्धवःसुजातासइषेभुजेमहान्तोनःस्परसेनु ॥ ८ ॥

गोभिः । वाणः । अज्यते । सोभरीणाम् । रथे । कोशे ।
हिरण्यये । गोऽबन्धवः । सुऽजातासः । इषे । भुजे ।
महान्तः । नः । स्परसे । नु ॥ ८ ॥

सोभरीणामृषीणां गोभिः शब्दैः स्तुतिलक्षणैर्वाणः मरुद्वीणाअज्यते व्यज्यते प्रकटी-क्रियते । कुत्र हिरण्यये रथे कोशे कोशवद्वेष्टिते मध्यदेशे । यद्वा गोभिर्गतृभिर्गोमातृकैर्वा मरुद्भिः वाणः अज्यते व्यज्यते सोभरीणां ज्ञानाय ईदृशे रथे वाघतइत्यर्थः । अपिच गोबंधवोगो-मातृकाः सुजातासः शोभनजन्मानः महांतोमहानुभावास्तेमरुतः नोस्माकं इषेन्नाय भुजे भोगाय स्परसे प्रीत्यै च वत्सनाय वा नु क्षिप्रं भवंत्विति शेषः ॥ ८॥

अथ नवमी–

प्रतिवोवृषदञ्जयोवृष्णेशर्धायमारुतायभरध्वम् ।
हव्यावृषप्रयाव्णे ॥ ९ ॥

प्रति । वः । वृषतऽअञ्जयः । वृष्णे । शर्धाय ।
मारुताय । भरध्वम् । हव्या । वृषऽप्रयाव्णे ॥ ९ ॥

हे वृषदंजयः वृषता वर्षकेण सोमेन अञ्जन्तः सिञ्चन्तोध्वर्यवः वोयूयं वृष्णे वर्षित्रे मारुताय मरुत्संघरूपाय शर्धाय बलाय हव्या हव्यानि हवींषि प्रति भरध्वम् आहवनीयं प्रति हरत । शर्धं विशेष्यते वृषप्रयाव्णे वृषाणः सेक्तारः प्रयावानः मरुतः गन्तारोमरुतोयस्मिन् तत्तथोक्तं तस्मै ॥ ९॥

अथ दशमी–

वृषणश्वेनमरुतोवृषप्स्तुनारथेनवृषनाभिना ।
आश्येनासोनपक्षिणोवृथानरोहव्यानोवीतयेगत ॥ १० ॥ ३७ ॥

वृषणश्वेन । मरुतः । वृषप्स्तुना । रथेन । वृषनाभिना । आ ।
श्येनासः । न । पक्षिणः । वृथा । नरः । हव्या । नः । वीतये । गत ॥ १० ॥ ३७ ॥

हे नरोनेतारोमरुतः वृषणश्वेन वृषभिः सेचनसमर्थैरश्वैरुपेतेन वृषप्स्तुना वर्षकरूपयुक्तेन वृषनाभिना नाभिश्चक्रछिद्रं वर्षकनाभियुक्तेन रथेन नोस्माकं हव्या हव्यानि हवींषि आगत आगच्छत । वृथा अनायासेनैव वीतये भक्षणार्थम् । तत्रदृष्टान्तः–श्येनासोन पक्षिणः श्येनाः शंसनीयगतयः पक्षिणोयथा शीघ्रमागच्छंतितद्वदनायासेन शीघ्रमागच्छतेत्यर्थः ॥ १० ॥

॥ इति प्रथमस्य प्रथमे सप्तत्रिंशोवर्गः ॥ ३७ ॥

अथैकादशी–

समानमञ्ज्येषांविभ्राजन्तेरुक्मासोअधिबाहुषु ।
दविद्युतत्यृष्टयः ॥ ११ ॥

समानम् । अञ्जि । एषाम् । वि । भ्राजन्ते । रुक्मासः ।
अधि । बाहुषु । दविद्युतति । ऋष्टयः ॥ ११ ॥

एषां मरुतां अञ्जि रूपाभिव्यंजकं आभरणं समानमेकविधमेव एतदेवाह रुक्मासोरुक्मादीप्यमानाः सुवर्णमयाहाराः विभ्राजंते वक्षःस्थलेषुविशेषेण दीप्यंते तथा बाहुष्वधि अंसेषु ऋष्टयः शक्त्यादीन्यायुधानि दविद्युतति अत्यर्थं द्योतंते ॥ ११ ॥

अथ द्वादशी–

तउग्रासोवृषणउग्रबाहवोनकिष्टनूषुयेतिरे ।
स्थिराधन्वान्यायुधारथेषुवोनीकेष्वधिश्रियः ॥ १२ ॥

ते । उग्रासः । वृषणः । उग्रबाहवः । नकिः । तनूषु । येतिरे । स्थिरा ।
धन्वानि । आयुधा । रथेषु । वः । अनीकेषु । अधि । श्रियः ॥ १२ ॥

उग्रासउद्गूर्णाः सर्वकार्येपूद्यताः वृषणोवर्षितारः उग्रबाहवः उद्गूर्णबाहुकास्ते मरुतः तनू-ष्वात्मीयेषु शरीरेषु नकिर्येमिरे रक्षणाय नमयतन्ते। नहि कश्चित्तेषां शरीराणि बाधितुं शक्नोति येन यत्नः क्रियेत। परोक्षकृतः प्रत्यक्षकृतः हे मरुतः वोयुष्माकं रथेषु धन्वानि धनूंषि आयुधान्यायोधनानि बाणादीनिच स्थिरा स्थिराणि दृढतराणि सन्ति अतएव कारणात् अनीकेष्वधि सेनामुखेषु श्रियः जयसंपदोयुष्माकं भवन्ति ॥ १२ ॥

अथ त्रयोदशी–

येषामर्णोनसप्रथोनामत्वेषंशश्वतामेकमिद्भुजे।
वयोनपित्र्यंसहः ॥ १३ ॥

येषाम्। अर्णः। न। सऽप्रथः। नाम। त्वेषम्। शश्वताम्।
एकम्। इत्। भुजे। वयः। न। पित्र्यम्। सहः ॥ १३ ॥

अर्णोन उदकमिव सप्रथः सर्वतः पृथु विस्तीर्णं त्वेषं दीप्तं शश्वतां बहूनां एषां मरुतामीदृशं नाम मरुतइतिनामधेयं एकंइत् एकं एवासहायमेव सत् भुजे स्तोतॄणां भोगाय भवति। तत्र दृष्टान्तः–सहः प्रसहनशीलं पित्र्यं पितुरागतं वयोन अन्नमिव यथा तद्विलंभेण भोगाय भवति तथेत्यर्थः तानित्युत्तरत्रैकवाक्यता ॥ १३ ॥

अथ चतुर्दशी–

तान्वन्दस्वमरुतस्ताँउपस्तुहितेषांहिधुनीनाम्।
अराणांनचरमस्तदेषांदानामह्नातदेषाम् ॥ १४ ॥

तान्। वन्दस्व। मरुतः। तान्। उप। स्तुहि।
तेषाम्। हि। धुनीनाम्। अराणाम्। न।
चरमः। तत्। एषाम्। दाना। मह्ना। तत्। एषाम् ॥ १४ ॥

हे अन्तरात्मन् तान्पूर्वोक्तगुणान् मरुतः वन्दस्व प्रणवानेवोपेत्य स्तुहि। हि यस्मात् धुनीनां कंपयितॄणां तेषां मरुतां वयं शेषभूताः स्म अराणां न अर्याणां स्वामिनां यथा चरमः हीनः सेवकः शेषभूतः तद्वत्। वत्तस्मादेषां मरुतां दाना दानानि मह्ना महत्त्वेन युक्तानि अस्माकं भवन्ति तदेषामितिद्विरुक्तिरादरार्था पदपूरणार्था वा ॥ १४ ॥

अथ पञ्चदशी–

सुभगःसवंऊतिष्वासपूर्वासुमरुतोव्युंष्टिषु ।
योवानूनमुतासति ॥ १५ ॥ ३८ ॥

सुऽभगः । सः । वः । ऊतिषु । आस । पूर्वासु । मरुतः ।
विऽउंष्टिषु । यः । वा । नूनम् । उत । असति ॥ १५ ॥ ३८ ॥

हेमरुतः वोयुष्माकं ऊतिषु रक्षासु सतीषु सस्तोता सुभगआस शोभनधनोभवति अस्ते-श्छान्दसोभूभावाभावः । यद्वा सुभगःआस दीप्यते असगतिदीप्त्यादानेषु । कदेति चेदुच्यते–पूर्वासु व्युष्टिषुपूर्वेषु अतीतेषु विवासितेषु दिवसेषु । यद्वा पूर्वासु आगामिनीषु व्युष्टिषु उषःसु उषःकालोपलक्षितेषु दिवसेषु । उतापिच योमनुष्यः स्तोता यष्टावा नूनमवश्यं असति युष्माकं भवति अ-स्तेश्छान्दसःशपोलुगभावः ससुभगइत्यन्वयः ॥ १५ ॥

॥ इति षष्ठस्य प्रथमेषट्त्रिंशोवर्गः ॥ ३८ ॥

अथ षोडशी

यस्यंवायूयंप्रतिवाजिनोनरआहव्यावीतयेंगथ ।
अभिषयुम्नैरुतवाजंसातिभिःसुम्नावोधूतयोनशत् ॥ १६ ॥

यस्यं । वा । यूयम् । प्रति । वाजिनः । नरः । आ । हव्या । वीतये ।
गथ । अभि । सः । द्युम्नैः । उत । वाजसातिऽभिः ।
सुम्ना । वः । धूतयः । नशत् ॥ १६ ॥

हे नरोनेतारोमरुतोयूयं यस्यवा यस्यच वाजिनोहविष्मतोयजमानस्य हव्या हव्यानि हवींषि प्रतिवीतये भक्षणाय आगथ आगच्छथ । रायजमानः हे धूतयः कंपयितारोमरुतः द्युम्नैर्द्योतमानैरन्नैर्यशोभिर्वा उतापिच वाजसातिभिः वाजानां संभजनैश्च वोयुष्माकं संबंधीनि सुम्ना सुम्नानि सुखानि अभिनशत् अभितोव्याप्नोति ॥ १६ ॥

अथ सप्तदशी–

यथारुद्रस्यसूनवोदिवोवशन्त्यसुंरस्यवेधसंः ।
युवानस्तथेदसत् ॥ १७ ॥

यथा । रुद्रस्य । सूनवः । दिवः । वशन्ति । असुरस्य ।
वेधसः । युवानः । तथा । इत् । असत् ॥ १७ ॥

रुद्रस्य दुःखद्रावयितुरीश्वरस्य सूनवः पुत्राः असुरस्य उदकानां क्षेप्तुर्मेघस्य वेधसोवि-धातारः यद्वा असवः प्राणाः तान् रातिददातीत्यसुरं वृष्टिजलं तस्य कर्तारः युवानोनित्यतरु-णाईदृशामरुतः दिवोन्तरिक्षादागत्य यथा येनप्रकारेण वशन्ति अस्मान्कामयन्ते तथेव तथैव तेन प्रकारेण असत् इदं स्तोत्रं भवतु । वष्टेः छान्दसः शपोलुगभावः ॥ १७ ॥

अथाष्टादशी—

येचार्हन्तिमरुतःसुदानवःस्मन्मीह्लुषश्चरन्तिये ।
अतश्चिदानउपवस्यसाहृदायुवानआववृध्वम् ॥ १८ ॥

ये । च । अर्हन्ति । मरुतः । सुऽदानवः । स्मत् । मीह्लुषः ।
चरन्ति । ये । अतः । चित् । आ । नः । उप । वस्यसा ।
हृदा । युवानः । आ । ववृध्वम् ॥ १८ ॥

सुदानवः शोभनदानाः येच यजमानाः मरुतोदेवानर्हन्ति पूजयन्ति येच मीह्लुषः सेक्तॄन् मरुतः स्मत्प्रशस्तं चरंति हविर्भिः प्रचरन्ति यजन्ति । यतएवं अतश्चित् अतोपिकारणात्तानुभ-यविधान्नोस्मान् आ अभिलक्ष्य वस्यसा वसीयसा वसुमत्तमेन हृदा हृदयेन हे युवानोमरुतः उपाववृध्वम् उपेत्याभिसंभजत ॥ १८ ॥

अथैकोनविंशी—

यूनंऊषुनविष्ठयावृष्णःपावकाँअभिसोभरेगिरा ।
गायगाइवचर्कृषत् ॥ १९ ॥

यूनः । ऊँ इति । सु । नविष्ठया । वृष्णः । पावकान् ।
अभि । सोभरे । गिरा । गाय । गाःऽइव । चर्कृषत् ॥ १९ ॥

याभिः । सिन्धुम् । अवथ । याभिः । तूर्वथ । याभिः ।
दशस्यथ । क्रिविम् । मयः । नः । भूत । ऊतिऽभिः ।
मयःऽभुवः । शिवाभिः । असचऽद्विषः ॥ २४ ॥

हे मरुतः याभिरूतिभिः सिन्धुं समुद्रमवथ रक्षथ याभिश्च तूर्वथ स्तोतॄणां शत्रून् हिंस्थ तुर्वी हिंसार्थः याभिश्च क्रिविं कूपं तृष्णजे गोतमाय दशस्यथ प्रयच्छथ हे मयोभुवः मयसःसुखस्य भावयितारः असचद्विषः अशक्तशत्रवः शत्रुरहिताः शिवाभिःकल्याणीभिः स्तोत्राभिः सर्वाभिरूतिभीरक्षाभिः नोस्माकं मयः सुखं भूत भावयत उत्पादयत । यद्वा भू प्राप्तौ प्रापयत ॥ २४ ॥

अथ पञ्चविंशी–

यत्सिन्धौयदसिक्न्यांयत्समुद्रेषुमरुतःसुबर्हिषः ।
यत्पर्वतेषुभेषजम् ॥ २५ ॥

यत् । सिन्धौ । यत् । असिक्न्याम् । यत् । समुद्रेषु ।
मरुतः । सुऽबर्हिषः । यत् । पर्वतेषु । भेषजम् ॥ २५ ॥

हे सुबर्हिषः शोभनयज्ञामरुतः सिंधौ एतत्संज्ञे स्यंदनशीले नदे यद्भेषजं अस्ति यच्चासिक्न्यां यच्च समुद्रेषु जलधिषु यच्च पर्वतेषु भेषजं विद्यते तत्सर्वं भेषजं पश्यन्तइति उत्तरयैकवाक्यता ॥ २५ ॥

अथ षड्विंशी–

विश्वंपश्यन्तोविभृथातनूष्वातेनानोअधिवोचत ।
क्षमारपोमरुतआतुरस्यनइष्कर्ताविह्रुतंपुनः ॥ २६ ॥ १० ॥

विश्वम् । पश्यन्तः । विभृथ । तनूषु । आ । तेन ।
नः । अधि । वोचत । क्षमा । रपः । मरुतः ।
आतुरस्य । नः । इष्कर्त । विऽह्रुतम् । पुनरिति ॥ २६ ॥ १० ॥

विश्वं सर्वं पूर्वोक्तं भेषजं पश्यंतोजानन्तोयूयं तनूषु अस्मदीयेषु विषयेषु आविभृथ आहरथ आहृतेनच नोस्मानधिवोचत अधिब्रूत चिकित्सतेत्यर्थः। अपिच हे मरुतः नोस्माकं मध्ये आतुरस्य रोगिणः रपः पापनामैतत् रपसः पापफलस्य रोगस्य क्षमा क्षान्तिर्यथा भवति तथा विह्रुतं विबाधितं अंगं पुनरिष्कर्त निःशेषेण संपूर्णं कुरुत। निसोनलोपश्छान्दसः। करोतेर्लोटि छान्दसोविकरणस्यलुक् तप्तनप्तनथनाश्चेति तशब्दस्य तबादेशः अतएव उपसर्गसमुदायोनावगृह्यते ॥ २६॥

॥ इति षष्ठस्य प्रथमे चत्वारिंशोवर्गः ॥ ४०॥

॥ इत्यष्टमे मंडले तृतीयोनुवाकः ॥ ३ ॥

वेदार्थस्यप्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके प्रथमोध्यायः समाप्तः॥१॥

हे सोभरे यूनोनित्यतरुणान् वृष्णोवर्षितान्पावकान् तान्मरुतः नविष्ठया अतिशयेनाभि-नवया गिरा वाचा स्तुतिरूपया सु शोभनं अभिगाय अभिष्टुहि । चर्कृषत् पुनःपुनः कृषत् कृषीवलोगाइव सयथा यूनः शक्तानानडुहः स्तौति तद्वत् ॥ १९ ॥

अथ विंशी–

साहायेसन्तिमुष्टिहेवहव्योविश्वासुपृत्सुहोतृषु ।
वृष्णश्चन्द्रान्नसुश्रवस्तमान्गिरावन्दस्वमरुतोअह ॥२०॥३९॥

सहाः । ये । सन्ति । मुष्टिहाऽइव । हव्यः । विश्वासु । पृत्ऽसु ।
होतृषु । वृष्णः । चन्द्रान् । न । सुश्रवःऽतमान् । गिरा । वन्दस्व ।
मरुतः । अह ॥ २० ॥ ३९ ॥

विश्वासु सर्वासु पृत्सु पृतनासु युद्धेषु होतृषु आह्वानशीलेषु योद्धृषु च ये मरुतः सहाः सन्ति अभिभवितारोभवन्ति हव्योह्वातव्योमुष्टिहेव मुष्टिभिः एव हन्तीति मुष्टिहा मल्लः सइव नेतिसम्प्रत्यर्थे न सम्प्रति वृष्णोवर्षितॄन् चन्द्रानाह्लादकान् सुश्रवस्तमान् अतिशयेन शोभनयशस्कान् तान्मरुतःअह मरुतएव गिरा वाचा वन्दस्व स्तुहि ॥ २० ॥

॥ इति प्रथमस्य प्रथमे एकोनचत्वारिंशोवर्गः ॥ ३९ ॥

अथैकविंशी–

गावश्चिद्घासमन्यवःसजात्येनमरुतःसबन्धवः ।
रिहतेककुभोमिथः ॥ २१ ॥

गावः । चित् । घ । सऽमन्यवः । सऽजात्येन ।
मरुतः । सऽबन्धवः । रिहते । ककुभः । मिथः ॥ २१ ॥

हे समन्यवः समानतेजस्काः समानक्रोधावा हे मरुतः गावश्चिद् गावश्च युष्मन्मातृभूताः सजात्येन समानजातित्वेन सबंधवः समानबंधुकाः सत्यः ककुभोदिशः प्राच्यादिदिग्भागान् प्राप्य मिथः परस्परं रिहते लिहन्ति घेतिपूरकः ॥ २१ ॥

अथ द्वाविंशी–

मर्तश्चिद्वोनृतवोरुक्मवक्षसउपंभ्रातृत्वमायंति ।
अधिनोगातमरुतःसदाहिवंआपित्वमस्तिनिध्रुवि ॥ २२ ॥

मर्तः । चित् । वः । नृऽतवः । रुक्मऽवक्षसः । उपं । भ्रातृऽत्वम् ।
आ । अयंति । अधि । नः । गात । मरुतः ।
सदा । हि । वः । आऽपित्वम् । अस्ति । निःऽध्रुवि ॥ २२ ॥

हे नृतयोनृत्यंतः हे रुक्मवक्षसः रोचमानाभरणं रुक्मं वक्षसि येषां ते तथोक्ताः ईदृशा हे मरुतः मर्तश्चित् मनुष्योपि स्तोता वोयुष्माकं भ्रातृत्वं सखित्वं आभिमुख्येन उपायत्युपगच्छति अतोनोस्मान् मनुष्यान्स्तोतॄन् अधिगात अधिब्रूत अस्मत्पक्षपातवचनाभवत । हि यस्मात् वो-युष्माकंआपित्वं बन्धुत्वं निध्रुवि नितरां धारयितव्ये स्तोत्रे यज्ञेवा सदा सर्वदा अस्ति विद्य-ते तस्मादित्यर्थः ॥ २२ ॥

अथ त्रयोविंशी–

मरुतोमारुतस्यनआभेषजस्यवहतासुदानवः ।
यूयंसखायःसप्तयः ॥ २३ ॥

मरुतः । मारुतस्य । नः । आ । भेषजस्य । वहत ।
सुऽदानवः । यूयम् । सखायः । सप्तयः ॥ २३ ॥

हे सुदानवः शोभनदानाः हे सखायः समानख्यानाः हे सप्तयः सर्पणशीलामरुतः नोस्माकं मारुतस्यभेषजस्य मरुत्संबंधि भेषजं औषधं यूयं आवहत आनयत ॥ २३ ॥

अथ चतुर्विंशी–

याभिःसिन्धुमवथयाभिस्तूर्वथयाभिर्दशस्यथाक्रिविम् ।
मयोनोभूतोतिभिर्मयोभुवःशिवाभिरसचद्विषः ॥ २४ ॥

याभिः । सिन्धुम् । अवथ । याभिः । तूर्वथ । याभिः ।
दुशस्यथ । क्रिविम् । मयः । नः । भूत । ऊतिऽभिः ।
मयःऽभुवः । शिवाभिः । असचऽद्विषः ॥ २४ ॥

हे मरुतः याभिरूतिभिः सिन्धुं समुद्रमवथ रक्षथ याभिश्च तूर्वथ स्तोतॄणां शत्रून् हिंस्थ तुर्वी हिंसार्थः याभिश्च क्रिविं कूपं तृष्णजे गोतमाय दशस्यथ प्रयच्छथ हे मयोभुवः मयसःसुखस्य भावयितारः असचद्विषः अशक्तशत्रवः शत्रुरहिताः शिवाभिःकल्याणीभिः स्तोत्राभिः सर्वाभिरूतिभीरक्षाभिः नोस्माकं मयः सुखं भूत भावयत उत्पादयत । यद्वा भू प्राप्तौ प्रापयत ॥ २४ ॥

अथ पञ्चविंशी–

यत्सिन्धौयदसिक्न्यांयत्समुद्रेषुमरुतःसुबर्हिषः ।
यत्पर्वतेषुभेषजम् ॥ २५ ॥

यत् । सिन्धौ । यत् । असिक्न्याम् । यत् । समुद्रेषु ।
मरुतः । सुऽबर्हिषः । यत् । पर्वतेषु । भेषजम् ॥ २५ ॥

हे सुबर्हिषः शोभनयज्ञामरुतः सिंधौ एतत्संज्ञे स्यंदनशीले नदे यद्भेषजं अस्ति यच्चासिक्न्यां यच्च समुद्रेषु जलधिषु यच्च पर्वतेषु भेषजं विद्यते तत्सर्वं भेषजं पश्यन्तइति उत्तरयैकवाक्यता ॥ २५ ॥

अथ षड्विंशी–

विश्वंपश्यन्तोबिभृथातनूष्वातेनानोअधिवोचत ।
क्षमारपोमरुतआतुरस्यनइष्कर्ताविह्रुतंपुनः ॥ २६ ॥ ४० ॥

विश्वम् । पश्यन्तः । बिभृथ । तनूषु । आ । तेन ।
नः । अधि । वोचत । क्षमा । रपः । मरुतः ।
आतुरस्य । नः । इष्कर्त । विऽह्रुतम् । पुनरिति ॥ २६ ॥ ४० ॥

विश्वं सर्वं पूर्वोक्तं भेषजं पश्यंतोजानन्तोपूर्यं तनूषु अस्मदीयेषु विषयेषु आबिभृथ आहरथ आहृतेनच नोस्मानधिवोचत अधिब्रूत चिकित्सतेत्यर्थः ।अपिच हे मरुतः नोस्माकं मध्ये आतुरस्य रोगिणः रपः पापनामैतत् रपसः पापफलस्य रोगस्य क्षमा क्षान्तिर्यथा भवति तथा विह्रुतं विबाधितं अंगं पुनरिष्कर्त निःशेषेण संपूर्णं कुरुत । निसोनलोपश्छान्दसः। करोतेर्लोटि छान्दसोविकरणस्यलुक् तप्तनप्तनथनाश्चेति तशब्दस्य तबादेशः अतएव उपसर्गसमुदायोनावगृह्यते ॥ २६॥

॥ इति पष्ठस्य प्रथमे चत्वारिंशोवर्गः ॥ ४०॥

॥ इत्यष्टमे मंडले तृतीयोनुवाकः ॥ ३ ॥

वेदार्थस्यप्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येणविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके प्रथमोध्यायः समाप्तः॥१॥

॥श्रीगणेशायनमः॥

यस्य निःश्वसितं वेदा योवेदेभ्योखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

चतुर्थेनुवाके दशसूक्तानि तत्र वयमुत्वेत्यष्टादशर्चं प्रथमं सूक्तं। अत्रानुक्रमणिका—वयमुष्टा-नान्त्येद्वृचे चित्रस्यदानस्तुतिरिति। ऋषिश्चान्यस्मादिति परिभाषया काण्वः सौभरिऋषिः। काकुभं प्रागाथं हेत्युक्तत्वादस्यापि सूक्तस्यायुजः ककुभो युजः सतोबृहत्यः। अन्त्ये द्वृचे चित्रस्य दानं देवता शिष्टाऐंद्र्यः। सूक्तविनियोगोलैंगिकः। उक्थ्ये ब्राह्मणाच्छंसिशस्त्रे वयमुत्वेति प्रगाथः स्तोत्रियः। सूत्रितञ्च—वयमुत्वामपूर्व्यंयोनइदमिदंपुरेति प्रगाथाविति। आभिप्लविकेषूक्थ्येष्वपि तृतीयसवने ब्राह्मणाच्छंसिनेवैकल्पिकोयं स्तोत्रियः प्रगाथः। सूत्रमुक्तम्—अस्मिन्नेव शस्त्रे त्वंनइन्द्राभरेति प्रगाथो यदा स्तोत्रियः तदा वयमुत्वेत्यनुरूपत्वस्याद्या। सूत्रितञ्च—वयमुत्वा-मपूर्व्यंयोनइदमिदंपुरापाहीमइन्दवइति समाहार्योनुरूपइति।

तस्मिन्सूक्ते प्रथमा—

वयमुत्वामपूर्व्यस्थूरंनकच्चिद्भरन्तोवस्यवः। वाजेंचित्रंहवामहे ॥ १ ॥

वयम्। ऊँ इति। त्वाम्। अपूर्व्य। स्थूरम्। न। कत्।
चित्। भरन्तः। अवस्यवः। वाजे। चित्रम्। हवामहे ॥ १ ॥

हे अपूर्व्य त्रिषु सवनेषु प्रादुर्भूतत्वात् अभिनवेन्द्र भरन्तः सोमलक्षणैरन्नैस्त्वां पोषयन्तो-वयं वाजे वाजन्ति गच्छन्ति योद्धारोत्रेति वाजयन्त्यायुधान्यत्रेति वा वाजः संग्रामः तस्मिन् चित्रं चायनीयं विविधरूपं त्वाम् त्वामेव अवस्य गोरक्षणमात्मनइच्छन्तः सन्तः हवामहे त्वामाह्वयामः। तत्रदृष्टान्तः—स्थूरंन यथा भरन्तः व्रीह्यादिभिः गृहं पूरयन्तोजनाः वाजे अन्नविषये स्थूरं स्थूलं गुणाधिकं कच्चित् कंचित् मानवं यथाह्वयन्ति तद्वत् ॥ १॥

अथ द्वितीया—

उपत्वाकर्मन्नूतयेसनोयुवोग्रश्चक्रामयोधृषत्। त्वामिद्ध्यवितारंववृमहेसखायइन्द्रसानसिम् ॥ २ ॥

उपं । त्वा । कर्मन् । ऊतये । सः । नः । युवा ।
उग्रः । चक्राम । यः । धृषत् । त्वाम् । इत् । हि । अवितारम् ।
ववृमहे । सखायः । इन्द्र । सानसिम् ॥ २ ॥

प्रथमपादः प्रत्यक्षकृतः । हे इन्द्र कर्मन् अग्निष्टोमादि कर्माणि ऊतये रक्षणाय त्वा त्वां उपगच्छामः । द्वितीयपादः परोक्षकृतः । यइन्द्रः धृषत् धृष्णोति शत्रूनभिभवति त्रिवृपामागल्भ्ये बहुलंछन्दसीति शप्प्रत्ययः । युवा तरुणः उग्रउद्गूर्णः सइन्द्रः नोस्मान् प्रतिचकाम आगच्छतु । यद्वा चक्राम अस्मानुत्साहयुक्तान् करोतु क्रमतेः सर्गार्थे व्यत्ययेन परस्मैपदम् । परोर्धर्चः प्रत्यक्षकृतः । सखायः समानख्यानाः बंधुभूतावा वयं सानसिं वननप संभक्तौ संभजनीयं अवितारं सर्वस्य रक्षितारं त्वामित् त्वामेव ववृमहे वृणीमहे संभजामहे । हिः प्रसिद्धौ हियोगादनिघातः ॥ २ ॥

अथ तृतीया–

आयाहीमइन्दवोश्वपतेगोपतउर्वरापते ।
सोमंसोमपतेपिब ॥ ३ ॥

आ । याहि । इमे । इन्दवः । अश्वऽपते । गोऽपते ।
उर्वराऽपते । सोमम् । सोमऽपते । पिब ॥ ३ ॥

अश्वपते अश्वानां स्वामिन् गोपते गवां पालयितः उर्वरापते सर्वसस्याढ्याभूमिरुर्वरा तस्याः पते हे इन्द्र इन्दवः सोमाः इमे भवदीयाः त्वदर्थमभिषुताइत्यर्थः तस्मादायाहि आगच्छ आगत्य सोमपते हे इंद्र सोमं पिब ॥ ३ ॥

अथ चतुर्थी–

वयंहित्वाबन्धुमन्तमबन्धवोविप्रासइन्द्रयेमिम ।
यातेधामानिवृषभतेभिरागहिविश्वेभिःसोमपीतये ॥ ४ ॥

वयम् । हि । त्वा । बन्धुऽमन्तम् । अबन्धवः ।
विप्रासः । इन्द्र । येमिम । या । ते । धामानि ।
वृषभ । तेभिः । आ । गहि । विश्वेभिः । सोमऽपीतये ॥ ४ ॥

हे इन्द्र अबंधवः बन्धुरहिताः विप्रासः मेधाविनोवयं बन्धुमन्तं बन्धुभिर्देवैर्गिरोभिर्वा तद्वंतं त्वा त्वां हिरवधारणे त्वामेव येमिम बन्धुत्वेन नियच्छाम यच्छतेर्लिटिरूपम् । तथा सति हे वृषभ कामानां वर्षितरिन्द्र ते तव या यानि धामानि शरीराणि तेजांसि वा विद्यन्ते तेभिस्तै-र्विश्वेभिः सर्वैर्धामभिः सह सोमपीतये सोमपानार्थमागहि आगच्छ ॥ ४ ॥

अथ पञ्चमी—

सीदन्तस्तेवयोयथागोश्रीतेमधौमदिरेविवक्षणे ।
अभित्वामिन्द्रनोनुमः ॥ ५ ॥ १ ॥

सीदन्तः । ते । वयः । यथा । गोऽश्रीते । मधौ ।
मदिरे । विवक्षणे । अभि । त्वाम् । इन्द्र । नोनुमः ॥ ५ ॥ १ ॥

हे इन्द्र गोश्रीते श्रीड् पाके गोविकारे दधिपयसी गोशब्देनोच्येते दध्ना पयसाच श्रीतेन श्रयणद्रव्येण मिश्रिते मदिरे मदकरे विवक्षणे स्वर्गप्रापणशीले ते त्वदीये मधौ सोमे सीदन्तो-निवसन्तः । सदने दृष्टान्तः—वयोयथा पक्षिणोयथैकत्रसंघीभूय तिष्ठन्ति तद्वत् सीदंतोवयं त्वामभि आभिमुख्येन नोनुमः पुनःपुनर्भृशंवा स्तुमः ॥ ५ ॥

॥ इति पञ्चस्य द्वितीये प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी—

अच्छांचत्वैनानमसावदामसिकिंमुहुश्चिद्विदीधयः ।
सन्तिकामासोहरिवोदद्दिष्ट्वस्मोवयंसन्तिनोधियः ॥ ६ ॥

अच्छ । च । त्वा । एना । नमसा । वदामसि । किम् ।
मुहुः । चित् । वि । दीधयः । सन्ति । कामासः । हरिऽवः ।
ददिः । त्वम् । स्मः । वयम् । सन्ति । नः । धियः ॥ ६ ॥

हे इन्द्र अच्छाच अपिच आभिमुख्येनवा एना एनेन नमसा स्तोत्रेण हविर्लक्षणेनान्नेनवा स-ह त्वा त्वां वदामसि अभिवदामः चवायोगे प्रथमेति ननिघातः । त्वंतु मुहुश्चित् मुहुर्मुहुः किं कस्माद्देनोविदीधयः विपूर्वोदीधितिर्ध्यानेवित्रिंतयसि दीधीङ् दीप्तिदेवनयोः व्यत्ययेन परस्मै-पदम् लुगभावश्च । किमर्थं यूयं वदथेतिचेत् हरिवः हरिताश्ववन् हे इन्द्र अस्माकं कामासः

पुत्रपश्वादिविषयाः कामाः सन्ति कामाः सन्तु । अहं नमयच्छामीतिचेत् त्वंतु ददिः धनादिदाता खलु तस्मादयं त्वत्सन्निधौ स्मोभवामः । किञ्च नोस्माकं धियः कर्माणिच तवसमीपे सन्ति तिष्ठन्ति । ततोधनादिदानार्थं त्वां वदामइत्यर्थः ॥ ६॥

अथ सप्तमी–

नूत्नाइदिन्द्रतेवयमूतीअभूमनहिनूतेअद्रिवः ।
विद्मापुरापरीणसः ॥ ७ ॥

नूत्नाः । इत् । इन्द्र । ते । वयम् । ऊती । अभूम ।
नहि । नु । ते । अद्रिऽवः । विद्म । पुरा । परीणसः ॥ ७ ॥

हे इन्द्र ते तव ऊती ऊत्यै रक्षणे वयं नूत्नाइत् नूतनाएव अभूम भवामः । अद्रिवः वज्रिन् हे इन्द्र पुरा पूर्वं त्वां परीणसः सुवृव्यत्ययः परीणसं परितोव्याप्तं महांतं वेदि नहिविद्म नजानीमः । नु सम्प्रति ते त्वां महान्तमिति जानन्तोवयं भवता रक्ष्याइति ॥ ७ ॥

अथाष्टमी–

विद्मासखित्वमुतशूरभोज्य१मातेतावज्रिन्नीमहे ।
उतोसमस्मिन्नाशिशीहिनोवसोवाजेसुशिप्रगोमति ॥ ८॥

विद्म । सखिऽत्वम् । उत । शूर । भोज्यम् । आ । ते । ता ।
वज्रिन् । ईमहे । उतो इति । समस्मिन् । आ । शिशीहि ।
नः । वसो इति । वाजे । सुऽशिप्र । गोऽमति ॥ ८ ॥

शूर शत्रूणां शातयितर्बलवन् हे इन्द्र सखित्वं तव सखिभावं वयं विद्म जानीमः । उतापिच भोज्यमभ्यवहारार्थं धनंच विद्म । वज्रिन् हे इन्द्र ते त्वदीये ता ते सख्यधने आ आभिमुख्येन ईमहे वयं याचामहे । उतो अपिच हे वसो सर्वस्यवासयितः सुशिप्र शोभनहनो यद्वा शोभनशिरस्त्राण हे इन्द्र गोमति गवादियुक्तेसमस्मिन् सर्वस्मिन् वाजे अन्ने नोस्मानाशिशीहि तीक्ष्णीकुरु । उपलक्षणं प्रदानेनास्मान्समिद्धान्कुर्वित्यर्थः । शिञ् निशाने इत्यस्यछान्दसः श्लुः ॥ ८ ॥

उक्थ्ये ब्राह्मणाच्छंसिशस्त्रे योनइदमिदमित्ययं प्रगाथोनुरूपः । योनइदमिदंपुरेति प्रगाथौ सर्वाः ककुभः इतिसूत्रितम् । आभिप्लविकेपूक्थ्येष्वपि ब्राह्मणाच्छंसिशस्त्रेऽयं वैकल्पिकोनुरूपः आभिप्लविकेपूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे त्वंनइन्द्राभरेतिप्रगाथे स्तोत्रियेसति अनुरूपतृचः समाहार्यः तत्रेयं योनइदमिदमितिद्वितीया । सूत्रितंच—योनइदमिदंपुरायाहीमइन्दवइति समाहार्योनुरूपइति ।

तस्मिन्प्रगाथे प्रथमा सूक्ते नवमी—

योनइदमिदंपुराप्रवस्यआनिनायतमुंवस्तुषे ।
सखायइन्द्रमूतये ॥ ९ ॥

यः । नः । इदम्ऽइदम् । पुरा । प्र । वस्यः । आऽनिनाय । तम् । ऊं इति । वः । स्तुषे । सखायः । इन्द्रम् । ऊतये ॥ ९ ॥

सखायः समानख्याना हे ऋत्विग्यजमानाः यइन्द्रः पुरा पूर्वमिदमिदं दर्शनीयतया विद्यमानं वस्यः वसीयः वसोरीयसुनीकारलोपश्छान्दसः प्रशस्तं वसु नोस्मान् प्राणिनाय प्रकर्षेणानीतवान् । तमु तमेव धनानामानेतारमिन्द्रं वोयुष्माकं धनलाभार्थं ऊतये रक्षणायच स्तुषे सोऽहरिहं स्तौमि ॥ ९॥

अथ दशमी—

हर्यश्वंसत्पतिंचर्षणीसहंसहिष्मायोअमन्दत ।
आतुनःसवयतिगव्यमश्व्यंस्तोतृभ्योमघवाशतम् ॥ १० ॥२॥

हरिंऽअश्वम् । सत्ऽपतिम् । चर्षणिऽसहम् । सः । हि ।
स्म । यः । अमन्दत । आ । तु । नः । सः । वयति ।
गव्यम् । अश्व्यम् । स्तोतृऽभ्यः । मघऽवा । शतम् ॥ १० ॥ ॥ २ ॥

हर्यश्वं हरितवर्णाश्वोपेतं सत्पतिं स्वप्रकाशाविकल्पेन सतां नक्षत्राणां पतिं सतां श्रेष्ठानां पतिंवा चर्षणीसहं चर्षणीनां शत्रुभूतानां मनुष्याणामभिभवितारं सहिष्म सखलु जनः स्तौति । योजनः अमन्दत तनोत्स्थयनःसन् तुष्टोभवति सएनं तुष्टूपति । एवंसतिमघवा धनवान् सइन्द्रः

शतं गव्यमश्व्यमनेकं गवाश्वसंघं स्तोतृभ्योनोस्मभ्यं तु क्षिप्रमावपति आपापयतु। वीगत्यादिषु अस्माल्लिट्यडागमः ततोलब्धगवादिकाश्चयं चैनं स्तुमइति ॥ १० ॥

॥ इति पञ्चस्य द्वितीये द्वितीयोवर्गः ॥ २ ॥

अथैकादशी–

त्वयाह्स्विद्युजावयंप्रतिंश्वसन्तंवृषभब्रुवीमहि ।
संस्थेजनस्यगोमतः ॥ ११ ॥

त्वया । ह । स्वित् । युजा । वयम् । प्रति । श्वसन्तम् ।
वृषभ । ब्रुवीमहि । सम्ऽस्थे । जनस्य । गोऽमतः ॥ ११ ॥

वृषभ वर्षितः हे इन्द्र गोमतोगवादियुक्तस्य जनस्य संस्थे स्थाने युद्धे श्वसन्तं अस्मान् प्रति क्रोधातिशयेन श्वासकारिणं शत्रुं युजा सहायेन त्वया ह स्वित् त्वयैव खलु वयं प्रतिब्रुवीमहि प्रतिवचनं कुर्मः निराकरिष्यामइत्यर्थः ॥ ११ ॥

अथ द्वादशी–

जयेमकारेपुरुहूतकारिणोभितिष्ठेमदूढ्यः ।
नृभिर्वृत्रंहन्यामशूशुयामचावेरिन्द्रप्रणोधियः ॥ १२ ॥

जयेम । कारे । पुरुऽहूत । कारिणः । अभि ।
तिष्ठेम । दुःऽध्यः । नृऽभिः । वृत्रम् । हन्याम ।
शूशुयाम । च । अवेः । इन्द्र । प्र । नः । धियः ॥ १२ ॥

पुरुहूत पुरुभिर्बहुभिराह्वातव्य हे इन्द्र अस्माकं विविधाः शत्रवः उपद्रवकारिणः बाधां मनसा स्मरंतश्चेति। तत्र कारिणः हिंसां कुर्वन्तः शत्रून् कारे कीर्त्यते आयुवाग्यत्रेति कारोयुद्धं तस्मिन् तान्वयं जयेम। दूढ्यः दुर्धियः पापबुद्धीनपि अभि निष्ठेम अभितः स्थास्यामः। किंच वृत्रं शत्रुमारकं शत्रुं नृभिः आयुधनेतृभिर्मरुद्भिः सह हन्याम हिंस्याम हत्वा शूशुयामच शत्रुराहित्येन पुत्रपौत्रैरग्निष्टोमादिकर्मभिश्च वर्धयेमहि। यद्वा स्यन्तिरत्रान्तर्णीतण्यर्थः शत्रुभ्योबाधाभावात् सोमलक्षणैरन्नैस्त्वां वर्धयेम ततस्त्वंनोस्माकं धियः कर्माणि प्रावेः प्रकर्षेण रक्ष ॥१२॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे अभ्रातृव्यइत्यादिकौ द्वौ प्रगाथौ वैकल्पिकौ स्तोत्रियानुरूपौ सूत्रितश्च—अभ्रातृव्योअनात्वंमातेअमाजुरोयथेति ।

तयोः प्रगाथयोः प्रथमा सूक्ते त्रयोदशी—

अभ्रातृव्योअनात्वमनापिरिन्द्रजनुषासनादसि ।
युधेदापित्वमिच्छसे ॥ १३ ॥

अभ्रातृव्यः । अना । त्वम् । अनापिः । इन्द्र । जनुषा ।
सनात् । असि । युधा । इत् । आपिऽत्वम् । इच्छसे ॥ १३ ॥

हे इन्द्र त्वं जनुषा जन्मनैव अभ्रातृव्यः । व्यन्त्सपत्नइति व्यन्प्रत्ययः । सपत्नरहितः अना अनेतृकः ऋतश्छन्दसीतिकपः प्रतिषेधः अनियन्तृकइत्यर्थः अनापिः बन्धुवर्जितश्च सनादसि चिरादेव भ्रातृव्यादिवर्जितोसि यच्च त्वं आपित्वं बान्धवमिच्छसे इच्छसि तत्र युधेत् युद्धेनैव युद्धं कुर्वन्नेव स्तोतॄणां सखाभवसीति ॥ १३ ॥

अथ चतुर्दशी—

नकीरेवन्तंसख्यायविन्दसेपीयन्तितेसुराश्वः ।
यदाकृणोषिनदनुंसमूहस्यादित्पितेवहूयसे ॥ १४ ॥

नकिः । रेवन्तम् । सख्याय । विन्दसे । पीयन्ति ।
ते । सुराश्वः । यदा । कृणोषि । नदनुम् । सम् । ऊहसि ।
आत् । इत् । पिताऽइव । हूयसे ॥ १४ ॥

हे इन्द्र रेवन्तं धनवन्तं केवलधनवन्तं दानादिरहितमयष्टारमाढ्यं मानवं सख्याय सखिभावाय नकिर्विन्दसे नभजसे नाश्रयसीत्यर्थः । अयष्टारोजनाः किं सन्तीत्यतआह—सुराश्वः दुओश्विगतिवृद्ध्योः सुरया वृद्धाः वर्द्धद प्रमत्ताः नास्तिकाः ते त्वां पीयंति पीयतिर्हिंसाकर्मा हिंसन्ति त्वामाश्रयन्तीत्यर्थः । यदा त्वं नदनुं नदअव्यक्ते शब्दे यं स्तोतारं कृणोषि मदीयोयमिति पश्च भावयसि तदानीं समूहसि धनादिकं तस्मै वहसि । आदित् अनन्तरमेव तेन लब्धधनेन स्तोत्रा पितेव पालयिता जनकइव हूयसे स्तुतिभिराहूयसे स्तूयसइत्यर्थः ॥ १४ ॥

अथ पंचदशी–

मातेंअमाजुरोयथामूरासइन्द्रसख्येत्वावतः ।
निषदामसचासुते ॥ १५ ॥ ३ ॥

मा । ते । अमाऽजुरः । यथा । मूरासः । इन्द्र ।
सख्ये । त्वाऽवतः । नि । सदाम । सचा । सुते ॥ १५ ॥ ३ ॥

हे इन्द्र ते तव स्वभूतावयं तथा माभूम माभवाम । यथा त्वावतः त्वत्सदृशस्य देवस्य सख्ये मूरासोमूराः सोममदानादिन्द्रेणसह सख्यं कुर्मइत्येवदजानन्तोमूढाजनाः अमाजुरः सोमाभिषवमकुर्वन्तस्ते गृहैः पुत्रैः पौत्रैर्धनादिभिश्च सह जीर्णाभवन्ति । तथा वयममाजुरोनभवाम कथं सचा ऋत्विग्भिः सह सुतेभिषुते सोमे वयंतु निषदाम निवसाम तस्मात्सोमदानेन त्वया सह सखिभावंकुर्मइत्यर्थः ॥ १५ ॥

॥ इति षष्ठस्य द्वितीये तृतीयोवर्गः ॥ ३ ॥

अथ षोडशी–

मातेगोदत्रनिरराममराधसइन्द्रमातेगृहामहि ।
दृह्लाचिदर्यःप्रमृशाभ्याभरनतेदामानआदभे ॥ १६ ॥

मा । ते । गोऽदत्र । निः । अराम । राधसः । इन्द्र ।
मा । ते । गृहामहि । दृह्ला । चित् । अर्यः । प्र ।
मृश । अभि । आ । भर । न । ते । दामानः । आऽदभे ॥ १६ ॥

हे गोदत्र स्तोतॄणां गवादिदानशील हे इन्द्र ते तव स्वभूतावयं राधसोधनात् मानिरराम मानिर्गमाम अर्तेर्लुङि सर्तिशास्त्यर्तिभ्यश्चेत्यङादेशः ऋदृशोऽङीतिगुणः सर्वदा त्वत्तोधनाढ्याभवाम । किञ्च ते तव स्वभूतावयं धनं प्रयच्छाम कस्माचित् मागृहामहि तस्मादन्यंनगृह्णीमः । अपितु त्वत्तएव धनंगृह्णीमइत्यर्थः । ग्रहेर्लुङि बहुलंछन्दसीतिशः ह्रिज्यादिनासम्प्रसारणं । अर्यःस्वामी त्वं दृह्लाचित् दृढान्यपि अविनश्वराणि धनानि प्रमृश प्रकर्षेणास्मासु स्थापय । किञ्च अभ्याभिमुख्येन आभर धनादिभिः समन्तादस्मान् पोषय ते तव दामानः दानानि नादभे नकेनचिदप्यादंभितुं शक्यन्ते तस्माद्दानादियुक्तानस्मान् कुर्वित्यर्थः ॥ १६ ॥

अथ सप्तदशी–

इन्द्रोवाघेदियन्मघंसरस्वतीवासुभगादुदिर्वसु ।
त्वंवाचित्रदाशुषे ॥ १७ ॥

इन्द्रः । वा । घ । इत् । इयत् । मघम् । सरस्वती ।
वा । सुऽभगा । ददिः । वसु । त्वम् । वा । चित्र । दाशुषे ॥ १७ ॥

अत्र चित्रस्य दानं स्तौति चित्रोनामराजा सरस्वतीतीरे इन्द्रार्थं यागमकरत तत्र मन्त्रद्रष्टाऋषिः बहुधनलाभान्मत्यमेतावद्धनं कोवाप्रायच्छदिति विकल्पयते । दाशुषे इन्द्राय हवींषि दत्तवते मत्यं इन्द्रोवाघेत् इन्द्रएव किंखल्वेतावन्मघं मंहनीयं धनं ददिः प्रायच्छत् यद्वा सुभगा शोभनधना सरस्वती नदी वसु धनं ददिः किं प्रायच्छत् । अथवा चित्रएतन्नामक हे राजन् त्वं वा एतावद्धनं मत्यं प्रादादिति ॥ १७॥

अथाष्टादशी–

चित्रइद्राजाराजकाइदन्यकेयकेसरस्वतीमनु ।
पर्जन्यइवततनद्धिवृष्ट्यासहस्रमयुतादद्त् ॥ १८ ॥ ४ ॥

चित्रः । इत् । राजा । राजकाः । इत् । अन्यके । यके ।
सरस्वतीम् । अनु । पर्जन्यःऽइव । ततनत् । हि ।
वृष्ट्या । सहस्रम् । अयुता । ददत् ॥ १८ ॥ ४ ॥

अनया चित्रएव प्रादादिति निश्चयमकार्षीत् । सहस्रं सहस्रसंख्याकधनं अयुता अयुतानि च धनानिच ददत् प्रयच्छन् चित्रइत् चित्रनामैव राजा अन्यके यके अल्पइत्यर्थेकः अल्पाअन्येराजकाइत् राजानएव सरस्वतीमनु सरस्वत्यास्तीरे वर्तन्ते तान् सर्वान् याचमानानयमेव चित्रोराजा ततनत् धनैस्तनोति तनोतेर्लुङिचङिरूपम् चङ्यन्यतरस्यामितिस्वरः । तत्रदृष्टान्तः– पर्जन्यइव यथापर्जन्यः पृथिवीं वृष्ट्यातनोति प्रीणयति तथायं चित्रः सर्वान्धनैः प्रीणयतीत्यर्थः ॥ १८ ॥

॥ इति पञ्चमस्य द्वितीये चतुर्थोवर्गः ॥ ४ ॥

ओत्यमह्वइत्यष्टादशर्चं द्वितीयं सूक्तं काण्वस्य सोभरेरार्षं आद्यातृतीयापञ्चम्योबृहत्यः

द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः सप्तमीबृहती अष्टम्यनुष्टुप् नवमीदशमी द्वे ज्योतिषी काकुभंप्रगाथं हेत्युक्तस्यानुवृत्तेः शिष्टाश्चत्वारः काकुभाःप्रगाथाः अश्विनौ देवता। तथाचानुक्रान्तम्—ओत्यमाश्विनं त्रिप्रगाथादि बृहत्यनुष्टुबेकादश्यायेककुम्मध्ये ज्योतिषीइति। प्रातरनुवाके आश्विने क्रतौ बार्हतेछन्दस्याश्विनशस्त्रे चाद्याः सप्तर्चः सूत्रितंच—ओत्यमह्वआरथमितिसप्तेति।

तत्र प्रथमा—

ओत्यमह्वआरथमद्यादंसिष्ठमूतये।
यमश्विनासुहवारुद्रवर्तनीआसूर्यायैतस्थथुः॥ १॥

ओ इति। त्यम्। अह्वे। आ। रथम्। अद्य। दंसिष्ठम्।
ऊतये। यम्। अश्विना। सुऽहवा।
रुद्रवर्तनी इति रुद्रऽवर्तनी। आ। सूर्यायै। तस्थथुः॥ १॥

हे अश्विनौ दंसिष्ठमत्यंतदर्शनीयं यद्वा अतिशयेन शत्रूणामुपक्षपयितारं त्यं तं युवयोरथं ऊतये रक्षणाय अद्यास्मिन्यागदिने अह्वे सोभरिरहमाह्वयामि सुहवा सुहवौ स्तोत्रशस्त्रादिभिः शोभनाह्वानौ रुद्रवर्तनी संग्रामे रोदनशीलमार्गौ यद्वा स्तूयमानमार्गौ हे अश्विनौ सूर्यायै सूर्यां स्वयंवरे वरयितुं यं रथं युवां आतस्थथुः आश्रयथः तं रथमाह्वयामीति॥ १॥

अथ द्वितीया—

पूर्वापुषंसुहवंपुरुस्पृहंभुज्युंवाजेषुपूर्व्यम्।
सचनावन्तंसुमतिभिःसोभरेविद्वेषसमनेहसम्॥ २॥

पूर्वऽआपुषम्। सुऽहवम्। पुरुऽस्पृहम्। भुज्युम्।
वाजेषु। पूर्व्यम्। सचनाऽवन्तम्। सुमतिऽभिः।
सोभरे। विऽद्वेषसम्। अनेहसम्॥ २॥

हे सोभरे सुमतिभिः कल्याणीभिः स्तुतिभिः अश्विनोरथं स्तुहि। किं विशिष्टं पूर्वापुषं पूर्वेषां स्तोतॄणां धनादिदानेन पोषकं सुहवं युद्धेषु शोभनाह्वानं पुरुस्पृहं बहुभिः स्पृहणीयं भुज्युं भुजपालने सर्वस्यरक्षकं वाजेषु पूर्व्यं संग्रामेष्वग्रतोगंतारं सचनावन्तं सर्वेर्भजनवन्तं विद्वेषसं शत्रूणां विशेषेणद्वेष्टारं अनेहसं कैश्चिदप्यनुपद्रवं पापरहितं वा रथं स्तुहीत्यन्वयः॥ २॥

अथ तृतीया—

इहत्यापुरुभूतमादेवानमोभिरश्विना ।
अर्वाचीनास्ववसेकरामहेगन्तारादाशुषोगृहम् ॥ ३ ॥

इह । त्या । पुरुऽभूतमा । देवा । नमःऽभिः ।
अश्विना । अर्वाचीना । सु । अवसे ।
करामहे । गन्तारा । दाशुषः । गृहम् ॥ ३ ॥

पुरुभूतमा अतिशयेन बहूनां शत्रूणां भावयितारौ देवा देवौ द्योतनशीलौ स्तोतव्यौ वा दाशुषः हविर्दत्तवतोयजमानस्य गृहं प्रति गंतारा गमनशीलौ त्या तौ अश्विना अश्विनौ युवां इहास्मिन्कर्मणि अवसे रक्षणाय नमोभिर्हविर्भिःस्तोत्रैर्वा अर्वाचीना अर्वाचीनौ अभिमुखमागच्छन्तौ सुकरामहे वयं सुष्टु कुर्मः ॥ ३ ॥

अथ चतुर्थी—

युवोरथस्यपरिचक्रमीयतईर्मान्यद्वामिषण्यति ।
अस्माँअच्छासुमतिर्वांशुभस्पतीआधेनुरिवधावतु ॥ ४॥

युवोः । रथस्य । परि । चक्रम् । ईयते । ईर्मा ।
अन्यत् । वाम् । इषण्यति । अस्मान् । अच्छ । सुऽमतिः ।
वाम् । शुभः । पती इति । आ । धेनुःऽइव । धावतु ॥ ४ ॥

हे अश्विनौ युवोः युवयोरथस्यैकंचक्रं परितोद्यां ईयते गच्छति अन्यदवस्थितं रथस्य चक्रमीर्मा ईर्मौ सर्वस्यान्तर्यामितया प्रेरकौ यद्वा उदकस्य प्रेरयितारौ वां युवामिषण्यति गच्छति । उक्तार्थप्रशांतरं—न्य[1]ग्न्यस्यमूर्धनीति । हे शुभस्पती उदकस्य पालयितारौ हे अश्विनौ वां युवयोः सुमतिः कल्याणीमतिरच्छाभिमुख्येन अस्मानाधावतु आगच्छतु । तत्रदृष्टान्तः— धेनुरिव यथानवप्रसूतागौर्वत्सं प्रति पयोदानार्थमागच्छति तद्वद्युवयोः सुमतिरस्मान्प्रति धनादिप्रदानार्थमागच्छतु ॥ ४ ॥

---

1 ऋ० सं० १.२.३१ ।

अथ पञ्चमी—

रथोयोवांत्रिवन्धुरोहिरण्याभीशुरश्विना ।
परिद्यावांपृथिवीभूषतिश्रुतस्तेननासत्यागतम् ॥ ५ ॥५॥

रथः । यः । वाम् । त्रिऽवन्धुरः । हिरण्यऽअभीशुः ।
अश्विना । परि । द्यावापृथिवी इति ।
भूषति । श्रुतः । तेन । नासत्या । आ । गतम् ॥ ५ ॥ ५ ॥

हे अश्विना अश्विनौ त्रिवंधुरः वंधुरं सारथिस्थानं त्रिप्रकारवंधुरोपेतः यद्वा द्वे ईषे तन्मध्ये रज्जुसज्जनार्थकोदंडः एतेत्रयोवंधुरशब्देनोच्यन्ते त्रिवंधुरयुक्तः हिरण्याभीशुः हिरण्मयाश्वादिरज्जुः वां युवयोर्योरथः श्रुतः सर्वत्रप्रसिद्धः सन् द्यावापृथिवी द्यावापृथिव्यौ परिभूषति स्वबलेन परिभवति भवतेर्लेटि सिप्यडागमः । यद्वा परितः स्वप्रकाशेनालंकरोति हे नासत्या नासत्यौ तेन पूर्वोक्तेन रथेनागतम् आगच्छतम् ॥ ५ ॥

॥ इति षष्ठस्य द्वितीये पञ्चमोवर्गः ॥ ५ ॥

अथ षष्ठी—

दशस्यन्तामनवेपूर्व्यंदिवियवंवृकेणकर्षथः ।
तावामद्यसुमतिभिःशुभस्पतीअश्विनाप्रस्तुवीमहि ॥ ६॥

दशस्यन्ता । मनवे । पूर्व्यम् । दिवि । यवम् ।
वृकेण । कर्षथः । ता । वाम् । अद्य । सुमतिऽभिः ।
शुभः । पती इति । अश्विना । प्र । स्तुवीमहि ॥ ६ ॥

हे अश्विनौपूर्व्यं पुरातनं दिवि द्युलोके स्थितमुदकं मनवे एतन्नामकायराज्ञे दशस्यन्ता दशस्यन्तौ प्रयच्छन्तौ युवां वृकेण लांगलेन । वृकोलांगलंभवति विकर्तनादितियास्कः । तेन लांगलेन यवं यवनामकंधान्यं कर्षथः पुनश्च तस्मै विलेखनं कुरुथः । शुभस्पती उदकस्य पालयितारौ हे अश्विना अश्विनौ ता पूर्वोक्तलक्षणयुक्तौ वां युवां अद्यास्मिन्यज्ञदिने सुमतिभिः शोभनाभिः स्तुतिभिः प्रकर्षेण स्तुवीमहि वयं स्तुमः ॥ ६ ॥

---

१ नि० ६. २६. ।

अथ सप्तमी—

उपनोवाजिनीवसूयातमृतस्यपथिभिः ।
येभिस्तृक्षिंवृषणात्रासदस्यवंमहेक्षत्रायजिन्वथः ॥ ७ ॥

उप । नः । वाजिनीवसू इति वाजिनीऽवसू । यातम् ।
ऋतस्य । पथिऽभिः । येभिः । तृक्षिम् । वृषणा ।
त्रासदस्यवम् । महे । क्षत्राय । जिन्वथः ॥ ७ ॥

हे वाजिनीवसू अन्नधनवन्तौ अन्नमेवधनं ययोस्तौ अश्विनौ ऋतस्य सत्यभूतस्य यज्ञस्य पथिभिर्मार्गैर्नोस्मानुपयातं आगच्छतं वृषणा वृषणौ धनानां सेक्तारौ हे अश्विनौ त्रासदस्यवं त्रसदस्योः पुत्रं तृक्षिमेतन्नामकं येभिर्यैर्यज्ञमार्गैर्महे महते क्षत्राय धनाय जिन्वथः प्रीणयथः एवं तैर्मार्गैरस्मान् धनादिभिः प्रीणयितुमागतमित्यर्थः ॥ ७ ॥

अथाष्टमी—

अयंवामद्रिभिःसुतःसोमोनरावृषण्वसू ।
आयातंसोमपीतयेपिबतंदाशुषोगृहे ॥ ८ ॥

अयम् । वाम् । अद्रिऽभिः । सुतः । सोमः । नरा ।
वृषण्वसू इति वृषण्ऽवसू । आ । यातम् । सोमऽपीतये ।
पिबतम् । दाशुषः । गृहे ॥ ८ ॥

नरा सर्वस्यनेतारौ यद्वा स्तोतृणां धनस्य नेतारौ वृषण्वसू वर्षणशीलधनवन्तौ हे अश्विनौ वां युष्मदर्थं अद्रिभिर्ग्रावभिरयं सोमः सुतोभिषुतः तस्मात् सोमपीतये सोमपानार्थं युवामायातं आगत्यच दाशुषोहविर्दत्तवतोयजमानस्य गृहे यज्ञस्थाने सोमं युवां पिबतम् ॥ ८ ॥

अथ नवमी—

आहिरुहतमश्विनारथेकोशेहिरण्ययेवृषण्वसू ।
युञ्जाथांपीवरीरिषः ॥ ९ ॥

आ । हि । रुहतम् । अश्विना । रथे । कोशे । हिरण्यये ।
वृषण्वसू इति वृषण्ऽवसू । युञ्जाथाम् । पीवरीः । इषः ॥ ९ ॥

वृषण्वसू वर्षणशीलधनौ हे अश्विना अश्विनौ हिरण्यये हिरण्मयरज्ज्वादियुक्ते कोशे आयुधादीनां कोशस्थाने रमणशीले रथे हिरवधारणे युवामेव आरुहतं आरोहणं कुरुतं ततः पीवरीः प्रावयितॄणि स्थूलानि वा इषोन्नानि युंजाथां अस्मासु योजयतम् ॥ ९ ॥

अथ दशमी–

याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥ १० ॥ ६ ॥

याभिः । पक्थम् । अवथः । याभिः । अध्रिऽगुम् ।
याभिः । बभ्रुम् । विऽजोषसम् । ताभिः । नः । मक्षु । तूयम् ।
अश्विना । आ । गतम् । भिषज्यतम् । यत् । आतुरम् ॥ १० ॥६॥

हे अश्विनौ याभिरूतिभिः पक्थं एतन्नामकं राजानं अवथः रक्षथः याभिरूतिभिश्च अध्रिगुं अधृतगमनं राजानं अवथः याभिरूतिभिश्च बभ्रुं राजानंच विजोषसं विशेषेण सोमैः प्रीणयंतं एतान् सर्वान् यैः पालनैरवथः ताभिस्तैरक्षणैः मक्षु क्षिप्रं तूयं तूर्णं नोस्मानागतं रक्षणार्थमागच्छतं । किंच यत यत् आतुरं रोगादिसहितं अस्माकं पुत्रादिकं मति भिषज्यतंभैषज्यं कुरुतम् भिषक्कंड्वादिः ॥ १० ॥

॥ इति पष्ठस्य द्वितीये पष्ठोवर्गः ॥ ६॥

अथैकादशी–

यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे ।
वयं गीर्भिर्विपन्यवः ॥ ११ ॥

यत् । अध्रिऽगावः । अध्रिगू इत्यध्रिऽगू । इदा । चित् ।
अह्नः । अश्विना । हवामहे । वयम् । गीःऽभिः । विपन्यवः ॥ ११ ॥

अध्रिगावः अधृतधनाः कर्मसु त्वरमाणा विपन्यवोमेधाविनोवयं अध्रिगू अधृतगमनौ संग्रामे शत्रुवधार्थं त्वरयागच्छन्तौ अश्विना अश्विनौ युवां अह्नोदिवसस्य इद्राचिदिदानीमिव प्रातःकाले गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः यद्यदा हवामहे युवामाह्वयामः तदा ताभिरूतिभिः अस्मानागच्छतमित्युत्तरत्रसंबन्धः ॥ ११ ॥

अथ द्वादशी–

ताभिरायातंवृषणोपमेहवंविश्वप्सुंविश्ववार्यम् ।
इषामंहिष्ठापुरुभूतमानरायाभिःक्रिविंवावृधुस्ताभिरागतम्॥१२॥

ताभिः । आ । यातम् । वृषणा । उप । मे । हवम् । विश्वऽप्सुम् ।
विश्वऽवार्यम् । इषा । मंहिष्ठा । पुरुऽभूतमा । नरा । याभिः ।
क्रिविम् । ववृधुः । ताभिः । आ । गतम् ॥ १२ ॥

वृषणा वृषणौ वर्षणशीलौ हे अश्विनौ विश्वप्सुं प्सइति रूपनाम स्तोत्रशस्त्रात्मकत्वेन नानारूपं विश्ववार्यं सर्वैर्देवैर्वरणीयं मे मदीयं हवं युष्मद्विषयमाह्वानमा अभिमुखीकृत्य ताभिरूतिभिरुपयातं युवामागच्छतं ।याभिः नरा नरौ सर्वस्य नेतारौ अश्विनौ इषा इष इच्छायां हवींषीच्छन्तौ मंहिष्ठा मंहिष्ठौ अतिशयेन धनानां दातारौ पुरुभूतमा पुरुहूतमौ युद्धेषु अत्यंतं पुरुधा भवन्तौ यद्वा अतिशयेन बहूनां शत्रूणामभिभवितारौ भवन्तौ क्रिविं कूपं मतियाभिरूतिभिरुदकानि वावृधुः अवर्धयतः द्वयोर्बहुवचनं पूजार्थं कूपपतितोवंदनमालाभिः कूपं पूरयित्वा युवाभ्यामुत्थापितः खलु ।तथामन्त्रः–उद्वन्दनमैरयतंस्वर्दृशइति । ताभिस्तैः पालनैरागतं अस्मद्रक्षणार्थमागच्छतम् ॥ १२ ॥

अथ त्रयोदशी–

ताविदाचिदहानांतावश्विनावन्दमानउपब्रुवे ।
ताऊनमोभिरीमहे ॥ १३ ॥

तौ । इदा । चित् । अहानाम् । तौ । अश्विना । वन्दमानः ।
उप । ब्रुवे । तौ । ऊँ इति । नमःऽभिः । ईमहे ॥ १३ ॥

---

१ तै॰सं॰ १.७.१३ ।

तौ संग्रामे आयुधानि स्तोतृभ्योधनानिवा विस्तारयन्तौ तौ पूर्वोक्तावश्विनाश्विनौ अ-
हानामह्नामिदाचित् इदानीमेव प्रातःकाले वन्दमानः अभिवादनं कुर्वन् सन् उपब्रुवे तयोः स-
मीपे स्तौमि ततः ता ऊ तावेव नमोभिर्हविर्भिः स्तोत्रैर्वा ईमहे वयं धनादिकं याचामहे ॥ १३॥

अथ चतुर्दशी–

ताविद्दोषाताउषसिंशुभस्पतीतायामन्रुद्रवर्तनी ।
मानोमर्तायरिपवेवाजिनीवसूपरोरुद्रावतिख्यतम् ॥१४॥

तौ । इत् । दोषा । तौ । उषसि । शुभः । पती इति । ता ।
यामन् । रुद्रवर्तनी इति रुद्रऽवर्तनी । मा । नः । मर्ताय । रिपवे ।
वाजिनीवसू इति वाजिनीऽवसू । परः । रुद्रौ । अति । ख्यतम् ॥ १४ ॥

शुभस्पती उदकस्यपालयितारौ रुद्रवर्तनी युद्धे रोदनशीलमार्गौ स्तूयमानमार्गौवा ता-
विद् तावेवाश्विनौ दोषा दोषायां रात्रौ तावेव उषस्युषःकाले ता तावश्विनौ यामन् यामन्यह-
नि च सर्वेषु कालेषु वयमश्विनावाह्वयामः एवंसति वाजिनीवसू अन्नधनौ रुद्रौ हे अश्विनौ मर्ताय
मनुष्याय रिपवे शत्रवे नोस्मत्परः परस्तान्मातिख्यतं माभूतम् शत्रवेस्मान्माकुरुतमित्यर्थः॥१४॥

अथ पञ्चदशी–

आसुग्म्यायसुग्म्यंप्रातारथेनाश्विनावासक्षणी ।
हुवेपितेवसोभरी ॥ १५ ॥ ७ ॥

आ । सुग्म्याय । सुग्म्यम् । प्रातरिति । रथेन । अश्विना ।
वा । सक्षणी इति । हुवे । पिताऽइव । सोभरी ॥ १५ ॥ ७ ॥

वा अपिच सक्षणी रोचनीयशीलौ अश्विना अश्विनौ युवां सुग्म्याय सुखार्हाय मर्त्यं
सुग्म्यं सुखं प्रातः काले रथेनावहतम् ।ततः सोभरिरहं हुवे युवामाह्वयामि। तत्रदृष्टान्तः–पि-
तेव यथा मम पिता जुहाव तद्वदहमाह्वयामि ॥ १५॥

॥ इति पष्ठस्य द्वितीये सप्तमोवर्गः ॥ ७ ॥

BHARATIYA VIDYA BHAVAN LIBRARY 20037 S. N.......

अथ षोडशी—

मनोजवसावृषणामदच्युतामक्षुंगमाभिरूतिभिः ।
आरात्ताच्चिद्भूतमस्मेअवसेपूर्वीभिःपुरुभोजसा ॥ १६ ॥

मनःऽजवसा । वृषणा । मदऽच्युता । मक्षुम्ऽगमाभिः ।
ऊतिऽभिः । आरात्तात् । चित् । भूतम् । अस्मे इति ।
अवसे । पूर्वीभिः । पुरुऽभोजसा ॥ १६ ॥

हे मनोजवसा मनोवत् शीघ्रं गच्छन्तौ वृषणा वृषणौ धनानां वर्षितारौ मदच्युता माद्यन्तीति मदाः शत्रवः तेषांच्यावयितारौ पुरुभोजसा बहूनां भोक्तारौ रक्षकौ यद्वा बहून् स्तोतॄन् धनादिभिः भोजयन्तौ हे अश्विनौ मक्षुंगमाभिः शीघ्रं गच्छद्भिः ऊतिभीरक्षाभिः पूर्वीभिर्बहुभिः अस्मे अस्माकमवसे रक्षणाय आरात्तात्चित् अन्तिकएव भूतं भवतम् ॥ १६ ॥

अथ सप्तदशी—

आनोअश्वावदश्विनावर्तिर्यासिष्टंमधुपातमानरा ।
गोमद्दस्राहिरण्यवत् ॥ १७ ॥

आ । नः । अश्वऽवत् । अश्विना । वर्तिः । यासिष्टम् ।
मधुऽपातमा । नरा । गोऽमत् । दस्रा । हिरण्यऽवत् ॥ १७ ॥

मधुपातमा अतिशयेन मधोः सोमस्य पातारौ नरा नेतारौ दस्रा सर्वैर्दर्शनीयौ हे अश्विना अश्विनौ नोस्माकं वर्तिः वर्तते अत्रेति वर्तिर्गृहं तत् अश्ववदश्वयुक्तं गोमत् गवादियुक्तं हिरण्यवत्सुवर्णकनकादियुक्तं कृत्वा यासिष्टं आगच्छतं यद्वास्मान्प्रति वर्तिर्यज्ञमार्गमश्वादियुक्तं कृत्वा आगच्छतं यातेर्लुङिरूपम् ॥ १७ ॥

अथाष्टादशी—

सुप्रावर्गंसुवीर्यंसुष्टुवार्यमनाधृष्टंरक्षस्विना ।
अस्मिन्नावामायनेवाजिनीवसूविश्वावामानिधीमहि ॥१८॥८॥

सुऽप्रावर्गम् । सुऽवीर्यम् । सुष्टु । वार्यम् । अनाधृष्टम् । रक्षस्विना ।
अस्मिन् । आ । वाम् । आऽयाने । वाजिनीवसू इति वाजिनीऽवसू ।
विश्वा । वामानि । धीमहि ॥ १८ ॥ ८ ॥

सुप्रावर्गं शोभनप्रवर्जनं यस्य तत् स्तोतृभ्यः स्वयमेव प्रयच्छतीत्यर्थः तथाविधं सुवीर्यं शोभनवीर्यं सुष्टु शोभनं यथा भवति तथा वार्यं सर्वैर्वरणीयं रक्षस्विना बलवतापि अनाधृष्टमनभिभवनीयं धनमाधीमहि त्वत्तोवयं धारयामः । तदेवाह—वाजिनीवसू बलयुक्तधनौ अन्नधनौवा अश्विनौ वां युवयोरस्मिन्नायाने अस्मद्गृहंप्रति आगमने विश्वा विश्वानि दिव्यभौमादीनि वामानि धनानि आधीमहि वयं लभामहे धीङ्आधारइत्यस्यलिङि छान्दसोविकरणस्य लुक् ॥ १८ ॥

॥ इति षष्ठस्य द्वितीयेऽष्टमोवर्गः ॥ ८ ॥

ईळिष्वेति त्रिंशदृचं तृतीयं सूक्तं व्यश्वपुत्रोविश्वमनाः ऋषिः उष्णिक्छन्दः अग्निर्देवता तथाचानुक्रान्तम्— ईळिष्वत्रिंशद्विश्वमनाव्यश्वआग्नेयमौष्णिहंहेति । प्रातरनुवाके आग्नेयेक्रतौ औष्णिहेछन्दसि आश्विनशस्त्रे चेदंसूक्तं । सूत्रितंच—ईळिष्वाहीत्यौष्णिहमिति ।

तस्मिन् सूक्ते प्रथमा—

ईळिष्वाहिप्रतीव्यं१यजस्वजातवेदसम् ।
चरिष्णुधूममगृभीतशोचिषम् ॥ १ ॥

ईळिष्व । हि । प्रतीव्यम् । यजस्व । जातऽवेदसम् ।
चरिष्णुऽधूमम् । अगृभीतऽशोचिषम् ॥ १ ॥

प्रतीव्यं शत्रुषु प्रतिगमनशीलमग्निं हिरवधारणे अग्निमेव ईळिष्व स्तुतिभिः स्तोत्रं कुरु । किंच चरिष्णुधूमं सर्वतश्चरणशीलधूमजालं अगृभीतशोचिषं रक्षोभिरगृह्यमाणदीप्तिं जातवेदसं जातमग्निं यद्वा जातानि भूतानि वेत्तीति जातवेदाः तमग्निं यजस्व हविर्भिः पूजय ॥१॥

अथ द्वितीया—

दामानंविश्वचर्षणेऽग्निंविश्वमनोगिरा ।
उतस्तुषेविष्पर्धसोरथानाम् ॥ २ ॥

दामानम् । विश्वऽचर्षणे । अग्निम् । विश्वऽमनः ।
गिरा । उत । स्तुषे । विऽस्पर्धसः । रथानाम् ॥ २ ॥

उतापिच हे विश्वचर्षणे विश्वस्य सर्वस्यार्थस्य ज्ञानेन द्रष्टः विश्वमनः सर्वेषु स्थावरजंगमात्मकेष्वेकमनोयस्य सः एतन्नामक हे ऋषे विस्पर्धसोविगतमात्सर्यस्य यजमानस्य रथानां रथादीनां दामानं दातारमेवंविधमग्निं गिरा स्तुतिलक्षणया वाचा स्तुषे स्तोत्रं कुरु ॥२॥

अथ तृतीया—

येषामाबाधऋग्मियइषःपृक्षश्चनिग्रभे ।
उपविदावह्निर्विन्दतेवसु ॥ ३ ॥

येषाम् । आऽबाधः । ऋग्मियः । इषः । पृक्षः ।
च । निऽग्रभे । उपऽविदा । वह्निः । विन्दते । वसु ॥ ३ ॥

आबाधः शत्रूणामाभिमुख्येन बाधकः ऋग्मियऋग्भिरर्चनीयः अग्निर्येषामयजमानानां इषोन्नानि पृक्षः अन्नादिरसांश्च निग्रभे निगृह्णीते ग्रहेर्लेटि छान्दसोविकरणस्यलुक् लोपस्त-आत्मनेपदेष्वितितलोपः हृग्रहोर्भश्छंदसीतिभकारः । निगृत्यच वह्निर्हविषां वोढा सएवाग्निः उपविदा उपवेदनेन एते हवींषि देवार्थं नमयच्छन्तीत्येतद्विज्ञानेन तेषामेव वसु धनं विंदते लभते॥३॥

अथ चतुर्थी—

उदस्यशोचिरस्थाद्दीदियुषोव्य१जरम् ।
तपुर्जम्भस्यसुद्युतोगणश्रियः ॥ ४ ॥

उत् । अस्य । शोचिः । अस्थात् । दीदियुषः । वि ।
अजरम् । तपुःऽजम्भस्य । सुऽद्युतः । गणऽश्रियः ॥ ४ ॥

दीदियुषः दीदितिर्दीप्तिकर्मा संदीप्यमानस्य तपुर्जंभस्य तापयितृदंष्ट्रस्य सुद्युतः शोभनदीप्तेर्गणश्रियः हविरादानार्थं यजमानगणं श्रयति तस्य अस्य एतादृशस्याग्नेरजरं जरारहितं

पुनःपुनर्मथ्यमानत्वान्नूतनं हविर्भिर्वर्धमानत्वादभिनवं वा शोचिस्तेजः व्युदस्थात् विशेषेण उद्गतमभूत् ॥ ४ ॥

अथ पञ्चमी–

उदु॑ तिष्ठ स्वध्वर॒ स्तवा॑नो दे॒व्या कृ॒पा ।
अ॒भि॒ख्या भा॒सा बृ॑ह॒ता शु॑शु॒क्वनिः॑ ॥ ५ ॥ ९ ॥

उत् । ऊँ इति॑ । ति॒ष्ठ॒ । सु॒ऽअ॒ध्व॒र॒ । स्तवा॑नः । दे॒व्या ।
कृ॒पा । अ॒भि॒ऽख्या । भा॒सा । बृ॒ह॒ता । शु॒शु॒क्वनिः॑ ॥ ५ ॥ ९ ॥

स्वध्वर शोभनयज्ञ हे अग्ने अभिख्या अभिमुखं गच्छत्याभितः प्रसिद्धयावा बृहता बृहत्या भासा दीप्त्या शुशुक्वनिः शुचदीप्तौ दीपनशीलस्त्वं स्तवानः स्तोतृभिः स्तूयमानः सन् देव्या द्योतमानया कृपा ज्वालया उत्तिष्ठ तमःपरिहारार्थमुद्गच्छ । उ प्रसिद्धौ ॥ ५ ॥

॥ इति षष्ठस्य द्वितीये नवमोवर्गः ॥ ९ ॥

अथ षष्ठी–

अग्ने॑ या॒हि सु॑श॒स्तिभि॑र्ह॒व्या जुह्वा॑न आनु॒षक् ।
यथा॑ दू॒तो ब॒भूथ॑ हव्य॒वाह॑नः ॥ ६ ॥

अग्ने॑ । या॒हि॒ । सु॒श॒स्तिऽभिः॑ । ह॒व्या । जुह्वा॑नः ।
आ॒नु॒षक् । यथा॑ । दू॒तः । ब॒भूथ॑ । ह॒व्य॒ऽवाह॑नः ॥ ६ ॥

हे अग्ने आनुषक् अनुषक्तं यथाभवति तथा हव्या हव्यानि हवनयोग्यान्यन्नानि जुह्वानः जुह्वन् देवेभ्यः प्रयच्छन् त्वं सुशस्तिभिः शोभनैः स्तोत्रैः सह याहि देवानां हविःप्रदानार्थं गच्छ । अस्य हविःप्रदातृत्वं कथमित्याशंक्याह–यथा त्वं हव्यवाहनः हविषां वोढा देवानां दूतोऽबभूथ भवसि तथा जुह्वानइत्यन्वयः ॥ ६ ॥

अथ सप्तमी—

अग्निंवःपूर्व्यंहुवेहोतारंचर्षणीनाम्।
तमयावाचागृणेतमुंवःस्तुषे ॥ ७ ॥

अग्निम् । वः । पूर्व्यम् । हुवे । होतारम् । चर्षणीनाम् ।
तम् । अया । वाचा । गृणे । तम् । ऊँ इति । वः । स्तुषे ॥ ७ ॥

चर्षणीनां मनुष्याणां होतारं होमनिष्पादकं पूर्व्यं पुरातनं वः युष्मत्वेन युष्मत्संबंधिनमग्निं हुवे आह्वयामि। आहूयच तमग्निं अया अनया सूक्तरूपया वाचा गिरा गृणे शंसामि। किञ्च वोयुष्मदर्थं तमु तमेवाग्निं स्तुषे स्तौमि ॥ ७ ॥

अथाष्टमी—

यज्ञेभिरद्भुतक्रतुंयंकृपासूदयन्तइत्।
मित्रंनजनेसुधितमृतावनि ॥ ८ ॥

यज्ञेभिः । अद्भुतऽक्रतुम् । यम् । कृपा । सूदयन्ते । इत् । मित्रम् ।
न । जने । सुऽधितम् । ऋतऽवनि ॥ ८ ॥

अद्भुतक्रतुं बहुविधमन्नं यद्वा चित्रकर्माणं मित्रंन यजमानानां मित्रमिव स्थितं सुधितं हविर्भिः संतर्पितं यमग्निं ऋतवनि यज्ञवति जने यजमाने कृपा स्वसामर्थ्येन यज्ञेभिर्यज्ञैः सूदयन्ते इत् सूदिः क्षरणकर्मा अध्वर्य्वादयः कामान् क्षारयन्त्येव यजमानस्य कामान्प्रापयन्तीत्यर्थः। तमग्निमुपासेवध्वमित्युत्तरत्रसंबंधः ॥ ८ ॥

अथ नवमी—

ऋतावानमृतायवोयज्ञस्यसाधनंगिरा।
उपोएनंजुजुषुर्नमसस्पदे ॥ ९ ॥

ऋतऽवानम् । ऋतऽयवः । यज्ञस्य । साधनम् ।
गिरा । उपो इति । एनम् । जुजुषुः । नमसः । पदे ॥ ९ ॥

ऋतायवः यज्ञकामाः हे यजमानाः ऋतावानं यज्ञवन्तं यज्ञस्यसाधनं साधनभूतमेनमग्निं नमसोहविषः पदे स्थाने यज्ञगिवा गिरा स्तुतिलक्षणया वाचा उपोजुजुपुः उपासेरध्वं । तिङां-तिङोभवन्तीति मध्यमपुरुषस्य प्रथमपुरुषादेशः ॥ ९ ॥

अथ दशमी–

अच्छा॑नोअङ्गि॑रस्तमंय॒ज्ञासो॑यन्तुसं॒यतः॑ ।
होता॒योअस्ति॑वि॒क्ष्वाय॒शस्त॑मः ॥ १० ॥ १० ॥

अच्छ॑ । नः॒ । अङ्गि॑रःऽतमम् । य॒ज्ञासः॑ । य॒न्तु॒ । सं॒ऽयतः॑ ।
होता॑ । यः । अस्ति॑ । वि॒क्षु । आ । य॒शःऽतमः ॥ १० ॥ १० ॥

संयतः स्रुगादिभिः नियताः नोस्माकं यज्ञासोयज्ञाः अंगिरस्तमं अंगिरसां विशिष्टं अग्निमच्छाभिमुख्येन च यन्तु गच्छंतु । योग्निः विक्षु मनुष्येषु होता होमनिष्पादकःसन् आ सर्वतः यशस्तमः सुष्ठपलब्धीयः यशस्वितमोस्ति भवति तमग्निं यन्त्वित्यन्वयः ॥ १० ॥

॥ इति षष्ठस्य द्वितीये दशमोवर्गः ॥ १० ॥

अथैकादशी–

अग्ने॒तव॒त्येअ॑ज॒रेन्धा॑नासोबृ॒हद्भाः ।
अश्वा॑इव॒वृष॑णस्तवि॒षी॒यवः॑ ॥ ११ ॥

अग्ने॑ । तव॑ । त्ये । अ॒ज॒र॒ । इन्धा॑नासः । बृ॒हत् ।
भाः । अश्वाः॑ऽइव । वृष॑णः । त॒वि॒षी॒ऽयवः॑ ॥ ११ ॥

अजर जरारहित हे अग्ने इन्धानासइन्धाना दीप्यमानाबृहद् बृहन्तोमहान्तः त्ये ते सर्वगतास्तव त्वदीयाभाः भासोरश्मयोवृषणः कामानांवर्षितारः सन्तः तविषीयवः बलमाचरन्तोभवन्ति । तत्रदृष्टान्तः–अश्वाइव यथा वृषणः रेतसःसेक्तारोश्वा बलमाचरन्तोभवन्ति तद्वद् ॥ ११ ॥

अथ द्वादशी–

स त्वंनऊर्जांपते॑र॒यिंरा॑स्व॒सुवी॑र्यम् ।
प्राव॑नस्तो॒केत॑नये॑स॒मत्स्वा ॥ १२ ॥

सः । त्वम् । नः । ऊर्जाम् । पते । रयिम् । रास्व ।
सुऽवीर्यम् । प्र । अव । नः । तोके । तनये । समत्ऽसु । आ ॥ १२ ॥

ऊर्जामन्नानां पते स्वामिन् हे अग्ने सतथाविधस्त्वं नोस्मभ्यं सुवीर्यं शोभनवीर्योपेतं रयिं धनं रास्व देहि । नोस्माकं तोके पुत्रे तनये तनोति विस्तारयति पुत्रमिति तनयः पौत्रः तस्मिन्वर्तमानं धनं समत्सु संग्रामेषुच यत् रक्षितव्यं धनं तच्च प्राव प्रकर्षेण रक्ष । अनेन पुत्रपौत्रप्रार्थनं करोति ॥ १२ ॥

अथ त्रयोदशी—

यद्वाउविश्पतिःशितःसुप्रीतोमनुषोविशि ।
विश्वेदग्निःप्रतिरक्षांसिसेधति ॥ १३ ॥

यत् । वै । ऊँ इति । विश्पतिः । शितः । सुऽप्रीतः ।
मनुषः । विशि । विश्वा । इत् । अग्निः । प्रति । रक्षांसि । सेधति ॥ १३ ॥

विश्पतिः विशां पालयिता शितः हविर्भिस्तीक्ष्णीकृतः सोग्निः सुप्रीतः सुष्ठु प्रीतःसन् मनुषोमनुष्यस्य विशि निवेशने गृहे यद्वै यदा खलु वर्तते तदानीमग्निः विश्वेत् विश्वान्येव तस्यबाधकानि रक्षांसि प्रतिषेधति हिनस्ति । षिधुगत्यां औणादिकः उ प्रसिद्धौ ॥ १३ ॥

अथ चतुर्दशी—

श्रुष्ट्यग्नेनवस्यमेस्तोमस्यवीरविश्पते ।
निमायिनस्तपुषारक्षसोदह ॥ १४ ॥

श्रुष्टी । अग्ने । नवस्य । मे । स्तोमस्य । वीर ।
विश्पते । नि । मायिनः । तपुषा । रक्षसः । दह ॥ १४ ॥

हे वीर शत्रूणां विनाशयितः वीर्यवन् विश्पते विशां पालयितः हे अग्ने नवस्य इदानीं क्रियमाणत्वान्नूतनं मे मदीयं स्तोमस्य स्तोत्रशस्त्रादिकं श्रुष्टी श्रुत्वा मायिनोमायाविनोरक्षसः कर्मविघ्नकारिणोराक्षसान् तपुषा तापकेन तेजसा निदह नितरां भस्मीकुरु । श्रुष्टी स्नात्व्यादयश्चेति निपातितः यकारलोपश्छान्दसः ॥ १४ ॥

अथ पञ्चदशी–

नतस्यंमायया॑च॒नरि॒पुरी॑शीत॒मर्त्यः॑ ।
योअ॒ग्नये॑द॒दाश॑ह॒व्यदा॑तिभिः ॥ १५ ॥ ११ ॥

न । तस्य॑ । मा॒यया॑ । च॒न । रि॒पुः । ई॒शी॒त॒ । मर्त्यः॑ । यः ।
अ॒ग्नये॑ । द॒दाश॑ । ह॒व्यदा॑तिऽभिः ॥ १५ ॥ ११ ॥

मर्त्यो मनुष्यो रिपुः शत्रुः चनेति निपातसमुदायोप्यर्थे माययाचन मायया पि तस्य जनस्य नेशीत ईश्वरो न भवति । यो जनः हव्यदातिभिः हविषां दातृभिः ऋत्विग्भिरग्नये ददाश हवींपि प्रयच्छति । तस्य रिपुर्नास्तीत्यर्थः ॥ १५ ॥

॥ इति पष्ठस्य द्वितीये एकादशोवर्गः ॥ ११ ॥

अथ षोडशी–

व्य॑श्वस्त्वावसु॒विदं॑मुक्ष॒ण्युर॑प्रीणा॒दृषिः॑ ।
म॒हो रा॒ये त॒मुं त्वा॒ सम॑धीमहि ॥ १६ ॥

विऽअ॑श्वः । त्वा॒ । व॒सु॒ऽविद॑म् । उ॒क्ष॒ण्युः । अ॒प्री॒णा॒त् ।
ऋषिः॑ । म॒हः । रा॒ये । त॒म् । ऊँ इति॑ । त्वा॒ । सम् । इ॒धी॒म॒हि॒ ॥ १६ ॥

उक्षण्युः धनानां सेक्तारमात्मन इच्छन् यद्वा वृष्टिसेक्तारमिच्छन् व्यश्व ऋषिः एतन्नामको ममपिता वसुविदं वसूनां धनानां लंभकं त्वा त्वामप्रीणात् धनादिप्राप्त्यर्थं हविर्भिः अतोषयत् । तथा वयमपि महो महते राये धनाय तमु तथाविधमेव त्वा त्वां समिधीमहि सम्यगाज्यादिहविर्भिर्दीपयेम ॥ १६ ॥

अथ सप्तदशी–

उ॒शना॑का॒व्यस्त्वा॒निहोता॑रमसादयत् ।
आ॒य॒जिं त्वा॒ मन॑वेजा॒तवे॑दसम् ॥ १७ ॥

उ॒शना॑ । का॒व्यः । त्वा॒ । नि । होता॑रम् । अ॒सा॒द॒य॒त् ।
आ॒ऽय॒जिम् । त्वा॒ । मन॑वे । जा॒तऽवे॑दसम् ॥ १७ ॥

हे अग्ने काव्यः कविपुत्रउशना एतन्नामकऋषिः मनवे राज्ञे तस्य गृहइत्यर्थः आयजिं आभिमुख्येन यष्टारं जातवेदसं जातप्रज्ञं त्वा त्वां पुनस्त्वाशब्दआदरार्थः त्वामेव होतारं होमनिष्पादकं न्यसादयत् नितरामुपावेशयत् ॥ १७ ॥

अथाष्टादशी–

विश्वेहित्वासजोषसोदेवासोदूतमक्रत ।
श्रुष्टीदेवप्रथमोयज्ञियोभुवः ॥ १८ ॥

विश्वे । हि । त्वा । सऽजोषसः । देवासः । दूतम् ।
अक्रत । श्रुष्टी । देव । प्रथमः । यज्ञियः । भुवः ॥ १८ ॥

हे अग्ने विश्वे सर्वे देवासोदेवाः सजोषसः संगताःसंतः अस्माकं हवींष्यानयतीति विचार्य हिरवधारणे त्वामेव दूतं हविषां वोढारं दूतमक्रताकार्षुः । ततः देव द्योतमान हे अग्ने प्रथमः देवानांमुख्यभूतस्त्वं श्रुष्टी श्रुष्टीति क्षिप्रनाम क्षिप्रं यज्ञियोदेवानां हविर्दातृत्वेन यज्ञार्होभुवोभूयाः ॥ १८ ॥

अथैकोनविंशी–

इमंघावीरोअमृतंदूतंकृण्वीतमर्त्यः ।
पावकंकृष्णवर्तनिंविहायसम् ॥ १९ ॥

इमम् । घ । वीरः । अमृतम् । दूतम् । कृण्वीत ।
मर्त्यः । पावकम् । कृष्णऽवर्तनिम् । विऽहायसम् ॥ १९ ॥

अनया यजमानश्चाग्निं देवानां दूतमकार्षीदित्याह वीरः कर्मणिसमर्थः मर्त्योमनुष्योयजमानः अमृतं मरणधर्मरहितं पावकं पापानांशोधकं कृष्णवर्तनिं वर्तनिर्मार्गः कृष्णमार्गं विहायसं विहायइति महन्नाम गुणैस्तेजोधिकत्वेनवा महान्तमिमं घ इममेवाग्निं दूतं देवानां वोढृत्वेन दूतं कृण्वीत अकार्षीत् ॥ १९ ॥

अथ विंशी–

तंहुवेमयतस्रुचःसुभासंशुक्रशोचिपम् ।
विशामग्निमजरंप्रत्नमीड्यम् ॥ २० ॥ १२ ॥

तम् । हुवेम । यतऽस्रुचः । सुऽभासम् । शुक्रऽशोचिपम् ।
विशाम् । अग्निम् । अजरम् । प्रत्नम् । ईड्यम् ॥ २० ॥ १२ ॥

यतस्रुचः गृहीतस्रुचः यद्वा तत्तत्स्थानेषु नियमितस्रुचोवयं सुभासं शोभनदीप्तिं शुक्रशोचिपं दीपनशीलतेजस्कं विशां स्वामिनं यद्वा विशामीड्यमित्यन्वयः मनुष्याणां स्तोतव्यं अजरं जरारहितं प्रत्नं पुरातनं तं तथाविधमग्निं हुवेम स्तोत्रशस्त्रादिभिराह्वयामः ॥ २० ॥

॥ इति पष्ठस्य द्वितीये द्वादशोवर्गः ॥ १२ ॥

अथैकविंशी–

योअस्मैहव्यदातिभिराहुतिंमर्तोविधत् ।
भूरिपोपंसधत्तेवीरवद्यशः ॥ २१ ॥

यः । अस्मै । हव्यदातिऽभिः । आऽहुतिम् । मर्तः ।
अविधत् । भूरि । पोपम् । सः । धत्ते । वीरऽवत् । यशः ॥ २१ ॥

योमर्तोमनुष्यः हव्यदातिभिर्हविर्दातृभिर्ऋत्विग्भिरस्मै अग्नये आहुतिमविधत् विदधाति समनुष्यः भूरि बहु पोपं धनादिभिः पोपणं वीरवत् पुत्रपौत्रादियुक्तं यशः कीर्तिंच धत्ते धारयति तस्मै धनादीनि प्रयच्छतीत्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

प्रथमंजातवेदसमग्निंयज्ञेषुपूर्व्यम् ।
प्रतिस्रुगेतिनमसाहविष्मती ॥ २२ ॥

प्रथमम् । जातऽवेदसम् । अग्निम् । यज्ञेषु । पूर्व्यम् ।
प्रति । स्रुक् । एति । नमसा । हविष्मती ॥ २२ ॥

प्रथमं देवानां प्रधानभूतं जातवेदसं जातप्रज्ञं पूर्व्यं पुरातनं एतादृशमग्निं यज्ञेषु अ-ग्निष्टोमादियज्ञेषु हविष्मती सोमादिहविर्युक्तास्रुक् नमसा स्तोत्रेण नमस्कारेणवा सह प्रत्येति अग्निं प्रतिगच्छति ॥ २२ ॥

अथ त्रयोविंशी—

आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत्।
मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥ २३ ॥

आभिः । विधेम । अग्नये । ज्येष्ठाभिः । व्यश्वऽवत् ।
मंहिष्ठाभिः । मतिऽभिः । शुक्रऽशोचिषे ॥ २३ ॥

विश्वमनोनामकावयं ज्येष्ठाभिः प्रशस्यतमाभिः मंहिष्ठाभिः पूज्यतमाभिः आभिः मति-भिः सूक्तरूपाभिः स्तुतिभिः शुक्रशोचिषे ज्वालातेजसेऽग्नये विधेम परिचरेम यथेह व्यश्ववत् यथाव्यश्वोस्माकं पिताग्निं स्तुतिभिः पर्यचरत् तद्वद्वयमपि परिचरेम ॥ २३ ॥

अथ चतुर्विंशी—

नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत्।
ऋषे वैयश्व दम्यायाग्नये ॥ २४ ॥

नूनम् । अर्च । विऽहायसे । स्तोमेभिः । स्थूरयूपऽवत् ।
ऋषे । वैयश्व । दम्याय । अग्नये ॥ २४ ॥

वैयश्व व्यश्वस्यपुत्र हे विश्वमनोनामकऋषे विहायसे महते दम्याय दमे गृहे अरणीभि-र्मथ्यमानत्वेन भवाय यद्वा यजमानगृहाणां बाधपरिहारेण हितायाग्नये नूनं संप्रति स्तोमेभिः त्रिवृत्पञ्चदशादिलक्षणैः स्तोत्रैः अर्च स्तुहि । तत्रदृष्टान्तः—स्थूरयूपवत् यथा स्थूरयूपोनामर्षिरे-नमग्निमानर्च तद्वदर्चेत्यर्थः ॥ २४ ॥

अथ पंचविंशी—

अतिथिं मानुषाणां सूनुं वनस्पतीनाम् ।
विप्रा अग्निमवसे प्रत्नमीळते ॥ २५ ॥ १३ ॥

अतिथिम् । मानुषाणाम् । सूनुम् । वनस्पतीनाम् ।
विप्राः । अग्निम् । अवसे । प्रत्नम् । ईळते ॥ २५ ॥ १३ ॥

विप्रामेधाविनोयजमानाः मानुषाणां मनुष्याणां अतिथिं अतिथिवत्पूज्यं वनस्पतीनां सूनुं वनस्पतिरूपाभिर्वारणीभिः जायमानत्वेन तेषां सूनुं प्रत्नं पुरातनमेवंविधमग्निं अवसे कर्मरक्षणाय ईळते स्तुतिभिः स्तुवन्ति ॥ २५॥

॥ इति षष्ठस्य द्वितीये त्रयोदशोवर्गः ॥१३॥

अथ षड्विंशी–

महोविश्वाँअभिषतो३ऽभिहव्यानिमानुषा ।
अग्नेनिषत्सिनमसाधिबर्हिषि ॥ २६ ॥

महः । विश्वान् । अभि । सतः । अभि । हव्यानि । मानुषा ।
अग्ने । नि । सत्सि । नमसा । अधि । बर्हिषि ॥ २६ ॥

हे अग्ने महः कर्मकर्तृत्वेन महतः विश्वान् सर्वान् सतः स्तोत्रकरणार्थं वर्तमानान् स्तोतॄनभि अभितः त्वं नमसा स्तुत्यतया बर्हिष्यधि निषत्सि निषीद ।तथा मानुषा मानुषाणां मनुष्यसंबंधीनि हव्यानि हवींष्यभि अभितः तानि स्वीकर्तुं निषीद ॥ २६ ॥

अथ सप्तविंशी–

वंस्वानोवार्यापुरुवंस्वरायःपुरुस्पृहः ।
सुवीर्यस्यप्रजावतोयशस्वतः ॥ २७ ॥

वंस्व । नः । वार्या । पुरु । वंस्व । रायः । पुरुऽस्पृहः ।
सुऽवीर्यस्य । प्रजाऽवतः । यशस्वतः ॥ २७ ॥

हे अग्ने वार्याणि वरणीयानि पुरु पुरूणि बहूनि गवादीनि नोस्मभ्यं वंस्व प्रयच्छ । तथा पुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीयं रायोधनं किं विशिष्टं सुवीर्यस्य शोभनवीर्योपेतं प्रजावतः पुत्रपौत्रादिसहितं यशस्वतः कीर्तिमच्च धनं नोस्मभ्यं वंस्व प्रयच्छ ॥ २७॥

अथाष्टाविंशी—

त्वंवरोसुषाम्णेग्नेजनायचोदय ।
सदावसोरातिंयविष्ठशश्वते ॥ २८ ॥

त्वम् । वरो इति । सुऽसाम्ने । अग्ने । जनाय । चोदय ।
सदा । वसो इति । रातिम् । यविष्ठ । शश्वते ॥ २८ ॥

वरो सर्वैर्वरणीय वसो शत्रूणां वासयितः यविष्ठ पुनःपुनर्जायमानत्वेन युवतम हे अग्ने त्वं सुषाम्णे सुसाम्ने सुषामादित्वात् षत्वं त्वत्प्रसादात् शोभनसामयते शश्वते बहवे जनाय प्रादुर्भूताय स्तोतॄणां सदा सर्वदा रातिं धनादिकं चोदय प्रेरय ॥ २८ ॥

अथैकोनत्रिंशी—

त्वंहिसुप्रतूरसित्वंनोगोमतीरिषः ।
महोरायःसातिमग्नेअपावृधि ॥ २९ ॥

त्वम् । हि । सुऽप्रतूः । असि । त्वम् । नः । गोऽमतीः ।
इषः । महः । रायः । सातिम् । अग्ने । अप । वृधि ॥ २९ ॥

हे अग्ने त्वं हिरवधारणे त्वमेव सुप्रतूः स्तोतॄणां धनादिकं सुष्ठु प्रदातासि प्रयच्छसीत्यर्थः। अतएव गोमतीः पश्वादियुक्तानि इषोन्नानि महोमहतोरायोधनस्य मध्ये सातिं देयं धनं च नः स्तोतॄणामस्माकं अपावृधि अपावृणु प्रयच्छेत्यर्थः ॥ २९ ॥

अथ त्रिंशी—

अग्नेत्वंयशाअस्यामित्रावरुणावह ।
ऋतावानासम्राजापूतदक्षसा ॥ ३० ॥ १४ ॥

अग्ने । त्वम् । यशाः । असि । आ । मित्रावरुणा ।
वह । ऋतऽवाना । सम्ऽराजा । पूतऽदक्षसा ॥ ३० ॥ १४ ॥

हे अग्ने त्वं यशाः सुप्रमत्वर्थीयः देवानां मध्ये यशस्वी असि भवसि अतएव त्वं ऋतावाना ऋतावानौ सत्यवन्तौ यज्ञवन्तौवा सम्राजा सम्राजौ सम्यग्राजमानौ पूतदक्षसा पूतद-

क्षसौ दक्षइतिबलनाम शुद्धबलौ मित्रावरुणौ अस्मिन्कर्मण्यावह आह्वय। प्रायेण कर्मण्यग्ने- र्मित्रावरुणसहितत्वमस्तीति सूचयति ॥ ३० ॥

॥ इति षष्ठस्य द्वितीये चतुर्दशोवर्गः ॥ १४ ॥

सखायआशिषामहीति त्रिंशदृचं चतुर्थं सूक्तं अत्रेयमनुक्रमणिका—सखायस्त्र्यूनोन्त्यः सौ- षाम्णस्य वरोर्दानस्तुतिः अन्त्यानुष्टुबिति। व्यश्वपुत्रोवैयश्वनामकऋषिः औष्णिहं हेत्युक्तत्वादेतदा- दीनि त्रीणिसूक्तानि उष्णिक्छंदस्कानि अनुक्तत्वादिन्द्रोदेवता अन्त्यासु तिसृषु सुषामाख्यस्य राज्ञः पुत्रस्य वरुनाम्नोराज्ञो दानं स्तूयते अतस्तास्तद्देवताकाः। महाव्रते निष्केवल्येऔष्णि- हतृचाशीतावेतत्सूक्तम् तथैव पञ्चमारण्यके शौनकेनसूत्रितं—सखायआशिषामहियेकइद्विद- यतइति। दशमेहनि मरुत्वतीयशस्त्रे सखायइतितिस्रऋचः सूत्र्यतेच—सखायआशिषामहीति तिस्रउष्णिहइति।

तस्मिन्सूक्ते प्रथमा—

सखा॑यआ॒शिषा॑महि॒ब्रह्मेन्द्रा॑यव॒ज्रिणे॑।
स्तु॒षऊ॒षुवो॒नृत॑माय धृ॒ष्णवे॑ ॥ १ ॥

सखा॑यः। आ। शि॒षा॒म॒हि॒। ब्रह्म॑। इन्द्रा॑य। व॒ज्रिणे॑।
स्तु॒षे। ऊँ इति॑। सु। वः॒। नृऽत॑माय। धृ॒ष्णवे॑ ॥ १ ॥

सखायः मित्रभूता हे ऋत्विजः वज्रिणे वज्रहस्तायेन्द्राय ब्रह्म कर्तव्यमेतत्सूक्तरूपं स्तो- त्रमाशिषामहि वयमाशास्मः शासु अनुशिष्टौ लुङि च्लेरङादेशः इत्वपत्वे व्यत्ययेनात्मनेपदम्। तत्र वः सर्वेषामेव युष्माकं अर्थाय नृतमाय सर्वेषां नेतृतमाय यद्वा संग्रामेषु आयुधादीनां ने- तृतमाय धृष्णवे शत्रूणां घर्षणशीलाय तस्माइन्द्राय अहमेव सु सुष्ठु स्तुषे स्तौमि ॥ १ ॥

अथ द्वितीया—

शव॑सा॒ह्यसि॑श्रु॒तोवृ॑त्र॒हत्ये॑नवृत्र॒हा।
म॒घैर्म॒घोनो॒अति॑शूरदाशसि ॥ २ ॥

शवसा । हि । असि । श्रुतः । वृत्रऽहत्येन । वृत्रऽहा । मघैः ।
मघोनः । अति । शूर । दाशसि ॥ २ ॥

हे इन्द्र त्वं शवसा बलेन श्रुतः प्रसिद्धोसि भवसि हिप्रसिद्धौ । तदेवाह वृत्रहत्येन वृत्रासुरहननेन वृत्रहा वृत्रहन्तेति प्रसिद्धोभवसि । शूर शौर्यवन् हे इन्द्र मघोनोमघवतोधनवतः पुरुषान्मघैः त्वदीयैर्धनैरति अतिक्रम्य दाशसि स्तोतृभ्योस्मभ्यं प्रयच्छसि ॥ २ ॥

अथ तृतीया–

सनःस्तवानआभररयिंचित्रश्रवस्तमम् ।
निरेकेचिद्योहरिवोवसुर्ददिः ॥ ३ ॥

सः । नः । स्तवानः । आ । भर । रयिम् । चित्रश्रवःऽतमम् । निरेके ।
चित् । यः । हरिऽवः । वसुः । ददिः ॥ ३ ॥

हे इन्द्र सतथाविधस्त्वं स्तवानः अस्माभिः स्तूयमानः सन् चित्रश्रवस्तमं अतिशयेन नानाविधान्नोपेतं रयिं पुत्रं धनं वा नोस्मभ्यमाभर आसंपादय देहीत्यर्थः । हरिवः हरी अश्वौ तद्वन् हे इन्द्र यस्त्वं निरेकेचित् निर्गमनएव वसुः शत्रूणां वासयिताभवसि तवायुधनिर्गमनादेव शत्रवः पलायन्ते खलु । किञ्च त्वं ददिर्धनानां दाता भवसि ॥ ३ ॥

अथ चतुर्थी–

आनिरेकमुतप्रियमिन्द्रदर्षिजनानाम् ।
धृषताधृष्णोस्तवमानआभर ॥ ४ ॥

आ । निरेकम् । उत । प्रियम् । इन्द्र । दर्षि । जनानाम् ।
धृषता । धृष्णो इति । स्तवमानः । आ । भर ॥ ४ ॥

हे इन्द्र उतापिच प्रियं प्रीणनात् प्रियतमं निरेकं धनं भवति विरेचनान्निर्गमनाद्धेति तद्धनं जनानां स्तोतॄणामस्माकं आदर्षि आविदारय विवृतं कुरु । दृ विदारणे छांदसोविकरणस्य लुक् । विवृत्यच धृष्णो शत्रूणां धर्षणशील हे इन्द्र स्तवानः स्तोतृभिरस्माभिः स्तूयमानः सन् धृषता धृष्टेन मनसा सह आभर तद्धनमस्मभ्यं देहि ॥ ४ ॥

अथ पंचमी–

नतेसव्यंनदक्षिणंहस्तंवरन्तआमुरः ।
नपरिबाधोहरिवोगविष्टिषु ॥ ५ ॥ १५ ॥

न । ते । सव्यम् । न । दक्षिणम् । हस्तम् । वरन्ते । आऽमुरः ।
न । परिऽबाधः । हरिऽवः । गोऽइष्टिषु ॥ ५ ॥ १५ ॥

हे हरिवोश्ववन्निन्द्र आमुरः संग्रामेआभिमुख्येन कर्तारः मविपोद्धारो गविष्टिषु पणिभिरपहृतानामंगिरसांगवामन्वेषणेषु ते तव सव्यं हस्तं नवरंते न निवारयन्ति तेषामायुधादिभिर्न निवार्यतइत्यर्थः । तथा दक्षिणंहस्तंच न निवारयन्ति । किंच परिबाधः परितोबाधमानाः वृत्रादयोसुराश्च तव सव्यदक्षिणहस्तौ ननिवारयन्ति संग्रामेषु त्वया सर्वे शत्रवः छिन्नहस्ताः सर्वतोगच्छन्तु त्वंतु तैरबाधितोवर्तसइत्यर्थः ॥ ५ ॥

॥ इति षष्ठस्य द्वितीये पञ्चदशोवर्गः ॥ १५ ॥

अथ षष्ठी–

आत्वागोभिरिवव्रजंगीर्भिर्ऋणोम्यद्रिवः ।
आस्माकामंजरितुरामनःपृण ॥ ६ ॥

आ । त्वा । गोभिःऽइव । व्रजम् । गीःऽभिः । ऋणोमि ।
अद्रिऽवः । आ । स्म । कामम् । जरितुः । आ । मनः । पृण ॥ ६ ॥

हे अद्रिवः वज्रवन्निन्द्र गीर्भिः स्तुतिलक्षणाभिर्वाग्भिः त्वा त्वां आऋणोमि प्राप्नोमि । ऋणुर्गतौ तनादिः । तत्रदृष्टान्तः–गोभिरिव यथागोपालोगोभिर्व्रजं गोष्ठं गच्छति तद्वत्त्वां स्तुतिभिः प्राप्नोमीत्यर्थः । ततस्त्वं जरितुः स्तोतुर्मम कामं धनादिविषयं आपृण आपूरय तथा मदीयं मनोपानसं धनादिभिः प्रदानेनापूरय ॥ ६ ॥

अथ सप्तमी–

विश्वानिविश्वमनसोधियानोवृत्रहंतम ।
उग्रप्रणेतरधिपूषुवसोगहि ॥ ७ ॥

विश्वानि । विश्वऽमनसः । धिया । नः । वृत्रहन्ऽतम । उग्र ।
प्रनेतरिति प्रऽनेतः । अधि । सु । वसो इति । गहि ॥ ७ ॥

हे वृत्रहन्तम अतिशयेन वृत्रासुरस्योपद्रवाणांवा हन्तः। नाद्घस्येतितमपोनुडागमः।कीदृश-उग्र उद्गूर्णबल प्रणेतः स्तोतॄणां प्रकर्षेण धनादेर्नेतः।आमंत्रितइति उग्रेत्यस्याविद्यमानवद्भावप्र-तिषेधः। तथाविध वसो शत्रूणां वासयितरिन्द्र नः पूजायां बहुवचनं विश्वमनसएतन्नामकस्य मम विश्वानि सर्वाणि स्तोत्राणि कर्माणि वा धिया मनसा सु सुष्ठु अधिगहि अधिगच्छ स्तुत्यतया यष्टव्यतया वा मनोवेगेन गच्छेत्यर्थः। गमेर्लोटि छान्दसः शपोलुक् हेर्ङिद्वद्भावादनुदात्तोपदेशे-त्यनुनासिकलोपः ॥ ७ ॥

अथाष्टमी—

वयंतेअस्यवृत्रहन्विद्यामशूरनव्यसः ।
वसोःस्पार्हस्यपुरुहूतराधसः ॥ ८ ॥

वयम् । ते । अस्य । वृत्रऽहन् । विद्याम । शूर । नव्यसः ।
वसोः । स्पार्हस्य । पुरुऽहूत । राधसः ॥ ८ ॥

हे वृत्रहन् वृत्रस्यहन्तः शूर बलवन्पुरुहूत पुरुभिर्बहुभिराह्वातव्येन्द्र नव्यसः नवीयसःईय-सुनईकारलोपश्छांदसः नवतरं स्पार्हस्य स्पृहणीयं राधसः राधसाध संसिद्धौ शर्मादेःसंसाधकं वे तव त्वदीयं अस्य वसोः क्रियाग्रहणं कर्तव्यमिति वसोः सम्प्रदानसंज्ञा चतुर्थ्यर्थे बहुलंछंदसी-ति वसोः षष्ठी त्वदीयमिदं परिदृश्यमानं धनं वयं विद्याम लभेमहि। विद्लृलाभे आदादिकः छां-दसोविकरणस्यलुक् ॥ ८ ॥

अथ नवमी—

इन्द्रयथाह्यस्तितेपरीतंनृतोशवः ।
अमृक्तारातिःपुरुहूतदाशुषे ॥ ९ ॥

इन्द्र । यथा । हि । अस्ति । ते । अपरिऽइतम् । नृतो इति ।
शवः । अमृक्ता । रातिः । पुरुऽहूत । दाशुषे ॥ ९ ॥

हे नृतो सर्वस्यांतर्यामितया नर्तयितरिन्द्र ते त्वदीयं शवोबलं यथा अपरीतमस्ति शत्रुभिरपरिगतमप्यास्तिभवति हिमसिद्धौ। तथा हे पुरुहूत पुरुभिर्बहुभिराहूतेन्द्र दाशुषे हविर्दत्तवते यजमानाय रातिः धनादिदानमप्यक्ता शत्रुभिरहिंसितं भवति त्वचोऽलब्धं यजमानस्यधनं शत्रवोनहिंसन्ति। यथा त्वदीयबलस्य रक्षकः एवं तस्य धनस्यापि रक्षकइत्यर्थः ॥ ९ ॥

अथ दशमी—

आ वृ॑षस्व महामह म॒हे नृ॑तम॒ राध॑से ।
दृ॒ळ्हश्चि॑द्दृह्य मघवन्म॒घत्त॑ये ॥ १० ॥ १६ ॥

आ । वृ॒ष॒स्व॒ । म॒हा॒ऽम॒ह॒ । म॒हे । नृ॒ऽत॒म॒ । राध॑से ।
दृ॒ळ्हः । चि॒त् । दृ॒ह्य॒ । म॒घ॒ऽव॒न् । म॒घत्त॑ये ॥ १० ॥ १६ ॥

हे महामह अतिशयेन सर्वैः पूजनीय नृतम नेतृतमेन्द्र महे महते राधसे शत्रुधनानां संसाधकाय बलार्थं आवृषस्व स्वोदरमासिञ्च सोमं पिबेत्यर्थः। हे मघवन् धनवन्निन्द्र सोमपानेन मत्तःसन् दृळ्हश्चित् दृढानि परैः अबाधितान्यपि शत्रुपुराणि मघत्तये मघानां धनानां लाभाय दृह्य जिघांस विदारयेत्यर्थः ॥ १० ॥

॥ इति पञ्चस्य द्वितीये षोडशोवर्गः ॥ १६ ॥

अथैकादशी—

नू अ॒न्यत्रा॑ चिदद्रिव॒स्त्वन्नो॑ जग्मुरा॒शसः॑ ।
मघ॑वञ्छ॒ग्धि तव॒ तन्न॑ ऊ॒तिभिः॑ ॥ ११ ॥

नु । अ॒न्यत्र॑ । चि॒त् । अ॒द्रि॒ऽवः॒ । त्वत् । नः॒ । ज॒ग्मुः॒ । आ॒ऽशसः॑ ।
मघ॑ऽवन् । श॒ग्धि । तव॑ । तत् । नः॒ । ऊ॒तिऽभिः॑ ॥ ११ ॥

हे अद्रिवः वज्रवन्निन्द्र त्वं धनवान् दातानेत्यपरिताय नोऽस्मदीयानि आशसः आशंसनान्यभिलाषाः त्वत् त्वत्तोऽन्यत्र देवादौ नूचित् पुरा जग्मुः अगच्छन् तत्र फलं नालभन्त। इदानीं त्वं धनवान् त्वं दानशीलइत्यस्माभिर्ज्ञातं अतएव हे मघवन् धनवन् इन्द्र तव त्वदीयं तच्छत्रुपुरविदारणलब्धं धनं ऊतिभिः तद्रक्षणैः नोऽस्मभ्यं शग्धि देहि शग्धीति दानकर्मा शक्नोतेर्लोटि छान्दसोविकरणस्यलुक् ॥ ११ ॥

अथ द्वादशी–

नह्यं१ङ्गन्नृंतोत्वद्न्यंविन्दामिराधंसे ।
रायेद्युम्नायशवंसेचगिर्वणः ॥ १२ ॥

नहि । अङ्ग । नृतो इति । त्वत् । अन्यम् । विन्दामि ।
राधंसे । राये । द्युम्नायं । शवंसे । च । गिर्वणः ॥ १२ ॥

. हे नृतो नर्तयितः गिर्वणः गीर्भिः स्तुतिभिः वननीय संभजनीयेन्द्र राधसे बलसंसाध-कायान्नाय राये धनाय द्युम्नाय द्योतमानाय यशसे शवसे वर्धकाय बलायच त्वत्त्वत्तोन्यं न-हि विन्दामि न लभे । अंग प्रसिद्धौ ॥ १२ ॥

अथ त्रयोदशी–

एन्दुमिन्द्रांयसिञ्चतपिबांतिसोम्यंमधुं ।
प्रराधंसाचोदयातेमहित्वना ॥ १३ ॥

आ । इन्दुंम् । इन्द्राय । सिञ्चत । पिबांति । सोम्यम् । मधुं ।
प्र । राधंसा । चोदयाते । महिऽत्वना ॥ १३ ॥

हे ऋत्विजः इन्दुं स्यंदनशीलं सोमं इंद्राय इन्द्रार्थमासिञ्चत आश्रयणद्रव्येण सेचनं कुरुत अभिषुवेत्यर्थः। ततः सोम्यं सोममयं मधु मधुकरं सोमरसं पिबाति पिबतु पीत्वाच सइन्द्रः म-हित्वना स्वमहत्त्वेनैव राधसा अन्नेन सह धनादिकं स्तोतृभ्यः प्रचोदयाते प्रकर्षेण चोदयति । यद्वा यजमानः महित्वना इन्द्राय प्रदीयमानत्वादस्य महत्वं महत्वयुक्तेन राधसान्नेन सह स्तोतॄन्प्रचोदयति इन्द्राय हविर्देत्तेति स्तोतॄन् प्रेरयतीत्यर्थः ॥ १३ ॥

अथ चतुर्दशी–

उपोहरींणांपतिंदक्षंपृञ्चन्तंमब्रवम् ।
नूनंश्रुधिस्तुवतोअश्व्यस्यं ॥ १४ ॥

उपो इति । हरींणाम् । पतिम् । दक्षंम् । पृञ्चन्तंम् । अब्रवम् ।
नूनम् । श्रुधि । स्तुवतः । अश्व्यस्यं ॥ १४ ॥

हरीणां हरितवर्णानामश्वानां पतिं पालयितारं दक्षं वर्धकं स्वबलं पूंचर्व पृचीसंपर्के मरुत्सु योजयन्तम् यद्वा शत्रुषु स्वबलमायुधादिभिः संपर्चयन्तमेतादृशमिन्द्रं त्वामुषो अश्वं विश्वमना अहं स्तोत्रं करवाणि । अश्व्यस्य व्यश्वोनामर्षिः अश्वशब्देनोच्यते तस्य पुत्रस्य स्तुवतः स्तोत्रं कुर्वतोमम संबन्धिनीं त्वद्विषयां स्तुतिं नूनं सम्प्रति श्रुधि शृणु ॥ १४ ॥

अथ पञ्चदशी–

नह्यं१ङ्गपुराचनजज्ञेवीरतंर॒स्त्वत् ।
नकीरायानैवथान॒भन्दना॑ ॥ १५ ॥ १७

न॒हि । अ॒ङ्ग । पु॒रा । च॒न । ज॒ज्ञे । वी॒रऽत॑रः । त्वत् ।
नकिः । रा॒या । न । ए॒वऽथा॑ । न । भ॒न्दना॑ ॥ १५ ॥ १७॥

हे इन्द्र त्वत् त्वत्तः पुरा पूर्वं वीरतरः सामर्थ्यवान्कश्चिन्नहि जज्ञे न जातः खलु । अंग प्रसिद्धौ । त्वमेव सामर्थ्यवान् जातइत्यर्थः । किञ्च त्वत्तोपि राया धनेन समर्थोनकिर्नकश्चिद्स्ति । तथा एवथा शत्रुपुराणि संग्रामं वा प्रतिगमनेन त्वत्तोधिकोनजातः । यद्वा एवथा अवरक्षणादिषु अकारस्य एकारश्छान्दसः औणादिकोथप्रत्ययः शरणागतानां स्तोतॄणां चावनेन त्वत्तोधिकोनास्ति । किंच भन्दना भंदतिः स्तुतिकर्मा स्तुत्याच त्वदधिकोनजातः धनवान्रक्षकः स्तुत्यश्च त्वत्तोन्योनजज्ञइति ॥ १५ ॥

॥ इति पष्ठस्य द्वितीये सप्तदशोवर्गः ॥१७॥

एदुमध्वइति तृचः पूर्वोक्तब्राह्मणाच्छंसिशस्त्रे वैकल्पिकोनुरूपः सूत्रितंच–एदुमध्वोमदिन्तरमेतोन्विन्द्रंस्तवामसखायइति ।

सूक्ते षोडशी–

एदुमध्वोमदिन्तरंसिञ्चवाध्वर्योअन्धसः ।
एवाहिवीरःस्तवतेसदावृधः ॥ १६ ॥

आ । इत् । ऊँ इति॑ । मध्वः॑ । म॒दिन्ऽत॑रम् । सि॒ञ्च । वा॒ ।
अ॒ध्व॒र्यो इति॑ । अन्ध॑सः । ए॒व । हि । वी॒रः । स्तव॑ते । स॒दाऽवृ॑धः ॥१६॥

हे अध्वर्यो अध्वरस्यनेतः ऋत्विक् मध्वोमदकरस्यान्धसः सोमलक्षणस्यान्नस्य मदिन्तरं अत्यर्थं मादयितृतमं सोमरसमेव आसिञ्च इन्द्रार्थं । अयमेवेन्द्रः स्तवतेहि स्तोत्रशस्त्रादिभिः स्तूयते खलु । कीदृशः वीरः विक्रान्तः सदावृधः सर्वदावर्धमानः स्तुतायेन्द्राय सोमोदातव्यः तस्मादासिञ्चेति समन्वयः ॥ १६ ॥

अथ सप्तदशी–

इन्द्र॑स्थातर्हरीणां॒नकि॑ष्टेपू॒र्व्यस्तु॑तिम् ।
उदा॑नंशु॒शव॑सा॒नभ॒न्दना॑ ॥ १७ ॥

इन्द्र॑ । स्था॒तः॒ । ह॒री॒णा॒म् । नकिः॑ । ते॒ । पू॒र्व्यऽस्तु॑तिम् ।
उत् । आ॒नं॒श॒ । शव॑सा । न । भ॒न्दना॑ ॥ १७ ॥

हे हरीणां स्थातः अश्वानामधिष्ठातरिन्द्र ते त्वदीयां पूर्व्यस्तुतिं पूर्वैर्ऋषिभिः कृतां स्तुतिमुपलक्षणं इदानींतनैःक्रियमाणामपिस्तुतिं नकिर्नकश्चित् शवसा बलेन उदानंश व्याप्नोति । अशूव्याप्तौ लिटि अश्नोतेश्चेतिनुट् छान्दसआगमः कश्चिन्नातिक्रामतीत्यर्थः । किंच भन्दना सर्वैः प्रार्थनीयत्वात् पूजनीयेन धनेन स्तुत्याचा त्वदीयां स्तुतिं नकश्चिदतिक्रामति त्वत्तोबलवान्धनी स्तुत्योवान्योनास्तीत्यर्थः ॥ १७ ॥

अथाष्टादशी–

तंवो॒वाजा॑नां॒पति॒महू॑महिश्रव॒स्यवः॑ ।
अप्रा॑युभिर्य॒ज्ञेभि॑र्वावृ॒धेन्य॑म् ॥ १८ ॥

तम् । वः॒ । वाजा॑नाम् । पति॑म् । अहू॑महि । श्र॒व॒स्यवः॑ ।
अप्रा॑युऽभिः । य॒ज्ञेभिः॑ । वा॒वृ॒धेन्य॑म् ॥ १८ ॥

अप्रायुभिः कर्मसु अप्रमाद्यन्मनुष्यमुक्तैः अथवा अप्रगन्ताएकत्रस्थित्वैवकर्मकुर्वन्ति कर्मपारप्रपनान्यंदेशं गच्छन्तीत्यर्थः एवं विधमनुष्ययुक्तैर्यज्ञेभिर्यज्ञैः एतादृशमनुष्यैर्यज्ञैर्वा वावृधेन्यं वर्धनीयं वाजानामन्नानां पतिं स्वामिनं वः युष्मत्स्यसंबन्धेन युष्मदीयंतं तादृशमिन्द्रं श्रवस्यवः यशअन्नकामाः सन्तः अहूमहि आह्वयामः । ह्वयतेर्लुङि बहुलंछन्दसीति संप्रसारणम् ॥ १८ ॥

पूर्वोक्तएव शस्त्रे एतोन्विन्द्रमित्येतौतृचौ वैकल्पिकौस्तोत्रियानुरूपौ सत्रितश्च–एतोन्विन्द्रंस्तवामसखायःस्तुहीन्द्रंव्यश्ववदिति।

तयोः प्रथमा सूक्ते एकोनविंशी–

एतोन्विन्द्रंस्तवामसखायःस्तोम्यंनरम्।
कृष्टीर्योविश्वाअभ्यस्त्येकइत्॥ १९॥

एतो इति। नु। इन्द्रम्। स्तवाम। सखायः। स्तोम्यम्।
नरम्। कृष्टीः। यः। विश्वाः। अभि। अस्ति। एकः। इत्॥ १,९॥

हे सखायः समानख्याना मित्रभूतावा हे ऋत्विजः नु क्षिप्रं एतो आगच्छतैव। किमर्थं तदाह स्तोम्यं स्तोमार्हं नरं सर्वस्यनेतारं तमिन्द्रं स्तवाम स्तोत्रं करवाम। यइन्द्रः एकइदेकोसहायएवसन् विश्वाः सर्वाः कृष्टीः शत्रुसेनाः अभ्यस्ति अभिभवति तं स्तवामेतिशेषः॥१९॥

अथ विंशी–

अगोरुधायगविषेद्युक्षायदस्म्यंवचः।
घृतात्स्वादीयोमधुनश्चवोचत॥ २०॥ १८॥

अगोऽरुधाय। गोऽइषे। द्युक्षाय। दस्म्यम्। वचः। घृतात्।
स्वादीयः। मधुनः। च। वोचत॥ २०॥ १८॥

हे ऋत्विजःअगोरुधाय गाःस्तुतीरुणद्धीति गोरुधःनगोरुध अगोरुधः तान् अविनाशयति आदरेण शृणोतीत्यर्थः तादृशाय अतएव गविषे स्तोत्राणीच्छते द्युक्षाय दीप्यमानायेन्द्राय दस्म्यं दर्शनीयं घृतात्स्वादुतराद्वाज्यान्मधुनश्च स्वादीयः अतिशयेन स्वादुभूतं वचः स्तोत्ररूपं वाक्यं वोचत ब्रूत ऋत्विग्भ्यः कृतंकर्म यजमानोपि कृतवान् भवतीति यदिदमिन्द्रविषयंवचः घृतान्मधुनश्च स्वादुतरं भवतित्यायास्ते। तदाहभगवानाश्वलायनः–वचएयमइदं घृताच्चमधुनश्वस्वादीयोस्तिमीतिःस्वादीयोस्तित्येवतदाहेति[1]॥ २०॥

॥ इति पञ्चस्य द्वितीयेष्टादशोवर्गः॥ १८॥

---

1 गृ०सू० १ १.१

अथैकविंशी–

यस्यामितानिवीर्या३ नराधःपर्येतवे ।
ज्योतिर्नविश्वमभ्यस्तिदक्षिणा ॥ २१ ॥

यस्य॑ । अमि॑तानि । वी॒र्या॑ । न । राधः॑ । परि॑ऽएतवे ।
ज्योतिः॑ । न । विश्व॑म् । अ॒भि । अस्ति॑ । दक्षि॑णा ॥ २१ ॥

यस्येन्द्रस्य वीर्या वीर्याणि वृत्रहननादिलक्षणानि सामर्थ्यानि अमितानि अस्य इयन्ति सामर्थ्यानि नान्यानीति परिमितानि नभवन्ति । यद्वा मीञ् हिंसायां छान्दसोह्रस्वः शत्रुभिरहिंसितानि भवन्ति । तथा यस्येन्द्रस्य राधोधनं न पर्येतवे शत्रुभिः परिगंतुं माप्तुं शक्यं न भवति । अतएवास्यदक्षिणा धनं दानमभ्यस्ति विश्वं सर्वं स्तोतृजनं अभिभवति । तत्रदृष्टान्तः– ज्योतिर्न ज्योतिषामयनत्वाज्ज्योतिरन्तरिक्षं यथान्तरिक्षं सर्वलोकं पिधाय तिष्ठति तद्वत् स्तोतृजनं धनदानेन पिधत्तइत्यर्थः । यद्वा येन दत्तं धनं सर्वं शत्रुजनमभिभवति येनदत्तं धनमादायासतः शत्रूनभिभवतीत्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

स्तुहीन्द्रंव्यश्ववदनूर्मिंवाजिनंयमम् ।
अर्योगयंमंहमानंविदाशुषे ॥ २२ ॥

स्तु॒हि । इन्द्र॑म् । व्य॒श्व॒ऽवत् । अनू॑र्मिम् । वा॒जिन॑म् । यम॑म् ।
अ॒र्यः । गय॑म् । मंह॑मानम् । वि । दा॒शुषे॑ ॥ २२ ॥

हे विश्वमनः अनूर्मिं ऊर्मिर्हिंसाकर्मा कैश्चिदप्यहिंस्यं अथवा शत्रुभिरगंतव्यं अतएव वाजिनं बलवन्तं यमं स्तोतृभिः सुनियतमेतादृशमिन्द्रं स्तुहि । स्तोत्रेदृष्टान्तः–व्यश्ववत् यथा व्यश्वोविश्वमनसः पिता इन्द्रमस्तौत् तद्वत् स्तुहीत्यर्थः । स्तुतश्चेत् अर्यः स्वामीन्द्रः दाशुषे हविर्दत्तवते यजमानाय मंहमानं पूज्यमानं गयं धनं यद्वा देवानां पूजार्थं गयं गृहं । गृहमस्त्विचेव देवाहविर्भिः पूज्यन्ते तादृशं गृहं वितरति तस्मात् त्वं धनगृहलाभाय स्तुहीत्यर्थः ॥ २२ ॥

अथ त्रयोविंशी–

एवानूनमुपस्तुहिवैयश्वदशमंनवम् ।
सुविद्वांसंचर्कृत्यंचरणीनाम् ॥ २३ ॥

एव । नूनम् । उप । स्तुहि । वैयश्व । दशमम् । नवम् ।
सुऽविद्वांसम् । चर्कृत्यम् । चरणीनाम् ॥ २३ ॥

हे वैयश्व व्यश्वस्यपुत्र विश्वमनः चर्षणीनां मनुष्याणां देहेस्थितानां नवानां प्राणानां दशमं दशसंख्यापूरकं । तत्रमन्त्रः—नववै पुरुषेप्राणामनुष्येषुवर्तमानाइन्द्रस्तेषां दशधाभवतींद्स्यात्मानं दशधाचरन्तमिति । एतादृशं अतएव नवं स्तुत्यं सुविद्वांसं अंतर्यामित्वात् सुष्ठु सर्वं जानन्तं चर्कृत्यं भूयोभूयः कार्येषु सर्वैर्नमस्कर्तव्यमेवंविधमिन्द्रं एव नूनमिदानीमुपस्तुहि समीपेस्तुहि ॥२३॥

अथ चतुर्विंशी–

वेत्थाहिनिर्ऋतीनांवज्रहस्तपरिवृजम् ।
अहरहःशुन्ध्युःपरिपदामिव ॥ २४ ॥

वेत्थ । हि । निःऽऋतीनाम् । वज्रऽहस्त । परिऽवृजम् ।
अहःऽअहः । शुन्ध्युः । परिपदाम्ऽइव ॥ २४ ॥

इदानीमपिरिन्द्रं संबोध्यआह हे वज्रहस्त वज्रयुक्तहस्तेन्द्र निर्ऋतीनामुपद्रवकारिणां रक्षसां परिवृजं परिवर्जनं हिरवधारणे त्वमेववेत्थ जानीषे । तत्रदृष्टान्तः—अहरहः शुंध्युः अस्मिन्नुदितेसति ब्राह्मणा आत्मीयं कर्म कृत्वा शुद्धाभवन्तीति शोभाहेतुत्वात् शुन्ध्युरादित्यः परिपदामिव परितः यजमानानां इव यद्वा परिपदां समानाधिकरणः परितः पततां पक्षिणां वर्जनं स्वस्थानत्यागं अहरहः प्रतिदिवसं यथा वेत्ति उदिते सूर्ये पक्षिणः स्वस्थानं परित्यज्य सर्वतोगच्छन्ति खलु । एवं त्वयीन्द्रे स्वबलेन प्रकाशमानेसति शत्रवः स्वपुरादि त्यक्त्वा पलायन्त इत्यर्थः ॥ २४ ॥

---

१ तै० ब्रा० १. ३. ७ ।

अथ पञ्चविंशी–

तदिन्द्रावआभरयेनादंसिष्ठकृत्वने ।
द्विताकुत्सायशिश्नथोनिचोदय ॥ २५ ॥ १९ ॥

तत् । इन्द्र । अवः । आ । भर । येन । दंसिष्ठ । कृत्वने ।
द्विता । कुत्साय । शिश्नथः । नि । चोदय ॥ २५ ॥ १९ ॥

हे इन्द्र तदवस्तद्रक्षणमस्मभ्यमाभर हे दंसिष्ठ अत्यन्तं दर्शनीय यद्वा शत्रूणामुपक्षपयितरिन्द्र कृत्वने कर्मकुर्वते यजमानाय तदर्थं येन पालनमकुथाः तद्रक्षणमाभरेति समन्वयः। किञ्च कुत्साय कुत्सनामकाय राजर्षये द्विता द्विधा प्रकारेण शिश्नथः त्वं शत्रूनवधीः तस्मै द्वैधं पालनमकार्षीरित्यर्थः तद्रक्षणमप्यस्मभ्यं निचोदय निरारामत्यर्थं प्रेरय। यद्वा कृत्वनइति सामान्येनोक्त्वा निःशेषेण तदेवाह कुत्सायेत्यादि। शेषं पूर्ववत् ॥ २५ ॥

॥ इति पञ्चमस्य द्वितीये एकोनविंशोवर्गः ॥ १९ ॥

अथ षड्विंशी–

तमुंत्वानूनमीमहेनव्यंदंसिष्ठसंन्यसे ।
सत्वंनोविश्वाअभिमातीःसक्षणिः ॥ २६ ॥

तम् । ऊँ इति । त्वा । नूनम् । ईमहे । नव्यम् । दंसिष्ठ ।
संन्यसे । सः । त्वम् । नः । विश्वाः । अभिऽमातीः । सक्षणिः ॥ २६॥

हे दंसिष्ठ अतिशयेन दर्शनीयेन्द्र नव्यं स्तोतृभिः स्तोतव्यं तमु तादृशमेव त्वा त्वां नूनमिदानीमीमहे वयं याचामहे। किमर्थं संन्यसे असुक्षेपणे भावेक्विप् संन्यासार्थं याचामहइति शेषः। सतादृशस्त्वं नोस्माकं विश्वाः सर्वाअभिमातीः शत्रुसेनाः सक्षणिः सहेः सनिः प्रत्ययः सहनशीलोभिभवनशीलोभवसि ॥ २६ ॥

अथ सप्तविंशी–

यच्छुक्षादंहसोमुचद्योवार्यात्सप्तसिन्धुषु ।
वर्धर्दासस्यतुविनृम्णनीनमः ॥ २७ ॥

यः । ऋक्षात् । अंहसः । मुचत् । यः । वा । आर्यात् । सप्त ।
सिन्धुषु । वधः । दासस्य । तुविऽनृम्ण । नीनमः ॥ २७ ॥

पूर्वोर्धर्चः परोक्षकृतः यइन्द्रऋक्षाव् ऋन्मनुष्यान् क्षणोति क्षणोतेरौणादिकोडमत्ययः तस्माद्रक्षसोजातादंहसः पापरूपादुपद्रवान्मुचत् मुञ्चति राक्षसएनं नबाधते किंपुनस्तंहन्तीत्यर्थः । अपिच यइन्द्रः सप्तसिंधुषु गंगाद्यासु नदीषु यद्वा सप्त सर्पणशीलासु सिंधुषु तत्कूलेष्वित्यर्थः गंगायांघोषइतिवत् । तेषु वर्तमानानां स्तोतॄणां आर्याव् धनादिकं प्रेरयेत् ऋगतिप्रापणयोः आशीर्लिङि गुणोर्तिसंयोगाद्योरिति गुणः बहुलंछन्दसीति लिङ्यप्याडागमः । अथप्रत्यक्षः हे तुविनृम्ण बहुधनेन्द्र दासस्योपक्षपयितुरसुरस्य वधः हननसाधनमायुधं नीनमः नमय ॥२७॥

अथाष्टाविंशी–

यथांवरोसुपाम्णेसनिभ्यआवंहोरयिम् ।
व्यश्वेभ्यःसुभगेवाजिनीवति ॥ २८ ॥

यथा । वरो इति । सुऽसाम्ने । सनिऽभ्यः । आ । अवहः ।
रयिम् । विऽअश्वेभ्यः । सुऽभगे । वाजिनीऽवति ॥ २८ ॥

अनेनतृचेन वरोर्दानंस्तूयते–हे वरो वरुनामकराजन् सुपाम्णे सुसाम्ने सुपामाख्यं राजानं स्वपितरमुद्दिश्य तस्योत्तमलोकप्राप्त्यर्थं सनिभ्यो भिक्षमाणेभ्यो आ कोशाव् आहृत्य रयिं धनं यथा पुरा अवहः प्रापितवानसि अतएवमिदानीं व्यश्वेभ्यः व्यश्वपुत्रेभ्योस्मभ्यं धनमावह । वाजिनीवतीतिपदलिंगादियमुषस्या अयंतृचोप्युषस्यइति शौनकेनोक्तम्–यथा वरोसुपाम्णइत्युत्तमस्त्वौषसस्तृचइति । हे सुभगे शोभनधनयुक्ते वाजिनीवति अन्नवति मनुमनुवादार्थः । यद्वा वाजोवाजनं गमनमस्यास्तीति वाजिनी अन्नं तद्वति हे उषः त्वं चास्मभ्यं धनं प्रयच्छ वरोर्बहुधनदानात्तस्य दानस्तुतिः । यद्वा विश्वमनाऋषिः वरुं संबोध्याह हे सुभगे शोभनधने वाजिनीवति अन्नवति हे उषः यथा त्वं सुपाम्णे सुपामनाम्ने मम पित्रे धनं दत्वा त्वैनैव सुपाम्णा सनिभ्योयाचमानेभ्यः धनं यथा प्रापितवत्यसि तेन यथा दानमकारयः एवं मह्यमपि धनं दत्वा व्यश्वेभ्यः पूजायां बहुवचनं व्यश्वपुत्राय विश्वमनसे धनं प्रापयेति मयापि दानंकरोषि । हेवरो उपसमेवंवदेत्यृषिराह ॥ २८ ॥

अथैकोनत्रिंशी–

आनार्यस्यदक्षिणाव्यश्वाँएतुसोमिनः ।
स्थूरंचराधःशतवंत्सहस्रंवत् ॥ २९ ॥

आ । नार्यस्य । दक्षिणा । विऽअश्वान् । एतु । सोमिनः ।
स्थूरम् । च । राधः । शतऽवंत् । सहस्रंऽवत् ॥ २९ ॥

अनया धनं ऋषिराददत्तवानित्याह नार्यस्य नरहितोनर्यः तस्यापत्यंनार्यः तस्मात् संबन्धमात्रे तस्येदमित्यण् तस्य सोमिनः सोमवतोयजमानस्य यद्वा व्यश्वानां विशेषणं तादृशस्य नरोर्दक्षिणादानं सोमवतोव्यश्वान् व्यश्वपुत्रानस्मानेतु आगच्छतु । किंच स्थूरं स्थूलं शतवत्सहस्रवत् शतसहस्रधनयुक्तं राधोन्नं चास्मानागच्छतु ॥ २९ ॥

अथ त्रिंशी–

यत्त्वापृच्छादीजानःकुहयाकुहयाकृते ।
एषोअपश्रितोवलोगोमतीमवतिष्ठति ॥ ३० ॥ २० ॥

यत् । त्वा । पृच्छात् । ईजानः । कुहया । कुहयाऽकृते । एषः ।
अपंऽश्रितः । वलः । गोऽमतीम् । अवं । तिष्ठति ॥ ३० २० ॥

इदानीमुषसं संबोध्याभिधीयते हे कुहयाकृते सवरुः कुह कुत्र तिष्ठतीत्येतदिच्छयाभिलक्षणप्रवृत्तैर्जिज्ञासुभिः पुरस्कृते कुहशब्दाव क्यच् एतादृशे हे उषः त्वा त्वां यद्यदा कश्चित् पृच्छात् पृच्छति ईजानः इष्टवान् वरुः कुहया कतिष्ठतीति यदा पृच्छति तदानीमपश्रितः सर्वैराश्रितः यद्वा विवृतद्वारः । यदा याचमानाआगच्छन्ति तदा दौवारिका न प्रतिबध्नन्तीत्यर्थः तादृशः वलोवरः स्वबलेनावरकः शत्रूणां यद्वा भिक्षूणां धनादिप्रदानेनावरिता एषोएषवरुः गोमतीं एतन्नामिकां नदीं कालाध्वनोरत्यन्तसंयोगे इति द्वितीया तस्यास्तीरे अवतिष्ठतीति तदानीं त्वं कथयसि ॥३०॥

॥ इति पञ्चस्य द्वितीये विंशोवर्गः ॥ २० ॥

तावामिति चतुर्विंशत्यृचं पञ्चमं सूक्तम् अत्रेयमनुक्रमणिका–तावांचतुर्विंशतिर्मैत्रावरुणं दशम्याद्यास्तिस्रोवैश्वदेव्यउपान्त्योष्णिगर्भेति । व्यश्वपुत्रोवैयश्वनामा ऋषिः पूर्ववदुष्णि-

कृच्छन्दः त्रयोविंशीउष्णिग्गर्भा । पट्सप्तैकादशाउष्णिग्गर्भेति तल्लक्षणोपेतत्वात् । दशम्येकादशीद्वादश्योवैश्वदेव्यः अवशिष्टानां मित्रावरुणौ देवता सूक्तविनियोगोलैंगिकः ।

तस्मिन्सूक्ते प्रथमा—

तावांविश्वस्यगोपादेवादेवेषुयज्ञिया ।
ऋतावानायजसेपूतदक्षसा ॥ १ ॥

ता । वाम् । विश्वस्य । गोपा । देवा । देवेषु । यज्ञिया ।
ऋतऽवाना । यजसे । पूतऽदक्षसा ॥ १ ॥

हे मित्रावरुणौ विश्वस्य सर्वस्य लोकस्य गोपा गोपायितारौ देवा देवौ द्योतनशीलौ देवेषु मध्ये यज्ञिया यज्ञार्हौ ता तौ तादृशौ वां युवां हविःप्रदानार्थं यजमानंभजथः अतएव हे विश्वमनाः ऋतावाना ऋतावानौ सत्यवन्तौ यज्ञवन्तौवा पूतदक्षसा पूतदक्षसौ शुद्धबलौ । आवां बलवन्ताविति वचनमात्रेण बलवन्तौ न भवतः । किन्तु यथार्थत्वेन सामर्थ्यवंतौ मित्रावरुणौ यजसे हविर्भिः पूजयसि ॥ १ ॥

अथ द्वितीया—

मित्रातनानरथ्यावरुणोयश्चसुक्रतुः ।
सनात्सुजातातनयाधृतव्रता ॥ २ ॥

मित्रा । तना । न । रथ्या । वरुणः । यः । च । सुऽक्रतुः ।
सनात् । सुऽजाता । तनया । धृतऽव्रता ॥ २ ॥

सुक्रतुः शोभनकर्मा योवरुणः सुकर्मा मित्रश्च मित्रावरुणौ कीदृशौ तना तन्वन्ति पुत्रकंटकादिनिति तनानि धनानि नश्चार्थे धनानिच रथ्या रथ्यौ नेतारौ । यद्वा धनानि कर्मणः कर्तृपक्षत्वात् प्रयच्छन्ताविति संबध्यते । तादृशौ रथ्यौ रथवन्तौ सनाच्चिरादेव सुजाता सुजातौ शोभनजन्मानौ तदेवाह तनया तनयौ अदितेः पुत्रौ धृतव्रता धृतव्रतौ धृतकर्माणौ तौ यजसइति पूर्वेणसमन्वयः ॥ २ ॥

अथ तृतीया–

तामाताविश्ववेदसासुर्यायप्रमहसा।
महीजजानादितिर्ऋतावरी ॥ ३ ॥

ता। माता। विश्वऽवेदसा। असुर्याय। प्रऽमहसा।
मही। जजान। अदितिः। ऋतऽवरी ॥ ३ ॥

अदितेस्तनयत्वमेव स्फुटयति–विश्ववेदसा विश्ववेदसौ सर्वधनौ यद्वा विश्वानि स्थावरजंगमात्मकानि सर्वाणि विद्तुर्जानीतइति विश्ववेदसौ प्रमहसा प्रमहसौ प्रकृष्टतेजस्कौ ता वौ तादृशौ मित्रावरुणौ मही महती ऋतावरी सत्यवती माता देवमाता अदितिः जजान जनयामास। किमर्थं असुर्याय असुराणां हन्त्रे बलाय असुरान्हंतुमुत्पादितवतीत्यर्थः ॥ ३ ॥

अथ चतुर्थी–

महान्तामित्रावरुणासम्राजादेवावसुरा।
ऋतावानावृतमाघोषतोबृहत् ॥ ४ ॥

महान्ता। मित्रावरुणा। सम्ऽराजा। देवौ। असुरा।
ऋतऽवाना। ऋतम्। आ। घोषतः। बृहत् ॥ ४ ॥

महान्ता गुणाधिक्येन महान्तौ सम्राजा सम्राजौ सम्यग्दीप्यमानौ असुरा असुरौ बलवन्तौ यद्वा सर्वान्तर्यामितया प्रेरकौ ऋतावानौ सत्यवन्तौ मित्रावरुणौ देवौ बृहत् स्तोत्रशस्त्रादिना महान्तं ऋतं यज्ञमाघोषतः स्वदीप्त्या प्रकाशयतः घुषेर्लेटिरूपम् ॥ ४ ॥

अथ पञ्चमी–

नपाताशवसोमहःसूनूदक्षस्यसुक्रतू।
सृप्रदानूइषोवास्त्वधिक्षितः ॥ ५ ॥ २१ ॥

नपाता। शवसः। महः। सूनू इति। दक्षस्य। सुक्रतू इति सुऽक्रतू।
सृप्रदानू इति सृप्रऽदानू। इषः। वास्तु। अधि। क्षितः ॥ ५ ॥ २१ ॥

महोमहतः शवसोबलस्यनपाता नपातौ पौत्रौ बलेनोत्पादिताविति बलस्य पौत्रौ तादृशा दक्षस्य। दक्षवृद्धौ शीघ्रार्थेचेति दक्षोवेगः। तस्य सूनू पुत्रौ। बलाद्वेगइति तयोःपुत्रत्वं। तौ सुक्रतू शोभनकर्माणौ सुप्रदानू प्रभूतधनादिदानौ मित्रावरुणौ इषोन्नस्य वास्तु निवासस्थाने अधिक्षितः अधिवसतः। अधिशीङिति वास्तुनः कर्मसंज्ञा क्षयतेर्लटि छान्दसोविकरणस्यलुक्॥ ५॥

॥ इति षष्ठस्य द्वितीये एकविंशोवर्गः॥ २१॥

अथ षष्ठी—

सं॒या दानू॑नि ये॒मथु॑र्दि॒व्याः पार्थि॑वी॒रिषः॑।
नभ॑स्वती॒रा वां॑ चरन्तु वृ॒ष्टयः॑॥ ६॥

सम्। या। दानू॑नि। ये॒मथुः॑। दि॒व्याः। पार्थि॑वीः।
इषः॑। नभ॑स्वतीः। आ। वा॒म्। च॒र॒न्तु॒। वृ॒ष्टयः॑॥ ६॥

हे मित्रावरुणौ या यौ युवां दानूनि देयानि धनानि संयेमथुः अस्मासु संयच्छतं तथा दिव्यानि दिविभवानि पार्थिवीः पृथिव्यामुत्पन्नानि इषोन्नानि संयच्छतं वृष्ट्यभावे कथमन्नंलभ्यतइतिचेत् तदुच्यते—नभस्वतीः उदकवत्योवृष्टयःतादृशौ वां युवां आचरन्तूपविशन्तु॥६॥

अथ सप्तमी—

अधि॒ या बृ॑ह॒तो दि॒वो॒३॒॑भि यू॒थेव॒ पश्य॑तः।
ऋ॒तावा॑ना स॒म्राजा॒ नम॑से हि॒ता॥ ७॥

अधि॑। या। बृ॒ह॒तः। दि॒वः। अ॒भि। यू॒थाऽइ॑व। पश्य॑तः।
ऋ॒तऽवा॑ना। स॒म्ऽराजा॑। नम॑से। हि॒ता॥ ७॥

या यौ मित्रावरुणौ बृहता दिवोद्योतमानान् देवानधिपश्यतः। तत्रदृष्टान्तः—यूथेव यथा वृषभः गोयूथानिरक्षितुमभि अभिमुखं पश्यति तद्वदेतौ स्ववीर्येणासुरान् हत्वा देवान्मोदयितुं पश्यतइत्यर्थः। कीदृशौ ऋतावाना सत्यवन्तौ सम्राजा सम्राजौ सम्यग्दीप्यमानौ नमसे हविषे हिता हितौ मियौ पश्यतइति॥ ७॥

अथाष्टमी–

ऋतावानानिषेदतुःसाम्राज्यायसुक्रतू ।
धृतव्रताक्षत्रियाक्षत्रमाशतुः ॥ ८ ॥

ऋतऽवाना । नि । सेदतुः । साम्ऽराज्याय । सुक्रतू इति सुऽक्रतू ।
धृतऽव्रता । क्षत्रिया । क्षत्रम् । आशतुः ॥ ८ ॥

ऋतावाना ऋतावानौ सत्यवन्तौ सुक्रतू शोभनकर्माणौ सुमतीवा मित्रावरुणौ साम्राज्याय साम्राज्यार्थं निषीदतुः न्यसीदताम् । तथामन्त्रः–निषसादधृतव्रतोवरुणःपस्त्यास्वा । साम्राज्यायसुक्रतुरिति । धृतव्रता धृतव्रतौ धृतकर्माणौ क्षत्रिया क्षत्रियौ बलवन्तौ क्षत्रं बलमाशतुः आनशाते व्याप्नुतइत्यर्थः ॥ ८ ॥

अथ नवमी–

अक्ष्णश्चिद्गातुवित्तरानुल्बणेनचक्षसा ।
निचिन्मिषन्तानिचिरानिचिक्यतुः ॥ ९ ॥

अक्ष्णः । चित् । गातुवित्ऽतरा । अनुल्बणेन । चक्षसा ।
नि । चित् । मिषन्ता । निऽचिरा । नि । चिक्यतुः ॥ ९ ॥

अक्ष्णश्चित् चक्षुषोपि पूर्वं गातुवित्तरा गातुवित्तरौ अतिशयेन मार्गवेत्तारौ यद्वा गातुवित्तरौ गातु गमनशीलं प्राणिजातं चक्षुषोपि पूर्वं वेत्तारौ मित्रावरुणौ कीदृशौ निमिषन्ता निमिषन्तौ सर्वमुन्मेषयन्तौ स्वस्वकर्मणि निचिरा नितरां चिरंतनौ तौ अनुल्बणेन उल्बणमिति दुःसहमस्तेजः तद्वत् दुःसहेन चक्षसाहोरात्रयोर्व्याप्तेन तेजसैव निचिक्यतुः पूजितौ बभूवतुः । चिदवधारणे ॥ ९ ॥

अथ दशमी–

उतनोदेव्यदितिरुरुष्यतांनासत्या ।
उरुष्यन्तुमरुतोवृद्धशवसः ॥ १० ॥ २२ ॥

---

१ ऋ० सं० १. २. १७ ।

उत । नः । देवी । अदितिः । उरुष्यताम् । नासत्या ।
उरुष्यन्तु । मरुतः । वृद्धऽशवसः ॥ १० ॥ २२ ॥

उतापिच देवी द्योतनशीला अदितिर्मित्रावरुणयोर्माता नोस्मान्रक्षतु नासत्या नासत्यौ असत्यमनयोर्नास्तीति नासत्यौ अश्विनौच उरुष्यतां रक्षतां । उरुष्यतिः कंड्वादिः वृद्धश्रवसः वृद्धवेगा अतिशयेन वेगवन्तइत्यर्थः यद्वा वर्धनशीलहविर्लक्षणान्नोपेताः मरुतः उरुष्यन्तु अस्मान्पालयन्तु ॥ १० ॥

॥ इति पञ्चस्य द्वितीये द्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी–

तेनोनावमुरुष्यतदिवानक्तंसुदानवः ।
अरिष्यन्तोनिपायुभिःसचेमहि ॥ ११ ॥

ते । नः । नावम् । उरुष्यत । दिवा । नक्तम् । सुऽदानवः ।
अरिष्यन्तः । नि । पायुऽभिः । सचेमहि ॥ ११ ॥

हे सुदानवः शोभनदानामरुतः अरिष्यन्तः केनाप्यहिंसिताः ते तादृशायूयं नोस्मदीयां नावं यज्ञियां नावं दिवानक्तंच उरुष्यत पालयत । ततोवयं पायुभिर्युष्मदीयैः पालनैः निसचेमहि नितरां समवेताभवेम ॥ ११ ॥

अथ द्वादशी–

अघ्नतेविष्णवेवयमरिष्यन्तःसुदानवे ।
श्रुधिस्वयावन्त्सिन्धोपूर्वचित्तये ॥ १२ ॥

अघ्नते । विष्णवे । वयम् । अरिष्यन्तः । सुऽदानवे । श्रुधि ।
स्वऽयावन् । सिन्धो इति । पूर्वऽचित्तये ॥ १२ ॥

पूर्वोर्धर्चः परोक्षकृतः अरिष्यन्तः पालनवत्वात् केनाप्यबाधितावयं अघ्नते स्तोतॄणां यष्टॄणां चाहिंसकाय सुदानवे शोभनदानाय विष्णवे स्वमहत्त्वेन सर्वव्यापकाय एतन्नामकाय देवाय स्तुतिं कुर्मः । अथ प्रत्यक्षः हे स्वयावन् स्वयमेवासहायः सन् दिवि संग्रामेवा यातीति स्वयावन्

सिन्धो स्तोतॄन् प्रति धनानां स्यन्दनशील विष्णो पूर्वचित्तये चित्तिः कर्म मन्त्रान्तरेपि तथाश्रवणात्। साचित्तिर्निनिहिचकारमर्थमिति। पूर्वं प्रारब्धकर्मणे यजमानाय तदर्थं श्रुधि अस्माभिः क्रियमाणां स्तुतिं त्वं शृणु ॥ १२ ॥

अथ त्रयोदशी–

तद्वार्यंवृणीमहेवरिष्ठंगोपयत्यम्।
मित्रोयत्पान्तिवरुणोयदर्यमा ॥ १३ ॥

तत्। वार्यम्। वृणीमहे। वरिष्ठम्। गोपयत्यम्। मित्रः। यत्। पान्ति। वरुणः। यत्। अर्यमा ॥ १३ ॥

वरिष्ठं उरुतरं गोपयत्यं सर्वेषां रक्षकं सर्वैः पालनीयं वा वार्यं सर्वैर्वननीयं तद्धनं वृणीमहे वयं संभजामहे। यद्धनं मित्रः सर्वेषां मित्रभूतः वरुणः शत्रूणां वारयिता अर्यमा सर्वदागच्छन् एतन्नामकास्त्रयोदेवाः पांति पालयन्ति तद्धनं वृणीमहे अस्मदीयस्य धनस्य रक्षकाभवन्तीत्यर्थः ॥ १३ ॥

अथ चतुर्दशी–

उतनःसिन्धुरपांतन्मरुतस्तदश्विना।
इन्द्रोविष्णुर्मीढ्वांसःसजोषसः १४ ॥

उत। नः। सिन्धुः। अपाम्। तत्। मरुतः। तत्। अश्विना। इन्द्रः। विष्णुः। मीढ्वांसः। सऽजोषसः ॥ १४ ॥

पुनरपि धनरक्षणमेवाशास्ते उतापिच अपामुदकानां सिन्धुः स्यन्दनशीलः पर्जन्यः नोस्मदीयं तद्धनं रक्षतु तदेव मरुतश्च पालयन्तु अश्विना अश्विनौ देवौ तद्धनं पालयताम्। तथा इन्द्रोविष्णुश्च मीढ्वांसः कामानां सेक्तारएते सर्वेदेवाः सजोषसः संगताः संतः अस्मदीयं धनं रक्षन्तु एतेदेवा अस्मभ्यं धनं दत्वा पालयन्त्वित्यर्थः ॥ १४ ॥

---

१ ऋ० सं० २. ३. १९.।

अथ पञ्चदशी–

तेहिष्मावनुषोनरोअभिमातिंकयस्यचित् ।
तिग्मंनक्षोदःप्रतिघ्नन्तिभूर्णयः ॥ १५ ॥ २३ ॥

ते । हि । स्म । वनुषः । नरः । अभिऽमातिम् । कयस्य ।
चित् । तिग्मम् । न । क्षोदः । प्रतिऽघ्नन्ति । भूर्णयः ॥१५॥२३॥

वनुषः वननीयाः संभजनीयाः नरो नेतारस्तेहिष्म तेखलु देवाः भूर्णयः क्षिप्रगमनाः सन्तः कयस्यचित्कस्यचिच्छत्रोरभिमातिमभिमानं प्रतिघ्नन्ति प्रतिकूलं यथाभवति तथा हिंसन्ति। तत्रदृष्टान्तः–तिग्मंन यथा तिग्मं तीक्ष्णं जवेन गच्छत् क्षोदः उदकं अग्रतः स्थितं वृक्षमुन्मूलयति तद्वत् तस्याभिमानं घ्नन्तीत्यर्थः ॥ १५ ॥

॥ इति षष्ठस्य द्वितीये त्रयोविंशोवर्गः ॥ २३ ॥

अथ षोडशी–

अयमेकइत्थापुरूरुचष्टेविविश्पतिः ।
तस्यव्रतान्यनुवश्चरामसि ॥ १६ ॥

अयम् । एकः । इत्था । पुरु । उरु । चष्टे । वि । विश्पतिः ।
तस्य । व्रतानि । अनु । वः । चरामसि ॥ १६ ॥

मित्रस्य कर्माण्याह विश्पतिः विशां पालयिता अनयोर्मित्रावरुणयोरेकः अयं मित्रः पुरु पुरूणि बहूनिच उरु उरूणिच द्रव्याणि इत्था इत्थं विचष्टे स्वतेजसा पश्यति तस्य मित्रस्य व्रतानि कर्माणि वोयुष्मदर्थं अनुचरामसि अनुचरामः कुर्मइत्यर्थः ॥ १६ ॥

अथ सप्तदशी–

अनुपूर्वाण्योक्यासाम्राज्यस्यसश्चिम ।
मित्रस्यव्रतावरुणस्यदीर्घश्रुत् ॥ १७ ॥

अनु । पूर्वाणि । ओक्या । साम्ऽराज्यस्य । सश्चिम ।
मित्रस्य । व्रता । वरुणस्य । दीर्घऽश्रुत् ॥ १७ ॥

साम्राज्यस्य सम्राजोभावः साम्राज्यं साम्राज्यमस्यास्तीति साम्राज्यः अर्शआदिभ्यइत्यच् प्रत्ययः साम्राज्यवतोवरुणस्य पूर्वाणि पुरातनानि ओक्या ओकोगृहं तस्मै हितानि कर्माणि वयं सश्चिम । सश्चतिर्गतिकर्मा लिटिरूपं द्विर्वचनस्य छन्दसिविकल्पितत्वादत्रद्विर्वचनाभावः । तदेवाह मित्रस्य व्रता व्रतानि कर्माणिच दीर्घश्रुत् सुपांसुलुगिति षष्ठ्यालुक् दीर्घश्रुतः अतिशयेन प्रसिद्धस्य वरुणस्य व्रतानिवा सश्चिमेति ॥ १७ ॥

अथाष्टादशी—

परियोरश्मिनादिवोन्तान्ममेपृथिव्याः ।
उभेआपप्रौरोदसीमहित्वा ॥ १८ ॥

परि । यः । रश्मिना । दिवः । अन्तान् । ममे । पृथिव्याः ।
उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ॥ १८ ॥

योमित्रः दिवः पृथिव्याः द्यावापृथिव्योरन्तान् अन्तरान् रश्मिना स्वतेजसा परिममे परिमिनोति तयोः पर्यन्तान् स्वरश्मिना भासयतीत्यर्थः । सएव उभेरोदसी द्यावापृथिव्यौ महित्वा स्वमहिम्ना आपप्रौ आसमन्तात्पूरयति ॥ १८ ॥

अथैकोनविंशी—

उदुष्यशरणेदिवोज्योतिरयंस्तसूर्यः ।
अग्निर्नशुक्रःसमिधानआहुतः ॥ १९ ॥

उत् । ऊँ इति । स्यः । शरणे । दिवः । ज्योतिः । अयंस्त ।
सूर्यः । अग्निः । न । शुक्रः । सम्ऽइधानः । आऽहुतः ॥ १९ ॥

सूर्यः सुवीर्यः सुष्टु सर्वस्यप्रेरकः स्यः समित्रोवरुणश्च दिवोद्योतमानस्यादित्यस्य शरणे स्थाने नभसि ज्योतिरात्मीयं तेजः उदयंस्त उयच्छति ऊर्ध्वं गमयति सर्वत्र विस्तारयतीत्यर्थः । यमेर्लुङिरूपं । ततः सः अग्निर्न शुक्रः अग्निरिव दीप्यमानः समिधानः हविर्भिः समिध्यमानः आहुतः सर्वैराहूतस्तिष्ठति ॥ १९ ॥

अथ विंशी–

वचोंदीर्घप्रसद्मनीशेवाजस्यगोमंतः ।
ईशेहिपित्वोंविषस्यंदावने ॥ २० ॥ २४ ॥

वचः । दीर्घऽप्रसद्मनि । ईशे । वाजस्य । गोऽमंतः ।
ईशे । हि । पित्वः । अविषस्यं । दावने ॥ २० ॥ २४ ॥

हे स्तोतः दीर्घप्रसद्मनि दीर्घं प्रततं विस्तृतं सद्म सदनं यस्मिन्यज्ञे वचः मित्रं वरुणं च स्तुहि वकेर्लेट्यडागमः । सवरुणः गोमतः पशुमतः वाजस्यान्नस्य ईशे ईष्टे स्वामीभवति । केवलं स्वामी न भवति किन्तु अविषस्य महतः प्रीतिकारिणः पित्वोन्नस्य दावने दानायच ईशे समर्थोभवति ये स्तोत्रंकुर्वन्ति तेभ्योन्नंददातीत्यर्थः ॥ २० ॥

॥ इति पष्ठस्य द्वितीये चतुर्विंशोवर्गः ॥२४॥

अथैकविंशी–

तत्सूर्यरोदसीउभेदोषावस्तोरुपब्रुवे ।
भोजेष्वस्माँअभ्युच्चरासदा ॥ २१ ॥

तत् । सूर्यम् । रोदसी इति । उभे इति । दोषा । वस्तोः ।
उप । ब्रुवे । भोजेषु । अस्मान् । अभि । उत् । चर । सदा ॥ २१ ॥

सूर्यं सुवीर्यं तव वारुणं मैत्रञ्च तेजः उभे रोदसी द्यावापृथिव्यौ च । दोषा सुपांसुलुगिति द्वितीयायालुक् कालाध्वनोरितिद्वितीया । रात्रौ वस्तोः अहनि चाहमुपब्रुवे उपस्तौमि त्वं स्तूयमानोवरुणः भोजेषु दातृष्वस्मान् सदाभ्युच्चर सर्वदाभिमुख्यमेत्य दातृष्वेतेषां दानेष्वस्मान् पुरोभाविनः कुर्वित्यर्थः ॥ २१ ॥

अथ द्वाविंशी–

ऋज्रमुक्षण्यायनेरजतंहरयाणे ।
रथंयुक्तमसनामसुषामणि ॥ २२ ॥

ऋज्रम् । उक्षण्यायने । रजतम् । हरयाणे ।
रथम् । युक्तम् । असनाम । सुऽसामनि ॥ २२ ॥

सुषाम्णः पुत्रोवरुनोमराजा सयद्दानं प्रादाद्विश्वमनसे तदसौ विश्वमनाऋषिरनया-चष्टे उक्षण्यायने उक्षनामाकश्चिद्दरोः पूर्वजः तस्य गोत्रापत्ये । उक्षणशब्दात् ण्यः तदन्तात् फक् प्रत्ययः एतौ छान्दसौ वृद्ध्यभावोपि संज्ञापूर्वकोविधिरनित्यइतिनभवति । तस्य गोत्रापत्ये हरयाणे शत्रुजीवितैश्वर्यादि हरणशीले याने एतादृशे सुषामणि बहुवत्पितृशब्देन पुत्रोभिधीयते सुषाम्णः पुत्रे वरौ राजनि ददति सति किमभूत् ऋज्रं ऋजुगामिनं रजतं रजतमयं रजतसदृशं वा युक्तं अश्वाभ्यांयुक्तं रथमसनाम एतेषां मित्रादीनां प्रसादाद्वयं संभक्तवन्तोलब्धवन्तोभूम ॥ २२ ॥

अथ त्रयोविंशी—

तामेअश्व्यानांहरीणांनितोशना ।
उतोनुकृत्व्यानांनृवाहसा ॥ २३ ॥

ता । मे । अश्व्यानाम् । हरीणाम् । निऽतोशना ।
उतो इति । नु । कृत्व्यानाम् । नृऽवाहसा ॥ २३ ॥

ऋषिः प्रतिगृहीतावश्वावाह हरीणां हरितवर्णानामश्व्यानामश्वसंघानां मध्ये नितोशना नितोशनौ तोशतिर्हिंसाकर्मा शत्रूणामत्यन्तं बाधकतौ उतो अपिच कृत्व्यानां युद्धकर्मणि कुशलानांच कुशलमिति बाधकौ नृवाहसा नृवाहसौ आयुधनेतॄणां मनुष्याणां वोढारौ ता तादृशौ मे मह्यं नु क्षिप्रं सौषाम्णेन वरुणा दत्तौ भवेतम् ॥ २३ ॥

अथ चतुर्विंशी—

स्मदभीशूकशावन्ताविप्रानविष्ठयामती ।
महोवाजिनावर्वन्तासचासनम् ॥ २४ ॥ २५ ॥

स्मदभीशू इति स्मत्ऽअभीशू । कशाऽवन्ता । विप्रा । नविष्ठया ।
मती । महः । वाजिनौ । अर्वन्ता । सचा । असनम् ॥ २४ ॥ २५ ॥

ऋषिरिदानीं तावश्वावग्रहीवमित्याह स्मदभीशू स्मत् सुमत् उकारलोपश्छान्दसः शोभनरज्जुयुक्तौ यद्वा शोभनस्वशरीरकान्ती कशावन्ता कशावन्तौ कशायुक्तौ विप्रा विप्रौ मेधाविनामुचितौ मेधावी स्तोता यथा स्तुत्यं देवं स्तुतिभिः प्रीणयति तद्वत् सन्तोषकौ महोमहसः सौषाम्णस्य वरोः संबन्धिनौ वाजिनौ शीघ्रगमनवन्तौ अर्वन्ता अर्वन्तौ द्वावश्वौ सचासह युगपदेव नविष्ठया नवतरया मती मत्या स्तुत्या मित्रादीन् स्तुवन् अस्तनं विश्वमना अहं समभजं प्रत्यग्रहीषमित्यर्थः ॥ २४ ॥

॥ इति षष्टस्य द्वितीये पञ्चविंशोवर्गः ॥ २५ ॥

युवोरुष्विति पंचविंशत्यृचं षष्ठं सूक्तं । अत्रानुक्रमणिका—युवोःपञ्चाधिका व्यश्वोवांगिरसआश्विनं विंश्याद्यावायव्यास्तत्पूर्वाश्वतस्त्रोगायत्र्योन्त्येकविंश्यौच विंश्यनुष्टुबिति । आंगिरसो व्यश्व्यो वैयश्वो विश्वमनाख्यऋषिः षोडश्याद्याश्चतस्त्रोगायत्र्यः विंश्यनुष्टुप् एकविंशीपञ्चविंशी-च गायत्र्यौ शिष्टाः पूर्ववदुष्णिहः अश्विनौ देवता विंश्याद्याः पञ्चर्चोवायुदेवताकाः प्रातरनुवाकेआश्विनेक्रतावुष्णिहेछन्दस्याश्विनशस्त्रेचादितः पञ्चदशर्चः सूत्रितञ्च—युवोरुषूरथंहुवइति पञ्चदशेत्यौष्णिहमिति ।

तत्र प्रथमा—

युवोरुषूरथंहुवेसधस्तुत्यायसूरिषु ।
अतूर्तदक्षावृषणावृषण्वसू ॥ १ ॥

युवोः । ऊँ इति । सु । रथम् । हुवे । सधऽस्तुत्याय । सूरिषु ।
अतूर्तऽदक्षा । वृषणा । वृषण्ऽवसू इति वृषण्ऽवसू ॥ १ ॥

हे अतूर्तदक्षा तूर्वनतरणयोरित्यस्मान्निष्ठायां नसत्तेतिसूत्रेणनिपातितः परैरहिंसितबलौ वृषणा वृषणौ कामानां सेक्तारौ अतएव वृषण्वसू वर्षणशीलधनवन्तौ अश्विनौ युवोर्युवयोरथं सुहुवे सुष्ठु स्तोत्रादिभिराह्वयामि । किमर्थं सूरिषु मातृषु स्तोतृषु मध्ये सधस्तुत्याय स्तोतृभिर्भावेक्यप् सहभवन्तौ स्तोतुं तस्माद्युवयोः शीघ्रगत्यै युष्मद्गमनसाधनरथमेवाह्वयामि ॥ १॥

अथ द्वितीया—

युवंवरोसुषाम्णेमहेतनेनासत्या ।
अवोभिर्याथोवृषणावृषण्वसू ॥ २ ॥

युवम् । वरो इति । सुऽसाम्ने । महे । तने । नासत्या ।
अवःऽभिः । याथः । वृषणा । वृषण्वसू इति वृषण्ऽवसू ॥ २ ॥

ऋषिर्वरुराजानं संबोध्य आह हे नासत्या नासत्यौ न विद्यते असत्यमनयोरिति नासत्यौ वृषणा कामानां वर्षितारौ वृषण्वसू वर्षणशीलवसुमन्तौ अश्विनौ युवं युवां सुषाम्णे सुषामाख्यराज्ञे मम पित्रे अस्मै महे महते तने तनोतीविततं धनं धनाय । क्रियार्थोपपदस्येति चतुर्थी तस्मै धनं दातुं पुरा यथा आगच्छतम् तद्वत्मत्यमपि धनं दातुं अवोभिः पालनैः सह याथः युवामायातमिति । हे वरो वरुनामकराजन्नेवं ब्रूहीतिऋषिर्वदति ॥ २ ॥

अथ तृतीया—

तावामद्यहवामहेहव्येभिर्वाजिनीवसू ।
पूर्वीरिषइषयन्तावतिक्षपः ॥ ३ ॥

ता । वाम् । अद्य । हवामहे । हव्येभिः । वाजिनीवसू इति वाजिनीऽवसू । पूर्वीः । इषः । इषयन्ता । अति । क्षपः ॥ ३ ॥

हे वाजिनीवसू अन्नयुक्तधनवन्तावश्विनौ पूर्वीः बहूनि इषोऽन्नानि इषयन्तौ इष इच्छायां इच्छन्तौ ता तौ प्रसिद्धौ वां युवां अद्यास्मिन्यागदिने अतिक्षपः क्षपायाअतिक्रमे उषःकाले इत्यर्थः तस्मिन्नुषःकाले हव्येभिर्हविर्लक्षणैरन्नैः सह वयं हवामहे आह्वयामः आश्विनशस्त्रस्य तत्र शस्यमानत्वादुषःकालएवाह यागइत्यर्थः ॥ ३ ॥

अथ चतुर्थी—

आवांवाहिष्ठोअश्विनारथोयातुश्रुतोनरा ।
उपस्तोमान्तुरस्यदर्शथःश्रिये ॥ ४ ॥

आ । वाम् । वाहिष्ठः । अश्विना । रथः । यातु । श्रुतः । नरा । उप । स्तोमान् । तुरस्य । दर्शथः । श्रिये ॥ ४ ॥

हे नरा सर्वस्य नेतारौ अश्विना अश्विनौ वां युवयोः वांहिष्ठोवोढृतमः श्रुतोविश्रुतः सर्वत्रप्रसिद्धोरथः आयातु अस्मदीयं यज्ञं प्रत्यागच्छतु तेन रथेन युवामागत्य तुरस्य क्षिप्रं स्तोत्रं कुर्वतस्तस्य स्तोमान् त्रिवृत्पञ्चदशादि स्तोमान् श्रियै तस्यैश्वर्यप्रदानाय उपदर्शथः पश्यतिर्ज्ञानकर्मा जानीतं । दृशेर्लेटि व्यत्ययेनानादेशः ॥ ४ ॥

अथ पञ्चमी–

जुहुराणाचिदश्विनामन्येथांवृषण्वसू ।
युवंहिरुद्रापर्षथोअतिद्विषः ॥ ५ ॥ २६ ॥

जुहुराणा । चित् । अश्विना । आ । मन्येथाम् । वृषण्वसू इति वृषण्ऽवसू । युवम् । हि । रुद्रा । पर्षथः । अति । द्विषः ॥ ५॥२६ ॥

हे वृषण्वसू वर्षणशीलधनवन्तौ अश्विना अश्विनौ जुहुराणा चित् हृर्छाकौटिल्ये हुर्छः सनोलुक् छलोपश्चेत्यानच्प्रत्ययः कुटिलान्कर्मविघ्नकारिणः मायाविनः शत्रूना आभिमुख्येन मन्येथाम् जानीतम् । ततः हे रुद्राः संग्रामे रोदनशीलौ रुद्रन्तौवा अश्विनौ युवं हिरवधारणे युवामेव द्विषोद्वेषकारिणः तान् शत्रून् अतिपर्षथः अतीत्य संक्लेशयतं हतमित्यर्थः । पृषु हिंसासंक्लेशनयोरिति भौवादिकः ॥ ५ ॥

॥ इति पञ्चस्य द्वितीये षड्विंशोवर्गः ॥ २६ ॥

अथ षष्ठी–

दस्राहिविश्वमानुषङ्मक्षूभिःपरिदीयथः ।
धियंजिन्वामधुवर्णाशुभस्पती ॥ ६ ॥

दस्रा । हि । विश्वम् । आनुषक् । मक्षुऽभिः । परिऽदीयथः ।
धियम्ऽजिन्वा । मधुऽवर्णा । शुभः । पती इति । ६ ॥

दस्रा दस्रौ सर्वैर्दर्शनीयौ यद्वा दसुउपक्षये शत्रूणामुपक्षपयितारौ अश्विनौ कीदृशौ धियंजिन्वा धियं जिन्वौ जिविः प्रीणनार्थः कर्माणि प्रीणयन्तौ मधुवर्णा मधुवर्णौ सर्वेषां मादनशीलशरीरकान्ती ये युवयोः रूपं पश्यन्ति ते तत्रैव हृष्टाभवन्तीत्यर्थः तादृशौ शुभस्पती उदकस्यपालयिता-

री तादृशौ युवां मक्षुभिः शीघ्रगमनैरश्वैः आनुषक् अनुषक्तं यथाभवति तथा विश्वं ऋत्विग्भि-र्हविर्भिश्च व्याप्तं हिरवधारणे अस्मदीयं यज्ञमेव प्रति परिदीयथः दीप्यतिर्गतिकर्मा परितआग-च्छतम् ॥ ६ ॥

अथसप्तमी—

उपनोयातमश्विनारायाविश्वपुषासह ।
मघवानासुवीरावनपच्युता ॥ ७ ॥

उप । नः । यातम् । अश्विना । राया । विश्वऽपुषा ।
सह । मघऽवाना । सुऽवीरौ । अनपऽच्युता ॥ ७ ॥

हे अश्विना अश्विनौ विश्वपुषा विश्वस्य सर्वस्य पोषकेण राया धनेनसह नोस्मदीयं यज्ञमुपयातं उपागच्छतम् यज्ञमागत्य धनमस्मभ्यंप्रयच्छतमितिभावः । किमनयोर्धनमस्तीत्य-तआह—मघवाना मघवानौ मंहनीयधनवन्तौ सुवीरौ शोभनसामर्थ्योपेतौ । यद्वा वीराः समर्थाः शत्रवः तद्वन्तौ । तथापि अनपच्युता तैरपच्यावनीयौ न भवतः । तौ यज्ञं प्रत्यागच्छतम् ॥७॥

अथाष्टमी—

आमेअस्यप्रतीव्यमिन्द्रनासत्यागतम् ।
देवादेवेभिरद्यसचनस्तमा ॥ ८ ॥

आ । मे । अस्य । प्रतीव्यम् । इन्द्रनासत्या । गतम् ।
देवा । देवेभिः । अद्य । सचनःऽतमा ॥ ८ ॥

हे इन्द्रनासत्या इन्द्राश्विनौ देवा देवौ सचनस्तमा षचसमवाये कृत्यल्युटइति कर्मणि ल्युट् अतिशयेन सर्वैः समवेतव्यौ सेव्यमानौ युवां प्रतीव्यं वीगत्यादिषु अधिकरणे औणा-दिकःक्विप् प्रतिशब्दस्य वीप्सार्थोस्ति पुनःपुनर्वियन्ति भक्षयन्ति हवींषि देवाअत्रेति प्रतीव्यो-यज्ञः तं अस्य पुरोवर्तिनं मे ममसंबन्धिनं यज्ञं अद्यास्मिन्दिने देवेभिर्देवैः सार्धमागतमागच्छत-म् । यद्वा मे ममारभ्यक्रियमाणस्य स्तोत्रस्य प्रतीव्यं प्रतिगतं यथाभवति तथा आभिमुख्येना-गतम् ॥ ८ ॥

अथ नवमी–

वृयंहिवांहवांमहउक्षण्यन्तोंव्यश्ववत् ।
सुमतिभिरुपंविप्राविहागंतम् ॥ ९ ॥

वृयम् । हि । वाम् । हवांमहे । उक्षण्यन्तः । व्यश्वऽवत् ।
सुमतिऽभिः । उप । विप्रौ । इह । आ । गतम् ॥ ९ ॥

उक्षण्यन्तः धनादिसेकारावात्मनइच्छन्तोवयं वांहि धनादीनां मचारौ युवामेव हवामहे सहायार्थमाह्वयामः । तत्रदृष्टान्तः–व्यश्ववत् यथास्माकं पिता युवामेव स्तुत्वा धनमलभत तद्वत्। हे विप्रा मेधाविनौ अश्विनौ सुमतिभिः अस्माभिः क्रियमाणैः कल्याणैः स्तोत्रैः सह । यद्वा सुमतिभिः शोभनाभिरनुग्रहबुद्धिभिः सह इहास्मिन्यागदिने उपागतम् उपागच्छतम् ॥ ९ ॥

अथ दशमी–

अश्विनास्वृंषेस्तुहिकुविन्तेश्रवंतोहवंम् ।
नेदीयसःकूळयातःपणीँरुत ॥ १० ॥ २७ ॥

अश्विना । सु । ऋषे । स्तुहि । कुवित् । ते । श्रवंतः । हवंम् ।
नेदीयसः । कूळयातः । पणीन् । उत ॥ १० ॥ २७ ॥

हे ऋषे विश्वमनः अश्विना अश्विनौ देवौ सुष्टुहि शोभनं स्तुहि ततस्तावश्विनौ ते स्तोतुस्तव हवमाह्वानं कुवित् कुविदिति बहुनाम बहुवारं श्रवतः शृणुतम् श्रुश्रवणे लेटयडागमः । एवं त्वयास्तुतावश्विनौ नेदीयसः अन्तिकतमान् शत्रून्कूळयातः हिंस्ताम् । उतापिच पणीनेतन्नामकान् अंगिरोगवामपनेतॄनसुरानपिहिंस्तां । कुडिदाहे ण्यन्तस्य लेटयडागमः ॥ १० ॥

॥ इति षष्ठस्य द्वितीये सप्तविंशोवर्गः ॥ २७ ॥

अथैकादशी–

वैयश्वस्यंश्रुतंनरोतोमेंअस्यवेंदथः ।
सजोषंसावरुंणोमित्रोअंर्यमा ॥ ११ ॥

वैयऽश्वस्यं । श्रुतम् । नरा । उतो इतिं । मे । अस्य । वेदथः ।
सऽजोषंसा । वरुंणः । मित्रः । अर्यमा ॥ ११ ॥

हे नरा नेतारावश्विनौ वैयश्वस्य व्यश्वपुत्रस्य विश्वमनसोममाह्वानंश्रुतं शृणुतम् । उतो अपिच मे मदीयमस्य तदाह्वानं वेदथः आत्मीयतया जानीथः । अथ वरुणो मित्रः मित्रावरुणौच सजोषसा संगतौ सन्तौ अर्यमा एतन्नामकोदेवश्च मदीयमाह्वानं श्रुत्वा मह्यं धनादिकं प्रयच्छन्तु ॥ ११ ॥

अथ द्वादशी—

युवादत्तस्यधिष्ण्यायुवानीतस्यसूरिभिः ।
अहरहर्वृषणामह्यंशिक्षतम् ॥ १२ ॥

युवाऽदत्तस्य । धिष्ण्या । युवाऽनीतस्य । सूरिऽभिः ।
अहःऽअहः । वृषणा । मह्यम् । शिक्षतम् ॥ १२ ॥

हे धिष्ण्या धिष्ण्यौ धिषणार्हौ स्तुत्यौ वृषणा वृषणौ कामानां सेक्तारौ अश्विनौ सूरिभिः सुपांसुपोभवन्तीति चतुर्थ्यास्तृतीया सूरिभ्यः स्तोतृभ्यो युवादत्तस्य युवाभ्यां यत् स्तोतृभ्यो दीयते तत् । तथा युवानीतस्य युवाभ्यां यत् स्तोतृभ्योनीयते तच्च धनादिकं अहरहः अहन्यहनि मह्यं विश्वमनसे स्तोत्रं कुर्वाणाय युवां शिक्षतं प्रयच्छतम् ॥ १२ ॥

अथ त्रयोदशी—

योवांयज्ञेभिरावृतोधिवस्त्रावधूरिव ।
सपर्यन्ताशुभेचक्रातेअश्विना ॥ १३ ॥

यः । वाम् । यज्ञेभिः । आऽवृतः । अधिऽवस्त्रा । वधूःऽइव ।
सपर्यन्ता । शुभे । चक्राते इति । अश्विना ॥ १३ ॥

अथ पूर्वार्धर्चः परोक्षकृतः योमनुष्यः वां युवयोर्यज्ञेभिर्यजनैः पूजनैः यद्वा युष्मद्विषयैर्यागैः आवृतः परिवृतोभवति । तत्रदृष्टान्तः—अधिवस्त्रा उपरिनिहितवस्त्रावधूः अन्येनवस्त्रेण यथा-

छादिता भवति तथा वृतोयदाभवति तदा सपर्यन्ता अभीष्टप्रदानेन तं परिचरन्तो अश्विना अश्विनौ भवन्तौ तं मनुष्यं शुभे चक्राते मंगले धने कृतवन्तौ तं धनादियुक्तमकार्ष्टामित्यर्थः । योपुवाभ्यां हवींषि प्रयच्छति तं धनादियुक्तं कुरुतमित्यर्थः ॥ १३ ॥

अथ चतुर्दशी—

योवा॑मुरु॒व्यच॑स्तमं॒चिके॑तति॒नृपाय्य॑म् ।
व॒र्तिर॑श्विना॒परि॑यातमस्म॒यू ॥ १४ ॥

यः । वा॒म् । उ॒रु॒व्यच॑ःऽतमम् । चिके॑तति । नृ॒ऽपाय्य॑म् ।
व॒र्तिः । अ॒श्वि॒ना॒ । परि॑ । या॒त॒म् । अ॒स्म॒यू इत्य॑स्म॒ऽयू ॥ १४ ॥

हे अश्विनौ उरुव्यचस्तमं अतिशयेन प्रद्देपुभूतं व्याप्तं नृपाय्यं नेतृभ्यां युवाभ्यां पातव्यं सोमं योमनुष्यः वां युवाभ्यां तं सोमं दातुं चिकेतति भृशं जानाति तस्य वर्तिः वर्ततेत्रेति वर्तिर्गृहं अस्मयू अस्मान् पूजार्थं बहुवचनं विश्वमनसं मां कामयमानौ युवां परियातं सोमपानार्थं तस्य गृहं प्रत्यायातं । चिकेतति कितज्ञाने इत्यस्य यङ्लुगन्तस्य लेट्यडागमः ॥ १४ ॥

अथ पञ्चदशी—

अ॒स्मभ्यं॒सुवृ॑षण्वसूया॒तंव॒र्तिर्नृ॒पाय्य॑म् ।
वि॒षु॒द्रुहे॑वय॒ज्ञमू॑हथु॒र्गिरा ॥ १५ ॥ २८ ॥

अ॒स्मभ्य॑म् । सु । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू । या॒तम् । व॒र्तिः ।
नृ॒ऽपाय्य॑म् । वि॒षु॒द्रुहा॑ऽइव । य॒ज्ञम् । ऊ॒ह॒थुः॒ । गि॒रा ॥ १५ ॥ २८ ॥

हे वृषण्वसू वर्षणशीलधनवन्तौ अश्विनौ अस्मभ्यमस्मदर्थं नृपाय्यं नेतृभ्यां पातव्यं सोमंप्रति वर्तिरस्मदीयं गृहंप्रति सुयातं युवां सुष्ठु आयातम् । गिरा स्तुतिलक्षणया वाचा युवां यज्ञमूहथुः मनुष्येषु यज्ञसमाप्तिं प्रापयथः । तत्रदृष्टान्तः—विषुद्रुहेव द्रुहजिघांसायां विश्वतः हिनस्तिशत्रूनिति विषुद्रुहः शरः तेन यथा व्याधोमृगमभिलषितं देशं प्रापयति तद्वत् स्तुत्या यज्ञमवैकल्येन समाप्तिं प्रापयथइत्यर्थः ॥ १५ ॥

॥ इति पञ्चस्य द्वितीयेष्टाविंशोवर्गः ॥ २८ ॥

प्रातरनुवाके आश्विनेक्रतौ गायत्रेछन्दसि वाहिष्ठोवांहवानामिति चतस्रः। सूत्रितञ्च—वाहिष्ठोवांहवानामिति चतस्रउदीराथामामेहवमिति गायत्रमिति ।

तत्र प्रथमा सूक्ते षोडशी—

वाहिष्ठोवांहवानांस्तोमोदूतोहुवन्नरा ।
युवाभ्यांभूत्वश्विना ॥ १६ ॥

वाहिष्ठः । वाम् । हवानाम् । स्तोमः । दूतः । हुवत् । नरा ।
युवाभ्याम् । भूतु । अश्विना ॥ १६ ॥

हे नरा नरौ सर्वस्य नेतारौ अश्विनौ हवानां स्तोतृणां स्तोत्राणां मध्ये स्तोमोवाहिष्ठः युवामतिशयेन व्याप्नुवन् मदीयः स्तोमः दूतः दूतभूतः सन् हुवत् आह्वयतु सोयं मदीयः स्तोमः युवाभ्यां प्रियकरोभूतु भवतु ॥ १६ ॥

अथ सप्तदशी—

यददोदिवोअर्णवइषोवामदथोगृहे । श्रुतमिन्मेअमर्त्या ॥१७॥

यत् । अदः । दिवः । अर्णवे । इषः । वा । मदथः ।
गृहे । श्रुतम् । इत् । मे । अमर्त्या ॥ १७ ॥

हे अश्विनौ दिवोद्युलोकस्य अदः सुपांसुलुगिति सप्तम्याः सुः अमुष्मिन्नर्णवे अपां स्थाने यदि मदथः मादयथः। वा अपिच इषः अन्नमिच्छतो यजमानस्य गृहे यदि मादयथः एवं चेत् हे अमर्त्या मरणधर्मरहितौ अमनुष्यौ वा अश्विनौ मे मदीयं स्तोत्रं श्रुतमित् युवां शृणुतमेव ममैव स्तोत्रं श्रुत्वा युवां मादयतमित्यर्थः। यद्वा अदः स्तोत्रमिति संबध्यते ॥ १७ ॥

अथाष्टादशी—

उतस्याश्वेतयावरीवाहिष्ठावांनदीनाम् ।
सिन्धुर्हिरण्यवर्तनिः ॥ १८ ॥

उत । स्या । श्वेतऽयावरी । वाहिष्ठा । वाम् ।
नदीनाम् । सिन्धुः । हिरण्यऽवर्तनिः ॥ १८ ॥

विश्वमनाऋषिः श्वेतयावरीनाम्योनद्यास्तीरे अश्विनावस्तौत् अनया नद्यपि स्तुतवतीत्याह-उतापिच श्वेतयावरी श्वेतजला यातीति श्वेतयावरी कीदृशी सिन्धुः स्यन्दमाना हिरण्यवर्तनिः हिरण्मयस्वीयमार्गा हिरण्मयोभयकूला स्या एषा श्वेतयावरी नामिका नदीनामन्यासां नदीनां मध्ये वां युवां वाहिष्ठा स्तुत्या अतिशयेनागन्त्रीभवति एषापि युवां स्तौतीत्यर्थः। यद्वा एषानदी युवयोरथस्य वाहिष्ठा वोढृतमा सती प्रियकरीभवति यस्मादहमस्यास्तीरेयुवामस्तुवमिति ॥ १८ ॥

अथैकोनविंशी–

स्मदेतयासुकीर्त्याश्विनाश्वेतयाधिया ।
वहेथेशुभ्रयावाना ॥ १९ ॥

स्मत् । एतया । सुऽकीर्त्या । अश्विना । श्वेतया ।
धिया । वहेथे इति । शुभ्रऽयावाना ॥ १९ ॥

हे शुभ्रयावाना शोभनशीलगमनवन्तौ हे अश्विना अश्विनौ सुकीर्त्या शोभनस्तुत्या श्वेतया श्वेतजलया धिया धारयित्र्या हिरण्मयकूलवत्या उभयकूलस्थितानां प्राणिनां धनदानेन पोषयित्र्या एतया नद्या स्मत् सुमत् शोभनं वहेथे युवां स्तुतिं मामुयः एषा युवामस्तौदित्यर्थः ॥ १९ ॥

अथ विंशी–

युक्ष्वाहित्वंरथासहायुवस्वपोष्यावसो ।
आन्नोवायोमधुपिबास्माकंसवनागहि ॥ २० ॥ २१ ॥

युक्ष्व । हि । त्वम् । रथऽसहा । युवस्व । पोष्या ।
वसो इति । आत् । नः । वायो इति । मधु ।
पिब । अस्माकम् । सवना । आ । गहि ॥ २० ॥ २१ ॥

एतदाद्यावायव्यः हे वायो रथसहा रथसहौ रथवहनसमर्थावश्वौ हिरवधारणे त्वमेव युक्ष्व संयोजय। हे वसो वासयितः शत्रूणां पोष्या पोष्यौ कंठेषु करतलास्फालनैराश्वास्य पोषणीयौ तावश्वौ युवस्व संग्रामेषु शत्रुवधार्थं मिश्रय। यद्वा अस्मद्यज्ञेषु संमिश्रय ताभ्यां युक्तः सन् यज्ञं प्रत्यागच्छेत्यर्थः। हे वायो आदनन्तरं नोस्मदीयं मधु मदकरं सोमं त्वं पिब अतएव अस्माकं यज्ञेषु सवना त्रिषु सवनेषु आगहि सोमपानार्थमागच्छ ॥ २० ॥

॥ इति पञ्चस्य द्वितीये एकोनत्रिंशोवर्गः ॥ २९ ॥

वायव्येपशौ वपायास्तववायोइत्येषायानुवाक्या सूत्रितश्च—प्रवायुमच्छाबृहतीमनीषा तववायवृतस्पतइति।

अथैकविंशी—

तववायवृतस्पतेत्वष्टुर्जामातरद्भुत।
अवांस्यावृंणीमहे ॥ २१ ॥

तवं। वायो इति। ऋतःपते। त्वष्टुः। जामातः।
अद्भुत। अवांसि। आ। वृणीमहे ॥ २१ ॥

हे ऋतःपते ऋतपते यज्ञानांपते सर्वमातिपदिकेभ्योलालसायां सुगिति सुगागमः त्वष्टुर्जामातः ब्रह्मणोजामातः। एषा कथा इतिहासादिभिरवगन्तव्या। तादृश अद्भुत महन् विचित्रकर्मन् हे वायो तव त्वदीयानि अवांसि पालनानि आवृणीमहे वयमस्मिन्पशुयागे संभजामहे ॥२१॥

अथ द्वाविंशी—

त्वष्टुर्जामातरंवयमीशांनंरायईमहे।
सुतावंन्तोवायुंद्युम्नाजनांसः ॥ २२ ॥

त्वष्टुः। जामातरम्। वयम्। ईशानम्। रायः। ईमहे।
सुतऽवन्तः। वायुम्। द्युम्ना। जनांसः ॥ २२ ॥

इमे जनासोजनावयं त्वष्टुर्ब्रह्मणोजामातरं ईशानं सर्वस्येश्वरमेतादृशं वायुं सुतवंतोभिषुतसोमाः रायः धनं ईमहे याचामहे तेनदत्तेन वयं द्युम्ना धनवन्तः स्याम इतिशेषः ॥ २२ ॥

वायव्यपशौ वायोयाहिशिवादिवइत्यादिके द्वे ऋचौ द्वितीयातृतीये सूत्रितश्च—वायोयाहिशिवादिवइतिद्वेइति ।

सैषा सूक्ते त्रयोविंशी—

वायोयाहिशिवादिवोवहस्वासुस्वश्व्यम् ।
वहस्वमहःपृथुपक्षसारथे ॥ २३ ॥

वायो इति । याहि । शिव । आ । दिवः । वहस्व ।
सु । सुऽअश्व्यम् । वहस्व । महः । पृथुऽपक्षसा । रथे ॥ २३ ॥

हे वायो दिवोद्युलोकस्य शिव सुपां सुलुगिति द्वितीयायालुक् शिवं कल्याणमायाहि आमापय सर्वज्योतिषां त्वदाधारत्वात् तेषामाधारोभूत्वा द्युलोके तानि स्थापयेति प्रार्थयते । ततस्त्वं स्वश्व्यं अश्वानां संघोऽश्व्यः शोभनाश्वसंघं रथं सु सुष्ठु वहस्व सर्वतोदिक्षु प्रापय । इदानीं तेष्वपि समर्थावश्वावावह महोमहान् त्वं पृथुपक्षसा पृथुपार्श्वद्वयपुक्तावश्वौ रथे स्वकीये वहस्व शत्रुहननार्थं संयोजय ॥ २३ ॥

वायव्ये पशौ पुरोडाशहविषोस्त्वांहिसुप्सरस्तमं इति द्वे अनुवाक्ये सूत्रितश्च—त्वांहिसुप्सरस्तममितिद्वे कुविदंगनमसायेवृधासइति ।

तयोः प्रथमा सूक्ते चतुर्विंशी—

त्वांहिसुप्सरस्तमंनृषदनेषुहूमहे ।
ग्रावाणंनाश्वपृष्ठंमंहना ॥ २४ ॥

त्वाम् । हि । सुप्सरःऽतमम् । नृऽसदनेषु । हूमहे ।
ग्रावाणम् । न । अश्वऽपृष्ठम् । मंहना ॥ २४ ॥

हे वायो सुप्सरस्तमं सुप्सइति रूपनाम रोमत्वर्थीयः अतिशयेन शोभनरूपवन्तं मंहना स्वकीयेन महत्त्वेन अश्वपृष्ठं सर्वतोव्याप्तपृष्ठं पृष्ठशब्दः सर्वांगं लक्षयति व्याप्तसर्वांगमित्यर्थः त्वां हिरवधारणे त्वामेव नृषदनेषु नृसदनेषु नरः अध्वरस्यनेतारः ऋत्विजोऽत्रसीदन्तीति नृषदनायज्ञाः तेषु हूमहे वयमाह्वयामः । कथमिव ग्रावाणं न यथा सोमाभिषवार्थं ग्रावाणं स्तुतिभिराह्वयन्ति तद्वत्त्वां स्तुतिभिराह्वयामः ॥ २४ ॥

शुनासीरीये सत्वंनोदेवेत्येषा वायोरनुवाक्या सूत्रितञ्च–सत्वंनोदेवमनसेशानायमहुविंयस्तआनडिति ।

सैषा सूक्ते पञ्चविंशी–

सत्वंनोदेवमनसावायोमन्दानोअग्रियः ।
कृधिवाजाँअपोधियः ॥ २५ ॥ ३० ॥

सः । त्वम् । नः । देव । मनसा । वायो इति । मन्दानः ।
अग्रियः । कृधि । वाजान् । अपः । धियः ॥ २५ ॥ ३० ॥

हे देव द्योतमान यद्वा स्तोतव्यवायो अग्रियः देवानां मध्ये मुख्यः अग्रतोगन्तासि सताद्दशस्त्वं मनसा मन्दानोमन्दमानः स्वयमेव मोदमानःसन् नोस्माकं वाजान् अन्नानि अपोमेघभेदनेनोदकानिच उभयस्मिन् त्वया प्रवृत्तेसति धियः अग्निहोत्रादिकर्माणिच कृधि कुरु कारयेत्यर्थः ॥ २५ ॥

॥ इति षष्ठस्य द्वितीये त्रिंशोवर्गः ॥ ३० ॥

अग्निरुक्थइति द्वाविंशत्यृचं सप्तमं सूक्तम् । अत्रानुक्रमणिका–अग्निरुक्थेद्व्यधिका मनुर्वैवस्वतो वैश्वदेवंह प्रगाथमिति । विवस्वतःपुत्रोमनुर्ऋषिः प्रथमातृतीयाद्ययुजोबृहत्यः द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः। इदमादीनां चतुर्णां सूक्तानां विश्वेदेवादेवता सूक्तविनियोगोलैङ्गिकः ।

तस्मिन्सूक्ते प्रथमा–

अग्निरुक्थेपुरोहितोग्रावाणोबर्हिरध्वरे ।
ऋचायामिमरुतोब्रह्मणस्पतिंदेवाँअवोवरेण्यम् ॥ १ ॥

अग्निः । उक्थे । पुरःऽहितः । ग्रावाणः । बर्हिः । अध्वरे । ऋचा ।
यामि । मरुतः । ब्रह्मणः । पतिम् । देवान् । अवः । वरेण्यम् ॥ १ ॥

मनुः प्रार्थयते उक्थे स्तोत्रशस्त्रात्मके अध्वरे हिंसारहितेस्मिन् यज्ञे अग्निः पुरोहितः यज्ञार्थं पुरतउत्तरवेद्यां ऋत्विग्भिः निहितोभूत् तथा ग्रावाणश्च सोमाभिषवार्थं पुरतोनिहिताः बर्हिश्च पुरतोनिहितमासादितं एवं सामग्र्यां सत्यां मरुतःएकोनपञ्चाशन्मरुद्गणान् ब्रह्मणस्पतिः स्तो-

तस्य पालयितारमेतन्नामकं देवं देवानिन्द्रादींश्च एतान् सर्वान् देवान् वरेण्यं वरणीयं भजनीयं अवोरक्षणं ऋचासूक्तरूपया स्तुत्या यामि मनुरहं याचामि । याचतेर्लटिरूपम् वर्णलोपश्छान्दसः ॥ १ ॥

अथ द्वितीया—

आपशुंगासिपृथिवींवनस्पतीनुपासानक्तमोषधीः ।
विश्वेचनोवसवोविश्ववेदसोधीनांभूतप्राविनारः ॥ २ ॥

आ । पशुम् । गासि । पृथिवीम् । वनस्पतीन् ।
उपसा । नक्तम् । ओषधीः । विश्वे । च । नः । वसवः ।
विश्वऽवेदसः । धीनाम् । भूत । प्रऽअवितारः ॥ २ ॥

पूर्वार्धेचैनिः संबोध्यते पश्वादिशब्दसद्भावात् । हे अग्ने नोस्मदीये यज्ञे पशुमग्नीषोमीयं पशुंप्रति आगासि आगच्छसि । गाङ् गतौ व्यत्ययेनपरस्मैपदम् । तथा पृथिवीमिदं देवसदनंप्रति । किञ्च वनस्पतीन् मथनसाधनानरणिरूपान्वनस्पतीन्प्रति । तथा उषसा होतव्यत्वेनोषःकालं तथा नक्तं यष्टव्यतया रात्रिंच प्रति । किञ्च ओषधीः उषदाहे अत्र मादनकर्मा ओषन्ति माद्यन्ति अनेनेति ओषः सोमः । सधीयते निधीयते येष्विति ओषधयोग्रावाणः तान् प्रति आगच्छसि । यद्वा ओषध्यः फलपाकान्तालताः ताःप्रति आयाहि । अथवा हे स्तोतः पश्वादीनागासि समंतास्तुहि । कैगै शब्देइतिधातुः । ततः हे वसवः वासयितारोविश्ववेदसः सर्वधनाः सर्वज्ञानावा हे विश्वे सर्वेपि देवानोस्मदीयानां कर्मणां प्राविताराभूत अनेनाग्निनासह यूयं प्रकर्षेण रक्षकाभवत ॥ २ ॥

अथ तृतीया—

प्रसूनएत्वध्वरो३ग्नादेवेपुपूर्व्यः ।
आदित्येपुप्रवरुणेधृतव्रतेमरुत्सुविश्वभानुपु ॥ ३ ॥

प्र । सु । नः । एतु । अध्वरः । अग्ना । देवेषु । पूर्व्यः । आदित्येषु ।
प्र । वरुणे । धृतऽव्रते । मरुत्ऽसु । विश्वऽभानुषु ॥ ३ ॥

पूर्व्यः पुरातनः पूर्व्यान् पुरातनानिन्द्रादीन्देवान्प्रति क्रियमाणत्वाद्यज्ञोऽपि पूर्व्यमित्युच्यते तादृशोमुख्योनोस्मदीयोध्वरोयज्ञः अग्ना सुपांसुलुगिति सप्तम्याडादेशः अग्नौ अग्निर्देवानां मुख्यत्वात् प्रथममभिहितः तस्मिन्नग्नौ सर्वेष्वन्येषु देवेषु च सु सुष्ठु प्रैतु प्रकर्षेण गच्छतु। देवान् विशिनष्टि आदित्येषु अदितेः पुत्रेषु इन्द्रादिषु धृतव्रते धृतकर्मणि वरुणेच विश्वभानुषु सर्वतोव्याप्ततेजस्केषु मरुत्सुच प्रैतु ॥ ३ ॥

अथ चतुर्थी—

विश्वे॒हिष्मा॒मन॑वेवि॒श्ववे॑दसो॒भुव॑न्वृ॒धेरि॒शाद॑सः ।
अरि॑ष्टेभिःपा॒युभि॑र्विश्ववेदसो॒यन्ता॑नोवृ॒कंछ॒र्दिः ॥ ४ ॥

विश्वे॑ । हि । स्म । मन॑वे । वि॒श्वऽवे॑दसः । भुव॑न् । वृ॒धे । रि॒शाद॑सः ।
अरि॑ष्टेभिः । पा॒युऽभिः॑ । वि॒श्व॒ऽवे॒द॒सः॒ । यन्त॑ । नः॒ । अ॒वृ॒कम् । छ॒र्दिः ॥४॥

विश्ववेदसः सर्वतोव्याप्तधना बहुधनाइत्यर्थः तादृशा रिशादसः रिशतां हिंसतां शत्रूणामसितारः उपक्षपयितारोवा विश्वेहिष्म सर्वेखलु देवा मनवे षष्ठ्यर्थेचतुर्थी मनोः वृधे वर्धनाय भुवन् भवन्तु स्तोत्रे मनुष्याय धनं दत्वा तं वर्धयन्त्वित्याशास्ते। ततः हे विश्ववेदसः सर्वधनाः सर्वज्ञावादेवाः अरिष्टेभिः परैरहिंसितैः पायुभिः पालनैः सह अवृक वृकःस्तेनस्तद्रहितं बाधारहितमित्यर्थः। तादृशं छर्दिर्गृहं नोस्मभ्यं यन्त प्रयच्छत शत्रून्हत्वा गृहेष्वस्माभिः कर्माणि कारयतेत्यर्थः। यन्तेति यमेर्लोटि छान्दसोविकरणस्यलुक् तस्य तबादेशः तेनानुनासिकलोपाभावः ॥ ४ ॥

अथ पञ्चमी—

आनो॑अ॒द्यसम॑नसो॒गन्ता॒विश्वे॑स॒जोष॑सः ।
ऋ॒चागि॒राम॑रुतो॒देव्यदि॑ते॒सद॑ने॒पस्त्ये॑महि ॥ ५ ॥ ३१ ॥

आ । नः॒ । अ॒द्य । सऽम॑नसः । गन्त॑ । विश्वे॑ । सऽजोष॑सः ।
ऋ॒चा । गि॒रा । म॑रुतः । देवि॑ । अदि॑ते । सद॑ने । पस्त्ये॑ । म॒हि ॥ ५॥३१॥

समनसः सर्वेषुस्तोत्रेषु समानमनस्काः विश्वे सर्वेदेवाः यूयं सजोषसः परस्परं संगताः सन्तः गिरा शुश्रूषुतया मातृव्ययेत्यर्थः तया ऋचासह अद्यास्मिन्यागदिने नोयष्टॄनस्मानागन्त

आगच्छत। अनन्तरं हे मरुतः देवि द्योतमाने महि महति देवानां मातृत्वात् महत्वयुक्ते हे अदिते अदीने एतन्नामिके देवि सदने स्थाने पस्त्येस्मदीयेगृहे स्तोतव्यतया उपविशत। मरुतइत्यादेर्वाक्यभेदादनिघातः उत्तरस्य पूर्वस्यामन्त्रितस्याविद्यमानवत्त्वेन वाक्यादित्वादनिघातः ॥५॥

॥ इति षष्ठस्य द्वितीये एकत्रिंशोवर्गः ॥ ३१ ॥

अथ षष्ठी—

अभिप्रियामरुतोयावोअश्व्याहव्यामित्रप्रयाथन।
आबर्हिरिन्द्रोवरुणस्तुरानरआदित्यासःसदन्तुनः ॥ ६ ॥

अभि। प्रिया। मरुतः। या। वः। अश्व्या। हव्या। मित्र।
प्रऽयाथन। आ। बर्हिः। इन्द्रः। वरुणः। तुराः। नरः। आदित्यासः।
सदन्तु। नः ॥ ६ ॥

हे मरुतः प्रिया प्रियाणि या यानि वोयुष्माकमश्व्या अश्व्यानि प्रियान् अश्वसंघान् अभिप्रयाथन अस्मद्यज्ञंप्रति प्रापयत यूयमश्वैर्युक्ताः सन्तआगच्छतेत्यर्थः। अथ हे मित्र मित्रशब्देनान्येवरुणादयोप्युच्यन्ते हे मित्रादयोदेवाः हव्या हव्यानि हवनयोग्यानि हवींषि स्वीकर्तुमागच्छतेत्यर्थः। स्तूयमाना आगच्छत। प्रपूर्वाद्यातेर्लोटि तप्तनप्तनथनाश्चेतिथनादेशः। आगत्यच इन्द्रोवरुणः इन्द्रावरुणौ तुराः संग्रामे शत्रुवधार्थं त्वरमाणाः नरोनेतारआदित्यासः अदितेः पुत्रामरुद्रादयोदेवाश्च नोस्मदीये यज्ञे बर्हिः बर्हिषि आसादिते आसदन्तु आसीदन्तु प्रविशन्तु। सदेः सीदादेशाभावश्छान्दसः ॥ ६ ॥

अथ सप्तमी—

वयंवोवृक्तबर्हिषोहितप्रयसआनुषक्।
सुतसोमासोवरुणहवामहेमनुष्वदिद्धाग्नयः ॥ ७ ॥

वयम्। वः। वृक्तऽबर्हिषः। हितऽप्रयसः। आनुषक्।
सुतऽसोमासः। वरुण। हवामहे। मनुष्वत्। इद्धऽअग्नयः ॥ ७ ॥

हे वरुण वरुणादयोदेवाः वृक्तबर्हिषक्रत्विजोवयं आनुषक् स्रुगादिषु अनुषक्तं यथा भवति तथा हितप्रयसः प्रीणातीति प्रयोन्नं तेषु निहितहविष्काःसन्तः वोयुष्मान् हवामहे एतानि हवींष्यादातुमाह्वयामः। कीदृशाः सुतसोमासः अभिषुतसोमाः इद्धाग्नयः आहुतिभिः समिद्धाग्नयो वयमाह्वयामः। तत्रदृष्टान्तः—मनुष्वत् मनुर्यथा यज्ञे युष्मानाजुहाव तद्वत्॥ ७॥

अथाष्टमी–

आप्रयातमरुतोविष्णोअश्विनापूषन्माकीनयाधिया।
इन्द्रआयातुप्रथमःसनिष्युभिर्वृषायोवृत्रहागृणे॥ ८॥

आ। प्र। यात। मरुतः। विष्णो इति। अश्विना। पूषन्।
माकीनया। धिया। इन्द्रः। आ। यातु। प्रथमः।
सनिष्युऽभिः। वृषा। यः। वृत्रऽहा। गृणे॥ ८॥

हे विश्वेदेवाः प्रयात प्रकर्षेणास्मदीयकर्मण्यागच्छत। हे मरुतः हे विष्णो स्वबलेन सर्वंवोप्यात एतन्नामकदेव हे अश्विना अश्विनौ पूषन् स्तोतॄन् धनादिना पोषयतीतिपूषा एतन्नामकदेव मरुदादयो हे देवाः। माकीनया अस्मच्छब्दात् युष्मदस्मदोरिति खञ्शैषिकः एकवचने तवकममकाविति ममकादेशः वर्णलोपश्छान्दसः। मया क्रियमाणया धिया स्तुत्या सहास्मद्यज्ञं प्रत्यागच्छत। मरुदादिरामन्त्रितस्य वाक्यभेदादनिघातः। किञ्च प्रथमोदेवानां मुख्यः सइन्द्रश्चायातु वृषा कामानां सेक्ता यइन्द्रः सनिष्युभिः सनिः संभजनं तदात्मनइच्छद्भिः स्तोतृभिः वृत्रहा अपामावरकस्य वृत्रासुरस्य हन्तेति गृणे गृणते स्तूयते। गृशब्देइत्यस्य कर्मणि लिटि छांदसोविकरणः॥ ८॥

अथ नवमी–

विनोदेवासोअद्रुहोच्छिद्रंशर्मयच्छत।
नयद्दूराद्वसवोनूचिदन्तितोवरूथमादधर्षति॥ ९॥

वि। नः। देवासः। अद्रुहः। अच्छिद्रम्। शर्म। यच्छत। न। यत्।
दूरात्। वसवः। नु। चित्। अन्तितः। वरूथम्। आऽदधर्षति॥९॥

हे अद्रुहः स्तोतॄणामद्रोग्धारः यद्वा द्रुहेरौणादिकः कर्मणिक्विप् शत्रुभिरहिंस्याः हे देवासो मरुदादयोदेवाः अच्छिद्रं बाधकरहितं साधीयोवा शर्म शृणाति दुःखादिकमिति शर्मगृहं तद्व नोस्मभ्यं वियच्छत । हे वसवः शत्रूणां वासयितारोमरुदादयः दूराद्दूरदेशात् अन्तितः अन्तिकदेशाद्वा कश्चिदागत्य नूचित्कदाचिदपि वरूथं वरणीयं संभजनीयं यद्गृहं नादधर्षति आधर्षणं हिंसनं नकरोति तद्गृहं प्रयच्छतेति समन्वयः । धृषप्रसहनेइत्यस्य विभाषितणिचूत्वात् यदा णिचूनास्ति तदा रूपम् ॥ ९॥

अथ दशमी—

अस्तिहिर्वःसजात्यंरिशादसोदेवासोअस्त्याप्यम् ।
प्रणःपूर्वस्मैसुवितायवोचतमक्षूसुम्नायनव्यसे॥१०॥३२॥

अस्ति । हि । वः । सऽजात्यम् । रिशादसः । देवासः । अस्ति ।
आप्यम् । प्र । नः । पूर्वस्मै । सुविताय । वोचत । मक्षु ।
सुम्नाय । नव्यसे ॥ १० ॥ ३२ ॥

हे रिशादसो रिशतां हिंसतामसितारो देवासोदेवा द्योतमानाः मरुदादयः वो युष्माकं सजात्यमस्ति परस्परं समानजातिभावोस्तिखलु । किञ्च आप्यं आपिर्बन्धुः तस्यभावआप्यं स्तोतृषु स्तुत्यलक्षणसंबन्धात् वैवस्वतेन मनुना मया स्तोत्रा सह युष्माकं बन्धुभावोस्ति खलु । ततः पूर्वस्मै प्रथमभाविने सुविताय सुष्ठु ईयते सर्वैरागम्यतइति सुवितोऽभ्युदयः तस्मै नव्यसे नवीयसे नवतराय सुम्नायच उभयं मक्षु शीघ्रं नोस्माकं प्रवोचत प्रकर्षेण ब्रूत अभ्युदयधनानि प्रयच्छतेत्यर्थः ॥ १० ॥

॥ इति षष्ठस्य द्वितीये द्वात्रिंशोवर्गः ॥ ३२ ॥

अथैकादशी—

इदाहिवमुपस्तुतिमिदावामस्यभक्तये ।
उपवोविश्ववेदसोनमस्युराँअसृक्ष्यन्यामिव ॥ ११ ॥

इदा । हि । वः । उपऽस्तुतिम् । इदा । वामस्य । भक्तये । उप । वः ।
विश्वऽवेदसः । नमस्युः । आ । असृक्षि । अन्याम्ऽइव ॥ ११ ॥

हे विश्ववेदसः सर्वधनाः हे देवा नमस्युरन्नमिच्छन् मनुरहं वोयुष्मद्विषयामुपस्तुतिमन्यामिव अदृष्टपूर्वामिवस्थितां कैश्चिदप्यकृतामित्यर्थः तादृशीमुपस्तुतिमिदाहि हिरवधारणे इदानीमेवोपासृक्षि उपासृजामि करोमीत्यर्थः। किमर्थं वोयुष्मत्संबन्धिनो वामस्य धननीयस्य इदा इदानीमेव भक्तये संभजनाय लाभायेत्यर्थः। असृक्षीति सृजेर्लुङिरूपम् पादादित्वादनिघातः ॥ ११ ॥

अथ द्वादशी—

उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥ १२ ॥

उत्। ऊँ इति। स्यः। वः। सविता। सुऽप्रनीतयः। अस्थात्। ऊर्ध्वः। वरेण्यः। नि। द्विऽपादः। चतुःऽपादः। अर्थिनः। अविश्रन्। पतयिष्णवः ॥ १२ ॥

हे सुप्रणीतयः शोभनप्रणीतिः स्तुतिः शोभनप्रणयनाः शोभनस्तुतयोमरुतः वोयुष्माकं मध्ये ऊर्ध्वः ऊर्ध्वगन्ता वरेण्यः सर्वैर्वरणीयः संभजनीयः स्यः ससविता सर्वस्य स्वकर्मणि प्रेरकः एतन्नामकः सदेवः यदा उदस्थाव स्वतेजसा उद्गतोभूत् तदा अर्थिनः द्विपादः पादद्वययुक्ताः पुरुषाः चतुष्पादः पादचतुष्टययुक्ताअश्वादयः पतयिष्णवः पतनशीलाः पक्षिणश्च न्यविश्रन् स्वस्वकार्येषु निविशन्ते। सूर्येउदिते केचनपुरुषा अग्निहोत्रादिकंकुर्वन्ति केचन देवता विषयं स्तोत्रं कुर्वन्ति पश्वादयस्तृणादिभक्षणार्थं सर्वत्रसञ्चरन्ति। न्यविश्रन् निपूर्वाद्विशतेर्लङि व्यत्ययेन परस्मैपदं बहुलंछन्दसीतिरुडागमः ॥१२॥

पञ्चमेहनि मरुगशस्त्रे देवं देवमिति वैश्वदेवस्तृचः सूत्रितश्च—देवंदेवंवोवसे देवंदेवं बृहद्गायिषेयचद्दति।

तत्र प्रथमा सूक्ते त्रयोदशी—

देवंदेवं वोऽवसे देवंदेवमभिष्टये।
देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥ १३ ॥

देवम्ऽदेवम् । वः । अवसे । देवम्ऽदेवम् । अभिष्टये । देवम्ऽदेवम् ।
हुवेम । वाजऽसातये । गृणन्तः । देव्या । धिया ॥ १३ ॥

वयं देव्या द्योतमानया धिया स्तुत्या गृणन्तः स्तुवन्तः सन्तोवोयुष्माकंमध्ये देवंदेवं दीप्यमानं देवं अवसे कर्मरक्षणायाह्वयाम । अनुक्रमेणाह अभिष्टये अभिलषितप्राप्त्यर्थंच देवंदेवं वयमाह्वयाम तवोवाजसातये अन्नलाभाय हुवेम आह्वयाम ॥ १३ ॥

अथ चतुर्दशी—

देवासोहिष्मामनवेसमन्यवोविश्वेसाकंसरातयः ।
तेनोअद्यतेअपरंतुचेतुनोभवन्तुवरिवोविदः ॥ १४ ॥

देवासः । हि । स्म । मनवे । सऽमन्यवः । विश्वे । साकम् ।
सऽरातयः । ते । नः । अद्य । ते । अपरम् । तुचे ।
तु । नः । भवन्तु । वरिवःऽविदः ॥ १४ ॥

समन्यवः समानमनसः यद्वा संग्रामेषु शत्रुहननार्थं समानक्रोधयुक्ताः विश्वे सर्वेऽपि देवासोहिष्म मरुदादयोदेवाः खलु मनवे एतन्नामकाय ऋषये मर्त्यं साकं सह युगपदेव सरातयः धनादिदानेन सहिताभवन्तु । पुनरपि प्रार्थयते तेदेवाः नोस्माकं अद्यास्मिन्दिने अपरश्च किंबहुना सर्वेषु दिवसेषु धनदातारोभवन्तु । नकेवलमस्माकमेव किंतु तुचे तुगित्यपत्यनाम तुजिर्हिंसादाननिकेतनेषु तोजयति हिनस्ति पितुर्दुःखादिकमिति तुक् पुत्रः तस्मै नोस्माकं पुत्राय तु क्षिप्रं वरिवोविदः वरणीयस्य धनस्य लंभयितारोभवन्तु ॥ १४ ॥

अथ पञ्चदशी—

प्रवःशंसाम्यद्रुहःसंस्थउपस्तुतीनाम् ।
नतंधूर्तिर्वरुणमित्रमर्त्यंयोवोधामभ्योविधत् ॥ १५ ॥

प्र । वः । शंसामि । अद्रुहः । सम्ऽस्थे । उपऽस्तुतीनाम् । न । तम् ।
धूर्तिः । वरुण । मित्र । मर्त्यम् । यः । वः । धामऽभ्यः । अविधत् ॥१५॥

हे अद्रुहः अद्रोग्धारः अहिंस्यावा मरुदादयः उपस्तुतीनामुपस्तोत्राणां संस्थे तासां यज्ञे क्रियमाणत्वादरमत्संस्थानभूतेस्मिन्यज्ञे वो युष्मान्प्रशंसामि प्रकर्षेण स्तौमि। हे वरुण मित्र मित्रावरुणौ तं मर्त्यं मनुष्यं धूर्तिः धुर्वीहिंसार्थः शत्रुभ्योहिंसा तन्नबाधते योमनुष्यः वोयुष्माकं धामभ्यस्तेजोभ्यः धीयतेस्मिन्निति धाम शरीरंवा तेभ्योविधव् विधविधाने हवींषि विदधाति प्रयच्छति एतेन तेजसामपि हविर्भक्षणमस्तीति ज्ञायते ॥ १५ ॥

अथ षोडशी—

प्रसक्षयंतिरतेविमहीरिपोयोवोवरायदाशति ।
प्रप्रजाभिर्जायतेधर्मणस्पर्यरिष्टःसर्वएधते ॥ १६ ॥ ३३ ॥

प्र । सः । क्षयम् । तिरते । वि । महीः । इषः । यः । वः ।
वराय । दाशति । प्र । प्रऽजाभिः । जायते । धर्मणः ।
परि । अरिष्टः । सर्वः । एधते ॥ १६ ॥ ३३ ॥

हे मरुदादयः समनुष्यः क्षयं क्षियंति निवसन्त्यत्रेतिक्षयोगृहं तत् समनुष्यः प्रतिरते प्रकर्षेण वर्धयति। तिरतिर्वृद्धिकर्मा सएव महीर्महान्तिइषोन्नानिच विवर्धयति। योमनुष्यः वराय वरणीयाय धनाय तदर्थं वोयुष्मभ्यं दाशति हवींषि प्रयच्छति धनादिभिर्वर्धयतीत्यन्वयः। किञ्च धर्मणः ध्रियते ऋत्विग्भिरिति धर्म कर्म युष्मद्विषयात्कर्मणः सकाशात् समनुष्यः प्रजाभिः पुत्रपौत्रादिभिः परि परितः सर्वतः प्रजायते प्रकर्षेणाविर्भवति। आत्मावैपुत्रनामासीतिश्रुतेः। ततः अरिष्ट अन्यैरहिंसितः सर्वोयुष्माकं हविःप्रदानात्सकलोजनः एधते वर्धते धनादिभिर्वर्धते ॥१६॥

॥ इति प्रथमस्य द्वितीये त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथ सप्तदशी—

ऋतेसविन्दतेयुधःसुगेभिर्यात्यध्वनः ।
अर्यमामित्रोवरुणःसरातयोयंत्रायन्तेसजोषसः ॥ १७ ॥

ऋते । सः । विन्दते । युधः । सुऽगेभिः । याति । अध्वनः ।
अर्यमा । मित्रः । वरुणः । सऽरातयः । यम् ।
त्रायन्ते । सऽजोषसः ॥ १७ ॥

सः अर्यमादीनां हविर्दाता मनुष्यः युधः युधसंमहारे भावेक्किप् युद्धादपि विनापि विन्दते धनानिलभते। किञ्च सुगेभिः शोभनगमनैः सुष्ठुगन्तृभिर्वा अश्वैः सह अध्वनोमार्गान् गन्तव्यान् देशानित्यर्थः तान् याति गच्छति यं जनम् अर्यमा सततं गच्छन् मित्रः स्तोतॄणां यष्टॄणां च धनप्रदानेन मित्रभूतोवरुणः निवारयिता शत्रूणां यद्वा वरणीयः संभजनीयः एतन्नामकाः सरावयः समानदानास्त्रयोदेवाः सजोषसः परस्परं संगताः सन्तः यं हव्यप्रदातारं त्रायन्ते स्वरक्षणैः पालयन्ति सधनादीनि विन्दतीत्यन्वयः॥ १७॥

अथाष्टादशी—

अञ्चेचिदस्मैकृणुथान्यञ्चनंदुर्गेचिदासुंसरणम्।
एषाचिदस्मादशनिःपरोनुसास्रेधन्तीविनंश्यतु॥ १८॥

अञ्चे। चित्। अस्मै। कृणुथ। निऽअञ्चनम्।
दुःऽगे। चित्। आ। सुऽसरणम्। एषा। चित्। अस्मात्।
अशनिः। परः। नु। सा। अस्रेधन्ती। वि। नश्यतु॥ १८॥

हे देवाः अञ्चेचित् क्लिअभिभवे पैरनभिभवनीयेपि परपुरे न्यञ्चनं नितरां गमनमस्मै मनवे कृणुथ यूयं कुरुत। यद्वा अञ्चे ऋजुगमने मय्थे गमनं कुरुत तथा दुर्गेचित् अगन्तव्येपि स्थले सुसरणं सुगत्यै शोभनगमनमासमन्तात्कुरुत एवंसति सैषाशनिः शत्रूणां वदेतदायुधं अस्मात्सर्वतोगन्तुर्मनोर्नुक्षिप्रं परः परस्तात्भवेत् पश्चात्साशनिः अस्रेधन्ती कांश्चिदप्यहिंसती विनश्यतु विनष्टाभवेत्॥ १८॥

अथैकोनविंशी—

यदुद्यसूर्यउद्यतिप्रियंक्षत्राऋतंदुध।
यन्निम्रुचिप्रबुधिविश्ववेदसोयद्वामुध्यंन्दिनेदिवः॥ १९॥

यत्। अद्य। सूर्ये। उत्ऽयति। प्रियंऽक्षत्राः।
ऋतम्। दुध। यत्। निऽम्रुचि। प्रऽबुधि। विश्वऽवेदसः।
यत्। वा। मध्यन्दिने। दिवः॥ १९॥

हे प्रियक्षत्राः प्रीणयितृबलाः देवाः सूर्ये सर्वस्य स्वस्वकर्मणि प्रेरके सवितरि उद्यति उद्गच्छतिसति अद्यास्मिन्दिने यद्यदा ऋतं कल्याणभूतं गृहं दध धारयत दधातेर्लेटि मध्यमब-हुवचनेरूपम् । यद्यदा हे विश्ववेदसः सर्वधनादेवाः निम्रुचि निम्रुचिर्गत्यर्थः सूर्यस्य निम्रोचने नितरां गमने सायमित्यर्थः तस्मिन् धारयथ । यद्वा प्रबुधितस्य प्रबोधने प्रातःकाले । यद्वा दिवः सूर्यतेजसा दीप्यमानस्याह्नो मध्यन्दिने मध्ये धनं मनवे धत्तेत्युत्तरत्रसंबंधः ॥ १९ ॥

अथ विंशी—

यद्वाभिपित्वेअसुराऋतंयतेछर्दिर्येमविदाशुषे ।
वयंतद्वोवसवोविश्ववेदसउपस्थेयाममध्यआ ॥ २० ॥

यत् । वा । अभिऽपित्वे । असुराः । ऋतम् । यते ।
छर्दिः । येम । वि । दाशुषे । वयम् । तत् । वः । वसवः ।
विश्वऽवेदसः । उप । स्थेयाम । मध्ये । आ ॥ २० ॥

हे असुराः प्राज्ञाः संग्रामे आप्तानां क्षेप्तारोवा देवाः यद्वाभिपित्वे अस्मद्यज्ञं प्रति युष्मा-कं अभिप्राप्तौ ऋतं सत्यभूतं यज्ञं यते इणः शतरि रूपम् । गच्छते दाशुषे हवींषिदत्तवते यजमा-नाय यच्छर्दिः उछृदिर्दीप्तिदेवनयोः दीप्यतेनेनेति छर्दिस्तेजः यद्वा छर्दति दीव्यन्त्यत्रेति छर्दि-र्गृहं तत् गृहं तेजोवा वियेम प्रयच्छथ यद्येवं यूयं कुरुथ तर्हि वयं हे वसवः स्तोतॄणां धना-दिभिराच्छादयितारः यद्वा शत्रूणां विवासयितारो विश्ववेदसः सर्वधनाः सर्वज्ञानावा हे देवाः वोयुष्मत्संबन्धि तत्कल्याणं गृहं षष्ठ्यर्थे द्वितीया भवद्भिः प्रत्तस्य गृहस्य मध्ये उपस्थेयाम उपतिष्ठेम युष्मान् हविर्भिः पूजयेम तिष्ठतेराशीर्लिङि लिङ्याशिष्यङित्यङ्प्रत्य-यः ॥ २० ॥

अथैकविंशी—

यदद्यसूरउदितेयन्मध्यन्दिनआतुचि ।
वामंधत्थमनवेविश्ववेदसोजुह्वानायप्रचेतसे ॥ २१ ॥

यत् । अद्य । सूरे । उत्ऽइते । यत् । मध्यन्दिने ।
आऽतुचि । वामम् । धत्थ । मनवे । विश्वऽवेदसः ।
जुह्वानाय । प्रऽचेतसे ॥ २१ ॥

हे विश्ववेदसः सर्वतोव्याप्तधनाः हे देवाः यद्यदा अपेदानीं सूरे सूर्ये उदिते सति यद्वा मध्यन्दिने दिवसस्य मध्ये यद्वा आवुचि आवुचिर्गमनार्थः सूर्यस्य आनिम्रोचने सायमित्यर्थः जुह्वानाय अग्नौ हवींषि जुह्वते अतएव प्रचेतसे प्रकृष्टज्ञानाय मनवे एतन्नामकाय ऋषये महं वामं वननीयं धनं धत्थ धत्त तद्वृणीमहइत्युत्तरत्रसंबन्धः ॥ २१ ॥

अथ द्वाविंशी--

वयंतद्वः॑सम्राजआवृ॑णीमहेपुत्रोनब॑हुपाय्यम् ।
अ॒श्यामतदादित्याजुह्व॑तोहविर्येनवस्यो॑नशाम॑है ॥ २२ ॥ ३४ ॥

व॒यम् । तत् । वः॒ । सम्ऽराजः । आ । वृणी॒महे॑ । पु॒त्रः ।
न । ब॒हुऽपाय्य॑म् । अ॒श्याम॑ । तत् । आ॒दि॒त्याः॒ । जुह्व॑तः ।
ह॒विः । येन॑ । वस्यः॑ । अ॒नशा॑महै ॥ २२ ॥ ३४ ॥

हे सम्राजः सम्यग्दीप्यमानाः देवाः पुत्रोन एकवचनं छान्दसं युष्माकंपुत्राइव स्थिताः पुत्रा यथा पितृभिः पोष्याः तद्वत् युष्माभिःपोष्या वयं ।बहुपाय्यं बहुभिर्भोज्यं वोयुष्मत्सम्बन्धि तद्धनं आवृणीमहे संभजामः । तथा हविः जुह्वतः मार्गं कुर्वतोवयं हे आदित्याः तद्धनं अश्याम माप्नुयाम । येन धनेन वस्यः वसीयः अतिशयेन वसुमत्त्वमनशामहै अश्नवामहै प्राप्नुमः। अश्नोतेर्लोटि व्यत्ययेन श्नम् प्रत्ययः ॥ २२ ॥

॥ इति षष्ठस्य द्वितीये चतुस्त्रिंशोवर्गः ॥ ३४ ॥

येत्रिंशतीति पञ्चर्चमष्टमं सूक्तम् अत्रानुक्रान्तम्--येत्रिंशतिपञ्चोपान्त्या पुरउष्णिगिति । मनुर्ऋषिः प्राग्वत्सामीप्यपरिभाषया गायत्रीछन्दः उपान्त्यापुरउष्णिक् पूर्ववद्विश्वेदेवादेवता । तृतीयेछन्दोमे वैश्वदेवशस्त्रे येत्रिंशतीत्येतत्सूक्तं वैश्वदेवनिविद्धानम् सूत्रितंच--येत्रिंशतीतिवैश्वदेवमिति ।

तत्र प्रथमा--

येत्रिं॒शति॒त्रय॑स्प॒रोदे॒वासो॑ब॒र्हिरास॑दन् ।
वि॒दन्नह॑द्वि॒तास॑नन् ॥ १ ॥

ये । त्रिंशति । त्रयः । परः । देवासः । बर्हिः । आ ।
असदन् । विदन् । अह । द्विता । असनन् ॥ १ ॥

मनुराह त्रिंशति त्रिंशत्संख्यायाःपरः परस्तात्त्रयः त्रयस्त्रिंशद्देवाइत्यर्थः ये देवासोदेवाः बर्हिः अस्मदीययज्ञसंबंधिनि बर्हिषि हविःस्वीकरणार्थमासदन् आसीदन्तु । अह अथानन्तरं विदन् ते देवा अस्मान् हविषांप्रदातॄनिति जानंतु । ततः द्विता द्विधा द्विप्रकारमसनन् अस्मभ्यं धनं पश्वादिकञ्च प्रयच्छन्तु । यद्वा द्विता द्वैधं अनेन पौनःपुन्यं लक्ष्यते पुनःपुनरस्मभ्यं धनादिकं ददत्वित्यर्थः ॥ १ ॥

अथ द्वितीया–

वरुणोमित्रोअर्यमास्मद्रातिषाचोअग्नयः ।
पत्नीवन्तोवषट्कृताः ॥ २ ॥

वरुणः । मित्रः । अर्यमा । स्मद्रातिऽसाचः ।
अग्नयः । पत्नीऽवन्तः । वषट्ऽकृताः ॥ २ ॥

वरुणोवरणीयः संभजनीयः मित्रः स्तोतॄणां यष्टॄणांच धनादिदानेन मित्रभूतः अर्यमास्तोत्रकारिणोधनं प्रापयन् यद्वा सततं गच्छन् एतन्नामकास्त्रयोदेवाः स्मद्रातिषाचः स्मत् सुमत् शोभना रातिर्हविःप्रदानं येषामस्तीति स्मद्रातयोयजमानाः तान् सचन्ते धनादिप्रदानेन सेवन्ते इति तथोक्ताः। यद्वा कल्याणं यथा भवति तथा हविषां दातॄन् सचन्तइति । ते तादृशाःपत्नीवन्तोदेवपत्नीसहिता अग्नयः अंगनशीलाः नानाविधाअग्नयः वषट्कृताः मया सोमस्याग्नेवी हीवौषडित्यादिना स्वाहाकृताः सुहुताइत्यर्थः॥ २ ॥

अथ तृतीया–

तेनोगोपाअपाच्यास्तउदक्तइत्थान्यक् ।
पुरस्तात्सर्वयाविशा ॥ ३ ॥

ते । नः । गोपाः । अपाच्याः । ते । उदक् । ते । इत्था ।
न्यक् । पुरस्तात् । सर्वया । विशा ॥ ३ ॥

ते वरुणादयोदेवाः सर्वथा सर्वेण विशा अनुचरवर्गेण सह अपाच्याः अपाची प्रतीची ततोनोस्माकं गोपाः गोपायितारोभवन्तु तएव उदक् उदीच्याः अञ्चेर्लुगिति पञ्चम्यर्थे विहितस्यास्तातेर्लुक् ततोप्यस्माकं रक्षकाभवन्तु। इत्थेति शब्देन ऊर्ध्वां दिशं दक्षिणां च निर्दिशति इत्थमनेन पूर्वोक्तेन प्रकारेण ऊर्ध्वाया दक्षिणस्याश्च दिशः ते-देवाः अस्माकं पालयितारोभवन्तु तथा न्यक् नीच्यादिशः अत्रापि पूर्ववदस्तातेर्लुक् अधःस्थादेवाअपि अस्माकं त्रातारोभवन्तु। किंच पुरस्तात्प्राच्यादिशश्च तेदेवाअस्माकं गोपायितारोभवन्तु ॥ ३ ॥

अथ चतुर्थी–

यथावशन्तिदेवास्तथेदसत्तदेषांनकिरामिनत्। अरावाचनमर्त्यः ॥४॥

यथा। वशन्ति। देवाः तथा। इत्। असत्। तत्। एषाम्।
नकिः। आ। मिनत्। अरावा। चन। मर्त्यः ॥ ४ ॥

देवाद्योतमानाः सर्वेदेवाः यथा वशन्ति यथा कामयन्ते वशकान्तौ सम्प्रसारणाचेति पूर्वरूपस्य छन्दसिविकल्पितत्वाद्यणादेशः। तथैव यथा उशन्ति तथैव असत् तद्भवत्येव। तदेवाह एषां देवानां तत्कामनं नकिर्नकश्चिदपि मिनत् हिनस्ति मीङ् हिंसायां लेटिरूपम् मीनातेर्निगमइतिह्रस्वत्वम्। कथं देवानामभिलषितं तथाभवतीतिचेत् तदाह–अरावा यदि देवाः कस्यचिद्प्यदातारं मनुष्यं कामयेरन् तदा अरावा अदाता चनेत्यप्यर्थे अदातापि मर्त्योमनुष्यः उशद्भ्योदेवेभ्योहवींषि प्रयच्छति तस्मात्तेषां यत्कामनं तत्तथा भवत्येवेत्यर्थः ॥ ४ ॥

अथ पञ्चमी–

सप्तानांसप्तऋष्टयःसप्तद्युम्नान्येषाम्।
सप्तोअधिश्रियोधिरे ॥ ५ ॥ ३५ ॥

सप्तानाम्। सप्त। ऋष्टयः। सप्त। द्युम्नानि। एषाम्।
सप्तो इति। अधि। श्रियः। धिरे ॥ ५ ॥ ३५ ॥

अत्र पुरातनीकथा इन्द्रसमानं पुत्रमिच्छन्त्याः दितेर्गर्भस्य केनचित्कारणेन इन्द्रेण सप्तधा-भिन्नत्वात् सगर्भः सप्तगणात्मकोभवत् ततोमरुतः संपन्नाः।सप्तगणावैमरुतइतिश्रुतेः।एषा कथा इदंपित्र्येमरुतामुच्यतेवचइत्यस्मिन्वर्गे। सप्तपश्चेनाभ्यधायि। तथाचास्याऋचोयमर्थः–सप्तानां मरुतां गणानां सप्त सप्तसंख्याका ऋष्टय आयुधविशेषाविभिन्नाःसन्ति तथा सप्तसंख्याकानि युम्नानि योतमानानि कुंडलादीन्याभरणानि युम्नान्यन्नानिवा एषां गणानां विभिन्नानि सन्ति ततः सप्तमरुतांगणाः सप्तो सैव सप्तविधाःश्रियः सकलादीप्तीः अधिधिरे परस्परमधिकंदधिरे॥५॥

॥ इति पञ्चस्य द्वितीये पञ्चत्रिंशोवर्गः॥ ३५ ॥

बभ्रुरेकइति दशर्चं नवमं सूक्तं मरीचिपुत्रः कश्यपो वैवस्वतोमनुर्वा ऋषिः। तथाचानुक्रम्यते–बभ्रुर्दशकश्यपोवा मारीचो द्विपदमिति। दशापिद्विपदा विंशत्यक्षराविराजः पूर्ववद्विश्वेदेवादेवता। तृतीयेछन्दोमे वैश्वदेवशस्त्रे वैश्वदेवसूक्तात्पूर्वमेव द्वैपदंसूक्तं शंसनीयम्। सूत्र्यतेहि–बभ्रुरेकइतिद्विपदासूक्तानिपुरस्ताद्वैश्वदेवसूक्तानामिति।

तत्र प्रथमा–

ब॒भ्रुरेको॒विषु॑णः॒सू॒नरो॒युवा॒ञ्ज्य॑ङ्क्ते॒हि॒र॒ण्यय॑म् ॥ १ ॥

ब॒भ्रुः । एकः॑ । विषु॑णः । सू॒नरः॑ । युवा॑ । अ॒ञ्जि ।
अ॒ङ्क्ते॒ । हि॒र॒ण्यय॑म् ॥ १ ॥

अत्र दशानामृचां किंचित्तल्लिंगात् पृथक्देवताः अत्र प्रथमायां बभ्रुः इत्यनेन सोमोभिधीयते। सोम्यंबभ्रुमालभेतेत्यादिपुदृष्टत्वात्। बभ्रुर्बभ्रुवर्णः सर्वलतादिषु परिपक्वः। यद्वा डुभृञ् धारणपोषणयोः कुभ्रंश्चेति कुप्रत्ययः सर्वस्य सुधामयैः किरणैः तावद्भर्ता चन्द्रमसि दुःखोपशमनानि पुष्पानिखलु। तादृशः विषुणः विष्वगञ्चनः सूनरः सुष्ठु रात्रीणां नेता रात्रयश्चन्द्रनेतृकाः खलु। एतादृशोयुवा प्रतिदिवसमाविर्भूतत्वात्तरुणः एकोदेवः सोमः हिरण्ययं हिरण्मयं अञ्जि अभिव्यज्यते प्रकाश्यतेनेनेति अञ्जि आभरणं अभिव्यक्तिसाधनं कुंडलमुकुटादिकं स्वशरीरमंक्ते अभिव्यञ्जयति ॥ १ ॥

---

१ तै०सं० २. २. ५. । २ ऋ० सं० १. ८. ५. । ३ तै०सं० २. १. ३. ।

अथ द्वितीया—

योनिमेकआससादद्योतनोन्तर्देवेषुमेधिरः ॥ २ ॥

योनिम् । एकः । आ । ससाद । द्योतनः ।
अन्तः । देवेषु । मेधिरः ॥ २ ॥

अत्र योनिमिति लिंगादग्निरुच्यते । अग्नये गृहपतयेइत्यादिषु दृष्टत्वात् । देवेषु देवानामन्तर्मध्ये द्योतनः स्वतेजसा दीप्यमानो मेधिरोमेधावी अथवा मेधाकांक्षिणां स्तोतॄणां मेधा दातृत्वेन मेधायुक्तः एवंविधएकोग्निः एवं स्थानभूतमाहवनीयादिकं आससाद हविःस्वीकरणार्थमासीदति ॥ २ ॥

अथ तृतीया—

वाशीमेकोबिभर्तिहस्तआयसीमन्तर्देवेषुनिध्रुविः ॥३॥

वाशीम् । एकः । बिभर्ति । हस्ते । आयसीम् ।
अन्तः । देवेषु । निऽध्रुविः ॥ ३ ॥

देवेष्वन्तर्देवानांमध्ये द्योतमानः निध्रुविः निश्चले स्थाने वर्तमानः यद्वा नितरां गमनमस्यास्तीति निध्रुविः सर्वदागच्छन् अथवा संग्रामेषु शत्रूणां पुरतोतिशयेन स्थैर्यवान् एतादृशः एकस्त्वष्टृनामकोदेवः आयसीं अयोमयधारां वाशीं वाशृशब्दे शब्दयत्याक्रन्दयति शत्रूनन्येति वाशी तक्षणसाधनं कुठारः तं स्वकीयहस्ते बिभर्ति धारयति ॥ ३ ॥

अथ चतुर्थी—

वज्रमेकोबिभर्तिहस्तआहितंतेनवृत्राणिजिघ्नते ॥ ४ ॥

वज्रम् । एकः । बिभर्ति । हस्ते । आऽहितम् ।
तेन । वृत्राणि । जिघ्नते ॥ ४ ॥

अत्र वज्रलिंगादिन्द्रोदेवता एकइन्द्रः आहितं स्वकीयहस्ते निहितं वज्रमेतन्नामकमायुधं बिभर्ति धत्ते सएवेन्द्रस्तेन निहितेन वज्रेण वृत्राणि अपामावरकाणि रक्षांसि पापानि वा जिघ्नते भृशं हन्ति ॥ ४ ॥

अथ पञ्चमी–

तिग्ममेकोबिभर्तिहस्तआयुधंशुचिरुग्रोजलाषभेषजः ॥५॥

तिग्मम् । एकः । बिभर्ति । हस्ते । आयुधम् ।
शुचिः । उग्रः । जलाषऽभेषजः ॥ ५ ॥

अत्र जलाषभेषजइत्यनेन रुद्रोभिधीयते शुचिः शुच दीप्तौ सर्वतः स्वतेजसा दीप्यमानः यद्वा शुच शोके शत्रूणां शोचयिता दुःखयिता अतएव उग्रः उद्गूर्णबलः जलाषभेषजः रोगापनयनेन सुखकरभैषज्यवान् यद्वा स्तोतॄणां दुःखरूपसंसारोच्छेदेन सुखकारिभिषग्रूपः। भषग्भोदैव्योभिषगित्यादिश्रुतिभिरस्यभिषक्त्वंश्रूयते। तादृशएकोरुद्रः तिग्मं तीक्ष्णधारं आयुधं आयुध्यति सम्प्रहरति शत्रूननेनेति आयुधं पिनाकः तं स्वकीये हस्ते बिभर्ति ॥ ५ ॥

अथ षष्ठी–

पूषएकःपीपायतस्करोयथाँएषवेदनिधीनाम् ॥ ६ ॥

पथः । एकः । पीपाय । तस्करः । यथा ।
एषः । वेद । निऽधीनाम् ॥ ६ ॥

पथइतिलिंगेन पूषा निगद्यते। संपूषन्नध्वनस्तिरेत्यादिषु दृष्टत्वात्। एकः पूषनामकोदेवः पथः मार्गान् पीपाय प्यायतिर्वर्धनकर्मापि अत्र रक्षणार्थः ये अग्निहोत्रादिकर्मकुर्वन्ति तेषां स्वर्गमार्गं। ये दुष्कृतं कर्म कुर्वन्ति तेषां यातनामार्गं च रक्षति। उभयेषां मार्गविपर्ययोयथा नभवति तथा पालयतीत्यर्थः। एषस्तोपंपूषा निधीनां पृथिव्यां निहितानि धनानि वेद वेत्ति। ज्ञात्वा स्तोतॄणां तानि ददातीत्यर्थः। तत्रदृष्टान्तः–तस्करो यथा चोरः पथिगच्छतां पुरुषाणां धनहरणार्थं मार्गं रक्षति तथाच सचोरः गृहे निहितानि ज्ञात्वा तदाहृत्य तस्य सहायेभ्योयथा तानि ददाति तद्वत् ॥ ६ ॥

अथ सप्तमी–

त्रीण्येकउरुगायोविचक्रमेयत्रदेवासोमदन्ति ॥ ७ ॥

---

१ तै० सं० ४.५ १.१ २ ऋ० स० १.३.२४.१

त्रीणि । एकः । उरुऽगायः । वि । चक्रमे । यत्र । देवासः । मदन्ति ॥७॥

उरुगायोविचक्रमइति पदलिंगाद्विष्णुरुच्यते उरुगायः उरुभिर्बहुभिर्गातव्यः यद्वा बहुषु देशेषु गंता बहुकीर्तिर्वा सर्वान् शत्रून् स्वसामर्थ्येन शब्दयत्याक्रन्दयतीतिवा उरुगायःएतादृश-एकोसहायो विष्णुः त्रीणि पदानि भुवनानि विचक्रमे साधु पादेन विक्रान्तवान् वेःपादविहर-णे इति क्रमतेः आत्मनेपदम् । यत्र येषु लोकेषु देवासः इन्द्रादयोदेवाः मदन्ति यजमानदत्तैर्ह-विर्भिर्माद्यन्ति तानि विचक्रमइत्यन्वयः ॥ ७ ॥

अथाष्टमी—

विभिर्द्वाचरतएकयासहप्रप्रवासेववसतः ॥ ८ ॥

विऽभिः । द्वा । चरतः । एकया । सह । प्र । प्रवासाऽइव । वसतः ॥ ८ ॥

एकयासहेति लिंगाद् अश्विनावभिधीयेते द्वा द्वौ द्वित्वसंख्योपेतावश्विनौ विभिः वीग-त्यादिषु क्विप् छान्दसोहस्वः गमनसाधनैः अश्वैः चरतः सञ्चरेते किञ्च इमावश्विनौ एकया सूर्याख्यया ताभ्यां स्वयं वृतया स्त्रिया सह प्रवसतःप्रवासं सर्वत्रगमनं कुरुतः।प्रवासे दृष्टान्तः—प्रवासेव यथा प्रवासिनौ द्वौ पुरुषौ एकया स्त्रिया सह प्रवसतः तद्वद् ॥ ८ ॥

अथ नवमी—

सदोद्वाचक्रातेउपमादिविसम्राजासर्पिरासुती ॥ ९ ॥

सदः । द्वा । चक्राते इति । उपऽमा । दिवि । सम्ऽराजा ।
सर्पिरासुती इति सर्पिःऽआसुती ॥ ९ ॥

सम्राजाविति लिंगेन मित्रावरुणावभिधीयेते उपमा उपमौ परस्परं स्वकांत्योपमानभूतौ यद्वा उपमीयते आभ्यां सर्वमिति उपमौसर्वस्य एतावेव सम्राजा सम्राजौ सम्यग्दीप्यमानौ स-र्पिरासुती सर्पिर्घृतमाभ्यामासूयतेइति सर्पिरासुती घृतहविष्कौ द्वा द्वौ मित्रावरुणौ दिवि द्युलो-के सदः सीदन्त्यत्रेति सदः स्थानं तच्चक्राते अकार्षाम् ॥ ९ ॥

अथ दशमी—

अर्चन्तएकेमहिसामंमन्वततेनसूर्यमरोचयन् ॥१०॥३६॥

अर्चन्तः । एके । महि । साम । मन्वत ।
तेन । सूर्यम् । अरोचयन् ॥ १० ॥ ३६ ॥

अर्चन्तः देवान्पूजयन्तः एके केचनात्रयः महि महत् साम मन्वत उच्चारयन्तीत्यर्थः । तादृशा अत्रयः तेनोक्तेन साम्ना सूर्यं अरोचयन्नदीपयन् तस्मात्र देवता ॥ १० ॥

॥ इति प्रथमस्य द्वितीये षट्त्रिंशोवर्गः ॥ ३६ ॥

नहिवइति चतुर्ऋचं दशमं सूक्तं आद्यागायत्री द्वितीयापुरउष्णिक् तृतीयाबृहती चतुर्थ्यनुष्टुप् मनुर्वैवस्वतऋषिः पूर्ववद्विश्वेदेवादेवता । तथाचानुक्रान्तम्—नहिवश्चतुष्कंपुरउष्णिग्बृहत्यनुष्टुबन्तमिति । विनियोगस्तु लिंगादवगन्तव्यः ।

तत्र प्रथमा

नहिवोअस्त्यर्भकोदेवासोनकुमारकः । विश्वेसतोमहान्तइत्॥१॥

नहि । वः । अस्ति । अर्भकः । देवासः । न । कुमारकः ।
विश्वे सतःऽमहान्तः । इत् ॥ १ ॥

हे देवासोदेवाः वोयुष्माकंमध्ये अर्भकोनह्यस्ति शिशुर्नास्ति तथा न कुमारकः युष्माकं मध्ये कुमारोपिनास्ति । किन्तु सर्वे यूयं सवयस्तोनित्यतरुणाभवथ । एतदेव प्रतिपादयति विश्वे सर्वे देवाः यूयं सतोमहान्तइत् सर्वस्माद्वियमानात् पृथिव्यामपिये महान्तः ते सतोमहान्तइत्युच्यन्ते तस्माद्युष्माकमर्भको कुमारोपि नास्तीत्यर्थः ॥ १ ॥

अथ द्वितीया—

इतिस्तुतासोअसथारिशादसोयेस्थत्रयश्चत्रिंशच्च ।
मनोर्देवायज्ञियासः ॥ २ ॥

इति । स्तुतासः । असथ । रिशादसः । ये । स्थ । त्रयः ।
च । त्रिंशत् । च । मनोः । देवाः । यज्ञियासः ॥ २॥

हे रिशादसः रिशतां हिंसतामसितारो हे मनोर्यज्ञियासः मनुनामकस्य मम यज्ञार्हा हे देवाः ये यूयं त्रयः त्रिसंख्याकाः त्रिंशच्च त्रिंशत्संख्याकाः त्रयस्त्रिंशद्देवताःस्थ भवथ अभू-

त। ते यूयमिति इत्थमनेन प्रकारेण स्तुतासः असथ मया मनुना स्तुताभवथ असेर्लेटि छान्दसोलुगभावः। यद्वा असथेतिकान्त्यर्थः इत्थं स्तुतायूयं हवींषि कामयध्वम् ॥ २ ॥

अथ तृतीया—

तेनंस्त्राध्वंतेवततउंनोअधिवोचत।
मानःपथःपित्र्यान्मानवादधिदूरंनैष्टपरावतः ॥ ३ ॥

ते। नः। त्राध्वम्। ते। अवत। ते। ऊँ इति। नः। अधि। वोचत।
मा। नः। पथः। पित्र्यात्। मानवात्। अधि। दूरम्। नैष्ट। पराऽवतः ॥ ३ ॥

हे देवाः ते यूयं नोस्मान् त्राध्वं बाधकेभ्यो रक्षोभ्यस्त्रायध्वं ते यूयं अवत धनादिमदानैरस्मात्रक्षत तेएवदेवा नोस्मानधिवोचत अधिकंभवन्तः कर्मकारिणो धनादिमन्तश्च भवन्त्विति यूयं ब्रूत। किंच हे देवाः मानवात् पित्र्यात् मनुः सर्वेषां पिता ततआगतात् परावतः पिता मनुर्दूरंमार्गं चक्रे तस्मात्पथोमार्गान्नोस्मान्मानैष्ट मा नयत अपनयनं माकुरुतेत्यर्थः सर्वदा ब्रह्मचर्याग्निहोत्रादिकर्माणि येन मार्गेण भवन्ति तमेवास्मान्नयत। किन्तु दूरं यएतद्व्यतिरिक्तोविप्रकृष्टमार्गोस्ति तस्मादधि अधिकमित्यर्थः अस्मानपनयत ॥ ३ ॥

अथ चतुर्थी—

येदेवासइहस्थनविश्वेवैश्वानराउत।
अस्मभ्यंशर्मसप्रथोगवेश्वाययच्छत ॥ ४ ॥ ३७ ॥

ये। देवासः। इह। स्थन। विश्वे। वैश्वानराः। उत। अस्मभ्यंम्।
शर्म। सऽप्रथः। गवे। अश्वाय। यच्छत ॥ ४ ॥ ३७ ॥

हे देवासोदेवाः उतापिच वैश्वानराः विश्वे सर्वे नरः कर्मनेतारोध्वर्य्वादयोयस्य सविश्वानरो यज्ञः तस्मिन्सोमादिहवींषि स्वीकर्तुंभवाः माद्भूताः भवार्थे अण्प्रत्ययः यद्वा वैश्वानरोग्निः देवानांतन्मुखत्वात् तस्य संबंधिनोविश्वेसर्वेयेदेवायूयं इहास्मिन्नस्मदीये यज्ञे स्थन हवींष्यादातुं भवथ। ततः सप्रथः प्रथमख्याने सर्वतः प्रसिद्धं सर्वत्रपृथुतमंवा शर्म शृणाति हिन-

स्ति दुःखमिति शर्म सुखं तदस्मभ्यं प्रयच्छतं तथा गवे अस्मदीयेभ्यो यज्ञसाधनभूतेभ्यो गोभ्यः अश्वाय शर्म सुखं प्रदत्त ॥ ४ ॥

॥ इति षष्ठस्य द्वितीये सप्तत्रिंशोवर्गः ॥ ३७ ॥

॥ इति अष्टमे मण्डले चतुर्थोनुवाकः ॥ ४ ॥

पञ्चमेनुवाके द्वादशसूक्तानि तत्र योयजातीत्यष्टादशर्चं प्रथमं सूक्तं वैवस्वतमनुर्ऋषिः नवमीचतुर्दश्यावनुष्टुभौ पञ्चदश्याद्याश्चतस्रः पंक्तयः दशमीपादनिचृत् त्रयः सप्तकाः पादनिचृदिति तल्लक्षणात् शिष्टाएकादशगायत्र्यस्तमपरिभाषया गायत्र्यः आद्यासु चतसृषु यज्ञः ततोयजमानप्रशंसाच स्तूयते अतस्तद्देवताकाः यादंपती इत्याद्यासु पञ्चम्यादिषु दंपतीप्रशस्येते अतस्तद्देवताकाः अत्रशिष्टासु नवसु दंपत्योराशिषः प्रतिपाद्यन्ते अतस्ताएवदेवताः । तथाचानुक्रम्यते—योयजातिन्यूनानेज्यास्तत्वोयजमानप्रशंसाच येत्यादिपञ्चदम्पत्योः शिष्टास्त्वदाशिषोनुष्टुप् चतुर्थङ्क्त्यन्तं नवम्यनुष्टुप् दशमीपादनिचृदिति ।

तत्र प्रथमा—

योयजा॑तियजा॑तइत्सुनव॑च्चपचा॑तिच ।
ब्रह्मेदिन्द्र॑स्यचाकनत् ॥ १ ॥

यः । यजा॑ति । यजा॑ति । इत् । सुनव॑त् । च । पचा॑ति ।
च । ब्रह्मा । इत् । इन्द्र॑स्य । चाकनत् ॥ १ ॥

योयजमानः सकृद्यजाति यागंकरोति हविर्भिर्देवान्पूजयति सदेवेभ्योलब्धधनादिकःसन् यजातइत् पुनरभीष्टप्राप्तये देवेभ्योहवींषिप्रयच्छत्येव । तथा सएव यजमानः सुनवच्च सोमाभिषवंकरोतिच सएव पचातिच पशुपुरोडाशादिकं पचतिच सर्वत्र यजादिषु लेटचडागमः सयजमानः इन्द्रस्य ब्रह्म ब्रह्माणि इदवधारणे इन्द्रसम्बन्धीनिस्तोत्राण्येव चाकनत् पुनःपुनः कामयते कनतेःकान्त्यर्थायङ्लुकि अभ्यासत्वं छान्दसम् ततोलेटचडागमः । अत्रयागे यजमानोधनादिलभवद्वि यज्ञप्रशंसा सएवदृष्टफलः सन् सोमाभिषवादीन्करोतीति यजमानप्रशंसा ॥ १ ॥

अथ द्वितीया—

पुरोळाशं॑योअस्मैसोमं॑ररतआशिर॑म् ।
पादित्तंशक्रोअंह॑सः ॥ २ ॥

पुरोळाशम् । यः । अस्मै । सोमम् । ररत् । आऽशिरम् ।
पात् । इत् । तम् । शक्रः । अंहसः ॥ २ ॥

योयजमानः अस्मै इन्द्राय पशुपुरोळाशं तथा आशिरं तृतीयसवने गोक्षीरेणामिश्रितं सोममस्मै ररते मयच्छति रातेर्लेटि शपः श्लुः अडागमः । शक्रः समर्थः सइन्द्रः तं यष्टारं अंहसः पापात् तद्रूपाद्रक्षसोवा पात् इद्वधारणे अपादेव रक्षत्येव पातेर्लुङिरूपम् ॥ २ ॥

अथ तृतीया–

तस्यद्युमाँअसद्रथोदेवजूतःसशूशुवत् । विश्वावन्वन्नमित्रिया॥३॥

तस्य । द्युऽमान् । असत् । रथः । देवऽजूतः ।
सः । शूशुवत् । विश्वा । वन्वन् । अमित्रिया ॥ ३ ॥

तस्य देवान्पूजयतोयजमानस्य देवजूतः देवैरिन्द्रादिभिः प्रेरितोद्युमान् दीप्तिमान् रथः स्यन्दनः देवानां हविःप्रदानरूपेण यज्ञेन असत् भवत्यागच्छति । ततस्तेन रथेनामित्रिया अमित्रियान् शत्रुभिःकृतान्विश्वा सर्वान्बाधान् वन्वन् वनोतिर्हिंसाकर्मेतियास्कः हिंसन् सएवशूशुवत् पुत्रादिभिर्धनैश्चवर्धते अत्र येन मे रथः बाधाभावश्चाभूदिति यागप्रशंसा । येन सम्यगिष्टदेवाः रथं ददयन्तइति यजमानप्रशंसा ॥ ३ ॥

अथ चतुर्थी–

अस्यप्रजावतीगृहेसश्चन्तीदिवेदिवे । इळाधेनुमतीदुहे ॥ ४ ॥

अस्य । प्रजाऽवती । गृहे । असश्चन्ती । दिवेऽदिवे ।
इळा । धेनुऽमती । दुहे ॥ ४ ॥

प्रजावती पुत्रादियुक्तं असश्चन्ती सश्चतिर्गतिकर्मा अगमनशीलं तादृशं धेनुमती धेनुः पयसा सर्वान् धिनोति प्रीणयतीतिधेनुर्गौः तत्सहितं इळान्नं अस्य यष्टुर्गृहे दिवेदिवे अहरहः दुहे दुहेर्दुह्यते । यद्वा इळेति गवां देवता सा स्थिरा धेनुमती गवांपतित्वाद्धेनुभिर्धेनुमती इळा गोदेवता देवैः प्रेरितासती अस्य यजमानस्य गृहे दोग्धा पुत्रादिकमस्मै ददातीत्यर्थः दुहेर्लटिलोपस्तआत्मनेपदेष्विति तलोपः अत्रेज्यास्तवः ॥ ४ ॥

अथ पंचमी–

यादम्पतीसमनसासुनुतआचधावतः ।
देवासोनित्ययाशिरा ॥ ५ ॥ ३८ ॥

या । दम्पती इति दम्ऽपती । सऽमनसा । सुनुतः । आ ।
च । धावतः । देवासः । नित्यया । आऽशिरा ॥ ५ ॥ ३८ ॥

अत्र यजने दंपत्योः स्तुतिः हे देवासोदेवाः समनसा समनसौ कर्मणि समानमनस्कौ या यौ दम्पती यज्ञकारिणौ जायापती सुनुतः सोमाभिषवं कुरुतः यौ दम्पती ततस्तमभिषुतं सोमं आधावतश्च दशापवित्रेण शोधयतः धावुगतिशुद्ध्योः तथा नित्यया यत्रतृतीयसवने सोमोस्ति तत्र आश्रयणद्रव्यं गोक्षीरमस्त्येव तस्मान्नित्यसंबंधेन आशिरा आश्रयणेन गोक्षीरेण संयुतं सोमं यौ प्रयच्छतः तावन्नादीन् प्राप्नुतइति उत्तरत्रसम्बन्धः ॥ ५ ॥

॥ इति पञ्चस्य द्वितीयेष्टत्रिंशोवर्गः ॥ ३८ ॥

अथ षष्ठी–

प्रतिप्राशव्याँइतःसम्यञ्चाबर्हिराशाते । नतावाजेषुवायतः ॥ ६ ॥

प्रति । प्राशव्यान् । इतः । सम्यञ्चा । बर्हिः ।
आशाते इति । न । ता । वाजेषु । वायतः ॥ ६ ॥

ता तौ देवेभ्यो हविषां दातारौ दंपती प्राशव्यान् अशभोजने प्रपूर्वस्यास्य औणादिकोभावे उण्प्रत्ययः प्राशुर्भक्षणं तस्मै साधून् हितान्वा अन्नादीन्प्रतीतः प्रतिगच्छतः यद्वा प्राशितव्यान् अत्रयर्णलोपः तावेव सम्यंचा सम्यंचौ समीचीनौ संगतौ बर्हिर्यज्ञं आशाते आश्नाते । तत्र द्रव्यैर्व्याप्नुतः तस्मात्तौ यष्टारौ भार्यापती वाजेषु देवैर्दत्तेषु अन्नेषु न वायतः वयतिर्गत्यर्थः न गच्छतः सर्वदा अन्नसहितौ तिष्ठतामित्यर्थः ॥ ६ ॥

अथ सप्तमी–

नदेवानामपिह्नुतःसुमतिंनजुगुक्षतः । श्रवोबृहद्विवासतः ॥ ७ ॥

न । देवानाम् । अपि । ह्नुतः । सुऽमतिम् । न ।
जुघुक्षतः । श्रवः । बृहत् । विवासतः ॥ ७ ॥

एतौ दम्पती देवानां इन्द्रादीनां न अपिह्नुतः अपलापं न कुरुतः अपह्नवोपलापः देवेभ्योहविः प्रदास्यामइति प्रतिज्ञाय पुनरदानमपलापनं ह्नुङ् अपनये । कथं नापलपन्तीत्य-पेक्ष्यते तदाह सुमतिं युष्मदीयां शोभनां मतिं-न जुगुक्षतः जुघुक्षतः न संवरीतु-मिच्छतः संवारणमाच्छादनं न छादयतइत्यर्थः किन्तु स्तुतिं कुरुतः । गुहूसंवरणे सनि-ग्रहगुहोश्चेतीट्प्रतिषेधः ढत्वषत्वभावौ संहिताकालेभषूभावोनास्ति छान्दसत्वात् । किञ्च बृहत् देवेभ्योदीयमानत्वात् महत् श्रवः अवइत्यन्ननाम महदन्नं विवासतः युष्मभ्यं प्रयच्छ-तः विवासतिः परिचरणकर्मा दानमपिच परिचरणमेव । देवैर्दत्तमन्नं घृतादिभिर्मिश्रीकृत्य पुनः पुनर्यजतइत्यर्थः ॥ ७ ॥

अथाष्टमी—

पुत्रिणाताकुमारिणाविश्वमायुर्व्यश्नुतः । उभाहिरण्यपेशसा॥८॥

पुत्रिणा । ता । कुमारिणा । विश्वम् । आयुः । वि ।
अश्नुतः । उभा । हिरण्यऽपेशसा ॥ ८ ॥

पुत्रिणा पुत्रवन्तौ तत्रापि कुमारिणा षोडशवर्षदेशीयपुत्रवन्तौ हिरण्यपेशसा हिर-ण्मयैराभरणैरलंकृतरूपौ उभा उभौ ता तौ दंपती विश्वं सर्वमायुरायुष्यं व्यश्नुतः व्या-प्नुतः यज्ञेन तयोः पुत्रादिकं धनमायुश्च संभवतीत्यर्थः ॥ ८ ॥

अथ नवमी—

वीतिहोत्राकृतद्वसूदशस्यन्तामृताय्कम् ।
समूधोरोमशंहतोदेवेषुकृणुतोदुवः ॥ ९ ॥

वीतिऽहोत्रा । कृतद्वसू इति कृतत्ऽवसू । दशस्यन्ता । अमृताय ।
कम् । सम् । ऊधः । रोमशम् । हतः । देवेषु । कृणुतः । दुवः ॥ ९ ॥

वीतिहोत्रा वीतिहोत्रौ वीतिः प्रियकरो होत्रा यज्ञोययोस्तौ अनेन यज्ञेन तयोः सुखादिकं संभवति तादृशौ। यद्वा वीतिः कान्त्यर्थः होत्रेतिवाङ्नाम अस्मद्विषयां स्तुतिं कुरुतमिति पृथक्पृथक् देवैः काम्यमानस्तुती अतएव कं सुखमदं हवीरूपमन्नं दशस्यन्ता देवेभ्यः प्रयच्छन्तौ कृतद्वस्तकारोपजनश्छान्दसः याचमानत्वधनौ पात्रेपूप्युकथनावित्यर्थः। एवंविधौ दंपती अमृताय अमरणाय सन्तानाभिवृद्धये रोमशं रोमवन्तं वृषणं ऊधः योनिंच संहतः संयोजयतइति मैथुनमनूद्यते ततः सपुत्रादिकौ तौ देवेषु दुवः स्तुत्यन्नदानरूपां परिचर्यां कृणुतः कुरुतः पश्चाभिर्दंपती अस्तूयेताम् ॥ ९ ॥

अथ दशमी—

आशर्मंपर्वतानांवृणीमहेनदीनाम्। आविष्णोःसचाभुवः॥१०॥३९॥

आ। शर्म। पर्वतानाम्। वृणीमहे। नदीनाम्। आ। विष्णोः। सचाऽभुवः॥ १० ॥ ३९ ॥

एवदादिषु दंपत्योराशिषः यथारोचयं पर्वतानां स्वर्गफलपुष्पसहितलतादिभिर्यत शर्म सुखं तत्तेषां स्थैर्यलक्षणं सुखंवा नदीनाञ्च उभयकूलवासिभिर्मुनिभिर्मनुष्यैर्वा जपाद्यनुष्ठानेकृते यत्सुखं तासां भवति तत्सुखं एकत्रस्थित्वा सकलपदार्थभोक्तृत्वलक्षणं अनुष्ठानलक्षणं सुखमावृणीमहे। संभजामहे सचाभुवः देवैः सहभवतः देवसहितस्य विष्णोरपि शत्रुहननलक्षणं यत्सुखं तदपि वयमावृणीमहे बाधाभावाद्धविःप्रदानेन देवैः सहवर्तामहइत्यर्थः॥ १० ॥

॥ इति षष्ठस्य द्वितीये एकोनचत्वारिंशोवर्गः ॥ ३९ ॥

अथैकादशी—

ऐतुपूषारयिर्भगःस्वस्तिसर्वधातमः। उरुरध्वास्वस्तये॥ ११ ॥

आ। एतु। पूषा। रयिः। भगः। स्वस्ति। सर्वऽधातमः। उरुः। अध्वा। स्वस्तये॥ ११ ॥

रयिर्धनानां दाता भगोभजनीयः सर्वैः सर्वधातमः सर्वेषां धारयितृतमः सर्वेषांधनादिभिः पोषयितृतमः पूषा एतन्नामकोदेवः स्वस्ति क्षेमेण ऐतु अस्मान्प्रतिगच्छतु ततः मार्गरक्षके पूषण्यागतेसति उरुः विस्तीर्णः अध्वा मार्गः स्वस्तये अस्माकमविनाशाय भवतु॥ ११ ॥

अथ द्वादशी--

अरमतिरनर्वणोविश्वोदेवस्यमनसा। आदित्यानामनेहइत्॥१२॥

अरमतिः। अनर्वणः। विश्वः। देवस्य। मनसा। आदित्यानाम्।
अनेहः। इत्॥ १२॥

देवानांमध्ये पूषणमाह अनर्वणः अर्वागन्तव्यः शत्रुभिरगन्तव्यस्य अपत्यूतस्य देवस्य द्योतमानस्य पूष्णः विश्वः सर्वः स्तोतृजनः मनसा श्रद्धया भक्त्यैव अरमतिः अलंमतिः पर्याप्तस्तुतिर्भवति। तथाहि आदित्यानामदितेः पुत्राणां देवानां दानमनेहइव अपापमेवखलु। तस्मादन्नादिप्राप्तये स्तोतृजनः पूषणं स्तौतीत्यर्थः॥ १२॥

अथ त्रयोदशी--

यथानोमित्रोअर्यमावरुणःसन्तिगोपाः। सुगाऋतस्यपन्थाः॥१३॥

यथा। नः। मित्रः। अर्यमा। वरुणः। सन्ति। गोपाः।
सुऽगाः। ऋतस्य। पन्थाः॥ १३॥॥

मित्रः अर्यमा वरुणः एतेत्रयोदेवाः नोस्माकं गोपाः गोपायितारोयथासन्ति भवन्ति यैर्मार्गैःवयमेतैः पालयितव्याभवाम ते ऋतस्य सत्यभूतस्य पन्थाः पन्थानः सुगाः एषां सुगमनाभवन्तु तैरागत्यास्मान् यज्ञमार्गेस्थापयन्त्वित्यर्थः॥ १३॥

अथ चतुर्दशी--

अग्निंवःपूर्व्यंगिरादेवमीळेवसूनाम्।
सपर्यन्तःपुरुप्रियंमित्रंनक्षेत्रसाधसम्॥ १४॥

अग्निम्। वः। पूर्व्यम्। गिरा। देवम्। ईळे। वसूनाम्।
सपर्यन्तः। पुरुऽप्रियम्। मित्रम्। न। क्षेत्रऽसाधसम्॥ १४॥

हे देवाः वोयुष्माकं पूर्व्यं मुख्यं पुरतोगन्तारंवा देवं स्वभासा दीप्यमानमग्निं वसूनां प्राप्तये गिरा स्तुतिलक्षणयावाचा ईळे अहं स्तौमि। किञ्च सपर्यन्तःयुष्मान्परिचरन्तोमनुष्याःपु-

रुयिं बहुविधमियं बहूनामभिमतदानेन प्रीणयितारंवा क्षेत्रसाधसं क्षियन्ति निवसन्ति कर्मकरणार्थमत्रेति क्षेत्रोयज्ञः तस्य साधकं । साधने दृष्टान्तः—मित्रंन यथा मित्रं सुहृद अन्यस्य क्षेत्रं केदारादिकं साधयति तद्वद् यज्ञसाधकमग्निं वसुप्राप्तये स्तुवन्ति ॥ १४ ॥

अथ पञ्चदशी—

मुक्षुदेववतोरथःशूरोवापृत्सुकासुंचित् ।
देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत् ॥ १५ ॥

मुक्षु । देवऽवतः । रथः । शूरः । वा । पृत्ऽसु । कासु । चित् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि ।
इत् । अयज्वनः । भुवत् ॥ १५ ॥

देववतः देवायष्टव्यतया यस्यसन्ति सदेववान् तस्य रथोदेवैर्दत्तः मक्षु शीघ्रं दुर्गमपि प्रविशति सर्वत्रामतिहतगतिरित्यर्थः । तत्रदृष्टान्तः—वाशब्दोवोपमानवाची यथा शूरोयोद्धा कासु चित् पृत्सु पृतनासु तद्वद् योदेवानां इदवधारणे मनएवइयक्षति स्तुतिभिः पूजयितुमिच्छति यद्वा देवानां मनइयक्षति हविर्भिर्यष्टुमिच्छति सयजमानः अयज्वनःयागं अकुर्वतोजनान् अभिभुवद् स्वसामर्थ्येनाभिभवत्येव । इयक्षन्ति यक्षपूजायाम् यजदेवपूजादिषु उभयोरप्यासस्यसम्प्रसारणं छान्दसं । पूर्वस्य स्कोः संयोगाद्योरिति ककारलोपः ॥ १५ ॥

अथ षोडशी—

नयजमानरिष्यसिनसुन्वाननदेवयो ।
देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत् ॥१६॥

न । यजमान । रिष्यसि । न । सुन्वान् । न । देवयो इति देवऽयो ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि ।
इत् । अयज्वनः । भुवत् ॥ १६ ॥

हे यजमान योभवान् देवानां न इयक्षति सत्वं नरिष्यति विनष्टोनभवसि किन्तु पुत्रपौत्रादिभिर्वर्धसे । हे सुन्वान सोमाभिषवंकुर्वन्न यः सुन्वन् तेषां मनइयक्षति सत्वमपि नरिष्यसि । हे देवयोदेवान् कामयमान योदेवानिपक्षति तादृशस्त्वमपि नरिष्यसि किन्तु धनादिभिर्वर्धसे देवानां मनोयोयजमानोयष्टुमिच्छति सयागमकुर्वतो जनानभिभवति ॥१६॥

अथ सप्तदशी—

नकिष्टंकर्मणानशन्नप्रयोषन्नयोषति ।
देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत्॥१७॥

नकिः । तम् । कर्मणा । नशत् । न । प्र । योषत् । न । योषति ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् ।
अयज्वनः । भुवत् ॥ १७ ॥

यो यजमानो देवानां मनोयष्टुमिच्छति तं नकिर्नकश्चिदपि नशत् स्वकीयेन कर्मणा नव्याप्नोति नशतिर्व्याप्तिकर्मा । किञ्च सयष्टा न प्रयोषत् स्वस्मात्स्थानान्नविभक्तः पृथक्कृतोनभवति । किञ्च नयोषति पुत्रादिभिर्धनादिभिश्च नविभक्तोभवति । युमिश्रणामिश्रणयोरित्यस्य उभयत्रलेट्यडागमः । शिष्टं व्याख्यातम् ॥ १७ ॥

अथाष्टादशी—

असदत्रसुवीर्यमुतत्यदाश्वश्व्यम् ।
देवानांयइन्मनोयजमानइयक्षत्यभीदयज्वनोभुवत् ॥१८॥ ४०॥

असत् । अत्र । सुवीर्यम् । उत । त्यत् । आशुअश्व्यम् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् ।
अयज्वनः । भुवत् ॥ १८ ॥ ४० ॥

योयजमानो देवानां मनोयष्टुमिच्छति अत्रास्मिन्यजमाने शुवीर्यं शोभनवीर्येपेतं पुत्रादिकमसव भवत्येव उतापिच आश्वश्व्यं आशुगमनाश्वसंघयुक्तं त्यव् तद्धनादिकं तस्मिन्यजमाने भवति देवानां मनोयोजनः हविर्भिर्यष्टुमिच्छति यद्वा पूजयितुमिच्छति सजनः अयज्वनः सर्वान् अभिभवत्येव ॥ १८ ॥

॥ इति प्रथमस्य द्वितीये चत्वारिंशोवर्गः ॥ ४० ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके द्वितीयोध्यायः समाप्तः ॥२॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ षष्ठस्यतृतीयोध्यायआरभ्यते प्रकृतानीति त्रिंशदृचं द्वितीयं सूक्तम् तत्रेयमनुक्रमणिका—प्रकृतानित्रिंशन्मेधातिथिरिति । काण्वोमेधातिथिर्ऋषिः परंगायत्रं प्रागयत्समेरिति परिभाषया गायत्रीछन्दः अनादेशपरिभाषयेन्द्रोदेवता । महाव्रतेनिष्केवल्ये गायत्रतृचाशीतौ एतत्सूक्तम् तथैवपञ्चमारण्यके शौनकेनसूत्रितम्—प्रकृतान्यृजीषिण आयाय्येअग्निमिन्धतइति । अतिरात्रे प्रथमेपर्याये मैत्रावरुणशस्त्रे प्रकृतानीतितृचोनुरूपः । सूत्रितश्च—प्रवइन्द्रायमादनं प्रकृतान्यृजीषिणइति । तस्मिन्नेवशस्त्रे प्रतिश्रुतायेत्याद्याः पञ्चदशर्चः । सूत्र्यतेहि—प्रतिश्रुतायवोधृषदिति पञ्चदशेति । दशमेहनि प्रातःसवनेअच्छावाकशस्त्रे पत्नीयजमानस्थाने प्रतिश्रुतायेतितृचः । सूत्रितञ्च—प्रतिश्रुतायवोधृषदितितृचाविति । अहीनान्तर्गतस्यातिरात्रस्य प्रथमेपर्याये होतुः पन्यइदुपगायतेत्यनुरूपः ।

तत्र प्रथमा—

प्र॒कृ॒तान्यृ॑जी॒षिणः॒ कण्वा॒ इन्द्र॑स्य॒ गाथ॑या ।
मदे॒ सोम॑स्य वोचत ॥ १ ॥

प्र । कृ॒तानि॑ । ऋ॒जी॒षिणः॑ । कण्वाः॑ । इन्द्र॑स्य । गाथ॑या ।
मदे॑ । सोम॑स्य । वो॒च॒त॒ ॥ १ ॥

हे कण्वाः ऋजीषिणऋजीषवतः सोमस्य कृतानि कर्माणि इन्द्रस्य गाथया इन्द्रस्य वाचा मदे अस्य मदे संजातेसति प्रवोचत प्रब्रूत ॥ १ ॥

अथ द्वितीया—

यः सृबि॑न्द॒मन॑र्शनिं पिप्रुं॑ दा॒सम॑ही॒शुव॑म् । वधी॑दु॒ग्रो रि॒णन्न॒पः ॥ २ ॥

यः । सृबि॑न्दम् । अन॑र्शनिम् । पिप्रु॑म् । दा॒सम् ।
अ॒ही॒शुव॑म् । वधी॑त् । उ॒ग्रः । रि॒णन् । अ॒पः ॥ २ ॥

यइन्द्र उग्रःउदूर्णस्तेजस्वीवा सोऽपउदकानि रिणन् प्रेरयन् सृबिन्दनामकं शत्रुं अनर्श-निमनर्शनामकं पिप्रुं पिप्रुनामकंच दासंच अहीशुवंच शत्रुं वधीद् अवधीज्जघान ॥ २ ॥

अथ तृतीया–

न्यर्बुदस्यविष्टपंवर्ष्माणंबृहतस्तिर । कृपेतदिन्द्रपौंस्यम् ॥ ३ ॥

नि । अर्बुदस्य । विष्टपम् । वर्ष्माणम् । बृहतः ।
तिर । कृपे । तत् । इन्द्र । पौंस्यम् ॥ ३ ॥

हे इन्द्र बृहतोमहतोर्बुदस्य मेघस्य वर्ष्माणमुदकस्य वारकं विष्टपं स्थानं निविर वि-ध्य तत्प्रसिद्धं पौंस्यं बलं चकृषे कुरु ॥ ३ ॥

अथ चतुर्थी–

प्रतिश्रुतायवोधृषत्तूर्णाशंनगिरेरधि । हुवेसुशिप्रमूतये ॥ ४ ॥

प्रति । श्रुताय । वः । धृषत् । तूर्णाशम् । न । गिरेः ।
अधि । हुवे । सुऽशिप्रम् । ऊतये ॥ ४ ॥

हे स्तोतारोवोयुष्माकं श्रुताय स्तुतीनां श्रवणाय रक्षणायच धृषच्छत्रून् धृषन्तं सुशिप्रं सुहनुमिन्द्रं प्रति हुवे ह्वयामि। तूर्णाशं न यथा घर्मेभितप्तः पुमान् तूर्णाशमुदकं। तथा चयास्कः-तूर्णाशमुदकंभवति तूर्णमश्नुतेरिति। गिरेरधि मेघं प्रति ह्वयति। पर्वतः गिरिरिति मेघनामसुपाठात् तद्वदित्यर्थः। किमर्थं ऊतये रक्षणाय ॥ ४ ॥

अथ पञ्चमी–

सगोरश्वस्यविव्रजंमन्दानःसोम्येभ्यः । पुरंनशूरदर्षसि ॥ ५ ॥ १॥

सः । गोः । अश्वस्य । वि । व्रजम् । मन्दानः ।
सोम्येभ्यः । पुरम् । न । शूर । दर्षसि ॥ ५ ॥ १ ॥

---

१ नि० ५. १६. ।

हे शूरेन्द्र सः प्रसिद्धः त्वं मन्दानोमोदमानः गोरस्वस्यचव्रजं निवासस्थानं सोम्येभ्यः सोमार्हेभ्यः पुरंन शत्रूणां नगरमिव विदर्पसि विवृतद्वारंकरोषि ॥ ५ ॥

॥ इति पष्ठस्य तृतीये प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी–

यदिमेरारणःसुतउक्थेवादधसेचनः । आरादुपस्वधागहि ॥ ६ ॥

यदि । मे । ररणः । सुते । उक्थे । वा । दधसे ।
चनः । आरात् । उप । स्वधा । आ । गहि ॥ ६ ॥

हे इन्द्र मे मम सुते अभिषुते सोमे उक्थे स्तोत्रेवा यदि रारणः रमसे चनोन्नं यदिच दधसे मह्यं प्रयच्छसि तर्हि आराद्दूरात् स्वधान्नेनोपागहि उपागच्छ ॥ ६ ॥

अथ सप्तमी–

वयंघातेअपिष्मसिस्तोतारइन्द्रगिर्वणः । त्वन्नोजिन्वसोमपाः॥७॥

वयम् । घ । ते । अपि । स्मसि । स्तोतारः । इन्द्र ।
गिर्वणः । त्वम् । नः । जिन्व । सोमऽपाः ॥ ७ ॥

हे गिर्वणोगीर्भिर्वननीयेन्द्र ते तवापि वयं घ वयंखलु स्तोतारः स्मसि भवामः । हे सोमपाः सोमस्यपातरिन्द्र त्वं नोस्मान् जिन्व प्रीणयसि ॥ ७ ॥

अथाष्टमी–

उतनःपितुमाभरसंरराणोअविक्षितम् । मघवन्भूरितेवसु ॥ ८ ॥

उत । नः । पितुम् । आ । भर । सम्ऽरराणः ।
अविऽक्षितम् । मघऽवन् । भूरि । ते । वसु ॥ ८ ॥

उत अपिच हे मघवन् संरराणः संरममाणस्त्वमविक्षितमक्षीणं पितुमन्नं । पृक्षः पितुरिति अन्ननामसुपाठात् । नोस्मभ्यमाभराहर ते तव वसु धनं भूरि अधिकं हि ॥ ८ ॥

अथ नवमी—

उतनोगोमंतस्कृधिहिरण्यवतोअश्विनः । इळाभिःसंरभेमहि ॥९॥

उत । नः । गोऽमंतः । कृधि । हिरण्यऽवतः ।
अश्विनः । इळाभिः । सम् । रभेमहि ॥ ९ ॥

उतापिच हे इन्द्र नोस्मान् गोमतोगोमिनः कृधि कुरु अश्विनोश्वयुक्तान्कृधि हिरण्यवतो-मेघवतश्च कृधि इळाभिरन्नैश्च संरभेमहि वयं संरब्धाभवेम ॥ ९ ॥

अथ दशमी—

बृबदुक्थंहवामहेसृप्रकरस्नमूतयें । साधुकृण्वन्तमवसे ॥१०॥२॥

बृवत्ऽउक्थम् । हवामहे । सृप्रऽकरस्नम् ।
ऊतये । साधु । कृण्वन्तम् । अवसे ॥ १० ॥ २ ॥

ऊतये लोकस्य रक्षणाय सृप्रकरस्नं प्रसृतबाहुं । करस्नौ बाहू कर्मणां प्रस्नातारावितियास्कवचनात् । अवसे लोकस्यपालनाय साधु कृण्वन्तं साधुकुर्वन्तं बृबदुक्थं बृहदुक्थं इन्द्रं हवामहे ह्वयामः । तथाचयास्कः—बृबदुक्थोमहदुक्थोवक्तव्यमस्माउक्थमिति ॥ १० ॥

॥ इति प्रथमस्य तृतीये द्वितीयोवर्गः ॥ २ ॥

अथैकादशी—

यःसंस्थेचिच्छतक्रतुरादींकृणोतिवृत्रहा । जरितृभ्यःपुरूवसुः ॥११॥

यः । सम्ऽस्थे । चित् । शतऽक्रतुः । आत् । ईम् ।
कृणोति । वृत्रऽहा । जरितृऽभ्यः । पुरुऽवसुः ॥ ११ ॥

यः प्रसिद्धइन्द्रः संस्थे संग्रामे शतक्रतुर्बहुकर्माभवति अपिच आदनन्तरमीमिदं शत्रुवधादिकं कृणोति करोति चिदेव अयं इन्द्रोवृत्रहा शत्रूणां हन्ताभवति । किञ्च जरितृभ्यः स्तोतृणामर्थे पुरुवसुः बहुधनोभवति न स्वार्थमित्यर्थः ॥ ११ ॥

---

१ नि० ६. १७. । २ नि० ६. ४ ।

अथ द्वादशी–

सनःशक्रश्चिदाशकद्दानवाँअन्तराभरः । इन्द्रोविश्वाभिरूतिभिः॥१२॥

सः । नः । शक्रः । चित् । आ । शकत् । दानऽवान् ।
अन्तरऽआभरः । इन्द्रः । विश्वाभिः । ऊतिऽभिः ॥ १२ ॥

शक्रः शक्तः सइन्द्रः नश्चिदस्मानप्याशकच्छक्तान्करोतु अपिचेन्द्रोदानवान्विश्वाभिः सर्वैरूतिभिः पालनैरन्तराभरः अन्तराहरः छिद्राणामापूरकश्छिद्रापिधायीत्यर्थः ॥ १२ ॥

अथ त्रयोदशी–

योरायो३वनिर्महान्त्सुपारःसुन्वतःसखा ।तमिन्द्रमभिगायत॥१३॥

यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः ।
सखा । तम् । इन्द्रम् । अभि । गायत ॥ १३ ॥

यइन्द्रो रायो धनस्यावनिः पालकोमहान् सर्वोत्तमः सुपारः शोभनपारणश्च भवति यश्च सुन्वतः सोमाभिषवंकुर्वतो यजमानस्य सखा मित्रोभवति तमिन्द्रमभिगायताभिष्टुवत । हेस्तोतारइतिशेषः ॥ १३ ॥

अथ चतुर्दशी–

आयन्तारंमहिस्थिरंपृतनासुश्रवोजितम्। भूरेरीशानमोजसा॥१४॥

आऽयन्तारम् । महि । स्थिरम् । पृतनासु ।
श्रवःऽजितम् । भूरेः । ईशानम् । ओजसा ॥ १४ ॥

आयन्तारमागन्तारं महि महान्तं पृतनासु संग्रामेषु स्थिरमचलं श्रवोजितं श्रवसोजेतारं ओजसा बलेन भूरेर्बहोर्धनस्य ईशानमीश्वरमभिगायत ॥ १४ ॥

अथ पञ्चदशी–

नकिरस्यशचीनांनियन्तासूनृतानाम्।नकिर्वक्तानदादिति॥१५॥ ३॥

नकिः । अस्य । शचीनाम् । निऽयन्ता । सूनृतानाम् ।
नकिः । वक्ता । न । दात् । इति ॥ १५ ॥ ३ ॥

अस्येन्द्रस्य सूनृतानां शोभनानां शचीनां कर्मणां धीः शचीति कर्मनामसुपाठात् नकिर्नकश्चिन्नियन्ता नियामकः अयमिन्द्रोनदादिति नप्रयच्छतीति नकिर्वक्ता नकश्चिद्वदति । किंतु सर्वोपि जनोयं प्रदातेत्येव ब्रवीतीत्यर्थः ॥ १५ ॥

॥ इति षष्ठस्य तृतीये तृतीयोवर्गः ॥ ३ ॥

अथ षोडशी—

नूनंब्रह्मणामृणंप्राशूनामस्तिसुन्वताम् । नसोमोंअप्रतापपे॥१६॥

न । नूनम् । । ब्रह्मणाम् । ऋणम् । प्राशूनाम् । अस्ति । सुन्वताम् ।
न । सोमः । अप्रता । पपे ॥ १६ ॥

प्राशूनां ये सोमं प्राश्नुवन्ति ते प्राशवस्तेषां सोमं सुन्वतां ब्रह्मणां ब्राह्मणानां ऋणं देवऋणं ननूनमस्ति नखलुविद्यते । तथाचश्रूयते—एषवाअनृणोयः पुत्री यज्वाब्रह्मचारीति[1] । किंच अप्रताऽविस्तीर्णधनेन सोमोनपपे न पीयते प्रभूतधनेनैव सोमः पीयतइत्यर्थः ॥ १६ ॥

अथ सप्तदशी—

पन्य्इदुपगायतपन्यंउक्थानिशंसत । ब्रह्माकृणोतपन्यइत् ॥ १७॥

पन्यैं । इत् । उप । गायत । पन्यैं । उक्थानि । शंसत ।
ब्रह्म । कृणोत । पन्यैं । इत् ॥ १७ ॥

हे उपगातारः पन्येइत् स्तुत्यएवेन्द्रे उपगायत उपगानं कुरुत । किंच पन्ये स्तुत्यएवेन्द्रे उक्थानि स्तोत्राणि शंसत हे स्तोतारइतिशेषः । पन्यइत् स्तुत्यएवेन्द्रे ब्रह्मब्रह्माण्यन्नानि स्तोत्राणि कृणोत कुरुत ॥ १७ ॥

---

१ तै० सं० ६. ३. १०. १

अथाष्टादशी–

पन्यआदर्दिरच्छतासहस्रावाज्यवृतः। इन्द्रोयोयज्वनोवृधः॥१८॥

पन्यः। आ। दर्दिरत्। शता। सहस्रा। वाजी। अवृतः। इन्द्रः। यः। यज्वनः। वृधः॥ १८॥

योवाजी बलवान् शता वीराणां शतानि सहस्रा सहस्राणि चादर्दिरदाभिमुख्येन दारयति सोयमिन्द्रः शत्रुभिरवृतः पन्यः स्तुत्योभवति यज्वनो विधिनेष्टवतो यजमानस्य वृधोवर्धयिताच भवति॥ १८॥

अथैकोनविंशी–

विपूचरस्वधाअनुकृष्टीनामन्वाहुवः। इंद्रपिबंसुतानाम्॥ १९॥

वि। सु। चर। स्वधाः। अनु। कृष्टीनाम्। अनु। आऽहुवः। इन्द्र। पिब। सुतानाम्॥ १९॥

हे इन्द्र आहुवः आह्वातव्यस्त्वं कृष्टीनां मनुष्याणां स्वधाः हवींष्यनु सु सुष्ठु विचर। द्वितीयोनुपूरणः। सुतानामभिषुतान् सोमांश्च पिब॥ १९॥

अथ विंशी–

पिबस्वधैनवानामुतयस्तुग्र्येसचा। उतायमिंद्रयस्तव॥ २०॥ ४॥

पिब। स्वऽधैनवानाम्। उत। यः। तुग्र्ये। सचा। उत। अयम्। इन्द्र। यः। तव॥ २०॥ ४॥

हे इन्द्र स्वधैनवानां स्वधैनवान् स्वभूतपयसोधेनोः संबन्धिनः सोमान् धेन्वा क्रीतानित्यर्थः। तथाचश्रूयते–धेन्वाक्रीणातीति[1]। उतापिच यः सोमस्तुग्र्ये उदके। तुग्र्येत्युदकनामसुपाठात्। सचा संसृष्टस्तमपि सोमं पिब। उतापिच यः सोमः तवत्वदीयस्त्वामुद्दिश्य गृहीतः सोयं त्वया पातव्यइतिशेषः॥ २०॥

॥ इति षष्ठस्य तृतीये चतुर्थोवर्गः॥ ४॥

---

1 तै॰ सं॰ ६. १. १०.।

अथैकविंशी—

अतीहिमन्युषाविणंसुषुवांसमुपारणे । इमंरातंसुतंपिब ॥ २१ ॥

अति । इहि । मन्युऽसाविनम् । सुसुऽवांसम् । उपऽअरणे ।
इमम् । रातम् । सुतम् । पिब ॥ २१ ॥

हे इन्द्र मन्युषाविणं क्रोधेन सोमं सुन्वन्तमतीत्यविगच्छ तथोपारणे ब्राह्मणा उपेत्य यस्मिन्देशे न रमन्ते सउपारणस्तस्मिन्देशे सुषुवांसं सुन्वन्तमतीहि इमं रातं ब्राह्मणोपद्रवरहितेदेशेस्माभिर्दत्तमिमं सुतं सोमं पिब ॥ २१ ॥

अथद्वाविंशी—

इहितिस्रःपरावतइहिपंचजनाँअति । धेनाइंद्राचाकशत् ॥२२॥

इहि । तिस्रः । पराऽवतः । इहि । पञ्च । जनान् । अति । धेनाः ।
इन्द्र । अवऽचाकशत् ॥ २२ ॥

हे इन्द्र धेनाः अस्मदीयाः स्तुतीः अवचाकशत् पश्यन् सत्वं परावतोदूरात् आरे परावतइति दूरनामसुपाठात् तिस्रः अग्रपृष्ठपार्श्वदिशः इहि गच्छ अनेनाग्रतः पृष्ठतः पार्श्वतश्चेन्द्रस्यागमनमाशास्ते । अपिच जनान्मनुष्यान् अतीहि अतिगच्छ । यद्वा गन्धर्वाः पितरोदेवा असुरारक्षांसिच पञ्चजनास्तानतीहीत्यर्थः । तथाचयास्कः—गन्धर्वाः पितरोदेवा असुरा रक्षांसीत्येके चत्वारोवर्णा निषादःपञ्चमइत्यौपमन्यवइति ॥ २२ ॥

अथ त्रयोविंशी—

सूर्योरश्मिंयथासृजात्वायच्छन्तुमेगिरः । निम्नमापोनसध्र्यक् ॥२३॥

सूर्यः । रश्मिम् । यथा । सृज । आ । त्वा । यच्छन्तु ।
मे । गिरः । निम्नम् । आपः । न । सध्र्यक् ॥ २३ ॥

हे इन्द्र सूर्योयथा रश्मिं रश्मीन्किरणानश्वमयमहान्या विसृजति तथा मर्त्यं धनं विसृज । अपिच मे मदीयागिरः स्तुतयः सध्र्यक् सह त्वा त्वामायच्छन्तु निम्नमापोन यथा निम्नदेशमापः सह परिगृह्णन्ति तद्वदित्यर्थः ॥ २३ ॥

---

१ नि० ३. ८. ।

अथ चतुर्विंशी–

अध्वर्यवातुहिषिञ्चसोमंवीरायशिप्रिणे। भरासुतस्यपीतये ॥२४॥

अध्वर्यो इति। आ। तु। हि। सिञ्च। सोमम्।
वीराय। शिप्रिणे। भर। सुतस्य। पीतये ॥ २४ ॥

हे अध्वर्यो शिप्रिणे हनूमते वीराय शूरायेन्द्राय सोमं तु हि क्षिप्रमेवासिंच। सुतस्य सुतं सोमं पीतये पानायच भराहरच ॥ २४ ॥

अथ पञ्चविंशी–

यउद्नःफलिगंभिनन्न्यक्सिन्धूँरवासृजत्। योगोषुपक्वंधारयत्॥२५॥५॥

यः। उद्नः। फलिऽगम्। भिनत्। न्यक्। सिन्धून्।
अवऽअसृजत्। यः। गोषु। पक्वम्। धारयत्॥ २५ ॥ ५॥

यउद्नःउदकार्थं फलिगं मेघं रैवतः फलिगइति मेघनामसुपाठात् भिनत् अभिनत् सिन्धून्यश्चान्तरिक्षाद्न्यगर्वागवासृजत्। यश्च गोषु पक्वं पयोधारयदधारयत् सइन्द्रइत्यर्थः ॥ २५ ॥

॥ इति षष्ठस्य तृतीये पंचमोवर्गः ॥ ५॥

अथ षड्विंशी–

अहन्वृत्रमृचीषमऔर्णवाभमहीशुवम्। हिमेनाविध्यदर्बुदम्॥२६॥

अहन्। वृत्रम्। ऋचीषमः। और्णऽवाभम्। अहीशुवम्।
हिमेन। अविध्यत्। अर्बुदम् ॥ २६॥

ऋचीषमो ऋचा दीप्यासमइन्द्रो वृत्रं वृत्रनामकं शत्रुमहन् अहनत् जघान तथा और्णवाभमौर्णवाभनामकमहीशुवमहीशुवनामकंच शत्रुमहन् तथा हिमेन तुषारेणोदकेन वार्बुदं मेघमविध्यत् ॥ २६ ॥

अथ सप्तविंशी–

प्रवंउग्रायनिष्टुरेषाह्लायप्रसक्षिणे। देवत्तंम्ब्रह्मगायत ॥ २७ ॥

प्र । वः । उग्राय । निःऽतुरे । अषाळ्हाय । प्रऽसक्षिणे ।
देवत्तम् । ब्रह्म । गायत ॥ २७ ॥

हे उद्गातारो वो यूयं उग्रायोद्गूर्णाय निष्टुरे शत्रून्निस्तरते अषाळ्हाय शत्रूणामभिभवित्रे प्रसक्षिणे प्रसहनशीलायेन्द्राय देवत्तं देवप्रसादलब्धं ब्रह्म स्तोत्रं प्रगायत ॥ २७ ॥

अथाष्टाविंशी—

योविश्वान्यभिव्रतासोमस्यमदेअन्धसः । इन्द्रोदेवेषुचेतति॥२८॥

यः । विश्वानि । अभि । व्रता । सोमस्य । मदे ।
अन्धसः । इन्द्रः । देवेषु । चेतति ॥ २८ ॥

अन्धसोदयमानस्य सोमस्य मदे संजाते विश्वानि सर्वाणि व्रता व्रतानि कर्माणि यइन्द्रो- देवेष्वभिचेतति ज्ञापयति तस्माइंद्राय देवत्तं ब्रह्मगायतेत्यर्थः ॥ २८ ॥

अथैकोनत्रिंशी—

इहत्यासधमाद्याहरीहिरण्यकेश्या । वोळ्हामभिप्रयोहितम् ॥२९॥

इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या ।
वोळ्हाम् । अभि । प्रयः । हितम् ॥ २९ ॥

इहयज्ञे त्या तौ प्रसिद्धौ सधमाद्या सहमाद्यन्तौ हिरण्यकेश्या हिरण्यकेश्यौ हरी एतन्नामकौ अश्वौ हितं हितकरं प्रयः सोमरूपमन्नं अभि अभिलक्ष्य वोळ्हां इन्द्रं वहतां प्रापयतामिति ॥ २९ ॥

अथ त्रिंशी—

अर्वाञ्चंत्वापुरुष्टुतप्रियमेधस्तुताहरी । सोमपेयायवक्षतः॥३०॥६॥

अर्वाञ्चम् । त्वा । पुरुऽस्तुत । प्रियमेधऽस्तुता ।
हरी इति । सोमऽपेयाय । वक्षतः ॥ ३० ॥ ६ ॥

हे पुरुहूत इन्द्र त्वा त्वां मियमेधस्तुता हरी अश्वौ सोमपेयाय सोमपानायार्वाञ्चमस्मदभिमुखं वक्षतोवहतः ॥ ३० ॥

॥ इति पञ्चस्य तृतीये षष्ठोवर्गः ॥ ६ ॥

वयंघत्वेत्येकोनविंशर्चं तृतीयंसूक्तं काण्वस्यमेधातिथेरार्षं बृहतीछंदस्कम् षोडश्याद्यास्तिस्रोगायत्र्यः एकोनविंशयनुष्टुप् इन्द्रोदेवता। तथाचानुक्रांतम्—वयंघैकोना मेध्यातिथिर्बार्हतं त्रिगायत्र्यनुष्टुबन्तमिति। महाव्रते निष्केवल्ये बार्हततृचाशीतावादितः पञ्चदशर्चः।तथैवपञ्चमारण्यके शौनकेनसूत्र्यते—वयंघत्वासुतावन्तइतिपञ्चदश मोपुत्वावाघतश्चनेत्येतस्यद्विपदांचोद्धरतीति। चातुर्विंशिकेहनि माध्यन्दिनेसवने ब्राह्मणाच्छंसिशस्त्रे वयंघत्वेतितृचोवैकल्पिकःस्तोत्रियः।तथाच-सूत्रं—वयंघत्वासुतावन्तः कईंवेदसुतेसचेति। स्वरसाम्नि अयमेवतृचोनुरूपः। सूत्रितञ्च—वयंघत्वासुतावन्तइति तिस्रोबृहत्यइति। तस्मिन्नेवशस्त्रे कईंवेदेति वैकल्पिकोनुरूपः।सूत्रमुक्तमेव।

तत्र प्रथमा—

वयंघत्वासुतावन्तआपोनवृक्तबर्हिषः।
पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारआसते ॥ १ ॥

वयम्। घ। त्वा। सुतऽवन्तः। आपः। न। वृक्तऽबर्हिषः। पवित्रस्य।
प्रऽस्रवणेषु। वृत्रऽहन्। परि। स्तोतारः। आसते ॥ १ ॥

हे वृत्रहन् त्वा त्वां वयंघ वयंखलु सुतवन्तः सोममभिषुतवन्तः आपोन आपइव मवणमभिगच्छामः पवित्रस्य सोमानां प्रस्रवणेषु वृक्तबर्हिषस्तीर्णबर्हिषः स्तोतारश्च त्वां पर्यासते पर्युपासते ॥ १ ॥

अथ द्वितीया—

स्वरन्तित्वासुतेनरोवसोनिरेकउक्थिनः।
कदासुतंतृषाणओकआगमइंद्रस्वब्दीववंसगः ॥ २ ॥

स्वरन्ति। त्वा। सुते। नरः। वसो इति। निरेके। उक्थिनः।
कदा। सुतम्। तृषाणः। ओकः। आ। गमः।
इन्द्र। स्वब्दीऽइव। वंसगः ॥ २ ॥

हे वसो वासयितरिन्द्र त्वा त्वां सुतेभिषुते सोमे निरेके निर्गमने उक्थिनः नरोनेतारः स्वरन्ति शब्दायन्ते। अपि चेन्द्रः सुतं सोमं प्रति तृषाणः तृष्यन् स्वन्दीव स्वभूतशब्दइव वंसगो वननीयगमनोवृषभः शब्दं कुर्वन्कदा ओकः स्थानमागमः आगमत्॥ २ ॥

अथ तृतीया—

कण्वेभिर्धृष्णवाधृषद्वाजंदर्षिसहस्रिणम्।
पिशङ्गरूपंमघवन्विचर्षणेमक्षूगोमन्तमीमहे ॥ ३ ॥

कण्वेभिः। धृष्णो इति। आ। धृषत्। वाजम्।
दर्षि। सहस्रिणम्। पिशङ्गऽरूपम्। मघऽवन्।
विऽचर्षणे। मक्षु। गोऽमन्तम्। ईमहे ॥ ३ ॥

हे धृष्णो धर्षकेन्द्र कण्वेभिः कण्वानुद्दिश्य विभक्तिव्यत्ययः सहस्रिणं सहस्रसंख्याकं वाजमादर्षि देहि। हे मघवन् धनवन् विचर्षणे विद्रष्टरिन्द्र धृषत् धृष्टं पिशङ्गरूपं गोमन्तंच वाजं मक्षु शीघ्रमीमहे याचामहे त्वामितिशेषः॥ ३॥

अथ चतुर्थी—

पाहिगायान्धसोमदइन्द्रायमेध्यातिथे।
यःसंमिश्लोहर्योर्यःसुतेसचावज्रीरथोहिरण्ययः ॥ ४ ॥

पाहि। गाय। अन्धसः। मदे। इन्द्राय। मेध्यऽअतिथे।
यः। समऽमिश्लः। हर्योः। यः। सुते।
सचा। वज्री। रथः। हिरण्ययः ॥ ४ ॥

हे मेध्यातिथे पाहि सोमं पिब अन्धसः पीतस्य सोमस्य मदे तस्माइन्द्राय गाय स्तोत्रंपठ। यः इन्द्रोहर्योरश्वयोः संमिश्लः स्वरथेसंमिश्लयिता यश्च सुतेसोमे सचा सहायः यइन्द्रोवज्री यस्य रथोहिरण्ययोहिरण्मयः॥ ४॥

अथ पंचमी—

यःसुषव्यःसुदक्षिणइनोयःसुक्रतुर्गृणे ।
यआकरःसहस्रायःशतामघइन्द्रोयःपूर्भिदारितः ॥५॥७॥

यः । सुऽसव्यः । सुऽदक्षिणः । इनः । यः । सुऽक्रतुः । गृणे । यः ।
आऽकरः । सहस्रा । यः । शतऽमघः । इन्द्रः । यः ।
पूःऽभित् । आरितः ॥ ५ ॥ ७ ॥

यः सुषव्यः शोभनसव्यहस्तः यश्च सुदक्षिणः यश्चेनईश्वरः। नियुत्वान् इनइतीश्वरनामसुपाठात्। यश्चापि सुक्रतुः सुप्रज्ञः सहस्रा सहस्राणां बहूनां यश्चाकरः कर्ता यश्चापि शतमघः बहुधनः यश्च पूर्भित् पुरां भेत्ता यश्चारितः प्रत्यृतःस्तोमान् । तथाचयास्कः—यआरितः कर्मणिकर्मणिस्थिरः प्रत्यृतःस्तोमानिति[1] । अस्माभिः स्तूयतेच ॥ ५ ॥

॥ इति षष्ठस्य तृतीये सप्तमोवर्गः ॥ ७ ॥

अथ षष्ठी—

योधृषितोयोवृतोयोअस्तिश्मश्रुषुश्रितः ।
विभूतद्युम्नश्च्यवनःपुरुष्टुतःक्रत्वागौरिवशाकिनः ॥ ६ ॥

यः । धृषितः । यः । अवृतः । यः । अस्ति । श्मश्रुषु । श्रितः ।
विभूतऽद्युम्नः । च्यवनः । पुरुऽस्तुतः । क्रत्वा । गौःऽइव । शाकिनः ॥६ ॥

योधृषितः शत्रूणांधर्षयिता यश्चावृतः शत्रुभिरावृतः यश्चापि श्मश्रुषु युद्धेषु। श्मश्रु-अवः-अर्पंत्यस्मिन्निति व्युत्पत्तेः श्मश्रु युद्धमितिवृद्धावदन्ति । श्रितोस्ति भवति यश्चापि विभूतद्युम्नः प्रभूतधनः यश्च च्यवनः सोमानां च्यावयिता यश्चापि पुरुष्टुतो बहुस्तुतः सइन्द्रः क्रत्वा कर्मणः शाकिनः शक्तस्य यजमानस्य गौरिव यथा गौः पयसोदोग्ध्री तथा कामानां दोग्धाभवति ॥६॥

अथ सप्तमी—

कईंवेदसुतेसचापिबन्तंकद्वयोदधे । .
अयंयःपुरोविभिनत्त्योजसामन्दानःशिप्र्यन्धसः ॥ ७ ॥

---

१ नि० ५. १५ ।

कः । ईम् । वेद् । सुते । सचा । पिबन्तम् । कत् । वयः । दुधे ।
अयम् । यः । पुरः । विऽभिनत्ति । ओजसा । मन्दानः ।
शिप्री । अन्धसः ॥ ७ ॥

सुतेभिषुतेसोमे सचा ऋत्विजासह सोमं पिबन्तमीमिनमिन्द्रं कोवेद वेत्ति नकोपिवेत्ती-त्यर्थः कत् किंवा वयोन्नं दधे धारयति योयमिन्द्रः शिप्री हनूमानन्धसः सोमेन मन्दानोमन्दमानः ओजसा बलेन पुरोविभिनत्ति ॥ ७ ॥

अथाष्टमी–

दानामृगोनवारणःपुरुत्राचरथंदधे ।
नकिष्ट्वानियमदासुतेगमोमहांश्चरस्योजसा ॥ ८ ॥

दाना । मृगः । न । वारणः । पुरुऽत्रा । चरथम् । दुधे ।
नकिः । त्वा । नि । यमत् । आ । सुते । गमः । महान् ।
चरसि । ओजसा ॥ ८ ॥

मृगः शत्रूणामन्वेषको वारणोगजो दानामदजलानीव पुरुत्रा बहुषु यज्ञेषु चरथं चरणशीलं मदं दधे इन्द्रोधारयति । अथप्रत्यक्षस्तुतिः हे इन्द्र त्वा त्वां नकिर्नियमत् नकश्चिन्नियच्छति सुतेसोमे आगमः आगच्छ । महान् हि त्वमोजसा बलेन सर्वतश्चरसि ॥ ८ ॥

अथ नवमी–

यउग्रःसन्ननिःष्टृतःस्थिरोरणायसंस्कृतः ।
यदिस्तोतुर्मघवाशृणवद्धवंनेन्द्रोयोषत्यागमत् ॥ ९ ॥

यः । उग्रः । सन् । अनिःऽस्तृतः । स्थिरः । रणाय ।
संस्कृतः । यदि । स्तोतुः । मघऽवा । शृणवत् । हवम् । न ।
इन्द्रः । योषति । आ । गमत् ॥ ९ ॥

यउग्रः उद्गूर्णः ओजस्वीवा सन्भवन् अनिष्टृतः शत्रुभिरनिस्तीर्णः स्थिरोचलोरणाय युद्धाय संस्कृतः शस्त्रैरलंकृतः सोमैर्वासंस्कृतः सइन्द्रोमघवा धनवान् यदिस्तोतुर्हवमाह्वानं शृणवच्छृणोति तर्ह्यन्यत्र नयोषति नगच्छति किंतु आगमत् तत्रैवागच्छति ॥ ९ ॥

अथ दशमी–

सत्यमित्थावृषेदसिवृषजूतिर्नोऽवृतः ।
वृषाह्युग्रशृण्विषेपरावतिवृषोअर्वावतिश्रुतः ॥ १० ॥ ८॥

सत्यम् । इत्था । वृषा । इत् । असि । वृषऽजूतिः । नः ।
अवृतः । वृषा । हि । उग्र । शृण्विषे । पराऽवति । वृषो इति ।
अर्वाऽवति । श्रुतः ॥ १० ॥ ८ ॥

हे उग्र उद्गूर्णेन्द्र त्वं सत्यमित्था इत्थं वृषेद् कामानां वर्षकएवासि वृषजूतिः वृषभिश्चाकृष्टो नोस्माकमवृतः शत्रुभिरपरिवृतश्चासि वृषा हि सेचकएव शृण्विषे श्रूयसे । परावति दूरेपि वृषोवृषैव अर्वावति समीपेपि वृषा सेचकएव श्रुतोवृषैवाश्रूयथाः ॥ १० ॥

॥ इति षष्ठस्य तृतीयेष्टमोवर्गः ॥ ८ ॥

अथैकादशी–

वृषणस्तेअभीशवोवृषाकशाहिरण्ययी ।
वृषारथोमघवन्वृषणाहरीवृषात्वंशतक्रतो ॥ ११ ॥

वृषणः । ते । अभीशवः । वृषा । कशा । हिरण्ययी ।
वृषा । रथः । मघऽवन् । वृषणा । हरी इति । वृषा । त्वम् ।
शतक्रतो इति शतऽक्रतो ॥ ११ ॥

हे मघवन् ते तव अभीशवोरश्मयोऽश्वरशनाः वृषणः वर्षितारः हिरण्मयी हिरण्मयी कशापि वृषा रथोपि वृषा वर्षिता हरी अश्वावपि वृषणा वृषणौ वर्षितारौ हे शतक्रतो बहुमन्त्रेन्द्र त्वंच वृषा वर्षिता ॥ ११ ॥

अथ द्वादशी–

वृषासोतासुनोतुतेवृषन्नृजीपिन्नाभर ।
वृषादधन्वेवृषणंनदीष्वातुभ्यंस्थातर्हरीणाम् ॥ १२ ॥

वृषा । सोताः । सुनोतु । ते । वृषन् । ऋजीपिन् । आ । भर ।
वृषा । दधन्वे । वृषणम् । नदीषु । आ । तुभ्यम् ।
स्थातः । हरीणाम् ॥ १२ ॥

हे वृषन् वर्षितरिन्द्र ते तव सोताभिषवकर्ता वृषा वर्षितासन् सुनोतु सोममभिषुणोतु। हे ऋजीपिन् ऋजुगमनेन्द्र आभर धनमस्मभ्यमाहर हरीणामश्वानां आ आभिमुख्येन हेस्थातरिन्द्र तुभ्यं नदीषूदकेषु वृषणं वर्षितारं सोमं वृषा वर्षिता दधन्वे धारितवानभिषवार्थम्॥ १२॥

अथ त्रयोदशी—

एन्द्रयाहिपीतयेमधुशविष्ठसोम्यम्।
नायमच्छामघवाशृणवद्गिरोब्रह्मोक्थाचसुक्रतुः॥ १३ ॥

आ । इन्द्र । याहि । पीतये । मधु । शविष्ठ । सोम्यम् ।
न । अयम् । अच्छ । मघऽवा । शृणवत् । गिरः । ब्रह्म ।
उक्था । च । सुऽक्रतुः ॥ १३ ॥

हे शविष्ठ बलवत्तमेन्द्र सोम्यं सोमात्मकं मध्वमृतं पीतये पानायायाहि आगच्छ। किमर्थमागमनमित्यतआह यतआगमनमन्तरेण मघवा धनवान्सुक्रतुः सुकर्मा शोभनप्रज्ञोवायमिन्द्रोगिरः स्तुतीः ब्रह्म स्तोत्राण्युक्थानिच नाच्छ शृणवत् नाभिशृणोति अतआगमनमित्यर्थः॥ १३॥

अथ चतुर्दशी—

वहन्तुत्वारथेष्ठामाहरयोरथयुजः।
तिरश्चिदर्यसवनानिवृत्रहन्नन्येषांयाशतक्रतो॥ १४ ॥

वहन्तु । त्वा । रथेऽस्थाम् । आ । हरयः । रथऽयुजः ।
तिरः । चित् । अर्यम् । सवनानि । वृत्रऽहन् । अन्येषाम् ।
या । शतक्रतो इति शतऽक्रतो ॥ १४ ॥

हे वृत्रहन् शतक्रतो बहुमन्न रथेष्ठां रथस्थमर्यमीश्वरं त्वा त्वां रथयुजो रथेयुक्ता हरयोश्वाः अन्येषां या यानि सवनानि सन्ति तानि तिरश्चित् तिरस्कुर्वन्तः सवनान्यस्मदीयानि सवनान्यावहन्तु प्रापयन्तु ॥ १४ ॥

अथ पंचदशी

अस्माकमद्यान्तमंस्तोमंधिष्वमहामह ।
अस्माकंतेसवनासन्तुशंतमामदायद्युक्षसोमपाः ॥ १५ ॥ ९ ॥

अस्माकम् । अद्य । अन्तमम् । स्तोमम् । धिष्व । महाऽमह ।
अस्माकम् । ते । सवना । सन्तु । शम्ऽतमा ।
मदाय । द्युक्ष । सोमऽपाः ॥ १५ ॥ ९ ॥

हे महामह महतामपि महान् महापूज्यवा अद्यान्तममन्तिकतममस्माकं मेध्यातिथीनां स्तोमं धिष्व धारय । हे द्युक्ष दीप्त सोमपाः सोमस्य पातरिन्द्र ते तव मदाय मदार्थं सवना सवनान्यस्माकं शन्तमा शन्तमानि सुखतमानि सन्तु भवन्तु ॥१५॥

॥ इति पञ्चस्य तृतीये नवमोवर्गः ॥ ९ ॥

अथ षोडशी—

नहिपस्तवनोममंशास्त्रेअन्यस्यरण्यति ।
योअस्मान्वीरआनयत् ॥ १६ ॥

नहि । सः । तव । नो इति । मम । शास्त्रे । अन्यस्य ।
रण्यति । यः । अस्मान् । वीरः । आ । अनयत् ॥ १६ ॥

योवीरः शूरोनोस्माननयत् सइन्द्रस्तव शास्त्रे शासने नहि रण्यति न रमते ममापि शास्त्रे नोरण्यति अन्यस्यापि शासने न रण्यति किंतु रक्षणएव रमतइत्यर्थः ॥ १६ ॥

अथ सप्तदशी—

इन्द्रश्चिद्घातदब्रवीत्स्त्रियाअशास्यंमनः ।
उतोअहक्रतुंरघुम् ॥ १७ ॥

इन्द्रः । चित् । घ । तत् । अब्रवीत् । स्त्रियाः । अशास्यम् ।
मनः । उतो इति । अह । क्रतुम् । रघुम् ॥ १७ ॥

योमेध्यातिथेर्धनमदाता प्लायोगिरासंगः सपुमान् भूत्वा स्त्र्यभवत् तदा यइन्द्रउवाच तदिदमाह । तथाचाहुः—प्लायोगिश्चासंगोयः स्त्रीभूत्वा पुमानभूत् समेध्यातिथये दानं दत्वेति । इन्द्रश्चित् घ इन्द्रः खलु तदब्रवीत् स्त्रिया मनश्चित्तं अशास्यं पुरुषेणाशिष्यं शासितुमशक्यं मबलत्वादिति । उतो अपि स्त्रियाः क्रतुं मज्ञां रघुं लघुमह आह ॥ १७ ॥

अथाष्टादशी—

सश्चीचिद्धामदच्युतामिथुनावहतोरथम् ।
एवेद्धूर्वृष्णउत्तरा ॥ १८ ॥

सप्ती इति । चित् । घ । मदइच्युता । मिथुना । वहतः ।
रथम् । एव । इत् । धूः । वृष्णः । उत्ऽतरा ॥ १८ ॥

सप्ती चिद्धेन्द्रस्याश्वावपि खलु मदच्युता सोमं प्रतिगन्तारौ इन्द्रस्यैव रथं मिथुनौ वहतः एवेदेवमेव वृष्णइन्द्रस्य रथः धूरुत्तराश्वयोरुत्तराभवति ॥ १८ ॥

अथैकोनविंशी—

अधःपश्यस्वमोपरिसंतरांपादकौहर ।
मातेकशप्लकौदृशन्स्त्रीहिब्रह्माबभूविथ ॥ १९ ॥ १० ॥

अधः । पश्यस्व । मा । उपरि । सम्ऽतराम् । पादकौ । हर । मा ।
ते । कशऽप्लकौ । दृशन् । स्त्री । हि । ब्रह्मा । बभूविथ ॥ १९ ॥ १०॥

एवमन्तरिक्षादागच्छन् रथस्थइन्द्रः स्त्रियं सन्तं स्वस्मात् पुंस्त्वमिच्छन्तं प्लायोगिं यत् उवाच तदाह—हे प्लायोगे त्वं स्त्री सती अधः पश्यस्व एषस्त्रीणांधर्मः उपरि मापश्यस्व उपरिदर्शनं स्त्रीणां धर्मोनभवति हि । पादकौ पादावपि सन्तरां संश्लिष्टौ यथा भवतस्तथा हर । यथा पुरुषोविश्लिष्टपादनिधानोभवति तथा त्वया स्त्रिया न कर्तव्यमित्यर्थः । अपिच ते कशप्लकौ कशश्चप्लकश्च

कशप्लकौ कशतिराहननकर्मा कशप्लकावुभेअंगे मादशन् पुरुषानपश्यन्तु तयोरदर्शनं वाससः सुष्टु परिधानेन भवति । अतः सुष्टु वाससा परिधानं कुरु । स्त्रियोह्यागुल्फादभिसंवीताभवन्तीत्यर्थः । हि यस्मात्कारणात् ब्रह्मासन्न स्त्री बभूविथ ॥ १९ ॥

॥ इति पष्ठस्य तृतीये दशमोवर्गः ॥ १० ॥

एन्द्रयाहीत्यष्टादशर्चं चतुर्थं सूक्तं काण्वस्य नीपातिथेरार्षं आनुष्टुभं षोडश्याद्यास्तिस्रोगायत्र्यः वसुरोचिषोंगिरोगोत्राः सहस्त्रसंख्याकाः आयदिन्द्रश्चेत्यादीनां तासां तिसृणाष्टषयः इन्द्रोदेवता। तथाचानुक्रमणम्—एन्द्रयाह्यूना नीपातिथिरानुष्टुभं तृचोन्त्योगायत्रस्तंसहस्रंवसुरोचिषोंगिरसोपश्यन्निति । विनियोगोलैंगिकः ।

तत्र प्रथमा—

एन्द्रयाहिहरिभिरुपकण्वस्यसुष्टुतिम् ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ १ ॥

आ । इन्द्र । याहि । हरिऽभिः । उप । कण्वस्य । सुऽस्तुतिम् ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥१॥

हे इन्द्र कण्वस्य सुष्टुतिं शोभनांस्तुतिं हरिभिरश्वैरुपायाहि आगच्छ दिवोद्युलोके द्वितीयार्थेपष्ठी अमुष्यामुष्मिन्निन्द्रे शासतः शासति विभक्तिव्यत्ययः तत्र वयं सुखमास्महे दिवावसो दीप्तहविष्केन्द्र दिवं स्वर्गं यय यूयं गच्छत बहुवचनं पूजार्थम्। यद्वा हे दिवावसो दिवोद्युनामकं अमुष्यामुं लोकं शासतः शासनंकुर्वन्तोयूयं दिवं स्वर्गं यय गच्छत अत्रबहुवचनं पूजार्थमित्यर्थः ॥ १ ॥

अथ द्वितीया—

आत्वाग्रावावदन्निहसोमीघोषेणयच्छतु ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ २ ॥

आ । त्वा । ग्रावा । वदन् । इह । सोमी । घोषेण । यच्छतु । दिवः ।
अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ २ ॥

हे इन्द्र त्वा त्वामिहयज्ञे ग्रावा सोमाभिषवपाषाणः सोमी सोमवान् वदन् शब्दंकुर्वन् घोषेण ध्वनिनासहँ आयच्छतु। सिद्धमन्यत् ॥ २ ॥

अथ तृतीया–

अत्राविनेमिरेषामुरांनधूनुतेवृकः ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ ३ ॥

अत्र । वि । नेमिः । एषाम् । उराम् । न । धूनुते । वृकः । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ३ ॥

अत्रास्मिन्यज्ञे एषामभिषवग्राव्णां नेमिः सोमलता विधूनुते विशेषेण कम्पयति उरामेषीं वृकोन वृकइव । सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी–

आत्वाकण्वाइहावसेहवन्तेवाजसातये ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ ४ ॥

आ । त्वा । कण्वाः । इह । अवसे । हवन्ते । वाजऽसातये । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ४ ॥

हे इन्द्र त्वा त्वामिहयज्ञे कण्वाः अवसे रक्षणाय वाजसातये अन्नस्य प्राप्त्यर्थंच आहवन्ते आभिमुख्येन ह्वयन्ति सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी–

दधामितेसुतानांवृष्णेनपूर्वपाय्यम् ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ ५ ॥ ११ ॥

दधामि । ते । सुतानाम् । वृष्णे । न । पूर्वऽपाय्यम् । दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ५ ॥ ११ ॥

हे इन्द्र ते तुभ्यं सुतानां द्वितीयार्थेषष्ठी सुतान् सोमान् ददामि प्रयच्छामि। वृष्णे न यथा वायवे पूर्वपाय्यं यज्ञमुखे पेयं प्रयच्छन्ति तद्वदहं प्रयच्छामीत्यर्थः। सिद्धमन्यत्॥ ५॥

॥ इति षष्ठस्य तृतीये एकादशोवर्गः॥ ११॥

अथ षष्ठी—

स्मत्पुरन्धिर्नआगहिविश्वतोधीर्नऊतये।
दिवोअमुष्यशासतोदिवंययदिवावसो॥ ६॥

स्मत्ऽपुरन्धिः। नः। आ। गहि। विश्वतःऽधीः। नः। ऊतये।
दिवः। अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥६॥

हे इन्द्र स्मत्पुरन्धिः स्वर्गकुटुंबी नः अस्मान् आगहि। तथा विश्वतः धीः सर्वतोजगतोधारकः त्वं नः अस्माकं ऊतये रक्षणाय आगहि आगच्छ॥ ६॥

अथ सप्तमी—

आनोयाहिमहेमतेसहस्रोतेशतामघ।
दिवोअमुष्यशासतोदिवंययदिवावसो॥ ७॥

आ। नः। याहि। महेऽमते। सहस्रऽऊते। शतऽमघ। दिवः।
अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ७॥

हे महेमते महाबुद्धे सहस्रोते सहस्ररक्षण शतामघ बहुधनेन्द्र त्वं नोस्मानायाह्यागच्छ। सिद्धमन्यत्॥ ७॥

अथाष्टमी—

आत्वाहोतामनुर्हितोदेवत्रावक्षदीड्यः।
दिवोअमुष्यशासतोदिवंययदिवावसो॥ ८॥

आ। त्वा। होता। मनुःऽहितः। देवऽत्रा। वक्षत्। ईड्यः। दिवः।
अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो॥ ८॥

हे इन्द्र त्वा त्वां देवत्रा देवानांमध्ये ईड्यः स्तुत्योहोता देवानामाह्वातामिर्मनुर्हितोमनुष्यैर्गृहेषु निहितआवक्षत् वहतु । सिद्धमन्यत् ॥ ८ ॥

अथ नवमी–

आत्वामदच्युताहरीश्येनंपक्षेवंवक्षतः ।
दिवोअमुष्यशासंतोदिवंयपदिवावसो ॥ ९ ॥

आ । त्वा । मदऽच्युता । हरी इति । श्येनम् । पक्षाऽइव । वक्षतः ।
दिवः । अमुष्य । शासंतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ९॥

हे इन्द्र त्वा त्वां मदच्युता मदच्युतौ शत्रूणां मदस्य च्यावयितारौ हरी अश्वौ श्येनं श्येनाख्यं पक्षिणं पक्षेव आत्मीयपक्षाविव आवक्षतः आवहताम् । सिद्धमन्यत् ॥ ९ ॥

अथ दशमी–

आयांह्यर्यआपरिस्वाहासोमंस्यपीतयें ।
दिवोअमुष्यशासंतोदिवंयपदिवावसो ॥ १० ॥ १२ ॥

आ । याहि । अर्यः । आ । परि । स्वाहा । सोमस्य ।
पीतये । दिवः । अमुष्य । शासंतः । दिवम् ।
यय । दिवावसो इति दिवाऽवसो ॥ १० ॥ १२ ॥

हे अर्यैश्वर त्वं आ परि सर्वतः आयाह्यागच्छ पीतये तत्पानार्थं सोमस्य सोमं स्वाहा स्वाहाकरोमि । सिद्धमन्यत् ॥ १० ॥

॥ इति षष्ठस्य तृतीये द्वादशोवर्गः ॥ १२ ॥

अथैकादशी–

आनोयाह्युपश्रुत्युक्थेपुरणयाइह ।
दिवोअमुष्यशासंतोदिवंयपदिवावसो ॥ ११ ॥

आ । नः । याहि । उपंऽश्रुति । उक्थेषु । रणय । इह । दिवः ।
अमुष्य । शासतः । दिवंम् । यय । दिवावसो इति दिवाऽवसो ॥११॥

हे इन्द्र त्वं नोऽस्माकमिहयज्ञे उक्थेषु शस्त्रेषु पठ्यमानेषु उपश्रुति उपश्रुतौ समीपमायात्यागच्छ अस्मान् रणयच । सिद्धमन्यत् ॥ ११ ॥

अथ द्वादशी—

सरूपैरासुनोगहिसंभृतैःसम्भृताश्वः ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ १२ ॥

सऽरूपैः । आ । सु । नः । गहि । सम्ऽभृतैः । संभृतऽअश्वः ।
दिवः । अमुष्य । शासतः । दिवंम् । यय । दिवावसो इति
दिवाऽवसो ॥ १२ ॥

हे इन्द्र संभृताश्वः पुष्टाश्वस्त्वं सुसंभृतैः सरूपैः समानरूपैरश्वैः नोऽस्मानागहागच्छ । सिद्धमन्यत् ॥ १२ ॥

अथ त्रयोदशी—

आयाहिपर्वतेभ्यःसमुद्रस्याधिविष्टपः ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ १३ ॥

आ । याहि । पर्वतेभ्यः । समुद्रस्य । अधि । विष्टपः । दिवः ।
अमुष्य । शासतः । दिवंम् । यय । दिवावसो इति दिवाऽवसो ॥ १३॥

हे इन्द्र त्वं पर्वतेभ्यः आयाहागच्छ समुद्रस्यान्तरिक्षस्य विष्टपोविष्टपाच्चायाहीत्यर्थः । सिद्धमन्यत् ॥ १३ ॥

अथ चतुर्दशी—

आनोगव्यान्यश्व्यासहस्राशूरददृहि ।
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ १४ ॥

आ। नः। गव्यानि। अश्व्यां। सहस्रा। शूर। दर्दृहि। दिवः।
अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो ॥ १४॥

हे शूरेन्द्र त्वं नोऽस्मभ्यं सहस्रा सहस्राणि सहस्रसंख्यानि गव्यानि गोहितानि गोरूपाणि वा अश्व्या अश्व्यान्यश्वहितानि अश्वात्मकानिवा दर्दृह्याविवृणु। सिद्धमन्यत् ॥ १४ ॥

अथ पञ्चदशी–

आनःसहस्रशोभरायुतानिशतानिच।
दिवोअमुष्यशासतोदिवंयय दिवावसो ॥ १५ ॥

आ। नः। सहस्रऽशः। भर। अयुतानि। शतानि। च। दिवः।
अमुष्य। शासतः। दिवम्। यय। दिवावसो इति दिवाऽवसो ॥१५॥

हे इन्द्र नोऽस्मभ्यं सहस्रशः सहस्रधा अयुतानि शतानिच अभीष्टानि वस्तून्याभराहर। सिद्धमन्यत् ॥ १५ ॥

अथ षोडशी–

आयदिन्द्रश्चदद्वहेसहस्रंवसुरोचिषः।
ओजिष्ठमश्व्यंपशुम् ॥ १६ ॥

आ। यत्। इन्द्रः। च। दद्वहे इति। सहस्रम्। वसुऽरोचिषः।
ओजिष्ठम्। अश्व्यम्। पशुम् ॥ १६ ॥

वसुरोचिषो वसुदीप्तयो वयं सहस्रं सहस्रसंख्याकानामस्माकं नेता इन्द्रश्च ओजिष्ठं बलवत्तरमश्व्यमश्वात्मकं पशुंच यद्यदा आदद्वहे पारावताद्ददमहे उत्तरत्रसंबन्धः ॥ १६ ॥

अथ सप्तदशी–

यऋज्रावातरंहसोऽरुषासोरघुष्यदः।
भ्राजन्तेसूर्याइव ॥ १७ ॥

ये । ऋज्राः । वातंऽरंहसः । अरुषासः । रघुऽस्यदः । भ्राजंन्ते ।
सूर्याःऽइव ॥ १७ ॥

तदा येऋज्रा ऋजुगामिनो वातरंहसो वायुसदृशवेगा अरुषासः आरोचमाना रघुष्यदो लघुस्यन्दमानाअश्वाः सूर्याइव यथा सूर्यस्तथा भ्राजन्ते ॥ १७ ॥

अथाष्टादशी—

पारांवतस्यरातिषुंद्रवच्चंक्रेष्वाशुषुं ।
तिष्ठंवनंस्यमध्यआ ॥ १८ ॥ १३ ॥

पारांवतस्य । रातिषुं । द्रवत्ऽचंक्रेषु । आशुषुं । तिष्ठंम् । वनंस्य ।
मध्ये । आ ॥ १८ ॥ १३ ॥

तेष्वश्वेषु पारावतस्य रातिषु देयेषु द्रवच्चक्रेषु द्रवद्रथचक्रेष्वाशुष्वश्वेषु । ताक्ष्यंआशुरित्यश्वनामसुपाठात् । प्रतिगृहीतेषु सत्सु वनस्यमध्ये आतिष्ठमिति वसुरोचिषाम् सहस्रं ददन्ति ॥ १८ ॥

॥ इति षष्ठस्य तृतीये त्रयोदशोवर्गः ॥ १३ ॥

अग्निनेन्द्रेणेति चतुर्विंशत्यृचं पञ्चमंसूक्तं श्यावाश्वस्यात्रेयस्यार्षम् । अत्रानुक्रमणिका—अग्निनाचतुर्विंशतिः श्यावाश्वआश्विनमुपरिष्टाज्ज्योतिषं पंक्तिमहाबृहतीःपंक्यन्त्वमिति । उपरिष्टाज्ज्योतिश्छन्दः । चतुर्थपादस्याष्टाक्षरत्वात् यतोष्टकस्ततोज्योतिरिति तल्लक्षणम् । द्वाविंशीपंक्तिः त्रयोविंशीमहाबृहती चत्वारोष्टकाजागतश्च महाबृहतीत्युक्तलक्षणोपेतत्वात् । चतुर्विंशीपंक्तिः । अश्विनौदेवता अश्विनोर्यामे होतुरतिरिक्तोक्थ्ये अग्निनेन्द्रेणेत्येतत्सूक्तम् सूत्रितञ्च—अग्निनेन्द्रेणाभात्यग्निरिति ।

तत्र प्रथमा—

अग्निनेन्द्रेणवरुणेनविष्णुंनादित्यैरुद्रैर्वसुंभिःसचाभुवां ।
सजोषंसाउषसासूर्येणचसोमंपिबतमश्विना ॥ १ ॥

अ॒ग्निना॑ । इन्द्रे॑ण । वरु॑णेन । विष्णु॑ना । आ॒दि॒त्यैः । रु॒द्रैः ।
वसु॑ऽभिः स॒चा॒ऽभुवा॑ । स॒ऽजोष॑सौ । उ॒षसा॑ । सूर्ये॑ण । च॒ । सोम॑म् ।
पि॒ब॒त॒म् । अ॒श्वि॒ना॒ ॥ १ ॥

हे अश्विना अश्विनौ अग्निना इन्द्रेण वरुणेन विष्णुना आदित्यैरुद्रैर्वसुभिश्च सचाभुवा सहभूतौ उषसा सूर्येणच सजोषसा संगतौ युवां सोमं पिबतम्॥ १ ॥

अथ द्वितीया–

विश्वा॑भिर्धी॒भि॑र्भुव॑नेनवाजिनादि॒वापृ॑थि॒व्याद्रि॑भिःसचा॒भुवा॑ ।
स॒जोष॑साउ॒षसा॒सूर्ये॑णच॒सोम॑म्पिबतमश्विना ॥ २ ॥

विश्वा॑भिः । धी॒भिः । भुव॑नेन । वा॒जि॒ना॒ । दि॒वा ।
पृ॒थि॒व्या । अद्रि॑ऽभिः । स॒चा॒ऽभुवा॑ । स॒ऽजोष॑सौ ।
उ॒षसा॑ । सूर्ये॑ण । च॒ । सोम॑म् । पि॒ब॒त॒म् । अ॒श्वि॒ना॒ ॥ २ ॥

हे वाजिना बलिनावश्विनौ विश्वाभिः सर्वाभिर्धीभिः प्रज्ञाभिः भुवनेनाखिलेन भूतजातेनच दिवा द्युलोकेनच पृथिव्याचाद्रिभिश्च सचाभुवा सहभूतौ उषसा सूर्येणच संगतौ युवां सोमं पिबतम्॥ २ ॥

अथ तृतीया–

विश्वै॑र्दे॒वैस्त्रि॒भिरे॑काद॒शैरि॒हाद्भिर्म॒रुद्भि॒र्भृगु॑भिःसचा॒भुवा॑ ।
स॒जोष॑साउ॒षसा॒सूर्ये॑णच॒सोम॑म्पिबतमश्विना ॥ ३ ॥

विश्वैः॑ । दे॒वैः । त्रि॒ऽभिः । ए॒का॒द॒शैः । इ॒ह । अ॒त्ऽभिः ।
म॒रुत्ऽभिः । भृगु॑ऽभिः । स॒चा॒ऽभुवा॑ । स॒ऽजोष॑सौ ।
उ॒षसा॑ । सूर्ये॑ण । च॒ । सोम॑म् । पि॒ब॒त॒म् । अ॒श्वि॒ना॒ ॥ ३ ॥

हे अश्विनौ विश्वैर्देवैः त्रिभिः एकादशैः त्रयस्त्रिंशैः इहयज्ञे अद्भिः मरुद्भिः भृगुभिश्च सचाभुवा सहभूतौ उषसा सूर्येणच संगतौ युवां सोमं पिबतम् ॥ ३ ॥

अथ चतुर्थी–

जुषेथांयज्ञंबोधतंहवस्यमेविश्वेहदेवौसवनावगच्छतम् ।
सजोषसाउषसासूर्येणचेषंनोवोळ्हमश्विना ॥ ४ ॥

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । विश्वा ।
इह । देवौ । सवना । अव । गच्छतम् । सऽजोषसौ । उषसा । सूर्येण ।
च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ४ ॥

हे अश्विनौ देवौ यज्ञं जुषेथां सेवेथां । मे मम हवस्य हवं बोधतं जानीतं । इहयज्ञे विश्वा सवना सर्वाणि सवनानि अवगच्छतं प्राप्नुतम् । इषं अन्नं आवोळ्हं प्रापयतम् ॥ ४ ॥

अथ पञ्चमी–

स्तोमंजुषेथांयुवशेवकन्यनांविश्वेहदेवौसवनावगच्छतम् ।
सजोषसाउषसासूर्येणचेषंनोवोळ्हमश्विना ॥ ५ ॥

स्तोमम् । जुषेथाम् । युवशाऽइव । कन्यनाम् । विश्वा ।
इह । देवौ । सवना । अव । गच्छतम् । सऽजोषसौ ।
उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ५ ॥

हे अश्विनौ देवौ युवां इहास्मिन्यज्ञे स्तोमं जुषेथां सेवेथाम् । युवशेव यथा युवानौ कन्यनां कन्यानामाह्वानं सेवेते तद्वदित्यर्थः । इहयज्ञे विश्वानि सवनान्यवगच्छतं प्राप्नुतं । शिष्टमन्यत् ॥ ५ ॥

अथ षष्ठी–

गिरोजुषेथामध्वरंजुषेथांविश्वेहदेवौसवनावगच्छतम् ।
सजोषसाउषसासूर्येणचेषंनोवोळ्हमश्विना ॥ ६ ॥ १४ ॥

गिरः । जुषेथाम् । अध्वरम् । जुषेथाम् । विश्वा ।
इह । देवौ । सवना । अव । गच्छतम् । सऽजोषसौ । उषसा ।
सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ६ ॥ १४ ॥

हे देवौ अश्विनौ अस्माकं गिरः स्तुतीः जुषेथां सेवेथां । तथा अध्वरं यज्ञञ्च जुषेथां । इहप्रश्ने विश्वा विश्वानि सवनानि अवगच्छतं प्राप्नुतम् ॥ ६ ॥

॥ इति पञ्चस्य तृतीये चतुर्दशोवर्गः ॥ १४ ॥

अथ सप्तमी—

हारिद्रवेवपतथोवनेदुपसोमंसुतंमहिषेवावगच्छथः ।
सजोषसाउषसासूर्येणचत्रिर्वर्तिर्यातमश्विना ॥ ७ ॥

हारिद्रवाऽइव । पतथः । वना । इत् । उप । सोमम् । सुतम् ।
महिषाऽइव । अव । गच्छथः । सऽजोषसौ । उषसा ।
सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ७ ॥

हे अश्विना अश्विनौ युवां सुतमभिषुतं सोममुपपतथः हारिद्रवेव यथा हारिद्रवौ पक्षिणौ वना वनान्युदकानिवा वनमित्युदकनामसुपाठात् उपपततः तद्वदित्यर्थः । महिषाविव यथा पिपासितौ महिषावुदकान्युपगच्छतः । तथा सुतं सोममवगच्छथः । उषसा सूर्येणच संगतौ त्रिर्वर्तिस्त्रिमार्गं यातंच ॥ ७ ॥

अथाष्टमी—

हंसाविवपतथोअध्वगाविवसोमंसुतंमहिषेवावगच्छथः ।
सजोषसाउषसासूर्येणचत्रिर्वर्तिर्यातमश्विना ॥ ८ ॥

हंसौऽइव । पतथः । अध्वगौऽइव । सोमम् । सुतम् । महिषाऽइव ।
अव । गच्छथः । सऽजोषसौ । उषसा । सूर्येण । च । त्रिः ।
वर्तिः । यातम् । अश्विना ॥ ८ ॥

हे अश्विनौ युवां हंसाविव यथा हंसौ अध्वगाविव यथाच पथिकावुदकं गच्छतस्तथा वेगेन सुतं सोमं पतथोगच्छथः । सिद्धमन्यत् ॥ ८ ॥

अथ नवमी—

श्येनाविवपतथोहव्यदातयेसोमंसुतंमहिषेवावगच्छथः ।
सजोषसाउषसासूर्येणचत्रिर्वर्तिर्यातमश्विना ॥ ९ ॥

श्येनौऽइव । पतथः । हव्यऽदातये । सोमम् । सुतम् । महिषाऽइव ।
अव । गच्छथः । सऽजोषसौ । उषसा । सूर्येण ।
च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ९ ॥

हे अश्विनौ युवां श्येनाविव यथाश्येनौ गगनंगच्छतस्तथा वेगेन सुतं सोमं हव्यदातये यजमानार्थं पतथोगच्छथः । सिद्धमन्यत् ॥ ९ ॥

अथ दशमी—

पिबतंचतृप्णुतंचाचगच्छतंप्रजांचधत्तंद्रविणंचधत्तम् ।
सजोषसाउषसासूर्येणचोर्जंनोधत्तमश्विना ॥ १० ॥

पिबतम् । च । तृप्णुतम् । च । आ । च । गच्छतम् । प्रऽजाम् । च ।
धत्तम् । द्रविणम् । च । धत्तम् । सऽजोषसौ । उषसा ।
सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ १० ॥

हे अश्विनौ युवां सोमं पिबतश्च तृप्णुतश्च तृप्यतंच पानार्थं तृप्त्यर्थं चागच्छतं सोमंपीत्वा प्रीतौसंतौ युवां अस्मभ्यं प्रजाश्च धत्तं धारयतं द्रविणं धनश्च धत्तम् उषसासूर्येणच संगतौ नोस्मभ्यं ऊर्जं बलंच धत्तम् ॥ १० ॥

अथैकादशी—

जयतंचप्रस्तुतंचप्रचावतंप्रजांचधत्तंद्रविणंचधत्तम् ।
सजोषसाउषसासूर्येणचोर्जंनोधत्तमश्विना ॥ ११ ॥

जयतम् । च । प्र । स्तुतम् । च । प्र । च । अवतम् । प्रऽजाम् ।
च । धत्तम् । द्रविणम् । च । धत्तम् । सऽजोषसौ । उषसा ।
सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ ११ ॥

हे अश्विनौ युवां जयतं शत्रूंश्च जयतम् प्रस्तुतं स्तोतॄंश्च प्रचावतमस्मांश्च परक्षतम् । अन्यत्तिरवम् ॥ ११ ॥

अथ द्वादशी–

हृतंचशत्रून्यततंचमि॒त्रिणः॑प्र॒जांचधत्तं॒द्रवि॑णंचधत्तम् ।
स॒जोष॑साउ॒षसा॒सूर्ये॑णचो॒र्जंनोधत्तमश्विना ॥ १२ ॥१५॥

ह॒तम् । च॒ । शत्रू॑न् । यत॑तम् । च॒ । मि॒त्रिणः॑ । प्र॒ऽजाम् । च॒ ।
ध॒त्तम् । द्र॒वि॑णम् । च॒ । ध॒त्तम् । स॒ऽजोष॑सौ । उ॒षसा॑ । सूर्ये॑ण ।
च॒ । ऊर्ज॑म् । नः॒ । ध॒त्तम् । अ॒श्वि॒ना॒ ॥ १२ ॥ १५ ॥

हे अश्विनौ युवां शत्रूंश्च हतम् अपिच यततं मित्रिणोमैत्रीयुक्तांश्च गच्छतम् । सिद्धमन्यत् ॥ १२ ॥

॥ इति षष्ठस्य तृतीये पञ्चदशोवर्गः ॥ १५ ॥

अथ त्रयोदशी–

मि॒त्रावरु॑णवन्ताउ॒तधर्म॑वन्तामरु॒त्व॑न्ताजरि॒तुर्ग॑च्छथो॒हव॑म् ।
स॒जोष॑साउ॒षसा॒सूर्ये॑णचादि॒त्यैर्या॑तमश्विना ॥ १३ ॥

मि॒त्रावरु॑णऽवन्तौ । उ॒त । धर्म॑ऽवन्ता । म॒रुत्व॑न्ता । ज॒रि॒तुः ।
ग॒च्छ॒थः॒ । हव॑म् । स॒ऽजोष॑सौ । उ॒षसा॑ । सूर्ये॑ण ।
च॒ । आ । आ॒दि॒त्यैः । या॒त॒म् । अ॒श्वि॒ना॒ ॥ १३ ॥

उतापिच हे अश्विनौ युवां मित्रावरुणवन्तौ मित्रावरुणयुक्तौ धर्मवन्ता धर्मयुक्तौ उतापिच मरुत्वन्ता मरुद्भिर्युक्तौच जरितुः स्तोतुर्हवमाह्वानं गच्छथः आगच्छतम् । उषसासूर्येण चादित्यैश्च सजोषसा संगतौ यातं गच्छतम् ॥ १३ ॥

अथ चतुर्दशी–

अङ्गि॑रस्वन्ताउ॒तविष्णु॑वन्तामरु॒त्व॑न्ताजरि॒तुर्ग॑च्छथो॒हव॑म् ।
स॒जोष॑साउ॒षसा॒सूर्ये॑णचादि॒त्यैर्या॑तमश्विना ॥ १४ ॥

अङ्गिरस्वन्तौ । उत । विष्णुंऽवन्ता । मरुत्वन्ता । जरितुः ।
गच्छथः । हवम् । सऽजोषसौ । उषसा । सूर्येण । च ।
आ । आदित्यैः । यातम् । अश्विना ॥ १४ ॥

उतापिच हे अश्विनौ युवां अङ्गिरस्वन्तौ अङ्गिरोभिर्युक्तौ विष्णुवन्ता विष्णुनाच सहितौ मरुत्वन्ता मरुद्भिश्चसहितौ मे जरितुःस्तोतुराह्वानं गच्छतम् ॥ १४ ॥

अथ पंचदशी–

ऋभुमन्तावृषणावाजवन्तामरुत्वन्ताजरितुर्गच्छथोहवम् ।
सजोषसाउषसासूर्येणचादित्यैर्यातमश्विना ॥ १५ ॥

ऋभुऽमन्ता । वृषणा । वाजंऽवन्ता । मरुत्वन्ता । जरितुः ।
गच्छथः । हवम् । सऽजोषसौ । उषसा । सूर्येण । च ।
आ । आदित्यैः । यातम् । अश्विना ॥ १५ ॥

हे अश्विनौ ऋभुमंता ऋभुसहितौ वृषणा कामानां वर्षितारौ वाजवन्ता वाजयुक्तौ मरुत्वन्तौच स्तोतुराह्वानं गच्छतम् । ऋभुमन्ता वाजवन्तेति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः । सिद्धमन्यत् ॥१५॥

अथ षोडशी–

ब्रह्मजिन्वतमुतजिन्वतंधियोहतंरक्षांसिसेधतममीवाः ।
सजोषसाउषसासूर्येणचसोमंसुन्वतोअश्विना ॥ १६ ॥

ब्रह्म । जिन्वतम् । उत । जिन्वतम् । धियः । हतम् ।
रक्षांसि । सेधतम् । अमीवाः । सऽजोषसौ । उषसा । सूर्येण ।
च । सोमम् । सुन्वतः । अश्विना ॥ १६ ॥

हे अश्विनौ युवां ब्रह्म ब्राह्मणं जिन्वतं प्रीणयतम् । उतापिच धियः कर्माणि जिन्वतं । हतंच रक्षांसि । अमीवाः राक्षसांश्च सेधतम् । उषसा सूर्येणच संगतौ सुन्वतोयजमानस्य सोमं पिबतमित्यर्थः ॥ १६ ॥

अथ सप्तदशी—

क्षत्रंजिन्वतमुतजिन्वतंनॄन्हतंरक्षांसिसेधतममीवाः।
सजोषसाउषसासूर्येणचसोमंसुन्वतोअश्विना ॥ १७ ॥

क्षत्रम् । जिन्वतम् । उत । जिन्वतम् । नॄन् । हतम् ।
रक्षांसि । सेधतम् । अमीवाः । सऽजोषसौ । उषसा ।
सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १७ ॥

हे अश्विनौ युवां क्षत्रं क्षत्रियं जिन्वतं उतापिच नॄन् योद्धॄन जिन्वतम् । सिद्धमन्यत् ॥१७॥

अथाष्टादशी—

धेनूर्जिन्वतमुतजिन्वतंविशोहतंरक्षांसिसेधतममीवाः।
सजोषसाउषसासूर्येणचसोमंसुन्वतोअश्विना ॥ १८ ॥ १६ ॥

धेनूः । जिन्वतम् । उत । जिन्वतम् । विशः । हतम् । रक्षांसि ।
सेधतम् । अमीवाः । सऽजोषसौ । उषसा । सूर्येण । च ।
सोमम् । सुन्वतः । अश्विना ॥ १८ ॥ १६ ॥

हे अश्विनौ धेनूर्जिन्वतमुतापिच विशोवैश्यांश्च जिन्वतम् । सिद्धमन्यत् ॥ १८ ॥

॥ इति षष्ठस्य तृतीये षोडशोवर्गः ॥ १६ ॥

अथैकोनविंशी—

अत्रेरिवशृणुतंपूर्व्यस्तुतिंश्यावाश्वस्यसुन्वतोमदच्युता।
सजोषसाउषसासूर्येणचाश्विनातिरोअह्न्यम् ॥ १९ ॥

अत्रेःऽइव । शृणुतम् । पूर्व्यऽस्तुतिम् । श्यावऽअश्वस्य ।
सुन्वतः । मदऽच्युता । सऽजोषसौ । उषसा । सूर्येण ।
च । अश्विना । तिरःऽअह्न्यम् ॥ १९ ॥

हे अश्विनौ मदच्युता शत्रूणां मदस्य च्यावयितारौ युवां सुन्वतःसोमाभिषवंकुर्वतःश्यावाश्वस्य ममपितामहस्यात्रेरिव पूर्व्यस्तुतिं मुख्यांस्तुतिं श्रृणुतं उषसा सूर्येणच संगतौ तिरोअह्न्यं सोमं पिबतं तिरोहिते पूर्वस्मिन्नहन्यपरेद्युः प्रातरश्विनोर्यागइति ॥ १९ ॥

अथ विंशी—

सर्गाँइवसृजतंसुष्टुतीरुपश्यावाश्वस्यसुन्वतोमदच्युता ।
सजोषसाउषसासूर्येणचाश्विनातिरोअह्न्यम् ॥ २० ॥

सर्गान्ऽइव । सृजतम् । सुऽस्तुतीः । उप । श्यावऽअश्वस्य ।
सुन्वतः । मदऽच्युता । सऽजोषसौ । उषसा । सूर्येण ।
च । अश्विना । तिरःऽअह्न्यम् ॥ २० ॥

हे अश्विनौ श्यावाश्वस्य मम सुष्टुतीःशोभनाः स्तुतीः सर्गानिव । आभरणानि वा हवींषि वा सर्गाः । वान्यथा तथालन्युपसृजतम् । सिद्धमन्यत् ॥ २० ॥

अथैकविंशी—

रश्मीँरिवयच्छतमध्वराँउपश्यावाश्वस्यसुन्वतोमदच्युता ।
सजोषसाउषसासूर्येणचाश्विनातिरोअह्न्यम् ॥ २१ ॥

रश्मीन्ऽइव । यच्छतम् । अध्वरान् । उप । श्यावऽअश्वस्य ।
सुन्वतः । मदऽच्युता । सऽजोषसौ । उषसा । सूर्येण । च ।
अश्विना । तिरःऽअह्न्यम् ॥ २१ ॥

हे अश्विनौ श्यावाश्वस्य मम अध्वरान् रश्मीनिव यथाश्वमहांस्तद्वदुपयच्छतम् उपगच्छतम् । सिद्धमन्यत् ॥ २१ ॥

अथ द्वाविंशी—

अर्वाग्रथंनियच्छतंपिबतंसोम्यंमधु ।
आयातमश्विनागतमवस्युर्वामहंहुवेधत्तंरत्नानिदाशुषे ॥ २२ ॥

अर्वाक् । रथम् । नि । यच्छतम् । पिबतम् । सोम्यम् । मधु ।
आ । यातम् । अश्विना । आ । गतम् । अवस्युः । वाम् ।
अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २२ ॥

हे अश्विनौ वां स्वीयं रथमर्वागस्मदभिमुखं नियच्छतं सोम्यं सोममयं मध्वमृतञ्च पिबतम् यज्ञमायातञ्च । सोमं प्रत्यागतमागच्छतञ्च । अवस्युः रक्षणकामोऽहं श्यावाश्वो वां हुवे ह्वयामि । दाशुषे हवींषि प्रयच्छते मह्यं रत्नानि धत्तं धारयतम् ॥ २२ ॥

अथ त्रयोविंशी–

नमोवाकेप्रस्थितेअध्वरेनराविवक्षणस्यपीतये ।
आयातमश्विनागतमवस्युर्वामहंहुवेधत्तंरत्नानिदाशुषे ॥ २३ ॥

नमःऽवाके । प्रऽस्थिते । अध्वरे । नरा । विवक्षणस्य । पीतये ।
आ । यातम् । अश्विना । आ । गतम् । अवस्युः । वाम् । अहम् ।
हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २३ ॥

हे अश्विना नरा नेतारौ युवां विवक्षणस्य हवनशीलस्य मम प्रस्थिते नमोवाके । नमस्काराय प्रोच्यते सनमोवाकस्तस्मिन्नध्वरे यज्ञे। तथाच ब्राह्मणम्–उभयं सहवा एतद्यज्ञे सूक्तवाकश्च नमोवाकश्चेति । पीतये सोमपानायायातम् । सिद्धमन्यत् ॥ २३ ॥

अथ चतुर्विंशी–

स्वाहाकृतस्यतृम्पतंसुतस्यदेवावन्धसः ।
आयातमश्विनागतमवस्युर्वामहंहुवेधत्तंरत्नानिदाशुषे ॥२४॥१७॥

स्वाहाऽकृतस्य । तृम्पतम् । सुतस्य । देवौ । अन्धसः । आ ।
यातम् । अश्विना । आ । गतम् । अवस्युः । वाम् । अहम् ।
हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २४ ॥ १७ ॥

हे अश्विनौ देवौ युवां सुतस्याभिषुतस्य स्वाहाकृतस्य हुतस्यान्धसः सोमस्य तृम्पतं तृप्यतं । सिद्धमन्यत् ॥ २४ ॥

॥ इति पञ्चमस्य तृतीये सप्तदशोवर्गः ॥१७॥

अवितासीति सप्तर्चं षष्ठं सूक्तं आत्रेयस्य श्यावाश्वस्यार्षम् । अत्रेयमनुक्रमणिका—अवितासिसप्तशाक्वरंमहापंक्त्यन्तमिति । षट्पञ्चाशदक्षरा शक्वरी छन्दः श्यावाश्वेति सप्तमी महापङ्क्तिः पञ्चाष्टकावा महापङ्क्तिरिति लक्षणसद्भावात् दशरात्रे । पञ्चमेहनि मरुत्वतीये इदंसूक्तम् । सूत्रितञ्च—अवितासीत्याहीति ।

तत्र प्रथमा—

अवितासिसुन्वतोवृक्तबर्हिषःपिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ १ ॥

अविता । असि । सुन्वतः । वृक्तऽबर्हिषः । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ १ ॥

हे शतक्रतो बहुकर्मन्निंद्र सुन्वतः सोमाभिषवं कुर्वतो वृक्तबर्हिषस्तीर्णबर्हिषो यजमानस्य अविता रक्षितासि भवसि मदाय मदार्थं सोमं पिब । हे सत्पते सतां पते मरुत्वान् मरुत्वन् इन्द्र ते तुभ्यं यं सोमस्य भागमधारयन् सर्वे देवा अकल्पयन् । तथाच यजुर्ब्राह्मणं—सएतं माहेन्द्रमुद्धारमुदहरत् । वृत्रंहत्वान्यदेवतास्वधीति । तं भागं विश्वाः पृतनाः शत्रूणां सर्वाः सेनाः उरु बहु ज्रयोवेगंच संसेहानः सम्यगभिभवन्नप्सुजिदप्सुजेता च सन् पिब ॥ १ ॥

अथ द्वितीया—

प्राव॑स्तोतारंमघवन्नवत्वांपिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ २ ॥

१ तै० सं० ६. ५. ७. ।

प्र । अव । स्तोतारम् । मघऽवन् । अव । त्वाम् । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ २ ॥

हे मघवन् स्तोतारं प्राव प्ररक्ष त्वांचाव सोमपानेन रक्ष । सिद्धमन्यत् ॥ २ ॥

अथ तृतीया—

ऊर्जादेवाँअवस्योजसात्वांपिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ ३ ॥

ऊर्जा । देवान् । अवसि । ओजसा । त्वाम् । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ३ ॥

हे इन्द्र त्वं देवानूर्जान्नेन हविषावसि रक्षसि त्वामप्योजसा बलेनावरि । सिद्धमन्यत् ॥३॥

अथ चतुर्थी—

जनितादिवोजनितापृथिव्याःपिबासोमंमदायकंशतक्रतो । यंतेभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ ४ ॥

जनिता । दिवः । जनिता । पृथिव्याः । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ४ ॥

हे इन्द्र त्वं दिवोद्युलोकस्य जनिता जनकोसि पृथिव्याश्च जनितासि । सिद्धमन्यत् ॥४॥

अथपञ्चमी–

जनिताश्वानांजनितागवामसिपिबासोमंमदायकंशतक्रतो । यंतेंभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ ५ ॥

जनिता । अश्वानाम् । जनिता । गवाम् । असि । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ५ ॥

हे इन्द्र त्वं अश्वानां जनिता जनकोसि गवाश्च जनितासि । सिद्धमन्यत् ॥ ५ ॥

अथ षष्ठी–

अत्रीणांस्तोममद्रिवोमहस्कृधिपिबासोमंमदायकंशतक्रतो । यंतेंभागमधारयन्विश्वाःसेहानःपृतनाउरुज्रयःसमप्सुजिन्मरुत्वाँइन्द्रसत्पते ॥ ६ ॥

अत्रीणाम् । स्तोमम् । अद्रिऽवः । महः । कृधि । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो । यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ६ ॥

हे अद्रिवः अद्रिमन् अत्रीणां स्तोमं महस्कृधि पूजितं कुरु । सिद्धमन्यत् ॥ ६ ॥

अथ सप्तमी–

श्यावाश्वस्यसुन्वतस्तथाशृणुयथाशृणोरत्रेःकर्माणिकृण्वतः । प्रत्रसदस्युमाविथत्वमेकइन्नृषाह्यइन्द्रब्रह्माणिवर्धयन् ॥७॥१८॥

श्यावऽअश्वस्य । सुन्वतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः । प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्ये । इन्द्र । ब्रह्माणि । वर्धयन् ॥ ७ ॥ १८ ॥

हे इन्द्र त्वं सुन्वतः सोमाभिषवं कुर्वतः श्यावाश्वस्य मम स्तुतिं कर्माणि कृण्वतः कुर्वतोत्रेर्यथा शृणोरश्रौषीस्तथा शृणु । अपिच त्वमेकइदेकएव नृषाह्ये युद्धे ब्रह्माणि स्तोत्राणि कर्मैर्वर्धयन् त्रसदस्युं माविथ ॥ ७ ॥

॥ इति षष्ठस्य तृतीयेष्टादशो वर्गः ॥ १८ ॥

प्रेदंब्रह्मेति सप्तर्चं सप्तमं सूक्तं आत्रेयस्य श्यावाश्वस्यार्षं आद्या द्वापञ्चाशदक्षरा अतिजगती शिष्टाः षड्वः षडष्टका महापङ्क्तयः । इन्द्रोदेवता । तथाचानुक्रान्तम्—प्रेदंमहापाङ्क्तमाद्यातिजगतीति । महाव्रते निष्केवल्येएतत्सूक्तम् । तथाच सूत्रम्—प्रेदंब्रह्मेतेन्द्रोमदायेति ।

तत्र प्रथमा—

प्रेदंब्रह्मवृत्रतूर्येष्वाविथप्रसुन्वतःशचीपतइन्द्रविश्वाभिरूतिभिः ।
माध्यन्दिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः ॥ १ ॥

प्र । इदम् । ब्रह्म । वृत्रऽतूर्येषु । आविथ । प्र । सुन्वतः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ १ ॥

हे शचीपते इन्द्र त्वं वृत्रतूर्येषु संग्रामेषु इदं ब्रह्म इमान् ब्राह्मणान् विश्वाभिः सर्वाभिःऊतिभीरक्षाभिः माविथ मरक्ष । सुन्वतः सोमाभिषवं कुर्वतो यजमानांश्च माविथ । अपिच हे अनेद्यानिन्द्य मज्रिवो वज्रिन् वृत्रहन्निन्द्र माध्यन्दिनस्य सवनस्य संबन्धिनं सोमस्य सोमं पिब ॥१॥

अथ द्वितीया—

सेहानउग्रपृतनाअभिद्रुहःशचीपतइन्द्रविश्वाभिरूतिभिः ।
माध्यन्दिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः ॥ २ ॥

सेहानः । उग्र । पृतनाः । अभि । द्रुहः । शचीऽपते । इन्द्र ।
विश्वाभिः । ऊतिऽभिः । माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् ।
अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ २ ॥

हे शचीपते कर्मपते उग्र उद्गूर्णेन्द्र अभिद्रुहो द्रोग्ध्रीः पृतनाः सेनाः सेहानोभिभवन्सर्वैः पालनैः ब्राह्मणान्पाहीत्यर्थः । सिद्धमन्यत् ॥ २ ॥

अथ तृतीया–

एकराळस्यभुवनस्यराजसिशचीपतइन्द्रविश्वाभिरूतिभिः ।
माध्यन्दिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः ॥ ३ ॥

एकऽराट् । अस्य । भुवनस्य । राजसि । शचीऽपते । इन्द्र ।
विश्वाभिः । ऊतिऽभिः । माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् ।
अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ३ ॥

हे शचीपते इन्द्र अस्य भुवनस्य एकराट् एकएव राजा सन् राजसि भाजसे । सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी–

सस्थावानायवयसित्वमेकइच्छचीपतइन्द्रविश्वाभिरूतिभिः ।
माध्यन्दिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः ॥ ४ ॥

सऽस्थावाना । यवयसि । त्वम् । एकः । इत् । शचीऽपते । इन्द्र ।
विश्वाभिः । ऊतिऽभिः । माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् ।
अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ४ ॥

हे शचीपते इन्द्र त्वमेकइत् एकएव सस्थावाना समानं तिष्ठन्तौ लोकौ यवयसि पृथक्करोषि । सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी—

क्षेमस्यचप्रयुजश्चत्वमीशिषेशचीपतइन्द्रविश्वाभिरूतिभिः।
माध्यन्दिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः॥ ५॥

क्षेमस्य। च। प्रऽयुजः। च। त्वम्। ईशिषे। शचीऽपते। इन्द्र।
विश्वाभिः। ऊतिऽभिः। माध्यन्दिनस्य। सवनस्य। वृत्रऽहन्।
अनेद्य। पिब। सोमस्य। वज्रिऽवः॥ ५॥

अपिच हे शचीपते इन्द्र त्वं सर्वस्य जगतः क्षेमस्य प्रयुजश्च प्रयोगस्य च योगक्षेमयोरित्यर्थः ईशिषे ईश्वरोभवसि। सिद्धमन्यत्॥ ५॥

अथ षष्ठी—

क्षत्रायत्वमवसिनत्वमाविथशचीपतइन्द्रविश्वाभिरूतिभिः।
माध्यंदिनस्यसवनस्यवृत्रहन्ननेद्यपिबासोमस्यवज्रिवः॥ ६॥

क्षत्राय। त्वम्। अवसि। न। त्वम्। आविथ। शचीऽपते। इन्द्र।
विश्वाभिः। ऊतिऽभिः। माध्यन्दिनस्य। सवनस्य। वृत्रऽहन्।
अनेद्य। पिब। सोमस्य। वज्रिऽवः॥ ६॥

हे शचीपते इन्द्र त्वं क्षत्राय जगतोबलाय भवसि अवस्याश्रितात्रक्षसि। त्वं नाविथ केनापि नरक्ष्यसे। सिद्धमन्यत्॥ ६॥

अथ सप्तमी—

श्यावाश्वस्यरेभतस्तथाशृणुयथाशृणोरत्रेःकर्माणिकृण्वतः।
प्रत्रसदस्युमाविथत्वमेकइन्नृषाह्यइन्द्रक्षत्राणिवर्धयन्॥ ७॥१९॥

श्यावऽअश्वस्य। रेभतः। तथा। शृणु। यथा। अशृणोः। अत्रेः।
कर्माणि। कृण्वतः। प्र। त्रसदस्युम्। आविथ। त्वम्। एकः।
इत्। नृऽसह्ये। इन्द्र। क्षत्राणि। वर्धयन्॥ ७॥ १९॥

हे इन्द्र रेभवः स्तुवतः श्यावाश्वस्य मम स्तुतिं कर्माणि कण्ववोरिर्यथा अश्रृणोः तथा शृणु । अपिच क्षत्राणि बलानि कामैर्वर्धयन् युद्धे त्वमेकएव त्रसदस्युं प्राविथ ॥ ७ ॥

॥ इति षष्ठस्य तृतीये एकोनविंशोवर्गः ॥ १९ ॥

यज्ञस्यहीति दशर्चमष्टमं सूक्तम् श्यावाश्वस्यार्षम् प्राग्वत्सप्रेः परिभाषया गायत्रमिन्द्राग्नि-देवताकम् । तथाचानुक्रान्तम्—यज्ञस्यदशैन्द्राग्नमिति । पृष्ठ्याभिप्लवषडहयोः प्रातःसवनेच्छावा-कशस्त्रे आवापार्थमेतत्सूक्तं । सूत्रितञ्च—यज्ञस्यहिस्थइत्यच्छावाकस्येति । चातुर्विंशिकेहनिप्रातः सवने यज्ञस्यहिस्थइति पळहस्तोत्रियसंज्ञकस्तृचः सूत्रितञ्च—इन्द्राग्नीयुवामिमेयज्ञस्यहिस्थ-ऋत्विजेत्यच्छावाकस्येति । अग्निष्टोमे प्रातःसवनेच्छावाकस्य प्रातर्यावभिरिति प्रातःसवनीयस्य प्रस्थितयाज्या । सूत्रितञ्च—प्रातर्यावभिरिति यजतीति । चातुर्विंशिकप्रातःसवनेच्छावाकशस्त्रे श्यावाश्वस्येयर्यं पर्यासस्तृचः । अन्यत्राप्यहर्गणेषु । द्वितीयादिष्वहःसु सूत्र्यतेहि—श्यावाश्व-स्यसुन्वतइति तृचाः पर्यासाइति ।

तत्र प्रथमा—

यज्ञस्य॒ हि स्थ ऋ॒त्विजा॒ सस्नी॒ वाजे॑षु॒ कर्म॑सु ।
इन्द्रा॑ग्नी॒ तस्य॑ बोधतम् ॥ १ ॥

य॒ज्ञस्य॑ । हि । स्थः । ऋ॒त्विजा॑ । सस्नी॒ इति॑ । वाजे॑षु ।
कर्म॑ऽसु । इन्द्रा॑ग्नी॒ इति॑ । तस्य॑ । बो॒ध॒त॒म् ॥ १ ॥

हे इन्द्राग्नी सस्नी शुद्धौ युवां यज्ञस्य ऋत्विजा ऋत्विजौ स्थः भवथोहि । वाजेषु कर्मसु युद्धेषु मोपतिष्ठन्ताविन्द्राग्नी तस्य यजमानस्य मम स्तुतिं वा बोधतं जानीतम् ॥ १ ॥

अथ द्वितीया—

तो॒शासा॑ रथ॒यावा॑ना वृत्र॒हणाप॑राजिता ।
इन्द्रा॑ग्नी॒ तस्य॑ बोधतम् ॥ २ ॥

तो॒शासा॑ । र॒थ॒ऽयावा॑ना । वृ॒त्र॒ऽहना॑ । अप॑राऽजिता ।
इन्द्रा॑ग्नी॒ इति॑ । तस्य॑ । बो॒ध॒त॒म् ॥ २ ॥

हे इन्द्राग्नी तोशासा शत्रून् हिंसन्तौ रथयावाना रथेन गच्छन्तौ वृत्रहणा वृत्रस्य हन्तारौ अपराजिता केनाप्यपराजितौ तस्य तं मां बोधतम् ॥ २ ॥

अथ तृतीया–

इदंवांमदिरंमध्वधुक्षन्नद्रिभिर्नरः ।
इन्द्राग्नीतस्यबोधतम् ॥ ३ ॥

इदम् । वाम् । मदिरम् । मधु । अधुक्षन् । अद्रिऽभिः ।
नरः । इन्द्राग्नी इति । तस्य । बोधतम् ॥ ३ ॥

हे इन्द्राग्नी वां युवां उद्दिश्य नरो यज्ञस्य नेतारोऽद्रिभिर्ग्रावभिः इदं प्रसिद्धं मदिरं मदकरं मधु सोमात्मकममृतं अधुक्षन् अपूरयन्। सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी–

जुषेथांयज्ञमिष्टयेसुतंसोमंसधस्तुती ।
इन्द्राग्नीआगतंनरा ॥ ४ ॥

जुषेथाम् । यज्ञम् । इष्टये । सुतम् । सोमम् ।
सधस्तुती इति सधऽस्तुती । इन्द्राग्नी इति । आ । गतम् । नरा ॥४॥

हे सधस्तुती सहभूतस्तुती नरानेताराविंद्राग्नी यज्ञं जुषेथां सेवेथां इष्टये यागाय सुतमभिषुतं सोमञ्च आगतमागच्छतम् ॥ ४ ॥

अथ पञ्चमी–

इमाजुषेथांसवनायेभिर्हव्यान्यूहथुः ।
इन्द्राग्नीआगतंनरा ॥ ५ ॥

इमा । जुषेथाम् । सवना । येभिः । हव्यानि । ऊहथुः ।
इन्द्राग्नी इति । आ । गतम् । नरा ॥ ५ ॥

हे इन्द्राग्नी नरानेतारौ युवां येभिः यैः सवनैः हव्यान्यूहथुः वहथस्तानीमा इमानि सवना सवनानि जुषेथां सेवेथामागतश्च ॥ ५ ॥

अथ षष्ठी–

इमांगायत्रवर्तनिंजुषेथांसुष्टुतिंमम ।
इन्द्राग्नीआगतंनरा ॥ ६ ॥ २० ॥

इमाम् । गायत्रऽवर्तनिम् । जुषेथाम् । सुऽस्तुतिम् । मम ।
इन्द्राग्नी इति । आ । गतम् । नरा ॥ ६ ॥ २० ॥

हे इन्द्राग्नी नरौ युवां मम गायत्रवर्तनिं गायत्रमार्गामिमां सुष्टुतिं शोभनां स्तुतिं जुषेथां सेवेथामागतश्च ॥ ६ ॥

॥ इति षष्ठस्य तृतीये विंशोवर्गः ॥ २० ॥

अथ सप्तमी–

प्रातर्यावभिरागतंदेवेभिर्जेन्यावसू ।
इन्द्राग्नीसोमपीतये ॥ ७ ॥

प्रातर्यावऽभिः । आ । गतम् । देवेभिः । जेन्यावसू इति ।
इन्द्राग्नी इति । सोमऽपीतये ॥ ७ ॥

हे जेन्यावसू जेतव्यशत्रुधनाविन्द्राग्नी प्रातर्यावभिः देवेभिः देवैः सह सोमपीतये सोमस्य पानायागतमागच्छतम् ॥ ७ ॥

अथाष्टमी–

श्यावाश्वस्यसुन्वतोत्रीणांशृणुतंहवम् ।
इन्द्राग्नीसोमपीतये ॥ ८ ॥

श्यावऽअश्वस्य । सुन्वतः । अत्रीणाम् । शृणुतम् । हवम् ।
इन्द्राग्नी इति । सोमऽपीतये ॥ ८ ॥

हे इन्द्राग्नी युवां सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य श्यावाश्वस्य ममात्रीणामृत्विजां हवमाह्वानं सोमस्य पानाय शृणुतम् ॥ ८ ॥

अथ नवमी–

एवावामह्वऊतयेयथाहुवन्तमेधिराः ।
इन्द्राग्नीसोमपीतये ॥ ९ ॥

एव । वाम् । अह्वे । ऊतये । यथा । अहुवन्त ।
मेधिराः । इन्द्राग्नी इति । सोमऽपीतये ॥ ९ ॥

हे इन्द्राग्नी वां युवां यथा मेधिराः प्राज्ञा अहुवन्त आहूतवन्तः एव एवमहमूतये रक्षणाय सोमस्य पीतये चाह्वे ह्वयामि ॥ ९ ॥

अथ दशमी–

आहंसरस्वतीवतोरिन्द्राग्न्योरवोवृणे ।
याभ्यांगायत्रमृच्यते ॥ १० ॥ २१ ॥

आ । अहम् । सरस्वतीऽवतोः । इन्द्राग्न्योः । अवः ।
वृणे । याभ्याम् । गायत्रम् । ऋच्यते ॥ १० ॥ २१ ॥

याभ्यां ययोरिन्द्राग्न्योरर्थं गायत्रं साम ऋच्यते स्तूयते तयोः सरस्वतीवतोः स्तुतिमतोरिन्द्राग्न्योः संबंध्यवो रक्षणमहमावृणे ॥ १० ॥

॥ इति षष्ठस्य तृतीये एकविंशोवर्गः ॥ २१ ॥

अग्निमस्तोषीति दशर्चं नवमं सूक्तं काण्वस्य नाभाकस्यार्षं षडष्टका महापंक्तिश्छन्दः अग्निर्देवता । अनुक्रान्तं च–अग्निमस्तोषिनाभाकआग्नेयं महापांक्तंहीति । विनियोगोलैङ्गिकः ।

तत्र प्रथमा—

अग्निमस्तोष्यृग्मियमग्निमीळायजध्यै ।
अग्निर्देवाँअनक्तुनउभेहिविदथेकविरन्तश्चरतिदूत्यं
नभन्तामन्यकेसमे ॥ १ ॥

अग्निम् । अस्तोषि । ऋग्मियम् । अग्निम् । ईळा । यजध्यै ।
अग्निः । देवान् । अनक्तु । नः । उभे इति । हि । विदथे इति ।
कविः । अन्तरिति । चरति । दूत्यम् । नभन्ताम् । अन्यके । समे ॥ १ ॥

ऋग्मियं ऋगर्हं अग्निमस्तोषि स्तौमि । अपिचाग्निं यजध्यै यष्टुमीळा स्तुत्या स्तौमीत्यर्थः अपिचाग्निर्नोस्माकं विदथे यज्ञे देवान् हविर्भिरनक्तु । कविः क्रान्तदर्श्यग्निः उभे द्यावापृथिव्यावन्तर्मध्ये दूत्यं हविर्वहनादिलक्षणं दूतकर्म चरति । अन्यके शत्रवोपि समे सर्वे नभन्तां नभविर्हिंसाकर्मा अग्निना हिंस्यन्ताम् ॥ १ ॥

अथ द्वितीया—

न्यग्नेनव्यसावचस्तनूषुशंसमेषाम् ।
न्यरातीरराव्णांविश्वाअर्योअरातीरितोयुच्छन्त्वामुरोनभ
न्तामन्यकेसमे ॥ २ ॥

नि । अग्ने । नव्यसा । वचः । तनूषु । शंसम् । एषाम् । नि ।
अरातीः । रराव्णाम् । विश्वाः । अर्यः । अरातीः । इतः ।
युच्छन्तु । आऽमुरः । नभन्ताम् । अन्यके । समे ॥ २ ॥

हे अग्ने तनूष्वस्माकमंगेषु नव्यसा नवतरेण वचः वचसा स्तोत्रेण एषां शत्रूणां शंसं शंसनं निदहेत्यर्थः । रराव्णां हविःप्रयच्छतामरातीः शत्रूंश्च निदह । अपिच विश्वाः सर्वे अर्योभिगच्छन्त । आमुरः आमूढा अरातीः शत्रवः इतोयुच्छन्तु गच्छन्तु । सिद्धमन्यत् ॥ २ ॥

अथ तृतीया–

अग्नेमन्मानितुभ्यंकंघृतंनजुह्वआसनि ।
सदेवेषुप्रचिकिद्धित्वंह्यसिपूर्व्यःशिवोदूतोविवस्व
तोनभन्तामन्यकेसमे ॥ ३ ॥

अग्ने । मन्मानि । तुभ्यम् । कम् । घृतम् । न । जुह्वे । आसनि ।
सः । देवेषु । प्र । चिकिद्धि । त्वम् । हि । असि । पूर्व्यः ।
शिवः । दूतः । विवस्वतः । नभन्ताम् । अन्यके । समे ॥ ३ ॥

हे अग्ने तुभ्यं त्वदर्थं आसनि आस्ये कं घृतं न यथा सुखकरं घृतं जुह्वत्यन्ये तद्वदहम त्वास्ये मन्मानि मननीयानि स्तोत्राणि जुह्वे जुहोमि । सत्वं देवेषु देवानां मध्ये प्रचिकिद्धि अस्मदीयाः स्तुतीर्जानीहि । हि अपिच त्वं पूर्व्यः प्रत्नोसि शिवः सुखकरश्चासि विवस्वः दूतश्चासि । सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी–

तत्तदग्निर्वयोदधेयथायथाकृपण्यति ।
ऊर्जाहुतिर्वसूनांशंचयोश्चमयोदधेविश्वस्यैदेवहूत्यै
नभन्तामन्यकेसमे ॥ ४ ॥

तत्ऽतत् । अग्निः । वयः । दधे । यथाऽयथा । कृपण्यति ।
ऊर्जाऽआहुतिः । वसूनाम् । शम् । च । योः । च । मयः । दधे ।
विश्वस्यै । देवऽहूत्यै । नभन्ताम् । अन्यके । समे ॥ ४ ॥

यथा यथा यद्यदन्नं कृपण्यति स्तोतृभिर्याच्यते तत्तद्वयोग्निर्दधे स्तोतृभ्यः प्रयच्छ अपिचोर्जाहुतिरन्नेनाहूयमानोग्निः वसूनां हविषां वासकानां यजमानानां शं शांतिनिमित्तं यो वियप्रयोगजनितं च मयः सुखं दधे करोति । विश्वस्यै देवहूत्यै सर्वस्मै देवानां ह्वानाय भवति यः कश्चनापि देवो यदि हूयते अग्निरेव सर्वं करोतीत्यर्थः । सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी–

सचिकेतसहीयसाग्निश्चित्रेणकर्मणा ।
सहोताशश्वतीनांदक्षिणाभिरभीवृतइनोतिचप्रती
व्यंनर्मन्तामन्यकेसमे ॥ ५ ॥ २२ ॥

सः । चिकेत । सहीयसा । अग्निः । चित्रेण । कर्मणा । सः ।
होता । शश्वतीनाम् । दक्षिणाभिः । अभिऽवृतः । इनोति । च ।
प्रतीव्यम् । नर्मन्ताम् । अन्यके । समे ॥ ५ ॥ २२ ॥

सोऽग्निः सहीयसा अभिभावुकेन चित्रेण नानाविधेन कर्मणा व्यापारेण चिकेत ज्ञायते सोऽग्निः शश्वतीनां बह्वीनां देवतानां होता ह्वाता दक्षिणाभिः पशुभिश्चाभीवृतः परिवृतः प्रतीव्यं प्रत्येतव्यं शत्रुमिनोतिच गच्छतिच । सिद्धमन्यत् ॥ ५ ॥

॥ इति षष्ठस्य तृतीये द्वाविंशोवर्गः ॥ २२ ॥

अथ षष्ठी–

अग्निर्जातादेवानामग्निर्वेदमर्तानामपीच्यम् ।
अग्निःसद्रविणोदाअग्निर्द्वाराव्यूर्णुतेस्वाहुतोनवी
यसानर्मन्तामन्यकेसमे ॥ ६ ॥

अग्निः । जाता । देवानाम् । अग्निः । वेद । मर्तानाम् । अपीच्यम् ।
अग्निः । सः । द्रविणःऽदाः । अग्निः । द्वारा । वि । ऊर्णुते । सुऽआहुतः ।
नवीयसा । नर्मन्ताम् । अन्यके । समे ॥ ६ ॥

देवानां जाता जातानि जन्मान्यग्निर्वेद वेत्ति मर्तानां मनुष्याणां चापीच्यं गुह्यमग्निर्वेद वेत्ति सोऽग्निर्द्रविणोदाः धनस्य दाता नवीयसा नवतरेण हविषा स्वाहुतः सम्यगाहुतोऽग्निः द्वारा धनस्य द्वाराणि व्यूर्णुतेच । सिद्धमन्यत् ॥ ६ ॥

अथ सप्तमी–

अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा ।
समुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो
नभन्तामन्यके समे ॥ ७ ॥

अग्निः । देवेषु । सम्ऽवसुः । सः । विक्षु । यज्ञियासु । आ । सः ।
मुदा । काव्या । पुरु । विश्वम् । भूमऽइव । पुष्यति । देवः ।
देवेषु । यज्ञियः । नभन्ताम् । अन्यके । समे ॥ ७ ॥

यो देवेषु मध्येऽग्निः संवसुः संवसति सोऽग्निर्यज्ञियासु यज्ञार्हासु विक्षु प्रजास्वप्यासंवसुः । किञ्च सोऽग्निः पुरु बहूनि काव्या कर्माणि भूमेव यथा भूमिः विश्वं तथा मुदा मोदेन पुष्यति देवेषु मध्ये देवोऽग्निर्यज्ञियोऽयज्ञार्हश्च भवति । सिद्धमन्यत् ॥ ७ ॥

अथाष्टमी–

यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।
तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं
नभन्तामन्यके समे ॥ ८ ॥

यः । अग्निः । सप्तऽमानुषः । श्रितः । विश्वेषु ।
सिन्धुषु । तम् । आ । अगन्म । त्रिऽपस्त्यम् ।
मन्धातुः । दस्युहन्ऽतमम् । अग्निम् । यज्ञेषु ।
पूर्व्यम् । नभन्ताम् अन्यके । समे ॥ ८ ॥

योऽग्निः सप्तमानुषः विश्वेषु सर्वेषु सिन्धुषु नदीषु श्रितः त्रिपस्त्यं त्रिस्थानं मन्धातुः यौवनाश्वस्य मान्धातुर्दस्युहन्तमं दस्यूनां हन्तारं यज्ञेषु पूर्व्यं मुख्यं तमग्निं वयमागन्म । सिद्ध-मन्यत् ॥ ८ ॥

अथ नवमी–

अग्निस्त्रीणित्रिधातून्याक्षेतिविदथाकविः ।
सत्रीँरेकादशाँइहयक्षच्चपिप्रयच्चनोविप्रोदूतःपरि
ष्कृतोनभन्तामन्यकेसमे ॥ ९ ॥

अग्निः । त्रीणि । त्रिऽधातूनि । आ । क्षेति । विदथा ।
कविः । सः । त्रीन् । एकादशान् । इह । यक्षत् । च । पिप्रयत् ।
च । नः । विप्रः । दूतः । परिऽकृतः । नभन्ताम् । अन्यके । समे ॥९॥

कविः क्रान्तदर्श्यग्निः त्रीणि त्रिधातूनि त्रिबंधनानि पृथिव्यादीनि विदथा वेदनीयानि स्थानान्याक्षेत्यावसति अपिच सोग्निर्दूतो देवानां विप्रः प्राज्ञः परिष्कृतोलंकृतश्च सन्निह यज्ञे त्रीनेकादशान् त्रयस्त्रिंशद्देवान् यक्षद्यजतु नोस्मान् पिप्रयच्च कामैः पूरयतु च । सिद्धमन्यत् ॥९॥

अथ दशमी–

त्वंनोअग्नआयुषुत्वंदेवेषुपूर्व्यवस्वएकंइरज्यसि ।
त्वामापःपरिस्रुतःपरियन्तिस्वसेतवोनभन्तामन्यकेसमे॥१०॥२२॥

त्वम् । नः । अग्ने । आयुषु । त्वम् । देवेषु । पूर्व्य । वस्वः । एकः ।
इरज्यसि । त्वाम् । आपः । परिऽस्रुतः । परि । यन्ति ।
स्वऽसेतवः । नभन्ताम् । अन्यके । समे ॥ १० ॥ २२ ॥

हे पूर्व्याग्ने त्वमेकएव आयुषु मनुष्येषु द्रुत्यव आयव इति मनुष्यनामसु पाठात् नोस्माकं वस्वोधनस्य इरज्यसि ईशिषे देवेष्वपि त्वमेकएव वस्व इरज्यसि । अपिच त्वां स्वसेतवः स्वभूतसेतवः परिस्रुतः परिस्रवन्त्यः आपः परियन्ति । परिगच्छन्ति सिद्धमन्यत् ॥ १० ॥

॥ इति पष्ठस्य तृतीये त्रयोविंशोवर्गः ॥ २३ ॥

इन्द्राग्नीयुवमिति द्वादशर्चं दशमं सूक्तं नाभाकस्यार्षं द्वितीया षट्पञ्चाशदक्षरा शाकरी द्वादशीत्रिष्टुप् शिष्टामहापंक्तयः इन्द्राग्नीदेवता । तथाचानुक्रान्तम्–इन्द्राग्नीद्वादशैन्द्राग्नंत्रिष्टुबन्तं द्वितीया शक्करीति । महाव्रते निष्केवल्ये ऊरुभागएव सूक्तं । तथाचपञ्चमारण्यके सूत्रितम्–ऊ-

रूइन्द्राग्नीयुवंसुनइति । चातुर्विंशिकेहनि तृतीयसवने मैत्रावरुणो यदि महावालभिदं शंसेत्तदानीं माध्यन्दिने सवने होत्रकाःस्वशस्त्रे आरंभणीयाभ्यऊर्ध्वं नाभाकतृचानावपेरन् तत्र ताहिमध्यमित्यच्छावाकस्य नाभाकतृचः । सूत्रितञ्च—ताहिमध्यंभराणामित्यच्छावाकइति। चातुर्विंशिकेहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिनःपूर्वीष्टइन्द्रेति नाभाकतृचः । सूत्रितञ्च—पूर्वीष्टइन्द्रोपमातयइतिब्राह्मणाच्छंसीति ।

तत्र प्रथमा—

इन्द्राग्नीयुवंसुनःसहन्तादासथोरयिम् ।
येनदृळ्हासमत्स्वावीळुचित्साहिषीमह्यग्निर्वनेववात
इन्नभन्तामन्यकेसमे ॥ १ ॥

इन्द्राग्नी इति । युवम् । सु । नः । सहन्ता । दासथः । रयिम् ।
येन । दृळ्हा । समत्ऽसु । आ । वीळु । चित् । सहिषीमहि ।
अग्निः । वनाऽइव । वाते । इत् । नभन्ताम् । अन्यके । समे ॥ १ ॥

हे इन्द्राग्नी सहन्ता शत्रूनभिभवन्तौ युवं युवां नोस्मभ्यं रयिं धनं सुष्ठु दासथः दत्तं । तं रयिं विशिनष्टि येन रयिणा समत्सु संग्रामे दृढाचित् दृढानि स्थिराण्यपि वीळु शत्रुबलानि अग्निर्वनेव यथाग्निर्वनानि वातइद्वातेनैवाभिभवति तथा सहिषीमहि अभिभवाम। सिद्धमन्यत्॥१॥

अथ द्वितीया—

नहिवांवव्रयामहेथेन्द्रमिद्यजामहेशविष्ठंनृणांनरम् ।
सनःकदाचिदर्वतागमदावाजसातयेगमदामेधसातये
नभन्तामन्यकेसमे ॥ २ ॥

नहि । वाम् । वव्रयामहे । अथ । इन्द्रम् । इत् । यजामहे ।
शविष्ठम् । नृणाम् । नरम् । सः । नः । कदा । चित् । अर्वता ।
गमत् । आ । वाजऽसातये । गमत् । आ ।
मेधऽसातये । नभन्ताम् । अन्यके । समे ॥ २ ॥

हे इन्द्राग्नी वां युवां न वनयामहे वयं धनं न याचामहे। अथत्यपि तर्हि शविष्ठं अतिशयेन बलवन्तं नृणां नरं नेतृणामपि नेतारं इन्द्रमिदिन्द्रमेव यजामहे सइन्द्रो नोस्मानर्वतास्वेन कदाचिद्वाजसातयेन्नलाभायागमदागच्छति कदाचिन्मेधसातये यज्ञभजनायागमत्। सिद्धमन्यत् ॥ २ ॥

अथ तृतीया—

ताहिमध्यंभराणामिन्द्राग्नीअधिक्षितः।
ताउंकवित्वनाकवीपृच्छ्यमानासखीयतेसंधीतमश्नुतं
नरानभंन्तामन्यकेसमे ॥ ३ ॥

ता। हि। मध्यम्। भराणाम्। इन्द्राग्नी इति। अधिऽक्षितः। तौ। ॐम् इति। कविऽत्वना। कवी इति। पृच्छ्यमाना। सखिऽयते। सम्। धीतम्। अश्नुतम्। नरा। नभंन्ताम्। अन्यके। समे ॥ ३ ॥

ता तौ प्रसिद्धाविन्द्राग्नी भराणां मध्यं अधिक्षितः अधिनिवसतो हि। अथ प्रत्यक्षस्तुतिः हे नरा नेतारौ कवित्वना कवित्वेन कवी कान्तकर्माणौ पृच्छ्यमाना कविजनैः पृच्छ्यमानौ ताउ तावेवयुवां सखीयते सखित्वमिच्छते यजमानाय धीतं तत्कृतं कर्म समश्नुतम्। सिद्धमन्यत्॥३॥

अथ चतुर्थी—

अभ्यंर्चनभाकवदिन्द्राग्नीयजसागिरा।
ययोर्विश्वमिदंजगदियंद्यौःपृथिवीमह्युपस्थेबि
भृतोवसुनभंन्तामन्यकेसमे ॥ ४ ॥

अभि। अर्च। नभाकऽवत्। इन्द्राग्नी इति। यजसा। गिरा। ययोः। विश्वम्। इदम्। जगत्। इयम्। द्यौः। पृथिवी। मही। उपऽस्थे। बिभृतः। वसु। नभंन्ताम्। अन्यके। समे ॥ ४ ॥

हे नाभाक नभाकवत् नभाकवन्तावन्द्राग्नी यजसा यागेन गिरा स्तुत्या चाभ्यर्चाभिपूजय। ययोरिन्द्राग्न्योर्विश्वं सर्वमिदं जगत्तिष्ठति ययोश्चोपस्थे इयं द्यौर्मही महती पृथिवी च द्यावापृथिव्यावुभे वसु धनं बिभृतो धारयतः। सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी—

प्रब्रह्माणिनभाकवदिन्द्राग्निभ्यामिरज्यत ।
यासप्तबुध्नमर्णवंजिह्मबारमपोर्णुतइन्द्रईशानओजं
सानभन्तामन्यकेसमे ॥ ५ ॥

प्र । ब्रह्माणि । नभाकऽवत् । इन्द्राग्निऽभ्याम् । इरज्यत । या ।
सप्तऽबुध्नम् । अर्णवम् । जिह्मऽबारम् । अपऽऊर्णुतः । इन्द्रः ।
ईशानः । ओजसा । नभन्ताम् । अन्यके । समे ॥ ५ ॥

ब्रह्माणि स्तोत्राणि इन्द्राग्निभ्यां नभाकवत् प्रेरज्यत नाभाकः प्रेरयते । या याविन्द्राग्नी सप्तबुध्नं सप्तमूलं जिह्मबारं पिहितद्वारमर्णवमपोर्णुतस्तेजोभिराच्छादयतः तयोर्मध्ये ओजसा बलेनेन्द्रईशानईश्वरोभवति । सिद्धमन्यत् ॥ ५ ॥

अथ षष्ठी—

अपिवृश्चपुराणवद्व्रततेरिवगुष्पितमोजोदासस्यदम्भय ।
वयंतदस्यसंभृतंवस्विन्द्रेणविभजेमहिनभन्तामन्यकेसमे॥६॥२४॥

अपि । वृश्च । पुराणऽवत् । व्रततेःऽइव । गुष्पितम् । ओजः । दासस्य ।
दम्भय । वयम् । तत् । अस्य । सम्ऽभृतम् । वसु । इन्द्रेण । वि ।
भजेमहि । नभन्ताम् । अन्यके । समे ॥ ६ ॥ २४ ॥

अपिच हे इन्द्र पुराणवत्मद्वो यथा व्रततेरिव यथा लतायागुष्पितं निर्गतां शाखां वृश्चति तथा शत्रूणां वृश्च छेदय । तदेवाह दासस्य दासनामकस्य शत्रोः ओजोबलं दंभय नाशय । अथ परोक्षस्तुतिः वयं नाभाकाः अस्य दासस्य तत्प्रसिद्धं संभृतं वसु इन्द्रेण हेतुना विभजेमहि । सिद्धमन्यत् ॥ ६ ॥

॥ इति षष्ठस्य तृतीये चतुर्विंशोवर्गः ॥ २४ ॥

अथ सप्तमी–

यदिन्द्राग्नीजनाइमेविह्वयन्तेतनागिरा।
अस्माकेभिर्नृभिर्वयंसासह्यामपृतन्यतोवनुयामवनुष्यतोनभन्तामन्यकेसमे ॥ ७ ॥

यत् । इन्द्राग्नी इति । जनाः । इमे । विऽह्वयन्ते । तना । गिरा ।
अस्माकेभिः । नृऽभिः । वयम् । ससह्याम । पृतन्यतः । वनुयाम ।
वनुष्यतः । नभन्ताम् । अन्यके । समे ॥ ७ ॥

यत् ये इमे जनाः तना धनेन गिरा स्तुत्या च इन्द्राग्नी विह्वयन्ते विशेषेण ह्वयन्ति तेषु मध्ये वयं नाभाकाः पृतन्यतः पृतनामिच्छन्तः अस्माकेभिरस्माकीनैर्नृभिर्मनुष्यैः ससह्याम शत्रूनभिभवेम । वनुष्यतः स्तुतिमिच्छन्तः शत्रून् वनुयामच । सिद्धमन्यत् ॥ ७ ॥

अथाष्टमी–

यानुश्वेताववोदिवउच्चरातउपद्युभिः।
इन्द्राग्न्योरनुव्रतमुहानायन्तिसिन्धवोयान्त्सींबन्धादमुञ्चतांनभन्तामन्यकेसमे ॥ ८ ॥

या । नु श्वेतौ । अवः । दिवः । उत्ऽचरातः । उप । द्युऽभिः । इन्द्राग्न्योः ।
अनु । व्रतम् । उहानाः । यन्ति । सिन्धवः । यान् । सीम् ।
बन्धात् । अमुञ्चताम् । नभन्ताम् । अन्यके । समे ॥ ८ ॥

यानु यावेवेन्द्राग्नी श्वेतौ श्वेतवर्णौ सत्वगुणोपेतावित्यर्थः अवोधस्तात् द्युभिर्दीप्तिभिर्दिवउपोच्चरातः उच्चरतस्तयोरेवेन्द्राग्न्योः उहानाः हविर्वहन्तो यजमानाः व्रतं कर्मानुयन्ति । अपि सीमिमाविन्द्राग्नी यान् यसिद्धान् सिन्धवः सिन्धून् बन्धात् बन्धनादमुञ्चताम् । सिद्धमन्यत् ॥८॥

अथ नवमी–

पूर्वीष्टइन्द्रोपमातयःपूर्वीरुतप्रशस्तयःसूनोहिन्वस्यहरिवः।
वस्वोवीरस्यापृचोयानुसाधन्तनोधियोनभन्तामन्यकेसमे ॥ ९ ॥

पूर्वीः । ते । इन्द्र । उपऽमातयः । पूर्वीः । उत । प्रऽशस्तयः । सूनो इति ।
हिन्वस्य । हरिऽवः । वस्वः । वीरस्य । आऽपृचः । याः । नु ।
साधन्त । नः । धियः । नभन्ताम् । अन्यके । समे ॥ ९ ॥

हे हरिवो वज्रिन् सूनो प्रेरयितरिन्द्र हिन्वस्य प्रीणयितुः वस्वोदीपकस्य वीरस्यापृचो-भनान्युपयच्छतस्ते तव ता उपमातयउपमानानि पूर्वीर्बहूनि उतापिच प्रशस्तयः पूर्वीः याः नोस्माकं धियः प्रज्ञां नु क्षिप्रं साधन्तासाधयन् । सिद्धमन्यत् ॥ ९ ॥

अथ दशमी—

तंशिशीतासुवृक्तिभिस्त्वेषंसत्वानमृग्मियम् ।
उतोनुचिद्यओजसाशुष्णस्याण्डानिभेदतिजेष
त्स्वर्वतीरपोनभन्तामन्यकेसमे ॥ १० ॥

तम् । शिशीत । सुवृक्तिऽभिः । त्वेषम् । सत्वानम् । ऋग्मियम् ।
उतो इति । नु । चित् । यः । ओजसा । शुष्णस्य । आण्डानि ।
भेदति । जेषत् । स्वःऽवतीः । अपः । नभन्ताम् । अन्यके । समे ॥ १० ॥

हे स्तोतारः त्वेषं दीप्तं सत्वानं संभक्तारं धनानां ऋग्मियं ऋगर्हं ऋग्भिः स्तोतव्यं तमिन्द्रं सुवृक्तिभिः स्तुतिभिः शिशीत संस्कुरुत । उतोनुचित् अपिच यः इन्द्रः ओजसा बलेन शुष्णस्य शुष्णनामकस्यासुरस्याण्डान्यण्डजातान्यपत्यानि भेदत्यभिनत् सः स्वर्वतीर्दिव्यान्यपः सलिलानि जेषज्जयतु । सिद्धमन्यत् ॥ १० ॥

अथैकादशी—

तंशिशीतास्वध्वरंसत्यंसत्वानमृत्वियम् ।
उतोनुचिद्यओहतआण्डाशुष्णस्यभेदत्यजैः
स्वर्वतीरपोनभन्तामन्यकेसमे ॥ ११ ॥

तम् । शिशीत । सुऽअध्वरम् । सत्यम् । सत्वानम् । ऋत्वियम् ।
उतो इति । नु । चित् । यः । ओहते । आण्डा । शुष्णस्य । भेदति ।
अजैः । स्वःऽवतीः । अपः । नभन्ताम् । अन्यके । समे ॥ ११ ॥

हे स्तोतारः स्वध्वरं सुयज्ञं सत्यमविनाशं सत्वानं संभक्तारमस्वियमृतौयपष्टव्यं तमिन्द्रं शिशीत स्तुतिभिः संस्कुरुत । अथ प्रत्यक्षस्तुतिः उतोनुचित् अपिच यइन्द्रः ओहते यज्ञं प्रतिगच्छति शुष्णस्याण्डानि अण्डजातानिच भेदति भिनत्ति सत्वं स्वर्वतीर्दिव्यान्यपः सलिलान्यजैर्जैषीः । सिद्धमन्यत् ॥ ११ ॥

अथ द्वादशी—

एवेन्द्राग्निभ्यांपितृवन्नवीयोमन्धातृवदङ्गिरस्वदवाचि ।
त्रिधातुनाशर्मणापातमस्मान्वयंस्यामपतयोरयीणाम्॥१२॥२५॥

एव । इन्द्राग्निऽभ्याम् । पितृऽवत् । नवीयः । मन्धातृऽवत् ।
अङ्गिरस्वत् । अवाचि । त्रिऽधातुना । शर्मणा । पातम् ।
अस्मान् । वयम् । स्याम । पतयः । रयीणाम् ॥ १२ ॥ २५ ॥

एवैवं याभ्यामिन्द्राग्निभ्यां पितृवन्नाभाकवत् मन्धातृवत् यौवनाश्वमन्धातृवत् चांगिरस्वदंगिरोवच्च नवीयोनवतरमवाचि नाभाकेन मया पाठिताविन्द्राग्नी त्रिधातुना त्रिपर्वणा शर्मणा गृहेण नोस्मान्नाभाकान् पातं रक्षतं । वयं रयीणां धनानां पतयः स्वामिनः स्याम भवेम ॥ १२ ॥

॥ इति पञ्चमस्य तृतीये पञ्चविंशोवर्गः ॥ २५ ॥

अस्माऊष्विति दशर्चमेकादशं सूक्तं अत्रेयमनुक्रमणिका—अस्माऊषुदशवारुणंत्विति । नाभाकऋषिः अनुवृत्तत्वात् । महापांक्तंहीत्युक्तत्वादिदमपि महापांक्तं । इदमादिकेद्वे सूक्ते वरुणदेवत्ये । विनियोगोलैंगिकः । चातुर्विंशिकेहनि माध्यन्दिनसवने मैत्रावरुणशस्त्रे आरंभणीयायाऊर्ध्वं सक्षपइत्ययं नाभाकतृचः । सूत्रितश्च—सक्षपःपरिषस्वजइति मैत्रावरुणइति यःककुभइत्येतत्प्रभृतिकोवा नाभाकतृचः सूत्रितश्च—यः ककुभोनिधारयइतिचेति ।

तत्र प्रथमा—

अस्माऊषुप्रभूतयेवरुणायमरुद्भ्योर्चाविदुष्टरेभ्यः ।
योधीतामानुषाणांपश्वोगाइवरक्षतिनभन्तामन्यकेसमे ॥ १ ॥

अस्मै । ऊँ इति । सु । प्रऽभूतये । वरुणाय । मरुत्ऽभ्यः ।
अर्च । विदुःऽतरेभ्यः । यः । धीता । मानुषाणाम् ।
पश्वः । गाःऽइव । रक्षति । नभन्ताम् । अन्यके । समे ॥ १ ॥

हे स्तोतः सुप्रभूतये प्रकृष्टधनायास्मै वरुणाय विदुष्टरेभ्यो विद्वत्तरेभ्यो मरुद्भ्यश्चार्च स्तुहि । योवरुणो धीता कर्मणा मानुषाणां मनुष्याणांपश्वः पशून् गाइव रक्षति। सिद्धमन्यत् ॥१॥

अथ द्वितीया—

तमूषुसमनागिरापितॄणांचमन्मभिः ।
नाभाकस्यप्रशस्तिभिर्यःसिन्धूनामुपोदयेसप्तस्वसासमध्यमोनभन्तामन्यकेसमे ॥ २ ॥

तम् । ऊँ इति । सु । समना । गिरा । पितॄणाम् । च । मन्मऽभिः ।
नाभाकस्य । प्रशस्तिऽभिः । यः । सिन्धूनाम् । उप । उत्ऽअये ।
सप्तऽस्वसा । सः । मध्यमः । नभन्ताम् । अन्यके । समे ॥ २ ॥

तमु तमेव वरुणं समना समानया गिरा स्तुत्या स्वभिष्टौमि पितॄणां मन्मभिः स्तोमैश्चाभिष्टौमि नाभाकस्य ऋषेः प्रशस्तिभिः स्तोत्रैश्चाभिष्टौमि सिन्धूनां स्यन्दमानानां नदीनां उप समीपे उदये गच्छति यश्च सप्तस्वसा समध्यमइतिवाग्भिर्निरुच्यते अन्यके दुर्धियः शत्रवः समे सर्वे नभन्तां माभूवन्। तथाचयास्कः—तंस्वभिष्टौमि समानया गिरा गीत्या स्तुत्या पितॄणाञ्च मननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिः ऋषिर्नाभाकोबभूव यःस्यन्दमानानामासामपामुपोदयेसप्तस्वसारमेनमाह वाग्भिः समध्यमइति निरुच्यतेथैषएवभवति नभन्तामन्यकेसमे माभूवन्नन्यकेसर्वे येनोद्विषन्तिदुर्धियः पापधियः पापसंकल्पाइति ॥ २ ॥

अथ तृतीया—

सक्षपःपरिषस्वजेन्यु१स्रोमायया॑दधेसविश्वंपरिदर्शतः ।
तस्यवेनीरनुव्रतमुषस्तिस्रोअवर्धयन्नभन्तामन्यकेसमे ॥ ३ ॥

---

१ नि० १०.५. ।

सः । क्षपः । परि । सस्वजे । नि । उस्रः । मायया । दधे ।
सः । विश्वम् । परि । दर्शतः । तस्य । वेनीः । अनु । व्रतम् ।
उषः । तिस्रः । अवर्धयन् । नभन्ताम् । अन्यके । समे ॥ ३ ॥

सवरुणः क्षपोरात्रीः परिसस्वजे परिष्वजते अपिच दर्शतो दर्शनीयः सवरुणः उस्रःउत्सरणशीलःसन् विश्वं मायया कर्मणा परि परितः निदधे निदधाति । किञ्च तस्य वरुणस्य व्रतं कर्म वेनीः कामयमानाः प्रजास्तिस्त्रउषस्तिसृ प्रातर्माध्यन्दिनं सायञ्च अन्ववर्धयन् अनुवर्धयन्ति । सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी–

यःककुभोनिधारयःपृथिव्यामधिदर्शतः ।
समातापूर्व्यंपदंतद्वरुणस्यसत्यंसहिगोपाइवे
र्योनभन्तामन्यकेसमे ॥ ४ ॥

यः । ककुभः । निऽधारयः । पृथिव्याम् । अधि । दर्शतः ।
सः । माता । पूर्व्यम् । पदम् । तत् । वरुणस्य । सत्यम् । सः ।
हि । गोपाःऽइव । इर्यः । नभन्ताम् । अन्यके । समे ॥ ४ ॥

योवरुणः पृथिव्यामधि पृथिव्याउपरि दर्शतो दर्शनीयः सन् ककुभो दिशो निधारयः निधारयति सवरुणोमाता निर्माता पूर्व्यं मत्नं पदं स्वर्गाख्यं स्थानं सत्यं असाभिश्रसर्पणीयं तद्वरुणस्यस्वकृतम् । अपिच सहि सएव इर्यईश्वरः सन् गोपाइव गोपालइव पशूनामस्माकं रक्षिता । सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी–

योधर्ताभुवनानांयउस्राणामपीच्यावेदनामानिगुह्या ।
सकविःकाव्यापुरुरूपंद्यौरिवपुष्यतिनभन्तामन्यकेसमे ॥ ५ ॥ २६ ॥

यः । धर्ता । भुवनानाम् । यः । उस्राणाम् । अपीच्या । वेद ।
नामानि । गुह्या । सः । कविः । काव्या । पुरु । रूपम् ।
द्यौःऽइव । पुष्यति । नभन्ताम् । अन्यके । समे ॥ ५ ॥ २६ ॥

योवरुणोभुवनानां धर्ता धारयिता यश्चोस्राणां देवाधिष्ठानभूतानां रश्मीनामपीच्यापीच्यान्यन्तर्हितानि गुह्या गुह्यानि गुहायां निहितानि नामानि वेद जानाति सवरुणः कविः प्राज्ञःसन् काव्या काव्यानि कविकर्माणि पुरु बहूनि रूपं द्यौरिव पुष्यति। सिद्धमन्यत् ॥ ५ ॥

॥ इति पष्ठस्य तृतीये षड्विंशोवर्गः ॥ २६ ॥

अथ षष्ठी–

यस्मिन्विश्वानिकाव्याचक्रेनाभिरिवश्रिता।
त्रितंजूतीसपर्यतव्रजेगावोनसंयुजेयुजेअश्वाँअयु
क्षतनभन्तामन्यकेसमे ॥ ६ ॥

यस्मिन्। विश्वानि। काव्या। चक्रे। नाभिःऽइव। श्रिता।
त्रितम्। जूती। सपर्यत। व्रजे। गावः। न। सम्ऽयुजे।
युजे। अश्वान्। अयुक्षत। नभन्ताम्। अन्यके। समे ॥ ६ ॥

यस्मिन्वरुणे विश्वानि सर्वाणि काव्या काव्यानि कविकर्माणि चक्रे नाभिरिव यथा रथस्य चक्रेनाभिस्तथा श्रिता श्रितानि तं त्रितं त्रिस्थानं वरुणं जूती जूत्या क्षिप्रं सपर्यत हे मदीयाजनाः परिचरत। किमर्थमित्यतआह व्रजे गोष्ठे गावोन यथा गाः संयुजे संयोगार्थं सहस्थापयितुं युजे युञ्जन्ति तथास्माकमभियोगायाश्वानयुक्षत सपत्नायुञ्जन्ति अतस्तदुपद्रवपरिहाराय वरुणं परिचरेतेत्यर्थः ॥ ६ ॥

अथ सप्तमी–

यआस्वत्कआशयेविश्वाजातान्येषाम्।
परिधामानिमर्मृशद्वरुणस्यपुरोगयेविश्वेदेवाअनु
व्रतंनभन्तामन्यकेसमे ॥ ७ ॥

यः। आसु। अत्कः। आऽशये। विश्वा। जातानि। एषाम्।
परि। धामानि। मर्मृशत्। वरुणस्य। पुरः। गये। विश्वे।
देवाः। अनु। व्रतम्। नभन्ताम्। अन्यके। समे ॥ ७ ॥

यः वरुणः आसुदिक्षु अत्कः व्याप्तःसन् आशाये आवृतोवर्तते यः वरुणः एषां शत्रूणां विश्वा सर्वाणि परिज्ञातानि परितोभूतानि धामानि पुराणि मर्दशत् परिमृशतोवरुणस्य पुरोग-ये रथस्यपुरस्ताद्भवति यस्य वरुणस्य पुरस्ताद्विश्वे सर्वेदेवा व्रतं कर्मानुगच्छन्तीत्यर्थः। सिद्ध-मन्यत् ॥ ७ ॥

अथाष्टमी—

समसमुद्रोअपीच्यस्तुरोद्यामिवरोहतिनियदासुयजुर्दधे।
समायाअर्चिनापदास्तृणान्नाकमारुहन्नभं
न्तामन्यकेसमे ॥ ८ ॥

सः । समुद्रः । अपीच्यः । तुरः । द्याम्ऽइव । रोहति । नि ।
यत् । आसु । यजुः । दधे । सः । मायाः । अर्चिना । पदा ।
अस्तृणात् । नाकम् । आ । अरुहत् । नभन्ताम् । अन्यके । समे ॥ ८ ॥

यस्मादापः समुद्रवन्ति सवरुणः समुद्रोपीच्योन्तर्हितः तुरः क्षिप्रः द्यामिव यथा आदि-त्योद्यां रोहति तथा नाकं रोहति। अपिच यत् योवरुणः आसु दिक्षु यजुः भजाम्योदानं निदधे निदधाति सवरुणः मायाः असुराणां माया आर्चिना अर्चिष्मता पदा स्थानेन तेजसेत्यर्थः अ-स्तृणात् समंताद्धिनस्ति नाकं स्वर्गमारुहदारोहति। सिद्धमन्यत् ॥ ८ ॥

अथ नवमी—

यस्यश्वेताविचक्षणातिस्रोभूमीरधिक्षितः।
त्रिरुत्तराणिपप्रतुर्वरुणस्यध्रुवंसदःससमाना
मिरज्यतिनभन्तामन्यकेसमे ॥ ९ ॥

यस्य । श्वेता । विऽचक्षणा । तिस्रः । भूमीः । अधिऽक्षितः ।
त्रिः । उत्ऽतराणि । पप्रतुः । वरुणस्य । ध्रुवम् । सदः । सः ।
समानाम् । इरज्यति । नभन्ताम् । अन्यके । समे ॥ ९ ॥

यस्य वरुणस्याधिक्षितौतरिक्षेधिवसतः श्वेता श्वेतानि विचक्षणा तेजांसि तिस्रोभूमीः निरुत्तराणि तिसृणां अधिश्रितानि भुवनानि पप्रतुः प्रथयन्ति । तथाचमन्त्रवर्णः—तिस्रोभूमीर्धारयन्त्रीं रुतद्यूनिति । तस्य वरुणस्य सदः स्थानं ध्रुवमचलमिति । किञ्च सवरुणः सप्तानां सिन्धूनामिरज्यतीश्वरोभवति । सिद्धमन्यत् ॥ ९ ॥

अथ दशमी—

यःश्वेताँअधिनिर्णिजश्चक्रेकृष्णाँअनुव्रता ।
सधामपूर्व्यंममेयःस्कंभेनविरोदसीअजोनद्याम
धारयन्नमन्तामन्यकेसमे ॥ १० ॥ २७ ॥

यः । श्वेतान् । अधिऽनिर्निजः । चक्रे । कृष्णान् । अनु । व्रता ।
सः । धाम । पूर्व्यम् । ममे । यः । स्कम्भेन । वि । रोदसी इति ।
अजः । न । द्याम् । अधारयत् । नभन्ताम् । अन्यके । समे ॥ १० ॥ २७ ॥

योवरुणः निर्निजः आत्मीयान्रश्मीन् दिवा श्वेतानधिचक्रेधिकरोति तथा रात्रौ कृष्णान् चक्रे सवरुणोनुव्रता कर्माणि लक्षीकृत्योभयविधकर्मानुगुणं पूर्व्यं धामान्तरिक्षं दिवंवा ममे निर्ममे । अपिच यः स्कंभेनान्तरिक्षेण अजोन यथा आदित्योद्यां धारयति तथा रोदसी द्यावापृथिव्यौ व्यधारयत् विधारयति सवरुणइत्यर्थः । सिद्धमन्यत् ॥ १० ॥

॥ इति पञ्चस्य तृतीये सप्तविंशोवर्गः ॥ २७ ॥

अस्तभ्नादिति षळृचं द्वादशं सूक्तं अर्चनानाऋषिः काण्वोनाभाकोवाऋषिः उत्तरोत्वर्चनानाः आद्यस्तृचस्त्रैष्टुभोवरुणदेवत्यः द्वितीयस्तृचआनुष्टुभोविश्वदेवताकः । तथाचानुक्रान्तम्—अस्तभ्नाद्षळर्चनानावा त्रैष्टुभमन्त्यंवा तृचमाश्विनमानुष्टुभमपश्यदिति । सूक्तविनियोगोलैंगिकः । वारुणेपशौ हविषोयाज्या अस्तभ्नादिति । सूत्रितञ्च—अस्तभ्नाद्यामसुरोविश्ववेदाइत्येकादशिनइति । अग्नीषोमप्रणयनेप्येषोत्तरा परिधानीया । तथासूत्रितं—अस्तभ्नाद्यामसुरोविश्ववेदाइति परिदध्यादुत्तरयावेति । एवावन्दस्वेत्येषा वारुणेपशौ हविषोनुवाक्या । सूत्रितञ्च—एवावन्दस्ववरुणंबृहन्तं तत्त्वायामिब्रह्मणावन्दमानइति द्वे । सोमप्रवहणेइमांधियमित्येषा परिधानीया । सूत्रितञ्च—इमांधियंशिक्षमाणस्यदेवेति निहितेपरिदध्यादिति ।

१ ऋ० सं० २.७.७.।

तत्र प्रथमा—

अस्तभ्नाद्द्यामसुरोविश्ववेदाअमिमीतवरिमाणंपृथिव्याः ।
आसीदद्विश्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि ॥ १ ॥

अस्तभ्नात् । द्याम् । असुरः । विश्वऽवेदाः । अमिमीत ।
वरिमाणम् । पृथिव्याः । आ । असीदत् । विश्वा । भुवनानि ।
सम्ऽराट् । विश्वा । इत् । तानि । वरुणस्य । व्रतानि ॥ १ ॥

विश्ववेदा विश्वधनोऽसुरो बलवान् वरुणो द्यामस्तभ्नात् तथा पृथिव्याः च वरिमाणं परिमाणममिमीत चक्रे । एवं निर्मितानि विश्वा सर्वाणि भुवनानि सम्राड्भूत्वा सीदच्चाध्यतिष्ठच्च । वरुणस्य तान्येतानि व्रतानि कर्माणि विश्वेद् विश्वान्येव अतोवर्णयितुमशक्यानीत्यर्थः ॥ १ ॥

अथ द्वितीया—

एवावन्दस्ववरुणंबृहन्तंनमस्याधीरममृतस्यगोपाम् ।
सनःशर्मत्रिवरूथंवियंसत्पातंनोद्यावापृथिवीउपस्थे ॥ २ ॥

एव । वन्दस्व । वरुणम् । बृहन्तम् । नमस्य । धीरम् । अमृतस्य ।
गोपाम् । सः । नः । शर्म । त्रिऽवरूथम् । वि । यंसत् ।
पातम् । नः । द्यावापृथिवी इति । उपऽस्थे ॥ २ ॥

हे स्तोतः बृहन्तं महान्तं वरुणमेवैवं वन्दस्व स्तुहि अमृतस्य गोपां गोपायितारं धीरं प्राज्ञं वरुणं नमस्य नमस्कुरुच । सवरुणो नोऽस्मभ्यं त्रिवरूथं त्रिस्थानं शर्म गृहं वियंसद् प्रयच्छतु उपस्थे उपस्थाने वर्तमानान् नोऽस्मान् द्यावापृथिवी द्यावापृथिव्यौ पातं रक्षतम् ॥ २ ॥

अथ तृतीया—

इमांधियंशिक्षमाणस्यदेवक्रतुंदक्षंवरुणसंशिशाधि ।
ययातिविश्वादुरितातरेमसुतर्माणमधिनावंरुहेम ॥ ३ ॥

इमाम् । धियम् । शिक्षमाणस्य । देव । क्रतुम् । दक्षम् ।
वरुण । सम् । शिशाधि । ययां । अति । विश्वा । दुःऽइता ।
तरेम । सुऽतर्माणम् । अधि । नावम् । रुहेम ॥ ३ ॥

हे देव द्योतमान वरुण इमां धियमिदंकर्म शिक्षमाणस्यानुतिष्ठतोमम क्रतुं प्रज्ञानं दक्षं बलंच संशिशाधि तीक्ष्णीकुरु यया नावा यज्ञरूपया विश्वा सर्वाणि दुरिता दुरितान्यतितरेम तां सुतर्माणं सुष्ठुतारयित्रीं यज्ञरूपां नावमधिरुहेम वयमारुहेम दुःखसागरतरणे हेतुत्वाद्यज्ञो-नौरिति अत्रव्यपदिश्यते ॥ ३ ॥

अथ चतुर्थी–

आवांग्रावाणोअश्विनाधीभिर्विप्राअचुच्यवुः ।
नासत्यासोमपीतयेनभन्तामन्यकेसमे ॥ ४ ॥

आ । वाम् । ग्रावाणः । अश्विना । धीभिः । विप्राः । अचुच्यवुः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ४ ॥

हे नासत्या सत्यौ सत्यप्रणेतारौवा । तथाचयास्कः–सत्यावेवनासत्यावित्यौर्णवाभःसत्यस्य प्रणेताराविति[1] । अश्विनाश्विनौ वां युवां सोमपीतये सोमस्य पानाय विप्राः प्राज्ञा ऋत्विजोग्रावाणः सोमाभिषवपाषाणाश्च धीभिः कर्मभिः स्वस्वव्यापारैराचुच्यवुरभिगच्छन्ति । सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी–

यथांवामत्रिरश्विनागीर्भिर्विप्रोअजोहवीत् ।
नासत्यासोमपीतयेनभन्तामन्यकेसमे ॥ ५ ॥

यथां । वाम् । अत्रिः । अश्विना । गीःऽभिः । विप्रः । अजोहवीत् ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ५ ॥

हे नासत्यावश्विनौ वां युवां विप्रः प्राज्ञोत्रिर्यथा गीर्भिः स्तुतिभिः सोमपीतये अजोहवीत् तथाहमपि जोहवीमि ॥ ५ ॥

---

1 नि० ६.१३. ।

अथ षष्ठी—

एवावामह्वऊतयेयथाहुवन्तमेधिराः ।
नासत्यासोमपीतयेनभन्तामन्यकेसमे ॥ ६ ॥ २८ ॥

एव । वाम् । अह्वे । ऊतये । यथा । अहुवन्त । मेधिराः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके ॥ समे ॥ ६ ॥ २८ ॥

इयं व्याख्यातचरा ॥ ६ ॥

॥ इतिषष्ठस्यतृतीयेऽष्टाविंशोवर्गः ॥ २८ ॥

॥ इत्यष्टमे मंडले पञ्चमोनुवाकः ॥ ५ ॥

षष्ठेनुवाके षट् सूक्तानि तत्रेमेविप्रस्येति त्रयस्त्रिंशदृचं प्रथमं सूक्तम् आंगिरसस्य विरूपस्यार्षं गायत्रमग्निदेवताकम् । तथाचानुक्रान्तम्—इमे त्रयस्त्रिंशद्विरूपआंगिरसआग्नेयंत्विति । प्रातरनुवाकेआग्नेयेक्रतौ गायत्रेछन्दसि आश्विनशस्त्रे चैतदादिके द्वे सूक्ते । सूत्रितञ्च—इमेविप्रस्येति सूक्तेइति । कारीर्यामवभृथेष्ट्याः प्रथमाज्यभागस्याप्स्वग्नइति अनुवाक्या । तथाचसूत्रितम्—अप्सुमन्तावाज्यभागावप्स्वग्नेसधिष्टवेति । आग्नीध्रस्य प्रातःसवने प्रस्थितयाज्या । श्रूयतेच—वक्षामापवशान्नायेत्याग्नीध्रोयजतीति । अग्निवतीष्टौ त्वंह्यग्नइत्येषा याज्या सूत्रितञ्च—त्वंह्यग्नेअग्निना अग्नेत्वमस्मद्युयोध्यमीवाइति । अग्निमन्थनेप्येषा । सूत्रितञ्च—त्वंह्यग्नेअग्निना तंमर्जयन्तसुक्रतुमिति । अग्नयेकामायाष्टाकपालेष्टौ तुभ्यंताअंगिरस्तमेत्येषानुवाक्या । सूत्रितञ्च—तुभ्यंताअंगिरस्तमाश्यामतंकामयग्नेतवोतीति कामयेति । अन्वाहिताग्नेः प्रयाणे समारोपणपक्षे अनयैकाहुतिः कर्तव्या । तथाचसूत्रितम्—तुभ्यंताअंगिरस्तमेति वाज्याहुतिंहुत्वा समारोपयेदिति । वैद्युताग्निनाग्नीनां संसर्गे अग्नयेप्सुमतीष्टिः तत्र यदग्नेदिविजाइतियाज्या । सूत्रितंच—यदग्नेदिविजाअस्यग्निर्होताप्यसीद्यजीयानिति ।

तत्र प्रथमा

इमेविप्रस्यवेधसोग्नेरस्तृतयज्वनः । गिरःस्तोमासईरते ॥ १ ॥

इमे । विप्रस्य । वेधसः । अग्नेः । अस्तृतऽयज्वनः ।
गिरः । स्तोमासः । ईरते ॥ १ ॥

---

१ ऐ० ब्रा० ६. १०.

जिह्वाभिः । अह॑ । नंन॑मत् । अ॒र्चिषा॑ । ज॒ञ्ज॒णाऽभव॑न् ।
अ॒ग्निः । वने॑षु । रो॒च॒ते ॥ ८ ॥

अग्निर्जिह्वाभिरह ज्वालाभिरेव । नंनमवँ अन्नवद्वनस्पतीनत्यन्तं भक्षयन् । अर्चिषा तेजसा जंजणाभवन् ज्वलन् जञ्जणाभवन् मल्मलाभवन्निति ज्वलतिकर्मसुपाठात् वनेष्वरण्येषु रोचते प्रकाशते ॥ ८ ॥

अथ नवमी–

अ॒प्स्व॑ग्ने॒सधि॒ष्टव॒सौष॑धी॒रनु॑रुध्यसे । गर्भे॒सञ्जा॑यसे॒पुनः॑ ॥ ९ ॥

अ॒प्ऽसु । अ॒ग्ने॒ । सधिः॑ । तव॑ । सः । ओष॑धीः । अनु॑ ।
रु॒ध्य॒से॒ । गर्भे॑ । सन् । जा॒य॒से॒ । पु॒न॒रिति॑ ॥ ९ ॥

हे अग्ने यस्य तवाप्सु सधिः प्रवेशस्थानं सत्वमोषधीरनुरुध्यसे अनुरुणत्सि पुनश्च तासां भूमिष्ठानां गर्भसन् भवन् जायसे प्रादुर्भवसि ॥ ९ ॥

अथ दशमी–

उद॑ग्ने॒तव॒तद्घृ॒ताद॒र्चीरो॑चत॒आहु॑तम् । निंसा॑नंजु॒ह्वो॒३॒॑मुखे॑ ॥१०॥३०॥

उत् । अ॒ग्ने॒ । तव॑ । तत् । घृ॒तात् । अ॒र्चिः । रो॒च॒ते॒ ।
आऽहु॑तम् । निंसा॑नम् । जु॒ह्वः॑ । मुखे॑ ॥ १० ॥ ३० ॥

हे अग्ने तव घृतादाहुतं घृतेनाहुतं जुह्वोहोमसाधनभूतायाः स्रुचोमुखे निंसानं लिहानं तदर्चिः उद्रोचते प्रकाशते ॥ १० ॥

॥ इति पञ्चस्य तृतीये त्रिंशोवर्गः ॥ ३० ॥

अथैकादशी–

उ॒क्षान्ना॑यव॒शान्ना॑य॒सोम॑पृष्ठायवे॒धसे॑ । स्तोमै॑र्विधेमा॒ग्नये॑ ॥ ११ ॥

उ॒क्षऽअ॑न्नाय । व॒शाऽअ॑न्नाय । सोम॑ऽपृष्ठाय । वे॒धसे॑ ।
स्तोमैः॑ । वि॒धे॒म॒ । अ॒ग्नये॑ ॥ ११ ॥

* नंनमत्–वनस्पतीन् अत्यन्तं नमयन् इति पुस्तकान्तरे.

उक्षान्नाय उक्षा अन्नं अदनीयं हविर्यस्यासावुक्षान्नस्तस्मै वशान्नाय वशा अन्नं यस्यासौ वशान्नस्तस्मै सोमपृष्ठाय सोमघृतपृष्ठाय वेधसे विधात्रे कामानामग्नये स्तोमैर्विधेम परिचरेम ॥ ११ ॥

अथ द्वादशी–

उ॒त त्वा॒ नम॑सा व॒यं होत॒र्वरे॑ण्यक्रतो । अग्ने॑ स॒मिद्भि॑रीमहे ॥ १२ ॥

उ॒त । त्वा॒ । नम॑सा । व॒यम् । होत॒रिति॑ । वरे॑ण्यऽक्रतो॒ इति॑ वरे॑ण्यऽक्रतो । अग्ने॑ । स॒मित्ऽभि॑ः । ई॒म॒हे॒ ॥ १२ ॥

उतापि च हे होतर्देवानांह्वातर्वरेण्यक्रतो वरणीयप्रज्ञाग्ने त्वा त्वां वयमाङ्गिरसाः नमसानेन हविषा समिद्भिश्चेमहे याचामहे ॥ १२ ॥

अथ त्रयोदशी–

उ॒त त्वा॑ भृगु॒वच्छु॑चे मनु॒ष्वद॑ग्न आहुत । अ॒ङ्गि॒र॒स्वद्ध॑वामहे ॥ १३ ॥

उ॒त । त्वा॒ । भृ॒गु॒ऽवत् । शु॒चे॒ । म॒नु॒ष्वत् । अ॒ग्ने॒ । आ॒ऽहु॒त॒ । अ॒ङ्गि॒र॒स्वत् । ह॒वा॒म॒हे॒ ॥ १३ ॥

हे शुचे स्वभावतः शुद्धाहुताग्ने त्वा त्वां भृगुवत् यथा भृगुस्तथा । मनुष्वत् यथा च मनुस्तथा अङ्गिरस्वदङ्गिरोवच्च हवामहे ॥ १३ ॥

अथ चतुर्दशी–

त्वं ह्य॑ग्ने अ॒ग्निना॒ विप्रो॒ विप्रे॑ण॒ सन्त्स॒ता । सखा॒ सख्या॑ समि॒ध्यसे॑ ॥ १४ ॥

त्वम् । हि । अ॒ग्ने॒ । अ॒ग्निना॑ । विप्र॑ः । विप्रे॑ण । सन् । स॒ता । सखा॑ । सख्या॑ । स॒म्ऽइ॒ध्यसे॑ ॥ १४ ॥

हे अग्ने विप्रो मेधावी सन् विद्यमानः सखा च त्वं विप्रेण सता सख्या अग्निना समिध्यसे । तथा च ब्राह्मणम्–त्वंह्यग्नेअग्निना विप्रोविप्रेणसन्त्सतेति विप्रइतरोविप्रइतरः सन्नितरः सन्नितरः सखासख्यासमिध्यसइत्येषहवा अस्यस्वः सखेति[1] ॥ १४ ॥

---

1 ऐ० ब्रा० १. १६.।

इमेस्मदीयाः स्तोमासः स्तोतारोविप्रस्य मेधाविनः वेधसोविधातुरस्त्ववयज्वनोहिंसितयजमानस्याग्नेर्गिरः स्तुतीरीरते प्रेरयन्ति ॥ १ ॥

अथ द्वितीया—

अस्मैतेप्रतिहर्यतेजातवेदोविचर्षणे । अग्नेजनामिसुष्टुतिम् ॥ २ ॥

अस्मै । ते । प्रतिऽहर्यते । जातऽवेदः । विऽचर्षणे ।
अग्ने । जनामि । सुऽस्तुतिम् ॥ २ ॥

हे जातवेदः जातधन विचर्षणे विद्रष्टरग्ने अस्मै प्रतिहर्यते प्रयच्छते ते तुभ्यं सुष्टुतिं शोभनां स्तुतिं जनामि अंगिरसोहं जनयामि ॥ २ ॥

अथ तृतीया—

आरोकाइवघेदहतिग्माअग्नेतवत्विषः । दद्भिर्वनानिबप्सति ॥३॥

आरोकाःऽइव । घ । इत् । अह । तिग्माः । अग्ने ।
तव । त्विषः । दत्ऽभिः । वनानि । बप्सति ॥ ३ ॥

हे अग्ने तव तिग्मास्तीक्ष्णास्त्विषोदीप्तयः आरोकाइव आरोचमानाः पशवइव दद्भिर्दन्तैर्वनान्यरण्यानि बप्सति भक्षयन्ति घेदहेति त्रयं पूरकम् ॥ ३ ॥

अथ चतुर्थी—

हरयोधूमकेतवोवातजूताउपद्यवि । यतन्तेवृथगग्नयः ॥ ४ ॥

हरयः । धूमऽकेतवः । वातऽजूताः । उप । द्यवि ।
यतन्ते । वृथक् । अग्नयः ॥ ४ ॥

हरयोहरणशीला वातजूता वातप्रेरिता धूमकेतवो धूमध्वजा अग्नयः उपद्यव्यन्तरिक्षे वृथक् पृथग्यतन्ते गच्छन्ति । पृथगित्यनेन समममर्थं वृथगिति । पृथगित्येव वाजसनेयिनः पठन्ति ॥ ४ ॥

अथ पञ्चमी–

एतेत्येऽवृथगग्नयंइद्धासःसमंदृक्षत । उपसामिवकेतवः ॥ ५॥ २९ ॥

एते । त्ये । वृथक् । अग्नयः । इद्धासः । सम् । अदृक्षत ।
उपसाम्ऽइव । केतवः ॥ ५ ॥ २९ ॥

एते त्ये एते अग्नयः वृथक्पृथगिद्धासोग्निहोत्रिभिः समिद्धाःसन्तः उपसामिव केतवः उपसां प्रज्ञापकाइव समदृक्षत सम्यक्दृश्यन्ते ॥ ५ ॥

॥ इति पष्ठस्य तृतीये एकोनत्रिंशोवर्गः ॥ २९ ॥

अथ पष्ठी–

कृष्णारजांसिपत्सुतःप्रयाणेजातवेदसः । अग्निर्यद्रोधतिक्षमि ॥६॥

कृष्णा । रजांसि । पत्सुतः । प्रऽयाने । जातऽवेदसः ।
अग्निः । यत् । रोधति । क्षमि ॥ ६ ॥

जातवेदसोग्नेः प्रयाणे पत्सुतः पद्भ्यो रजांसि पांसवः कृष्णा कृष्णानि भवन्ति । कदेत्यत्राह क्षमि क्षमाया यद्यदाग्निः रोधति शुष्कान्यनस्पतीन्निरुणद्धि ॥ ६ ॥

अथ सप्तमी–

धासिंकृण्वानओषधीर्बप्संदग्निर्नवायति । पुनर्यन्तरुणीरपि ॥ ७ ॥

धासिम् । कृण्वानः । ओषधीः । बप्सत् । अग्निः । न ।
वायति । पुनः । यन् । तरुणीः । अपि ॥ ७ ॥

अग्निरोषधीर्धासिमन्नं । क्षु धासिरित्यन्ननामसुपाठात् । कृण्वानः कुर्वन् बप्सत् भक्षयन्न वायति नशाम्यति । पुनश्च तरुणीरोषधीरपि यन् गच्छन् भवति । भक्षयितुमिति शेषः ॥ ७ ॥

अथाष्टमी–

जिह्वाभिरहनंनमर्चिषाजञ्जणाभवन् । अग्निर्वनेषुरोचते ॥ ८ ॥

अथ पञ्चदशी–

सत्वंविप्रायदाशुषेरयिंदेहिसहस्रिणम्। अग्नेवीरवतीमिषम्॥१५॥३१॥

सः । त्वम् । विप्राय । दाशुषे । रयिम् । देहि । सहस्रिणम् ।
अग्ने । वीरऽवतीम् । इषम् ॥ १५ ॥ ३१

हे अग्ने सः प्रसिद्धस्त्वं विप्राय मेधाविने दाशुषे हविषां प्रदात्रे यजमानाय सहस्रिणं सहस्रसंख्याकमपरिमितं रयिं धनं वीरवतीं पुत्रपौत्रादिसहितमिषमन्नंच देहि ॥ १५ ॥

॥ इति पष्ठस्य तृतीये एकत्रिंशोवर्गः ॥ ३१ ॥

अथषोडशी–

अग्नेभ्रातःसहस्कृतरोहिदश्वशुचिव्रत। इमंस्तोमंजुषस्वमे ॥ १६॥

अग्ने । भ्रातरिति । सहःऽकृत । रोहित्ऽअश्व । शुचिऽव्रत ।
इमम् । स्तोमम् । जुषस्व । मे ॥ १६ ॥

हे अग्ने भ्रातः भ्रातृवद्यजमानानां मित्रभूत सहस्कृत सहसा बलेनकृत रोहिदश्व लोहितवर्णाश्व शुचिव्रत शुद्धकर्मन्नग्ने आङ्गिरसस्य मे मम इमं स्तोमं जुषस्व सेवस्व ॥ १६ ॥

अथ सप्तदशी ॥ १७ ॥

उतत्वाग्नेममस्तुतोवाश्रायप्रतिहर्यते । गोष्ठंगावइवाशत ॥१७॥

उत । त्वा । अग्ने । मम । स्तुतः । वाश्राय । प्रतिऽहर्यते ।
गोऽस्थम् । गावःऽइव । आशत ॥ १७ ॥

उतापिच हे अग्ने त्वा त्वां ममाङ्गिरसस्य स्तुतः स्तुतयः वाश्राय याशनशीलाय वत्साय प्रतिहर्यते पयःकामयमानाय दोग्धुं गोष्ठं गावइव यथा गावःप्रविशन्ति तथा आशत प्राप्नुवन्ति॥१७॥

अथाष्टादशी–

तुभ्यंताअंङ्गिरस्तमविश्वाःसुक्षितयःपृथक्। अ

तुभ्यम् । ताः । अङ्गिरःऽतम । विश्वाः । सुऽक्षितयः ।
पृथक् । अग्ने । कामाय । येमिरे ॥ १८ ॥

हे अङ्गिरस्तम अङ्गिरसां श्रेष्ठाग्ने तुभ्यं विश्वाः सर्वास्ताः प्रसिद्धाः सुक्षितयः प्रजाः कामायात्मनः कामसिद्ध्यर्थं पृथग्येमिरे नियच्छन्ति ॥ १८ ॥

अथैकोनविंशी–

अग्निंधीभिर्मनीषिणोमेधिरासोविपश्चितः ।
अद्मसद्यायहिन्विरे ॥ १९ ॥

अग्निम् । धीभिः । मनीषिणः । मेधिरासः । विपःऽचितः ।
अद्मऽसद्याय । हिन्विरे ॥ १९ ॥

मनीषिणो मनसईश्वराः मेधिरासो मेधाविनो विपश्चितः प्राज्ञाः यजमाना धीभिः कर्मभिरद्मसद्यायान्नस्य भजनायाग्निं हिन्विरे प्रीणयन्ति ॥ १९ ॥

अथ विंशी–

तंत्वामज्मेषुवाजिनंतन्वानाअग्नेअध्वरम् ।
वह्निंहोतारमीळते ॥ २० ॥ ३२ ॥

तम् । त्वाम् । अज्मेषु । वाजिनम् । तन्वानाः । अग्ने ।
अध्वरम् । वह्निम् । होतारम् । ईळते ॥ २० ॥ ३२ ॥

हे अग्ने वाजिनं बलिनं वह्निं हविषांवोढारं होतारं देवानां ह्वातारं तं प्रसिद्धं त्वामज्मेषु गृहेषु अध्वरं यज्ञं तन्वानाविस्तरयन्तो यजमाना ईळते स्तुवन्ति ॥ २० ॥

॥ इति षष्ठस्य तृतीये द्वात्रिंशोवर्गः ॥ ३२ ॥

अथैकविंशी–

पुरुत्राहिसदृङ्ङसिविशोविश्वाअनुप्रभुः ।
समत्सुत्वाहवामहे ॥ २१ ॥

पुरुऽत्रा । हि । सऽदृङ् । असि । विशः । विश्वाः । अनु ।
प्रऽभुः । सुमत्ऽसु । त्वा । हवामहे ॥ २१ ॥

हे अग्ने त्वं हि यतः प्रभुः प्रभुः सुलोपश्छान्दसः पुरुत्रा बहुषु प्रदेशेषु विश्वाः सर्वाविशः प्रजाः अनु सदृङ् समानदर्शयस्यतस्त्वा त्वां समत्सु संग्रामेषु हवामहे ह्वयामः ॥ २१ ॥

अथ द्वाविंशी–

तमीळिष्वयआहुतोग्निर्विभ्राजतेघृतैः ।
इमंनःशृणवद्धवम् ॥ २२ ॥

तम् । ईळिष्व । यः । आऽहुतः । अग्निः । विऽभ्राजते ।
घृतैः । इमम् । नः । शृणवत् । हवम् ॥ २२ ॥

योग्निः घृतैः सहआहुतो विभ्राजते यश्च नोस्माकं इमं हवमाह्वानं शृणवच्छृणोति तमग्निमीळिष्व स्तुहि ॥ २२ ॥

अथ त्रयोविंशी–

तंत्वावयंहवामहेशृण्वन्तंजातवेदसम् ।
अग्नेघ्नन्तमपद्विषः ॥ २३ ॥

तम् । त्वा । वयम् । हवामहे । शृण्वन्तम् । जातऽवेदसम् ।
अग्ने । घ्नन्तम् । अप । द्विषः ॥ २३ ॥

हे अग्ने जातवेदसं जातधनं जातप्रज्ञं वा द्विषः शत्रूनपघ्नन्तं हिंसन्तं शृण्वन्तमस्मदीयमाह्वानं शृण्वन्तंच त्वा त्वां वयमाङ्गिरसा हवामहे ॥ २३ ॥

अथ चतुर्विंशी–

विशांराजानमद्भुतमध्यक्षंधर्मणामिमम् ।
अग्निमीळेसउश्रवत् ॥ २४ ॥

---

१ संहितायां पदकाले च प्रभुशब्दं सविसर्गं पठन्ति वैदिकाः । भाष्यकारेण तु सुलोपश्छान्दसइत्युक्तं इदं विचारणीयम्.

विशाम् । राजानम् । अद्भुतम् । अधिऽअक्षम् । धर्मणाम् ।
इमम् । अग्निम् । ईळे । सः । ऊँ इति । श्रवत् ॥ २४ ॥

विशां प्रजानां राजानमीश्वरं अद्भुतं महान्तं धर्मणां कर्मणामध्यक्षमनुसंधातारं इममग्निं ईळे स्तौमि । सउ स एवाग्निः श्रवदस्मदीयां स्तुतिं शृणोतु ॥ २४ ॥

अथ पञ्चविंशी–

अग्निंविश्वायुवेपसंमर्यंनवाजिनंहितम् ।
सप्तिंनवाजयामसि ॥ २५ ॥ ३३ ॥

अग्निम् । विश्वायुऽवेपसम् । मर्यम् । न । वाजिनम् । हितम् ।
सप्तिम् । न । वाजयामसि ॥ २५ ॥ ३३ ॥

विश्वायुवेपसं सर्वगतबलमग्निं वाजिनं बलिनं मर्यं न मनुष्यमिव । हितं सप्तिं न अश्वमिव वाजयामसि स्तुतिभिर्हविर्भिश्च बलिनं कुर्मः ॥ २५ ॥

॥ इति पञ्चस्य तृतीये त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथ षड्विंशी–

घ्नन्मृध्राण्यपद्विषोदहन्रक्षांसिविश्वहा ।
अग्नेतिग्मेनदीदिहि ॥ २६ ॥

घ्नन् । मृध्राणि । अप । द्विषः । दहन् । रक्षांसि । विश्वहा ।
अग्ने । तिग्मेन । दीदिहि ॥ २६ ॥

हे अग्ने त्वं मृध्राणि हिंसकान् द्विषोद्वेष्टॄनपघ्नन् हिंसन् विश्वहा सर्वदा रक्षांसि च दहन् तिग्मेन तीक्ष्णेन तेजसा दीदिहि दीप्यस्व ॥ २६ ॥

अथ सप्तविंशी–

यंत्वाजनासइन्धतेमनुष्वदङ्गिरस्तम ।
अग्नेसबोधिमेवचः ॥ २७ ॥

यम् । त्वा । जनासः । इन्धते । मनुष्वत् । अङ्गिरःऽतम ।
अग्ने । सः । बोधि । मे । वचः ॥ २७ ॥

हे अङ्गिरस्तमाग्ने यं त्वा त्वां जनासो जनाः मनुष्वद् यथामनुस्तथा इन्धते दीपयन्ति सत्वं मे मदीयं वचः स्तुतिं बोधि बुध्यस्व ॥ २७ ॥

अथाष्टाविंशी–

यदग्नेदिविजाअस्यप्सुजावासहस्कृत ।
तंत्वागीर्भिर्हवामहे ॥ २८ ॥

यत् । अग्ने । दिविऽजाः । असि । अप्सुऽजाः । वा ।
सहःऽकृत । तम् । त्वा । गीःऽभिः । हवामहे ॥ २८ ॥

हे अग्ने यद्यस्त्वं दिविजा दिविभवोसि भवसि अप्सुजा वान्तरिक्षजातश्च भवसि सहस्कृत सहसा बलेन कृतश्चासि तं त्वा त्वामग्निं गीर्भिः स्तुतिभिर्हवामहे ह्वयामः ॥ २८ ॥

अथैकोनत्रिंशी–

तुभ्यंघेत्तेजनाइमेविश्वाःसुक्षितयःपृथक् ।
धासिंहिन्वन्त्यत्तवे ॥ २९ ॥

तुभ्यम् । घ । इत् । ते । जनाः । इमे । विश्वाः । सुऽक्षितयः ।
पृथक् । धासिम् । हिन्वन्ति । अत्तवे ॥ २९ ॥

हे अग्ने तुभ्यं घ इत् त्वदर्थमेव ते इमे मया दृश्यमाना जना विश्वाः सर्वाः सुक्षितयः प्रजाश्च धासिमन्नं हविरत्तवे अदनाय पृथक्हिन्वन्ति प्रेरयन्ति ॥ २९ ॥

अथ त्रिंशी–

तेघेदग्नेस्वाध्योहाविश्वानृचक्षसः ।
तरन्तःस्यामदुर्गहा ॥ ३० ॥ ३४ ॥

ने । घ । इत् । अग्ने । सुऽआध्यः । अहा । विश्वा ।
नृऽचक्षसः । तरन्तः । स्याम । दुःऽगहा ॥ ३० ॥ ३४ ॥

हे अग्ने तेघेव् त्वदर्थमेव खलु वयं स्वाध्यः सुकर्माणः सन्तः विश्वा विश्वान्यहा अहानि नृचक्षसोद्रष्टारश्च दुर्गहा दुःखेन गाहयितव्यानि तरन्तः स्याम भवेम ॥ ३० ॥

॥ इति पष्ठस्य तृतीये चतुस्त्रिंशोवर्गः ॥ ३४ ॥

अथैकत्रिंशी–

अग्निम्मन्द्रम्पुरुप्रियंशीरम्पावकशोचिषम् ।
हृद्भिर्मन्द्रेभिरीमहे ॥ ३१ ॥

अग्निम् । मन्द्रम् । पुरुऽप्रियम् । शीरम् । पावकऽशोचिषम् ।
हृत्ऽभिः । मन्द्रेभिः । ईमहे ॥ ३१ ॥

मन्द्रं मादनं पुरुप्रियं बहुप्रियं शीरं यज्ञेषु शयनशीलं पावकशोचिषं पावकदीप्तिं अग्निं हृद्भिर्मनोहरैर्मन्द्रेभिर्मादनैः स्तोत्रैः ईमहे याचामहे ॥ ३१ ॥

अथ द्वात्रिंशी–

सत्वमग्नेविभावसुःसृजन्त्सूर्योनरश्मिभिः ।
शर्धन्तमांसिजिघ्नसे ॥ ३२ ॥

सः । त्वम् । अग्ने । विभाऽवसुः । सृजन् । सूर्यः । न ।
रश्मिऽभिः । शर्धन् । तमांसि । जिघ्नसे ॥ ३२ ॥

हे अग्ने विभावसुर्दीप्तिरोचनः सः प्रसिद्धस्त्वं सृजन्नुद्यन् सूर्यो न यथा सूर्यस्तथा रश्मिभिः शर्धन् बलं कुर्वन् तमांसि जिघ्नसे नाशयसि ॥ ३२ ॥

अथ त्रयस्त्रिंशी–

तत्त्वेसहस्वईमहेदात्रंयन्नोपदस्यति ।
त्वदग्नेवार्यंवसु ॥ ३३ ॥ ३५ ॥

तत् । ते । सहस्वः । ईमहे । दात्रम् । यत् । न । उपऽदस्यति ।
त्वत् । अग्ने । वार्यम् । वसु ॥ ३३ ॥ ३५ ॥

हे सहस्वोबलवन्नग्ने ते तव यद्वसु नोपदस्यति नोपक्षीयते तद्दात्रं दातव्यं वार्यं वरणीयंच वसु धनं त्वत् त्वत्तईमहे याचामहे ॥ ३३ ॥

॥ इति षष्ठस्य तृतीये पञ्चत्रिंशोवर्गः ॥ ३५ ॥

समिधाग्निमिति त्रिंशदृचं द्वितीयं सूक्तं आङ्गिरसस्य विरूपस्यार्षं प्राग्वत्सप्तपरिभाषया गायत्रमाग्नेयम् । तथाचानुक्रम्यते–समिधाग्निंत्रिंशदिति । प्रातरनुवाके गायत्रेछन्दस्याश्विनशस्त्रे चेदं विनियुक्तम् । महाव्रते समिधाग्निमित्याद्याश्चतस्रःसामिधेन्यः । तथाच पञ्चमारण्यकेसूत्रितम्–समिधाग्निमिति चतस्रोविश्वकर्मणऋषभइति । आतिथ्यायां समिधाग्निमित्येषा प्रथमाज्यभागस्यानुवाक्या । सूत्रितश्च–समिधाग्निंदुवस्यताप्यायस्वसमेतुतइति । अमावास्यायां प्रथमाज्यभागस्यानुवाक्या । सूत्रितश्च–वृधन्वन्तावमावास्यायामग्निःप्रत्नेनमन्मनेति । दर्शपूर्णमासयोराग्नेयस्यानुवाक्या अग्निर्मूर्धेत्येषा सूत्रितश्च–अग्निर्मूर्धाभुवोयज्ञस्येति । मूर्धन्वद्गुणस्याग्नेरप्येषैवानुवाक्या सूत्रितश्च–नित्येमूर्धन्वइति । पवमानेष्टिषु द्वितीयस्यामिष्टौ अग्नेःशुचेरनुवाक्या अग्निःशुचिव्रततमइत्येषा । सूत्रितश्च अग्निःशुचिव्रततमउदग्नेशुचयस्तवेति ।

तत्र प्रथमा–

समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिम् ।
आस्मिन्हव्याजुहोतन ॥ १ ॥

सम्ऽइधा । अग्निम् । दुवस्यत । घृतैः । बोधयत ।
अतिथिम् । आ । अस्मिन् । हव्या । जुहोतन ॥ १ ॥

हे ऋत्विजोतिथिमतिथिवत्प्रियमग्निं समिधा दुवस्यत परिचरत । घृतैर्दीप्तिसाधनैराज्यैर्बोधयतच । अस्मिन्सामिद्धेग्नौ हव्या हवींष्याजुहोतनाजुहुतच ॥ १ ॥

अथ द्वितीया–

अग्नेस्तोमंजुषस्वमेवर्धस्वानेनमन्मना ।
प्रतिसूक्तानिहर्यनः ॥ २ ॥

अग्ने॑ । स्तोम॑म् । जु॒षस्व॑ । मे॒ । वर्ध॑स्व । अ॒नेन॑ ।
मन्म॑ना । प्रति॑ । सु॒ऽउ॒क्तानि॑ । ह॒र्य॒ । नः॒ ॥ २ ॥

हे अग्ने मे आङ्गिरसस्य मम स्तोमं स्तोत्रं जुषस्व सेवस्व अनेन मन्मना मननीयेन स्तोत्रेण वर्धस्व च । नोऽस्माकं सूक्तानि प्रतिहर्य कामय च ॥ २ ॥

अथ तृतीया–

अ॒ग्निं दू॒तं पु॒रो द॑धे हव्य॒वाह॒मुप॑ ब्रुवे ।
दे॒वाँ आ सा॑दयादि॒ह ॥ ३ ॥

अ॒ग्निम् । दू॒तम् । पु॒रः । द॒धे॒ । ह॒व्य॒ऽवाह॑म् ।
उप॑ । ब्रु॒वे॒ । दे॒वान् । आ । सा॒द॒या॒त् । इ॒ह ॥ ३ ॥

दूतं देवानां हव्यवाहं हविषां वोढारं चाग्निं पुरोदधे पुरस्करोमि उपब्रुवे उपस्तौमि च । सोऽग्निरिहयज्ञे देवानासादयादासादयतु ॥ ३ ॥

अथ चतुर्थी–

उत्ते॑ बृ॒हन्तो॑ अ॒र्चयः॑ समिधा॒नस्य॑ दीदिवः ।
अग्ने॑ शु॒क्रास॑ ईरते ॥ ४ ॥

उत् । ते॒ । बृ॒हन्तः॑ । अ॒र्चयः॑ । स॒म्ऽइ॒धा॒नस्य॑ ।
दी॒दि॒ऽवः॒ । अग्ने॑ । शु॒क्रासः॑ । ई॒र॒ते॒ ॥ ४ ॥

हे दीदिवोदीप्ताग्ने समिधानस्य समिध्यमानस्य ते तव बृहन्तोमहान्तः शुक्रासोज्वलन्तोऽर्चयः दीप्तयः उदीरयते उद्गच्छन्ति ॥ ४ ॥

अथ पञ्चमी–

उप॑ त्वा जु॒ह्वो॒३॒॑ मम॑ घृ॒ताची॑र्यन्तु हर्यत ।
अग्ने॑ ह॒व्या जु॑षस्व नः ॥ ५ ॥ ३६ ॥

उप॑ । त्वा॒ । जु॒ह्वः॑ । मम॑ । घृ॒ताचीः॑ । य॒न्तु॒ । ह॒र्य॒त॒ ।
अग्ने॑ । ह॒व्या । जु॒षस्व॑ । नः॒ ॥ ५ ॥ ३६

हे हर्यत कामयमानाग्ने मम मदीया घृताचीर्घृतमञ्चन्त्योजुह्वः स्रुचस्त्वा त्वामुपयन्तु नोऽस्माकं हव्या हव्यानि जुषस्व सेवस्व च ॥ ५ ॥

॥ इति पञ्चमस्य तृतीये षट्त्रिंशोवर्गः ॥ ३६ ॥

अथ षष्ठी–

म॒न्द्रंहोता॑रमृ॒त्विजं॑चि॒त्रभा॑नुंवि॒भाव॑सुम् ।
अ॒ग्निमी॑ळे॒सउ॑श्रवत् ॥ ६ ॥

म॒न्द्रम् । होता॑रम् । ऋ॒त्विज॑म् । चि॒त्रऽभा॑नुम् । वि॒भाऽव॑सुम् ।
अ॒ग्निम् । ई॒ळे॒ । सः । ऊँ इति॑ । श्र॒व॒त् ॥ ६ ॥

मन्द्रं मादनं होतारं देवानामाह्वातारमृत्विजमृतौ यष्टव्यं चित्रभानुं चित्रदीप्तिं विभावसुं दीप्तिधनमग्निमीळे स्तौमि । सोऽग्निः श्रवदस्मदीयां स्तुतिं शृणोत्वेव ॥ ६ ॥

अथ सप्तमी–

प्र॒त्नंहोता॑र॒मीड्यं॒जुष्ट॑म॒ग्निंक॒विक्र॑तुम् ।
अ॒ध्व॒राणा॑मभि॒श्रिय॑म् ॥ ७ ॥

प्र॒त्नम् । होता॑रम् । ईड्य॑म् । जुष्ट॑म् । अ॒ग्निम् ।
क॒विऽक्र॑तुम् । अ॒ध्व॒राणा॑म् । अ॒भि॒ऽश्रिय॑म् ॥ ७ ॥

प्रत्नं पुराणं होतारं देवानामाह्वातारं ईड्यं स्तुत्यं जुष्टं प्रीतं सेवितं वा कविक्रतुं क्रांतकर्माणं अध्वराणां यज्ञानामभिश्रियमभिश्रयितारं अग्निमीळे स्तौमि ॥ ७ ॥

अथाष्टमी–

जु॒षा॒णोअ॑ङ्गिरस्तम॒मेमाह॒व्यान्या॑नु॒षक् । अग्ने॑य॒ज्ञंन॑यऋतु॒था ॥ ८ ॥

जुषाणः । अङ्गिरःऽतम । इमा । हव्यानि । आनुषक् ।
अग्ने । यज्ञम् । नय । ऋतुऽथा ॥ ८ ॥

हे अङ्गिरस्तमांगिरसांश्रेष्ठाग्ने इमा इमान्यस्मदीयानि हव्यानि हवींष्यानुषगनुषक्तं यथाभवति तथा जुषाणः सेवमानोभव। ऋतुथा कालेकाले यज्ञं च नय ॥ ८ ॥

अथ नवमी–

समिधानउसन्त्यशुक्रशोचइहावह। चिकित्वान्दैव्यंजनम् ॥ ९ ॥

सम्ऽइधानः । ॐ इति । सन्त्य । शुक्रऽशोचे । इह ।
आ । वह । चिकित्वान् । दैव्यम् । जनम् ॥ ९ ॥

हे सन्त्य भजनशील शुक्रशोचे ज्वलद्दीप्ते त्वं समिधानउ समिध्यमानएव दैव्यं देवसम्बन्धिनं जनं चिकित्वान् जानन्निह यज्ञे आवह ॥ ९॥

अथ दशमी–

विप्रंहोतारमद्रुहंधूमकेतुंविभावसुम्। यज्ञानांकेतुमीमहे ॥१०॥ ३७ ॥

विप्रम् । होतारम् । अद्रुहम् । धूमऽकेतुम् ।
विभाऽवसुम् । यज्ञानाम् । केतुम् । ईमहे ॥ १० ॥ ३७ ॥

विप्रं मेधाविनं होतारं ह्वातारं अद्रुहमद्रोग्धारं धूमकेतुं धूमध्वजं विभावसुं दीप्तिधनं यज्ञानां केतुं पताकस्थानीयमग्निमीमहे अभीष्टं याचामहे ॥ १० ॥

॥ इति पष्ठस्य तृतीये सप्तत्रिंशोवर्गः ॥ ३७ ॥

अथैकादशी–

अग्नेनिपाहिनस्त्वंप्रतिष्मदेवरीषतः। भिन्धिद्वेषःसहस्कृत ॥ ११ ॥

अग्ने । नि । पाहि । नः । त्वम् । प्रति । स्म । देव ।
रिषतः । भिन्धि । द्वेषः । सहःऽकृत ॥ ११ ॥

हे सहस्कृत बलेनकृत देव दीप्ताग्ने रिषतोहिंसकान् नोस्मान्प्रति निपाहि प्रतिरक्ष। स्मेति पूरणः द्वेषोद्विषः शत्रूंश्च भिन्धि विदारय ॥ ११ ॥

अथ द्वादशी–

अ॒ग्निः प्र॒त्नेन॒ मन्म॑ना॒ शुम्भा॑नस्त॒न्वं१॒ स्वाम्। क॒विर्विप्रे॑ण वावृधे ॥ १२ ॥

अ॒ग्निः। प्र॒त्नेन॑। मन्म॑ना। शुम्भा॑नः। त॒न्व॑म्।
स्वाम्। क॒विः। विप्रे॑ण। व॒वृ॒धे॒ ॥ १२ ॥

कविः क्रान्तकर्माग्निः प्रत्नेन पुराणेन मन्मना मननीयेन स्तोत्रेण स्वां स्वकीयां तन्वं तनुमंगं शुंभानः शोभयन् विप्रेण मेधाविना स्तोत्रा ववृधे प्रवृद्धोभवति ॥ १२ ॥

अथ त्रयोदशी–

ऊ॒र्जो नपा॑त॒मा हु॑वे॒ऽग्निं पा॑व॒कशो॑चिषम्। अ॒स्मिन्य॒ज्ञे स्व॑ध्व॒रे ॥ १३ ॥

ऊ॒र्जः। नपा॑तम्। आ। हु॒वे॒। अ॒ग्निम्। पा॒व॒कऽशो॑चिषम्।
अ॒स्मिन्। य॒ज्ञे। सु॒ऽअ॒ध्व॒रे ॥ १३ ॥

ऊर्जोन्नस्य नपातं पुत्रं पावकशोचिषं शोधकदीप्तिमग्निं स्वध्वरे अहुरैरत्यन्तमाहिंस्येस्मिन्यज्ञे आहुवे आह्वयामि ॥ १३ ॥

अथ चतुर्दशी–

स नो॑ मित्रमहस्त्वमग्ने॑ शु॒क्रेण॑ शो॒चिषा॑। दे॒वैरा स॑त्सि ब॒र्हिषि॑ ॥ १४ ॥

सः। नः॒। मि॒त्र॒ऽम॒हः॒। त्वम्। अग्ने॑। शु॒क्रेण॑।
शो॒चिषा॑। दे॒वैः। आ। स॒त्सि॒। ब॒र्हिषि॑ ॥ १४ ॥

हे मित्रमहोमित्राणां पूजनीयाग्ने सत्वं शुक्रेण ज्वलता शोचिषा तेजसा देवैःसह बर्हिषि यज्ञे आसत्स्यासीद ॥ १४ ॥

अथ पंचदशी–

यो अ॒ग्निं त॒न्वो॒३॒ दमे॑ दे॒वं मर्तः॑ सप॒र्यति॑। तस्मा॒ इद्दी॑दय॒द्वसु॑ ॥ १५ ॥ ३८ ॥

यः। अ॒ग्निम्। त॒न्वः॑। दमे॑। दे॒वम्। मर्तः॑। स॒प॒र्यति॑।
तस्मै॑। इत्। दी॒दय॑त्। वसु॑ ॥ १५ ॥ ३८ ॥

योमर्तोमनुष्यो दमे गृहे अग्निं देवं तन्वोधनस्यमाय्यर्थमितिशेषः। भोजनं तनाइति धन-नामसुपाठात्। सपर्यति परिचरति तस्माइत् तस्माएव वसु धनं दीदयत् सोग्निः प्रयच्छति॥१५॥

॥ इति पष्टस्य तृतीयेऽष्टत्रिंशोवर्गः॥ ३८ ॥

अथ षोडशी–

अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयम्। अपांरेतांसिजिन्वति॥ १६॥

अग्निः। मूर्धा। दिवः। ककुत्। पतिः। पृथिव्याः।
अयम्। अपाम्। रेतांसि। जिन्वति॥ १६॥

मूर्धा देवानां श्रेष्ठो दिवोद्युलोकस्य ककुदुच्छ्रितः पृथिव्याश्च पतिरयमग्निः अपांरेतांसि स्थावरजंगमात्मकानि भूतानि जिन्वति प्रीणयति॥ १६॥

अथ सप्तदशी–

उदग्नेशुचंयस्तवशुक्राभ्राजन्तईरते। तवज्योतींष्यर्चयः॥ १७॥

उत्। अग्ने। शुचंयः। तव। शुक्राः। भ्राजन्तः। ईरते।
तव। ज्योतींषि। अर्चयः॥ १७॥

हे अग्ने तव शुचयो निर्मलाः शुक्राः शुक्लवर्णा भ्राजन्तोदीप्यमानाः अर्चयः प्रभास्तव ज्योतींषि तेजांस्युदीरते प्रेरयन्ति॥ १७॥

अथाष्टादशी–

ईशिषेवार्यस्यहिदात्रस्याग्नेस्वर्पतिः। स्तोतास्यांतवशर्मणि॥ १८॥

ईशिषे। वार्यस्य। हि। दात्रस्य। अग्ने। स्वःऽपतिः। स्तोता।
स्याम्। तव। शर्मणि॥ १८॥

हे अग्ने स्वःपतिः स्वर्गस्य स्वामी त्वं वार्यस्य वरणीयस्य दात्रस्य दातव्यस्य धनस्य ईशिषे ईश्वरोसि। शर्मणि सुखे निमित्ते तव स्तोता स्यां भवेयम्॥ १८॥

अथैकोनविंशी—

त्वाम॑ग्ने मनी॒षिण॒स्त्वां हि॑न्वन्ति॒ चित्ति॑भिः । त्वां व॑र्धन्तु नो॒ गिरः॑ ॥ १९॥

त्वाम् । अ॒ग्ने॒ । म॒नी॒षिणः॑ । त्वाम् । हि॒न्व॒न्ति॒ । चित्ति॑ऽभिः ।
त्वाम् । व॒र्ध॒न्तु॒ । नः॒ । गिरः॑ ॥ १९ ॥

हे अग्ने त्वां मनीषिणो मनसईश्वराः स्तोतारः स्तुतिभिः स्तुवन्तीतिशेषः। किञ्च त्वामेव चित्तिभिः कर्मभिर्हिन्वन्ति प्रीणयन्ति नोस्माकं गिरः स्तुतयः त्वामेव वर्धन्तु वर्धयन्तु ॥ १९ ॥

अथ विंशी—

अद॑ब्धस्य स्व॒धाव॑तो दू॒तस्य॒ रेभ॑तः॒ सदा॑ । अ॒ग्नेः स॒ख्यं वृ॑णीमहे ॥२०॥३९॥

अद॑ब्धस्य । स्व॒धाऽव॑तः । दू॒तस्य॑ । रेभ॑तः । सदा॑ । अ॒ग्नेः ।
स॒ख्यम् । वृ॒णी॒म॒हे॒ ॥ २० ॥ ३९ ॥

हे अग्ने अदब्धस्य केनाप्यहिंसितस्य स्वधावतोबलवतो दूतस्य देवानां रेभतोदेवान् स्तुवतः अग्नेः तव सख्यं सदा वयं वृणीमहे ॥ २० ॥

॥ इति षष्ठस्य तृतीये एकोनचत्वारिंशोवर्गः ॥ ३९ ॥

अथैकविंशी—

अ॒ग्निः शुचि॑व्रततमः॒ शुचि॒र्विप्रः॒ शुचिः॑ क॒विः । शुची॑ रोचत॒ आहु॑तः ॥२१॥

अ॒ग्निः । शुचि॑व्रतऽतमः । शुचिः॑ । विप्रः॑ । शुचिः॑ । क॒विः ।
शुचिः॑ । रो॒च॒ते॒ । आऽहु॑तः ॥ २१ ॥

शुचिव्रततमःअतिशयेनशुद्धकर्मा शुचिः शुद्धएव विप्रोमेधावी शुचिः शुद्धःसन्नेव कविः क्रान्तकर्मा शुचिरेवाहुतोग्निः रोचते प्रकाशते ॥ २१ ॥

अथ द्वाविंशी—

उ॒त त्वा॑ धी॒तयो॒ मम॒ गिरो॑ वर्धन्तु वि॒श्वहा॑ । अग्ने॑ स॒ख्यस्य॑ बोधि नः ॥२२॥

उत । त्वा । धीतयः । मम । गिरः । वर्धन्तु । विश्वहा ।
अग्ने । सख्यस्य । बोधि । नः ॥ २२ ॥

उतापिच हे अग्ने त्वा त्वां मम धीतयः कर्माणि गिरः स्तुतयश्च विश्वहा सर्वदा वर्धन्तु वर्धयन्तु । नोस्माकं सख्यस्य सख्यं सखिकर्म स्तुत्यादिकं बोधि बुध्यस्व ॥ २२ ॥

अथ त्रयोविंशी–

यदग्नेस्यामहंत्वंत्वंवाघास्याअहम् । स्युष्टेसत्याइहाशिषः ॥ २३ ॥

यत् । अग्ने । स्याम् । अहम् । त्वम् । त्वम् । वा । घ स्याः ।
अहम् । स्युः । ते । सत्याः । इह । आऽशिषः ॥ २३ ॥

हे अग्ने यद्यदि अहं त्वं बहुधनः स्यां भवेयं । त्वं वा घ त्वं वाखलु अहं दरिद्रः स्तोता स्याः भवेः ततः ते तव आशिषः आशासनानि इहास्मद्विषये सत्याः सत्यानि स्युर्भवेयुः ॥ २३ ॥

अथ चतुर्विंशी–

वसुर्वसुपतिर्हिकमस्यग्नेविभावसुः । स्यामतेसुमतावपि ॥ २४ ॥

वसुः । वसुऽपतिः । हि । कम् । असि । अग्ने । विभाऽवसुः ।
स्याम । ते । सुऽमतौ । अपि । ॥ २४ ॥

हे अग्ने त्वं विभावसुर्दीप्तिधनो वसुपतिर्धनपतिः वसुर्वासयिताचासि भवसि । हि यस्मादेवोवयमपि ते तव सुमतावनुग्रहबुद्धौ सुष्टुतौ स्याम भवेम ॥ २४ ॥

अथ पञ्चविंशी–

अग्नेधृतव्रतायतेसमुद्रायेवसिन्धवः । गिरोवाश्रासईरते ॥ २५ ॥ ४० ॥

अग्ने । धृतऽव्रताय । ते । समुद्रायऽइव । सिन्धवः । गिरः ।
वाश्रासः । ईरते ॥ २५ ॥ ४० ॥

हे अग्ने धृतव्रताय धृतकर्मणे ते तुभ्यं वाश्रासो वाशनशीलागिरो मम स्तुतयः सिन्धवो नद्यः समुद्रामेव यथा समुद्राय तथा ईरते प्रवर्तन्ते ॥ २५ ॥

॥ इति पञ्चस्य तृतीये चत्वारिंशोवर्गः ॥ ४० ॥

अथ षड्विंशी–

युवानंविश्पतिंकविंविश्वादंपुरुवेपसम् । अग्निंशुम्भामिमन्मभिः ॥२६॥

युवानम् । विश्पतिम् । कविम् । विश्वऽअदम् । पुरुऽवेपसम् ।
अग्निम् । शुम्भामि । मन्मऽभिः ॥ २६ ॥

युवानं नित्यतरुणं विश्पतिं विशांपतिं कविं क्रान्तकर्माणं विश्वादं सर्वस्य हविषोत्तारं पुरुवेपसं बहुकर्माणं वेपः वेपइति कर्मनामसुपाठात् अग्निं मन्मभिः मननीयैः स्तोत्रैः शुंभामि शोभयामि ॥ २६ ॥

अथ सप्तविंशी–

यज्ञानांरथ्येवयंतिग्मजंभायवीळवे । स्तोमैरिषेमाग्नये ॥ २७ ॥

यज्ञानाम् । रथ्ये । वयम् । तिग्मऽजंभाय । वीळवे ।
स्तोमैः । इषेम । अग्नये ॥ २७ ॥

यज्ञानां रथ्ये नेत्रे तिग्मजंभाय तीक्ष्णज्वालाय वीळवे बलवते अग्नये स्तोमैः स्तोत्रैः वयमाङ्गिरसा इषेम स्तुतिं कर्तुमिच्छेम ॥ २७ ॥

अथाष्टाविंशी–

अयमग्नेत्वेअपिजरिताभूतुसन्त्य । तस्मैपावकमृळय ॥ २८ ॥

अयम् । अग्ने । त्वे इति । अपि । जरिता । भूतु । सन्त्य ।
तस्मै । पावक । मृळय ॥ २८ ॥

हे पावक शोधक सन्त्य संभजनीयाग्ने त्वे अपि त्वय्यपि अस्मदीयोजनो जरिता स्तोता भूतु भवतु । तस्मै जरित्रे मृळय सुखमुत्पादय तं सुखय वा ॥ २८ ॥

अथैकोनत्रिंशी–

धीरोह्यस्यद्मसद्विप्रोनजागृविःसदा । अग्नेदीदयसिद्यवि ॥ २९ ॥

धीरः । हि । असि । अद्मऽसत् । विप्रः । न । जागृविः ।
सदा । अग्ने । दीदयसि । द्यवि ॥ २९ ॥

हे अग्ने त्वं धीरोसिहि भवसि खलु । अद्मसद्धविषिसीदन् विप्रोन मेधावीव जागृविः प्रजानां हितकरणे जागरणशीलोसि सदा द्यव्यन्तरिक्षे दीदयसि दीव्यसि च ॥ २९ ॥

अथ त्रिंशी–

पुराग्नेदुरितेभ्यःपुरामृध्रेभ्यःकवे । प्रणआयुर्वसोतिर ॥ ३० ॥ ४१ ॥

पुरा । अग्ने । दुःऽइतेभ्यः । पुरा । मृध्रेभ्यः । कवे ।
प्र । नः । आयुः । वसो इति । तिर ॥ ३० ॥ ४१ ॥

हे वसो वासक कवे क्रान्तकर्मन्नग्ने दुरितेभ्यः पापेभ्यः पुरा मृध्रेभ्योहिंसकेभ्यश्च पुरा यदा दुरितानि शत्रवश्चास्मान्हिंसितुमुद्युंजते ततः प्रागेवेत्यर्थः नोस्माकमायुः प्रतिर वर्धय ॥ ३० ॥

॥ इति पष्ठस्य तृतीये एकचत्वारिंशोवर्गः ॥ ४१ ॥

आघायइति द्विचत्वारिंशदृचंतृतीयं सूक्तम् । अत्रेयमनुक्रमणिका–आघद्विचत्वारिंशत्त्रिशोक आग्नेन्द्री । अनुक्तगोत्रत्वात्काण्वोत्रिशोकऋषिः परंगायत्रं प्राग्वत्सप्रेरितिपरिभाषया गायत्रीछन्दः । अनुक्तत्वादिन्द्रोदेवता । आघायाअग्निश्चेन्द्रश्च । महाव्रते निष्केवल्ये गायत्रतृचाशीतावेतत्सूक्तम् । तथैवपञ्चमारण्यकेसूत्रितम्–आघायेअग्निमिन्धत आतूनइन्द्रक्षुमन्तमिति सूक्ते इति । तृतीयेपर्यायेच्छावाकशस्त्रे आदितःसप्तदशर्चः । तथैवातिरात्रइतिखण्डेसूत्र्यते–आघायेअग्निमिन्धतइति सप्तदशेति । आग्रयणे आग्नेन्द्रस्य हविषआघायइत्येषानुवाक्या । सूत्रितञ्च–आघायेअग्निमिन्धतेस्तुकर्माणःसुरुचोदेवयन्तइतिस्तोत्रमिति । मैत्रावरुणातिरिक्तोक्थ्ये स्तोत्रमिन्द्रायेत्याद्याः पञ्चर्चोविकल्पेन स्तोत्रियानुरूपाः । सूत्रितञ्च–सद्योगापस्तुतेराचो स्तोत्रमिन्द्रायगायतेति । द्वितीये पर्याये ब्राह्मणाच्छंसिनः अभित्वावृषभेतिस्तोत्रियःस्तृचः । सूत्रितञ्च–अभित्वावृषभासुतेभिप्रगोपतिंगिरेति । चातुर्विंशिकेहनि प्रातःसवने भिन्धिविश्वाइति ब्राह्मणाच्छंसिनः षळहस्तोत्रियः । तथाचसूत्रितम्–भिन्धिविश्वाअपद्विषइति ब्राह्मणाच्छंसिनइति ।

तत्र प्रथमा—

आघायेअग्निमिन्धतेस्तृणन्तिबर्हिरानुपक्। येषामिन्द्रोयुवासखा ॥१॥

आ। घ। ये। अग्निम्। इन्धते। स्तृणन्ति। बर्हिः।
आनुषक्। येषाम्। इन्द्रः। युवा। सखा ॥ १ ॥

ये ऋषयः आघ आभिमुख्येन खल्वग्निमिन्धते दीपयन्ति येषांच युवा नित्यतरुणइन्द्रः सखा भवति तेषां आनुषगानुपूर्व्येण बर्हिः स्तृणन्ति ॥ १ ॥

अथ द्वितीया—

बृहन्निदिध्मएषांभूरिशस्तंपृथुःस्वरुः। येषामिन्द्रोयुवासखा ॥२॥

बृहन्। इत्। इध्मः। एषाम्। भूरि। शस्तम्। पृथुः।
स्वरुः। येषाम्। इन्द्रः। युवा। सखा ॥ २ ॥

एषामृषीणां इध्मोबृहन्निद् महान् खलु। भूरि बहुच शस्तं स्तोत्रं स्वरुश्च पृथुर्महान्। सिद्धमन्यत् ॥ २ ॥

अथ तृतीया—

अयुद्धइद्युधावृतंशूरआजतिसत्वभिः। येषामिन्द्रोयुवासखा॥३॥

अयुद्धः। इत्। युधा। वृतम्। शूरः। आ। अजति।
सत्वऽभिः। येषाम्। इन्द्रः। युवा। सखा ॥ ३ ॥

तेष्वन्तर्भूतः कश्चिदयुद्धइत्यागयोद्धैवसन् युधावृतं योद्धृभिर्भटैरावृतं शत्रुं सत्वभिरात्मीयैर्बलैः शूरः सन् आजति नमयति ॥ ३ ॥

अथ चतुर्थी—

आबुन्दंवृत्रहाददेजातःपृच्छद्विमातरम्। कउग्राःकेहशृण्विरे ॥४॥

आ । बुन्दम् । वृत्रऽहा । दुदे । जातः । पृच्छत् । वि ।
मातरम् । के । उग्राः । के । ह । शृण्विरे ॥ ४ ॥

जातउत्पन्नोवृत्रहेन्द्रोबुन्दमिषुं तथाचयास्कः–बुन्दइषुर्भवतीति । आददे आदाय चेषुं उग्राः उद्गूर्णबलाः के केच शृण्विरे वीर्येण विश्रुताइति स्वमातरं विपृच्छत अप्राक्षीत् ॥ ४ ॥

अथ पञ्चमी–

प्रतित्वाशवसीवदद्गिरावप्सोनयोधिषत् । यस्तेशत्रुत्वमाचके ॥५॥४२॥

प्रति । त्वा । शवसी । वदत् । गिरौ । अप्सः । न । योधिषत् ।
यः । ते । शत्रुऽत्वम् । आऽचके ॥ ५ ॥ ४२ ॥

हे इन्द्र त्वा त्वां शवसी बलवती माता प्रतिवदत्प्रत्यवोचत् । यः ते शत्रुत्वमाचके कामयते सगिरौ पर्वते अप्सोन दर्शनीयोगजइव योधिषत् योधयति ॥ ५ ॥

॥ इति पञ्चमस्य तृतीये द्विचत्वारिंशोवर्गः ॥ ४२ ॥

अथ षष्ठी–

उतत्वंमघवञ्छृणुयस्तेवष्टिववक्षितत् । यद्वीळयासिवीळुतत् ॥६॥

उत । त्वम् । मघऽवन् । शृणु । यः । ते । वष्टि । ववक्षि ।
तत् । यत् । वीळयासि । वीळु । तत् ॥ ६ ॥

उतापिच हे मघवन् त्वं शृणु अस्मदीयां स्तुतिं । ते त्वत्तोयद्वष्टि कामयते स्तोता वद्ववक्षि तस्मै तद्वहसि । किञ्च त्वं यद्वीळयासि दृढीकरोषि तद्वीळु तत् दृढमेव सर्वत्र भवति ॥ ६ ॥.

अथ सप्तमी–

यदाजिंयात्याजिकृदिन्द्रःस्वश्वयुरुप । रथीतमोरथीनाम् ॥ ७ ॥

यत् । आजिम् । याति । आजिऽकृत् । इन्द्रः । स्वश्वऽयुः ।
उप । रथिऽतमः । रथिनाम् ॥ ७ ॥

---

१ नि० ६. ३३.

यद्यदा आजिकृत् युद्धकृदिन्द्रः स्वश्वयुः कल्याणमश्वमिच्छन् आजिं युद्धमुपयाति तदा रथीतमोतिशयेनरथी भवति । रथीनां सर्वान्रथिनश्च जयतीतिशेषः ॥ ७ ॥

अथाष्टमी—

विषुविश्वाअभियुजोवज्रिन्विष्वग्यथावृह । भवानःसुश्रवस्तमः ॥८॥

वि । सु । विश्वाः । अभियुजः । वज्रिन् । विष्वक् । यथा । वृह । भव । नः । सुश्रवःऽतमः ॥ ८ ॥

हे वज्रिन् त्वं विश्वाः सर्वाः अभियुजोभियोक्त्रीः प्रजाः यथा विष्वग्भवति तथा सुसुष्ठु विवृह नोस्माकं सुश्रवस्तमः शोभनान्नवत्तमश्च भव ॥ ८ ॥

अथ नवमी—

अस्माकंसुरथंपुरइन्द्रःकृणोतुसातये । नयंधूर्वन्तिधूर्तयः ॥ ९ ॥

अस्माकम् । सु । रथम् । पुरः । इन्द्रः । कृणोतु । सातये । न । यम् । धूर्वन्ति । धूर्तयः ॥ ९ ॥

यमिन्द्रं धूर्तयोहिंसकाः न धूर्वन्ति न हिंसन्ति सइन्द्रोस्माकं सातयेभीष्टलाभाय सुरथं कल्याणं रथं पुरः कृणोतु पुरस्करोतु ॥ ९ ॥

अथ दशमी—

वृज्यामतेपरिद्विषोरंतेशक्रदावने । गमेमेदिन्द्रगोमतः ॥१०॥४३॥

वृज्याम । ते । परि । द्विषः । अरम् । ते । शक्र । दावने । गमेम । इत् । इन्द्र । गोऽमतः ॥ १० ॥ ४३ ॥

हे शक्रेन्द्र याचमानावयं ते तव द्विषोद्वेष्टॄन् परिवृज्याम नोपगच्छेम । किन्तु ते तव गोमतः पशुमतोदावनेभीष्टदानाय अरं पर्याप्तं गमेमेव गच्छेमैव ॥ १० ॥

॥ इति प्रथमस्य तृतीये त्रिचत्वारिंशोवर्गः ॥ ४३ ॥

अथैकादशी–

शनैश्चिद्यन्तोअद्रिवोश्वावन्तःशतग्विनः । विवक्षणाअनेहसः ॥११॥

शनैः । चित् । यन्तः । अद्रिऽवः । अश्वऽवन्तः । शतऽग्विनः । विवक्षणाः । अनेहसः ॥ ११ ॥

हे अद्रिवोवज्रिन् वयं शनैर्मन्दंमन्दं यन्तोगच्छन्तोश्वावन्तोश्ववन्तः शतग्विनोबहुधना विवक्षणाः वोढव्यं महन्तोनेहसः उपद्रवरहिताश्च सन्तोगमेमेदिति संबन्धः ॥ ११ ॥

अथ द्वादशी–

ऊर्ध्वाहितेदिवेदिवेसहस्रासूनृताशता । जरितृभ्योविमंहते ॥ १२ ॥

ऊर्ध्वा । हि । ते । दिवेऽदिवे । सहस्रा । सूनृता । शता । जरितृऽभ्यः । विऽमंहते ॥ १२ ॥

हे इन्द्र ते तव जरितृभ्यः स्तोतृभ्यः सहस्रा सहस्राणि शता शतानि चोर्ध्वा ऊर्ध्वानि मुख्यानि सूनृता सूनृतानि साधनानि दिवेदिवेन्वहं विमंहते यजमानः मपच्छति । मंहतिर्दान-कर्मा ॥ १२ ॥

अथ त्रयोदशी–

विद्माहित्वाधनंजयमिन्द्रंदृह्लाचिदारुजम् । आदारिणंयथागयम् ॥१३॥

विद्म । हि । त्वा । धनम्ऽजयम् । इन्द्र । दृह्ला । चित् । आऽरुजम् । आऽदारिणम् । यथा । गयम् ॥ १३ ॥

हे इन्द्र त्वा त्वां धनञ्जयं धनानां जेतारं दृढाचिद् दृढानामपि शत्रूणामारुजं आभिमुख्येन भंकारं आदारिणमादर्तारञ्च यथा गयं गृहमिवोपद्रवेभ्योरक्षकञ्च विद्म जानीम ॥ १३ ॥

अथ चतुर्दशी–

ककुहंचित्त्वाकवेमंदन्तुधृष्णविन्दवः । आत्वांपणियदीमहे ॥१४॥

कुकुहम् । चित् । त्वा । कवे । मन्दन्तु । धृष्णो इति । इन्द॑वः ।
आ । त्वा । पणिम् । यत् । ईमहे ॥ १४ ॥

हे कवे क्रान्तकर्मन् धृष्णो धर्षकेन्द्र यद्यदा पणिं पणमानं त्वा त्वां आ आभिमुख्येने-महेभीष्टं याचामहे। तदा ककुहं उच्छ्रितं त्वा त्वामिन्दवश्चित् सोमाअपि मन्दन्तु मादयन्तु॥१४॥

अथ पञ्चदशी–

यस्तेरेवाँअदाशुरिःप्रममर्षमघत्तये । तस्यनोवेदआभर ॥ १५ ॥ ४४॥

यः । ते । रेवान् । अदाशुरिः । प्रऽममर्षं । मघत्तये ।
तस्य॑ । नः । वेदः । आ । भर ॥ १५ ॥ ४४ ॥

हे इन्द्र मघत्तये धनदानाय ते तुभ्यं यः पुमान् रेवान् धनवान् सन् अदाशुरिरदान-शीलः प्रममर्षाक्ष्यसूयति तस्य पुंसोवेदोधनं नोस्मभ्यमाभराहर ॥ १५ ॥

॥ इति पञ्चस्य तृतीये चतुश्चत्वारिंशोवर्गः ॥ ४४ ॥

अथ षोडशी–

इमउत्वाविचक्षतेसखायइन्द्रसोमिनः पुष्टावन्तोयथापशुम् ॥ १६ ॥

इमे । ऊँ इति । त्वा । वि । चक्षते । सखायः । इन्द्र ।
सोमिनः । पुष्टऽवन्तः । यथा । पशुम् ॥ १६ ॥

हे इन्द्र त्वा त्वां सोमिनोभिषुतसोमाःसखायः इमउ इमेएव खल्वस्मदीयाजनाः पुष्टावन्तः संवृतघासाः यथा पशुं पशुमिव विचक्षते विपश्यन्ति ॥ १६ ॥

अथ सप्तदशी–

उतत्वाबधिरंवयंश्रुत्कर्णंसन्तमूतये । दूरादिहहवामहे ॥ १७ ॥

उत । त्वा । अबधिरम् । वयम् । श्रुत्ऽकर्णम् । सन्तम् ।
ऊतये । दूरात् । इह । हवामहे ॥ १७ ॥

उतापिच हे इन्द्र अवधिरं अनुपहतश्रोत्रेन्द्रियं अतएव श्रुत्कर्णं श्रवणपरकर्णं सन्तं त्वा त्वां वयं निशोका इह यज्ञे ऊतये रक्षणाय दूराद्ध्वामहे ह्वयामः ॥१७॥

अथाष्टादशी–

यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत । भवेरापिर्नो अन्तमः ॥१८॥

यत् । शुश्रूयाः । इमम् । हवम् । दुःऽमर्षम् । चक्रियाः ।
उत । भवेः । आपिः । नः । अन्तमः ॥ १८ ॥

हे इन्द्र यद्यदीममस्मदीयं हवमाह्वानं शुश्रुयाः शृणुयाः तर्हि दुर्मर्षं शत्रूणां दुःसहं बलं चक्रियाः कुर्याः । उतापिच नोस्माकमन्तमः अन्तिकतम आपिर्बन्धुः भवेः ॥ १८ ॥

अथैकोनविंशी–

यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि । गोदा इदिन्द्र बोधि नः ॥१९॥

यत् । चित् । हि । ते । अपि । व्यथिः । जगन्वांसः । अमन्महि ।
गोऽदाः । इत् । इन्द्र । बोधि । नः ॥ १९ ॥

अपिचिदपिच हे इन्द्र ते तुभ्यं यद्यदाहि व्यथिर्दारिद्र्येण व्यथिताः जगन्वांसोगन्तारो-वयममन्महि विद्मः तदा नोस्माकं गोदाइव गवांदातैव भवामीति बोधि बुध्यस्व ॥ १९ ॥

अथ विंशी–

आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते । उश्मसि त्वा सधस्थ आ ॥२०॥४५

आ । त्वा । रम्भम् । न । जिव्रयः । ररम्भ । शवसः । पते ।
उश्मसि । त्वा । सधऽस्थे । आ ॥ २० ॥ ४५ ॥

हे शवसस्पते बलस्यपते त्वा त्वां वयं जिव्रयःक्षीणावृद्धारम्भं न दंडमिव ररम्भ आरभामहे । तथाचयास्कः–आरभामहे त्वाजीर्णाइव दण्डमिति[1] । अपिच त्वा त्वां सधस्थे यज्ञे उश्मसि कामयामहे ॥ २० ॥

॥ इति षष्ठस्य तृतीये पञ्चचत्वारिंशोवर्गः ॥ ४५ ॥

---

१ नि० ३. २१ ।

अथैकविंशी–

स्तोत्रमिन्द्रायगायतपुरुनृम्णायसत्वने । नकिर्यंवृण्वतेयुधि ॥ २१ ॥

स्तोत्रम् । इन्द्राय । गायत । पुरुऽनृम्णाय । सत्वने ।
नकिः । यम् । वृण्वते । युधि ॥ २१ ॥

यमिन्द्रं युधि युद्धे नकिर्वृण्वते केपिनवारयन्ति तस्मै सत्वने दानशीलाय पुरुनृम्णाय बहुधनायेन्द्राय स्तोत्रं गायत पठत ॥ २१ ॥

अथ द्वाविंशी–

अभित्वावृषभासुतेसुतंसृजामिपीतये । तृंपाव्यश्नुहीमदम् ॥२२॥

अभि । त्वा । वृषभ । सुते । सुतम् । सृजामि । पीतये ।
तृम्प । वि । अश्नुहि । मदम् ॥ २२ ॥

हे वृषभेन्द्र त्वा त्वां सुते सोमेभिषुवेसति सुतमभिषुतंसोमं पीतये पानायाभिसृजामि तृंप तृप्य मदं मदकरं सोमं व्यश्नुहिच ॥ २२ ॥

अथ त्रयोविंशी–

मात्वामूराअविष्यवोमोपहस्वानआदभन् । माकींब्रह्मद्विषोवनः ॥२३॥

मा । त्वा । मूराः । अविष्यवः । मा । उपऽहस्वानः । आ ।
दभन् । माकीम् । ब्रह्मऽद्विषः । वनः ॥ २३ ॥

हे इन्द्र त्वा त्वां मूराः मूरका मूढा मनुष्या अविष्यवः पालनकामा मादभन माहिंसंतु । उपहस्वानः उपहसनपराश्च माभवन्तु । ब्रह्मद्विषो ब्राह्मणानां द्वेष्टॄन् माकीं वनः मा भजेथाः ॥२३॥

अथ चतुर्विंशी–

इहत्वागोपरीणसामहेमन्दन्तुराधसे । सरोगौरोयथापिब ॥ २४ ॥

इह । त्वा । गोऽपरीणसा । महे । मन्दन्तु । राधसे ।
सरः । गौरः । यथा । पिब ॥ २४ ॥

हे इन्द्र त्वा त्वामिहयज्ञे गोपरीणसा गव्येनपयसा संमिश्रितेन सोमेन मह्रे महते राधसे धनाय मन्दन्तु मनुष्यामादयन्तु । त्वञ्च तं सोमं यथा गौरोमृगः सरः पिबति तथा पिब ॥ २४ ॥

अथ पञ्चविंशी–

याव॑त्र॒हा प॑रा॒वति॒ सना॒ नवा॑ च चुच्यु॒वे । ता सं॒सत्सु॒ प्रवो॑चत ॥२५॥४६॥

या । वृ॒त्र॒ऽहा । प॒रा॒ऽवति॑ । सना॑ । नवा॑ । च॒ । चु॒च्यु॒वे ।
ता । सं॒सत्ऽसु॑ । प्र । वो॒च॒त॒ ॥ २५ ॥ ४६ ॥

वृत्रहेन्द्रःपरावति दूरे या यानि सना सनातनानि नवा नवानि नूतनानि च धनानि चुच्युवे प्रेरितवान् तानि धनानि संसत्सु यज्ञेषु सभासुवा प्रवोचत प्रब्रूते विद्वज्जनः ॥ २५ ॥

॥ इति षष्ठस्य तृतीये षट्चत्वारिंशोवर्गः ॥ ४६ ॥

अथ षड्विंशी–

अपि॑बत्क॒द्रुवः॑ सु॒तमिन्द्रः॑ स॒हस्र॑बाह्वे । अत्रा॑देदिष्ट॒ पौंस्य॑म् ॥ २६॥

अपि॑बत् । क॒द्रुवः॑ । सु॒तम् । इन्द्रः॑ । स॒हस्र॑ऽबाह्वे ।
अत्र॑ । अदे॑दिष्ट । पौंस्य॑म् ॥ २६ ॥

इन्द्रः कद्रुवः कद्रुनामकस्यऋषेः संबंधिनं सुतमभिषुतं सोममपिबत् पीतवान् । सहस्रबाह्वे सहस्रबाहोः शत्रूंश्चाहन्निति शेषः । अत्रास्मिन्नवसरे पौंस्यं इन्द्रस्य वीर्यमदेदिष्टादीप्यत ॥ २६ ॥

अथ सप्तविंशी–

स॒त्यं तत्तु॒र्वशे॒ यदौ॒ विदा॑नो अह्नवा॒य्यम् । व्या॑नट् तु॒र्वणे॒ शमि॑ ॥ २७॥

स॒त्यम् । तत् । तु॒र्वशे॑ । यदौ॑ । विदा॑नः । अ॒ह्न॒वा॒य्यम् ।
वि । आ॒न॒ट् । तु॒र्वणे॑ । शमि॑ ॥ २७ ॥

तुर्वशेराज्ञि यदौच यदुनामके च राज्ञि तत्प्रसिद्धं यागादिलक्षणं शमि कर्म । शचीशमीति कर्मनामसुपाठात् । सत्यं परमार्थं विदानोजानन् तयोः प्रीत्यर्थमह्नवाय्यं अह्नवाय्यनामकं तयोः शत्रुं तुर्वणे संग्रामे व्यानट् व्याप्तवान् ॥ २७ ॥

मा । नः । एकस्मिन् । आगसि । मा । द्वयोः । उत ।
त्रिषु । वधीः । मा । शूर । भूरिषु ॥ ३४ ॥

हे शूरेन्द्र नोस्मानेकस्मिन्नागस्यपराधे मावधीर्माहिंसीः द्वयोरागसोरपि मावधीरुतापिच त्रिष्वागःस्वपि माहिंसीर्भूरिष्वप्यसंख्यातेष्वप्यागःसु माच वधीः ॥ ३४ ॥

अथ पञ्चत्रिंशी–

बिभयाहित्वावतउग्रादभिप्रभङ्गिणः । दस्मादहमृतीषहः ॥३५॥४८॥

बिभय । हि । त्वाऽवतः । उग्रात् । अभिऽप्रभङ्गिनः ।
दस्मात् । अहम् । ऋतिऽसहः ॥ ३५ ॥ ४८ ॥

हे इन्द्र त्वावतः त्वत्सदृशादुग्रादुद्गूर्णादभिप्रभंगिणः शत्रूणामभिमहर्तुर्दस्मात्पापानामुपक्षपयितुः ऋतीषहः शत्रुकृतां हिंसां सहतः अहं निशोकः बिभयहि बिभेमि खलु ॥३५॥

॥ इति षष्ठस्य तृतीयेष्टचत्वारिंशोवर्गः ॥ ४८ ॥

अथ षट्त्रिंशी–

मासख्युःशूनमाविदेमापुत्रस्यप्रभूवसो । आवृत्वद्भूतुतेमनः॥३६॥

मा । सख्युः । शूनम् । आ । विदे । मा । पुत्रस्य ।
प्रभूवसो इति प्रभुऽवसो । आऽवृत्वत् । भूतु । ते । मनः ॥ ३६ ॥

हे प्रभूवसो प्रभूतधनेन्द्र ते तव सख्युः शूनं वृद्धं माविदे मावेदयामि पुत्रस्यापि शूनं माविदे तव मनः अस्मासु आवृत्वदावर्तनवद्भूतु भवतु पुनःपुनः सुखं करोत्वित्यर्थः ॥ ३६ ॥

अथ सप्तत्रिंशी–

कोनुमर्याअमिथितःसखासखायमब्रवीत् । जहाकोअस्मदीषते॥३७॥

कः । नु । मर्याः । अमिथितः । सखा । सखायम् । अब्रवीत् ।
जहा । कः । अस्मत् । ईषते ॥ ३७॥

कोनु कःखलु हे मर्याः मनुष्या अभिथितो मेथतिराक्रोशकर्मा अनाक्रुष्टः इन्द्रादन्यः सखा सखायं मति जहा अहं कं जघान कः कोवास्मदस्मत्तोभीतः ईंषते पलायतइत्यब्रवीद्वदति इन्द्रएवैतादृशस्य वचनस्य वक्तेत्यभिप्रायः । तथाचयास्कः—मेथतिराक्रोशकर्मा पापकं जघानकमहं जातु कोस्मद्भीतः पलायतइति । मानएकस्मिन्नागसीत्यादिकयाश्रुत्या नूनमृषिमिन्द्रआजहारेत्यत्रऋषिर्विस्मयतइति ॥ ३७ ॥

अथाष्टत्रिंशी—

एवारेवृषभासुतेसिन्वन्भूर्यावयः । श्वघ्नीवनिवताचरन् ॥ ३८ ॥

एवारे । वृषभ । सुते । असिन्वन् । भूरि । आवयः ।

श्वघ्नीऽइव । निऽवता । चरन् ॥ ३८ ॥

हे वृषभ कामानांवर्षकेन्द्र एवारे एवारोनामकश्चित्तस्मिन् सुतेभिषुतेसोमेसति भूरि बहूनि धनान्यसिन्वन् नवध्नन् श्वघ्नीव श्वघ्नी कितवः । तथाचयास्कः—श्वघ्नीकितवोभवतिस्वंहन्ति स्वंपुनराश्रितंभवतीति । सइवससोमः त्वामेवमावः आवयः दृश्यमानाः सर्वेदेवाः निवताअधोमुखाः सन्तः आचरन् निर्गताः ॥ ३८ ॥

अथैकोनचत्वारिंशी—

आतंएतावचोयुजाहरीगृभ्णेसुमद्रथा । यदींब्रह्मभ्यइद्ददः ॥ ३९ ॥

आ । ते । एता । वचःऽयुजा । हरी इति । गृभ्णे ।

सुमत्ऽरथा । यत् । ईम् । ब्रह्मऽभ्यः । इत् । ददः ॥ ३९ ॥

हे इन्द्र ते तव सुमद्रथा कल्याणरथौ वचोयुजा मन्त्रेणयुज्यमानौ एता एवौ हरी अश्वौ आगृभ्णे अस्मदभिमुखं यातुं हस्ताभ्यां आकर्षामीत्यर्थः । यद्यस्मात्त्वं ब्रह्मभ्यइद्ब्राह्मणेभ्यएव ईमिदं धनं ददः ददासि ॥ ३९ ॥

अथ चत्वारिंशी—

भिन्धिविश्वाअपद्विषःपरिबाधोजहीमृधः । वसुस्पार्हंतदाभर ॥ ४० ॥

---

१ नि० ४. २. ।   २ नि० ५. २२. ।

अथाष्टाविंशी—

तरणिंवोजनानांत्रदंवाजस्यगोमतः । समानमुप्रशंसिषम् ॥ २८॥

तरणिम् । वः । जनानाम् । त्रदम् । वाजस्य । गोऽमतः ।
समानम् । ऊँ इति । प्र । शंसिषम् ॥ २८ ॥

हे अस्मदीयाः पुरुषा वोयुष्माकं जनानां पुत्रपौत्रादीनां तरणिं तारकं त्रदं शत्रूणां तर्द-यितारं गोमतः पशुमतोवाजस्यान्नस्य दातारं चेन्द्रं समानमु साधारणमेव प्रशंसिषं स्तौमि ॥२८॥

अथैकोनत्रिंशी—

ऋभुक्षणंनवर्तवउक्थेषुतुग्र्यावृधम् । इन्द्रंसोमेसचासुते ॥ २९ ॥

ऋभुक्षणम् । न । वर्तवे । उक्थेषु । तुग्र्यऽवृधम् ।
इन्द्रम् । सोमे । सचा । सुते ॥ २९ ॥

ऋभुक्षणं महान्तं तुग्र्यावृधं उदकस्यवर्धयितारं तुग्र्या बर्बुरमित्युदकनामसुपाठात् इन्द्रं सोमे सचा स्तोत्रेणसह सुतेभिषुते सत्युक्थेषु शस्त्रेषु वर्तवे धनं वरितुं प्रशंसामीतिशेषः ने-तिसम्प्रत्यर्थे ॥ २९ ॥

अथ त्रिंशी—

यःकृन्तदिद्वियोन्यंत्रिशोकायगिरिंपृथुम् । गोभ्योगातुंनिरेतवे॥३०॥४७॥

यः । कृन्तत् । इत् । वि । योन्यम् । त्रिऽशोकाय ।
गिरिम् । पृथुम् । गोभ्यः । गातुम् । निःऽएतवे ॥ ३० ॥ ४७ ॥

यइयएवेन्द्रोयोन्यमुदकनिर्गमनद्वारं पृथुं विस्तीर्णं गिरिंमेघं गिरिः व्रजइति मेघनामसु पाठात् त्रिशोकाय त्रिशोकनामकऋष्यर्थं विकृन्तइच्छिनत् सगोभ्योगमनवद्भ्यउदकेभ्यो निरेतवे निर्गमनाय गातुं भूमिं भूमिः गातुरिति तन्नामसुपाठात् मार्गमित्यर्थः करोतीतिशेषः ॥ ३० ॥

॥ इति पञ्चस्य तृतीये सप्तचत्वारिंशोवर्गः ॥४७॥

अथैकत्रिंशी—

यद्दं॑धि॒षे म॑न॒स्यसि॑ मन्दा॒नः प्रेदिय॑क्षसि । मा तत्क॑रिन्द्र मृ॒ळय॑ ॥ ३१ ॥

यत् । द॒धि॒षे । म॒न॒स्यसि॑ । म॒न्दा॒नः । प्र । इत् ।
इय॑क्षसि । मा । तत् । कः॒ । इ॒न्द्र॒ । मृ॒ळय॑ ॥ ३१ ॥

हे इन्द्र मन्दानो मोदमानस्त्वं यच्छुभ्रं वस्तु दधिषे धारयसि यच्च मनस्यसि पूजयसि यदपि प्रेदियक्षसि प्रयच्छस्येव तत्सर्वं माकः किं नाकार्षीरस्माकं कृतवानेव । किञ्चास्मान्मृळय सुखय ॥ ३१ ॥

अथ द्वात्रिंशी—

द॒भ्रं चि॒द्धि त्वाव॑तः कृ॒तं शृ॒ण्वे अधि॒ क्षमि॑ । जिगा॑त्विन्द्र ते॒ मनः॑ ॥ ३२ ॥

द॒भ्रम् । चि॒त् । हि । त्वाऽव॑तः । कृ॒तम् । शृ॒ण्वे । अधि॑ ।
क्षमि॑ । जिगा॑तु । इ॒न्द्र॒ । ते॒ । मनः॑ ॥ ३२ ॥

हे इन्द्र त्वावतः त्वत्सदृशस्य दभ्रंचिदल्पमपि कृतं कर्माधिक्षमि क्षमायां अधीति सप्तम्यर्थानुवादः शृण्वे विश्रुतं भवतिहि । तथासति ते तव मनोजिगातु मयिगच्छतु ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

तवेदु॒ ताः सु॑की॒र्तयोऽस॑न्नु॒त प्रश॑स्तयः । यदि॑न्द्र मृ॒ळया॑सि नः ॥ ३३ ॥

तव॑ । इत् । ऊँ इति॑ । ताः । सु॒ऽकी॒र्तयः॑ । अस॑न् । उ॒त ।
प्रऽश॑स्तयः । यत् । इ॒न्द्र॒ । मृ॒ळया॑सि । नः॒ ॥ ३३ ॥

हे इन्द्र त्वं नोस्मान् यथाभिर्मृळयासि सुखयसि ताः सुकीर्तयः शोभनाख्यातयः तवेत्तवैवासन् भवेयुः । उतापिच ताः प्रशस्तयः स्तुतयश्च तवैव भवेयुः ॥ ३३ ॥

अथ चतुस्त्रिंशी—

मा न॒ एक॑स्मि॒न्नाग॑सि॒ मा द्वयो॑रु॒त त्रि॒षु । वधी॒र्मा शू॑र॒ भूरि॑षु ॥ ३४ ॥

भि॒न्धि । विश्वाः॑ । अप॑ । द्विषः॑ । परि॑ । बाधः॑ । ज॒हि ।
मृधः॑ । वसु॑ । स्पा॒र्हम् । तत् । आ । भ॒र ॥ ४० ॥

हे इन्द्र त्वं विश्वाः सर्वाद्विषोद्वेष्ट्रीः शत्रुसेनाः अपभिन्धि विदारय । बाधोहिंसित्रीः मृधः संग्रामान् स्पृधः मृधः इति संग्रामनामसुपाठात् परिजहि हिंसच । तासां स्पार्हं स्पृहणीयं तत्प्रसिद्धं वस्त्वाभरास्मभ्यमाहर ॥ ४० ॥

अथैकचत्वारिंशी–

यद्वी॒ळावि॑न्द्र॒यत्स्थि॒रेयत्पर्शा॑नेपरा॑भृतम् । वसु॑स्पा॒र्हंतदाभ॑र ॥४१॥

यत् । वी॒ळौ । इ॒न्द्र॒ । यत् । स्थि॒रे । यत् । पर्शा॑ने ।
परा॑ऽभृतम् । वसु॑ । स्पा॒र्हम् । तत् । आ । भ॒र ॥ ४१ ॥

हे इन्द्र त्वयाच वीळौ दृढे पैरैः कम्पयितुमशक्ये यद्धनं पराभृतं विन्यस्तं यच्च स्थिरे स्वयमचले पराभृतं यच्चापि पर्शाने विमर्शनक्षमे पराभृतं तत्स्पार्हं वस्त्वाभर ॥ ४१ ॥

अथ द्विचत्वारिंशी--

यस्य॑तेवि॒श्वमा॑नुषो॒भूरे॑र्द॒त्तस्य॒वेद॑ति । वसु॑स्पा॒र्हंतदाभ॑र॥४२॥४९॥

यस्य॑ । ते॒ । वि॒श्वऽमा॑नुषः । भूरेः॑ । द॒त्तस्य॑ ।
वेद॑ति । वसु॑ । स्पा॒र्हम् । तत् । आ । भ॒र ॥ ४२ ॥ ४९ ॥

हे इन्द्र ते त्वया विभक्तिव्यत्ययः दत्तस्य दत्तं भूरेर्बहु यस्य यद्धनं कर्मणिषष्ठी विश्वमानुषः सर्वोमनुष्योवेदति जानाति तत्स्पार्हं स्पृहणीयं वस्त्वाभर ॥ ४२ ॥

॥ इति षष्ठस्य तृतीये एकोनपञ्चाशोवर्गः ॥ ४९ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके तृतीयोध्यायः ॥३॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥
षष्ठेतृतीयमध्यायं व्याख्यायश्रीमतीसुतः । श्रीसायणार्यःसंगृह्य चतुर्थंव्याकरोत्यथ ॥२॥

तत्वावतइतित्रयस्त्रिंशदृचं चतुर्थंसूक्तम् अश्वपुत्रस्य वशाख्यस्यार्षं माग्वतसमपरिभाषया आ-द्याश्वतस्रोगायत्र्यः तत्राद्या पादनिचृत् त्रयःसप्तकाःपादनिचृत् इत्युक्तलक्षणोपेतत्वात्। दधानोगोम-दश्ववदित्येषा पञ्चमीककुप् अष्टकद्वादशाष्टकैःपादैरुपेतत्वात् मध्यमश्चेत्ककुबिति हि तल्लक्षणं। इमिन्द्रमितिषष्ठी गायत्री। तस्मिन्हिसन्तीतिसप्तमी बृहती यस्तेमदइत्यष्टम्यनुष्टुप् योदुष्टरइतिन-वमी सतोबृहती अयुजोजागतौसतोबृहतीत्युक्तम् गव्योषुणइतिदशमी गायत्री नहितेशूरस्ये-कादशी बृहती यज्ञश्चइतिद्वादशी विपरीतासतोबृहती प्रथमतृतीययोरष्टाक्षरत्वात् द्वितीयचतु-र्थयोर्द्वादशाक्षरात्व युजौचेद्विपरीतेत्युक्तत्वात्। सनोवाजेष्वितित्रयोदशी चतुर्विंशत्यक्षराद्विपदा। अभिवोवीरमितिचतुर्दशी पिपीलिकमध्या बृहती त्रयोदशिनोर्मध्येष्टकः पिपीलिकमध्येत्युक्तत्वात्। ददीरेक्णइतिपञ्चदशी ककुम्न्यंकुशिरा त्रैष्टुभजागतचतुष्काः ककुम्न्यंकुशिरेत्युक्तत्वात्। विश्वे-षामितिषोडशीविराट् महःसुषइति सप्तदशी जगती येपातयन्तइत्यष्टादशी उपरिष्टाद्बृहती चतु-र्थपादस्यद्वादशाक्षरत्वात् प्रभङ्गमित्येकोनविंशी बृहती शग्धिनःसुसनितरितिविंशी विषमपदाबृह-ती नवकाष्टचैकादशपष्टिनोविषमपदेत्युक्तत्वात् आसएतु षष्टिंसहस्रेत्येकविंशीद्वाविंश्यौ पंक्ती दशरथावाइति त्रयोविंशीगायत्री दानासइतिचतुर्विंशीपंक्तिः पञ्चविंशीसप्तविंश्यौबृहत्यौ षड्विंश्यष्टाविंश्यौसतोबृहत्यौ । एकोनत्रिंशीगायत्री गावोनयूथमितित्रिंशी विंशत्यक्षरा द्विपदा विराट् एकत्रिंश्युष्णिक् द्वात्रिंशीपंक्तिः त्रयस्त्रिंशीगायत्री । आसएत्वित्यादिभिश्चतसृभिः कनीतपुत्रस्य पृथुश्रवसोदानंस्तूयते अतस्तद्देवताकाः । आनोवायविन्यादीनां चतसृणां द्वात्रिंश्याश्च वायुर्देवता। शिष्टाअनादेशपरिभाषयेन्द्रदेवताकाः । एतत्सर्वमनुक्रमण्यामुक्तम्— त्वावतस्त्रयस्त्रिंशद्वशोऽश्व्य आसआदि कानीतस्य पृथुश्रवसोदानस्तुतिराद्यापादनिचृत् पञ्चम्यादि ककुप् गायत्री बृहत्यनुष्टुप् सतोबृहती गायत्री विपरीतोत्तरः प्रगाथो द्विपदाचतुर्विंशिका बृहती पिपीलिकमध्या ककुम्न्यंकुशिरा विराड् जगत्युपरिष्टाद्बृहतीबृहत्यौ विषमपदोत्तरे पङ्क्तीगायत्रीपङ्क्तिप्रगाथौ च वायव्यौ गायत्रीद्विपदोष्णिक्पंक्तिर्वायव्यगायत्रीति । महाव्रते

निष्केवल्ये सनितःसुसनितरित्यन्तमेवसूक्तं । तथाच पञ्चमारण्यकेशौनकेनसूत्रितम्—त्वावतः पुरूवसविति विशः सनितःसुसनितरित्येतदन्तइति ।

तत्र प्रथमा—

ओम् त्वावतःपुरूवसोवयमिन्द्रप्रणेतः । स्मसिस्थातर्हरीणाम् ॥१॥

त्वाऽवतः । पुरुवसो इति पुरुऽवसो । वयम् । इन्द्र ।
प्रनेतरिति प्रऽनेतः । स्मसि । स्थातः । हरीणाम् ॥ १ ॥

हे पुरूवसो बहुधनेन्द्र प्रणेतः कर्मणांपारं प्रकर्षेण प्रापयितरिन्द्र त्वावतः त्वत्सदृशस्य इन्द्रसमानस्यान्यस्याभावात्तवेत्यर्थः तव स्वभूतावयं स्मसि स्मः हे हरीणां एतत्संज्ञकानामश्वानां स्थातरधिष्ठातः ॥ १ ॥

अथ द्वितीया—

त्वांहिसत्यमद्रिवोविद्मदातारमिषाम् । विद्मदातारंरयीणाम् ॥ २ ॥

त्वाम् । हि । सत्यम् । अद्रिऽवः । विद्म । दातारम् ।
इषाम् । विद्म । दातारम् । रयीणाम् ॥ २ ॥

हे अद्रिवः अत्ति शत्रूनित्यद्रिः वज्रः वद्वन्निन्द्र त्वां सत्यं निश्चयं इषामन्नानां दातारं विद्म जानीमः । तथा रयीणां धनानां दातारं विद्म ॥ २ ॥

अथ तृतीया—

आयस्यतेमहिमानंशतमूतेशतक्रतो । गीर्भिर्गृणन्तिकारवः ॥ ३ ॥

आ । यस्य । ते । महिमानम् । शतमूऽऊते ।
शतक्रतो इति शतऽक्रतो । गीःऽभिः । गृणन्ति । कारवः ॥ ३ ॥

हे शतमूते अपरिमितरक्षण हे शतक्रतो बहुकर्मयुक्तेन्द्र यस्य ते महिमानं माहात्म्यं कारवः स्तोतारोगीर्भिः स्तुतिभिर्गृणन्ति स्तुवन्ति स्वाभीष्टाय । ३ ॥

अथ चतुर्थी—

सुनीथोघासमर्त्योयंमरुतोयमर्यमा । मित्रःपान्त्यद्रुहः ॥ ४ ॥

सुऽनीथः । घ । सः । मर्त्यः । यम् । मरुतः । यम् ।
अर्यमा । मित्रः । पान्ति । अद्रुहः ॥ ४ ॥

समर्त्योमनुष्यो यजमानः सुनीथः सुयज्ञः सुनयनोवा भवति । घेति प्रसिद्धौ । सइत्युक्तं कमित्याह यं यजमानं मरुतोदेवाः पान्ति रक्षन्ति । अद्रुहः अद्रोहकर्तारः तथा यमर्यमा पाति यंचमित्रः पाति सएवं भवतीति ॥ ४ ॥

अथ पञ्चमी–

दधानोगोमदश्ववत्सुवीर्यमादित्यजूतएधते । सदारायापुरुस्पृहा ॥५॥१॥

दधानः । गोऽमत् । अश्वऽवत् । सुऽवीर्यम् । आदित्यऽजूतः ।
एधते । सदा । राया । पुरुऽस्पृहा ॥ ५ ॥ १ ॥

आदित्यजूतः आदित्यप्रेरितः आदित्यानुगृहीतो यजमानो गोमद्गोभिरुपेतं अश्ववदश्वैरुपेतं सुवीर्यं शोभनवीर्योपेतं पुत्रं दधानो धारयन्नेधते वर्धते सदा सर्वदा । किञ्च पुरुस्पृहा बहुभिः स्पृहणीयेन राया धनेन सदैधते ॥ ५ ॥

॥ इति पष्ठस्य चतुर्थे प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी–

तमिन्द्रंदानमीमहेशवसानमभीर्वम् । ईशानंरायईमहे ॥ ६ ॥

तम् । इन्द्रम् । दानम् । ईमहे । शवसानम् । अभीर्वम् ।
ईशानम् । रायः । ईमहे ॥ ६ ॥

तं प्रसिद्धमिन्द्रं दानं देयं रायोधनं ईमहे याचामहे । कीदृशमिन्द्रं शवसानं बलमाचरन्तं अभीर्वं अभीरुं ईशानं सर्वस्य स्वामिनं ॥ ६ ॥

अथ सप्तमी–

तस्मिन्हिसन्त्यूतयोविश्वाअभीरवःसचा ।
तमावहन्तुसप्तयःपुरूवसुंमदायहरयःसुतम् ॥ ७ ॥

तस्मि॑न् । हि । सन्ति॑ । ऊ॒तयः॑ । विश्वाः॑ । अभी॑रवः । सचा॑ ।
तम् । आ । व॒ह॒न्तु॒ । सप्त॑यः । पु॒रु॒ऽवसु॑म् । मदा॑य ।
हर॑यः । सु॒तम् ॥ ७ ॥

तस्मिन्निन्द्रे ऊतयोगंत्र्यो विश्वाः सर्वा अभीरवोकातराः सचा सहायभूता मरुद्रूपाः सेनाः सन्ति भवन्ति अथवा तस्मिन्सर्वारक्षणाः सह संभवन्ति तमिन्द्रं सप्तयः सर्पणशीला-हरयोश्वाः पुरूवसुं बहुधनं बहुधनमदमित्यर्थः सं मदाय सुतमभिषुतसोमं मत्यावहन्तु आग-मयन्तु ॥ ७ ॥

अथाष्टमी—

यस्ते॒मदो॒वरे॑ण्यो॒यइ॑न्द्रवृत्र॒हन्त॑मः ।
यआ॑द॒दिः स्व१॒र्नृभि॒र्यः पृत॑नासुदु॒ष्टरः॑ ॥ ८ ॥

यः । ते॒ । मदः॑ । वरे॑ण्यः । यः । इ॒न्द्र॒ । वृ॒त्र॒हन्ऽत॑मः । यः ।
आ॒ऽद॒दिः । स्वः॑ । नृऽभिः॑ । यः । पृत॑नासु । दु॒स्तरः॑ ॥ ८ ॥

पूर्वमन्त्रे मदाय हरय इत्युक्तम् समदः स्तूयते । हे इन्द्र ते तव योमदो वरेण्यो वरणीयः यश्च मदः संग्रामे वृत्रहन्तमः शत्रूणामतिशयेन हन्ता यश्चाददिरादाता स्वः सु अरणं धनं नृ-भिर्नृभ्यः शत्रुभ्यः यश्च पृतनासु संग्रामेषु दुष्टरोनभिभाव्यस्तस्मै मदाय हरयो वहन्त्वि-ति ॥ ८ ॥

अथ नवमी—

योदु॒ष्टरो॑विश्ववारश्र॒वाय्यो॒वाजे॒ष्वस्ति॒तरु॒ता ।
सनः॑शविष्ठ॒सव॒नाव॑सोगहि॒गमे॒मगोम॑तिव्र॒जे ॥ ९ ॥

यः । दु॒स्तरः॑ । वि॒श्व॒ऽवा॒र॒ । श्र॒वाय्यः॑ । वाजे॑षु । अस्ति॑ ।
त॒रु॒ता । सः । नः॒ । श॒वि॒ष्ठ॒ । सव॑ना । आ । व॒सो॒ इति॑ ।
ग॒हि॒ । ग॒मेम॑ । गोऽम॑ति । व्र॒जे ॥ ९ ॥

हे विश्ववार विश्वैर्वरणीयेन्द्र वाजेषु युद्धेषु यस्त्वद्दुष्टरो दुःखेनतरीतुंशक्यः तरुता शत्रूणां तारकोस्ति भवति। हे वसो वासक हे शविष्ठातिशयेनबलवन्निन्द्र सत्वं नः अस्माकं सवना सवनानि आगहि आगच्छ। वयंच गोमति व्रजे गोमन्तं व्रजं गमेम गच्छेम ॥ ९ ॥

अथ दशमी--

गव्योषुणोयथापुराश्वयोतरथया।
वरिवस्यमहामह ॥ १० ॥ २ ॥

गव्यो इति। सु। नः। यथा। पुरा। अश्वऽया। उत।
रथऽया। वरिवस्य। महाऽमह ॥ १० ॥ २ ॥

हे महामह महाधनेन्द्र *गव्या। गव्या उ इति निपातोऽनिपातद्वयसमुदायस्य आदिवद्भावेन निपातवद्भावात्प्रकृतिभावः।* अस्माकं गवामिच्छया अस्माकं गादातुं यथा पुरा पूर्वं यथास्माकं गवादिदानाय वरिवस्यसि तद्वद्यापि सु सुष्ठु वरिवस्य परिचर आगच्छेत्यर्थः। न केवलं गवेच्छया किंतु अश्वया अश्वप्रदानेच्छया उतापिच रथया रथेच्छयाच वरिवस्येति ॥ १० ॥

॥ इति षष्ठस्य चतुर्थे द्वितीयोवर्गः ॥ २ ॥

अथैकादशी--

नहितेशूरराधसोन्तंविन्दामिसत्रा।
दशस्यानोमघवन्नूचिदद्रिवोधियोवाजेभिराविथ ॥ ११॥

नहि। ते। शूर। राधसः। अन्तम्। विन्दामि। सत्रा।
दशस्य। नः। मघऽवन्। नु। चित्। अद्रिऽवः।
धियः। वाजेभिः। आविथ ॥ ११ ॥

हे शूर विक्रान्तेन्द्र ते तव राधसो धनस्यान्तं इयत्तां सत्रा सत्यं नहि विन्दामि न लभे। यस्मादेवं तस्मात् हे मघवन् धनवन् हे अद्रिवो वज्रवन्निन्द्र नोस्माकं नूचित् क्षिप्रमेव दशस्य देहि तद्धनं। किञ्च वाजेभिर्वाजैरन्नैर्धियोस्मदीयानि कर्माण्याविथ रक्ष ॥ ११ ॥

अथ द्वादशी–

यऋष्वःश्रावयत्सखाविश्वेत्सवेदजनिमापुरुष्टुतः ।
तंविश्वेमानुषायुगेन्द्रंहवन्तेतविषंयतस्रुचः ॥ १२ ॥

यः । ऋष्वः । श्रवयत्ऽसखा । विश्वा । इत् । सः । वेद । जनिम ।
पुरुऽस्तुतः । तम् । विश्वे । मानुषा । युगा । इन्द्रम् ।
हवन्ते । तविषम् । यतऽस्रुचः ॥ १२ ॥

यइन्द्रः ऋष्वोदर्शनीयः श्रावयत्सखा श्रावयन्तः सखायऋत्विजो यस्य सवादृशः श्रावयत्सखा पुरुष्टुतो बहुभिर्यजमानैःस्तुतो यइन्द्रः सविश्वेत् सर्वाण्यपि जनिम जन्मानि प्राणिनां वेद जानाति तं तविषं यतस्रुचस्तमिन्द्रं विश्वे सर्वेपि अध्वर्य्वादयो यतस्रुचः स्वीकृतहविष्काः सन्तो मानुषा मनुष्यसंबन्धिनो युगा युगानि कालान् सर्वेषुकालेषु हवन्ते आह्वयन्ति स्तुवन्ति ॥ १२ ॥

अथ त्रयोदशी–

सनोवाजेष्ववितापुरुवसुःपुरःस्थातामघवावृत्रहाभुवत्॥१३॥

सः । नः । वाजेषु । अविता । पुरुऽवसुः । पुरःऽस्थाता ।
मघऽवा । वृत्रऽहा । भुवत् ॥ १३ ॥

एषा द्विपदा जगती । सपुरुवसुर्बहुधनो मघवा धनवान् वृत्रहा शत्रूणां हन्तेन्द्रो नोस्माकं वाजेषु सङ्ग्रामेषु अविता रक्षिता पुरःस्थाता तदर्थं पुरतोवर्तमानो भुवद्भवतु ॥ १३ ॥

अथ चतुर्दशी–

अभिवोवीरमन्धसोमदेषुगायगिरामहाविचेतसम् ।
इन्द्रंनामश्रुत्यंशाकिनंवचोयथा ॥ १४ ॥

अभि । वः । वीरम् । अन्धसः । मदेषु । गाय । गिरा । महा ।
विऽचेतसम् । इन्द्रम् । नाम । श्रुत्यम् । शाकिनम् ।
वचः । यथा ॥ १४ ॥

हे उद्गात्रादयो योयूयमित्यर्थः। अथवा हे यजमानाः वोयुष्माकं हिताय अन्धसः सोमस्य मदेषु उत्पाद्यमानेषु सत्सु वीरं शत्रूणामीरयितारं नाम शत्रूणां नामकं विचेतसं विशिष्टप्रज्ञं श्रुत्यं सर्वत्रश्रोतव्यं शाकिनं शक्तं ईदृशमिन्द्रं मह्ना महत्या गिरा स्तुत्या वचो वाग्युष्मदीया यथा येनप्रकारेण प्रवर्तते गायत्र्यादिछन्दोभावा तथा अभिगाय गायत स्तुतिं कुरुत ॥१४॥

अथ पंचदशी—

दुदीरेक्णस्तन्वेददिर्वसुंददिर्वाजेषुपुरुहूतवाजिनम्। नूनमर्थ ॥१५॥३॥

दुदिः। रेक्णः। तन्वे। दुदिः। वसुं। दुदिः। वाजेषु। पुरुऽहूत। वाजिनम्। नूनम्। अर्थ ॥ १५ ॥ ३ ॥

हे पुरुहूत बहुभिराहूतेन्द्र त्वं तन्वे मर्त्यं शरीराय रेक्णोधनं ददिर्दाताभव। कदेत्युच्यते नूनं क्षिप्रमथेदानीमेव एवं प्रतिवाक्यं योज्यम्। तथा वसु धनं पुत्रादिभ्यो ददिर्दाताभव तथा वाजेषु संग्रामेषु वाजिनमन्नवन्तं रयिं ददिर्दाताभवेति। अत्रसर्वेष्वपि वाक्येषु ददिरित्यस्य लिङ्गाभावान्नलोकाव्ययेति षष्ठीप्रतिषेधः ॥ १५ ॥

॥ इति षष्ठस्य चतुर्थे तृतीयोवर्गः ॥३॥

अथ षोडशी—

विश्वेषामिरज्यन्तंवसूनांसासह्वांसंचिदस्यवर्पसः।
कृपयतोनूनमत्यथ ॥ १६ ॥

विश्वेषाम्। इरज्यन्तम्। वसूनाम्। ससह्वांसम्। चित्। अस्य। वर्पसः। कृपऽयतः। नूनम्। अति। अर्थ ॥ १६ ॥

हे इन्द्र त्वां विश्वेषां सर्वेषां वसूनां धनानामिरज्यन्तं ईशानं अस्य वर्पसः वारकस्य कृपयतो युद्धं कल्पयतः शत्रोः सासह्वांसं अभिभवितारं स्तुवन्तइतिशेषः। सत्वं नूनं क्षिप्रं अथातिचित् इदानीमपि धनं प्रयच्छेत्यर्थः ॥ १६ ॥

अथ सप्तदशी—

महःसुवोअरमिषेस्तवामहेमीळ्हुषेअरङ्गमायजग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषांमरुतामियक्षसिगायेत्वानमसागिरा॥१७॥

महः । सु । वः । अरम् । इषे । स्तवामहे । मीळ्हुषे ।
अरम्ऽगमाय । जग्मये । यज्ञेभिः । गीःऽभिः । विश्वऽमनुषाम् ।
मरुताम् । इयक्षसि । गाये । त्वा । नमसा । गिरा ॥ १७ ॥

हे इन्द्र महो महतो वः तवेत्यर्थः व्यत्ययेन बहुवचनं अरंगमनमस्माद्विषयं इषे इच्छामि अर्तेररमितिरूपम् । तदर्थं मीळ्हुषे सेक्त्रे अरंगमाय अरंगमनाय संपूर्णगमनाय जग्मये गमनशीलाय यज्ञं प्रति एवंभूताय देवाय सुष्ठु स्तवामहे त्वां स्तुमइत्यर्थः।केन साधनेनेति तदुच्यते—यज्ञेभिर्यजमानसाधनैर्हविर्भिर्यज्ञैरेववा गीर्भिः स्तुतिभिः हे देव विश्वमनुषां विश्वेषां मनुष्याणां मरुतां इयक्षसि एवैरिज्यसे मरुतां संबन्धी त्वं । किञ्च त्वा त्वां नमसा नमस्कारेण गिरा स्तुत्याच गाये स्तुवे ॥ १७ ॥

अथाष्टादशी—

येपातयन्तेअज्मभिर्गिरीणांस्नुभिरेषाम् ।
यज्ञंमहिष्वणीनांसुम्नंतुविष्वणीनांप्राध्वरे ॥ १८ ॥

ये । पातयन्ते । अज्मऽभिः । गिरीणाम् । स्नुऽभिः । एषाम् ।
यज्ञम् । महिऽस्वनीनाम् । सुम्नम् । तुविऽस्वनीनाम् । प्र । अध्वरे ॥ १८ ॥

ये मरुतो गिरीणां मेघानां स्नुभिः प्रस्रवद्भिः अज्मभिः बलैर्बलकरैरुदकैः सह पातयन्ते पतन्ति गच्छन्ति । एषां मरुतां महिष्वणीनां प्रभूतध्वनीनां यज्ञं कुर्मइतिशेषः।कस्माच तुविष्वणीनां बहुध्वनीनां सुम्नं सुखं तैःकृतं अध्वरे यज्ञे प्र प्राप्नुयाम। अथवा चतुर्थ्यर्थेषष्ठी प्रभूतस्वनेभ्यः सुम्नं उक्तलक्षणं हविः प्र प्रापयामाध्वरे यज्ञे ॥ १८ ॥

अथैकोनविंशी—

प्रभृन्दुर्मतीनामिन्द्रंशविष्ठाभर ।
रयिमस्मभ्यंयुज्यंचोदयन्मतेज्येष्ठंचोदयन्मते ॥ १९ ॥

प्रऽभङ्गम् । दुःऽमतीनाम् । इन्द्र । शविष्ठ । आ । भर । रयिम् ।
अस्मभ्यम् । युज्यम् । चोदयत्ऽमते । ज्येष्ठम् । चोदयत्ऽमते ॥१९॥

दुर्मतीनां दुष्टमनस्कानां वृत्रादीनां प्रभङ्गं प्रकर्षेण भञ्जकं त्वां याचामहइतिशेषः। हे इन्द्र शविष्ठातिशयेनबलवन् स्तुतस्त्वमस्मभ्यं रयिं धनं युज्यं योग्यमस्माकमुचितं धनमाभराहर। हे चोदयन्मते चोदयन्ती धनं प्रेरयन्तीमतिर्यस्य सतथोक्तः हे तादृशदेव किञ्च हे चोदयन्मते उक्तार्थं ज्येष्ठं धनमाभर ॥ १९ ॥

अथ विंशी—

सनितःसुसनितरुग्रचित्रचेतिष्ठसूनृत ।
प्रासहासम्राट्सहुरिंसहन्तंभुज्युंवाजेषुपूर्व्यम् ॥ २० ॥४॥

सनितरिति । सुऽसनितः । उग्र । चित्र । चेतिष्ठ । सूनृत । प्रऽसहा ।
सम्ऽराट् । सहुरिम् । सहन्तम् । भुज्युम् ।
वाजेषु । पूर्व्यम् ॥ २० ॥ ४ ॥

हे सनितः संभक्तः सुसनितः दातर्वा उग्र उद्गूर्णबल चित्र चायनीय चेतिष्ठातयन्तं चेतयितः सूनृत सुसत्य प्रासहा प्रसह हे सम्राट् सर्वस्य स्वामिन् सम्यग्राजमान वा त्वं सहुरिं सहनशीलं सहन्तं भुज्युं भोजयितारं पूर्व्यं प्रवृद्धं मुख्यमित्यर्थः। ईदृशं धनं वाजेषु संग्रामेषु आभरेतिशेषः ॥ २० ॥

॥ इति षष्ठस्य चतुर्थे चतुर्थोवर्गः ॥ ४ ॥

अथैकविंशी—

आसएतुयईवदाँअदेवःपूर्तमाददे ।
यथाचिद्वशोअश्व्यःपृथुश्रवसिकानीतेऽस्याव्युष्याददे ॥२१॥

आ । सः । एतु । यः । ईवत् । आ । अदेवः । पूर्तम् ।
आऽददे । यथा । चित् । वशः । अश्व्यः । पृथुऽश्रवसि ।
कानीते । अस्याः । विऽउषि । आऽददे ॥ २१ ॥

अत्रशौनकः—वशायाश्व्याययत्मादात्कानीतस्तुपृथुश्रवाः । तदत्रस्तूयतेदानमासएत्वेवमादिभिः ॥ १ ॥ ऐतु आगच्छतु सः यः अदेवः देवादन्यो मनुष्यो वशाईवत गमनवत् गवादिलक्षणं पूर्तं पूर्णं आददे आदत्ते स्वीकृतवानित्यर्थः । देवश्चेन्मायपाप्यागन्तुमर्हति अतः मत्काशे नैवागच्छत्वित्यर्थः । कथमस्याधनावाप्तिप्रसङ्ग आगमनप्रसङ्गश्चेति । तदुच्यते—यथाचित् चिदितिपूरणः येन कारणेन यस्माद्वा वश एतत्संज्ञकः अश्व्यः अश्वपुत्रः पृथुश्रवसि एतन्नामकेरात्ति कानीते कानीतपुत्रे कन्यायाः पुत्रे अस्या उषसो व्युषि व्युष्टौ आददे आदत्ते तेन प्रकारेण न तस्माद्वा कारणादायात्विति एवमश्वो बन्धुवर्गेवाब्रूते ॥ २१ ॥

अथ द्वाविंशी—

षुष्टिंसुहस्राश्व्यस्यायुतासनमुष्ट्रानांविंशतिंशता ।
दशश्यावीनांशतादशत्र्यरुषीणांदशगवांसुहस्रा ॥ २२ ॥

षुष्टिम् । सुहस्रा । अश्व्यस्य । अयुता । असनम् ।
उष्ट्रानाम् । विंशतिम् । शता । दश । श्यावीनाम् । शता । दश ।
त्रिऽअरुषीणाम् । दश । गवाम् । सुहस्रा ॥ २२ ॥

सवश आगत्यब्रूते अश्व्यस्याश्वसम्बन्धिनः षष्टिं सहस्रा सहस्राणि अयुता अयुतानि वासनमभजं उष्ट्राणां विंशतिं शता शतानि चासनं श्यावीनां श्याववर्णानां वडवानां दशशता शतानि चासनम् त्र्यरुषीणां त्रीण्यारोचमानानि शुभ्राणि ककुपृष्ठपार्श्वादिस्थानानि यासां तादृशीनां गवां दशसहस्रा दशसहस्राण्यभजम् ॥ २२ ॥

अथ त्रयोविंशी—

दशश्यावाऋधद्रयोवीतवारासआशवः ।
मथ्रानेमिंनिवावृतुः ॥ २३ ॥

दश । श्यावाः । ऋधत्ऽरयः । वीतऽवारासः ।
आशवः । मथ्राः । नेमिम् । नि । वुवृतुः ॥ २३ ॥

दश दशसंख्याकाः श्यावाः श्याववर्णाः आशवोश्वाः नेमिं रथनेमिं निवावृतुः निवर्तयन्ति रथंवहन्तीत्यर्थः। कीदृशास्ते क्षधद्रयः मवृद्धवेगाः वीतवारासः कान्तवलाः प्राप्तवलावा आशवः मन्नाः मथनशीलाः॥ २३ ॥

अथ चतुर्विंशी—

दानासःपृथुश्रवसःकानीतस्यसुराधसः।
रथंहिरण्ययंददन्मंहिष्ठःसूरिरभूद्वर्षिष्ठमकृतश्रवः॥ २४ ॥

दानासः। पृथुऽश्रवसः। कानीतस्य। सुऽराधसः। रथम्।
हिरण्ययम्। ददत्। मंहिष्ठः। सूरिः। अभूत्। वर्षिष्ठम्।
अकृत। श्रवः। २४ ॥

पूर्वमन्त्रैः प्रतिपादितानि धनानि बंधूनां पितुर्वा पुरस्तान्निर्दिशन्नाशास्ते। पृथुश्रवसः कानीतस्य सुराधसः शोभनधनस्य यतस्तस्य धनं दानाय कल्पितं अतः ससुराधाः तस्य दानासोदानाः दत्तानि धनानीमानि सच पृथुश्रवाः पूर्वमुक्तानि हिरण्ययं हिरण्मयं रथञ्च ददत् प्रयच्छन् मंहिष्ठोतिशयेन दाता सूरिः सर्वस्य प्रेरकः प्राज्ञोवा भूत् भवति भवतु वा। वर्षिष्ठं अतिशयेन प्रवृद्धं श्रवः कीर्तिमकृत करोति करोतु वा॥ २४ ॥

आनोवायविन्येषा पञ्चमेहनि प्रउगशस्त्रे वायव्येतृचे तृतीया। आनोवायोमहेतनइत्येका रथेनपृथुपाजसेतिहि सूत्रितम्। तत्पाठस्तु—

अथ पञ्चविंशी—

आनोवायोमहेतनेयाहिमखायपाजसे।
वयंहितेचकृमाभूरिदावनेसद्यश्चिन्महिदावने॥ २५॥५॥

आ। नः। वायो इति। महे। तने। याहि। मखाय।
पाजसे। वयम्। हि। ते। चकृम। भूरि। दावने।
सद्यः। चित्। महि। दावने॥ २५॥ ५॥

हे वायो त्वं नोस्मान्मत्यायाह्यागच्छ । किमर्थं महे महते वने धनाय मखाय महनीयाय पाजसे बलाय च उभयं मदातुमित्यर्थः । किमत्रास्तीति चेदुच्यते वयं हि वयं खलु ते भूरिदावने प्रभूतधनदात्रे चकृम स्तुतिं हविर्वा सद्यश्चित्तदानीमेव तवागमनानन्तरमेव चकृम।महि-महतो धनस्य दावने दात्रे ॥ २५ ॥

॥ इति चतुर्थस्य चतुर्थे पञ्चमोवर्गः ॥ ५ ॥

अथ षड्विंशी–

योअश्वेभिर्वहतेवस्तउस्रास्त्रिःसप्तसप्ततीनाम् ।
एभिःसोमेभिःसोमसुद्भिःसोमपादानायशुक्रपूतपाः॥२६॥

यः । अश्वेभिः । वहते । वस्ते । उस्राः । त्रिः । सप्त । सप्ततीनाम् ।
एभिः । सोमेभिः । सोमसुत्ऽभिः । सोमऽपाः ।
दानाय । शुक्रपूतऽपाः ॥ २६ ॥

यः पृथुश्रवा अश्वेभिरश्वैर्वहते गृहं वस्ते वसति चोस्रागाः ताभिश्च गच्छतीत्यर्थः । त्रिः सप्तेति तासां गवां संख्योक्तास ।सा संख्या विशेष्यते सप्ततीनां त्रिःसप्त उक्तसंख्याकाभिर्गोभिरश्वैश्च योगच्छति सपृथुश्रवाः एभिः सोमेभिः सोमैः सोमसुद्भिः सोममभिषुण्वद्भिश्च हेसोमपाः सोमस्यपातरिति वायोः संबोधनं हे शुक्रपूतपाः दीप्तपूतस्यच सोमस्य पातर्वायो दानाय तुभ्यं सोमं दातुं सोमैर्युक्तो भवतीतिशेषः ॥ २६ ॥

अथ सप्तविंशी–

योमइमंचिदुत्मनामन्दच्चित्रंदावने ।
अरट्वेअक्षेनहुषेसुकृत्वनिसुकृत्तरायसुक्रतुः ॥ २७ ॥

यः । मे । इमम् । चित् । ऊँ इति त्मना । अमन्दत् ।
चित्रम् । दावने । अरट्वे । अक्षे । नहुषे । सुऽकृत्वनि ।
सुकृत्ऽतराय । सुऽक्रतुः ॥ २७ ॥

यः पृथुश्रवाः मे मह्यं इमं पुरतोवर्तमानं चित्रं चायनीयं गवाश्वादिकं दावने दानाय त्मना आत्मना स्वबुध्यैव अमदद् अमंदत अमायत। सच सुक्रतुः शोभनकर्मा राजा सुकृत्तराय सुकृतकर्तृत्वाय अरट्वे अक्षे नहुषे सुकृत्वनिच एते तस्य राज्ञोध्यक्षाः तेष्वन्वशात् अस्मै गवादिकान्संयोजयतेति। यद्वा अरट्वादयोन्येराजानः तेषु मध्ये सुकृत्तरायामन्ददिति ॥ २७ ॥

अथाष्टाविंशी–

उचथ्ये३वपुंषियःस्वराळुतवायोघृतस्नाः।
अश्वेषितंरजेषितंशुनेषितंप्राज्मतदिदंनुतत् ॥ २८ ॥

उचथ्ये। वपुंषि। यः। स्वऽराट्। उत। वायो इति। घृतऽस्नाः।
अश्वंऽइषितम्। रजःऽइषितम्। शुनांऽइषितम्। प्र।
अज्म। तत्। इदम्। नु। तत् ॥ २८ ॥

उचथ्ये वक्तव्ये स्तुत्ये वपुषि शरीरे यः स्वराट् स्वयं राजते यद्वा उचथ्यो वपुश्चोभौ राजानौ तयोरपि यः स्वराट् स्वाराज्यं करोति अतिशयेन वर्तते। उतापिच हे वायो यश्च घृतस्नाः घृतवच्छुद्धः सराजा अश्वेषितं अश्वैःप्रापितं। रजेषितं रजःशब्देनोष्ट्रो गर्दभोवोच्यते। तेनाप्यानीतं शुनेषितंचाज्मानं प्रादात् तदन्नमश्वाद्यानीतं इदं पुरतो दृश्यते तत् तवैवानुग्रहादित्यर्थः। अथवैकस्तच्छब्दः पूरणः अश्वाद्यानीतं यदस्ति तदिदं खल्विति ॥ २८ ॥

अथैकोनत्रिंशी–

अधंप्रियमिषिरायषष्टिंसहस्रासनम्। अश्वानामिन्नवृष्णाम् ॥ २९ ॥

अर्ध। प्रियम्। इषिरायं। पष्टिम्। सहस्रा। असनम्।
अश्वानाम्। इत्। न। वृष्णाम् ॥ २९ ॥

अधाधुना इषिराय धनादिप्रेरयित्रे राज्ञे प्रियं श्रद्धेयं अश्वानामिन्न अश्वानामिव वृष्णां सेक्तृणां गवां सहस्रा सहस्राणां षष्टिं षष्टिसहस्रसंख्याकं प्रियभूतं असनं अभजम् ॥ २९ ॥

अथ त्रिंशी–

गावोनयूथमुपयंतिवध्रयउपमायन्तिवध्रयः ॥ ३० ॥

गावः । न । यूथम् । उप । यन्ति । वध्रयः । उप ।
मा । आ । यन्ति । वध्रयः ॥ ३० ॥

गावोन गावइव ता यथा संगवेयूथमुपयन्ति उपगच्छन्तितद्वद्वध्रयः छिन्नमुष्काः वृषभाः पृथुश्रवसा दत्ताः मा मामुपयन्ति समीपं प्राप्नुवन्ति । मा मां वध्रय उपायन्तीति पुनरुक्तिरादरार्थां ॥ ३० ॥

अथैकत्रिंशी—

अधयच्चारथेगणेशतमुष्ट्राँअचिक्रदत् ।
अधश्वित्नेषुविंशतिंशता ॥ ३१ ॥

अध । यत् । चारथे । गणे । शतम् । उष्ट्रान् । अचिक्रदत् ।
अध । श्वित्नेषु । विंशतिम् । शता ॥ ३१ ॥

अधाथ यद्यदा चारथे चरथं चरणं गमनं तत्संबन्धिनि चार्यमाणे वनाय चार्यमाणइत्यर्थः तादृशे गणे उष्ट्रसंघे उष्ट्रान् शतं उष्ट्राणां शतं अचिक्रदत् अस्मभ्यं प्रदानाय जुहाव । अधापि-चास्मदर्थमेव श्वित्नेषु श्वेतवर्णेषु गोयूथेषु विंशतिं शता च शतानि च अथवा शतानां विंशतिं अचिक्रदत् ॥ ३१ ॥

अथ द्वात्रिंशी—

शतंदासेबल्बूथेविप्रस्तरुक्षआददे ।
तेतेवायविमेजनामदन्तीन्द्रगोपामदन्तिदेवगोपाः ॥ ३२॥

शतम् । दासे । बल्बूथे । विप्रः । तरुक्षे । आ । ददे ।
ते । ते । वायो इति । इमे । जनाः । मदन्ति ।
इन्द्रऽगोपाः । मदन्ति । देवऽगोपाः ॥ ३२ ॥

अयं विप्रोमेधावी वशो जनोहं बल्बूथे एतन्नामके दासे तरुक्षे गवाश्वादीनां तारके गवाद्यधिकृते राज्ञास्माकं प्रदिष्टधनदातरि आददे । किं दानं गवाश्वादीनां शतं शतशब्दोपरिमितवचनः हे वायो ते तव स्वभूताः ते स्तोतारः इमे जनावयमित्यर्थः आत्मनएव परोक्षत्वेन वादः त्वयानुगृहीतत्वादिन्द्रगोपा इन्द्रो गोपायिता येषां ते तथोक्ताः इन्द्रेण रक्षिता मदन्ति तथा देवगोपा मदन्ति इन्द्रं देवांश्च राज्ञोलब्धेन धनेन यजन्तो मदन्तीत्यर्थः ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

अधस्यायोर्पणामुहीर्प्रतीचीवर्शमश्व्यम् ।
अधिरुक्माविनीयते ॥ ३३ ॥ ६ ॥

अधं । स्या । योर्षणा । मुही । प्रतीचीं । वर्शम् । अश्व्यम् ।
अधिऽरुक्मा । वि । नीयते ॥ ३३ ॥ ६ ॥

अथाधुना स्या सा योषणा योषा राज्ञा मदत्ता मही महती पूज्या मतीची अस्मदभिमुखी अश्व्यमश्वपुत्रं वशं मां मति सा अधिरुक्माभरणा सती विनीयते तां कन्यां मां मत्यानयन्तीत्यर्थः । अत्र वायव्यास्वृक्षु यत्र वायुर्नस्तूयते परं दानप्रशंसैव तासु सर्वासु हे वायो त्वदनुग्रहादेवमितियोज्य वायुपरत्वमवगन्तव्यम् ॥ ३३ ॥

॥ इति पञ्चस्य चतुर्थे षष्ठोवर्गः ॥ ६ ॥

महिवइत्यष्टादशर्चं पञ्चमं सूक्तं आप्त्यस्य त्रितस्यार्षं षडष्टकामहापङ्क्तिश्छन्दः आद्यास्त्रयोदशर्चः आदित्यदेवताकाः यच्चगोष्वित्याद्याः पञ्चर्चं उषोदेवताकाः आदित्यदेवताकाश्च । तथाचानुक्रमणिका—महिवोष्टोना त्रितआप्त्यआदित्येभ्योन्त्याः पञ्चोषसेपि महापाङ्क्तमिति । सूक्तविनियोगोलैङ्गिकः ।

तत्र प्रथमा—

महिवोमहृतामवोवरुणमित्रदाशुषे ।
यमादित्याअभिद्रुहोरक्षथानेमघंनशदनेहसो
वऊतयःसुऊतयोवऊतयः ॥ १ ॥

महिं । वुः । मुहुताम् । अर्वः । वरुण । मित्रं । दाशुषे । यम् ।
आदित्याः । अभि । द्रुहः । रक्षथ । न । ईम् । अघम् । नुशत् ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १ ॥

हे वरुण हे मित्र एतद्द्वयमर्यम्णोप्युपलक्षणं हे वरुणादयो महत्वां वो युष्माकं अवः रक्षणं महि महत् कस्मै दाशुषे हविर्दात्रे यजमानाय क्रियमाणं। किञ्च हे आदित्याः यं यजमानं द्रुहो द्रोग्धुः सकाशादभिरक्षथ ईमेनं यजमानं अघं पापं ननशत् नमाप्नोति।कुतएवमिति तत्रोच्यते–वो युष्माकमूतयो रक्षणानि अनेहसः अपापानि अनुपद्रवाणिच ऊतयो वो युष्माकं रक्षणानि सऊतयः शोभनलक्षणानि। पुनरुक्तिरादरार्था ॥ १ ॥

अथ द्वितीया–

विदादेवाअघानामादित्यासोअपाकृतिम् ।
पक्षावयोयथोपरिव्य१स्मेशर्मयच्छतानेहसोवऊतयः
सुऊतयोवऊतयः ॥ २ ॥

विद । देवाः । अघानाम् । आदित्यासः । अपऽआकृतिम् । पक्षा ।
वयः । यथा । उपरि । वि । अस्मे इति । शर्म । यच्छत ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ २ ॥

हे देवा आदित्यास आदित्याः यूयं अघानां दुःखानामपाकृतिमपाकरणं परिहारप्रकारं विद जानीथ। यस्मादेवं तस्माद्वयः पक्षिणः यथा पक्षा स्वपक्षौ उपरि स्वशिशुकानामुपरि कुर्वन्ति सुखाय तद्वदस्मे अधि अस्मासु शर्म सुखं यच्छत कुरुत। अधीति सप्तम्यर्थानुवादी। अस्मे अस्माकमुपरीतिवा ॥ २ ॥

अथ तृतीया–

व्य१स्मेअधिशर्मतत्पक्षावयोनयन्तन ।
विश्वानिविश्ववेदसोवरूथ्यामनामहेनेहसोवऊतयःसुऊतयोवऊतयः॥३॥

वि । अस्मे इति । अधि । शर्म । तत् । पक्षा । वयः । न । यन्तन ।
विश्वानि । विश्वऽवेदसः । वरूथ्या । मनामहे । अनेहसः । वः ।
ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ३ ॥

हे आदित्या यूयं अस्मे अधि अस्मासु तव युष्मास्वेवासाधारणं यच्छर्मास्ति तदित्यर्थः। तव पक्षेण पक्षा पक्षिणः शिशुकानां पक्षोपरि यथा तथा वियन्तन विशेषेण मापयत हे विश्ववेदसः सर्वधना युष्मान्विश्वानि सर्वाणि वरूथ्या वरूथं गृहं तदुचितानि धनानि मनामहे याचामहे ॥ ३ ॥

अथ चतुर्थी–

यस्मा अरासत क्षयं जीवातुं च प्रचेतसः। मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ४ ॥

यस्मै। अरासत। क्षयम्। जीवातुम्। च। प्रऽचेतसः। मनोः। विश्वस्य। घ। इत्। इमे। आदित्याः। रायः। ईशते। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः ॥ ४ ॥

यस्मै मनुष्याय क्षयं निवासं जीवातुं जीवनसाधनमन्नञ्च प्रचेतसः प्रकृष्टमतयः अरासत प्रयच्छन्ति तस्मै यजमानाय तदर्थं इमे आदित्याः विश्वस्य घेत् सर्वस्याप्ययमुर्मनोर्मनुष्यस्य धनिकस्य रायो धनस्य ईशते स्वामिनो भवन्त्यपहृत्य यजमानाय प्रदातुम् ॥ ४ ॥

अथ पञ्चमी–

परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा। स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ५ ॥ ७॥

परि। नः। वृणजन्। अघा। दुःऽगानि। रथ्यः। यथा। स्याम। इत्। इन्द्रस्य। शर्मणि। आदित्यानाम्। उत। अवसि। अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः ॥ ५ ॥ ७ ॥

परिवृणजन् परिवर्जयन्तु नोस्माकं अघा अघानि पापानि। तत्र दृष्टान्तः–दुर्गाणि दुर्गमनान् प्रदेशान् अवटधिष्ण्यादिकान् यथा रथ्यः रथस्य वोढारोश्वाः परिवर्जयन्ति तद्वत् इन्द्रस्य शर्मणि स्याम भवेम वयं उतापिच आदित्यानामवसि रक्षणेच स्याम ॥ ५ ॥

॥ इति पष्ठस्य चतुर्थे सप्तमोवर्गः ॥ ७ ॥

अथ षष्ठी–

परिह्वृतेदनाजनोयुष्मादत्तस्यवायति ।
देवाअदभ्रमाशवोयमादित्याअहेतना
नेहसोवऊतयःसुऊतयोवऊतयः ॥ ६ ॥

परिऽह्वृता । इत् । अना । जनः । युष्माऽदत्तस्य । वायति । देवाः ।
अदभ्रम् । आशवः । यम् । आदित्याः । अहेतन । अनेहसः ।
वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ६ ॥

परिह्वृतेत् परिपीडितैनैव तपोनियमादिना अना शकटेनयुक्तो जनो युष्मादत्तस्य युष्माभिर्दत्तंधनं कर्मनिष्पष्टी वायति गच्छति । हे देवाः हे आदित्याः हे आशवः शीघ्रगमनायूयं यं यजमानं अहेतन प्राप्नुथः सजनो दभ्रमनल्पं धनं वायति प्राप्नोतीति संबन्धः ॥ ६ ॥

अथ सप्तमी–

नतंतिग्मंचनत्यजोनद्रासदभितंगुरु ।
यस्माउशर्मसप्रथआदित्यासोअराध्व
मनेहसोवऊतयःसुऊतयोवऊतयः ॥ ७ ॥

न । तम् । तिग्मम् । चन । त्यजः । न । द्रासत् । अभि । तम् । गुरु ।
यस्मै । ऊँ इति । शर्म । सऽप्रथः । आदित्यासः । अराध्वम् ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ७ ॥

तं मनुष्यं तिग्मं चन तीक्ष्णमेव सन्तं त्यजः क्रोधनामैतत् अत्र क्रोधात्मयुज्यमानमायुधमुच्यते न द्रासत् द्रा कुत्सायां गतौ कुत्सितं नागच्छति नहिनस्तीत्यर्थः । तथा तं जनं गुरु प्रवृद्धं अपरिहारार्हं दुःखं न द्रासत न गच्छति । हे आदित्यासः आदित्याः सप्रथः समानप्रथनाः सर्वतः पृथुभूतावा यूयं यस्माउ यस्मै यजमानाय उशब्दः पूरणः शर्म सुखं अराध्वं अदत्त तं न द्रासदिति ॥ ७ ॥

अथाष्टमी–

युष्मेदे॑वाअपि॑ष्मसियुध्य॑न्तइववर्म॑सु ।
यूयंम॒होन॒एन॑सोयूयमर्भा॑दुरुष्यतानेह
सोवक्रुतय॑ःसुक्रुतयो॑वक्रुतय॑ः ॥ ८ ॥

युष्मे इति॑ । दे॒वा॒ः । अपि॑ । स्म॒सि॒ । युध्य॑न्तःऽइव । वर्म॑ऽसु ।
यू॒यम् । म॒हः । न॒ः । एन॑सः । यू॒यम् । अर्भा॑त् । उ॒रु॒ष्य॒त॒ ।
अ॒ने॒हस॑ः । व॒ः । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । व॒ः । ऊ॒तय॑ः ॥ ८ ॥

हे देवाः आदित्या युष्मे युष्मासु वयं अपिष्मसि अपि भवेम युष्माभिरपिहिताःस्मेत्यर्थः । तत्र दृष्टान्तः–युध्यन्तः इव शूरा वर्मसु कवचेषु यथा भवन्ति तद्वद् यूयं नोस्मान्महोमहतः एनसः पापाद् उरुष्यत रक्षत । तथा यूयं अस्मानर्भादल्पादप्येनस उरुष्यत ॥ ८ ॥

अथ नवमी–

अदि॑तिर्नउरुष्य॒त्वदि॑तिः॒शर्म॑यच्छतु ।
मातामि॒त्रस्य॑रे॒वतो॑र्य॒म्णोवरु॑णस्यचाने
ह॒सोवक्रुतय॑ःसुक्रुतयो॑वक्रुतय॑ः ॥ ९ ॥

अदि॑तिः । न॒ः । उ॒रु॒ष्य॒तु॒ । अदि॑तिः । शर्म॑ । य॒च्छ॒तु॒ ।
मा॒ता । मि॒त्रस्य॑ । रे॒वत॑ः । अ॒र्य॒म्णः । वरु॑णस्य ।
च॒ । अ॒ने॒हस॑ः । व॒ः । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । व॒ः । ऊ॒तय॑ः ॥ ९ ॥

नोस्मानदितिरखण्डनीया देवमाता उरुष्यतु रक्षतु तथा अदितिः शर्म सुखं यच्छतु । अदितिर्विशेष्यते या माता निर्मात्री कस्य मित्रस्य रेवतो धनवतोर्यम्णो वरुणस्यच । सा न उरुष्यत्विति ॥ ९ ॥

अथ दशमी–

यद्दे॑वाःशर्म॑शर॒णंयद्भ॒द्रंयद॑नातु॒रम् ।
त्रि॒धातु॒यद्व॑रू॒थ्यं१॑नद॒स्मासु॒वियं॑न्तनाने॒हसो
वक्रुतय॑ःसुक्रुतयो॑वक्रुतय॑ः ॥ १० ॥ ८ ॥

अथ षष्ठी–

परिह्वृतेदनाजनोयुष्मादत्तस्यवायति ।
देवाअदभ्रमाशवोयमादित्याअहेतना
नेहसोवऊतयःसुऊतयोवऊतयः ॥ ६ ॥

परिऽह्वृता । इत् । अना । जनः । युष्माऽदत्तस्य । वायति । देवाः ।
अदभ्रम् । आशवः । यम् । आदित्याः । अहेतन । अनेहसः ।
वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ६ ॥

परिह्वृतेत् परिपीडितैनैव तपोनियमादिना अना शकटेनयुक्तो जनो युष्मादत्तस्य युष्माभिर्दत्तधनं कर्मणिषष्ठी वायति गच्छति । हे देवाः हे आदित्याः हे आशवः शीघ्रगमना यूयं यं यजमानं अहेतन प्राप्नुथः सजनो दभ्रमनल्पं धनं वायति प्राप्नोतीति संबन्धः ॥ ६ ॥

अथ सप्तमी–

नतंतिग्मंचनत्यजोनद्रासदभितंगुरु ।
यस्माउशर्मसप्रथआदित्यासोअराध्व
मनेहसोवऊतयःसुऊतयोवऊतयः ॥ ७ ॥

न । तम् । तिग्मम् । चन । त्यजः । न । द्रासत् । अभि । तम् । गुरु ।
यस्मै । ऊँ इति । शर्म । सऽप्रथः । आदित्यासः । अराध्वम् ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ७ ॥

तं मनुष्यं तिग्मं चन तीक्ष्णमेव सन्तं त्यजः क्रोधनामैतत् अत्र क्रोधात्मयुज्यमानमायुधमुच्यते न द्रासत् द्रा कुत्सायां गतौ कुत्सितं नागच्छति नहिनस्तीत्यर्थः । तथा तं जनं गुरु प्रवृद्धं अपरिहारार्हं दुःखं न द्रासत् न गच्छति । हे आदित्यासः आदित्याः सप्रथः समानप्रथनाः सर्वतः पृथुभूतावा यूयं यस्माउ यस्मै यजमानाय उशब्दः पूरणः शर्म सुखं अराध्वं अदत्त तं न द्रासदिति ॥ ७ ॥

अथाष्टमी—

युष्मेदे॑वा॒अपि॑ष्मसि॒युध्य॑न्तइ॒व॒वर्म॑सु ।
यू॒यंम॒होन॒एन॑सोयू॒यमर्भा॑दुरुष्यतानेह
सो॑वऊ॒तय॑ःसुऊ॒तयो॑वऊ॒तय॑ः ॥ ८ ॥

युष्मे इति॑ । दे॒वाः॒ । अपि॑ । स्म॒सि॒ । यु॒ध्य॑न्तःऽइव । वर्म॑ऽसु ।
यू॒यम् । म॒हः । नः॒ । एन॑सः । यू॒यम् । अर्भा॑त् । उ॒रु॒ष्य॒त॒ ।
अ॒ने॒हस॑ः । वः॒ । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । वः॒ । ऊ॒तय॑ः ॥ ८ ॥

हे देवाः आदित्या युष्मे युष्मासु वयं अपिष्मसि अपि भवेम युष्माभिरपिहिताःस्मेत्यर्थः। तत्र दृष्टान्तः—युध्यन्तः इव शूरा वर्मसु कवचेषु यथा भवन्ति तद्वत् यूयं नोस्मान्महोमहतः एनसः पापात् उरुष्यत रक्षत । तथा यूयं अस्मानर्भादल्पादप्येनस उरुष्यत ॥ ८ ॥

अथ नवमी—

अदि॑तिर्न॒उरु॒ष्य॒त्वदि॑तिः॒शर्म॑यच्छतु ।
मा॒ता॒मि॒त्रस्य॑रे॒वतो॑र्य॒म्णोवरु॑णस्यचाने
ह॒सो॑वऊ॒तय॑ःसुऊ॒तयो॑वऊ॒तय॑ः ॥ ९ ॥

अदि॑तिः । नः॒ । उ॒रु॒ष्य॒तु॒ । अदि॑तिः । शर्म॑ । य॒च्छ॒तु॒ ।
मा॒ता । मि॒त्रस्य॑ । रे॒वत॑ः । अ॒र्य॒म्णः । वरु॑णस्य ।
च॒ । अ॒ने॒हस॑ः । वः॒ । ऊ॒तय॑ः । सु॒ऽऊ॒तय॑ः । वः॒ । ऊ॒तय॑ः ॥ ९ ॥

नोस्मानदितिरखण्डनीया देवमाता उरुष्यतु रक्षतु तथा अदितिः शर्म सुखं यच्छतु। अदितिर्विशेष्यते या माता निर्मात्री कस्य मित्रस्य रेवतो धनवतोर्यम्णो वरुणस्यच । सा न उरुष्यत्विति ॥ ९ ॥

अथ दशमी—

यद्दे॒वाः॒शर्म॑शर॒णंयद्भ॒द्रंयद॑ना॒तुरम् ।
त्रि॒धातु॒यद्व॑रू॒थ्यं१॒॑तद॒स्मासु॒वियं॑न्तनाने॒हसो॑
वऊ॒तय॑ःसुऊ॒तयो॑वऊ॒तय॑ः ॥ १० ॥ ८ ॥

यत्। देवाः। शर्म। शरणम्। यत्। भद्रम्। यत्। अनातुरम्।
त्रिऽधातु। यत्। वरूथ्यम्। तत्। अस्मासु। वि। यन्तन।
अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ १०॥ ८॥

हे देवा आदित्याः यच्छर्म सुखं शरणं शरणीयं यद्भद्रं सर्वैर्भजनीयं यदनातुरं रोगरहितं यत्त्रिधातु त्रिगुणं यद्वरूथ्यं वरूथं गृहं तदर्हं यदुक्तगुणकं शर्मास्मासु वियन्तन वियच्छत॥१०॥

॥ इति षष्ठस्य चतुर्थेऽष्टमोवर्गः॥ ८॥

अथैकादशी–

आदित्या अव हि ख्यताधि कूलादिव स्पशः।
सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेह
सो वऊतयः सुऊतयो वऊतयः॥ ११॥

आदित्याः। अव। हि। ख्यत। अधि। कूलात्ऽइव। स्पशः।
सुऽतीर्थम्। अर्वतः। यथा। अनु। नः। नेषथ। सुऽगम्।
अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः॥ ११॥

हे आदित्या यूयं अवहिख्यत अवहि पश्यताधस्तात्स्थितानस्मान्। तत्र दृष्टान्तः–कूलादिवाधि कूले स्पशः स्पष्टाः स्थिताइत्यर्थः यथा कूलस्थः पुरुषोऽधोगतमुदकं जिज्ञासुः तत्रस्थं मनुष्यं वा विलोकयितुमवाक्पश्यति तद्वत्। तथा कृत्वा सुतीर्थं शोभनावतरप्रदेशं अर्वतोश्वान्यथा प्रापयन्त्यश्वरक्षकास्तद्वदस्मान् सुगं सुपन्थानमनुनेषथानुनयथ॥११॥

अथ द्वादशी–

नेह भद्रं रक्षस्विने नावयै नोपया उत।
गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो
वऊतयः सुऊतयो वऊतयः॥ १२॥

न । इह । भद्रम् । रक्षस्विने । न । अवऽयै । न । उपऽयै । उत ।
गवे । च । भद्रम् । धेनवे । वीराय । च । श्रवस्यते ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १२ ॥

हे आदित्याः इह भूमौ भद्रं कल्याणं सुखं रक्षस्विने रक्षोवतं बलवतेस्मद्द्वेष्ट्रे नभवत्वि-तिशेषः । अवयै अस्मान् हिंसितुमवगच्छते नभवतु भद्रं तथोपयै उपगच्छते नभवतु । तर्हि कस्य भवत्विति उच्यते गवेच भद्रं युष्मदीयं भवतु चशब्दो वक्ष्यमाणधेन्वाद्यपेक्षः । किञ्च धेनवे नवप्रसूतिकायै भद्रं भवतु । वीरायास्मत्पुत्रादिकाय भद्रं भवतु । कीदृशाय वीराय श्रवस्यतेन्नमिच्छते अथवा उत्तरार्धेपि नेत्यनुवर्तते अस्मद्विरोधिनो गवादिकाय भद्रं न भवत्विति तत्यार्थः ॥ १२ ॥

अथ त्रयोदशी—

यदाविर्यदपीच्यंदेवासोअस्तिदुष्कृतम् ।
त्रितेतद्विश्वमाप्त्यआरेअस्मद्दधातनाने
हसोवऊतयःसुऊतयोवऊतयः ॥ १३ ॥

यत् । आविः । यत् । अपीच्यम् । देवासः । अस्ति । दुःऽकृतम् ।
त्रिते । तत् । विश्वम् । आप्त्ये । आरे । अस्मत् ।
दधातन । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥१३॥

हे देवासो देवाः आदित्याः यदाविः यत्पापमाविर्भूतमस्ति दुष्कृतं यच्चापीच्यं अन्तर्हित-मस्ति अपीच्यमित्यंतर्हितनाम तद् विश्वं तद्भयं आप्त्ये त्रिते मपि माभूत् किंतु अस्मदारे दूरे दधातन स्थापयत ॥ १३ ॥

यच्चागोष्वित्यादि सूक्तशेषेण दुःस्वप्नं दृष्ट्वादित्यमुपतिष्ठेत तथाच स्वप्नमपनोऽसंदृशेत्युपक्रम्य यच्चगोपुदुःष्वप्नमिति पञ्चभिरादित्यमुपतिष्ठेत इतिसूत्रितम् ।

तत्र प्रथमा सूक्ते चतुर्दशी—

यच्चगोषुदुष्ष्वप्न्यंयच्चास्मेदुहितर्दिवः ।
त्रितायतद्विभावर्याप्त्यायपरावहानेहसो
वऊतयःसुऊतयोवऊतयः ॥ १४ ॥

यत् । च । गोषु । दुःऽस्वप्न्यम् । यत् । च । अस्मे इति ।
दुहितः । दिवः । त्रिताय । तत् । विभाऽवरि । आप्त्याय । परा ।
वह । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १४ ॥

हे दिवोदुहितरुषः उषोदेवते यच्च गोषु अस्मदीयासु दुःष्वप्न्यं अनर्थसूचकं दृष्टं स्यात्किंचित् किञ्च यच्च दुःष्वप्न्यं अस्मेस्मासु दृष्टं गोपीडानिमित्तकमस्माकं पीडानिमित्तकं च यत् दुःष्वप्नं पश्यामइत्यर्थः । तत्सर्वं हे विभावरि उषोनामैतत् हे व्यच्छनवति टेत्रि आप्त्याय त्रिताय परावह दूरे परिहर ॥ १४ ॥

अथ पंचदशी—

निष्कंवाघाकृणवतेस्रजंवादुहितर्दिवः ।
त्रितेदुष्वप्न्यंसर्वमाप्त्येपरिदद्मस्यनेहसो
वऊतयःसुऊतयोवऊतयः ॥ १५ ॥ ९ ॥

निष्कम् । वा । घ । कृणवते । स्रजम् । वा । दुहितः । दिवः । त्रिते ।
दुःऽस्वप्न्यम् । सर्वम् । आप्त्ये । परि । दद्मसि । अनेहसः ।
वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १५ ॥ ९ ॥

हे दिवोदुहितरुषो निष्कंवा घ आभरणविशेषं वा कृणवते कुर्वते स्वर्णकाराय यत् दुःष्वप्न्यं दृष्टं स्वर्णकारेणनिर्माणसमये दृष्टमित्यर्थः । वेतिपूरणः वाशब्दश्चार्थे वा अथवा स्रजं माल्यं कृणवते कुर्वाणेइत्यर्थः तस्मिन्नपि मालाकारे मालानिर्माणसमये यत् दुःष्वप्न्यं दृष्टं तदुभयविषयं स्वप्नं आप्त्ये अपां पुत्रे त्रिते वर्तमानं परिदद्मसि परिदद्मोवयं त्रिताः परित्यजामेत्यर्थः । अथवा त्रिते मयि यद्दुःष्वप्न्यं दृष्टं तत्स्वर्णकाराय मालाकारायवा परिदद्मसि अस्मत्तोपिनिष्कृष्य तयोरुपरि स्थापयामः ॥ १५ ॥

॥ इति पष्ठस्य चतुर्थे नवमोवर्गः ॥ ९ ॥

अथ षोडशी—

तदन्नाय तदपसे तं भागमुपसेदुषे ।
त्रिताय च द्विताय चोषो दुष्वप्न्यं वहानेहसो
व ऊतयः सुऊतयो व ऊतयः ॥ १६ ॥

तत्ऽअन्नाय । तत्ऽअपसे । तम् । भागम् । उपऽसेदुषे । त्रिताय ।
च । द्विताय । च । उषः । दुःऽस्वप्न्यम् । वह । अनेहसः ।
वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १६ ॥

तदन्नाय यदेव जागरावस्थायां भोज्यत्वेन प्रसिद्धं मधुपायसादि स्वप्नेपि तदेवान्नं यस्य सः तादृशाय प्रत्यक्षभोजनवत् स्वप्नेपि भोक्ते इत्यर्थः । तथा तदपसे यदेवापः कर्मनिन्दितं जाग्रदवस्थायां क्रियते तदेव कर्म स्वप्ने यस्य सतत्कर्मा तादृशाय देवाय तं भागं दुःस्वप्नस्यांशमुपसेदुषे प्राप्नुवते त्रिताय द्वितायच हे उषोदेवि दुःष्वप्न्यं अन्नकर्मविषयं वह अन्यत्र प्रापय स्वप्नेदृष्टं मधुभोजनादिकं जाग्रदवस्थानुरूपवस्तुसुखकरं भवत्वित्यर्थः ॥ १६ ॥

अथ सप्तदशी—

यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो
व ऊतयः सुऊतयो व ऊतयः ॥ १७ ॥

यथा । कलाम् । यथा । शफम् । यथा । ऋणम् । सम्ऽनयामसि ।
एव । दुःऽस्वप्न्यम् । सर्वम् । आप्त्ये । सम् । नयामसि । अनेहसः ।
वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १७ ॥

संज्ञापितं पशुं दानार्थं संस्कुर्वन्तो यथा येनप्रकारेण कलां शफमिति शब्दायान्यत्र सन्नयन्ति अथापरो यथा शब्दःपूरणः अथवा यथा कलां हृदयाद्यवयवमवदानार्हं सन्नयन्ति यथाच शफं शफोपलक्षितमवदानार्हं शफास्थ्यादिकं सन्नयन्ति यथा वा ऋणं शनैः सन्नयन्ति एव एवं दुःष्वप्न्यं सर्वं आप्त्ये वर्तमानं सन्नयामसि सन्नयामः अपसारयामः ॥ १७ ॥

अथाष्टादशी—

अजैष्माद्यासनामचाभूमानागसोवयम् ।
उषोयस्माद्दुःष्वप्न्यादभैष्मापतदुच्छत्वनेहसो
वऊतयःसुऊतयोवऊतयः ॥ १८ ॥ १० ॥

अजैष्म । अद्य । असनाम । च । अभूम । अनागसः । वयम् । उषः ।
यस्मात् । दुःऽस्वप्न्यात् । अभैष्म । अप । तत् । उच्छतु ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १८ ॥ १० ॥

वयं त्रिताः अद्याजैष्म जयेम असनामच संभजेमच सुष्वप्न्यं सुखंवा अनागसोपापा-अभूम भवेम । हे उषः यस्माद्दुष्वप्न्यादभैष्म भीताः स्म तत्पापं अपोच्छतु अपगच्छतु ॥१८॥

॥ इति षष्ठस्य चतुर्थे दशमोवर्गः ॥ १० ॥

स्वादोरभक्षीति पञ्चदशर्चं षष्ठंसूक्तं काण्वस्य प्रगाथस्यार्षं सोमदेवताकं त्रैष्टुभं पञ्चमी-जगती । तथाचानुक्रान्तम्—स्वादोःपञ्चोना प्रगाथः सौम्यं त्रैष्टुभं पञ्चमीजगतीति । सूक्तविनियोगोलैङ्गिकः ।

तत्र प्रथमा—

स्वादोरभक्षिवयसःसुमेधाःस्वाध्योवरिवोवित्तरस्य ।
विश्वेयंदेवाउतमर्त्यासोमधुब्रुवन्तोअभिसंचरन्ति ॥ १ ॥

स्वादोः । अभक्षि । वयसः । सुऽमेधाः । सुऽआध्यः । वरिवोवित्ऽतरस्य ।
विश्वे । यम् । देवाः । उत । मर्त्यासः । मधु । ब्रुवन्तः ।
अभि । समऽचरन्ति ॥ १ ॥

अहं प्रगाथः सुमेधाः शोभनप्रज्ञः स्वाध्यः स्वाध्ययनः सुकर्मा वरिवोवित्तरस्य अति-शयेन पूजां लभमानस्य स्वादोः सुष्ठु अदनीयस्य स्वादुभूतस्य वयसोन्नस्य एताः कर्मणिषष्ठ्यः उक्तलक्षणं वयोन्नं सोमाख्यं आभक्षि भक्षयेय । यं यदन्नं विश्वेदेवाः सर्वेपीन्द्रादयःउतापिच

मर्त्यांसोमर्त्यां मनुष्या मधुयुक्तः मनोहरमेतदिति शब्दायन्तोभिसञ्चरन्ति अभिसंगच्छन्ते प्राप्नुवन्ति तदन्नमभक्षीति ॥ १ ॥

अग्नीषोमप्रणयनेन्तश्चेत्येषा । तथाचसूत्रितम्–अन्तश्चप्रागाअदितिर्भवासि श्येनोनयोनिसदनं धियाकृतमिति ।

सैषा द्वितीया–

अ॒न्तश्च॒ प्रागा॒ अदि॑तिर्भवास्यवया॒ता हर॑सो॒ दैव्य॑स्य । इन्द॒विन्द्र॑स्य स॒ख्यं जु॑षा॒णः श्रौष्टी॑व॒ धुर॒मनु॑ रा॒य ऋ॑ध्याः ॥ २ ॥

अ॒न्तरिति॑ । च॒ । प्र । अगाः॑ । अदि॑तिः । भ॒वा॒सि॒ । अ॒व॒ऽया॒ता । हर॑सः । दैव्य॑स्य । इन्दो॒ इति॑ । इन्द्र॑स्य । स॒ख्यम् । जु॒षा॒णः । श्रौष्टी॑ऽइव । धुर॑म् । अनु॑ । रा॒ये । ऋ॒ध्याः॒ ॥ २ ॥

हे सोम त्वं अन्तश्च प्रागाः हृदयस्य यागागारस्य वान्तर्गच्छसि गत्वाचादितिः अदीनस्त्वं दैव्यस्य हरसः क्रोधस्यावयाता पृथक्कर्ता भवासि भवसि । हरइति क्रोधनाम हे इन्दो सोम त्वं इन्द्रस्य सख्यं जुषाणः सेवमानः श्रौष्टीश्रुष्टीति क्षिप्रनाम तत्संबन्धी श्रौष्टी क्षिप्रगाम्यश्वो धुरमिव रायेस्माकं धनलाभाय अनुऋध्याः अनुगच्छसि । अथवाश्वोयथा धुरं धृत्वाभिमतदेशं प्रापयति तद्वदस्मान्प्रापय अनुपूर्वोऋधिर्गत्यर्थः ॥ २ ॥

अपामसोममित्यादिके द्वे सोमपानोत्तरकालीनात्माभिमर्शने हृदयाभिमर्शनेच क्रमेणविनियुक्ते । तथाचसूत्रितम्–अपामसोममृताअभूम शंनोभवहृदआपीतइन्दविति मुखहृदये अभिमृशेरन्निति ।

अनयोर्मध्ये प्रथमा सूक्ते तृतीया–

अपा॑म॒ सोम॑म॒मृता॑ अभू॒माग॑न्म॒ ज्योति॒रवि॑दाम दे॒वान् । किं नू॒नम॒स्मान्कृ॑णव॒दरा॑तिः॒ किमु॑ धू॒र्तिर॑मृत॒ मर्त्य॑स्य ॥ ३ ॥

अपा॑म । सोम॑म् । अ॒मृताः॑ । अ॒भू॒म॒ । अग॑न्म । ज्योतिः॑ । अवि॑दाम । दे॒वान् । किम् । नू॒नम् । अ॒स्मान् । कृ॒ण॒व॒त् । अरा॑तिः । किम् । ऊँ॒ इति॑ । धू॒र्तिः । अ॒मृ॒त॒ । मर्त्य॑स्य ॥ ३ ॥

हे अमृत अमरण सोम त्वामपाम पानं करवाम कुर्मः। ततः अमृताअभूम भवेम। यस्मा-त्वममृतः अतस्त्वपानाद्वयमप्यमृताः स्याम। पश्चात् ज्योतिः द्योतमानं स्वर्गमगन्म अविदाम ज्ञातवन्तो देवान्वयं। तथाभूतानस्मान्नूनमिदानीं अरातिः शत्रुः किं कृणवत् कुर्यात् किमु किं-वा मर्त्यस्येदानीं मनुष्यभूतस्य मम धूर्तिर्हिंसकः किं कृणवत् कुर्यात् ॥ ३ ॥

अथ चतुर्थी–

शंनोभवहृदआपीतइंन्दोपितेवसोमसूनवेंसुशेवंः।
सखेंवुसख्यंउरुशंसधीरःप्रणआयुर्जीवसेसोमतारीः॥ ४ ॥

शम्। नः। भव। हृदे। आ। पीतः। इन्दो इति। पिताऽइंव। सोम। सूनवे। सुऽशेवंः। सखांऽइव। सख्ये। उरुऽशंस। धीरः। प्र। नः। आयुः। जीवसे। सोम। तारीः॥ ४ ॥

हे इन्दो सोम अस्माभिः पीतस्त्वं नोस्माकं हृदे हृदयाय शं सुखं आभव। सुखभवने दृ-ष्टान्तद्वयम्–पितेव सूनवे स्वात्मजाय यथा सुखाय भवति। यथा वा सखाऽहितान्निवर्त्य हिते स्थापयिता सखायं स्वसख्ये यथा सुशेवः सु सुखोभवति शेवमिति सुखनाम तद्वच्चमपि भव। किञ्च हे उरुशंस बहुभिर्बहुधावा शंसनीय बहुकीर्ते सोम धीरो धीमांस्त्वं नोस्माकं जीवसे जीवनाय आयुरायुष्यं प्रतारीः प्रवर्धय ॥ ४ ॥

अथ पञ्चमी–

इमेमांपीतायशसंउरुष्यवोरथंनगावःसमंनाहपर्वसु।
तेमांरक्षंतुविस्रसंश्चरित्रांदुतमास्रामांद्यवयन्त्विन्दंवः॥ ५ ॥११॥

इमे। मा। पीताः। यशसंः। उरुष्यवंः। रथंम्। न। गावंः। सम्। अनाह। पर्वऽसु। ते। मा। रक्षन्तु। विऽस्रसंः। चरित्रांत्। उत। मा। स्रामांत्। यवयन्तु। इन्दंवः॥ ५ ॥ ११॥

इमे पीताः यशसो यशस्कराः उरुष्यवोस्माकं रक्षाकामाः सोमाः गावो गोर्विकारभूता वध्र्यः रथंन रथमिव ताः यथा रथं विस्रस्तं पर्वसु समनाह सन्दधते तद्वन्मां पीताः सोमाः पर्वसु संनह्यन्तु । किञ्च ते सोमाः मा मां विस्रसो विस्रस्ताच्चरित्राच्चरणादनुष्ठानाद्रक्षन्तु सोमः पीतश्चेत्कर्मस्वविस्रस्तं भवति । उताऽपिच मा मां स्रामाद्व्याधेः सकाशादिन्दवः पीता यवयन्तु पृथक्कुर्वन्तु ॥ ५ ॥

॥ इति षष्ठस्य चतुर्थे एकादशोवर्गः ॥ ११ ॥

अथ षष्ठी—

अ॒ग्निंन॒मा॑म॑थि॒तंसंदि॑दीपः॒प्रच॑क्षयकृणु॒हिव॒स्य॑सोनः ।
अथा॒हि॒ते॒मद॒आसो॑म॒मन्ये॑रे॒वाँइ॑व॒प्रच॑रापु॒ष्टिमच्छ॑ ॥ ६ ॥

अ॒ग्निम् । न । मा॒ । म॒थि॒तम् । सम् । दि॒दी॒पः॒ । प्र । च॒क्ष॒य॒ । कृ॒णु॒हि ।
वस्य॑सः । न॒ः । अथ॑ । हि । ते॒ । मदे॑ । आ । सो॒म॒ । मन्ये॑ ।
रे॒वान्ऽइ॑व । प्र । च॒र॒ । पु॒ष्टिम् । अच्छ॑ ॥ ६ ॥

हे सोम पीतस्त्वं मा मां मथितमग्निंन अग्निमिव सन्दिदीपः सन्दीपय प्रचक्षयच चक्षुषः सन्धुक्षणेन नोस्मान् वस्यसोतिशयेन वसुमतः कृणुहि कुरु । अथाधुनाहि खलु ते त्वां हे सोम मदे मदाय मन्ये स्तौमि । तथासति रेवानिव धनवान् । इहइवेति संभत्यर्थे । पुष्टिमस्मत्पोषमच्छ प्रचराभिगच्छ ॥ ६ ॥

अथ सप्तमी—

इ॒षि॒रेण॑ते॒मन॑सासु॒तस्य॑भक्षी॒महि॒पित्र्य॑स्ये॒वरा॒यः ।
सोम॑राज॒न्प्रण॒आयूं॑षिता॒रीरहा॑नी॒वसूर्यो॑वास॒राणि॑ ॥ ७ ॥

इ॒षि॒रेण॑ । ते॒ । मन॑सा । सु॒तस्य॑ । भ॒क्षी॒महि॑ । पित्र्य॑स्यऽइव ।
रा॒यः । सोम॑ । रा॒ज॒न् । प्र । न॒ः । आयूं॑षि । ता॒रीः॒ ।
अहा॑निऽइव । सूर्यः॑ । वा॒स॒राणि॑ ॥ ७ ॥

इषिरेण इच्छावता मनसा सुतस्य सुतमभिषुतं ते त्वां भक्षीमहि पित्र्यस्य पितृसंबन्धिनो रायो धनस्येव धनमिव पित्र्यं धनं यथेषणेन मनसोपभुञ्जते तद्वत् भक्षीमहि । हे सोमराजन् स्वामिन् नोऽस्माकमायूंषि प्रतारीः प्रवर्धय वासराणि जगद्वासकानि अहानि सूर्यइव । अत्रै षणेन चैषणेन मार्षणेन वेत्यादिनिरुक्तं ज्ञातव्यं ॥ ७ ॥

अथाष्टमी—

सोमराजन्मृळयानःस्वस्तितवस्मसिव्रत्या३स्तस्यविद्धि ।
अलर्तिदक्षउतमन्युरिन्दोमानोअर्योअनुकामंपरादाः ॥ ८ ॥

सोम । राजन् । मृळय । नः । स्वस्ति । तव । स्मसि । व्रत्याः ।
तस्य । विद्धि । अलर्ति । दक्षः । उत । मन्युः । इन्दो इति । मा ।
नः । अर्यः । अनुऽकामम् । परा । दाः ॥ ८ ॥

हे सोमराजन्नोस्मान् स्वस्त्यविनाशाय मृळय सुखयच व्रत्याः व्रतिनोवयं तवस्मसि स्वभूताः स्म तस्य तं स्वकीयं तव विद्धि जानीहि।अथवा तव त्वमित्यर्थः त्वं जानीहि । किञ्च हे इन्दो दक्षः प्रवृद्धोस्मच्छत्रुरलर्ति गच्छति । उतापिच मन्युः क्रोधः क्रुद्धोवालर्ति तादृशस्यो-भयविधस्यार्यः अरेः अनुकामं यथाकामं नोस्मान्मापरादाः परादेहि ॥ ८ ॥

अथ नवमी—

त्वंहिनस्तन्वःसोमगोपागात्रेगात्रेनिषसत्थानृचक्षाः ।
यत्तेवयंप्रमिनामव्रतानिसनोमृळसुषखादेववस्यः ॥ ९ ॥

त्वम् । हि । नः । तन्वः । सोम । गोपाः । गात्रेऽगात्रे । निऽससत्थ ।
नृऽचक्षाः । यत् । ते । वयम् । प्रऽमिनाम । व्रतानि । सः ।
नः । मृळ । सुऽसखा । देव । वस्यः ॥ ९ ॥

* हे सोम देव त्वं नोस्माकं तन्वस्तनोरंगस्य गोपाहि रक्षितावलु अतो गात्रेगात्रे सर्वेष्वंगे-षु नृचक्षाः नृणां कर्मनेतॄणां द्रष्टा त्वं निषसत्थ निषीदसि । यद्यपि ते तव व्रतानि कर्माणि वयं प्रमिनाम हिंस्मः तथापि हे देव सत्वं वस्यः श्रेष्ठान्नोस्मान्सुषखा शोभनसखासन् मृळ सुखय ॥९॥

---

१ नि० ४. ७.।

अथ दशमी–

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥ १० ॥ १२ ॥

ऋदूदरेण । सख्या । सचेय । यः । मा । न । रिष्येत् । हरिऽअश्व । पीतः । अयम् । यः । सोमः । नि । अधायि । अस्मे इति । तस्मै । इन्द्रम् । प्रऽतिरम् । एमि । आयुः ॥ १० ॥ १२ ॥

अहंप्रगाथो ऋदूदरेण उदराबाधकेन सोमेन सख्या सचेय संगच्छेय संगतोभवामि । ऋदूदरः सोमोमृदूदरइतिर्यास्कः । यःसोमः पीतःसन् मा मां नरिष्येत् नहिंस्येत् । हे हर्यश्वेन्द्र । सौम्ये सूक्ते इन्द्रस्यकीर्तनं सोमस्येन्द्रस्वामिकत्वान्नविरुद्धम् । योयं सोमोस्मेस्मासु न्यधायि निहितोभूत्तस्मै सोमाय प्रतिरमायुर्जठरे चिरकालावस्थानं इन्द्रमेमि याचे ॥ १० ॥

॥ इति षष्ठस्य चतुर्थे द्वादशोवर्गः ॥ १२ ॥

अथैकादशी–

अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ॥ ११ ॥

अप । त्याः । अस्थुः । अनिराः । अमीवाः । निः । अत्रसन् । तमिषीचीः । अभैषुः । आ । सोमः । अस्मान् । अरुहत् । विऽहायाः । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥ ११ ॥

त्यास्ता अनिराः प्रेरयितुमशक्याः अमीवाः बलवत्यः पीडाः अपास्थुः अपगच्छन्तु यास्तमिषीचीर्बलवत्योस्मान् निः नितरामत्रसन् प्राभुवन् कंपयंति तथा अभैषुः । अपगमे कारणमाह—यस्मात्सोमोविहायामहान् सन् अस्माना अरुहत् आगमत् प्राप्तवान् अतोपास्थुरितिभावः । यत्र यस्मिन् सोमे पीते आयुरायुष्यं प्रतिरन्ते वर्धयन्ति मनुष्यास्तंसोममगन्मेति ॥ ११ ॥

---

१ नि० ६. ४. ।

अथ द्वादशी–

योनइन्दुःपितरोहृत्सुपीतोमर्त्योमर्त्याँआविवेश ।
तस्मैसोमायहविषाविधेममृळीकेअस्यसुमतौस्याम ॥ १२ ॥

यः । नः । इन्दुः । पितरः । हृत्ऽसु । पीतः । अमर्त्यः । मर्त्यान् ।
आऽविवेश । तस्मै । सोमाय । हविषा । विधेम । मृळीके ।
अस्य । सुऽमतौ । स्याम ॥ १२ ॥

हे पितरो यइन्दुः हृत्सुपीतःसन् अमर्त्योमृतिविरहितः सन्नाविवेश मर्त्यान्नोस्मान् तस्मै सोमाय हविषाविधेम परिचरेम । अस्य सोमस्य मृळीके सुखे सुमतौ चानुग्रहबुद्धौच स्याम भवेम॥१२॥

महापितृयज्ञे सोमायपितृमतेपुरोडाशमित्यत्र त्वंसोममितियाज्या सूत्रितश्च–त्वंसोमपितृभिःसंविदानो बर्हिषदःपितरऊत्यर्वागिति । तृतीयसवने सौम्यस्यचरोरपीयमेवयाज्या । त्वंसोमपितृभिः संविदानइतिसौम्यस्येतिहिसूत्रितम् ।

सैषा त्रयोदशी–

त्वंसोमपितृभिःसंविदानोनुद्यावापृथिवीआततंथ ।
तस्मैतइन्दोहविषाविधेमवयंस्यामपतयोरयीणाम् ॥ १३ ॥

त्वम् । सोम । पितृऽभिः । सम्ऽविदानः । अनु ।
द्यावापृथिवी इति । आ । ततन्थ । तस्मै । ते । इन्दो इति ।
हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ॥ १३ ॥

हे सोम त्वं पितृभिः सह संविदानः संगच्छमानो द्यावापृथिवी द्यावापृथिव्यौ अन्वाततन्थ क्रमेण विस्तारयसि । हे इन्दो सोम तस्मै ते तुभ्यं हविषा विधेम परिचरेम वयं रयीणां धनानां पतयः स्याम भवेम ॥ १३ ॥

अथ चतुर्दशी–

त्रातारोदेवाअधिवोचतानोमानोनिद्राईशतमोतजल्पिः ।
वयंसोमस्यविश्वहप्रियासःसुवीरासोविदथमावदेम ॥ १४ ॥

त्रातारः । देवाः । अधि । वोचत । नः । मा । नः । निऽद्रा ।
ईशत । मा । उत । जल्पिः । वयम् । सोमस्य । विश्वहं ।
प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥ १४ ॥

हे त्रातारो रक्षितारो हे देवाः नोस्मानधिवोचत अधिवचनं कुरुत । किञ्च नोस्मान्निद्रा स्वप्नाः मेशत ईश्वरामाभूवन् बाधितुम् । उतापिच जल्पिः निन्दकोस्मान्मानिन्दतु । वयं सोमस्य प्रियासः प्रियाः स्याम । विश्वह सर्वेष्वहःसु सर्वदेत्यर्थः सुवीरासः शोभनपुत्राः सन्तो-विदथं स्तोत्रमावदेम आभिमुख्येन वदेम । अथवा सुपुत्राविदथं गृहमावदेम । आवदनं पुत्रपौत्राणां धनेनोपच्छन्दनम् ॥ १४ ॥

त्वंनःसोमविश्वतइति सौम्येपशौ हविषोनुवाक्या । सूत्रितञ्च—त्वंनःसोमविश्वतोवयोधा-यातेधामानिदिवियापृथिव्यामिति ।

सैषा पञ्चदशी—

त्वंनःसोमविश्वतोवयोधास्त्वंस्वर्विदाविशानृचक्षाः ।
त्वंनइन्दऊतिभिःसजोषाःपाहिपश्चातादुतवापुरस्तात् ॥ १५ ॥ १३ ॥

त्वम् । नः । सोम । विश्वतः । वयःऽधाः । त्वम् । स्वःऽवित् ।
आ । विश । नृऽचक्षाः । त्वम् । नः । इन्दो इति । ऊतिऽभिः ।
सऽजोषाः । पाहि । पश्चातात् । उत । वा । पुरस्तात् ॥ १५ ॥ १३ ॥

हे सोम त्वं नोस्माकं विश्वतः सर्वाभ्योदिग्भ्यो वयोधा अन्नदाता तथा त्वं स्वर्विद् स्वर्गलंभकः नृचक्षाः सर्वमनुष्यद्रष्टा त्वं आविश । हे इन्दो त्वं सजोषाः सहप्रीयमाणः सन् ऊतिभिः सह अथवोतयोगन्तारोमरुतः तैः सहितः सन्पश्चातात् पश्चात् उतवा पुरस्ताच्च पाहि ॥ १५ ॥

॥ इति षष्ठस्य चतुर्थे त्रयोदशोवर्गः ॥ १३ ॥

॥ इत्यष्टमे मंडले षष्ठोनुवाकः ॥ ६ ॥

सप्तमेनुवाके दशसूक्तानि तत्राग्नआयाहीति विंशत्यृचं प्रथमं सूक्तं प्रगाथपुत्रस्य भर्गस्यार्षं आग्नेयं प्रथमातृतीयाद्ययुजोबृहत्यः द्वितीयाचतुर्थ्यादि युजः सतोबृहत्यः। तथाचानुक्रान्तम्—अग्नआ विंशतिर्भर्गः प्रागाथआग्नेयं प्रागाथंत्विति। प्रातरनुवाके आग्नेयेक्रतौ बार्हतेछन्दसि आश्विनशस्त्रेचेदं सूक्तम्। तथाचसूत्रितम्—अयमग्निरग्नआयाहीति।

तत्र प्रथमा—

अग्नआयाह्यग्निभिर्होतारंत्वावृणीमहे।
आत्वामनक्तुप्रयताहविष्मतीयजिष्ठंबर्हिरासदे ॥ १ ॥

अग्ने। आ। याहि। अग्निऽभिः। होतारम्। त्वा।
वृणीमहे। आ। त्वाम्। अनक्तु। प्रऽयता। हविष्मती।
यजिष्ठम्। बर्हिः। आऽसदे ॥ १ ॥

हे अग्ने अग्निभिर्यष्टव्यैः सहायाह्यागच्छ। तदर्थं होतारं देवानामाह्वातारं त्वा त्वां वृणीमहे त्वां आगतं प्रयताध्वर्युहस्ताभ्यां नियता हविष्मती घृतवती यजिष्ठं त्वां बर्हिः बर्हिष्यासदे आसद आसर्वतोनक्तु ॥ १ ॥

अथ द्वितीया—

अच्छाहित्वांसहसःसूनोअङ्गिरःस्रुचश्चरन्त्यध्वरे।
ऊर्जोनपातंघृतकेशमीमहेग्निंयज्ञेषुपूर्व्यम् ॥ २ ॥

अच्छ। हि। त्वा। सहसः। सूनो इति। अङ्गिरः। स्रुचः।
चरन्ति। अध्वरे। ऊर्जः। नपातम्। घृतऽकेशम्।
ईमहे। अग्निम्। यज्ञेषु। पूर्व्यम् ॥ २ ॥

हे सहसःसूनो बलस्यपुत्र बलेन मथ्यमानत्वात् हे अंगिरः अंगिरसां मध्ये एक अथर्वांगिर्भेविकर्मा सर्वत्र संगतस्त्वा त्वां अध्वरे यागे अच्छाभिमुखं स्रुचश्चरन्ति गच्छन्ति अत ऊर्जोन्नस्य नपातं न पातयितारं रक्षकं बलस्य नप्तारं वा घृतकेशं प्रदीप्तकेशस्थानीयज्वालं पूर्व्यं पुरातनं पूरकं वाग्निं यज्ञेषु अस्मदीयेषु ईमहे स्तौमि ॥ २ ॥

अथ तृतीया–

अग्नेकविर्वेधाअसिहोतापावकयक्ष्यः ।
मन्द्रोयजिष्ठोअध्वरेष्वीड्योविप्रेभिःशुक्रमन्मभिः ॥ ३ ॥

अग्ने । कविः । वेधाः । असि । होता । पावक । यक्ष्यः । मन्द्रः ।
यजिष्ठः । अध्वरेषु । ईड्यः । विप्रेभिः । शुक्र । मन्मऽभिः ॥ ३ ॥

हे अग्ने कविर्मेधावी त्वं वेधाः विधातासि फलानां । हे पावक होता देवानामाह्वाता होमनिष्पादकोवा यक्ष्योयष्टव्योसि । हे शुक्र दीप्त मन्द्रो मोदनीयो यजिष्ठो यष्टृतमस्त्वं अध्वरेषु यज्ञेषु विप्रेभिर्मेधाविभिर्ऋत्विग्भिर्मन्मभिर्मननीयैः स्तोत्रैरीड्यः स्तुत्योसि ॥ ३ ॥

अथ चतुर्थी–

अद्रोघमावहोशतोयविष्ठ्यदेवाँअजस्रवीतये ।
अभिप्रयांसिसुधितावसोगहिमन्दस्वधीतिभिर्हितः ॥ ४ ॥

अद्रोघम् । आ । वह । उशतः । यविष्ठ्य । देवान् ।
अजस्र । वीतये । अभि । प्रयांसि । सुऽधिता । आ ।
वसो इति । गहि । मन्दस्व । धीतिऽभिः । हितः ॥ ४ ॥

अद्रोघमद्रोग्धारं मां प्रति हे यविष्ठ्य युवतम अजस्र नित्य आवहानय । कान् उशतोस्मदर्थं कामयमानान् देवान् । किमर्थं वीतये हविर्भक्षणाय । हे वसो वासकाग्ने सुधिता सुनिहितानि प्रयांस्यन्नानि अभिगहि अभिगच्छ । आगत्यच धीतिभिः स्तुतिभिर्निहितो निहितःसन् मन्दस्व । यद्वा धीतिभिः मन्दस्वेति संबन्धः ॥ ४ ॥

अथ पञ्चमी–

त्वमित्सप्रथाअस्यग्नेत्रातऋतस्कविः ।
त्वांविप्रासःसमिधानदीदिवआविवासन्तिवेधसः ॥ ५ ॥ १४ ॥

त्वम् । इत् । सऽप्रथाः । असि । अग्ने । त्रातः ।
ऋतः । कविः । त्वाम् । विप्रासः । सम्ऽइधान । दीदिऽवः ।
आ । विवासन्ति । वेधसः ॥ ५ ॥ १४ ॥

हे अग्ने त्रावः रक्षक ऋतः सत्यभूतःकविः क्रान्तप्रज्ञस्त्वमित् त्वमेव सप्रथाः सर्वतः पृथु-रसि भवसि । हे समिधान समिध्यमान हे दीदिवः दीप्तत्वां विप्रासो विप्राः मेधाविनो वेधसो विधातारः स्तोतारो विवासन्ति परिचरन्ति ॥ ५ ॥

॥ इति पञ्चस्य चतुर्थे चतुर्दशोवर्गः ॥ १४ ॥

अथ षष्ठी–

शोचा॑शोचिष्ठदीदि॒हिवि॒शेमयो॒रास्व॑स्तो॒त्रेम॒हाँअ॑सि ।
दे॒वानां॒शर्म॒न्मम॑सन्तुसू॒रय॑ःशत्रू॒षाह॑ःस्व॒ग्नय॑ः ॥ ६ ॥

शोच॑ । शो॒चि॒ष्ठ॒ । दी॒दि॒हि । वि॒शे । मय॑ः । रास्व॑ ।
स्तो॒त्रे । म॒हान् । अ॒सि॒ । दे॒वाना॑म् । शर्म॑न् । मम॑ । स॒न्तु॒ ।
सू॒रय॑ः । श॒त्रु॒ऽसह॑ः । सु॒ऽअ॒ग्नय॑ः ॥ ६ ॥

हे शोचिष्ठ अतिशयेन शोचयितरग्ने शोच दीप्यस्व । दीदिहि दीपयास्मान् । विशे प्रजायै स्तोत्रे मयः सुखं रास्व देहि । त्वं महानसि त्वं देवानां संबन्धिनि शर्मन् शर्मणि सुखे मम सूरय स्तोतारो मेधाविनोस्माकं पुत्रादयोवा सन्तु भवन्तु । शत्रूषाहः शत्रूणामभिभवितारः स्वग्नयः शोभनाग्नयश्च सन्तु ॥ ६ ॥

अथ सप्तमी–

यथा॑चिद्वृ॒द्धम॑त॒सम॑ग्ने॑सं॒जूर्व॑सि॒क्षमि॑ ।
ए॒वाद॑ह॒मित्रमहो॒योअ॑स्म॒ध्रुग्दु॒र्मन्मा॒कश्च॒वेन॑ति ॥ ७ ॥

यथा॑ । चि॒त् । वृ॒द्धम् । अ॒त॒सम् । अग्ने॑ । स॒म्ऽजूर्व॑सि ।
क्षमि॑ । ए॒व । द॒ह॒ । मि॒त्र॒ऽम॒हः॒ । यः । अ॒स्म॒ऽध्रुक् ।
दु॒ःऽमन्मा॑ । कः । च॒ । वेन॑ति ॥ ७ ॥

हे अग्ने क्षमि क्षमायां वर्तमानं वृद्धमतसम् शुष्कं काष्ठं यथाचित् येन प्रकारेणैव संजूर्वसि जूर्वतिर्हिंसाकर्मा सम्पग्दहसीत्यर्थः एव एवं दह । हे मित्रमहः मित्राणामस्माकं पूजक तेजो-वा । कं योअस्मध्रुक् अस्माकं द्रोग्धा कश्च कश्चिदुर्मन्मा दुर्मतिर्वेनति कामयतेस्मान् द्रोग्धुं तं दहेति ॥ ७ ॥

अथाष्टमी–

मानोमर्तायरिपवेरक्षस्विनेमाघशंसायरीरधः ।
अस्रेधद्भिस्तरणिभिर्यविष्ठ्यशिवेभिःपाहिपायुभिः ॥ ८ ॥

मा । नः । मर्ताय । रिपवे । रक्षस्विने । मा । अघऽशंसाय ।
रीरधः । अस्रेधत्ऽभिः । तरणिऽभिः । यविष्ठ्य ।
शिवेभिः । पाहि । पायुऽभिः ॥ ८ ॥

नोस्मान् मर्ताय मनुष्याय रिपवे शत्रवे हिंसित्रे रक्षस्विने बलवते मारीरधो वशमानय तथाघशंसाय पापशंसकाय मारीरधः । हे यविष्ठ्य युवतम अस्रेधद्भिः अहिंसकैस्तरणिभिस्तारकैः शिवेभिः सुखकरैः पायुभिः पालनैः नोस्मान्पाहि रक्ष ॥ ८ ॥

अथ नवमी–

पाहिनोअग्नएकयापाह्युतद्वितीयया ।
पाहिगीर्भिस्तिसृभिरूर्जांपतेपाहिचतसृभिर्वसो ॥ ९ ॥

पाहि । नः । अग्ने । एकया । पाहि । उत । द्वितीयया ।
पाहि । गीःऽभिः । तिसृऽभिः । ऊर्जाम् । पते । पाहि ।
चतसृऽभिः । वसो इति ॥ ९ ॥

हे अग्ने नोस्मानेकया ऋचा गिरा पाहि रक्ष । उतापिच द्वितीयया ऋचा पाहि पालय पाहि तिसृभिर्गीर्भिरूर्जामन्नानां बलानां या पते स्वामिन् । तथा पाहि चतसृभिः गीर्भिः हे वसो–वासकाग्ने ॥ ९ ॥

अथ दशमी–

पाहिविश्वस्माद्रक्षसोअराव्णःप्रस्मवाजेषुनोव ।
त्वामिद्धिनेदिष्ठंदेवतातयआपिंनक्षामहेवृधे ॥ १० ॥ १५ ॥

पाहि । विश्वस्मात् । रक्षसः । अराव्णः । प्र । स्म ।
वाजेषु । नः । अव । त्वाम् । इत् । हि । नेदिष्ठम् ।
देवऽतातये । आपिम् । नक्षामहे । वृधे ॥ १० ॥ १५ ॥

हे अग्ने विश्वस्मात्सर्वस्माद्रक्षसः अराव्णोदातुः सकाशात्पाहि रक्षास्मान् वाजेषु संग्रामेषु नोस्मान्माव प्रकर्षेण रक्ष । स्मेति पूरणः । हियस्मान्नेदिष्ठमासन्नं आपिं बन्धुभूतं त्वामिव त्वामेव देवतातये यज्ञाय यज्ञसिध्यर्थं वृधे वर्धनाय नक्षामहे व्याप्नुमः । नक्षतिर्व्याप्तिकर्मा ॥१०॥

॥ इति षष्ठस्य चतुर्थे पञ्चदशोवर्गः ॥ १५ ॥

अथैकादशी—

आनोअग्नेवयोवृधंरयिंपावकशंस्यम् ।
रास्वाचनउपमातेपुरुस्पृहंसुनीतीस्वयशस्तरम् ॥ ११ ॥

आ । नः । अग्ने । वयःऽवृधम् । रयिम् । पावक । शंस्यम् । रास्व ।
च । नः । उपऽमाते । पुरुऽस्पृहम् । सुऽनीती । स्वयशःऽतरम् ॥११॥

हे अग्ने पावक शोधक वयोवृधमन्नस्य वर्धकं शंस्यं शंसनीयं रयिं धनं नोस्मभ्यमाहरेति शेषः । आहृत्य च हे उपमाते उपास्यत्समीपे माति नो धनमित्युपमातिः। हे तादृशाग्ने नोस्मभ्यं सुनीती सुनीत्या शोभननयनेन पुरुस्पृहं बहुभिः स्पृहणीयं स्वयशस्तरं अत्यन्तं स्वभूतकीर्तियुतं रास्व च देहि ॥ ११ ॥

अथ द्वादशी—

येनवंसामपृतनासुशर्धतस्तरन्तोअर्यआदिशः ।
सत्वंनोवर्धप्रयसाशचीवसोजिन्वाधियोवसुविदः ॥ १२ ॥

येन । वंसाम । पृतनासु । शर्धतः । तरन्तः । अर्यः ।
आऽदिशः । सः । त्वम् । नः । वर्ध । प्रयसा । शचीवसो
इति शचीऽवसो । जिन्व । धियः । वसुऽविदः ॥ १२ ॥

येन धनेन पृतनासु संग्रामेषु शर्धतः वेगं कुर्वतः अर्यो॑रीन् शत्रून् आदिशः आदेष्टॄन् शस्त्रप्रक्षेप्तॄन् तरन्तो वंसाम हिंसाम तद्धनं देहि । हे शचीवसो प्रज्ञया वासयितः कर्मधनवा स प्रसिद्धस्त्वंनोस्मान्वर्धं वर्धय प्रीणय प्रयसान्नेन । त्वं वा वर्धास्मदीयेन प्रयसा । हविषावसु-विदो वसूनां लंभकानि धियः कर्माण्यस्मदीयानि जिन्व प्रीणय ॥ १२ ॥

अथ त्रयोदशी—

शिशा॑नोवृष॒भोय॑थाग्निःश्टृङ्गे॒दवि॑ध्वत् ।
ति॒ग्माअं॑स्यहन॑वो॒नप्र॑ति॒धृषे॑सु॒जम्भः॒सह॑सोय॒हुः ॥ १३ ॥

शिशा॑नः । वृ॒ष॒भः । य॒था॒ । अ॒ग्निः । श्टृङ्गे॒ इति॑ । दवि॑ध्वत् । ति॒ग्माः । अ॒स्य॒ । हन॑वः । न । प्र॒ति॒ऽधृषे॑ । सु॒ऽजम्भः॑ । सह॑सः । य॒हुः ॥ १३ ॥

अयमग्निः शृंगे शिशानः तीक्ष्णीकुर्वन् वृषभोयथा दविध्वत् कंपयति शिरः एवं शृङ्ग-स्थानीया ज्वालाः शिशानस्तीक्ष्णीकुर्वन् दविध्वत् कम्पयति शिरः । अस्याग्नेर्हनवोन हनव-इव हनुस्थानीयाज्वालाः तिग्माः तीक्ष्णा नप्रतिधृषे प्रतिधर्षयितुमशक्याः । योग्निः सुजम्भः सुदंष्ट्रः सहसोयहुः सहसस्पुत्रः अस्य हनवइत्यर्थः ॥ १३ ॥

अथ चतुर्दशी—

न॒हिते॑अग्नेवृषभप्रति॒धृषे॒जम्भा॑सो॒यद्वि॒तिष्ठ॑से ।
सत्वंनो॑होत॒ःसुहु॑तंह॒विष्कृ॑धि॒वंस्वा॑नो॒वार्या॑पु॒रु ॥ १४ ॥

न॒हि । ते॒ । अ॒ग्ने॒ । वृ॒ष॒भ॒ । प्र॒ति॒ऽधृषे॑ । जम्भा॑सः । यत् ।
वि॒ऽतिष्ठ॑से । सः । त्वम् । नः॒ । हो॒त॒रिति॑ । सुऽहु॑तम् ।
ह॒विः । कृ॒धि॒ । वंस्व॑ । नः॒ । वार्या॑ । पु॒रु ॥ १४ ॥

हे वृषभ वर्षक हे अग्ने ते तव जंभासो जंभा दन्तस्थानीयाज्वालाः नहि प्रतिधृषे प्रतिधर्षयितुं न शक्याः यद्यस्माद्वितिष्ठसे विविधं गच्छसि प्रवर्धसइत्यर्थः । हे होतर्होमनिष्पादक सत्वं हविरस्मद्दत्तं सुहुतं कृधि कुरु नोस्मभ्यं वार्या वरणीयानि पुरु बहूनि वंस्व देहि ॥ १४ ॥

अथ पञ्चदशी–

शेषेवनेषुमात्रोःसंत्वामर्तासइन्धते ।
अतन्द्रोहव्यावहसिहविष्कृतआदिद्देवेषुराजसि ॥ १५ ॥ १६ ॥

शेषे । वनेषु । मात्रोः । सम् । त्वा । मर्तासः । इन्धते । अतन्द्रः । हव्या । वहसि । हविःऽकृतः । आत् । इत् । देवेषु । राजसि १५ ॥१६ ॥

हे अग्ने वनेषु वर्तमानयोर्मात्रोररण्योः शेषे स्वपिषि वर्तसे । त्वा त्वां तथाभूतं मर्तासोमनुष्याः अध्वर्य्वादयोमथनेनोत्पाद्य समिन्धते पश्चात्प्रवृद्धः त्वमतन्द्रोऽनलसः सन् हविष्कृतोयजमानस्य हव्या हवींषि वहसि देवान् प्रति । आदिदनन्तरमेव देवेषु मध्ये राजसि दीप्यसे ॥ १५ ॥

॥ इति षष्ठस्य चतुर्थे षोडशोवर्गः ॥ १६ ॥

अथ षोडशी–

सप्तहोतारस्तमिदीळतेत्वाग्नेसुत्यजमह्रयम् ।
भिनत्स्यद्रिंतपसाविशोचिषाप्राग्नेतिष्ठजनाँअति ॥ १६ ॥

सप्त । होतारः । तम् । इत् । ईळते । त्वा । अग्ने । सुऽत्यजम् । अह्रयम् । भिनत्सि । अद्रिम् । तपसा । वि । शोचिषा । प्र । अग्ने । तिष्ठ । जनान् । अति ॥ १६ ॥

हे अग्ने तमित् तमेव त्वा त्वां सप्तहोतारो सप्तहोत्रकाः ईळते स्तुवन्ति । कीदृशंत्वां सुत्यजं सुत्यागं अभिमतप्रदमित्यर्थः अह्रयमक्षीणं प्रवृद्धम् । किञ्च अद्रिं मेघं तपसा तापकेन शोचिषा तेजसा तपसा शोचिषा चेति वा योज्यं विभिनत्सि । हे अग्ने जनानस्मानति अतीत्य प्रतिष्ठ प्रगच्छ हविरादाय देवान्प्रति अथवा अस्मद्विरोधिजनानतिक्रम्य प्रतिष्ठ ॥ १६ ॥

अथ सप्तदशी–

अग्निमग्निंवोअध्रिगुंहुवेमवृक्तबर्हिषः ।
अग्निंहितप्रयसःशश्वतीष्वाहोतारंचर्षणीनाम् ॥ १७ ॥

अ॒ग्निम्ऽअ॑ग्निम् । व॒ः । अ॒ध्रिऽगु॑म् । हु॒वेम॑ । वृ॒क्तऽब॑र्हिषः ।
अ॒ग्निम् । हि॒तऽप्र॑यसः । श॒श्वती॑षु । आ । होता॑रम् ।
च॒र्ष॒णी॒नाम् ॥ १७ ॥

अग्निमग्निं वीप्सा आदरार्था अग्निमेव हे यजमानाः वो युष्मदर्थं हुवेम आह्वयाम । अथवा हे देवा वो युष्मदर्थमितिवा व्याख्येयं । कीदृशावयं वृक्तबर्हिषः छिन्नदर्भाः कीदृशमग्निं अध्रिगुमधृतकर्माणं सर्वदा गृहेवर्तमानं अग्निं हितप्रयसः निहितहविष्कावयं आहुवेमेति शेषः । कीदृशमग्निं शश्वतीषु बह्वीषु भूमिषु वर्तमानं होतारं होमनिष्पादकं । किमर्थं चर्षणीनां मनुष्याणामर्थाय । अग्नौ हुतेसति वृष्टिद्वारात्माण्युपकारसिद्धं प्राण्यर्थत्वं । अथवा मनुष्याणां यजमानानां होतारं होमसाधकम् ॥ १७ ॥

अथाष्टादशी–

केते॑नु॒शर्म॑न्त्सचते॒सुषा॒मण्य॑ग्ने॒तुभ्यं॑चिकि॒त्वना॑ ।
इ॒ष॒ण्यया॑नः॒पुरु॒रूप॒माभ॑र॒वाजं॒नेदि॑ष्ठमू॒तये॑ ॥ १८ ॥

केते॑न । शर्म॑न् । स॒च॒ते॒ । सु॒ऽसा॒म॑नि । अग्ने॑ । तुभ्य॑म् ।
चि॒कि॒त्वना॑ । इ॒ष॒ण्यया॑ । न॒ः । पु॒रु॒ऽरूप॑म् । आ ।
भ॒र॒ । वाज॑म् । नेदि॑ष्ठम् । ऊ॒तये॑ ॥ १८ ॥

हे अग्ने तुभ्यं चिकित्वना चिकितुषा जनेन होत्रादिना सह यजमानः केतेन प्रज्ञापकेन स्तोत्रेण यजतइतिशेषः । कुत्रेति तदुच्यते–सुषामणि शोभनरथन्तरादिसामोपेते शर्मन् शर्मणि सुखसाधने यज्ञे । अतः हे अग्ने इषण्यया इच्छया त्वीयया नोस्मभ्यं पुरुरूपं नानारूपं नेदिष्ठं अन्तिके सर्वदा वर्तमानं वाजमन्नं ऊतये रक्षणायाभराहर ॥ १८ ॥

अथैकोनविंशी–

अग्ने॑ज॒रि॒ता॒वि॒श्पति॑स्ते॒पा॒नोदे॑वर॒क्षसः॑ ।
अप्रो॑षिवान्गृ॒हप॑तिर्म॒हाँअ॑सिदि॒वस्पा॒युर्दु॑रो॒ण॒युः ॥ १९ ॥

अग्ने । जरितः । विश्पतिः । तेपानः । देव । रक्षसः ।
अप्रोषिऽवान् । गृहऽपतिः । महान् । असि ।
दिवः । पायुः । दुरोणऽयुः ॥ १९ ॥

हे अग्ने देव जरितः स्तोतः स्तुत्येत्यर्थः विश्पतिः प्रजानां पालकः रक्षसोराक्षसानां तेपानः सन्तापकोसि अप्रोषिवान्यजमानगृहमत्यजन् । तदेवाह—गृहपतिर्यजमानगृहस्यपालकश्च त्वं महानतिशयेन पूज्योसि दिवो द्युलोकस्य पायुः पाता दुरोणयुर्यजमानगृहस्य मिश्रयिता सर्वदा वर्तमानइत्यर्थः तादृशस्त्वं महानसीत्यन्वयः ॥ १९ ॥

अथ विंशी—

मानोरक्षआवेशीदाघृणीवसोमायातुर्यातुमावताम् ।
परोगव्यूत्यनिरामपक्षुधमग्नेसेधरक्षस्विनः ॥ २० ॥ १७ ॥

मा । नः । रक्षः । आ । वेशीत् । आघृणिवसो इत्याघृणिऽवसो ।
मा । यातुः । यातुऽमावताम् । परःऽगव्यूति । अनिराम् । अप ।
क्षुधम् । अग्ने । सेध । रक्षस्विनः ॥ २० ॥ १७ ॥

हे आघृणीवसो दीप्तधनाग्ने नोस्मान्रक्षोराक्षसादिः । रक्षोरक्षितव्यमस्मादितियास्कः । मा आवेशीत् सर्वतो न प्रविशतु । तथा यातुमावतां यातुर्यातना पीडा तद्वतां यातुधानानां यातुः पीडामावेशीत् । हे अग्ने अनिरां इरान्नं अन्नाभावं दारिद्र्यं क्षुधं क्षपयितारं रक्षस्विनो बलवन्ति रक्षांसिच परोगव्यूति क्रोशद्वयाद्देशात्परस्तात् एतदुपलक्षणं अत्यन्तं दूरदेशे अपसेध परिहर अनिराक्षुत् बाह्यानि रक्षांसिच नपीडयन्त्विति ॥ २० ॥

॥ इति पञ्चस्य चतुर्थे सप्तदशोवर्गः ॥ १७ ॥

उभयंशृणवदित्यष्टादशर्चं द्वितीयं सूक्तं प्रागाथस्य भर्गस्यार्षं । अत्रानुक्रमणिका—उभयंद्व्यूनेति । पूर्वसूक्ते प्रागाथंत्विरपुक्तत्वादिदमपि प्रागाथं । अत्रायुजोबृहत्यः युजःसतोबृहत्यः अनुक्तत्वादिन्द्रोदेवता । महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तं सप्तम्यष्टमीवर्जं तथैवपञ्चमारण्यके सूत्रितं शौनकेन—उभयंशृणवच्चनइति सप्तमींचाष्टमीं चोद्धरतीति । चातुर्विंशिकेहनि निष्केवल्ये उभयमिति बृहत्सामप्रगाथः । तथाचसूत्रितम्—उभयंशृणवच्चनइति । चातु-

विंशिकेहनि माध्यन्दिनेसवनेच्छावाकस्यायमेव स्तोत्रियःप्रगाथः । तथाचसूत्रितं—उभयंशृणव-च्चनआवृषस्वपुरूवसोइति । एवमन्यत्रापि यस्मिन्नहनि पृष्ठस्तोत्रे बृहत्सामक्रियते तस्मिन्नहनि निष्केवल्येयंप्रगाथः ।

तत्र प्रथमा—

उभयंशृणवच्चनइन्द्रोअर्वागिदंवचः ।
सत्राच्यामघवासोमपीतयेधियाशविष्ठआगमत् ॥ १ ॥

उभयम् । शृणवत् । च । नः । इन्द्रः । अर्वाक् । इदम् । वचः ।
सत्राच्या । मघऽवा । सोमऽपीतये । धिया ।
शविष्ठः । आ । गमत् ॥ १ ॥

उभयं स्तोत्रात्मकं शस्त्रात्मकं चोभयविधं नोस्माकमिदं वचोर्वागस्मदभिमुखं इन्द्रः शृ-णवत् शृणोतु श्रुत्वाच सत्राच्या अस्माकं सहांचत्या धिया युक्तःसन् मघवा शविष्ठोतिशयेन बलवानागमदागच्छतु सोमपीतये सोमपानाय ॥ १ ॥

अथ द्वितीया—

तंहिस्वराजंवृषभंतमोजसेधिषणेनिष्टतक्षतुः ।
उतोपमानांप्रथमोनिषीदसिसोमकामंहितेमनः ॥ २ ॥

तम् । हि । स्वऽराजम् । वृषभम् । तम् । ओजसे । धिषणे इति ।
निःऽततक्षतुः । उत । उपऽमानाम् । प्रथमः । नि । सीदसि ।
सोमऽकामम् । हि । ते । मनः ॥ २ ॥

तं हि तं खल्विन्द्रं स्वराजं स्वयमेवराजमानं धिषणे द्यावापृथिव्यौ वृषभं जगदुपकार-कस्य वृष्टेर्वर्षकं निष्टतक्षतुः संचस्करतुः ।तं तमेवेन्द्रं ओजसे बलाय निष्टतक्षतुःउत यस्मादेवं तस्मात्हे इन्द्रोपमानां उपमानभूतानांअन्येषां देवानां मध्ये प्रथमो मुख्यः सन् निषीदसि वे-द्यां सोमकामं हिखलु ते मनः ॥ २ ॥

पूर्वोक्ते अच्छावाकशस्त्रे आवृषस्वेति प्रगाथोवैकल्पिकोनुरूपः सूत्रमुक्तम् ।

सेयं तृतीया—

आवृंषस्वपुरूवसोसुतस्येन्द्रान्धसः ।
विद्माहित्वांहरिवःपृत्सुसासुहिमधृष्टंचिद्दधृष्वणिम् ॥ ३ ॥

आ । वृषस्व । पुरुवसो इति पुरुऽवसो । सुतस्य । इन्द्र । अन्धसः ।
विद्म । हि । त्वा । हरिऽवः । पृत्ऽसु । ससहिम् ।
अधृष्टम् । चित् । दधृष्वणिम् ॥ ३ ॥

हे पुरूवसो बहुधनेन्द्र त्वमावृषस्व आसिञ्चस्व । किं सुतस्यान्धसः सुतमन्धः सोमं जठरे । हे हरिवो हरिभ्यां तद्वन्निन्द्र त्वा त्वां विद्महि जानीमः खलु । कीदृशं पृत्सु संग्रामेषु सासहिं अभिभवितारं शत्रूणां अधृष्टंचित् कैरप्यधर्षणीयं दधृष्वणिमन्येषां धर्षकं ॥ ३ ॥

अथ चतुर्थी—

अप्रामिसत्यमघवन्तथेदसदिन्द्रक्रत्वायथावशः ।
सनेमवाजंतवशिप्रिन्नवसामक्षूचिद्यन्तोअद्रिवः ॥ ४ ॥

अप्रामिऽसत्य । मघऽवन् । तथा । इत् । असत् । इन्द्र । क्रत्वा ।
यथा । वशः । सनेम । वाजम् । तव । शिप्रिन् । अवसा ।
मक्षु । चित् । यन्तः । अद्रिऽवः ॥ ४ ॥

हे अप्रामिसत्य अहिंसितसत्य हे मघवन्निन्द्र तथेदसत्तथैवभवति । हे इन्द्र क्रत्वा कर्मणा प्रज्ञानेन यथा येनप्रकारेण वशः कामयेः । हे शिप्रिन् अवसा रक्षणेन निमित्तेन वाजमन्नं सनेम संभजेम वयं तव त्वदनुग्रहात् । कीदृशावयं मक्षु चित् शीघ्रमेव यन्तः शत्रून्गच्छन्तोऽभिभवन्तः हे अद्रिवः अद्रिर्वज्रस्तद्वन्निन्द्रेति ॥ ४ ॥

अथ पञ्चमी—

शग्ध्यूर्षुशचीपतइन्द्रविश्वाभिरूतिभिः ।
भगंनहित्वायशसंवसुविदमनुशूरचरामसि ॥ ५ ॥ १८ ॥

शग्धि । ऊँ इति । सु । शचीऽपते । इन्द्र । विश्वाभिः ।
ऊतिऽभिः । भगम् । न । हि । त्वा । यशसम् । वसुऽविदम् ।
अनु । शूर । चरामसि ॥ ५ ॥ १८ ॥

हे शचीपते इन्द्र शग्धि देहि सु सुष्टु अभिमतं विश्वाभिः सर्वाभिः ऊतिभिः रक्षकैः मरुद्भिः सह । हे शूर भगंन भाग्यमिव यशसं यशस्विनं वसुविदं धनस्यलंभकं त्वा त्वां अनुचरामसि अनुचरामः परिचरामेत्यर्थः ॥ ५ ॥

॥ इति पष्ठस्य चतुर्थेऽष्टादशोवर्गः ॥ १८ ॥

अथ षष्ठी—

पौरोअश्वस्यपुरुकृद्गवामस्युत्सोदेवहिरण्ययः ।
नकिर्हिदानंपरिमर्धिषत्त्वेयद्यद्यामितदाभर ॥ ६ ॥

पौरः । अश्वस्य । पुरुऽकृत् । गवाम् । असि । उत्सः । देव ।
हिरण्ययः । नकिः । हि । दानम् । परिऽमर्धिषत् । त्वे इति ।
यत्ऽयत् । यामि । तत् । आ । भर ॥ ६ ॥

हे इन्द्र त्वं अश्वस्य पौरः पूरयिता भवसि ।तथा गवां पुरुकृत् बहुकर्तासि । हे देव हिरण्ययः हिरणमयशरीरस्त्वं उत्सः उत्ससदृशोसि । हे इन्द्र त्वे त्वयि वर्तमानं दानमस्मद्विषयं देयं धनं वा नकिर्हि परिमर्धिषत् नकश्चिदपि हिनस्ति अतो यद्यद्यामि याचे तदाभराहर मह्यम् ॥६॥

यद्यग्निष्टोमे बृहत्साम तदानीं निष्केवल्ये प्रगाथोनुरूपः ।सूत्रितश्च—त्वंह्येहिचेरवइति प्रगाथाएते भवन्तीति । महाव्रते निष्केवल्ये उत्तरपक्षेयंप्रगाथः तथैव पंचमारण्यकेसूत्रितम्—त्वामिद्धिहवामहे त्वंह्येहिचेरवइति बृहत्स्तोत्रियानुरूपौ प्रगाथाविति ।

प्रगाथे प्रथमा सूक्ते सप्तमी—

त्वंह्येहिचेरवेविदाभगंवसुत्तये ।
उद्वावृषस्वमघवन्गविष्टयउदिन्द्राश्वमिष्टये ॥ ७ ॥

त्वम् । हि । आ । द्रुहि । चेरवे । विदाः । भगम् । वसुत्तये ।
उत् । वृषस्व । मघऽवन् । गोऽइष्टये । उत् ।
इन्द्र । अश्वम्ऽइष्टये ॥ ७ ॥

हे इन्द्र त्वंहि त्वंखलु चेरवे सामर्थ्याद्दातेति गम्यते अतएवागच्छ आगत्यचास्मभ्यं भगं भजनीयं धनं विदाः लभस्व दत्स्व । किमर्थं वसुत्तये अस्माकं वसुदानाय हे मघवन् गविष्टये गाइच्छते मह्यं उद्वृषस्वोत्सिञ्चस्व गामितिशेषः । तथा हे इन्द्राश्वमिष्टयेश्वैषणवते मह्यं अश्वानुद्वृषस्वोत्सिञ्चस्व देहि ॥ ७ ॥

अथ प्रगाथे द्वितीया सूक्तेष्टमी—

त्वंपुरूसहस्राणिशतानिचयूथादानायमंहसे ।
आपुरन्दरंचकृमविप्रवचसइन्द्रंगायन्तोवसे ॥ ८ ॥

त्वम् । पुरु । सहस्राणि । शतानि । च । यूथा । दानाय । मंहसे ।
आ । पुरम्ऽदरम् । चकृम । विप्रऽवचसः ।
इन्द्रम् । गायन्तः । अवसे ॥ ८ ॥

हे इन्द्र त्वं पुरु पुरूणि बहूनि सहस्राणि शतानिच यूथा गवादियूथानि दानाय यजमानविषयाय मंहसे अनुमन्यसे । यद्वा दानाय दात्रे यजमानाय मंहसे प्रयच्छसि मंहतिर्दानकर्मा । अथपरोक्षेण ब्रवीति—पुरन्दरं शत्रुपुराणां दारयितारमिन्द्रं अवसे रक्षणाय प्रीतयेवा गायन्तः स्तुवन्तो विप्रवचसः विविधप्रकृष्टवचनावयं आ आगन्तारमभिमुखंवा चकृम कुर्मः ॥ ८ ॥

अथ नवमी—

अविप्रोवायदविधद्विप्रोवेन्द्रतेवचः ।
सप्रममन्दत्वायाशतक्रतोप्राचामन्योअहंसन ॥ ९ ॥

अविप्रः । वा । यत् । अविधत् । विप्रः । वा । इन्द्र । ते । वचः ।
सः । प्र । ममन्दत् । त्वाऽया । शतक्रतो इति शतऽक्रतो ।
प्राचामन्यो इति प्राचाऽमन्यो । अहंऽसन ॥ ९॥

हे इन्द्र ते तव वचः स्तोत्रं यद्यः अविप्रोवा अमेधावी अस्तुतिकुशलोवा अविधत् कुर्यात् त्वां स्तौतीत्यर्थः सस्तोता त्वाया त्वयीच्छया साधनेन प्रममन्दत् प्रकर्षेण मोदते । हे शतक्रतो बहुकर्मन् हे प्राचामन्यो प्राचीनक्रोध अप्रतिहतक्रोधेत्यर्थः नहीन्द्रक्रोधं प्रतिहन्ति कश्चित् हे अहंसन संग्रामे अहमित्यात्मनोमहत्त्वं प्रकाशयन् यः शत्रुं संभजते सतथोक्तस्तादृशेन्द्र- ॥ ९ ॥

अथ दशमी—

उग्रबाहुर्म्रक्षकृत्वापुरंदरोयदिमेशृणवद्धवम् ।
वसूयवोवसुपतिंशतक्रतुंस्तोमैरिन्द्रंहवामहे ॥ १० ॥ १९ ॥

उग्रऽबाहुः । म्रक्षऽकृत्वा । पुरम्ऽदरः । यदि । मे । शृणवत् ।
हवम् । वसुऽयवः । वसुऽपतिम् । शतऽक्रतुम् ।
स्तोमैः । इन्द्रम् । हवामहे ॥ १० ॥ १९ ॥

उग्रबाहुः उद्गूर्णभुजो म्रक्षकृत्वा वधकर्ता शत्रूणां पुरन्दरः पुराणां दारयितेन्द्रः यदि मे हवं शृणवत् शृणुयात् तर्हि वसूयवो वसुकामावयं वसुपतिं बहुधनस्वामिनं शतक्रतुं अपरिमितप्रज्ञमिन्द्रं स्तोमैः स्तोत्रैः हवामहे आह्वयामः ॥ १० ॥

॥ इति पष्ठस्य चतुर्थे एकोनविंशोवर्गः ॥ १९ ॥

अथैकादशी—

नपापासोमनामहेनारायासोनजल्हवः ।
यदिन्न्विन्द्रंवृषणंसचासुतेसखायंकृणवामहे ॥ ११ ॥

न । पापासः । मनामहे । न । अरायासः । न । जल्हवः ।
यत् । इत् । नु । इन्द्रम् । वृषणम् । सचा । सुते ।
सखायम् । कृणवामहे ॥ ११ ॥

वयमिन्द्रं पापासः पापाः अकृतपुण्याः ब्रह्मचर्यव्रतादिरहिताः न मनामहे न मन्यामहे तथा अरायासोऽरायाः अधनाः अहविष्का वा न मनामहे न जल्हवः अज्वलनाः अनग्नयो-न मनामहे कृतव्रतनियमादिपुण्याः दानवन्तोऽग्निसहितास्त्वं स्तुमइति ऋषिरात्मानमाह । यद्दिव यस्मादेव कारणात् नु इदानीं वृषणं वर्षकमिन्द्रं सुते सोमेऽभिपुते सचा सहिताः सखायं कृणवामहै कुर्मः तस्मात्पापादिरहिताः मनामहे पापादिविशिष्टानामिन्द्रसाहाय्यकरणासंभवात् । अत्र नपापामन्यामहइत्यादिनिरुक्तम्.॥ ११ ॥

अथ द्वादशी–

उ॒ग्रंयु॑युज्म॒पृत॑नासु॒सास॒हिमृ॒णका॑तिमदा॑भ्यम् ।
वेदा॑भृ॒मं॑चि॒त्सनि॑तार॒थीत॑मो॒वा॒जिनं॒यमिदू॒नश॑त् ॥ १२ ॥

उ॒ग्रम् । यु॒यु॒ज्म॒ । पृत॑नासु । स॒स॒हिम् । ऋ॒णऽका॑तिम् ।
अदा॑भ्यम् । वेद॑ । भृ॒मम् । चि॒त् । सनि॑ता । र॒थिऽत॑मः ।
वा॒जिन॑म् । यम् । इत् । ऊँ इति॑ । नश॑त् ॥ १२ ॥

उग्रमुद्गूर्णबलमिन्द्रं युयुज्म योजयामः । कीदृशमिन्द्रं पृतनासु संग्रामेषु सासहिं शत्रूणामभिभवितारं ऋणकातिं ऋणभूतस्तुतिं यस्मै स्तुतिर्ऋणवदवश्यंक्रियते तं तादृशं अथवा ऋणवदवश्यफलप्रदस्तुतिकं अदाभ्यं केनाप्यहिंस्यं । यइन्द्रो भृमंचित् बहुष्वश्वेषु भ्रमणशीलमेव वाजिनं बलवन्तमश्वं रथीतमः रथस्वामी देवः वेद वेत्ति गृह्णाति तद्वत् सनितेन्द्रो वाजिनं हविष्मन्तं यमित् यमेव जनं बहूनां यजमानानां मध्ये नशत् व्याप्नोति तमिन्द्रमिति वै वयमितिवा योज्यं । वयं युयुज्मेति पक्षे व्यत्ययेन बहुवचनम् ॥ १२ ॥

चातुर्विंशिकेहनि माध्यन्दिनसवनेऽच्छावाकस्य यतइन्द्रेति वैकल्पिकःस्तोत्रियस्तृचः । सूत्रितञ्च । यतइन्द्रभयामहे यथागौरोऽपाकृतमिति । दुःस्वप्नदर्शनेष्येतदादिसूक्तशेषोजप्यः सूत्रितं च–यतइन्द्रभयामहइतिच सूक्तशेषम् ।

तृचे प्रथमा सूक्ते त्रयोदशी–

यत॑इन्द्र॒भया॑महे॒ततो॑नो॒अभ॑यंकृधि ।
मघ॑वञ्छ॒ग्धितव॒तन्न॑ऊ॒तिभि॒र्विद्विषो॒विमृधो॑जहि ॥ १३ ॥

---

१ नि० ३. २१ ।

यतः । इन्द्र । भयामहे । ततः । नः । अभयम् । कृधि ।
मघऽवन् । शग्धि । तव । तत् । नः । ऊतिऽभिः । वि ।
द्विषः । वि । मृधः । जहि ॥ १३ ॥

हे इन्द्र यतोहिंसकात् भयामहे वयं ततोनोस्मभ्यमभयंकृधि कुरु । हे मघवन् शग्धि शक्तोभवसि नोस्मभ्यमभयं कर्तुं तव तत्वैरूतिभीरक्षणैरक्षकैः पुरुषैः । किञ्च विजहि द्विषोस्मद्द्वेष्टॄन् विजहि मृधोस्मद्धिंसकान् ॥ १३ ॥

अथ तृचे द्वितीया सूक्ते चतुर्दशी—

त्वंहिराधस्पतेराधसोमहःक्षयस्यासिविधतः ।
तंत्वावयंमघवन्निन्द्रगिर्वणःसुतावन्तोहवामहे ॥ १४ ॥

त्वम् । हि । राधःऽपते । राधसः । महः । क्षयस्य ।
असि । विधतः । तम् । त्वा । वयम् । मघऽवन् । इन्द्र ।
गिर्वणः । सुतऽवन्तः । हवामहे ॥ १४ ॥

हे राधस्पते धनस्वामिन् त्वंखलु महो महतो राधसो धनस्य क्षयस्यच गृहस्य च वर्धयितासि खलु सामर्थ्यादिदं लभ्यते । कस्य राधसोगृहस्यच वर्धकइति । उच्यते—विधतः परिचरतो यजमानस्य । तं तादृशं त्वा त्वां वयं हे मघवन्निन्द्र गिर्वणोगीर्भिर्वननीय सुतावन्तोभिषुतसोमा हवामहे आह्वयाम ॥ १४ ॥

अथ तृचे तृतीया सूक्ते पञ्चदशी—

इन्द्रःस्पळुतवृत्रहापरस्पानोवरेण्यः ।
सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनःपुरः ॥ १५ ॥ २० ॥

इन्द्रः । स्पट् । उत । वृत्रऽहा । परःऽपाः । नः । वरेण्यः ।
सः । नः । रक्षिषत् । चरमम् । सः । मध्यमम् । सः ।
पश्चात् । पातु । नः । पुरः ॥ १५ ॥ २० ॥

अयमिन्द्रः स्पट् सर्वस्य ज्ञाता स्पशतिर्ज्ञानकर्मा उतायं वृत्रहा वृत्रहन्ता परस्पाः परस्य पालयिता नोस्माकं वरेण्यः वरणीयः सइन्द्रोनोस्माकं पुत्रमितिशेषः रक्षिषत् रक्षतु चरमं पुत्रं तथा सरक्षिषत् ।समध्यमं पुत्रं रक्षिषत् सनोस्मानपश्चात्पातु रक्षतु नः पुरः पुरस्ता द्रक्षतु ॥१५॥

॥ इति पञ्चस्य चतुर्थे विंशोवर्गः ॥ २० ॥

अथ षोडशी—

त्वंनःपश्चादधरादुत्तरात्पुरइन्द्रनिपाहिविश्वतः ।
आरेअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः ॥ १६ ॥

त्वम् । नः । पश्चात् । अधरात् । उत्तरात् । पुरः । इन्द्र ।
नि । पाहि । विश्वतः । आरे । अस्मत् । कृणुहि ।
दैव्यम् । भयम् । आरे । हेतीः । अदेवीः ॥ १६ ॥

हे इन्द्र त्वं नोस्मान्पश्चात् पश्चाद्भागात् पुरः पूर्वभागादधरादधोभागादेतदुपरिभागस्योपलक्षणं उत्तरादुत्तरभागात् एतद्दक्षिणस्याप्युपलक्षणं किंबहुना विश्वतः सर्वस्मात्प्रदेशान्निपाहि। हे इन्द्र दैव्यं भयं अस्मदस्मत्तआरे दूरे कृणुहि कुरु । तथा अदेवीरासुराणि हेतीः आयुधानि आरे कृणुहि ॥ १६ ॥

अथ सप्तदशी—

अद्याद्याश्वश्वइन्द्रत्रास्वपरेचनः ।
विश्वाचनोजरितॄन्त्सत्पतेअहादिवानक्तंचरक्षिषः ॥ १७॥

अद्यऽअद्य । श्वःऽश्वः । इन्द्र । त्रास्व । परे । च । नः ।
विश्वा । च । नः । जरितॄन् । सत्ऽपते । अहा ।
दिवा । नक्तम् । च । रक्षिषः ॥ १७ ॥

हे इन्द्र नोस्मान् अद्याद्य यद्यच्छब्दवाच्यमहरस्ति तत्र । सर्वत्र एवं । श्वश्वः त्रास्व रक्ष। तथा परेच परस्मिन्नुत्तरेहनि च त्रास्व । हे सत्पते सतांपाल विश्वा सर्वाण्यप्यहान्यहानि सर्वेष्वप्यहःसु नोस्मान् जरितॄन् रक्षिषो रक्षसि । तथा दिवानक्तंच रक्षिषः रक्षसि रक्षवा ॥ १७ ॥

अथाष्टादशी–

प्रभङ्गीशूरोमघवातुवीमघःसंमिश्लोवीर्यायकम् ।
उभातेबाहूवृषणाशतक्रतोनियावज्रंमिमिक्षतुः॥१८॥२१॥

प्रऽभङ्गी । शूरः । मघऽवा । तुविऽमघः । सम्ऽमिश्लः ।
वीर्याय । कम् । उभा । ते । बाहू इति । वृषणा । शतक्रतो
इति शतऽक्रतो । नि । या । वज्रम् । मिमिक्षतुः ॥ १८ ॥ २१ ॥

अयं मघवेन्द्रः प्रभंगी प्रभञ्जनशीलः शूरः तुवीमघः प्रभूतधनः संमिश्लः सम्यग्मिश्र-यिता किमर्थं वीर्याय शत्रूणां वीर्यकरणाय कमितिपूरणः एवं महानुभावोभवति । अथ प्रत्य-क्षवादः–हे इन्द्र ते उभा उभावपि बाहू वृषणा वर्षकौ कामानां हे शतक्रतो बहुप्रज्ञ या यौ वज्रमायुधं निमिमिक्षतुः परिगृह्णीतः ॥ १८ ॥

॥ इति षष्ठस्य चतुर्थे एकविंशोवर्गः ॥ २१ ॥

प्रोअस्माइति द्वादशर्चं तृतीयं सूक्तं काण्वस्य प्रगाथस्यार्षं पञ्चपदापंक्तिः सप्तम्याद्या-स्तिस्रोबृहत्यः इन्द्रोदेवता । अत्रानुक्रमणिका–प्रोअस्मैद्वादश प्रगाथः पाङ्क्तं सप्तम्याद्याश्च ति-स्रोबृहत्यइति । विनियोगोलैंगिकः ।

तत्र प्रथमा–

प्रोअस्माउपस्तुतिंभरतायज्जुजोषति ।
उक्थैरिन्द्रस्यमाहिनंवयोवर्धन्तिसोमिनोभद्राइन्द्रस्यरातयः ॥ १ ॥

प्रो इति । अस्मै । उपऽस्तुतिम् । भरत । यत् । जुजोषति । उक्थैः ।
इन्द्रस्य । माहिनम् । वयः । वर्धन्ति । सोमिनः । भद्राः ।
इन्द्रस्य । रातयः ॥ १ ॥

अस्माइन्द्रायोपस्तुतिंउपेत्यक्रियमाणांस्तुतिं प्रोभरत प्रकर्षेण संपादयत हे ऋत्विजः । य-दि अयमिन्द्रो जुजोषति सेवते तर्हि भरतेति । सोमिनः सोमयियस्येन्द्रस्य स्वभूतं माहिनं म-हत् वयोन्नं सोमलक्षणं उक्थैः शस्त्रैः वर्धन्ति वर्धयन्ति भद्राः स्तुत्यानि खल्विन्द्रस्य रातयो दानानि ॥ १ ॥

अथ द्वितीया—

अयुजोअसमोनृभिरेकःकृष्टीरयास्यः ।
पूर्वीरतिप्रवावृधेविश्वाजातान्योजसाभद्राइन्द्रस्यरातयः ॥ २ ॥

अयुजः । असमः । नृऽभिः । एकः । कृष्टीः । अयास्यः ।
पूर्वीः । अति । प्र । वुवृधे । विश्वा । जातानि ।
ओजसा । भद्राः । इन्द्रस्य । रातयः ॥ २ ॥

अयुजः असहायः असमः असदृशोन्यैर्नृभिर्देवैः एकोमुख्यः अयास्यः उपक्षपयितुमशक्यः पूर्वीः कृष्टीः पूर्वतन्यः प्रजाः अतिप्रववृधे अति प्रवर्धते । किञ्च विश्वा सर्वाणि जातानि इदानीमुत्पन्नानि ओजसा बलेनातिप्रवावृधे भद्राइन्द्रस्यरातयः । अथवा यद्वृभिरयुजोसहायोन्यैरसदृशएकएव सन् पूर्वीः प्रजाः जातानि सर्वाण्यप्यतिक्रम्य वर्धते । शिष्टं समानम् ॥ २ ॥

अथ तृतीया—

अहितेनचिदर्वताजीरदानुःसिषासति ।
प्रवाच्यमिन्द्रतत्तवंवीर्याणिकरिष्यतोभद्राइन्द्रस्यरातयः ॥ ३ ॥

अहितेन । चित् । अर्वता । जीरऽदानुः । सिसासति ।
प्रऽवाच्यम् । इन्द्र । तत् । तव । वीर्याणि ।
करिष्यतः । भद्राः । इन्द्रस्य । रातयः ॥ ३ ॥

अयं जीरदानुः क्षिप्रप्रदानइन्द्रः अहितेनायोजितेनाप्रेरितेनचिदर्वतारणवताश्वेन सिषासति संभक्तुमिच्छति तत् तस्माद्धे इन्द्र वीर्याणि सामर्थ्यानि करिष्यतस्तव महत्त्वं प्रवाच्यं स्तुत्यमित्यर्थः ॥ ३ ॥

अथ चतुर्थी—

आयाहिकृणवामतइन्द्रब्रह्माणिवर्धना ।
येभिःशविष्ठचाकनोभद्रमिहश्रवस्यतेभद्राइन्द्रस्यरातयः ॥ ४ ॥

आ । याहि । कृणवांम । ते । इन्द्र । ब्रह्मांणि । वर्धना ।
येभिः । शविष्ठ । चाकनः । भद्रम् । इह । श्रवस्यते ।
भद्राः । इन्द्रस्य । रातयः ॥ ४ ॥

हे इन्द्र आयात्यागच्छ ते कृणवाम किं ब्रह्माणि परिवृढानि स्तुतिलक्षणानि कर्माणि । कीदृशानि वर्धना उत्साहवर्धकानि । येभिर्यैः कर्मभिः हे शविष्ठातिशयेन बलवन्निन्द्र चाकनः कामयसे । किं भद्रं कर्तुं । कस्मै श्रवस्यतेऽन्नमिच्छते स्तोत्रे ॥ ४ ॥

अथ पञ्चमी–

धृषतश्चिद्धृषन्मनःकृणोषीन्द्रयत्त्वम् ।
तीव्रैःसोमैःसपर्यतोनमोभिःप्रतिभूषतोभद्राइन्द्रस्यरातयः ॥ ५ ॥

धृषतः । चित् । धृषत् । मनः । कृणोषि । इन्द्र । यत् । त्वम् ।
तीव्रैः । सोमैः । सपर्यतः । नमःऽभिः । प्रतिऽभूषतः ।
भद्राः । इन्द्रस्य । रातयः ॥ ५ ॥

हे इंद्र धृषतश्चिद् धृष्टादपि धृषद् धृष्टं मनः कृणोषि अत्यन्तं धृष्टं करोषि। यद्यस्मात्त्वं तीव्रैः मदजनकैः सोमैः सपर्यतः पूजयतो नमोभिर्नमस्कारैश्च प्रतिभूषतोऽलंकुर्वतो यजमानस्य अभिमतं दित्ससीतिशेषः ॥ ५ ॥

अथ षष्ठी–

अवचष्टऋचीषमोवताँइवमानुषः ।
जुष्ट्वीदक्षस्यसोमिनःसखायंकृणुतेयुजंभद्राइन्द्रस्यरातयः ॥६॥ २२॥

अव । चष्टे । ऋचीषमः । अवतान्ऽइव । मानुषः । जुष्ट्वी ।
दक्षस्य । सोमिनः । सखायम् । कृणुते । युजम् ।
भद्राः । इन्द्रस्य । रातयः ॥ ६ ॥ २२ ॥

अयमिन्द्रः ऋचीषमो ऋचा स्तुत्या समः तथापरिच्छिन्नः सन्नवचष्टे पश्यति अनुग्रहेणा-स्मान् । तत्र दृष्टान्तः–मानुषो मनुष्यः अवतानवतान्कूपादिप्रदेशानिव दृष्ट्वाच जुष्ट्वी प्रीणीयं दक्ष

प्रवृद्धस्य सोमिनो यजमानस्य युजं युज्यमानात्मानं सखायं कृणुते करोति तस्याभिमतं साधयतीत्यर्थः। अथवा तृषितोमनुष्यो जलपूर्णानवटानिव स्तुतः सन्नश्नुवि सोमं पातुं। पश्चादवेक्षितं तं युज्यमानं सोमं जुष्टी सेवित्वा दक्षस्य सोमिनः सखायं कृणुते कुरुते ॥ ६ ॥

॥ इति षष्ठस्य चतुर्थे द्वाविंशोवर्गः ॥ २२ ॥

अथ सप्तमी–

विश्वेतइन्द्रवीर्यंदेवाअनुक्रतुंददुः।
भुवोविश्वस्यगोपतिःपुरुष्टुतभद्राइन्द्रस्यरातयः ॥ ७ ॥

विश्वे। ते। इन्द्र। वीर्यम्। देवाः। अनु। क्रतुम्। ददुः।
भुवः। विश्वस्य। गोऽपतिः। पुरुऽस्तुत।
भद्राः। इन्द्रस्य। रातयः ॥ ७ ॥

हे इन्द्र ते तव वीर्यं सामर्थ्यं क्रतुं प्रज्ञाञ्च अनु अनुसृत्य विश्वे सर्वे देवाः दधुः धारयन्ति वीर्यं प्रज्ञांच तव बलेन प्रज्ञयाच तेपि बलिनः प्रज्ञावन्तश्च भवन्तीत्यर्थः। तादृशस्त्वं गोपतिः प्रसिद्धानां गवामुदकानां स्तुतिवचसोवा पतिर्भुवोभवसि विश्वस्येत्येतत्पदांतर्गतस्यापि गोशब्दस्य विशेषः। हे पुरुष्टुत बहुभिः स्तुतेन्द्र भवसीति समन्वयः ॥ ७ ॥

अथाष्टमी–

गृणेतदिन्द्रतेशवउपमंदेवतातये।
यद्धंसिवृत्रमोजसाशचीपतेभद्राइन्द्रस्यरातयः ॥ ८ ॥

गृणे। तत्। इन्द्र। ते। शवः। उपऽमम्। देवऽतातये।
यत्। हंसि। वृत्रम्। ओजसा। शचीऽपते।
भद्राः। इन्द्रस्य। रातयः ॥ ८ ॥

हे इन्द्र ते तव तच्छवोबलं उपमं अन्तिकं देवतातये यजमानाय यज्ञार्थंवा गृणे स्तुवे। यद्यस्माद्धेशचीपते वृत्रं ओजसा बलेन हंसि तस्मात्ते शवोगृणे ॥ ८ ॥

अथ नवमी–

समनेवववपुष्यतःकृणवन्मानुषायुगा।
विदेतदिन्द्रश्चेतनमधश्रुतोभद्राइन्द्रस्यरातयः॥ ९॥

समनाऽइव। वपुष्यतः। कृणवत्। मानुषा। युगा।
विदे। तत्। इन्द्रः। चेतनम्। अध। श्रुतः। भद्राः।
इन्द्रस्य। रातयः॥ ९॥

समनेव समानमनस्का योषिदिव सा यथा वपुष्यतो वपुरिच्छतः पुरुषान् कृणवत्करोति स्ववशान् एवमयमिन्द्रो मानुषा मनुष्यान् युगा युगानि कालान्संवत्सरायनर्तुमासादीन्विदे लंभयति तद्युगनिर्माणात्मकं कर्म इन्द्रश्चेतनं सर्वस्य प्रज्ञापकं कृतवानिति शेषः। अध अथैवं कृत्वा श्रुतः सर्वत्र रूपातोभूत्॥ ९॥

अथ दशमी–

उज्जातमिन्द्रतेशवउत्त्वामुत्तवक्रतुम्।
भूरिगोभूरिवावृधुर्मघवन्तवशर्मणिभद्राइन्द्रस्यरातयः॥ १०॥

उत्। जातम्। इन्द्र। ते। शवः। उत्। त्वाम्। उत्। तव। क्रतुम्।
भूरिगो इति भूरिऽगो। भूरि। ववृधुः। मघऽवन्। तव।
शर्मणि। भद्राः। इन्द्रस्य। रातयः॥ १०॥

हे इन्द्र उत्।अयं व्यवहितेनापि ववृधुरित्यनेन संबध्यते। उद्वर्धयन्ति सोमेन। किं ते तवजातमुत्पन्नं शवोबलं। नकेवलं बलं किन्तु त्वा मुद्वर्धयन्ति स्तुत्यादिना पश्चात्तव क्रतुं प्रज्ञां त्वानुकूलां उद्वर्धयन्ति भूरीत्येतत्पदमत्याख्यातं संबध्यते अति प्रभूतमुद्वर्धयन्तीत्यर्थः। कएवंकुर्वन्तीति उच्यते–हे भूरिगो बहुपशो हे मघवन्धनवन्निन्द्र तव शर्मणि त्वदीये सुखे ये वर्तन्ते तेच कुर्वन्तीति॥ १०॥

अथैकादशी–

अहंचत्वंचवृत्रहन्त्संयुज्यावसनिभ्यआ।
अरातीवाचिदद्रिवोनुनौशूरमंसतेभद्राइन्द्रस्यरातयः॥ ११॥

अहम् । च । त्वम् । च । वृत्रऽहन् । सम् । युज्याव । सनिऽभ्यः ।
आ । अरातिऽवा । चित् । अद्रिऽवः । अनु । नौ । शूर ।
मंसते । भद्राः । इन्द्रस्य । रातयः ॥ ११ ॥

हे वृत्रहन्निन्द्र त्वञ्चाहञ्च संयुज्याव संगतौ भवाव । किंपर्यन्तमिति उच्यते—सनिभ्य आ यावता कालेन धनानि लभ्यन्ते तावत्कालम् । नौ संगतयोरावयोः हे अद्रिवो वज्रवन्निन्द्र हे शूर अरातीवा चित् अदानोपि जनस्त्वद्दत्तधनस्य अनुमंसते अनुमतिं करोति ॥ ११ ॥

अथ द्वादशी—

सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥ १२ ॥ २३ ॥

सत्यम् । इत् । वै । ऊँ इति । तम् । वयम् । इन्द्रम् । स्तवाम । न ।
अनृतम् । महान् । असुन्वतः । वधः । भूरि । ज्योतींषि । सुन्वतः ।
भद्राः । इन्द्रस्य । रातयः ॥ १२ ॥ २३ ॥

वयं प्रगाथास्तमिन्द्रं सत्यमिव सत्यमेव स्तवाम नानृतं । वैइति निश्चयेन । अनृतं न स्तवाम । अस्माभिरुक्तागुणाः सत्याएवसन्तु नानृताइत्यर्थः । स्तूयमानस्येन्द्रस्य सम्बन्धीअसुन्वतोयज्वनोवधो महान् प्रभूतोभवति । भूरिज्योतींषि बहून् सोमान् सुन्वतोभिषवं कुर्वतो यजमानस्येन्द्रकृतोनुग्रहो महान्भवतीत्यर्थः ॥ १२ ॥

॥ इति पञ्चस्य चतुर्थे त्रयोविंशोवर्गः ॥ २३ ॥

सपूर्व्यइति द्वादशर्चं चतुर्थं सूक्तं । अत्रानुक्रमणिका—सपूर्व्योगायत्रमाद्यास्तिस्रोद्विद्वे समीचानुष्टुभो गायत्रेन्त्यादैवी त्रिष्टुबिति । प्रथमा चतुर्थी पञ्चमी सप्तम्यश्चतस्रोनुष्टुभः अस्मेरुद्राइत्यन्त्यात्रिष्टुप् अवशिष्टागायत्र्यः अन्त्यायादेवादेवता शिष्टाऐन्द्र्यः पृष्ठेहनिमरुत्वतीयस्याद्यस्तृचःप्रतिपत् । सूत्रितंच—सपूर्व्योमहानांत्रमइन्द्रस्यसोमाइतिमरुत्वतीयस्यप्रतिपदनुचराविति ।

तत्र प्रथमा—

सपूर्व्योमहानांवेनःक्रतुभिरानजे ।
यस्यद्वारामनुष्पितादेवेषुधियआनजे ॥ १ ॥

सः । पूर्व्यः । मुहानाम् । वेनः । क्रतुऽभिः । आनुजे । यस्यं । द्वारां ।
मर्नुः । पिता । देवेषुं । धियंः । आनुजे ॥ १ ॥

सइन्द्रः पूर्व्योमुख्योमहानां पूज्यानां यजमानानां क्रतुभिः कर्मभिर्निमित्तभूतैः वेनः कान्तस्तेषां हविः कामयमानः आनजे आगच्छति । यस्येन्द्रस्य द्वारा द्वाराणि प्राप्त्युपायानि धियः कर्माणि देवेष्वेतेषुमध्ये पिता सर्वेषां पालको मनुरानजे प्राप । आनजिःप्राप्तिकर्मा ॥ १ ॥

अथ द्वितीया--

दिवोमानंनोत्संदन्त्सोमंपृष्ठासोअद्रंयः ।
उक्थाब्रह्मंचशंस्यां ॥ २ ॥

दिवः । मानंम् । न । उत् । सुदन् । सोमंऽपृष्ठासः ।
अद्रंयः । उक्था । ब्रह्मं । च । शंस्यां ॥ २ ॥

दिवो द्युलोकस्य मानं निर्मातारमिन्द्रं नोत्सदन् नोत्सृजन्तु । के सोमपृष्ठासः सोमस्पष्टारः सोमाभिषवकर्तारः अद्रयोग्रावाणः । किञ्चोक्था उक्थानि शस्त्राणि ब्रह्मच ब्रह्माणि स्तोत्राणि शंस्या शंसनीयानि भवन्तीतिशेषः । यद्वा यानि स्तोत्राणि शस्त्राणि च सन्ति तानीन्द्रं नोत्सृजन्त्विति समन्वयः ॥ २ ॥

अथ तृतीया--

सविद्वाँअङ्गिरोभ्यइन्द्रोगाअंवृणोदपं ।
स्तुषेतदंस्यपौंस्यम् ॥ ३ ॥

सः । विद्वान् । अङ्गिरःऽभ्यः । इन्द्रः । गाः । अवृणोत् ।
अपं । स्तुषे । तत् । अस्य । पौंस्यम् ॥ ३ ॥

सविद्वानुपायज्ञः इन्द्रोङ्गिरोभ्यः तेषामर्थाय गाः पणिभिरपहृताःपिहिता अपावृणोत् अपवारितवान् तत्तादृशमस्य पौंस्यं पुंस्त्वं सामर्थ्यं स्तुषे स्तौमि ॥ ३ ॥

अथ चतुर्थी–

सप्रत्नथाकविवृधइन्द्रोवाकस्यवक्षणिः ।
शिवोअर्कस्यहोमन्यस्मत्रागन्त्ववसे ॥ ४ ॥

सः । प्रत्नऽथा । कविऽवृधः । इन्द्रः । वाकस्य । वक्षणिः । शिवः ।
अर्कस्य । होमनि । अस्मऽत्रा । गन्तु । अवसे ॥ ४ ॥

सइन्द्रः प्रत्नथा प्रत्नवत् पूर्वस्मिन्काले यथा तद्वदिदानीमपि कविवृधः मेधाविनां स्तोतृणां वर्धयिता वाकस्य स्तोतुः वक्षणिः वोढा शिवः सुखकरः अर्कस्य अर्कमन्नं अर्चनीयत्वादर्चनसाधनत्वाद्वा तादृशस्य सोमस्य होमनि होमे सअस्मत्रा अस्मासु निमित्तभूतेषु अवसे रक्षणाय गन्तु गच्छतु ॥ ४ ॥

अथ पंचमी–

आदूनुतेअनुक्रतुंस्वाहावरस्ययज्यवः ।
श्वात्रमर्काअनूषतेन्द्रगोत्रस्यदावने ॥ ५ ॥

आत् । ऊँ इति । नु । ते । अनु । क्रतुम् । स्वाहा । वरस्य । यज्यवः ।
श्वात्रम् । अर्काः । अनूषत । इन्द्र । गोत्रस्य । दावने ॥ ५ ॥

आदु अनन्तरमेव नु अद्य हे इन्द्र ते तव क्रतुं कर्म अनुक्रमेण अनूषतेति संबंधः ।अनुक्रमेण स्तुवन्ति के स्वाहावरस्य स्वाहादेव्याः पतेरग्नेः यज्यवोयष्टारः तदर्थमग्नौ यागं कुर्वन्त इत्यर्थः । तादृशाअर्काः अर्चयितारः स्तोतारः श्वात्रमिति क्षिप्रनाम अन्यदेवतास्तुतिरूपं विलंबमकृत्वातिशीघ्रमविदीर्घं स्तुवन्तीत्यभिप्रायः । किमर्थं स्तुवन्तीत्युच्यते–गोत्रस्य दावने धनस्य दानाय ॥ ५॥

अथ षष्ठी–

इन्द्रेविश्वानिवीर्याकृतानिकर्त्वानिच ।
यमर्काअध्वरंविदुः ॥ ६ ॥ २४ ॥

इन्द्रे । विश्वानि । वीर्या । कृतानि । कर्त्वानि । च ।
यम् । अर्काः । अध्वरम् । विदुः ॥ ६ ॥ २४ ॥

अस्मिन्निन्द्रे विश्वानि सर्वाणि वीर्या वीर्याणि सामर्थ्यानि कृतानि कर्त्वानि कर्तव्यानि च वर्तन्तइतिशेषः। यमिन्द्रं अर्काः स्तोतारः अध्वरमहिंसकं विदुर्जानन्ति तस्मिन्निन्द्रइति॥६॥

॥ इति षष्ठस्य चतुर्थे चतुर्विंशोवर्गः ॥ २४ ॥

पञ्चमेहनि मरुत्वतीये यत्पाञ्चजन्ययेतितृचः प्रतिपत्। सूत्रितंच—यत्पांचजन्ययाविशे-न्द्रइत्सोमपाएकइति मरुत्वतीयस्यप्रतिपदनुचराविति।

सैषा सप्तमी—

यत्पाञ्चजन्यया विशेन्द्रेघोषा असृक्षत ।
अस्तृणाद्बर्हणा विपो३र्यो मानस्य सक्षयः ॥ ७ ॥

यत् । पाञ्चऽजन्यया । विशा । इन्द्रे । घोषाः । असृक्षत ।
अस्तृणात् । बर्हणा । विपः । अर्यः । मानस्य । सःऽक्षयः ॥ ७ ॥

यत् यदा पांचजन्यया निषादपंचमाश्चत्वारोवर्णाः पंचजनास्तत्र भवयाविशा प्रजया इन्द्रे घोषाः स्तुतयोसृक्षत सृज्यन्ते तदानीमयमिन्द्रोऽस्तृणात् हिनस्ति शत्रून् बर्हणा स्वमहत्वे नानन्यसहायेनेत्यर्थः। तादृशः सअर्यः स्वामी इन्द्रोविपो मेधाविनः स्तोतुर्मम मानस्य पूजायाः सत्कारस्य क्षयोनिवासो भवति॥७॥

अथाष्टमी—

इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या । प्रावश्चक्रस्य वर्तनिम् ॥ ८ ॥

इयम् । ऊँ इति । ते । अनुऽस्तुतिः । चकृषे । तानि । पौंस्या ।
प्र । आवः । चक्रस्य । वर्तनिम् ॥ ८ ॥

इयमिदानीं क्रियमाणा अनुष्टुतिः अनुकूलास्तुतिः ते तव स्वभूता। कुतस्तवेति तानि प्रसिद्धानि वृत्रवधादीनि पौंस्या पुंस्त्वानि यतश्चकृषे अतस्तइत्यर्थः। हे इन्द्र चक्रस्य रथा-

धारस्य वर्तनिं मार्गं मावः मारक्षः । अथास्मद्यज्ञगमनाय रक्षःकृता चक्रमार्गबाधा यथान भवति तथारक्षसीत्यर्थः ॥ ८ ॥

अथनवमी—

अस्यवृष्णोव्योदनउरुक्रमिष्टजीवसे । यवंनपश्वआददे ॥ ९ ॥

अस्य । वृष्णः । विऽओदने । उरु । क्रमिष्ट । जीवसे ।
यवम् । न । पश्वः । आ । ददे ॥ ९ ॥

अस्यवृष्णो वर्षितुरिन्द्रस्य व्योदने विविधेन्ने लब्धेसति जीवसे जीवनाय उरुविस्तीर्णं क्रमिष्ट पदनिधानं करोति सर्वोलोकः । अथवा इन्द्रस्य स्वभूतेनेदन्नधन्येवा सति पदंन्यासं करोति तथाकृत्वा यवंन पश्वः यवं पशवइव सर्वोजनः आददे आदत्ते स्तुतादस्मात् ॥ ९ ॥

अथ दशमी—

तद्दधानाअवस्यवोयुष्माभिर्दक्षपितरः । स्याममरुत्वतोवृधे ॥ १० ॥

तत् । दधानाः । अवस्यवः । युष्माभिः । दक्षऽपितरः ।
स्याम । मरुत्वतः । वृधे ॥ १० ॥

तत्स्तोत्रं दधानाः धारयन्तः अवस्यवो रक्षाकामावयं हे ऋत्विजो युष्माभिः सहिता इतिवायोज्यम् तादृशादक्षपितरः दक्षोन्नं तस्यपितरः पालकाः स्वामिनः स्याम । किमर्थं मरुत्वतोमरुद्भिःतद्वतइन्द्रस्य वृधे वर्धनाय यागाय ॥ १० ॥

अथैकादशी—

बळृत्वियायधाम्नऋक्वभिःशूरनोनुमः । जेषामेन्द्रत्वयायुजा ॥ ११ ॥

बट् । ऋत्वियाय । धाम्ने । ऋक्वऽभिः । शूर । नोनुमः ।
जेषाम । इन्द्र । त्वया । युजा ॥ ११ ॥

बट् सत्यं ऋत्वियाय ऋतौभवाय ऋतुशब्दोयागकालोपलक्षकः यागकाले प्रादुर्भूताय धाम्ने कल्याणतेजसे तुभ्यं हे शूरेन्द्र ऋक्वभिर्मन्त्रैर्नोनुमः अतिशयेन स्तुमः हे इन्द्र स्तुतेन त्वया युजा सहायभूतेन जेषाम जयेम शत्रून् ॥ ११ ॥

अथ द्वादशी—

अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ।
यःशंसतेस्तुवतेधायिपज्रइन्द्रज्येष्ठाअस्माँअवन्तुदेवाः ॥ ॥१२ २५॥

अस्मे इति । रुद्राः । मेहना । पर्वतासः । वृत्रऽहत्ये । भरऽहूतौ ।
सऽजोषाः । यः । शंसते । स्तुवते । धायि । पज्रः । इन्द्रऽज्येष्ठाः ।
अस्मान् । अवन्तु । देवाः ॥ १२ ॥ २५ ॥

अस्मे अस्मान् रुद्राः मेहना उदकसेचनयुक्ताः पर्ववासो मेघाश्च वृत्रहत्ये वृत्रहननसाधने भरहूतौ संगामाह्वाने सजोषाः अस्मत्समानप्रीतिश्च यइन्द्रः शंसते शस्त्रंपठते स्तुवते स्तोत्रं कुर्वतेच यजमानाय पज्रोबलवान्वेगवान् वा धायि गच्छति सइन्द्रश्च इमेइन्द्रज्येष्ठा देवाअस्मानवन्तु रक्षंतु । अस्मानितिपूरणः । अथवैवंयोज्यं रुद्रा रुद्रपुत्रा मेहना सेचनेनयुक्ताः पर्वता पर्वतसदृशाः पूरणवन्तः प्रीणनवन्तोवा । पर्वपुनःपृणातेः प्रीणातेर्वेतिनिरुक्तम् । वृत्रहत्येभरहूतौ सजोषाः सजोषसः सहायभूता मरुतोदेवा इन्द्रज्येष्ठाः उक्तलक्षणइन्द्रश्चास्मानवन्त्विति ॥ १२॥

॥ इति षष्ठस्य चतुर्थे पञ्चविंशोवर्गः ॥ २५ ॥

उत्त्वामन्दन्त्विति द्वादशर्चं पञ्चमं सूक्तं प्रगाथस्यार्षं प्रागुक्तपरिभाषया गायत्रमैन्द्रं । उत्त्वेत्यनुक्रमणिका । विनियोगोलैङ्गिकः ।

तत्र प्रथमा—

उत्त्वामन्दन्तुस्तोमाःकृणुष्वराधोअद्रिवः ।
अवब्रह्मद्विषोजहि ॥ १ ॥

उत् । त्वा । मन्दन्तु । स्तोमाः । कृणुष्व । राधः । अद्रिऽवः ।
अव । ब्रह्मऽद्विषः । जहि ॥ १ ॥

हे इन्द्र त्वा त्वां स्तोमाः स्तुतय उत् उत्कृष्टं मन्दन्तु मादयन्तु । कृणुष्व कुरु राधोन्नं हे अद्रिवो वज्रवन्निन्द्रास्मभ्यं । किञ्च ब्रह्मद्विषो ब्राह्मणद्वेष्टॄनव जहि ॥ १ ॥

---

१ नि० १ २० ।

अथ द्वितीया–

पदापणीँरराधसोनिबाधस्वमहाँअसि ।
नहित्वाकश्चनप्रति ॥ २ ॥

पदा । पणीन् । अराधसः । नि । बाधस्व । महान् ।
असि । नहि । त्वा । कः । चन । प्रति ॥ २ ॥

पणीन् लुब्धानराधसो यष्टव्यधनरहितान् केवलधनान् पदा पादेनाविक्रम्य नि नितरां बाधस्व । कुतः यतस्त्वं महान् असि भवसि त्वा त्वां तव कश्चन कश्चिदपि देवः असुरो मनुष्योवा प्रति प्रतिनिधिः सदृशः नह्यस्ति खलु ॥ २ ॥

अथ तृतीया–

त्वमीशिषेसुतानामिंद्रत्वमसुतानाम् ।
त्वंराजाजनानाम् ॥ ३ ॥

त्वम् । ईशिषे । सुतानाम् । इन्द्र । त्वम् । असुतानाम् ।
त्वम् । राजा । जनानाम् ॥ ३ ॥

हे इन्द्र त्वं सुतानामभिषुतानां सोमानामीशिषे ईश्वरोभवसि तथा त्वमसुतानां वल्लयाकारे वर्तमानानां चेशिषे त्वं जनानां सर्वेषां राजाभवसि ॥ ३ ॥

अथ चतुर्थी–

एहिप्रेहिक्षयोदिव्या३घोषंश्चर्षणीनाम् ।
ओभेपृणासिरोदसी ॥ ४ ॥

आ । इहि । प्र । इहि । क्षयः । दिवि । आऽघोषन् । चर्षणीनाम् ।
आ । उभे इति । पृणासि । रोदसी इति ॥ ४ ॥

हे इन्द्र एहि आगच्छ । तथा प्रेहि प्रगच्छ । दिवि द्युलोकात् किं क्षयोनिवासः । किंकुर्वन् आघोषं शब्दं कुर्वन् । किमर्थं चर्षणीनां मनुष्याणां अर्थाय । अथवा हविः स्वीकृत्य प्रेहि सुखे-

न गच्छ दिवमाघोषन् यजमानं स्तुवन् वा रोदसी द्यावापृथिव्यौ आपृणासि आपूरयसि ते-जसा वृष्ट्या वा ॥ ४ ॥

अथ पञ्चमी–

त्वंचित्पर्वतंगिरिंशतवंतंसहस्रिणम् ।
विस्तोतृभ्योरुरोजिथ ॥ ५ ॥

त्वम् । चित् । पर्वतम् । गिरिम् । शतऽवन्तम् । सहस्रिणम् ।
वि । स्तोतृऽभ्यः । रुरोजिथ ॥ ५ ॥

हे इन्द्र त्वं त्यं चित् तं चिदिति पूरणः पर्वतं पर्ववन्तं गिरिं मेघं उभयोर्मेघनामत्वादेको योगरूढोद्रष्टव्यः शतवन्तं शतोदकवन्तं तथा सहस्रिणं अपरिमितवृष्टिं मेघं स्तोतृभ्योर्थाय विरुरोजिथ विरुज वज्रेण ॥ ५ ॥

अथ षष्ठी–

वयमुंत्वादिवांसुतेवयंनक्तंहवामहे ।
अस्माकंकाममापृण ॥ ६ ॥ २६ ॥

वयम् । ऊँ इति । त्वा । दिवा । सुते । वयम् । नक्तम् । हवामहे ।
अस्माकम् । कामम् । आ । पृण ॥ ६ ॥ २६ ॥

हे इन्द्र वयं त्वा त्वां दिवा अहनि सुते सोमेभिषुते हवामहे आह्वयामः तथा वयं नक्तं हवामहे । आहूतः आगत्यास्माकं काममापृणापूरय ॥ ६ ॥

॥ इति षष्ठस्य चतुर्थे षड्विंशोवर्गः ॥ २६ ॥

अथ सप्तमी–

क्वऽस्यवृषभोयुवांतुविग्रीवोअनानतः ।
ब्रह्माकस्तंसपर्यति ॥ ७ ॥

क्व । स्यः । वृषभः । युवा । तुविऽग्रीवः । अनानतः ।
ब्रह्मा । कः । तम् । सपर्यति ॥ ७ ॥

स्यः सावृषभोवार्पिता युवा नित्यतरुणः तुविग्रीवः विस्तीर्णकन्धरः. अनानतः कदाचि-दप्यनयनतः इन्द्रः क्व कुत्र वर्तते इति कोजानातीत्यर्थः । को ब्रह्मा · स्तोता तमिन्द्रं सपर्यति पूजयति ॥ ७ ॥

अथाष्टमी–

कस्यंस्वित्सवंनंवृषांजुजुष्वाँअवंगच्छति ।
इन्द्रंकउंस्विदाचके ॥ ८ ॥

कस्यं । स्वित् । सवंनम् । वृषां । जुजुष्वान् । अवं । गच्छति ।
इन्द्रम् । कः । ॐ इतिं । स्वित् । आ । चके ॥ ८ ॥

कस्य स्वित्सवनं स्विदिति विचिकित्सायां वृषा वर्षितेन्द्रो जुजुष्वान् प्रीयमाणोवगच्छति कउ कोवा यजमानइन्द्रं आचके जानाति स्तोतुं स्विदितिपूरणः ॥ ८ ॥

अथ नवमी–

कंतेदानाअंसक्षतवृत्रंहन्कंसुवीर्या ।
उक्थेकउंस्विदन्तंमः ॥ ९ ॥

कम् । ते । दानाः । असक्षत । वृत्रंऽहन् । कम् । सुऽवीर्या ।
उक्थे । कः । ॐ इतिं । स्वित् । अन्तंमः ॥ ९ ॥

के त्वां दानाः यजमानैर्दत्ताः असक्षत सेवन्ते । हे वृत्रहन् वृत्रस्य हन्तरिन्द्र कं कीदृशं त्वां उक्थे शस्त्रे सुवीर्या शोभनवीर्याणि स्तोत्राणि असक्षत कउस्विद् अन्तमो कोवान्तिकतमो भवति युद्धे ॥ ९ ॥

द्वितीयपर्याये होतुः शस्त्रे अयंतेमानुषइति तृचोनुरूपः । सूत्रितश्च । अयंतेमानुषेजन-उद्वेदभीति ।

सैषा तृचे प्रथमा सूक्ते दशमी–

अयंतेमानुषेजनेसोमःपूरुषुसूयते ।
तस्येहिप्रद्रंवापिबं ॥ १० ॥

अयम् । ते । मानुषे । जने । सोमः । पूरुषु । सूयते ।
तस्य । आ । इहि । प्र । द्रव । पिब ॥ १० ॥

अयं सोमस्ते त्वदर्थं तव स्वभूतो वा पूरुषु मनुष्येषु मध्ये मानुषे जन मयि सूयते। अथवा पूरुनामसु राजसु सूयते तस्य तमित्यर्थः तमेहि आगच्छ आगत्यच प्रद्रव ग्रहसमीपं तथा कृत्वा पिब तं सोमम् ॥ १० ॥

अथ तृचे द्वितीया सूक्ते एकादशी—

अयंतेशर्यणावतिसुषोमायामधिप्रियः।
आर्जीकीयेमदिन्तमः ११ ॥

अयम् । ते । शर्यणाऽवति । सुऽसोमायाम् । अधि ।
प्रियः । आर्जीकीये । मदिन्ऽतमः ॥ ११ ॥

अयमस्माभिरभिषुतः सोमः ते त्वां मदिन्तमोमादयितृतमोयं अधिश्रितः आश्रितः। कुत्रेति तदुच्यते शर्यणावति कुरुक्षेत्रस्य जघनार्धभवे शरवणोपेते सरसि। तत्सरः कुत्रवर्ततइति उच्यते—सुषोमायां एतन्नामिकायां नद्यां। साच कुत्र वर्ततइति तदुच्यते—आर्जीकीयेएतन्नामके देशे। एवमुक्तप्रकारेणात्यन्तदूरदेशे वर्तते यः सोमः सएवायमभिषुतं पिबेति उत्तरत्रान्वयः ॥ ११ ॥

अथ तृचे तृतीया सूक्ते द्वादशी—

तमद्यराधसेमहेचारुंमदायघृष्वये।
एहीमिन्द्रद्रवापिब ॥ १२ ॥ २७ ॥

तम् । अद्य । राधसे । महे । चारुम् । मदाय । घृष्वये ।
आ । इहि । ईम् । इन्द्र । द्रव । पिब ॥ १२ ॥ २७ ॥

तं पूर्वमंत्रे उपवर्णितं चारुं चणरशीलं सोमं महे महते राधसेस्माकं धनाय तव घृष्वये शत्रूणां धर्षणशीलाय मदाय पिब। हे इन्द्र तदर्थं अद्य द्रव गच्छ शीघ्रं सोमपात्रं प्रति तदर्थमी मिदानीमित्यागच्छ ॥ १२ ॥

॥ इति पष्ठस्य चतुर्थे सप्तविंशोवर्गः ॥ २७ ॥

यदिन्द्रप्रागिति द्वादशर्चं षष्ठं सूक्तं प्रगाथस्यार्षं गायत्रमैन्द्रं । यदिन्द्रेत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ।

तत्र प्रथमा–

यदि॑न्द्र॒ प्रागपा॒गुद॒ङ्न्य॑ग्वा हू॒यसे॒ नृभिः॑ ।
आ या॑हि॒ तूय॑मा॒शुभिः॑ ॥ १ ॥

यत् । इ॒न्द्र॒ । प्राक् । अपा॑क् । उद॑क् । न्य॑क् । वा॒ ।
हू॒यसे॑ । नृऽभिः॑ । आ । या॒हि॒ । तूय॑म् । आ॒शुऽभिः॑ ॥ १ ॥

हे इन्द्र त्वं नृभिः कर्मनेतृभिः अस्मदीयैः अध्वर्य्वादिभिः प्राग्वा अपाग्वा उदग्वान्यग्वा मत्तः कुतश्चिद्धूयसे अतस्तूयं तूर्णमाशुभिराशुगामिभिरश्वैरायाह्यागच्छ ॥ १ ॥

अथ द्वितीया–

यद्वा॑ प्र॒स्रव॑णे दि॒वो मा॒दया॑से॒ स्व॑र्णरे ।
यद्वा॑ समु॒द्रे अन्ध॑सः ॥ २ ॥

यत् । वा॒ । प्र॒ऽस्रव॑णे । दि॒वः । मा॒दया॑से । स्वः॑ऽनरे ।
यत् । वा॒ । स॒मु॒द्रे । अन्ध॑सः ॥ २ ॥

यद्वा अथवा दिवो द्युलोकस्य प्रस्रवणे अमृतनिस्यन्दने स्थाने मादयासे माद्यसि यद्वा स्वर्णरे स्वर्गनयनेवा भूलोके अन्यस्य यागदेशे माद्यसि । यद्वा अन्धसः अन्धोन्नं तेन तत्कारणमुदकं लक्ष्यते तस्य समुद्रे समुन्दनापादनभूतेन्तरिक्षे माद्यसि तत्रतत्र वर्तमानमपि हुवइत्युत्तरत्र सम्बन्धः ॥ २ ॥

अथ तृतीया–

आ त्वा॑ गी॒र्भिर्म॒हामु॒रुं हु॒वे गामि॑व॒ भोज॑से ।
इन्द्र॒ सोम॑स्य पी॒तये॑ ॥ ३ ॥

आ । त्वा॒ । गीः॒ऽभिः । म॒हाम् । उ॒रुम् । हु॒वे ।
गाम्ऽइ॑व । भोज॑से । इन्द्र॑ । सोम॑स्य । पी॒तये॑ ॥ ३ ॥

हे इन्द्र त्वा त्वां गीर्भिः स्तुतिभिः आहुवे आह्वयामि कीदृशं त्वां महां महान्तं उरुं प्रभूतं किमर्थं सोमस्य पीतये पानाय । आह्वाने दृष्टान्तः—भोजसे भोगाय गामिव ॥ ३ ॥

अथ चतुर्थी—

आर्तइन्द्रमहिमानंहरयोदेवतेमहः ।
रथेवहन्तुबिभ्रतः ॥ ४ ॥

आ । ते । इन्द्र । महिमानम् । हरयः । देव । ते ।
महः । रथे । वहन्तु । बिभ्रतः ॥ ४ ॥

हे इन्द्र ते तव महिमानं माहात्म्यं रथे बिभ्रतो धारयन्तो हरयोश्वा आवहन्तु । तथा हे देव ते महस्तेजोरथे बिभ्रतः अश्वा आवहन्तु । अत्र महिम्नो महसश्च पृथगावहनासंभवात् ताभ्यां विशिष्टं वहंत्वित्यर्थः । अथवा महिमानं बिभ्रतस्ते त्वां रथेवहन्तु महोबिभ्रतश्च त्वां वहन्त्विति योज्यम् ॥ ४ ॥

अथ पञ्चमी—

इन्द्रंगृणीषउंस्तुषेमहाँउग्रईशानकृत् ।
एहिनःसुतंपिब ॥ ५ ॥

इन्द्र । गृणीषे । ऊँ इति । स्तुषे । महान् । उग्रः ।
ईशानऽकृत् । आ । इहि । नः । सुतम् । पिब ॥ ५ ॥

हे इन्द्र त्वं गृणीषे उच्यसे इदं देहीदंकुर्विति । तथा स्तुषेउ स्तूयसे च । उइति चार्थे । कीदृशस्त्वं महान् गुणैः प्रवृद्धः उग्रउद्गूर्णबलः ईशानकृत् ऐश्वर्यकर्ता तादृशस्त्वं प्रत्यागच्छ आगत्यच नः सुतं सोमं पिब ॥ ५ ॥

अथ षष्ठी—

सुतावन्तस्त्वावयंप्रयस्वन्तोहवामहे ।
इदंनोबर्हिरासदे ॥ ६ ॥ २८ ॥

सुतऽवन्तः । त्वा । वयम् । प्रयस्वन्तः । हवामहे ।
इदम् । नः । बर्हिः । आऽसदे ॥ ६ ॥ २८ ॥

सुतावन्तोभिषुतसोमवन्तः प्रयस्वन्तश्चरुपुरोडाशाद्यन्नवन्तश्च वयं त्वा त्वां हवामहे आह्वयामः किमर्थं इदं नोस्मदीयं बर्हिर्बर्हिषि यज्ञे बर्हिषिवा आसदे आसादनाय ॥ ६ ॥

॥ इति पञ्चमस्य चतुर्थेष्टाविंशोवर्गः ॥ २८ ॥

अथ सप्तमी–

यच्चिद्धिशश्वतामसीन्द्रसाधारणस्त्वम् ।
तंत्वावयंहवामहे ॥ ७ ॥

यत् । चित् । हि । शश्वताम् । असि । इन्द्र । साधारणः ।
त्वम् । तम् । त्वा । वयम् । हवामहे ॥ ७ ॥

हे इन्द्र त्वं यच्चिद्धि यस्मात्खलु शश्वतां बहूनां यजमानानां साधारणोसि । चिदितिपूरणः । हीतिप्रसिद्धौ । तं तादृशं साधारणं त्वा त्वां वयं हवामहे आह्वयामः । इतरेभ्यः पूर्वमिति भावः ॥ ७ ॥

प्रातःसवने इदंतेसोम्यमिति होतुः प्रस्थितयाज्या । सूत्रितश्च–इदंतेसोम्यंमधु मिन्नंवयंहवामहइति ।

सैषा सूक्तेष्टमी–

इदंतेसोम्यंमध्वधुक्षन्नद्रिभिर्नरः ।
जुषाणइन्द्रतत्पिब ॥ ८ ॥

इदम् । ते । सोम्यम् । मधु । अधुक्षन् । अद्रिऽभिः । नरः ।
जुषाणः । इन्द्र । तत् । पिब ॥ ८ ॥

हे इन्द्र ते त्वदर्थमिदं सोम्यं सोमसम्बन्धि मधु अधुक्षन् अद्रिभिः ग्रावभिरभिषवसाधनैर्नरोस्मदीयाअध्वर्य्वादयः । हे इन्द्र तन्मधु जुषाणः प्रीयमाणः पिब ॥ ८ ॥

अथ नवमी–

विश्वाँ॑अ॒र्यो वि॑प॒श्चितो॒ऽति॑ ख्य॒स्तूय॒मा ग॑हि ।
अ॒स्मे धे॑हि॒ श्रवो॑ बृ॒हत् ॥ ९ ॥

विश्वा॑न् । अ॒र्यः । वि॒पः॒ऽचितः॑ । अति॑ । ख्यः॒ । तूय॑म् ।
आ । ग॒हि॒ । अ॒स्मे इति॑ । धे॒हि॒ । श्रवः॑ । बृ॒हत् ॥ ९ ॥

हे इन्द्र अर्यः स्वामी त्वं विश्वान्विपश्चितः स्तोतॄन् अतिख्यः अतिक्रम्य पश्य । तदर्थं तूयं क्षिप्रमागहि आगत्य चास्मेऽस्मासु बृहच्छ्रवोऽन्नं यशो वा धेहि ॥ ९ ॥

अथ दशमी–

दा॒ता मे॒ पृष॑तीनां॒ राजा॑ हिर॒ण्यवी॑नाम् ।
मा दे॑वा म॒घवा॑ रिषत् ॥ १० ॥

दा॒ता । मे॒ । पृष॑तीनाम् । राजा॑ । हि॒र॒ण्य॒ऽवीना॑म् ।
मा । दे॒वाः॒ । म॒घऽवा॑ । रि॒ष॒त् ॥ १० ॥

हिरण्यवीनां हिरण्यवीवानां पृषतीनां राजा इन्द्रो मे दाता भवतु । हे देवाः मघवा इन्द्रो मारिषत् रिष्टो माभवतु ॥ १० ॥

अथैकादशी–

स॒हस्रे॒ पृष॑तीना॒मधि॑ श्च॒न्द्रं बृ॒हत्पृ॒थु ।
शु॒क्रं हिर॑ण्य॒मा द॑दे ॥ ११ ॥

स॒हस्रे॑ । पृष॑तीनाम् । अधि॑ । च॒न्द्रम् । बृ॒हत् ।
पृ॒थु । शु॒क्रम् । हिर॑ण्यम् । आ । द॒दे॒ ॥ ११ ॥

अहं पृषतीनां गवां सहस्रे अधि उपरि धारितं बृहद् महद् पृथु विस्तृतं चन्द्रं आह्लादकं शुक्रं निर्मलं हिरण्यं आददे स्वीकरोमि इन्द्रेणानीतम् ॥ ११ ॥

अथ द्वादशी–

नपा॑तो दु॒र्गह॑स्य मे स॒हस्रे॑ण सु॒राध॑सः ।
श्रवो॑ दे॒वेष्व॑क्रत ॥ १२ ॥ २९ ॥

नपा॑तः । दुः॒ऽगह॑स्य । मे॒ । स॒हस्रे॑ण । सु॒ऽराध॑सः ।
श्रवः॑ । दे॒वेषु॑ । अ॒क्र॒त॒ ॥ १२ ॥ २९ ॥

नपातः अरक्षितस्य दुर्गहस्य दुःखं गाहमानस्य मे मम सम्बन्धिनोजनाः सहस्रेण अप-रिमितेनेन्द्रदत्तेन गवादिधनेन सुराधसः सुधनाः सन्तोदेवेषु प्रीतेषु इन्द्रः प्रीतइत्यर्थः श्रवोन्नं यशोवा अक्रत अलभन्तेत्यर्थः ॥ १२ ॥

॥ इति पञ्चमस्य चतुर्थे एकोनत्रिंशोवर्गः ॥ २९ ॥

तरोभिर्वइति पञ्चदशर्चं सप्तमं सूक्तं मगाथपुत्रस्य कलेरार्षं प्रथमातृतीयाद्ययुजोबृहत्यः द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः पञ्चदशीत्वनुष्टुप् । तथाचानुक्रमणिका–तरोभिःपञ्चोना कलिः प्रागाथः प्रागाथमन्त्यानुष्टुबिति । महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तम् । तथाच पञ्चमारण्यकेसूत्रितम्–तरोभिर्वोविदद्वसुमित्युत्तमामुद्धरेदिति । अग्निष्टोमेच्छावाकशस्त्रे प्रगाथः स्तोत्रियः । तथाचसूत्रितम्–तरोभिर्वोविदद्वसुं तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपाविति । चातुर्विंशिकेहन्यप्येवप्रगाथःस्तोत्रियः । सूत्रितंच–तरोभिर्वोविदद्वसुं तरणिरित्सिषासतीति ।

तत्र प्रथमा–

त॒रोभि॑र्वो वि॒दद्व॑सु॒मिन्द्रं॑ स॒बाध॑ ऊ॒तये॑ ।
बृ॒हद्गाय॑न्तः सु॒तसो॑मे अध्व॒रे हु॒वे भरं॒ न का॒रिण॑म् ॥ १ ॥

त॒रःऽभिः॑ । वः॒ । वि॒दत्ऽव॑सुम् । इन्द्र॑म् । स॒ऽबाधः॑ । ऊ॒तये॑ । बृ॒हत् ।
गाय॑न्तः । सु॒तऽसो॑मे । अ॒ध्व॒रे । हु॒वे । भर॑म् । न । का॒रिण॑म् ॥ १ ॥

हे ऋत्विजो वोयूयं तरोभिर्वेगैस्तैरुपेतं वेगैरेववा विदद्वसुं वेदयद्वसुं धनावेदकमिन्द्रं सबाधो बाधारहिता ऊतये रक्षणाय बृहत्साममेतत्संज्ञं गायन्तः सन्तः परिचरतेति शेषः । कुत्रेति तदुच्यते–सुतसोमे सुतसोमकेध्वरे यज्ञे सोमयागे अहंच तमिन्द्रं हुवे आह्वयामि । कमि-

य भरंन भर्तारं कुटुंबपोषकं कारिणं हितकरणशीलं यथा स्वहितकरणायाह्वयन्ति पुत्रादयस्तद्व-त्तथाभूतमिन्द्रं हुवइति ॥ १ ॥

अथ द्वितीया--

नयंदुध्रावरंन्तेनस्थिरामुरोमदेंसुशिप्रमन्धंसः ।
यआदृत्यांशशमानायंसुन्वतेदातांजरित्रउक्थ्यंम् ॥ २ ॥

न । यम् । दुध्राः । वरंन्ते । न । स्थिराः । मुरंः । मदें ।
सुऽशिप्रम् । अन्धंसः । यः । आऽदृत्यं । शशमानायं ।
सुन्वते । दाता । जरित्रे । उक्थ्यम् ॥ २ ॥

यं सुशिप्रमिन्द्रं दुध्राः दुर्धरा असुरादयो नवरन्ते नवारयन्ति संग्रामे तथा स्थिराः देवा-नवरन्ते किंच मुरो मरणस्वभावा मनुष्याः नवरन्ते अंधसः अन्नस्य मदे मदाय सोमपानज-नितमाय आदृत्य यः शशमानाय शंसमानाय सुन्वते अभिषवं कुर्वते जरित्रे स्तोत्रेच दाता भ-वति किं उक्थ्यं स्तुत्यं धनं सरेजयतीत्युत्तरत्र संबन्धः ॥ २ ॥

अथ तृतीया--

यःशक्रोमृक्षोअश्व्योयोवाकीजोहिरण्ययः ।
सऊर्वस्यरेजयत्यपांवृतिमिन्द्रोगव्यस्यवृत्रहा ॥ ३ ॥

यः । शक्रः । मृक्षः । अश्व्यः । यः । वा । कीजः । हिरण्ययः ।
सः । ऊर्वस्य । रेजयति । अपंऽवृतिम् । इन्द्रः । गव्यस्य । वृत्रऽहा ॥३॥

यः शक्रइन्द्रः स्तोतॄणां मृक्षः शोधकः परिवरणीयोवा यश्च अश्व्यःअश्वकुशलः अश्व्यः । अथवाश्व्यइति स्वार्थिकोयत् मृक्षोश्वः मक्षालितोश्वइव वर्तते । योवा कीजःकीजइत्यद्भुतमाह किमस्य कथं जातं इतिच यश्च हिरण्ययः हिरण्मयशरीरः सएवमाश्चर्यभूतइन्द्रोवृत्रहा गव्य-स्य गोसमूहस्य कीदृशस्य ऊर्वस्य बहुलस्य अपावृतिं अपवरणीयं रेजयति कम्पयतीत्यर्थः॥३॥

अथ चतुर्थी--

निखातंचिद्यःपुरुसंभृतंवसूदिद्वपंतिदाशुषे ।
वज्रीसुशिप्रोहर्यश्वइत्करदिन्द्रःक्रत्वायथावशत् ॥ ४ ॥

निऽखातम् । चित् । यः । पुरुऽसम्भृतम् । वसु । उत् ।
इत् । वपति । दाशुषे । वज्री । सुऽशिप्रः । हरिऽअश्वः ।
इत् । करत् । इन्द्रः । क्रत्वा । यथा । वशत् ॥ ४ ॥

निखातंचिद् भूमौखात्वा स्थापितमपिसंभृतं संगृहीतं यागदानादिकं कृत्वा ईदृशं पुरु बहु वसु धनं उदिद्वपति उद्वपत्येव दाशुषे यजमानाय एवं। योदेवःकरद् करोति सवज्री सुशिप्रः सुहनुः हर्यश्वइव हरितवर्णाश्वयुक्त इन्द्रएव करोति केनोपाधिना क्रत्वा कर्मणा यागेनोपाधिना यथावशद् येनप्रकारेण कामयते तथासएव करोति ॥ ४ ॥

अथ पञ्चमी–

यद्वावन्थपुरुष्टुतपुराचिच्छूरनृणाम् ।
वयंतत्तइन्द्रसंभरामसियज्ञमुक्थंतुरंवचः ॥ ५ ॥ ३० ॥

यत् । ववन्थ । पुरुऽस्तुत । पुरा । चित् । शूर । नृणाम् ।
वयम् । तत् । ते । इन्द्र । सम् । भरामसि । यज्ञम् ।
उक्थम् । तुरम् । वचः ॥ ५ ॥ ३० ॥

हे पुरुष्टुत बहुभिः स्तुतेन्द्र शूर विक्रान्त नृणां नेतॄणां स्तोतॄणां सकाशात् पुराचिदित्युपमार्थे। तथेदानीमपि यद्ववन्थ अचीकमथ तदेव वयं तुरं तूर्णं ते तुभ्यं हे इन्द्र संभरामसि संभरामः। किन्तदित्युच्यते–यज्ञं यागयोग्यं हविः उक्थं शस्त्रं वचः वाच्यं तव प्रियतमं हविः स्तोत्रंच संभरामेत्यर्थः ॥ ५ ॥

॥ इति पञ्चस्य चतुर्थे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी–

सचासोमेषुपुरुहूतवज्रिवोमदायद्युक्षसोमपाः ।
त्वमिद्धिब्रह्मकृतेकाम्यंवसुदेष्ठःसुन्वतेभुवः ॥ ६ ॥

सचा । सोमेषु । पुरुऽहूत । वज्रिऽवः । मदाय । द्युक्ष । सोमऽपाः ।
त्वम् । इत् । हि । ब्रह्मऽकृते । काम्यम् । वसु ।
देष्ठः । सुन्वते । भुवः ॥ ६॥

हे पुरुहूत बहुभिराहूत हे वज्रिवः वज्रवन् द्युक्ष द्युमन् सोमपाः सोमस्यपातस्त्वं सोमेष्वभिषुतेषु मदाय सचा सह भवेतिशेषः त्वमित्त्वमेव ब्रह्मकृते स्तोत्रकर्त्रे सुन्वतेच काम्यं कमनीयं वसु धनं देष्ठोदातृतमो भुवोभवसि । हिपूरणः ॥ ६ ॥

चातुर्विंशिकेहनि माध्यन्दिनसवनेच्छावाकशस्त्रे वयमेनमिति वैकल्पिकोनुरूपः तथाचसूत्रितम्—वयमेनमिदात्योयोराजाचर्षणीनामिति ।

सैषा प्रगाथे प्रथमा सूक्ते सप्तमी—

वयमेनमिदाह्योपीपेमेहवज्रिणम् ।
तस्माउअद्यसमनासुतंभरानूनंभूषतश्रुते ॥ ७ ॥

वयम् । एनम् । इदा । ह्यः । अपीपेम । इह । वज्रिणम् ।
तस्मै । ऊँ इति । अद्य । समना । सुतम् । भर ।
आ । नूनम् । भूषत । श्रुते ॥ ७ ॥

वयं यजमाना एनमिन्द्रं वज्रिणं इदा इदानीं ह्यश्च इह अत्र अपीपेम आप्याययाम सोमेन । तस्माउ तस्माएवाद्यात्र समना समनाय संग्रामार्थं सुतमभिषुतं सोमं भर हरत हे अध्वर्य्वादयः । नूनमिदानीं श्रुते स्तोत्रे श्रुतेसति आभूषत आभवतागच्छतु ॥ ७ ॥

अथ प्रगाथे द्वितीया सूक्तेष्टमी—

वृकश्चिदस्यवारणउरामथिरावयुनेषुभूषति ।
सेमंनःस्तोमंजुजुषाणआगहीन्द्रप्रचित्रयाधिया ॥ ८ ॥

वृकः । चित् । अस्य । वारणः । उराऽमथिः । आ । वयुनेषु ।
भूषति । सः । इमम् । नः । स्तोमम् । जुजुषाणः । आ । गहि ।
इन्द्र । प्र । चित्रया । धिया ॥ ८ ॥

वृकश्चित् स्तेनोपि वारणो वारयिता सर्वस्य सन्नपि उरामथिः शत्रूणां मार्गे गच्छतां मथिता सन्नपि अस्येन्द्रस्य वयुनेषु मार्गेषु प्रज्ञानेषु वा आभूषति आनुकूल्यमेव भजते अतीव हिंस्रोपीन्द्रस्यानुकूलोभवतीत्यर्थः । यद्वा अस्येति कर्मणि षष्ठी अमुमिन्द्रंवृकरूपः वृकोपि वयुनेषु स्तोत्रेषु आभूषति सत्वमिमं नः स्तोमं जुजुषाणः प्रीयमाणः आगहि आगच्छ। हे इन्द्र चित्रया धिया कर्मणा स्तुतिलक्षणेन निमित्तेन प्र प्रकर्षेणागहि शीघ्रमागच्छ ॥ ८ ॥

चातुर्विंशिकेहनि माध्यन्दिनेसवनेच्छावाकशस्त्रे एव कदूनित्विति कद्वत्प्रगाथः कद्वन्वस्याकृतमिति कद्वन्तः प्रगाथाइतिहि सूत्रितं ।

सैषा प्रगाथे प्रथमा सूक्ते नवमी—

कदूनु१स्याकृतमिन्द्रस्यास्तिपौंस्यम् ।
केनोनुकंश्रोमतेननशुश्रुवेजनुषःपरिवृत्रहा ॥ ९ ॥

कत् । ऊँ इति । नु । अस्य । अकृतम् । इन्द्रस्य । अस्ति । पौंस्यम् । केनो इति । नु । कम् । श्रोमतेन । न । शुश्रुवे । जनुषः । परि । वृत्रऽहा ॥ ९ ॥

अस्येन्द्रस्य कदू नु किन्नु खलु पौंस्यं पौरुषं अकृतमनाचरितमस्ति सर्वमपि वृत्रवधादिकमनेन कृतमेव इतःपरं नकिञ्चित्पौंस्यं कृत्यमस्तीत्यर्थः लोके स्वल्पमपि यःपुंस्त्वं कुर्यात् सतेन स्तूयते अयंतु नस्तुत एतदुच्यते केनोनुकं केनखलु श्रोमतेन श्रवणीयेन पुंस्त्वेन नशुश्रुवे नश्रूयते किं कतिपयैरेवाहोभिः कृतेन नेत्याह—अयं वृत्रहा वृत्रस्यातिप्रबलस्यहन्ता अयं जनुषः परि जन्मप्रभृति क्रियमाणेः सामर्थ्यैः श्रूयते वृत्रहत्यं तत्पुंस्त्वप्रदर्शनायोतनाय यथा वृत्रहननं सर्वैः श्रूयते तद्वदन्यान्यपीति भावः ॥ ९ ॥

अथ प्रगाथे द्वितीया सूक्ते दशमी—

कदूमहीरधृष्टाअस्यतविषीःकदुवृत्रघ्नोअस्तृतम् ।
इन्द्रोविश्वान्बेकनाटाँअहर्दृशउतक्रत्वापणीँरभि॥१०॥३१॥

कत् । ऊँ इति । मुहीः । अधृंष्टाः । अस्य । तविषीः । कत् । ऊँ इति । वृत्रऽघ्नः । अस्तृतम् । इन्द्रः । विश्वान् । बेकनाटान् । अहःऽदृशः । उत । क्रत्वा । पणीन् । अभि ॥ १० ॥ ३१ ॥

कदु कदाखल्वस्येन्द्रस्य तविषीर्बलानि महीः महान्ति अधृष्टाः अधृष्टान्यधर्षकान्यासन् कदु कदानु खलु वृत्रघ्नो वृत्रहन्तुरिन्द्रस्य हन्तव्यमस्तृतं अहिंसितं अभवत् नकदाचिदित्यर्थः । अथवास्य महान्ति बलानि सेनालक्षणानि कदाप्यधृष्टानि अन्यबलैरहिंसितानि तथा वृत्रघ्नः शारीरं बलं अस्तृतमन्यैरहिंस्यं ईदृशेन द्विविधेन बलेनेन्द्रोविश्वान् सर्वान् बेकनाटान् अनेन कुसीदिनोवृद्धिजीविनो वार्धुषिकाउच्यन्ते कथंतद्व्युत्पत्तिः बेइति अपभ्रंशोद्विशब्दार्थे एकं कार्षापणमृणिकायप्रयच्छन द्वौमह्यंदातव्यौ नयेनदर्शयति ततोद्विशब्देनैकशब्देनच नाटयन्तीति बेकनाटाः तानहर्दृशः अहःशब्देन तदुत्पादक आदित्योभिधेयोभवति तंपश्यन्तीत्यहर्दृशः । ननु सर्वे सूर्यं पश्यन्ति कोत्रातिशयइति उच्यते इहैवजन्मनि सूर्यं पश्यन्तिनजन्मान्तरे लुब्धका अयष्टारोन्धे तमसि मज्जन्ति । अथवा लौकिकान्येवाहानि पश्यन्ति पारलौकिकान्यदृष्टानि दृष्टप्रधानाहिनास्तिकाः अतःईदृशान् पणीन् पणिसदृशान् शूद्रकल्पान् उतशब्दएवार्थे क्रत्वोत कर्मणैव ताडनादिव्यापारेणैवाभिभवतीतिशेषः । यद्वा पणीनुत पणीनेवाभिभवति न यष्टारं । पणीनां निन्दास्मर्यते—गोरक्षकानापणिकांस्तथाचकारुशीलकान् । प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् इति ॥ १० ॥

॥ इति षष्ठस्य चतुर्थे एकत्रिंशोवर्गः ॥ ३१ ॥

अथैकादशी—

व॒यं घ॑ ते॒ अपू॑र्व्ये॒न्द्र॒ ब्रह्मा॑णि वृत्रहन् ।
पु॒रु॒तमा॑सः पुरुहूत वज्रिवो भृ॒तिं न प्र भ॑रामसि ॥ ११ ॥

व॒यम् । घ॒ । ते॒ । अपू॑र्व्या । इन्द्र॑ । ब्रह्मा॑णि । वृ॒त्र॒ऽह॒न् । पु॒रु॒ऽतमा॑सः । पु॒रु॒ऽहू॒त॒ । व॒ज्रि॒ऽवः॒ । भृ॒तिम् । न । प्र । भ॒रा॒म॒सि॒ ॥ ११ ॥

हे इन्द्र वयंघ खलु ते तव अपूर्व्या नूतनानि ब्रह्माणि परिवृढानि स्तोत्राणि प्रभरामसि संभरामः पुरुतमासो बहुतमा वयं ऋत्विग्यजमानरूपेण वृत्रहन् वृत्रस्यहन्तः पुरुहूत बहुभिराहूत हे वज्रिवः वज्रयुक्तेन्द्र किमिव भृतिंन भृतिमिव तां यथा नियमेन प्रयच्छन्ति तद्वत् नियमेन प्रदानतात्पर्यात्कृतिदृष्टान्तत्वमविरुद्धम् ॥ ११ ॥

अथ द्वादशी—

पूर्वीश्चिद्धित्वेतुविकूर्मिन्नाशसोहवन्तइन्द्रोतयः ।
तिरश्चिदर्यःसवनावसोगहिशविष्ठश्रुधिमेहवम् ॥ १२ ॥

पूर्वीः । चित् । हि । त्वे इति । तुविऽकूर्मिन् । आऽशसः । हवन्ते ।
इन्द्र । ऊतयः । तिरः । चित् । अर्यः । सवना । आ । वसो इति ।
गहि । शविष्ठ । श्रुधि । मे । हवम् ॥ १२ ॥

हे तुविकूर्मिन् बहुकर्मन्निन्द्र त्वे त्वयि पूर्वीः चिद्धीतिपूरणौ बह्वीनि आशसः आशंसनानि स्थितानि तथा ऊतयो रक्षाश्च त्वयि अवस्थिता लब्धुं हवन्ते आह्वयन्ति स्तोतारोन्ये अतोर्येरिः सवना सवनानि तिरश्चित् तिरस्कृत्य अरीन्वा तिरस्कृत्यास्मत्सवनान्यभिलक्ष्य हे वसो वासकेन्द्र आगह्यागच्छ अतो हे शविष्ठातिशयेन बलवन् मे हवं श्रुधि शृणु ॥ १२ ॥

अथ त्रयोदशी—

वयंघात्वेइदिन्द्रविप्राअपिष्मसि ।
नहित्वदन्यःपुरुहूतकश्चनमघवन्नस्तिमर्डिता ॥ १३ ॥

वयम् । घ । ते । त्वे इति । इत् । ऊँ इति । इन्द्र । विप्राः । अपि ।
स्मसि । नहि । त्वत् । अन्यः । पुरुऽहूत । कः । चन ।
मघऽवन् । अस्ति । मर्डिता ॥ १३ ॥

हे इन्द्र वयंघ वयंखलु तेतव स्वभूता अतस्त्वेइत् त्वय्येव विप्रा मेधाविनः स्तोतारोपि स्मसि अपिः संभावनायां त्वदधीनाः स्मेत्यर्थः । अन्यान्विहायेन्द्रएव वर्तते तस्मिन्कोतिशयइत्याह—हे पुरुहूत त्वदन्यः कश्चन हे मघवन्मर्डिता सुखयिता नह्यस्ति ॥ १३ ॥

अथ चतुर्दशी–

त्वं नो॑ अ॒स्या अम॑ते॒रु॒त क्षु॒धो॒३॒॑ऽभिश॑स्ते॒रव॑ स्पृधि ।
त्वं न॑ ऊ॒ती तव॑ चि॒त्रया॑ धि॒या शिक्षा॑ शचिष्ठ गातु॒वित् ॥ १४ ॥

त्वम् । नः॒ । अ॒स्याः । अम॑तेः । उ॒त । क्षु॒धः । अ॒भिऽश॑स्तेः । अव॑ ।
स्पृ॒धि॒ । त्वम् । नः॒ । ऊ॒ती । तव॑ । चि॒त्रया॑ । धि॒या ।
शिक्ष॑ । श॒चि॒ष्ठ॒ । गा॒तु॒ऽवित् ॥ १४ ॥

हे इन्द्र त्वं नोऽस्मानस्या अमतेर्दारिद्र्यादिरूपायाः उतापि च क्षुधोऽभिशस्तेर्निन्दायाश्च सकाशादवस्पृधि अवमोचय । किञ्च त्वं नोऽस्मभ्यं तवोती ऊत्या चित्रया धिया विचित्रेण कर्मणा शिक्ष देह्यभिमतं । हे शचिष्ठ बलवन् गातुविन्मार्गस्य उपायज्ञस्त्वम् ॥ १४ ॥

अथ पञ्चदशी–

सोम॒ इद्वः॑ सु॒तो अ॑स्तु॒ कल॑यो॒ मा बि॑भीतन ।
अपेदे॒ष ध्व॒स्माय॑ति स्व॒यं घै॒षो अपा॑यति ॥ १५ ॥ ३२ ॥

सोमः॑ । इत् । वः॒ । सु॒तः । अ॒स्तु॒ । कल॑यः । मा । बि॒भी॒त॒न॒ ।
अप॑ । इत् । ए॒षः । ध्व॒स्मा । अ॒य॒ति॒ । स्व॒यम् ।
घ॒ । ए॒षः । अप॑ । अ॒य॒ति॒ ॥ १५ ॥ ३२ ॥

सोमः सुतोऽभिषुतः वो युष्माकं सम्बन्धी अस्त्विद् भवत्वेवेन्द्राय हे कलयः कलिमहर्षेर्ज्ञातयः पुत्राश्चात्र संबोध्यन्ते यूयं माबिभीतन भीता माभवत । भीत्यभावे कारणमाह–एषध्वस्मा ध्वंसको राक्षसादिरपेदयति अपगच्छत्येवेन्द्रसामर्थ्यात्स्वयमेव स्वयमेवैषः अपअयति इदिति पूरणः पुनरुक्तिर्दार्ढ्यार्था ॥ १५ ॥

॥ इति षष्ठस्य चतुर्थे द्वात्रिंशोवर्गः ॥ ३२ ॥

त्यान्विदित्येकविंशर्चमष्टमं सूक्तम् । अत्रानुक्रमणिका–त्यान्नुरेका मत्स्यः सांमदो मैत्रावरुणिर्मान्योवा बहवोवा मत्स्याजालनद्धा आदित्यानस्तुवन् सम्मदाख्यस्य महामीनस्यपुत्रो मत्स्यः यद्वा मित्रावरुणयोः पुत्रोमान्यः अथवा बहवोवा मत्स्याजालनद्धाः सन्तो बन्धनमोक्षायादि-

त्यमस्तुवन् अतस्तएव ऋषयः। परंगायत्रं प्राग्वत्समेरिति परिभाषया गायत्रीछन्दः आदित्या देवता सूक्तविनियोगोलैङ्गिकः।

तत्र प्रथमा—

त्यान्नुक्षत्रियाँअवआदित्यान्याचिषामहे। सुमृळीकाँअभिष्टये॥१॥

त्यान्। नु। क्षत्रियान्। अवः। आदित्यान्।
याचिषामहे। सुऽमृळीकान्। अभिष्टये॥ १॥

त्यान् तानादित्यान् क्षत्रियान् जात्या क्षत्रियान् अवोरक्षणं याचिषामहे याचामहे। कीदृशान्सुमृळीकान् सुष्ठु सुखयितॄन् किमर्थं अभिष्टये अभिगमनाय अभिमतायवा। मत्स्यपक्षे जालनिर्गमनं प्रार्थितम्। इतरपक्षेभिमतमिति विवेकः॥ १॥

अथ द्वितीया—

मित्रोनोअत्यंहतिंवरुणःपर्षदर्यमा। आदित्यासोयथाविदुः॥२॥

मित्रः। नः। अति। अंहतिम्। वरुणः। पर्षत्।
अर्यमा। आदित्यासः। यथा। विदुः॥ २॥

मित्रवरुणार्यमादित्यानोस्मानंहतिं अतिपर्षत् अतिनयन्तु ते यथा विदुः येनप्रकारेण दुःसहं जानन्ति तथातिपर्षदिति। इतरपक्षेंहतिं पापमतिपर्षदिति॥ २॥

अथ तृतीया—

तेषांहिचित्रमुक्थ्यंवरूथमस्तिदाशुषे। आदित्यानामरंकृते॥३॥

तेषाम्। हि। चित्रम्। उक्थ्यम्। वरूथम्। अस्ति।
दाशुषे। आदित्यानाम्। अरम्ऽकृते॥ ३॥

तेषामादित्यानां हिखलु चित्रं चायनीयमुक्थ्यं स्तुत्यं वरूथं धनमस्ति दाशुषे हविर्दात्रे अरंकृते अलंकर्त्रे पर्याप्तकारिणे यजमानाय दातव्यं धनमस्तीति॥ ३॥

अथ चतुर्थी—

महिवोमहतामवोवरुणमित्रार्यमन् । अवांस्यावृणीमहे ॥ ४ ॥

महि । वः । महताम् । अवः । वरुण । मित्र । अर्यमन् ।
अवांसि । आ । वृणीमहे ॥ ४ ॥

हे वरुणादयो महतां वः अवोरक्षणं महि महत् हविर्दात्रे करणीयमस्ति अतोवांसि रक्षणान्यावृणीमहे ॥ ४ ॥

अथ पञ्चमी—

जीवान्नोअभिधेतनादित्यासःपुराहथात् । कद्धस्थहवनश्रुतः॥५॥३३॥

जीवान् । नः । अभि । धेतन । आदित्यासः । पुरा ।
हथात् । कत् । ह । स्थ । हवनऽश्रुतः ॥ ५ ॥ ३३ ॥

हे आदित्यासः आदित्याः नोस्मान् जीवान् इदानीं जीवतः सतो अभिधेतन अभिधावत अभिधावनं कुरुत पुरा हथात् हननात् मृतेः पूर्वं । कद्ध क्नु स्थ भवथ । हे हवनश्रुतः आह्वानश्रोतारः आह्वानं श्रुत्वा शीघ्रमागच्छतेति ॥ ५ ॥

॥ इति पष्ठस्य चतुर्थे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथ षष्ठी—

यद्वःश्रान्तायसुन्वतेवरूथमस्तियच्छर्दिः । तेनानोअधिवोचत॥६॥

यत् । वः । श्रान्ताय । सुन्वते । वरूथम् । अस्ति । यत् ।
छर्दिः । तेन । नः । अधि । वोचत ॥ ६ ॥

श्रान्ताय कर्मणः सुन्वतेभिषुण्वतेयजमानाय दातव्यं यद्वरूथं वरणीयं धनं वोयुष्माकं अस्ति यच्च छर्दिः सुखवासयोग्यं गृहमस्ति तेन द्वयेनास्मान्प्रीणयित्वा नोस्मानधिवोचत अधिवचनं कुरुत ॥ ६ ॥

अथ सप्तमी–

अस्तिदेवाअंहोरुर्वस्तिरत्नमनागसः । आदित्याअद्भुतैनसः ॥७॥

अस्ति । देवाः । अंहोः । उरु । अस्ति । रत्नम् । अनागसः ।
आदित्याः । अद्भुतऽएनसः ॥ ७ ॥

हे देवाः अंहोः हन्तुः पापशीलस्य उर्वस्ति महत्पापमस्ति अनागसः अपापस्य रत्नं रमणीयं सुकृतं श्रेयोस्ति ततो हे आदित्या अद्भुतैनसः अभूतपापाः अतोस्मदभिमतं कुरुतेति भावः ॥ ७ ॥

अथाष्टमी–

मानःसेतुःसिषेदयंमहेवृणक्तुनस्परि । इन्द्रइद्धिश्रुतोवशी ॥ ८ ॥

मा । नः । सेतुः । सिसेत् । अयम् । महे । वृणक्तु ।
नः । परि । इन्द्रः । इत् । हि । श्रुतः । वशी ॥ ८ ॥

अयमिन्द्रः नोस्मान सेतुः बन्धको जालो मासिषेव माबध्नातु । नोस्मान् महे महते कर्मणे परिवृणक्तु परिवर्जयतु जालात् । कः इन्द्रइव इन्द्रएव श्रुतो विश्रुतः वशी सर्वस्य वशीकर्ता सपरिवृणक्तु ॥ ८ ॥

अथ नवमी–

मानोमृचारिपूणांवृजिनानामविष्यवः । देवाअभिप्रमृक्षत ॥ ९ ॥

मा । नः । मृचा । रिपूणाम् । वृजिनानाम् । अविष्यवः ।
देवाः । अभि । प्र । मृक्षत ॥ ९ ॥

हे अविष्यवो रक्षितुमिच्छन्तो देवाः नोस्मान् वृजिनानां हिंसकानां रिपूणां मृचा मृचिर्हिंसाकर्मा । यत्क्षुरेण मर्चयता सुपेशसेत्यादिषु तथा दृष्टत्वात् । हिंसकेन जालेन माभि प्रमृक्षत अभिमर्शनमुपरिजालस्य प्रेरणं माकुरुत । यद्वा मृचाजालेन माबाधा नोस्माकं माभवतु । हे देवाः यूयं च परिमार्जयत परिहरत ॥ ९ ॥

आधाने पवमानेष्टिषु उतत्वामदित इत्यनुवाक्या सूत्रितश्च—उतत्वामदितेमहिमहीमूषुमातरमिति। आदित्येपशौ वपायाअनुवाक्येयमेव। सूत्रितंच—उतत्वामदितेमसनेहोनउरुव्रजेइति।

सैषा दशमी—

उतत्वामदितेमह्यहंदेव्युपंब्रुवे। सुमृळीकामभिष्टंये ॥ १०॥३४॥

उत। त्वाम्। अदिते। महि। अहम्। देवि। उपं।
ब्रुवे। सुऽमृळीकाम्। अभिष्टंये ॥ १० ॥ ३४ ॥

उतअपिच हे महि महति अदिते देवमातः देवि त्वा त्वां अहं मत्स्यपक्षे मत्स्यप्रमुखोहमुपब्रुवे उपेत्यस्तौमि। कीदृशीं सुमृळीकां सुष्ठु सुखयित्रीं किमर्थमभिष्टयेऽभिमताय ॥ १० ॥

॥ इति षष्ठस्य चतुर्थे चतुस्त्रिंशोवर्गः ॥ ३४ ॥

अथैकादशी—

पर्षिदीनेगंभीरआँउग्रंपुत्रेजिघांसतः। माकिंस्तोकस्यंनोरिषत्॥११॥

पर्षि। दीने। गभीरे। आ। उग्रंऽपुत्रे। जिघांसतः।
माकिः। तोकस्यं। नः। रिषत् ॥ ११ ॥

हे अदिते आपर्षि सर्वतः पालयसि दीने क्षीणे गभीरे उदके उदकनामैतत् गंभीरं गहनमिति तन्नामसुपाठात् उग्रपुत्रे उद्गूर्णाः पुत्राः यस्मिन् तत्स्मिन् उदके जिघांसतो हिंसतः जालं तोकस्य नोस्माकं तनयस्य तनयं माकीरिषत् मैवहिंसां करोतु ॥ ११ ॥

आदित्यस्य पशावनेहोनइति पुरोडाशस्यानुवाक्या। सूत्रितंच—अनेहोनउरुव्रजेदितिर्हजनिष्टेति।

सैषा द्वादशी—

अनेहोनउरुव्रजउरूचिविप्रसर्तवे। कृधितोकायजीवसे ॥ १२ ॥

अनेहः। नः। उरुऽव्रजे। उरूचि। वि। प्रऽसर्तवे।
कृधि। तोकाय। जीवसे ॥ १२ ॥

अनेहोऽपापान्नोस्मान् उरुव्रजे विस्तीर्णगमने दूरं इयमदितिर्भूरिरूपा गताभवति अतिनिस्तृतत्वात्। अथवा उरुगमने धीरे हे उरूचि उरुत्वं निमसर्तवे अभिसरणाय कृधि कुरु। कस्मै तोकाय पुत्राय मत्स्याय जीवसे तस्य जीवनाय यथाजीवनेनापरपात्रक्षितुं तथा उरु त्वं कुर्विति॥१२॥

अथ त्रयोदशी—

येमूर्धानःक्षितीनामदब्धासःस्वयशसः। व्रतारक्षन्तेअद्रुहः॥१३॥

ये। मूर्धानः। क्षितीनाम्। अदब्धासः। स्वऽयशसः।
व्रता। रक्षन्ते। अद्रुहः॥ १३॥

ये मूर्धानः सर्वेषां मूर्धस्थानीया उच्छ्रिताः क्षितीनां मनुष्याणां अदब्धासः अहिंसकाः स्वयशसः स्वायत्तकीर्तयः व्रता व्रतान्यस्मदीयानि कर्माणि रक्षंते पालयन्ते अद्रुहः अद्रोग्धारः सन्तः॥ १३॥

अथ चतुर्दशी—

तेनआस्नोवृकाणामादित्यासोमुमोचत। स्तेनंबद्धमिवादिते॥१४॥

ते। नः। आस्नः। वृकाणाम्। आदित्यासः। मुमोचत।
स्तेनम्। बद्धम्ऽइव। अदिते॥ १४॥

हे आदित्यासः आदित्यास्ते यूयं नोस्मान् वृकाणां हिंसकानां अदातृणां वा आस्नः आस्यात्सकाशान्मुमोचत विमोचनं कुरुत स्तेनं बद्धमिव हे अदिते त्वंच मोचयास्मानिति॥१४॥

अथ पंचदशी—

अपोषुणइयंशरुरादित्याअपदुर्मतिः। अस्मदेत्वजघ्नुषी॥१५॥३५॥

अपो इति। सु। नः। इयम्। शरुः। आदित्याः। अप।
दुःऽमतिः। अस्मत्। एतु। अजघ्नुषी॥ १५॥ ३५॥

हे आदित्या इयं शरुर्हिंसिका मसितिः जालिकमेरिता अजघ्नुषी अहिंसन्ती सती अस्मदस्मत्तः सु सुष्ठु अपोएतु अपगच्छत्वेव। तथा नोस्माकं दुर्मतिर्दुष्टामतिरप्यजघ्नुषी अस्मत्तोपगच्छतु॥ १५॥

॥ इति पष्ठस्य चतुर्थे पञ्चत्रिंशोवर्गः॥ ३५॥

अथ षोडशी—

शश्वद्धिवःसुदानवआदित्याऊतिभिर्वयम् । पुरानूनंबुभुज्महे॥१६॥

शश्वत् । हि । वः । सुऽदानवः । आदित्याः । ऊतिऽभिः ।
वयम् । पुरा । नूनम् । बुभुज्महे ॥ १६ ॥

हे सुदानवः सुदानाः हे आदित्या वोयुष्माकं ऊतिभीरक्षाभिः वयं पुरा नूनमिदानीमपि शश्वत् सर्वदा बुभुज्महे यद्वा शश्वद्बहून् भोगान् बुभुज्महे ॥ १६ ॥

अथ सप्तदशी—

शश्वंतंहिप्रचेतसःप्रतियन्तंचिदेनसः । देवाःकृणुथजीवसे ॥ १७॥

शश्वन्तम् । हि । प्रऽचेतसः । प्रतिऽयन्तम् । चित् ।
एनसः । देवाः । कृणुथ । जीवसे ॥ १७ ॥

हे प्रचेतसः प्रकृष्टमाया हे देवाः शश्वन्तं बहुमपि प्रतियन्तं चित् प्रतिगच्छन्तमपि शत्रुं एनसः पापस्य कर्तारं अथवा एनसः पापकृतः व्यत्ययेन बहुवचनं पापकर्तारं जीवसे-जीवनायास्माकं कृणुत कुरुत अस्मत्तो वियुक्तमिति शेषः ॥ १७ ॥

अथाष्टादशी—

तत्सुनोनव्यंसन्यसआदित्यायन्मुमोचति । बन्धाद्बद्धमिवादिते॥१८॥

तत् । सु । नः । नव्यम् । सन्यसे । आदित्याः । यत् ।
मुमोचति । बन्धात् । बद्धम्ऽइव । अदिते ॥ १८ ॥

तद्बन्धकं नोस्माकं सु सुष्ठु नव्यं स्तुत्यं सन्यसे संभजनाय भवतु अस्माकं मोचनेन स्तुत्यं भवत्वित्यर्थः । हे आदित्या अदितेः पुत्राः हे अदिते त्वदनुग्रहाद्यन्मुमोचति मुंचत्यस्मान् बन्धाद्बद्धमिव बन्धनसाधनंपूर्वं यत्प्रतिबन्धकत्वादासीत् तदेव युष्मदनुग्रहादस्मान्मुञ्चतु यद्वा युष्माकं यद्रक्षणमस्मान्मुंचति तत् सु सुष्ठु स्तुत्यं संभजनाय भवत्विति योज्यम् ॥ १८ ॥

अथैकोनविंशी—

नास्माकमस्तितत्तरआदित्यासोअतिष्कदे । यूयमस्मभ्यंमृळत॥१९॥

न । अस्माकम् । अस्ति । तत् । तरः । आदित्यासः ।
अतिऽस्कदे । यूयम् । अस्मभ्यम् । मृळत ॥ १९ ॥

हे आदित्यासः आदित्याः युष्मत्कर्तृकस्तत्तरोवेगोस्माकं नास्ति योवेगो बन्धकाज्ञा-त्सादतिष्कदे अस्माकमतिस्कन्दनाय प्रभवति । अतो यूयमस्मभ्यं मृळत तत्तादृशंतरः कुरुते-त्यर्थः ॥ १९ ॥

अथ विंशी–

मानोहेतिर्विवस्वतआदित्याःकृत्रिमाशरुः । पुरानुजरसोवधीत् ॥२०॥

मा । नः । हेतिः । विवस्वतः । आदित्याः । कृत्रिमा ।
शरुः । पुरा । नु । जरसः । वधीत् ॥ २० ॥

हे आदित्या नोस्मान्विवस्वतो विवस्वत्पुत्रस्य यमस्य । पुत्रे पितृशब्दः । तस्य हेतिरायुध-भूता कृत्रिमा क्रियया निष्पन्ना शरुर्हिंसिका प्रसितिः पुरा पूर्वं नु इदानीं सर्वदेत्यर्थः जरसः इ-दानीं जीर्णान् मावधीत् माहिंस्यात् ॥ २० ॥

अथैकविंशी–

विषुद्वेषोव्यंहतिमादित्यासोविसंहितम् । विष्वग्विवृहतारपः॥२१॥३६॥

वि । सु । द्वेषः । वि । अंहतिम् । आदित्यासः । वि ।
सम्ऽहितम् । विष्वक् । वि । वृहत । रपः ॥ २१ ॥ ३६ ॥

हे आदित्यासः आदित्या द्वेषोद्वेष्टॄन् सु सुष्ठु विवृहत उन्मूलयत नाशयतेत्यर्थः । तथा अंहतिं घातकं पापं विवृहत हन्तेरंहचेत्यतिप्रत्ययः । तथा संहितं जालं विवृहत तथा रपः पापं सर्वं विष्वक् विषूचीनं विवृहत । रपो रिप्रं इतिपापनामनी भवतइतियास्कः ॥ २१ ॥

॥ इति प्रथमस्य चतुर्थे षट्त्रिंशोवर्गः ॥ ३६ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण साय-णाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके चतुर्थोध्यायः ॥ ४ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥
षष्ठेचतुर्थमध्यायं श्रीमायणसुतःसुधीः। व्याख्यायसायणाचार्यः पञ्चमंव्याकरोत्यथ ॥ २ ॥

तत्रात्वारथमित्येकोनविंशर्चं नवमंसूक्तं । अत्रेयमनुक्रमणिका—आत्वैकोना प्रियमेध आद्यानुष्टुम्मुखास्तृचाश्चत्वारोन्त्याःपल्कक्षाश्वमेधयोर्दानस्तुतिरिति । आंगिरसःप्रियमेधऋषिः । प्रथमाचतुर्थीसप्तमीदशम्योनुष्टुभः शिष्टाःपरंगायत्रमितिपरिभाषया गायत्र्यः अन्ततःषट्स्वृक्षु ऋक्षाश्वमेधयोर्दानंस्तूयते अतस्तास्तद्देवताकाः । शिष्टाअनुक्तपरिभाषयैन्द्र्यः । सूक्तविनियोगोलैङ्गिकः । आद्यस्तृचो मरुत्वतीयस्यप्रतिपत् । तथाचसूत्रितम्—आत्वारथंयथोतयइदंवसोसुतमन्धइतिमरुत्वतीयस्यप्रतिपदनुचराविति । महाव्रतादिष्वपि यत्रतृचान्तरंनविधीयते तत्र सर्वत्रायमेव प्रतिपद्भवति ।

तत्र प्रथमा—

ॐ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥ १ ॥

आ । त्वा । रथम् । यथा । ऊतये । सुम्नाय । वर्तयामसि ।
तुविऽकूर्मिम् । ऋतिऽसहम् । इन्द्र । शविष्ठ । सत्ऽपते ॥ १ ॥

हे इन्द्र त्वा त्वां आवर्तयामसि आवर्तयामः । किमर्थं ऊतयेस्माकं रक्षणाय सुम्नाय सुखायच । किमिव रथं यथा ऊतये सुखाय चावर्तयन्ति तद्वत् । कीदृशं त्वां तुविकूर्मिं बहुकर्माणं ऋतीषहं हिंसकानामभिभवितारं हे इन्द्र शविष्ठातिशयेनबलवन् हे सत्पते सतां पालक त्वामिति समन्वयः ॥ १ ॥

अथ द्वितीया—

तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।
आ पप्राथ महित्वना ॥ २ ॥

न । अस्माकम् । अस्ति । तत् । तरः । आदित्यासः ।
अतिऽस्कदे । यूयम् । अस्मभ्यम् । मृळत ॥ १९ ॥

हे आदित्यासः आदित्याः युष्मत्कर्तृकस्तत्तरोवेगोस्माकं नास्ति यंवेगो यन्धकाजालादतिष्कदे अस्माकमविस्कन्दनाय भवति । अतो यूयमस्मभ्यं मृळत तत्तादृशंवरः कुरुतेत्यर्थः ॥ १९ ॥

अथ विंशी–

मानोहेतिर्विवस्वतआदित्याःकृत्रिमाशरुः । पुरानुजरसोवधीत् ॥२०॥

मा । नः । हेतिः । विवस्वतः । आदित्याः । कृत्रिमा ।
शरुः । पुरा । नु । जरसः । वधीत् ॥ २० ॥

हे आदित्या नोस्मान्विवस्वतो विवस्वत्पुत्रस्य यमस्य । पुत्रे पितृशब्दः । तस्य हेतिरायुधभूता छत्रिमा क्रियया निष्पन्ना शरुर्हिंसिका मसितिः पुरा पूर्वं नु इदानीं सर्वदेत्यर्थः जरसः इदानीं जीर्णान् मावधीव माहिंस्याव ॥ २० ॥

अथैकविंशी–

विपुद्वेषोव्यंहतिमादित्यासोविसंहितम् । विष्वग्विवृहतारपः ॥२१॥३६॥

वि । सु । द्वेषः । वि । अंहतिम् । आदित्यासः । वि ।
सम्ऽहितम् । विष्वक् । वि । वृहत । रपः ॥ २१ ॥ ३६ ॥

हे आदित्यासः आदित्या द्वेषोद्वेष्टॄन् सु सुष्टु विवृहत उन्मूलयत नाशयतेत्यर्थः । तथा अंहतिं पातकं पापं विवृहत हन्तेरंहचेत्यतिप्रत्ययः । तथा संहितं जालं विवृहत तथा रपः पापं सर्वं विष्वक् विषूचीनं विवृहत । रपो रिप्रं इतिपापनामनी भवतइतियास्कः ॥ २१ ॥

॥ इति पष्ठस्य चतुर्थे षट्त्रिंशोवर्गः ॥ ३६ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

॥श्रीगणेशायनमः॥

यस्यनिश्वसितंवेदा योवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरं ॥ १ ॥
षष्ठेचतुर्थमध्यायं श्रीमायणसुतःसुधीः। व्याख्यायसायणाचार्यः पञ्चमंव्याकरोत्यथ ॥ २ ॥

तत्रात्वारथमित्येकोनविंशर्चं नवमंसूक्तं ।अत्रेयमनुक्रमणिका—आत्वैकोना प्रियमेध आद्यानुष्टुम्मुखास्तृचाश्चत्वारोन्त्याःपल्पूक्षाश्वमेधयोर्दानस्तुतिरिति । आंगिरसःप्रियमेधऋषिः । प्रथमाचतुर्थीसप्तमीदशम्योनुष्टुभः शिष्टाःपरंगायत्रमितिपरिभाषया गायत्र्यः अन्ततःषड्ऋक्षु ऋक्षाश्वमेधयोर्दानंस्तूयते अतस्तास्तद्देवताकाः । शिष्टाअनुक्तपरिभाषयैन्द्र्यः । सूक्तविनियोगोलैङ्गिकः ।आद्यस्तृचो मरुत्वतीयस्यप्रतिपत् । तथाचसूत्रितम्—आत्वारथंयथोतयइदंवसोसुतमन्धइतिमरुत्वतीयस्यप्रतिपदनुचराविति । महाव्रतादिष्वपि यत्रतृचान्तरंनविधीयतेतत्र सर्वत्रायमेव प्रतिपद्भवति ।

तत्र प्रथमा—

ॐम् आत्वा॒रथं॒यथो॒तये॑सु॒म्नाय॑वर्तयामसि ।
तु॒वि॒कू॒र्मिमृ॑ती॒षह॒मिन्द्र॒शवि॑ष्ठ॒सत्प॑ते ॥ १ ॥

आ । त्वा॒ । रथ॑म् । यथा॑ । ऊ॒तये॑ । सु॒म्नाय॑ । व॒र्त॒या॒म॒सि॒ ।
तु॒वि॒ऽकू॒र्मिम् । ऋ॒ति॒ऽसह॑म् । इन्द्र॑ । शवि॑ष्ठ । सत्ऽप॑ते ॥ १ ॥

हे इन्द्र त्वा त्वां आवर्तयामसि आवर्तयामः । किमर्थं ऊतयेस्माकं रक्षणाय सुम्नाय सुखायच । किमिव रथं यथा ऊतये सुखाय चावर्तयन्ति तद्वत् । कीदृशं त्वां तुविकूर्मिं बहुकर्माणं ऋतीषहं हिंसकानामभिभवितारं हे इन्द्र शविष्ठातिशयेनबलवन् हे सत्पते सतां पालक त्वामिति समन्वयः ॥ १ ॥

अथ द्वितीया—

तु॒वि॑शुष्म॒तुवि॑क्रतो॒शची॑वो॒विश्व॑यामते ।
आप॑प्राथमहित्व॒ना ॥ २ ॥

तुविऽशुष्म । तुविक्रतो इति तुविऽक्रतो । शचीऽवः । विश्वया ।
मते । आ । पप्राथ । महिऽत्वना ॥ २ ॥

हे तुविशुष्म प्रभूतबल हे तुविक्रतो बहुकर्मन् अथवा बहुप्रज्ञ कर्मणः पृथगभिधानात् हे शचीवः बहुकर्मोपेत हे मते पूजनीयेन्द्र विश्वया विश्वव्यापेन महित्वना महत्त्वेन आपप्राथ आपूरितवानसि । अविशेषाद्विश्वमित्यर्थः ॥ २ ॥

अथ तृतीया—

यस्यतेमहिनामहःपरिज्मायन्तमीयतुः ।
हस्तावज्रंहिरण्ययम् ॥ ३ ॥

यस्य । ते । महिना । महः । परि । ज्मायन्तम् । ईयतुः ।
हस्ता । वज्रम् । हिरण्ययम् ॥ ३ ॥

महोमहतो यस्य ते तव यच्छब्दः प्रकृतपरामर्शकः प्रकृतं तूक्तमृगृद्वयं तत्रत्यतुविकूर्मि-मतीषहमित्याद्युक्तलक्षणस्य तवेत्यर्थः । महिना महत्त्वेन तव हस्ता हस्तौ ज्मायन्तं पृथिव्यां सर्वतोव्यापुवन्तं हिरण्ययं हिरण्मयं वज्रं परि ईयतुः परिगृह्णीतः । सर्वदास्माकं भयनि-वारणायेतिभावः ॥ ३ ॥

पृष्ठ्याभिप्लवषडहयोः द्वितीयेहनि विश्वानरस्येति प्रतिपत्तृचः सूत्रितञ्च—विश्वानरस्य वस्पतिमिन्द्रइत्सोमपाएकइति मरुत्वतीयस्य प्रतिपदनुचराविति ।

तृचे प्रथमा सूक्ते चतुर्थी—

विश्वानरस्यवस्पतिमनानतस्यशवसः ।
एवैश्चचर्षणीनामूतीहुवेरथानाम् ॥ ४ ॥

विश्वानरस्य । वः । पतिम् । अनानतस्य । शवसः । एवैः ।
च । चर्षणीनाम् । ऊती । हुवे । रथानाम् ॥ ४ ॥

विश्वानरस्य विश्वान् शत्रून् प्रत्युतस्य अनानतस्य शत्रूणामप्रह्वस्य शवसो बलस्य पतिं स्वामिनमिन्द्रं वा अत्रेन्द्रसंबन्धिनो मरुतोपि संकीर्त्यन्ते हे मरुतो वो युष्माकमित्यर्थः। यद्यपि मरुत् संशब्दनंनास्ति तथापि वइति सामर्थ्यालभ्यते। युष्माकं चर्षणीनां सैनिकानां एवैर्गमनैः सह। यद्वा चर्षणीनां इन्द्रस्य सेनारूपाणां वोयुष्माकं गमनैरिति सामानाधिकरण्यं युष्माकं रथानांच ऊती ऊतिभिर्गमनैश्चसह हुवे आह्वयामि। गन्तृभी रथैर्गन्तृभिर्मरुद्भिश्च सहेन्द्रं हुव-इत्यर्थः। यद्वा हे यजमाना युष्मदीयाः सैनिकाः सरथा यदा प्रविशन्ति युद्धाय संग्रामं तदानीं तेषां साहाय्यायेन्द्रं हुवे इत्यर्थः॥ ४॥

अथ तृचे द्वितीया सूक्ते पञ्चमी—

अभिष्टयेसदावृधंस्वर्मीह्ळेषुयंनरः।
नानाहवन्तऊतये॥ ५॥ १॥

अभिष्टये। सदाऽवृधम्। स्वःऽमीह्ळेषु। यम्। नरः।
नाना। हवन्ते। ऊतये॥ ५॥ १॥

हे यजमाना युष्माकं अभिष्टये साहाय्यार्थं अभिगमनाय अभिष्टये वा सदावृधं सर्वदा वर्धयन्तं सेवकान् स्वयं सर्वदा वर्धमानं वा हुवइतिशेषः। यं स्वर्मीह्ळेषु संग्रामेषु नरोनेतारो मनुष्याः नाना बहुप्रकारं हवन्ते आह्वयन्ति ऊतये रक्षार्थं तं हुवइतिशेषः॥ ५॥

॥ इति पष्ठस्य पञ्चमे प्रथमोवर्गः॥ १॥

अथ तृचेतृतीया सूक्ते षष्ठेचेषा—

परोमात्रमृचीषममिन्द्रमुग्रंसुराधसम्।
ईशानंचिद्वसूनाम्॥ ६॥

परःऽमात्रम्। ऋचीषमम्। इन्द्रम्। उग्रम्। सुऽराधसम्।
ईशानम्। चित्। वसूनाम्॥ ६॥

परोमात्रं परामात्रा यस्य तादृशं अथवा मीयतइति मात्रं दूरदेशः ततः परस्तादवर्तमानं अपरिमितस्वरूपं तथापि ऋचीषमं ऋचा स्तुत्या समं यद्यप्यपरिच्छिन्नस्तथापि स्तुतिर्योवन्मात्रं

विषयीकरोति सतामइत्यर्थः। तदेवाह इन्द्रं परमैश्वर्ययोगत्वादिच्छानुकूलस्वरूपं उग्रमुद्गूर्णबलं सुराधसं राधइति धननाम शोभनधनं शोभनान्नं वा ईशानं चिद् ईश्वरं च। केषां वसूनां अस्मभ्यं प्रदेयानां गवादिधनानां एवं महानुभावमिन्द्रं हुवइतिशेषः॥ ६॥

तृतीयेहनि मरुत्वतीये तन्तमिदितिप्रतिपत्तृचः। सूत्रितश्च—तन्तमिद्राधसेमहेत्रमइन्द्रस्य-सोमाइति।

तस्मिंस्तृचे प्रथमा सूक्ते सप्तमी—

तंतमिद्राधसेमुहइन्द्रंचोदामिपीतये।
यःपूर्व्यामनुष्टुतिमीशेकृष्टीनांनृतुः॥ ७॥

तम्ऽतम्। इत्। राधसे। महे। इन्द्रम्। चोदामि। पीतये।
यः। पूर्व्याम्। अनुऽस्तुतिम्। ईशे। कृष्टीनाम्। नृतुः॥ ७॥

तन्तमित्तमेवेन्द्रं सर्वेष्वपि यागकालेषु तमेवेन्द्रमित्यर्थः। तं प्रतिचोदामि प्रेरयामि स्तुतिं पीतये सोमपानाय। ततः कोलाभइति उच्यते—महेमहते राधसे धनाय प्रभूतधनलाभार्थं यो-नृतुः फलस्यनेता देवः पूर्व्यां पूर्वैर्भवां यज्ञमुखस्थां अनुष्टुतिं अनुक्रमेण क्रियमाणां स्तुतिं कृ-ष्टीनां मनुष्याणां ऋत्विजां संबन्धिनीं ईशे ईष्टे श्रोतुं। तं चोदामीति संबन्धः॥ ७॥

अथ तृचे द्वितीया सूक्तेष्टमी—

नयस्यतेशवसानसुख्यमानंशमर्त्यः।
नकिःशवांसितेनशत्॥ ८॥

न। यस्य। ते। शवसान। सख्यम्। आनंश। मर्त्यः।
नकिः। शवांसि। ते। नशत्॥ ८॥

हेशवसान बलवन् इन्द्र यस्य ते तव सख्यं मर्त्यो मरणधर्मा मनुष्योनानंश नव्याप्नोति ते शवांसि बलान्यपि नकिर्नैवनशत् न व्याप्नोति॥ ८॥

अथ तृचे तृतीया सूक्ते नवमी–

त्वोतासस्त्वायुजाप्सुसूर्येमहद्धनम् ।
जयेमपृत्सुवज्रिवः ॥ ९ ॥

त्वाऽऊतासः । त्वा । युजा । अप्ऽसु । सूर्ये । महत् । धनम् ।
जयेम । पृत्ऽसु । वज्रिऽवः ॥ ९ ॥

हे इन्द्र त्वोतासस्त्वया रक्षिताः त्वा त्वया युजा सहायेनाप्सु स्नातुं सूर्ये द्रष्टुंच स्नाना-दिव्यवहारं कर्तुं सूर्ये उदिते सति गमनादि व्यवहारं कर्तुमित्यर्थः तदर्थं पृत्सु संग्रामेषु हे व-ज्रिवोवज्रवन्निन्द्र महद्धनं जयेम । शत्रून् संग्रामेजित्वा तेषां धनं लभेमेत्यर्थः ॥ ९ ॥

चतुर्थेहनि मरुत्वतीये तंत्वायज्ञेभिरितितृचः प्रतिपद् । सूत्रितञ्च–तंत्वायज्ञेभिरीमहइदंव-सोसुतमन्धइति मरुत्वतीयप्रतिपदनुचराविति ।

तृचे प्रथमा सूक्ते दशमी–

तंत्वायज्ञेभिरीमहेतंगीर्भिर्गिर्वणस्तम ।
इन्द्रयथाचिदाविथवाजेषुपुरुमाय्यम् ॥ १० ॥ २ ॥

तम् । त्वा । यज्ञेभिः । ईमहे । तम् । गीःऽभिः । गिर्वणःऽतम । इन्द्र ।
यथा । चित् । आविथ । वाजेषु । पुरुमाऽय्यम् ॥ १० ॥ २ ॥

तं स्तुत्यत्वेन प्रसिद्धं त्वा त्वां यज्ञेभिर्यागसाधनैः सोमादिभिरीमहे याचामहे तमेवेन्द्रं गीर्भिः स्तुतिभिरीमहे । हे गिर्वणस्तम गीर्भिः स्तुतिभिर्वननीयतमेन्द्र तंत्वामिति समन्वयः । हे इन्द्र त्वं यथाचिदाविथ येनप्रकारेण ररक्षिथ मां चिदितिपूरणः । कुत्रेति उच्यते–वाजेषु संग्रामेषु कीदृशं मां पुरुमाय्यं बहुप्रज्ञं बहुस्तुतिमित्यर्थः ॥ १० ॥

॥ इति षष्ठस्य पञ्चमे द्वितीयोवर्गः ॥ २ ॥

अथैकादशी–

यस्यतेस्वादुसख्यंस्वाद्वीप्रणीतिरद्रिवः ।
यज्ञोवितन्तसाय्यः ॥ ११ ॥

यस्यं । ते । स्वादु । सख्यम् । स्वाद्वी । प्रऽनीतिः ।
अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥ ११ ॥

हे अद्रिवो वज्रविन्द्र यस्य स्तुत्यत्वेन प्रसिद्धस्य ते तव सख्यं स्वादुतीवानुभवार्हं। किञ्च ते प्रणीतिःप्रणयनं धनादीनां स्वाद्वी स्वादु सुहर्षकं तथोभे त्वद्विषयोयज्ञश्च वितन्तसाय्यो विशेषेण तननीयः ॥ ११ ॥

अथ तृचे तृतीया सूक्ते द्वादशी–

उरुर्णस्तन्वे३तनंउरुक्षयायनस्कृधि ।
उरुणोयन्धिजीवसे ॥ १२ ॥

उरु । नः । तन्वे । तने । उरु । क्षयाय । नः । कृधि ।
उरु । नः । यन्धि । जीवसे ॥ १२ ॥

हे इन्द्र त्वं नोस्माकं तन्वे आत्मजाय उरु प्रभूतं कृधि कुरु। सामर्थ्यात् धनं सुखं वेति गम्यते। तथा तने तत्पुत्राय उरु कृधि। तथा क्षयाय निवासाय उरुकृधि नोस्माकं जीवसे जीवनाय यन्धि प्रयच्छाभिमतम् ॥ १२ ॥

अथ त्रयोदशी–

उरुंनृभ्यंउरुंगवंउरुंरथायपन्थाम् । देववीतिंमनामहे ॥ १३ ॥

उरुम् । नृऽभ्यः । उरुम् । गवे । उरुम् । रथाय । पन्थाम् ।
देवऽवीतिम् । मनामहे ॥ १३ ॥

हे इन्द्र नृभ्योस्मदीयेभ्यो भृत्येभ्यः उरुं हितं मनामहे याचामहे। तथा गवे एतदुपलक्षणं गवाश्वादिकाय तथा रथाय पन्थां पन्थानं मार्गं अथवा नृप्रभृतीनां संचाराय शोभनं मार्गं मनामहे तथा देववीतिं यज्ञं मनामहे ॥ १३ ॥

अथ चतुर्दशी–

उपंमापद्वद्वानरःसोमंस्यहर्ष्यां । तिष्ठन्तिस्वादुरातयः ॥१४॥

उप॑ । मा॒ । षट् । द्वाऽद्वा॑ । नरः॑ । सोम॑स्य । हर्ष्या॑ ।
तिष्ठ॑न्ति । स्वा॒दुऽरा॒तयः॑ ॥ १४ ॥

एतदाद्याः पञ्चर्चः ऋक्षाश्वमेधयोर्दानस्तुतिरूपाः यद्यपि बृहद्देवतानुक्रमण्यां—ऋक्षाश्वमेधयोरत्र पञ्चदानप्रशंसका इत्युक्तम्। तथाप्युपमायष्ठित्यस्याः राजदानस्तुतिशेषत्वाद्विरोधः। अनयैवाशया अनुक्रमण्यांअन्त्याः पञ्चर्चः ऋक्षाश्वमेधयोर्दानस्तुतिरित्युक्तम्। मामां प्रियमेधं यज्ञे प्रसर्पन्तः षट् एतत्संख्याका नरोनेतारो राजानः सोमस्य पीतस्य हर्ष्या हर्षेण स्वादुरातयः सुखूपभोगार्हदानाः सन्तो द्वाद्वा द्वौद्वौ पितृपुत्ररूपेण युग्मौ भूत्वा मामुपतिष्ठन्ति तेषां युग्मानां नाम उत्तरत्र स्पष्टीक्रियते ॥ १४ ॥

अथ पञ्चदशी—

ऋ॒ज्रावि॑न्द्रो॒त आ द॑दे॒ हरी॒ ऋक्ष॑स्य सू॒नवि॑ । आ॒श्व॒मे॒धस्य॒ रोहि॑ता ॥ १५ ॥ ३ ॥

ऋ॒ज्रौ । इ॒न्द्र॒ऽऊ॒ते । आ । द॒दे॒ । हरी॒ इति॑ । ऋक्ष॑स्य । सू॒नवि॑ ।
आ॒श्व॒ऽमे॒धस्य॑ । रोहि॑ता ॥ १५ ॥ ३ ॥

इन्द्रोते एतन्नामके आतिथिग्वे अतिथिग्वनाम्नो राज्ञःपुत्रे। अतिथिग्वायशंबरमिति। अतिथिग्वार्येशंस्यमित्यादिष्वतिथिग्वः प्रसिद्धः। तत्पुत्रइन्द्रोतः ऋज्रौ ऋजुगामिनावश्वौ आददे स्वीकृतवानस्मि। तथा ऋक्षस्य सूनवि ऋक्षनाम्नः पुत्रेन्यस्मिन्राजनि हरी हरितवर्णावश्वावाददे। तथा आश्वमेधस्य अश्वमेधपुत्रे राजनि रोहिता रोहितवर्णावश्वौ आददे। नन्वनुक्रमण्यामुभयोरेवदानप्रशंसारूपत्वमुक्तम्। अत्र कथं त्रयाणां दानकीर्तनमिति। नैषदोषः। ऋक्षाश्वमेधपुत्रयोरेव यागेऽस्यऋषेः प्रवृत्तेस्तयोरेवदानं प्रस्तुत्य इन्द्रोतस्तु स्वपित्रासह तयोर्यज्ञदिदृक्षयागत्य तयोर्दानं दृष्ट्वा स्वपित्राप्रेरितो दत्तवानश्वौ अतस्तद्दानं प्रासंगिकमिति। एवमृक्षाश्वमेधयोर्दानस्तुतित्वं नव्याहन्यते पितृपुत्रयोरभेदात् तयोः पक्षकर्तृत्वाच्च। इन्द्रोतदानस्य प्रासंगिकत्वं प्रळस्यानित्यत्र विस्पष्टयिष्यते ॥ १५ ॥

॥ इति पञ्चस्य पञ्चमे तृतीयोवर्गः ॥३॥

ऋ० सं० १. ४. १० । २ ऋ० सं० ४. ६. २१. ।

अथ षोडशी–

सुरथाँआतिथिग्वेस्वभीशूँरार्क्षे । आश्वमेधेसुपेशसः ॥ १६ ॥

सुऽरथान् । आतिथिऽग्वे । सुऽअभीशून् । आर्क्षे ।
आश्वऽमेधे । सुऽपेशसः ॥ १६ ॥

आतिथिग्वे इन्द्रोते सुरथान् शोभनरथोपेतानश्वान् आददे । आर्क्षे ऋक्षपुत्रे स्वभीशून- श्वानाददे आश्वमेधेश्वमेधपुत्रे सुपेशसः सुरूपान् तान् शोभनालंकारान् आददे ॥ १६ ॥

अथ सप्तदशी–

षळश्वाँआतिथिग्वइन्द्रोतेवधूमतः । सचापूतक्रतौसनम् ॥ १७ ॥

षट् । अश्वान् । आतिथिऽग्वे । इन्द्रोते । वधूऽमतः ।
सचा । पूतऽक्रतौ । सनम् ॥ १७ ॥

आतिथिग्वे इन्द्रोते पूतक्रतौ शुद्धप्रज्ञे शुद्धकर्मणि वैवा तस्मिन् वधूमतोवधूभिर्वडवाभि- स्तद्वतः षळश्वान् ऋक्षाश्वमेधयोः पुत्राभ्यां दत्तेनाश्वादिधनेन सचा सह सनं लब्धवानस्मि एवत्साहित्यवचनं इन्द्रोतदानस्य प्रासंगिकत्वे लिंगम् ॥ १७ ॥

अथाष्टादशी–

ऐषुचेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी । स्वभीशुःकशावती ॥ १८ ॥

आ । एषु । चेतत् । वृषण्ऽवती । अन्तः । ऋज्रेषु । अरुषी ।
सुऽअभीशुः । कशाऽवती ॥ १८ ॥

एष्वृज्रेषु ऋजुगामिष्वश्वेषु अन्तर्मध्ये आचेतत् आज्ञायते । का वृषण्वतीवर्षकैः पुमश्वै- स्तद्वती । अरुषी आरोचमाना स्वभीशुः शोभनप्रग्रहा कशावती दशा वडवा ज्ञायते ॥ १८ ॥

अथैकोनविंशी–

नपुष्मेवाजवन्धवोनिनित्सुश्चनमर्त्यः । अवद्यमधिदीधरत् ॥ १९ ॥ २ ॥

न । युष्मे इति । वाजऽबन्धवः । निनित्सुः । चन । मर्त्यः ।
अवद्यम् । अधि । दीधरत् ॥ १९ ॥ ४ ॥

हे वाजबन्धवः अन्नबन्धवः अन्नप्रदाः एवं पुत्राणां पितृपुत्ररूपाणां षण्णां वा संबोधनं हे राजानः युष्मे युष्मासु निनित्सुश्चन निन्दकोपि मर्त्योमनुष्यः अवद्यं निंदा नाधिदीधरत् नान्वधारयत् नारोपयति युष्मासु । अतःअनिन्द्या यूयमिति दातॄणां स्तुतिः ॥ १९ ॥

॥ इति षष्ठस्य पञ्चमे चतुर्थोवर्गः ॥ ४ ॥

प्रप्रवइत्यष्टादशर्चं दशमं सूक्तं प्रियमेधस्याङ्गिरसस्यार्षं द्वितीया नदंवइत्येषा चतुःसप्तकोष्णिक् चतुर्थ्याद्यास्तिस्रोगायत्र्यः एकादशीषोडश्यौ पंक्ती शिष्टाद्यानुष्टुभः । अयादिन्द्रइत्यर्धर्चंवैश्वदेवः वरुणइदिहेत्याद्यास्त्रयोर्धर्चा वरुणदेवताकाः। शिष्टाऐन्द्र्यः । तथाचानुकान्तम्—प्रप्रद्व्यूनानुष्टुभं द्विवृहत्यन्तं द्वितीयोष्णिक् चतुर्थ्याद्यास्तिस्रोगायत्र्यः षोळश्येकादश्यौपङ्क्ती अयादिश्वदेवोर्धर्चस्त्रयोवारुणाइति । आद्यस्तृचः षोडशिशस्त्रे आनुष्टुभः सूत्रितश्च—प्रप्रवस्त्रिष्टुभमिषमर्चतप्रार्चतेति ।

तत्र प्रथमा—

प्रप्रंवस्त्रिष्टुभमिषंमन्दद्वीरायेन्दवे ।
धियावोमेधसातयेपुरन्ध्याविवासति ॥ १ ॥

प्रऽप्र । वः । त्रिऽस्तुभंम् । इषम् । मन्दत्ऽवीराय । इन्दवे ।
धिया । वः । मेधऽसातये । पुरंम्ऽध्या । आ । विवासति ॥ १ ॥

हे अध्वर्य्वादयो वो यूयं प्रथमार्थेद्वितीया त्रिष्टुभं स्तोभत्रयोपेतमिषमन्नं प्रप्र अपरः प्रशब्दः पूरणः प्रभरतेतिशेषः उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। कस्मै मन्दद्वीराय योवीरान् हर्षयति समन्दद्वीरः तस्मै इन्दवे इन्द्राय इन्धतेरैश्वर्यकर्मण इदंरूपं।अथवा फलैर्वृष्टिभिर्वा उनत्तीतीन्दुरिन्द्रस्तस्मै सचेन्द्रो वो युष्मान्मेधसातये यज्ञसंभजनाय पुरन्ध्या बहुप्रज्ञया धिया कर्मणा आविवासति अभिमतफलयोजनेन सत्करोतीत्यर्थः ॥ १ ॥

महाव्रते निष्केवल्ये नदंवइत्येषा विहरणीया तथैवपञ्चमारण्यके सूत्रितंच—नदंवओदतीनामित्येतयैवानि व्यतिषजतीति ।

सैषा द्वितीया—

नदंवओदतीनांनदंयोयुवतीनाम् । पतिंवोअघ्न्यानांधेनूनामिषुध्यसि॥२॥

नदम् । वः । ओदतीनाम् । नदम् । योयुवतीनाम् ।
पतिम् । वः । अघ्न्यानाम् । धेनूनाम् । इषुध्यसि ॥ २ ॥

ओदतीनां ओदत्यउषसः। ओदती भास्वतीति तन्नामसुपाठात् । उषसां नदं उत्पादकमित्यर्थः इन्द्रेण ह्युषसउत्पद्यन्ते इन्द्रस्यैव सूर्यत्वात् विवस्वदिन्द्र युग्म्यइतिहि द्वादशादित्यमध्ये इन्द्रः पठितः तादृशमिन्द्रं हे यजमाना वो युष्मदर्थं । आह्वयत इत्यर्थः । तथा योयुवतीनां सर्वत्र मिश्रयन्तीनां नदीनां नदं शब्दयितारं वो युष्मदर्थं आह्वयामि । अघ्न्यानां अहन्तव्यानां गवां पतिं आह्वये । अथप्रत्यक्षकृता हे यजमान त्वं धेनूनां क्षीरादिना प्रीणयित्रीणां गवामिषुध्यस्यन्नमिच्छसि ॥ २ ॥

अग्निहोत्रे पूर्वाहुतौ हुतायां ताअस्येत्यनयोत्तरामाहुतिं कांक्षमाणस्तिष्ठेत् । तथाचसूत्रितम्—ताअस्यसूददोहसइति पूर्वामाहुतिमुपोत्थायोत्तरां कांक्षेतेति । महाव्रते निष्केवल्येप्येषा तत्रैव पञ्चमारण्यके सूत्रितं—ताअस्यसूददोहइत्येतदादिः सूददोहाः सूददोहाइति ।

सैषा तृतीया—

ताअस्यसूददोहसःसोमंश्रीणन्तिपृश्नयः ।
जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ॥ ३ ॥

ताः । अस्य । सूदऽदोहसः । सोमम् । श्रीणन्ति । पृश्नयः ।
जन्मन् । देवानाम् । विशः । त्रिषु । आ । रोचने । दिवः ॥ ३ ॥

ताः प्रसिद्धाः सूददोहसः सूदइति कूपनाम तत्सदृशदोहनाः पृश्नयः पृश्निवर्णाः गावोस्येन्द्रस्य सोमं श्रीणन्ति मिश्रयन्त्याशिरेण । कदा त्रिषु त्रिष्वपि सवनेषु । गावो विशेष्यन्ते देवानां जन्मन् जन्मस्थाने दिवीति शेषः दिवआदित्यस्य आरोचने आरोचमाने अनेन द्यौर्विशेष्यते तस्मिन् स्थाने विशोनिविशन्त्यः । यज्ञार्थोपयुक्तानां गवां द्युप्राप्तिः प्रसिद्धा ॥ ३ ॥

द्वितीयपर्याये मैत्रावरुणशस्त्रे अभिप्रगोपतिमिति तृचोनुरूपः सूत्रितंच—अभित्वावृषभासुतेभिप्रगोपतिंगिरेति ।

अथ चतुर्थी–

अभिप्रगोपतिंगिरेन्द्रमर्चयथाविदे । सूनुंसत्यस्यसत्पतिम् ॥ ४ ॥

अभि । प्र । गोऽपतिम् । गिरा । इन्द्रम् । अर्च । यथा ।
विदे । सूनुम् । सत्यस्य । सत्ऽपतिम् ॥ ४ ॥

गोपतिं गवांस्वामिनमिन्द्रं अभिमार्च प्रकर्षेण पूजय गिरा स्तुत्या यथा विदे सयथा स्वात्मानं स्तुतप्रकारं जानाति यथावा यागं प्रतिगन्तव्यमिति जानाति तथार्चेति। कीदृशमिन्द्रं सत्यस्य यज्ञस्य सत्यस्यवा सूनुं पुत्रं तत्रानुरक्तत्वात् सूनुरित्युपचर्यते सत्पतिं सतां यजमानानां पालकम् ॥ ४ ॥

अथ तृचे द्वितीया सूक्ते पञ्चमी–

आहरयःससृज्रिरेरुषीरधिबर्हिषि । यत्राभिसंनवामहे ॥ ५ ॥ ५॥

आ । हरयः । ससृज्रिरे । अरुषीः । अधि । बर्हिषि ।
यत्र । अभि । सम्ऽनवामहे ॥ ५ ॥ ५ ॥

हरयो हरितवर्णाअश्वाः अरुषीरारोचमानाः अधिबर्हिषि अधीति सप्तम्यर्थानुवादी बर्हिष्यास्तृते आससृज्रिरे आसृजन्तु यत्र यस्मिन्बर्हिषि स्थितमिन्द्रमभिसन्नवामहे अभि संस्तुमः ॥ ५ ॥

॥ इतिषष्ठस्य पञ्चमे पञ्चमोवर्गः ॥ ५ ॥

अथ तृचे तृतीया सूक्ते षष्ठी–

इन्द्रायगावआशिरंदुदुह्रेवज्रिणेमधु । यत्सीमुपह्वरेविदत् ॥ ६ ॥

इन्द्राय । गावः । आऽशिरम् । दुदुह्रे । वज्रिणे ।
मधु । यत् । सीम् । उपऽह्वरे । विदत् ॥ ६ ॥

इन्द्राय गावआशिरं आश्रयणसाधनं पयआदिकं मधु मदकरं दुदुह्रे दुहते । कीदृशाय वज्रिणे वज्रयुक्तायेन्द्राय यद्यदा उपह्वरे समीपेवर्तमानं मधु सोमरसं सीं सर्वतोविदत् लभते तदा ॥ ६ ॥

षोडशिशस्त्रस्योद्यद्ब्रध्नस्येत्येषान्या सूचितश्च–उद्यद्ब्रध्नस्यविष्टपमित्येषा परिधानीयेति ।

सेषा सप्तमी—

उद्यद्ब्रध्नस्यविष्टपंगृहमिन्द्रश्चगन्वहि ।
मध्वःपीत्वासचेवहित्रिःसप्तसख्युःपदे ॥ ७ ॥

उत् । यत् । ब्रध्नस्य । विष्टपम् । गृहम् । इन्द्रः । च । गन्वहि ।
मध्वः । पीत्वा । सचेवहि । त्रिः । सप्त । सख्युः । पदे ॥ ७ ॥

यद्यदा ब्रध्नस्य महन्नाम ब्रध्नइति महत आदित्यस्य विष्टपं स्थानं गृहं इन्द्रश्चाहं चो-भौ उद्गन्वहि उद्गच्छावः । तदानीं मध्वो मधुरं सोमरसं पीत्वा सचेवहि संसृष्टौ भवेव । कुत्र सख्युःपदे सर्वेषां सखिभूतस्यादित्यस्य त्रिःसप्तेत्यनेन देवलोकानामुत्तममेकविंशस्थानमुच्यते आदित्यस्यैकविंशत्वात् । तथाचब्राह्मणम्—द्वादशमासाःपञ्चर्तवस्त्रयइमेलोका असावादित्यएकविंशइति । तादृशे एकविंशस्थाने सचेवहीति ॥ ७ ॥

पूर्वोक्तएवशस्त्रे अर्चतेतिद्वितीयआनुष्टुभस्तृचः । सूत्रितञ्च—प्रप्रवस्त्रिष्टुभमिषमर्चतप्रार्चतेति[1] ।

अस्मिंस्तृचे प्रथमा सूक्तेष्टम्येषा—

अर्चतप्रार्चतप्रियमेधासोअर्चत ।
अर्चन्तुपुत्रकाउतपुरंनधृष्ण्वर्चत ॥ ८ ॥

अर्चत । प्र । अर्चत । प्रियऽमेधासः । अर्चत । अर्चन्तु ।
पुत्रकाः । उत । पुरम् । न । धृष्णु । अर्चत ॥ ८ ॥

हे अध्वर्य्वादयो यूयं इन्द्रं अर्चत पूजयत स्तुत्याप्रार्चत प्रकर्षेणार्चतेन्द्रमेव । हे प्रियमेधासः प्रियमेधसम्बन्धिनः तद्गोत्रा यूयमर्चतेन्द्रं पुत्रका पुत्राअप्यर्चन्त्विन्द्रं । उतापिच पुरंन धृष्णु यथा पुरं धर्षणशीलं अर्चन्ति तादृशमिन्द्रमर्चत ॥ ८ ॥

अथ तृचे द्वितीया सूक्ते नवमी—

अवस्वरातिगर्गरोगोधापरिसनिष्वणत् ।
पिङ्गापरिचनिष्कददिन्द्रायब्रह्मोद्यतम् ॥ ९ ॥

---

1 ऐ० आ० १. ३०. ।

अर्व । स्वराति । गर्गरः । गोधा । परि । सनिस्वनत् ।
पिङ्गा । परि । चनिस्कदत् । इन्द्राय । ब्रह्म । उत्ऽयंतम् ॥ ९ ॥

गर्गरो गर्गरध्वनियुक्तोवा वाद्यविशेषो युद्धे अवस्वराति भयंशब्दयति । गोधा हस्तघ्नः परि परितः सनिष्वणत स्वनति भृशं पिंगा पिंगवर्णाज्याधि परिचनिष्कदत् परिस्कन्दते यस्मादेवं युद्धः संनद्धः अतइन्द्राय ब्रह्मपरिवृढंकर्म स्तुतिलक्षणं उद्यतं भवतिविशेषः ॥ ९ ॥

अथ तृचे तृतीया सूक्ते दशमी—

आयत्पतन्त्येन्यः सुदुघाअनपस्फुरः ।
अपस्फुरंगृभायतसोममिन्द्रायपातवे ॥ १० ॥ ६ ॥

आ । यत् । पतन्ति । एन्यः । सुऽदुघाः । अनपऽस्फुरः ।
अपऽस्फुरम् । गृभायत । सोमम् । इन्द्राय । पातवे ॥ १० ॥ ६ ॥

यदा एन्यः एतवर्णाः शुभ्रवर्णानद्यः आपतन्ति आगच्छन्ति सर्वतः प्रवहन्ति । कीदृश्यः सुदुघाः सुदोहा अनपस्फुरः अपस्फुरो अपस्फुरा अपवृद्धाः अतादृश्यः अनपस्फुरः अत्यन्तंप्रवृद्धाइत्यर्थः । यद्वा सुदुघाः प्रवृद्धा एतवर्णागावो यदा पयआदयर्थायापतन्ति तदा अपस्फुरं अत्रापशब्दो धात्वर्थानुवादी अत्यन्तं प्रवृद्धं सोममिन्द्राय पातवे पातुं गृभायत ग्रहणंकुरुत । अथवा अनपस्फुरइत्यत्रापशब्दोनुवादी धात्वर्थस्य । तथासत्ययमर्थः—यदाएन्योनद्यः अनपस्फुरःअप्रवृद्धोदका आपतन्ति वृष्टिरल्पा यदाभवति तदा सोममिन्द्रार्थं संपादयतेति॥१०॥

॥ इति पष्ठस्य पञ्चमे पष्ठोवर्गः ॥ ६ ॥

अथैकादशी—

अपादिन्द्रोअपादग्निर्विश्वेदेवाअमत्सत ।
वरुणइदिहक्षयत्तमापोअभ्यनूषतवत्संसंशिश्वरीरिव॥११॥

अपात् । इन्द्रः । अपात् । अग्निः । विश्वे । देवाः । अमत्सत ।
वरुणः । इत् । इह । क्षयत् । तम् । आपः । अभि ।
अनूषत । वत्सम् । संशिश्वरीःऽइव ॥ ११ ॥

इन्द्रोपादपिबत् सोममग्निरप्यपिबत् विश्वेदेवा अप्यमत्सत तृप्ता अभवन् सोमपानेन वरुणइव वरुणोपीहास्मिन् यागगृहे क्षयत् निवसतु सोमपानार्थं निवसन्तं तं आपोप्यभ्यनूषत उदकान्यापनशीलाः स्तुतयोवा अभ्यस्तुवन्। किमिव वत्सं स्वीयं संशिश्वरीः संशिश्वर्यः संगच्छमाना गावइव। तायथा धावन्त्यो हंभारवं कुर्वन्ति तद्वत् ॥ ११ ॥

अथ द्वादशी—

सुदेवोअसिवरुणयस्यतेसप्तसिन्धवः।
अनुक्षरन्तिकाकुदंसूर्म्यंसुषिरामिव ॥ १२ ॥

सुऽदेवः। असि। वरुण। यस्य। ते। सप्त। सिन्धवः।
अनुऽक्षरन्ति। काकुदम्। सूर्म्यम्। सुषिराम्ऽइव ॥ १२ ॥

हे वरुण जलाभिमानिन् देव त्वं सुदेवोऽसि यस्य सुदेवस्य ते तव काकुदं तालु समुद्राख्यं सप्तसिन्धवो गंगाद्याः सप्तनद्योऽनुक्षरन्ति जिह्वायां सर्वदा स्रवन्ति। दृष्टान्तः—सूर्म्यं सुषिरामिव यथा सूर्यं प्रतिरश्मिजालं तद्वत् ॥ १२ ॥

षोडशिशस्त्रे योव्यतीनिति तृतीयआनुष्टुभस्तृचः सूत्रितश्च—योव्यतीँरफाणयदिविट् च आनुष्टुभइति।

तृचे प्रथमा सूक्ते त्रयोदशी—

योव्यतीँरफाणयत्सुयुक्ताँउपदाशुषे।
तक्वोनेतातदिद्वपुरुपमायोअमुच्यत ॥ १३ ॥

यः। विऽअतीन्। अफाणयत्। सुऽयुक्तान्। उप। दाशुषे। तक्वः।
नेता। तत्। इत्। वपुः। उपऽमा। यः। अमुच्यत ॥ १३ ॥

यइन्द्रोव्यतीन् विविधगमनान् सुयुक्तान् सुष्ठुरथे संबद्धान् अश्वान् दाशुषे हविर्दात्रे यजमानाय गन्तुं प्राप्तुं उप अफाणयत् उपगमयति फणतिर्गतिकर्मा। यदेवंकरोति तदित् तदानीमेव तक्वः तकतिर्गतिकर्मा यज्ञगमनशीलो नेताउदकस्य फलस्य वा नायक इन्द्रोवपुरुदकं उत्पादयतीतिशेषः यइन्द्र उपमा उपमानभूतः अमुच्यत अन्यैर्वृष्टिनिवारकै रसुरादिभिर्मुक्तोभवति ॥ १३ ॥

अथ तृचे द्वितीया सूक्ते चतुर्दशी—

अतीदुंशक्रओंहतइन्द्रोविश्वाअतिद्विषः ।
भिनत्कनीनंओदनंपच्यमानंपरोगिरा ॥ १४ ॥

अति । इत् । । ऊँ इति । शक्रः । ओहते । इन्द्रः । विश्वाः ।
अति । द्विषः । भिनत् । कनीनः । ओदनम् ।
पच्यमानम् । परः । गिरा ॥ १४ ॥

अयमिन्द्रः शक्रः शक्तः सन् अतीदोहते अतिक्रम्य गच्छत्येव संग्रामे निरोधकान् शत्रून् । तदेवाह—अयमिन्द्रो विश्वाः द्विषो द्वेष्टॄन् शत्रूनति अतिक्रम्य गच्छति । कनीनः कमनीयः परोमेघानां परस्ताद्वर्तमान इन्द्रओदनं मेघनामैतत् मेघं भिनत् अभिनत् भिनत्ति वृष्ट्यर्थं । कीदृशं गिरा माध्यमिकयावाचा स्तनितलक्षणया पच्यमानं वज्रनिर्घोषेण ताड्यमानमित्यर्थः ॥ १४ ॥

अथ तृचे तृतीया सूक्ते पञ्चदशी—

अर्भकोनकुमारकोधितिष्ठंनवंरथम् ।
सपक्षन्महिषंमृगंपित्रेमात्रेविभुक्रतुम् ॥ १५ ॥

अर्भकः । न । कुमारकः । अधि । तिष्ठत् । नवम् । रथम् ।
सः । पक्षत् । महिषम् । मृगम् । पित्रे । मात्रे । विभुऽक्रतुम् ॥ १५ ॥

अयमिन्द्रः अर्भकोन अल्पशरीरः कुमारकः कुमारकइव पित्रे मात्रे सयथाधितिष्ठति तद्वत् नवं स्तुत्यं रथमधितिष्ठदधितिष्ठति सइन्द्रो महिषं महान्तं मृगं मृगवदितस्ततो धावन्तं सर्वैर्मृग्यं वा विभुक्रतुं बहुकर्माणं मेघं पक्षत् पचति वृष्ट्यभिमुखं करोतीत्यर्थः ॥ १५ ॥

सैषा षोडशी—

आतूसुंशिप्रदंपतेरथंतिष्ठाहिरण्ययम् ।
अधद्युक्षंसचेवहिसहस्रपादमरुपंस्वस्तिगामनेहसम् ॥ १६ ॥

आ । तु । सुऽशिप्र । दम्ऽपते । रथम् । तिष्ठ । हिरण्ययम् । अध ।
युक्षम् । सचेवहि । सहस्रऽपादम् । अरुषम् ।
स्वस्तिऽगाम् । अनेहसम् ॥ १६ ॥

हे सुशिप्र सुहनो हे दंपते गृहस्वामिन् अत्र गृहोरथः तस्यस्वामिन् तु त्वं तावद्रथमातिष्ठ हविः स्वीकरणानन्तरं पश्चादहमारोहामीतिभावः । कीदृशं हिरण्ययं हिरण्मयं अध तवारोहणानन्तरं अहमथारुह्य उभौ सचेवहि संगच्छेवहि संगतौ भवेव । किंतद् युक्षं दीप्तं रथं कीदृशं सहस्रपादं बहुपादं अरुषमारोचनं स्वस्तिगां कुशलगमनं अनेहसमपापम् ॥ १६ ॥

पूर्वाह्णे प्रवर्ग्ये तंघेमित्थेत्येषा । सूत्रितञ्च—तंघेमित्थानमस्विनइति मागार्थीपूर्वाह्णइति ।

सैषा सप्तदशी—

तंघेमित्थानमस्विनउपस्वराजमासते ।
अर्थंचिदस्यसुधितंयदेतवआवर्तयन्तिदावने ॥१७॥

तम् । घ । ईम् । इत्था । नमस्विनः । उप । स्वऽराजम् ।
आसते । अर्थम् । चित् । अस्य । सुऽधितम् । यत् ।
एतवे । आऽवर्तयन्ति । दावने ॥ १७ ॥

तं घ तं खल्वीमेनमिन्द्रं इत्था इत्थमनेन प्रकारेण नमस्विनोन्नवन्तः स्तुतिमन्तोवाध्वर्य्वादयः स्वराजं स्वयं राजमानं वा उपासते सेवन्ते । तथा कृत्वाअर्थंचित् अरणीयं धनं सुधितं सुष्ठु स्थापितं अस्येन्द्रस्य संबन्धिनं प्राप्नुवन्तीविशेषः।कदेत्याह—यद्यदा एतवे अस्येन्द्रस्य गमनाय स्वयं प्राप्तुंवा दावने हविर्दानायावर्तयन्ति स्तुतयः तदेत्यर्थः । अथवा अश्वावा आवर्तयन्ति तदेत्यर्थः ॥ १७ ॥

अथाष्टादशी—

अनुप्रत्नस्यौकसःप्रियमेधासएषाम् ।
पूर्वामनुप्रयतिंवृक्तबर्हिषोहितप्रयसआशत ॥ १८ ॥ ७ ॥

अनु । प्रत्नस्य । ओकसः । प्रियऽमेधासः । एषाम् ।

पूर्वाम् । अनु । प्रऽयतिम् । वृक्तऽबर्हिषः ।
हितऽप्रयसः । आशत ॥ १८ ॥ ७ ॥

अनया स्तुतिमुपसंहरति एषां देवानामिन्द्रादीनां प्रत्नस्य पुराणस्यौकसः स्थानस्य पुराणं स्थानं प्रियमेधासः प्रियमेधा अन्वाशत अनुप्रापुः । कीदृशाः प्रियमेधाः पूर्वां मुख्यां प्रयतिं प्रदानमनुलक्षीकृत्य वृक्तबर्हिषः स्तीर्णदर्भाः हितप्रयसः आराद्धितसोमादिहविष्काः ॥ १८ ॥

॥ इति षष्ठस्य पञ्चमे सप्तमोवर्गः ॥ ७ ॥

॥ इत्यष्टमे मण्डले सप्तमोनुवाकः ॥ ७ ॥

अष्टमेनुवाके एकादशसूक्तानि तत्र योराजेति पञ्चदशर्चं प्रथमं सूक्तं । अत्रानुक्रमणिका—योराजापञ्चोना पुरुहन्मा बार्हतं त्रिप्रगाथाद्युष्णिगनुष्टुप्पुरउष्णिगन्तमिति । पुरुहन्माऋषिः सच क्वचित्कथंचिद्विशेषितमिति परिभाषयांगिरसः आद्यातृतीयापञ्चम्योबृहत्यः द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः सप्तम्याद्याः षड्बृहत्यः त्रयोदशीपुरउष्णिक् आद्यद्वादशकाद्यष्टका आद्यश्चेत्पुरउष्णिगितिहि तल्लक्षणं । इन्द्रोदेवता । महाव्रते निष्केवल्ये बार्हततृचाशीतावादित एकादशर्चः तथाचपञ्चमारण्यकेसूत्रितं—योराजाचर्षणीनामित्येकादशेति ।

तत्र प्रथमा—

योराजांचर्षणीनांयातारथेभिरध्रिगुः ।
विश्वांसांतरुतापृतंनानांज्येष्ठोयोवृत्रहागृणे ॥ १ ॥

यः । राजां । चर्षणीनाम् । याता । रथेभिः । अध्रिऽगुः । विश्वांसाम् ।
तरुता । पृतनानाम् । ज्येष्ठः । यः । वृत्रऽहा । गृणे ॥ १ ॥

यइन्द्रश्चर्षणीनां मनुष्याणां राजा स्वामीरथेभिः रथैः याता गन्ताच अध्रिगुरधृतगमनोपि विश्वासां पृतनानां सेनानां तरुता तारकः यश्च ज्येष्ठः गुणैर्ज्यायान् यश्च वृत्रहा वृत्रं हन्तवान् तं महाभागमिन्द्रं गृणे स्तौमि ॥ १ ॥

अथ द्वितीया—

इन्द्रंतंशुंभपुरुहन्मन्नवसेयस्यंद्विताविधर्तरि ।
हस्तांयवज्रःप्रतिंधायिदर्शतोमहोदिवेनसूर्यः ॥ २ ॥

इन्द्रम् । तम् । शुम्भ । पुरुऽहन्मन् । अवसे । यस्य । द्विता ।
विऽधर्तरि । हस्ताय । वज्रः । प्रति । धायि । दर्शतः ।
महः । दिवे । न । सूर्यः ॥ २ ॥

हे पुरुहन्मन् ऋपे त्वं तमिन्द्रं शुंभ हविःप्रदानादिनालंकुरु । किमर्थं अवसे रक्षणाय एवमात्मना स्वात्मानं संबोध्य ब्रवीति– यस्य तव विधर्तरि विधारके इन्द्रे द्विता द्वित्वमस्ति औग्र्यमनौग्र्यं तव शत्रून् हन्तुमुग्रत्वं त्वदनुग्रहायानौग्र्यं चेति द्वैतमस्ति । तत्रौग्र्यं चिह्नं दर्शयति हस्ताय कराय हननाय शत्रूणां दर्शतो दर्शनीयः महोमहान्वज्रः प्रतिधायि प्रतिनिहितो भवति । दिवे प्रकाशाय दिवसायवा अथवा दिवि दृश्यमानः सूर्योन सूर्यइव ॥ २ ॥

तस्मिन्नेवशस्त्रे नकिष्टमिति प्रगाथो वैकल्पिकःस्तोत्रियः सूत्रितश्च–नकिष्टंकर्मणानशन्नत्याप्रहन्तोअद्रयइति ।

तृचे प्रथमा सूक्ते तृतीया–

नकिष्टंकर्मणानशद्यश्चकारसदावृधम् ।
इन्द्रंनयज्ञैर्विश्वगूर्तमृभ्वसमधृष्टंधृष्ण्वोजसम् ॥ ३ ॥

नकिः । तम् । कर्मणा । नशत् । यः । चकार । सदाऽवृधम् ।
इन्द्रम् । न । यज्ञैः । विश्वऽगूर्तम् । ऋभ्वसम् ।
अधृष्टम् । धृष्णुऽओजसम् ॥ ३ ॥

तं जनं अन्योप्रपंकोजनः कर्मणा हननादिव्यापारेण नकिर्नशत् नैवव्याप्नोति यइन्द्रं चकार इन्द्रमेवानुकूलं यज्ञैः साधनैः । कीदृशमिन्द्रं सदावृधं सदावर्धकं विश्वगूर्तं सर्वैःस्तुत्यं ऋभ्वसं महान्तं अधृष्टमन्यैः धृष्ण्वोजसं धर्षकबलम् ॥ ३ ॥

अथ तृचे द्वितीया सूक्ते चतुर्थी–

अषाळ्हमुग्रंपृतनासुसासहिंयस्मिन्महीरुरुज्रयः ।
संधेनवोजायमानेअनोनवुर्द्यावःक्षामोअनोनवुः ॥ ४ ॥

अपाह्ळम् । उग्रम् । पृतनासु । सुसहिम् । यस्मिन् । महीः ।
उरुऽज्रयः । सम् । धेनवः । जायमाने । अनोनवुः ।
द्यावः । क्षामः । अनोनवुः ॥ ४ ॥

अपाह्ळं असोढं उग्रमुद्गूर्णबलं पृतनासु शत्रुसेनासु सासहिं अभिभवितारं स्तौमीत्यर्थः । यस्मिन्निन्द्रे जायमाने महीर्महत्यः उरुज्रयो बहुवेगाः धेनवोऽहविरादिनाप्रीणयित्र्यः प्रजागावएववा समनोनवुः समस्तुवन् । नकेवलं धेनवएव अपितु द्यावोद्युलोकाः क्षामः पृथिव्यश्च समनोनवुः। तत्रत्याः सर्वेप्राणिनो नमन्तेइत्यर्थः । त्रिवृतो लोकाइति श्रुतेर्बहुवचनम् ॥४॥

तृतीयेहनि निष्केवल्ये वैरूपसामपक्षे यद्द्यावइति प्रगाथःस्तोत्रियः । सूत्रितश्च—यद्द्यावइन्द्रतेशतं यदिन्द्रयावतस्त्वमिति प्रगाथौ स्तोत्रियानुरूपाविति ।

तत्र प्रथमा सूक्ते पञ्चमी—

यद्द्याव॑इन्द्रतेश॒तंश॒तंभूमी॑रु॒तस्यु॒ः ।
नत्वा॑वज्रिन्त्स॒हस्रं॒सूर्या॒अनु॒नजा॒तम॑ष्ट॒रोद॑सी ॥ ५ ॥ ८ ॥

यत् । द्यावः । इन्द्र । ते । शतम् । शतम् । भूमीः । उत ।
स्युरिति स्युः । न । त्वा । वज्रिन् । सहस्रम् । सूर्याः । अनु ।
न । जातम् । अष्ट । रोदसी इति ॥ ५ ॥ ८ ॥

हे इन्द्र ते तव प्रतिमानार्थं यद्यदि द्यावोद्युलोकाः शतंस्युः तथापि नाश्नुवन्ति । उतापिच भूमीर्भूम्यः ते तवमूर्तिप्रतिबिम्बाय शतंस्युः तथापि नाप्नुवन्ति । हे वज्रिन् त्वा त्वां सहस्रं सूर्या अगणिताःअपि सूर्याः नानुभवन्ति नप्रकाशयन्तीत्यर्थः । न तत्र सूर्यो भातीति श्रुतेः । किंबहुना जातं पूर्वमुत्पन्नं किञ्च अनुनाष्ट नाश्नुते । तथा रोदसी द्यावापृथिव्यौ नाश्नुवाते सर्वेभ्योतिरिच्यसइत्यर्थः । ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्योलोकेभ्यइतिश्रुतेः ॥ ५ ॥

॥ इति पष्ठस्य पञ्चमेऽष्टमोवर्गः ॥ ८ ॥

१ ऐ० ब्रा० २ १७.   २ कठोपनिषत्   ३ बृहदारण्यके

अथ प्रगाथे द्वितीया सूक्ते षष्ठी–

आ प॑प्राथ महि॒ना वृष्ण्या॑ वृष॒न्विश्वा॑ शविष्ठ॒ शव॑सा ।
अ॒स्माँ अ॑व मघव॒न्गोम॑ति व्र॒जे वज्रि॑ञ्चि॒त्राभि॑रू॒तिभिः॑ ॥६॥

आ । प॒प्रा॒थ॒ । म॒हि॒ना । वृष्ण्या॑ । वृ॒ष॒न् । विश्वा॑ । श॒वि॒ष्ठ॒ । शव॑सा ।
अ॒स्मान् । अ॒व॒ । म॒घ॒ऽव॒न् । गोऽम॑ति । व्र॒जे । वज्रि॑न् ।
चि॒त्राभिः॑ । ऊ॒तिऽभिः॑ ॥ ६ ॥

हे शविष्ठ मघवन् बलवन् धनवन् हे वृषन् अभिमतवर्षकेन्द्र त्वं आपप्राथ आपूरयसि व्याप्नोषि । कानि विश्वा विश्वानि सर्वाणि वृष्ण्या वर्षकाणि बलानि शत्रुसंबन्धीनि । केनसाधनेन महिना महता शवसा बलेन स्वीयेन । अथवा वृष्ण्येत्येतच्छवोविशेषणं तथा सति अभिमतवर्षकेण महता बलेनास्मदीयानि बलानि पूरयसीत्यर्थः । अथ तथाकृत्वा अस्मान्गोमति बहुभिर्गोभिर्युक्ते व्रजे शत्रुसंबन्धिनि निमित्ते सत्यस्मानव । हे वज्रिन् वज्रयुक्तेन्द्र कैः साधनैः चित्राभिर्नानाविधैरूतिभीरक्षणैरिति ॥ ६ ॥

अथ सप्तमी–

न सी॒मदे॑व आप॒दिषं॑ दीर्घायो॒ मर्त्यः॑ ।
एत॑ग्वा चि॒द्य एत॑शा यु॒योज॑ते॒ हरी॒ इन्द्रो॑ यु॒योज॑ते ॥७॥

न । सी॒म् । अदे॑वः । आप॒त् । इष॑म् । दी॒र्घा॒यो॒ इति॑ दीर्घऽआयो ।
मर्त्यः॑ । एत॑ऽग्वा । चि॒त् । यः । एत॑शा । यु॒योज॑ते ।
हरी॒ इति॑ । इन्द्रः॑ । यु॒योज॑ते ॥ ७ ॥

हे दीर्घायो नित्येन्द्र सः अदेवः इन्द्राख्यदेवरहितो मर्त्यो मरणधर्मा मनुष्यो सीं सर्वमिषमन्नं नापत नाप्नोति । योमर्त्योस्येन्द्रस्य एतग्वाचित् एतवर्णाविवाश्वौ भवतोभिमतदेशगमनाय एतशा एतशौ अश्वौ युयोजते योजयति रथे यहागन्तुम् यश्चेन्द्रोहरी युयोजतेसं नयः स्तोति सनप्नामोवीति समन्वयः ॥ ७ ॥

अथाष्टमी—

तंवोमहोमहाय्यमिन्द्रंदानायसक्षणिम् ।
योगाधेपुयआरणेपुहव्योवाजेष्वस्तिहव्यः ॥ ८ ॥

तम् । वः । महः । महाय्यम् । इन्द्रम् । दानाय । सक्षणिम् ।
यः । गाधेषु । यः । आऽअरणेषु । हव्यः । वाजेषु ।
अस्ति । हव्यः ॥ ८ ॥

हे ऋत्विजो महो महान्तो वो यूयं तं महाय्यं पूज्यं इन्द्रं दानाय सक्षणिं सचमानं परिचरतेतिशेषः । यइन्द्रो गाधेषूदकेषु हव्योस्ति आह्वातव्योभवति यश्चारणेषु गन्तव्येषु निम्नेषूदकेषु स्थलेषुवा हव्योस्ति तथा वाजेषु संग्रामेषु जयाय हव्यो ह्वातव्योस्ति भवति ॥ ८ ॥

अथ नवमी—

उदूषुणोवसोमहेमृशस्वशूरराधसे ।
उदूषुमह्यैमघवन्मघत्तयउदिन्द्रश्रवसेमहे ॥ ९ ॥

उत् । ऊँ इति । सु । नः । वसो इति । महे । मृशस्व । शूर । राधसे ।
उत् । ऊँ इति । सु । मह्यै । मघऽवन् । मघत्तये । उत् ।
इन्द्र । श्रवसे । महे ॥ ९ ॥

हे वसो वासयितः शूरेन्द्र त्वं नोस्मान् सु सुष्ठु उदुमृशस्व उन्मृशस्वैव उत्थापय किमर्थं महे महते राधसेन्नाय । तथा हे शूर मघवन् इन्द्र उन्मृशस्व मह्यै महत्यै मघत्तये धनदानाय तथोन्मृशस्वेन्द्र महे महत्यै श्रवसे कीर्त्यै ॥ ९ ॥

अथ दशमी—

त्वंनइन्द्रऋतयुस्त्वानिदोनितृंपसि ।
मध्येवसिष्वतुविनृम्णोर्वोर्निदासंशिश्नथोहथैः ॥१०॥१॥

त्वम् । नः । इन्द्र । ऋतऽयुः । त्वाऽनिदः । नि । तृम्पसि ।
मध्ये । वसिष्व । तुविऽनृम्ण । ऊर्वोः । नि ।
दासम् । शिश्नथः । हथैः ॥ १० ॥ ९ ॥

हे इन्द्र ऋतयुर्यज्ञकामस्त्वं नोस्मान् त्वानिदः त्वां योनिन्दति सः अयजनमेवनिन्दा तव तस्मादयष्टुः सकाशात् नि नितरां तृम्पसि प्रीणयसि तस्य धनमपहृत्येति भावः।एवं सन्तर्प्य हे तुविनृम्ण प्रभूतधन त्वं तवोर्वोर्मध्येस्मान्वसिष्व ऊरुभ्यामाच्छादय रक्षार्थं। दासं उपक्षपयितारं असद्वेषिणं पापं वा हथैर्हननैर्निशिश्नथः मारयसि। अथवा त्वद्विरोधिनं दासमसुरं निशिश्नथोहननैः ॥ १० ॥

॥ इति पञ्चस्य पञ्चमे नवमोवर्गः ॥ ९ ॥

अथैकादशी–

अन्यव्रतममानुषमयज्वानमदेवयुम् ।
अवस्वःसखादुधुवीतपर्वतःसुघ्नायदस्युंपर्वतः ॥११॥

अन्यऽव्रतम् । अमानुषम् । अयज्वानम् । अदेवऽयुम् ।
अव । स्वः । सखा । दुधुवीत । पर्वतः । सुऽघ्नाय ।
दस्युम् । पर्वतः ॥ ११ ॥

हे इन्द्र अन्यव्रतं व्यतिरिक्तकर्माणं अतएव अमानुषं मानुषाणां इन्द्रयाजिनामप्रियं अयज्वानं अयष्टारं अदेवयुं अदेवकर्मिणं पापिनं स्वः स्वर्गादवदुधुवीत अवचालयेदित्यर्थः। कः सखा पर्वतः तव सखिभूतः पर्वतऋषिः यद्यप्यन्यं देवमिष्ट्वा स्वर्गमाप्नोति सः तथापि पातयति ऋषिः। नकेवलं धूननमात्रं अपितु सुघ्नाय सुष्टु हंतं मृत्यवे दस्युमुक्तलक्षणं पर्वतः प्रेरयतीति शेषः। अत इन्द्रमेवावश्यं यजध्वमिति शेषः ॥ ११ ॥

अथ द्वादशी–

त्वंनइन्द्रासांहस्तेशविष्ठदावने ।
धानानांनसंगृभायास्मयुर्द्विःसंगृभायास्मयुः ॥ १२ ॥

त्वम् । नः । इन्द्र । आसाम् । हस्ते । शविष्ठ । दावने ।
धानानाम् । न । सम् । गृभाय । अस्मऽयुः । द्विः ।
सम् । गृभाय । अस्मऽयुः ॥ १२ ॥

हे शविष्ठ बलवन्निन्द्र त्वं नोऽस्मभ्यं दावने प्रदानाय आसां गवां कर्मणिषष्ठी एतागाः हस्ते गृभाय गृहाण । ग्रहणे दृष्टान्तः—धानानां न धाना भृष्टयवाः अत्रापि कर्मणिषष्ठी धाना-यथा संगृह्णाति तद्वद्गृहाण । कीदृशस्त्वं अस्मयुरस्मान् कामयमानः गृहीत्वा चास्मयुः सन् द्विः संगृभाय पुनर्द्विवारं संगृहाण ॥ १२ ॥

अथ त्रयोदशी—

सखा॑यः॒ क्रतु॑मिच्छत॒ कथा॑ रा॒धाम॑ श॒रस्य॑ ।
उप॑स्तुतिं भो॒जः सू॒रिर्यो अह्र॑यः ॥ १३ ॥

सखा॑यः । क्रतु॑म् । इ॒च्छ॒त॒ । क॒था । रा॒धा॒म॒ । श॒रस्य॑ ।
उप॑ऽस्तुतिम् । भो॒जः । सू॒रिः । यः । अह्र॑यः ॥ १३ ॥

हे सखायः ऋत्विजोऽध्वर्य्वादयः क्रतुं कर्मेन्द्रसंबंधिनमिच्छत कर्तुं । हे सखायः शरस्य शृहिंसायां हिंसकस्येन्द्रस्य कथा कथं राधाम साधयाम । किं उपस्तुतिं स्तोत्रं यइन्द्रोभोजः शत्रूणां भोजयिता सूरिः प्रेरकः अह्रयोऽनवनवतः शत्रूणामिति ॥ १३ ॥

अथ चतुर्दशी—

भूरि॑भिः समह॒ ऋषि॑भिर्ब॒र्हिष्म॑द्भिः स्तविष्यसे ।
यदि॒त्थमेक॑मेक॒मिच्छर॑ व॒त्सान्प॑रा॒दद॑ः ॥ १४ ॥

भूरि॑ऽभिः । स॒म॒ह॒ । ऋषि॑ऽभिः । ब॒र्हिष्म॑त्ऽभिः । स्त॒वि॒ष्य॒से॒ । यत् ।
इ॒त्थम् । एक॑म्ऽएकम् । इत् । शर॑ । व॒त्सान् । प॒रा॒ऽदद॑ः ॥ १४ ॥

हे इन्द्र समह समानपूज सर्वैः पूज्येत्यर्थः भूरिभिर्बहुभिर्ऋषिभिः अतीन्द्रियज्ञैर्ऋत्वि-भिः बर्हिष्मद्भिः यागवद्भिःस्तविष्यसे स्तूयसे यतः यइन्द्र इत्थं एकमेकमित् एकमेकमेव बहू-

न्वत्सान्स्तोतृभ्यः परादद: मयच्छसि हे शर हिंसक शत्रोः। अत्र वत्सशब्दो वत्समातृणां गवां उपलक्षकः गाः मयच्छसीति ॥ १४ ॥

अथ पञ्चदशी–

कर्णगृह्यामघवाशौरदेव्योवत्संनस्त्रिभ्यआनयत्।
अजांसूरिर्नधातवे ॥ १५ ॥ १० ॥

कर्णऽगृह्य । मघऽवा । शौरऽदेव्यः । वत्सम् । नः । त्रिऽभ्यः ।
आ । अनयत् । अजाम् । सूरिः । न । धातवे । १५ ॥ १० ॥

अयं मघवेन्द्रस्त्रिभ्यो हिंसकेभ्यः सकाशात् शौरदेव्यः दीव्यन्ति क्रीडन्त इतिदेवा योद्धारः शूराश्च ते देवाश्च शूरदेवाः तेषां हितः शौरदेवं युद्धं तत्संबन्धिन्योगाः युद्धे शत्रून्हत्वा वत्संबन्धिन्यइत्यर्थः। नः वत्सं । नेतिचार्थे वत्ससहिता अस्मभ्यं कर्णगृह्य कर्णेगृहीत्वा आनयदानयत्। सूरिर्न मेरकः स्वामीव धातवे पानायाजां यथा सआनयति कर्णेगृहीत्वा तद्वदिति ॥ १५ ॥

॥ इति पञ्चस्य पंचमे दशमोवर्गः ॥ १० ॥

त्वंनोअग्नइति पञ्चदशर्चं द्वितीयं सूक्तं सुदीतिपुरुमीळ्हावृषी तयोरन्यतरोवा आदौ नवगायत्र्यः दशमीद्वादशीचतुर्दश्योबृहत्यः एकादशीत्रयोदशीपञ्चदश्यःसतोबृहत्यः अग्निर्देवता। तथाचानुक्रान्तम्–त्वंनः सुदीति पुरुमीळ्हौ तयोर्वान्यतर आग्नेयंतु त्रिप्रगाथान्तमिति। प्रातरनुवाके आग्नेयेक्रतौ गायत्रे छन्दसि आश्विनशस्त्रे आदितोनवर्चः। तथाचसूत्रितम्–त्वंनो अग्नेमहोभिरिति नवेति।

तत्र प्रथमा–

त्वंनोअग्नेमहोभिःपाहिविश्वस्याअरातेः।
उतद्विषोमर्त्यस्य ॥ १ ॥

त्वम् । नः । अग्ने । महःऽभिः । पाहि । विश्वस्याः । अरातेः ।
उत । द्विषः । मर्त्यस्य ॥ १ ॥

हे अग्ने त्वं नोस्मान् महोभिः पूजाभिः महद्भिर्धनैर्वा पाहि रक्ष । कस्य महोभिर्विश्वस्याः बहुविधस्य अरातेरदातुः सकाशात् अदानाद्वा पाहि त्वमेव महद्धनं दत्वा अदातुरदानाद्वा सकाशाद्रक्षेत्यर्थः । यद्वा महोभिर्युक्तस्त्वमिति योज्यम् । उत अपिच द्विषोद्वेष्टुर्मर्त्यस्य मर्त्यात्सकाशात्पाहि अस्मभ्यं बलं दत्वेति भावः । अथवा मर्त्यस्यद्विषो द्वेषाद्रक्षेति संबन्धः । अरातेरित्यस्य अदानादिति पक्षे तत्रापि मर्त्यस्यादानादिति संबन्धनीयम् ॥ १ ॥

अथ द्वितीया—

नहिमन्युःपौरुषेयईशेहिवःप्रियजात ।
त्वमिदसिक्षपावान् ॥ २ ॥

नहि । मन्युः । पौरुषेयः । ईशे । हि । वः । प्रियऽजात ।
त्वम् । इत् । असि । क्षपाऽवान् ॥ २ ॥

हे प्रियजात प्रियो यजमानस्तदर्थमुत्पन्न अग्ने वस्तव पौरुषेयः पुरुषसंबन्धी मन्युःक्रोधो नहीशे नेष्टे बाधितुं अस्मदादिभीरक्षितत्वादितिभावः । दिवाचराः खलु पुरुषाः । अतो दिवा तवहानिर्नास्तीतिभावः । अथ रात्रिश्चरा रक्षःप्रभृतयः तेभ्योपि पीडा नास्तीत्युच्यते त्वमित् त्वमेवखलु क्षपावान् रात्रिमानसि रात्रौ त्वमितिविशेषेण तेजस्वीभवति ॥ २ ॥

अथ तृतीया—

सनोविश्वेभिर्देवेभिरूर्जोनपाद्भद्रशोचे ।
रयिंदेहिविश्ववारम् ॥ ३ ॥

सः । नः । विश्वेभिः । देवेभिः । ऊर्जः । नपात् । भद्रऽशोचे ।
रयिम् । देहि । विश्वऽवारम् ॥ ३ ॥

हे अग्ने सः स्तुत्यस्त्वं नोस्मभ्यं विश्वेभिः देवेभिः धनं प्रयच्छसि । हे ऊर्जोनपात् बलस्य नप्तः नपातयितर्वा हे भद्रशोचे स्तुत्य प्रकाशनदेव आदरार्थं पुनराह रयिं धनं विश्ववारं सर्वैर्वरणीयं धनं देहि । अथवा यद्वस्तुप्रमास्त्यस्मभ्यं दातुं तद्धनं गृहादिलक्षणं तच्च रयिं दानार्हं गोहिरण्यादिकंच देहीत्यपुनरुक्तिः ॥ ३ ॥

अथ चतुर्थी–

नतमंग्नेअरातयोमर्तंयुवन्तरायः ।
यंत्रायसेदाश्वांसम् ॥ ४ ॥

न । तम् । अग्ने । अरातयः । मर्तम् । युवन्त । रायः ।
यम् । त्रायसे । दाश्वांसम् ॥ ४ ॥

हे अग्ने तं मर्तं मनुष्यं स्तोतारं अरातयः अदानशीला द्वेषिणो रायो रयिमन्तो न युवन्त न पृथक्कुर्वन्ति रायो धनाद्वा नयुवन्त यं दाश्वांसं हविर्दातारं त्रायसे पालयसे ॥ ४ ॥

अथ पञ्चमी–

यंत्वंविप्रमेधसातावग्नेहिनोषिधनाय ।
सतवोतीगोषुगन्ता ॥ ५ ॥ ११ ॥

यम् । त्वम् । विप्र । मेधऽसातौ । अग्ने । हिनोषि ।
धनाय । सः । तव । ऊती । गोषु । गन्ता ॥ ५ ॥ ११ ॥

हे अग्ने विप्र त्वं यं मर्त्यं मेधसातौ यज्ञस्य संभजने हिनोषि प्रेरयसि धनाय गवादिधनलाभाय सयजमानस्तवोती ऊत्या रक्षणेन यागेषु गन्ता भवति गोमान् भवतीत्यर्थः ॥ ५ ॥

॥ इति पञ्चस्य पंचमे एकादशोवर्गः ॥ ११ ॥

अथ षष्ठी–

त्वंरयिंपुरुवीरमग्नेदाशुषेमर्ताय ।
प्रणोनयवस्योअच्छ ॥ ६ ॥

त्वम् । रयिम् । पुरुऽवीरम् । अग्ने । दाशुषे । मर्ताय ।
प्र । नः । नय । वस्यः । अच्छ ॥ ६ ॥

हे अग्ने त्वं दाशुषे हविर्दत्तवते मर्ताय मर्त्याय यजमानाय रयिं धनं पुरुवीरं बहुभिर्वीरैर्युक्तं प्रयच्छसि अतो नोस्मानपिवस्यः वसीयोधनं अच्छाभिमासुं प्रणय प्रापय ॥ ६ ॥

अथ सप्तमी—

उरुष्याणोमापरादाअघायतेजातवेदः ।
दुराध्येऽमर्ताय ॥ ७ ॥

उरुष्य । नः । मा । परा । दाः । अघऽयते । जातऽवेदः ।
दुःऽआध्ये । मर्ताय ॥ ७ ॥

हे जातवेदः जातविद्य जातधन वा अग्ने नोस्मानुरुष्य रक्ष । उरुष्यती रक्षाकर्मेति यास्कः । मापरादाः मापरादेहस्मान् । कस्माइति तउच्यते अघायते अघं पापमिच्छते दुराध्ये दुराध्यानाय दुर्विचिन्तकाय हिंसाबुद्धये मर्ताय मनुष्याय ॥ ७ ॥

अथाष्टमी—

अग्नेमाकिष्टेदेवस्यरातिमदेवोयुयोत ।
त्वमीशिषेवसूनाम् ॥ ८ ॥

अग्ने । माकिः । ते । देवस्य । रातिम् । अदेवः । युयोत ।
त्वम् । ईशिषे । वसूनाम् ॥ ८ ॥

हे अग्ने देवस्य द्योतमानस्य ते तव रातिं दानं दत्तं धनं वा कश्चित् अदेवो मर्त्यादिर्माकिर्युयोत मैव पृथक्करोतु त्वमेव ईशिषे । कस्य वसूनां धनानां ईश्वरोभवसि दातुं अनेनामिश्रणीयायारातेः सद्भाववक्तो भवति ॥ ८ ॥

अथ नवमी—

सनोवस्वउपमास्यूर्जोनपान्माहिनस्य ।
सखेवसोजरितृभ्यः ॥ ९ ॥

सः । नः । वस्वः । उप । मासि । ऊर्जः । नपात् ।
माहिनस्य । सखे । वसो इति । जरितृऽभ्यः ॥ ९ ॥

१ नि० ५. २३ ।

हे ऊर्जोनपात् बलस्य अन्नस्य पुत्र बलेन मथ्यमानत्वादाज्यलक्षणेनान्नेन प्रवर्धनाद् ऊर्जोनपात्त्वं हे सखे सखिवद्धितकारिन् वसो वासकाग्ने सः स्तुत्यत्वेन वा प्रसिद्धस्त्वं जरितृभ्यः गरितृभ्यः स्तोतृभ्यो नोस्मभ्यं माहिनस्य वस्वः माहिनइति महन्नाम महद्धनं उपमासि समीपे मासि निर्मासि प्रयच्छसीत्यर्थः ॥ ९ ॥

प्रातरनुवाके बार्हतेछन्दस्यच्छानइत्याद्यास्तृचः तथाच सूत्रितं—अच्छानःशीरशोचिषमिति पळिति । दशमेहनि प्रातःसवनेअच्छावाकअग्निमिति तृचस्यस्थाने अच्छानइति तृचोच्छावाकवादः सूत्रितश्च—अच्छानःशीरशोचिषं प्रविश्रुतायबोधुपदिति तृचाविति ।

अथ सूक्ते दशमी—

अच्छानःशीरशोचिषंगिरोयन्तुदर्शतम् ।
अच्छायज्ञासोनमसापुरूवसुंपुरुप्रशस्तमूतये॥१०॥१२॥

अच्छ॑ । नः॒ । शी॒रऽशो॑चिषम् । गिरः॑ । य॒न्तु॒ । द॒र्श॒तम् ।
अच्छ॑ । य॒ज्ञासः॑ । नम॑सा । पु॒रु॒ऽवसु॑म् । पु॒रु॒ऽप्र॒श॒स्तम् ।
ऊ॒तये॑ ॥ १० ॥ १२ ॥

अच्छाभिमुखं यन्तु गच्छन्तु नोस्माकं गिरः स्तुतयः कं शीरशोचिषं अशनशीलज्वालं दर्शतं सर्वैर्दर्शनीयं अग्निं । तथा यज्ञासो यज्ञाश्चास्मदीया नमसा हविषाज्यादिलक्षणेनाच्छाभिमुखं यन्तु गच्छतु । कीदृशं पुरुवसुं प्रभूतधनं पुरुप्रशस्तं बहुस्तुतं किमर्थं ऊतयेस्माकं रक्षणाय ॥ १० ॥

॥ इति पञ्चमस्य पञ्चमे द्वादशोवर्गः ॥ १२ ॥

अथैकादशी—

अ॒ग्निंसू॒नुंसह॑सोजा॒तवे॑दसंदा॒नाय॒वार्या॑णाम् ।
द्वि॒तायोभूद॒मृतो॒मर्त्ये॒ष्वाहोता॒मन्द्रत॑मोवि॒शि ॥ ११ ॥

अ॒ग्निम् । सू॒नुम् । सह॑सः । जा॒तऽवे॑दसम् । दा॒नाय॑ । वार्या॑णाम् ।
द्वि॒ता । यः । भूत् । अ॒मृतः॑ । मर्त्ये॑षु । आ । होता॑ ।
म॒न्द्रऽत॑मः । वि॒शि ॥ ११ ॥

अग्निं सहसःसूनुं बलस्यपुत्रं जातवेदसं जातधनं वार्याणां वरणीयानां गवादिधनानां दानाय गिरोच्छयन्त्वित्यनुवर्तते। योऽग्निरमृतः अमरणधर्मा देवेषु भवति समर्त्येष्वा आकारश्चार्थे मनुष्येषुच भूदभवदिति । एवं द्विता द्वैधं भवति देवेष्वमृतत्वमस्य प्रसिद्धम् । मनुष्येषु कीदृशो भूदिति उच्यते–विशि विक्षु यजमानरूपासु प्रजासु होता होमनिष्पादकः मन्द्रतमो मादयितृतमश्च भवति । अच्छयन्त्वितिसम्बन्धः।अथवा यः अमृतो द्विता द्वित्वं द्वैधं द्विप्रकारोभूत् कथंमर्त्येषु सामान्येन दाहपाकादिसाधनो भवदित्येतत्प्रसिद्धं । विशि यजमानरूपायांतु होता मन्द्रतमो भवदित्येवं द्वित्वम् ॥ ११ ॥

अथ द्वादशी–

अ॒ग्निंवो॑दे॒वय॒ज्यया॒ग्निंप्र॑य॒त्य॑ध्व॒रे ।
अ॒ग्निंधी॒षुप्र॑थ॒मम॒ग्निमर्व॑त्य॒ग्निंक्षैत्रा॑य॒साध॑से ॥ १२ ॥

अ॒ग्निम् । वः॒ । दे॒व॒ऽय॒ज्यया॑ । अ॒ग्निम् । प्र॒ऽय॒ति ।
अ॒ध्व॒रे । अ॒ग्निम् । धी॒षु । प्र॒थ॒मम् । अ॒ग्निम् । अर्व॑ति ।
अ॒ग्निम् । क्षैत्रा॑य । साध॑से ॥ १२ ॥

हे यजमाना वो युष्माकं देवयज्यया देवयागेन निमित्तेन देवयागार्थमग्निं स्तौमीतिशेषः । तथाग्निं अध्वरे यागे प्रयति प्रकर्षेण गच्छति प्रवृत्तेसति स्तौमि । प्रथमं इतरदेवेभ्यः । तथाग्निमर्वति आगते भ्रातृव्ये स्तौमि । यत्ते विघ्नपरिहारार्थं ।तथा क्षैत्राय क्षेत्राय क्षेत्रसंबन्धिने साधसे साधनाय क्षेत्रलाभाय स्तौमि । यज्ञान्ते क्षेत्रलाभरूपाय फलायच स्तौमि । एवं आदौ मध्येन्तेच सर्वदा स्तौमीत्यर्थः ॥ १२ ॥

अथ त्रयोदशी–

अ॒ग्निरि॒षांस॒ख्येद॑दातु॒नईशे॒योवार्या॑णाम् ।
अ॒ग्निंतो॒केतन॑ये॒शश्व॑दीमहे॒वसुं॒सन्तं॑तनू॒पाम् ॥ १३ ॥

अ॒ग्निः । इ॒षाम् । स॒ख्ये । द॒दा॒तु॒ । नः॒ । ईशे॑ । यः । वार्या॑णाम् ।
अ॒ग्निम् । तो॒के । तन॑ये । शश्व॑त् । ई॒म॒हे॒ । वसु॑म् ।
सन्त॑म् । त॒नू॒ऽपाम् ॥ १३ ॥

अग्निर्देवः सख्ये समानख्यानाय नो मर्त्यं सख्युः कर्म सख्यं तस्मिन् अथवा नोऽस्मभ्यं इषां इषोऽन्नानि ददातु। योऽग्निर्वार्याणां धनानामीशे ईष्टे सदादाविति। तमेवाग्निं तोके पुत्रार्थं तनये तत्पुत्रार्थं च शश्वद्बहुधनं अच्छ वा ईमहे याचामहे। वार्याणामीश इत्युक्तत्वादेवंलक्ष्यते कीदृशमग्निं वस्तुं वासकं सन्तं सर्वदा वर्तमानं तनूपां अंगानां पालयितारं ॥ १३ ॥

अथ चतुर्दशी—

अ॒ग्निमी॑ळि॒ष्वाव॑से॒ गाथा॑भिः शी॒रशो॑चिषम्।
अ॒ग्निं रा॒ये पु॑रुमीळ्ह श्रु॒तं नरो॒ऽग्निं सु॑दी॒तये॑ छ॒र्दिः ॥ १४ ॥

अ॒ग्निम्। ई॒ळि॒ष्व॒। अव॑से। गाथा॑भिः। शी॒रऽशो॑चिषम्।
अ॒ग्निम्। रा॒ये। पु॒रु॒ऽमी॒ळ्ह॒। श्रु॒तम्। नरः॑।
अ॒ग्निम्। सु॒ऽदी॒तये॑। छ॒र्दिः ॥ १४ ॥

हे पुरुमीळ्ह त्वमग्निं अवसे आवयोः रक्षणाय ईळिष्व स्तुहि गाथाभिः गाथेति वाङ्नाम मन्त्ररूपाभिर्वाग्भिः। कीदृशं शीरशोचिषं शयनस्वभावरोचिष्कं तथा राये धनाय अग्निं ईळिष्व श्रुतमेनं नरोऽन्येपि यजमानाः स्तुवन्ति स्वार्थं तस्मात्सुदीतये मह्यं अग्निं छर्दिर्गृहं याचस्व इत्येवं सुदीतिः पुरुमीळ्हं ब्रूते ॥ १४ ॥

अथ पञ्चदशी—

अ॒ग्निं द्वेषो॒ योत॒वै नो॑ गृणीमस्य॒ग्निं शं योश्च॒ दात॑वे।
विश्वा॑सु वि॒क्ष्व॑वि॒तेव॒ हव्यो॒ भुव॒द्वस्तु॑र्ऋ॒पूणा॑म् ॥ १५ ॥ १३ ॥

अ॒ग्निम्। द्वेषः॑। योत॒वै। नः॒। गृ॒णी॒म॒सि॒। अ॒ग्निम्।
शम्। योः। च॒। दात॑वे। विश्वा॑सु। वि॒क्षु। अ॒वि॒ताऽइ॑व।
हव्यः॑। भुव॑त्। वस्तुः॑। ऋ॒पूणा॑म् ॥ १५ ॥ १३ ॥

अग्निं नः अस्माकं द्वेषः द्वेष्टॄन् योतवै पृथक्कर्तुं गृणीमसि गृणीमः स्तुमः। तथाग्निं शं सुखं योश्च भयानाममिश्रणं च दातवे दातुं अथवा शं सुखस्य योर्मिश्रणायच। गृणीमसि। अस्मिन्पक्षे द्वेषो योतवा इत्यनेन सह समुच्चयार्थश्चशब्दः। सोऽग्निर्विश्वासु सर्वासु विक्षु प्रजासु अवितेव रक्षिता राजेव ऋपूणामृषीणामस्माकं वस्तुः वासको देवो हव्यो भुवद

भवतु । अथवा सर्वासु विशु यजमानरूपासु प्रजासु मध्ये ऋषूणामृषीणां सूक्तद्रष्टॄणामस्माकमेव हव्यो भवतु वस्तुः सर्वस्य वासकोदेवः ॥ १५ ॥

॥ इति षष्ठस्य पञ्चमे त्रयोदशोवर्गः ॥ १३ ॥

हविष्कृणुध्वमित्यष्टादशर्चं तृतीयंसूक्तं अत्रानुक्रमणिका—हविष्कृना हर्यतः प्रागाथो हविर्धानस्तुतिर्वैति । प्रगाथपुत्रोहर्यतऋषिः परंगायत्रं प्राग्वत्समेरिति परिभाषया गायत्रीछन्दः आग्नेयंत्वित्युक्तत्वादग्निर्देवता । यद्वा हविर्धानस्तूयमानत्वात्तद्देवताकं वा । सूक्तविनियोगोलैङ्गिकः ।

तत्र प्रथमा—

हविष्कृणुध्वमागमदध्वर्युर्वनतेपुनः ।
विद्वाँअस्यप्रशासनम् ॥ १ ॥

हविः । कृणुध्वम् । आ । गमत् । अध्वर्युः । वनते ।
पुनरिति । विद्वान् । अस्य । प्रऽशासनम् ॥ १ ॥

हे अध्वर्युसंबन्धिनो हविष्कर्तारोयूयं हविः कृणुध्वं कुरुध्वं शीघ्रं यत आगमदाजगाम्यमग्निः अतः कृणुध्वं अध्वर्युः पुनर्वनते संभजते किं सामर्थ्यादध्वरमितिगम्यते । कीदृशोध्वर्युः अस्य हविषः प्रशासनं प्रदानं विद्वान् ॥ १ ॥

अथ द्वितीया—

नितिग्ममभ्यंऽशुंसीदद्धोतामनावधि ।
जुषाणोअस्यसख्यम् ॥ २ ॥

नि । तिग्मम् । अभि । अंशुम् । सीदत् । होता । मनौ ।
अधि । जुषाणः । अस्य । सख्यम् ॥ २ ॥

होता ऋत्विक् तिग्मं तीक्ष्णमंशुं तमग्निं निषीदत् निषीदति । कीदृशोहोता अस्याग्नेः सख्यं मनौअधि यजमाने जुषाणः । अधीति सप्तम्यर्थानुवादी ॥ २ ॥

अथ तृतीया—

अन्तरिच्छन्तितंजनेरुद्रंपरोमनीषयां।
गृभ्णन्तिजिह्वयाससम् ॥ ३ ॥

अन्तः। इच्छन्ति। तम्। जने। रुद्रम्। परः। मनीषया।
गृभ्णन्ति। जिह्वया। ससम् ॥ ३ ॥

तं रुद्रं रुद्दुःखं तस्यद्रावयितारं अथवा रुत् स्तुतिः तया गन्तव्यं स्तुत्यमित्यर्थः तादृशमग्निं जने यजमानार्थं मनीषया स्वप्रज्ञानेन परः परस्तात्पुरोदेशे इच्छन्ति स्थापयितुं तएव पश्चात् अन्तः ससं स्वपन्तमग्निं जिह्वया जन्ये जनकशब्दः जिह्वा प्रभवया स्तुत्या गृभ्णन्ति गृह्णन्ति अंगुलीभिः। अत्रयास्कः—स्वपन्तमेतन्मध्यमं ज्योतिरनित्यदर्शनमिति[1] ॥ ३ ॥

अथ चतुर्थी—

जाम्यंतीतपेधनुर्वयोधाअरुहद्वनम्।
दृपदंजिह्वयावधीत् ॥ ४ ॥

जामि। अतीतपे। धनुः। वयःऽधाः। अरुहत्। वनम्।
दृषदम्। जिह्वया। आ। अवधीत् ॥ ४ ॥

वयोधा अन्नस्यदाताग्निः मध्यमस्थानो जामि प्रवृद्धं सर्वमतिरिच्य वर्तमानं। जाम्यतिरेकनामेतियास्कः[2]। धनुर्धन्वान्तरिक्षं अतीतपे अतितपति। अथवा अग्नेर्जामि गमनशीलं धनुरतीतपेत् स्वविरोधिनं। सच वयोधा अन्नस्यदाताग्निः वनमुदकंअरुहत् आरोहति विमोकाय। तदर्थं जिह्वया ज्वालया दृषदं मेघमवधीत् हन्ति। दावाग्निपक्षे वनं तरुसमूहं हन्ति जिह्वया दृषदं कठिनमपि पाषाणं भिनत्तीति ॥ ४ ॥

अथ पञ्चमी—

चरन्वत्सोरुशन्निहनिदातारंनविन्दते।
वेतिस्तोतवअम्ब्यम् ॥ ५ ॥ १४ ॥

---

1 नि० ५. ३.। 2 नि० ४. २०.।

चर॑न् । व॒त्सः । रुश॑न् । इ॒ह । नि॒ऽदा॒तार॑म् । न । वि॒न्दते॒ ।
वेति॑ । स्तोत॑वे । अ॒म्व्य॑म् ॥ ५ ॥ १४ ॥

वत्सो वत्सवच्चापल्येन धावनाद्वत्स इत्युपचर्यते । अथवा वत्सइव सञ्चरन् इवशब्दो लुप्यते रुशन् श्वेतोभवन् इह अस्मिन् लोके निदातारं निरोधकं नविन्दते नलभते किन्तु स्तोतवेस्तोतुमंव्यं अन्यं स्तोतारं स्वयं वेति कामयते । अथवात्र वैद्युतोग्निरुच्यते वैद्युतोयं रुशन् चरंश्चेहान्तरिक्षे वत्सः सर्वदा वसन् वत्सस्थानीयोवा सन् निदातारं निरोधकं नविन्दते । किन्तु स्तोतुं अंव्यं माध्यमिकां वाचं वेति ॥ ५ ॥

॥ इति षष्ठस्य पञ्चमे चतुर्दशोवर्गः ॥ १४ ॥

अथ षष्ठी–

उ॒तोन्व॑स्य॒यन्म॒हद॑श्वाव॒द्योज॑नंबृ॒हत् ।
दा॒मारथ॑स्य॒दद॑शे ॥ ६ ॥

उ॒तो इति॑ । नु । अ॒स्य॒ । यत् । म॒हत् । अश्व॑ऽवत् । योज॑नम् ।
बृ॒हत् । दा॒मा । रथ॑स्य । दद॑शे ॥ ६ ॥

उतो अपिच नु क्षिप्रं अद्य अस्यादित्यस्य यन्महत् माहात्म्ययुक्तं अश्वावत् संवृद्धाश्ववत् बृहत् महत् स्थूलं योजनं दृश्यते । तदेवाह–रथस्य दामा ददृशे दृश्यते अन्तरिक्षे रथेश्वान्नियोजयतीत्यर्थः । तदा दुहन्तीत्युत्तरत्रसंबन्धः ॥ ६ ॥

अग्निष्टवे घर्मदोहे दुहन्तिसप्तेत्येषा । सूत्रितञ्च–दुहन्तिसप्तैकां समिद्धोअग्निरश्विनेति । ग्रावस्तोत्रेप्येषा । सूत्रितञ्च–दुहन्तिसप्तैकामधुक्षत्पिप्युषीमिषमिति ।

सैषा सप्तमी–

दु॒हन्ति॑स॒प्तैका॒मुप॒द्वाप॑ञ्च॒सृज॑तः ।
ती॒र्थेसिन्धो॒रधि॑स्व॒रे ॥ ७ ॥

दु॒हन्ति॑ । स॒प्त । एका॑म् । उप॑ । द्वा । पञ्च॑ । सृ॒ज॒तः ।
ती॒र्थे । सिन्धोः॑ । अधि॑ । स्व॒रे ॥ ७ ॥

सप्तर्त्विज एकां घर्मं दुहन्ति तेषां मध्ये द्वौ द्वौ प्रतिप्रस्थातारौ अध्वर्यू पश्चान्यानुपसृजतः। प्रयोजयतः। केते पञ्च तदुच्यन्ते—यजमानं ब्रह्माणं होतारमाग्नीध्रं प्रस्तोतारमिति। कुत्रेति उच्यते—सिन्धोः कस्याश्चित्सरस्वत्यादि प्रख्याताया नद्यास्तीर्थे यत्रायमृत्विजे-यति तत्र स्वरे अधि। स्वरतिः शब्दकर्मा। अधीति सप्तम्यर्थानुवादी स्वरोपेतेशब्दवति। यत्तीर्थमृत्विजां ओश्रावयेत्यादिशब्दैः शब्दवद्भवति तस्मिन्नित्यर्थः॥ ७॥

प्रवर्ग्येभिष्टवे ग्राव्णोभिष्टवे वा आदशभिरित्येषा। सूत्रितश्च—आदशभिर्विवस्वतो दुहन्तिसप्तैकामिति।

सैषाष्टमी—

आदशभिर्विवस्वतइन्द्रःकोशमचुच्यवीत्।
खेदयात्रिवृतादिवः॥ ८॥

आ। दशऽभिः। विवस्वतः। इन्द्रः। कोशम्। अचुच्यवीत्।
खेदया। त्रिऽवृता। दिवः॥ ८॥

विवस्वतः परिचरतो यजमानस्य दशभिरंगुलीभिर्याचितः सन्निन्द्रः कोशं मेघनामैतत् उदकसेचकं मेघं दिवोन्तरिक्षसम्बन्धिनं तत्सकाशाद्वा अचुच्यवीच्च्यावयदित्यर्थः। केनसाधनेनेति तदुच्यते त्रिवृता त्रिप्रकारवर्तनवता खेदया रश्मिना यद्वा अत्रेन्द्रशब्देनाग्निरादित्योवा गृह्यते खेदया त्रिवृतेति लिंगात्॥ ८॥

अथ नवमी—

परित्रिधातुरध्वरंजूर्णिरेतिनवीयसी।
मध्वाहोतारोअञ्जते॥ ९॥

परि। त्रिऽधातुः। अध्वरम्। जूर्णिः। एति। नवीयसी।
मध्वा। होतारः। अञ्जते॥ ९॥

अयमग्निः त्रिधातुः लोहितशुक्लकृष्णभेदेन त्रिवर्णः जूर्णिर्जवो वेगवान् नवीयसी नवीयस्या ज्वालया अध्वरं यज्ञं परि एति गच्छति होतारो होमनिष्पादका अध्वर्य्वादयो मध्वा आ-

ज्यादिना पर्यञ्जते । अथवा अग्नेः विमकारा क्षिप्रा नवतरा ज्वालापर्येति महावीरं तं मध्वांज-वइति ॥ ९ ॥

अथ दशमी–

सि॒ञ्चन्ति॒नम॑सावृ॒तमु॒च्चाच॑क्रं॒परि॑ज्मानम् ।
नी॒चीन॑बार॒मक्षि॑तम् ॥ १० ॥ १५ ॥

सि॒ञ्चन्ति॑ । नम॑सा । अ॒वृतम् । उ॒च्चाऽच॑क्रम् । परि॑ऽज्मानम् ।
नी॒चीन॑ऽबारम् । अक्षि॑तम् ॥ १० ॥ १५ ॥

नमसा नमनेन अवतं महावीरं उच्चाचक्रं उपरिस्थितचक्रं परिज्मानं परिणत्यार्भ नीचीनबारं नीचीनद्वारं अक्षितमक्षीणं ईदृशं क्षीराद्यवशेषयुक्तं आहवनीयस्योपरि नमनेन सिञ्चन्ति जुह्वति महावीरेणत्याहवनीये हूयते ॥ १० ॥

॥ इति षष्ठस्य पञ्चमे पञ्चदशोवर्गः ॥ १५ ॥

अथैकादशी–

अ॒भ्यार॒मिदद्र॑योनिषि॑क्तं॒पुष्क॑रे॒मधु॑ ।
अ॒वृतस्य॑वि॒सर्ज॑ने ॥ ११ ॥

अ॒भि॒ऽआर॑म् । इत् । अद्र॑यः । निऽसि॑क्तम् । पुष्क॑रे ।
मधु॑ । अ॒वृतस्य॑ । वि॒ऽसर्ज॑ने ॥ ११ ॥

अद्रयः आद्रियमाणा अध्वर्य्वादयः अभ्यारमित् अभिगम्यैव निषिक्तम् अतिरिक्तं मधु पुष्करेव पुष्करे पवृद्धउपयमनीपात्रे सिञ्चन्ति अग्निहोमार्थमवतस्य महावीरस्य विसर्जने विसर्जनसमये होमानन्तरं खलु महावीरमासन्ध्यमासादयन्ति ॥ ११ ॥

अथ द्वादशी–

गाव॒उपा॑वतावृ॒तंम॒ही य॒ज्ञस्य॑र॒प्सुदा॑ ।
उ॒भाकर्णा॑हि॒रण्यया॑ ॥ १२ ॥

गावः । उप । अवत । अवतम् । मही इति । यज्ञस्य । रप्सुदा ।
उभा । कर्णा । हिरण्यया ॥ १२ ॥

हे गावो घर्मदुघा यूयमवतं महावीरं प्रत्युपावत्तोपागच्छत । यस्माद्यज्ञस्य घर्मयागस्य साधनभूते रप्सुदा रप्सुदे आरिप्सोः फलप्रदे लिप्स्वोरश्विनोर्दातव्येवा । यद्वा रपणं शब्दनं रप मंत्रः तेन सुष्ठु दातव्ये । अथवा पूदक्षरणे रपा मन्त्रेण क्षारणीये दोहनीये ईदृशे गवाजयोः पयसी मही महती बहुले अपेक्षिते अतउपावतं । गौरजाया अप्युपलक्षकः अजापयसोपि महावीरे सेचनीयत्वात् अपिचास्य महावीरस्य उभा उभौ कर्णाकर्णस्थानीयौ द्वौ रुक्मौ हिरण्यया हिरण्मयौ सुवर्णरजतमयावित्यर्थः ॥ १२ ॥

प्रवर्ग्ये अजापयसि महावीरे आनीयमाने आसुतइत्येषा सूत्रितश्च—आसुतेसिञ्चतश्रियमित्याजइति ।

सैषा त्रयोदशी—

आसुतेसिञ्चतश्रियंरोदस्योरभिश्रियम् ।
रसादधीतवृषभम् ॥ १३ ॥

आ । सुते । सिञ्चत । श्रियम् । रोदस्योः । अभिऽश्रियम् ।
रसा । दधीत । वृषभम् ॥ १३ ॥

सुते दुग्धे गोपयसि श्रियं श्रयणं आजं पयआसिञ्चत । सिञ्चतवा । हे अध्वर्यवः । कीदृशमाजं रोदस्योः कर्मणिषष्ठ्येषा द्यावापृथिव्यावभिश्रियं अभिश्रयन्तं अग्निसंयोगात्तावत्पर्यन्तं प्रवृद्धमित्यर्थः । अथवा तत्कावश्विनौ द्यावापृथिव्यावित्येकइतिनिरुक्तत्वादश्विनोरभिश्रियमित्यर्थः । सेचनानन्तरं रसा रसे आजे पयसि वृषभं वर्षकमग्निं दधीत स्थापयत अजायाआग्नेयीत्वात् क्षीरस्याप्यग्निसंयोजनमुचितं । आग्नेयीवाएषायदजेतिब्राह्मणम् ॥ १३ ॥

अथ चतुर्दशी—

तेजानतस्मोक्यं[१]संवत्सासोनमातृभिः ।
मिथोनसन्तजामिभिः ॥ १४ ॥

---

१ नि० १२. १ ।

ते । जा॒न॒त॒ । स्वम् । ओ॒क्य॑म् । सम् । व॒त्सासः॑ । न । मा॒तृऽभिः॑ ।
मि॒थः । न॒स॒न्त॒ । जा॒मिऽभिः॑ ॥ १४ ॥

ते ता गावो जानत ज्ञातवत्यः । अथवा सामान्याकारेण तद्वति पुंनिर्देशः । किं स्वं स्वकीयमोक्यं निवासं महावीरं तत्रदोग्धुमगमन्नित्यर्थः । तदेवाह—वत्सासो वत्सामातृभिर्जननीभिः सह यथा संगच्छन्ति तद्वज्जामिभिर्बन्धुभिः सहितागावोमिथः प्रत्येकं संनसन्त संगच्छन्ते महावीरम् ॥ १४ ॥

अथ पञ्चदशी—

उप॒स्रक्वे॑षु॒ बप्स॑तः कृण्व॒ते ध॒रुणं॑ दि॒वि ।
इन्द्रे॑ अ॒ग्ना नमः॒ स्वः॑ ॥ १५ ॥ १६ ॥

उप॑ । स्रक्वे॑षु । बप्स॑तः । कृ॒ण्व॒ते । ध॒रुण॑म् । दि॒वि । इन्द्रे॑ ।
अ॒ग्ना । नमः॑ । स्व१रिति॒ स्वः॑ ॥ १५ ॥ १६ ॥

महावीरस्य स्रक्वेषु बप्सतो ज्वालया भक्षयतोग्नेरन्नं धरुणं इन्द्रेअग्नेति वक्ष्यमाणत्वादिन्द्राग्न्योर्धारकमाज्यं दिवि अन्तरिक्षे उपकृण्वते उपकुर्वते । यदाग्निर्महावीरं दहति तदा तस्योपर्युपप्रविर्धं क्षीरमासेचयन्तीत्यर्थः । एवं महावीरं आसिच्य इन्द्रे अग्ना अग्नौ च स्वः सर्वं गव्यमाज्यंच नमोन्नं । अथवा स्वः अन्तरिक्षे योजयन्तीति शेषः ॥ १५ ॥

॥ इति षष्ठस्य पञ्चमे षोडशोवर्गः ॥ १६ ॥

प्रवर्ग्ये घर्मदुहि दुग्धायामधुक्षदित्येषा । सूत्रितञ्च—दुग्धायामधुक्षत्पिप्युषीमिति । ग्रावस्तोत्रेप्येषा अधुक्षत्पिप्युषीमिषमाकलशेषुधावतीतिसूत्रितत्वात् ।

सैषा षोडशी—

अधु॑क्षत्पि॒प्युषी॒मिष॒मूर्जं॑ स॒प्तप॑दीम॒रिः ।
सूर्य॑स्य स॒प्त र॒श्मिभिः॑ ॥ १६ ॥

अधु॑क्षत् । पि॒प्यु॒षीम् । इष॑म् । ऊर्ज॑म् । स॒प्तऽप॑दीम् ।
अ॒रिः । सूर्य॑स्य । स॒प्त । र॒श्मिऽभिः॑ ॥ १६ ॥

अरिररणशीलोवायुः सूर्यस्य सप्तरश्मिभिः साधनैः पिप्युषीं आप्याययदिपमन्नं ऊर्जं रसं च। सप्तपदीं सर्पणस्वभावपादां माध्यमिकां वाचं धर्मधुग्रूपेणावस्थितां अधुक्षत् दुग्धवान्। यद्यप्यध्वर्युः पात्रेण गां दुग्धे तथाप्येवं भावनया सांगं भवति। माध्यमिकायावाचो मधुधुक्त्वं। हिंकृण्वती गौरमिमेत्यादिषु प्रसिद्धम्॥ १६॥

अथ सप्तदशी—

सोम॑स्यमि॒त्राव॑रु॒णोदि॑ता॒सूर॒आद॑दे।
तदातु॑रस्यभे॒ष॒जम्॥ १७॥

सोम॑स्य। मि॒त्रा॒व॒रु॒णा॒। उत्ऽइ॑ता। सूरे॑। आ। द॒दे॒।
तत्। आतु॑रस्य। भे॒ष॒जम्॥ १७॥

हे मित्रावरुणा मित्रावरुणौ सूर्ये उदिता उदिते सोमस्य सोममाददे स्वीकरोति। तत्र हेतुं आह—तत्स्वीकाररूपं कर्म आतुरस्यास्मदादेर्भेषजं औषधं हितकरमित्यर्थः॥ १७॥

अथाष्टादशी—

उ॒तोन्व॑स्य॒यत्प॒दंह॑र्य॒तस्य॑नि॒धान्य॑म्।
परि॒द्यांजि॒ह्वया॑तनत्॥ १८॥ १७॥

उ॒तो इति॑। नु। अ॒स्य॒। यत्। प॒दम्। ह॒र्य॒तस्य॑। नि॒ऽधान्य॑म्।
परि॑। द्याम्। जि॒ह्वया॑। अ॒त॒न॒त्॥ १८॥ १७॥

पवमाने सोमे उतो अपिच अस्य सोमदातुर्हर्यतस्य मदार्नं कामयमानस्य मम यत्पदं निधान्यं हविषां निधानार्हं उत्तरवेदिलक्षणं तत्र स्थितवाग्निर्द्योपरि परितो जिह्वया ज्वालया अतनत् व्याप्नोत्॥ १८॥

॥ इति पञ्चमस्य पञ्चमे सप्तदशोवर्गः॥ १७॥

उदीराथामित्यष्टादशर्चं चतुर्थं सूक्तं आत्रेयस्य गोपवनस्य सप्तवध्रेर्वार्षं गायत्रमाश्विनं तथाचानुक्रमणिका—उदीराथांगोपवनआत्रेयः सप्तवध्रिर्वाश्विनमिति। प्रातरनुवाकेआश्विने क्रतौगायत्रेछन्दस्याश्विनशस्त्रे चेदंसूक्तम् उदीराथामात्रेवमितिगायत्रमितिसूत्रितत्वात्।

---

१ ऋ० सं० २. ६. १९.।

तत्र प्रथमा—

उदीराथामृतायतेयुञ्जाथामश्विनारथम् ।
अन्तिपद्भूतुवामवः ॥ १ ॥

उत् । ईराथाम् । ऋतऽयते । युञ्जाथाम् । अश्विना । रथम् ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ १ ॥

हे अश्विना अश्विनौ ऋतायते यज्ञमिच्छते मह्यं मदर्थं उदीराथां उद्गच्छतं तदर्थमाह्वा- [यतं]वा प्राप्तुं युंजाथां योजयतमश्वैः रथं । वां युवयोरवो रक्षणं अन्ति अस्मदन्तिके सद्वर्त- मानं भूतु भवतु ॥ १ ॥

अथ द्वितीया—

निमिषश्चिज्जवीयसारथेनायातमश्विना ।
अन्तिपद्भूतुवामवः ॥ २ ॥

निऽमिषः । चित् । जवीयसा । रथेन । आ । यातम् ।
अश्विना । अन्ति । सत् । भूतु । वाम् । अवः ॥ २ ॥

निमिषश्चिद् निमेषादपि जवीयसा अतिशयवेगेन रथेनायातमागच्छतम् अस्मद्यज्ञं हे- अश्विना । शिष्टमुक्तम् ॥ २ ॥

अथ तृतीया—

उपस्तृणीतमत्रयेहिमेनघर्ममश्विना ।
अन्तिपद्भूतुवामवः ॥ ३ ॥

उप । स्तृणीतम् । अत्रये । हिमेन । घर्मम् । अश्विना ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ ३॥

अत्रये महर्षये असुरैरग्नौ प्रक्षिप्ताय तस्य हितार्थं घर्ममग्निदाहकं हिमेनोदकेन उपस्तृ- णीतं उपस्तीर्णवन्तौ । हिमेनाग्निंघ्रंसमवारयेथामितिनिगमः ॥ ३ ॥

---

१ ऋ० सं० १.८.९.।

अथ चतुर्थी–

कुहंस्थःकुहंजग्मथुःकुहंश्येनेवपेतथुः ।
अन्तिषद्भूतुवामवंः ॥ ४ ॥

कुहं । स्थः । कुहं । जग्मथुः । कुहं । श्येनाऽइंव । पेतथुः ।
अन्तिं । सत् । भूतु । वाम् । अवंः ॥ ४ ॥

हे अश्विनौ युवां कुह कस्थः भवथः इदानीं कुह क कुत्र जग्मथुः गच्छथः स्वेच्छया कुह कवा श्येनेव श्येनाविव शीघ्रपतनौ सन्तौ पेतथुः पतथः । एवमचिन्त्यस्वभावौ कृपया-संनिहितौ भवतमितिशेषः । तादृशयोरवोन्तिके भवतु ॥ ४ ॥

अथ पञ्चमी–

यदद्यकर्हिकर्हिचिच्छुश्रूयातमिमंहवंम् ।
अन्तिषद्भूतुवामवंः ॥ ५ ॥ १८ ॥

यत् । अद्य । कर्हिं । कर्हिं । चित् । शुश्रूयातंम् । इमम् ।
हवंम् । अन्तिं । सत् । भूतु । वाम् । अवंः ॥ ५ ॥ १८ ॥

यद्यस्मान्निर्धार्यते अतोयास्मिन्काले कर्हि कस्मिन्नपि देशे कर्हि कस्मिन्नपि काले इमं हवं अस्मदीयमाह्वानं शुश्रूयातं शृणुयातम् ॥ ५ ॥

॥ इति पञ्चस्य पञ्चमे अष्टादशोवर्गः ॥ १८ ॥

अथ षष्ठी–

अश्विनायामहूतमानेदिष्ठंयाम्याप्यम् ।
अन्तिषद्भूतुवामवंः ॥ ६ ॥

अश्विनां । यामऽहूतमा । नेदिष्ठम् । यामि । आप्यम् ।
अन्तिं । सत् । भूतु । वाम् । अवंः ॥ ६ ॥

यामहूतमा अतिशयेन काले ह्वातव्यावश्विनाश्विनौ यामि नेदिष्ठमन्तिकतममाप्यं बांधवं च यामि तयोः ॥ ६ ॥

अथ सप्तमी–

अर्वन्तमत्रयेगृहंकृणुतंयुवमश्विना ।
अन्तिषद्भूतुवामवः ॥ ७ ॥

अर्वन्तम् । अत्रये । गृहम् । कृणुतम् । युवम् । अश्विना ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ ७ ॥

हे अश्विना युवं युवां अत्रये अभ्यागारे दह्यमानाय अवन्तं रक्षन्तं गृहं कृणुतं कृतव-न्तौ तादृशयोर्वामवोभवतु । अवन्तमिति व्यत्ययेन पुंलिंगता ॥ ७ ॥

अथाष्टमी–

वरेथेअग्निमातपोवदतेवल्ग्वत्रये ।
अन्तिषद्भूतुवामवः ॥ ८ ॥

वरेथे इति । अग्निम् । आऽतपः । वदते । वल्गु । अत्रये ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ ८ ॥

हे अश्विनौ वल्गु मनोहरं वदते स्तुवते अत्रये आतपः आतपादौष्ण्यादग्निं वरेथे आवा-रयतम् ॥ ८ ॥

अथ नवमी–

प्रसप्तवध्रिराशसाधारामग्नेरशायत ।
अन्तिषद्भूतुवामवः ॥ ९ ॥

प्र । सप्तऽवध्रिः । आऽशसा । धाराम् । अग्नेः । अशायत ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ ९ ॥

सप्तवध्रिर्महर्षिः हे अश्विनौ युवयोराशसा आशंसनेन स्तुत्या मंजूषाया निर्गत्य अग्नेर्धारां तस्यां मञ्जूषाया माशायत आशाययत् स्वस्वनिरोधिकां तां दग्धवानित्यर्थः । सप्तवध्रेः पेटिका-न्तः प्रवेशोऽश्विनोरनुग्रहान्निर्गमश्च विजिहीष्वयनस्पत इत्यत्र स्पष्टमुक्तः ॥ ९ ॥

---

१ ऋ० सं० ४. ४ २१. ।

अथ दशमी–

इहागतंवृषण्वसूशृणुतंमइमंहवम् ।
अन्तिषद्भूतुवामवः ॥ १० ॥ १९ ॥

इह । आ । गतम् । वृषण्वसू इति वृषण्ऽवसू । शृणुतम् ।
मे । इमम् । हवम् । अन्ति । सत् । भूतु । वाम् । अवः ॥ १०॥१९ ॥

हे वृषण्वसू वर्षणधनौ अश्विनाविहास्मिन्यज्ञमागतमागच्छतं तदर्थं म इमं हवं शृणुतम् ॥ १० ॥

॥ इति पञ्चस्य पंचमे एकोनविंशोवर्गः ॥ १९ ॥

अथैकादशी–

किमिदंवांपुराणवज्जरतोरिवशस्यते ।
अन्तिषद्भूतुवामवः ॥ ११ ॥

किम् । इदम् । वाम् । पुराणऽवत् । जरतोःऽइव । शस्यते ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ ११ ॥

हे अश्विनौ वां युवयोरर्थं गमनाय पुराणवत् पुराणयोरतिवृद्धयोरिव । तदेवाह जरतोरिव शस्यते पुनःपुनरागच्छतमिति शस्यते किमिदं यथा लोके वृद्धोजीर्णो बहुवारमाहूतोपि नागच्छति तद्वद्युवामपीत्यर्थः एवमनागमाद्ब्रवीति ॥ ११ ॥

अथ द्वादशी–

समानंवांसजात्यंसमानोबन्धुरश्विना ।
अन्तिषद्भूतुवामवः ॥ १२ ॥

समानम् । वाम् । सऽजात्यम् । समानः । बन्धुः ।
अश्विना । अन्ति । सत् । भूतु । वाम् । अवः ॥ १२ ॥

हे अश्विना अश्विनौ वां युवयोः परस्परं सजात्यं समानजातित्वं समानमेकमेव उभयोरपि अश्वरूपायासूर्यपत्न्याउत्पत्तेः सजात्यं तथा युवयोः बन्धुर्बन्धकः सुवः समानएकएव । अथर्वादिरहं समान एकएव बन्धुः ॥ १२ ॥

अथ त्रयोदशी–

योवांरजांस्यश्विनारथोवियातिरोदसी ।
अन्तिपद्भूतुवामवः ॥ १३ ॥

यः । वाम् । रजांसि । अश्विना । रथः । विऽयाति ।
रोदसी इति । अन्ति । सत् । भूतु । वाम् । अवः ॥ १३ ॥

हे अश्विना अश्विनौ वां युवयोर्योरथोस्ति सरथो रजांसि लोकान् रोदसी द्यावापृथिव्यौच वियाति विशेषेण गच्छति अतस्तेन रथेन शीघ्रमागच्छतमिति शेषः ॥ १३ ॥

अथ चतुर्दशी–

आनोगव्येभिरश्व्यैःसहस्रैरुपगच्छतम् ।
अन्तिपद्भूतुवामवः ॥ १४ ॥

आ । नः । गव्येभिः । अश्व्यैः । सहस्रैः । उप । गच्छतम् ।
अन्ति । सत् । भूतु । वाम् । अवः ॥ १४ ॥

हे अश्विनौ नोस्मान् सहस्रैरपरिमितैर्गव्येभिर्गोसमूहैः अश्व्यैरश्वसमूहैश्चोपागच्छतम् ॥ १४ ॥

अथ पञ्चदशी–

मानोगव्येभिरश्व्यैःसहस्रेभिरतिख्यतम् ।
अन्तिपद्भूतुवामवः ॥ १५ ॥

मा । नः । गव्येभिः । अश्व्यैः । सहस्रेभिः । अति ।
ख्यतम् । अन्ति । सत् । भूतु । वाम् । अवः ॥ १५ ॥

हे अश्विनौ नोऽस्मान् गव्येभिर्गोसमूहैरश्व्यैश्च सहस्रेभिः सहस्रसंख्याकैर्मास्मानतिरत्यतम् । अतीति प्रतीत्यस्मिन्नर्थे । मानिवारयतमित्यर्थः ॥ १५ ॥

अथ षोडशी—

अ॒रु॒णप्सु॑रु॒षा अ॑भू॒दक॒र्ज्योति॑र्ऋ॒ताव॑री ।
अन्ति॒ षद्भू॑तु वा॒मवः॑ ॥ १६ ॥

अ॒रु॒ण॒ऽप्सुः । उ॒षाः । अ॒भू॒त् । अकः॑ । ज्योतिः॑ । ऋ॒तऽव॑री ।
अन्ति॑ । सत् । भू॒तु॒ । वा॒म् । अवः॑ ॥ १६ ॥

हे अश्विनौ उषा अरुणप्सुः शुभ्रवर्णा भूद्भवति । न केवलं स्वयं ज्योतिस्तेजः अकः करोति सर्वत ऋतावरीकतवत्युषाः ॥ १६ ॥

अथ सप्तदशी—

अ॒श्विना॒ सु वि॒चाक॑शद्वृ॒क्षं प॑रशु॒माँ इ॑व ।
अन्ति॒ षद्भू॑तु वा॒मवः॑ ॥ १७ ॥

अ॒श्विना॑ । सु । वि॒ऽचाक॑शत् । वृ॒क्षम् । प॒र॒शु॒मान्ऽइ॑व ।
अन्ति॑ । सत् । भू॒तु॒ । वा॒म् । अवः॑ ॥ १७ ॥

सुविचाकशद् अत्यन्तं दीप्यमानः सूर्योग्निर्वा वृक्षं परशुमानिव सयथा शकलयति तद्वत्तमोनिशारयतीति शेषः । दृष्टान्तरासामर्थ्यादेवलभ्यते यस्मादेवं तस्मादश्विनौ आह्वयति शेषः ॥ १७ ॥

अथाष्टादशी—

पुरं॒ न धृ॑ष्ण॒वा रु॑ज कृ॒ष्णया॑ बाधि॒तो वि॒शा ।
अन्ति॒ षद्भू॑तु वा॒मवः॑ ॥ १८ ॥ २० ॥

पुर॑म् । न । धृ॒ष्णो॒ इति॑ । आ । रु॒ज॒ । कृ॒ष्णया॑ । बा॒धि॒तः ।
वि॒शा । अन्ति॑ । सत् । भू॒तु॒ । वा॒म् । अवः॑ ॥ १८ ॥ २० ॥

हे धृष्णो धर्षक सप्तवध्रे त्वं कृष्णया कर्षया विशा प्रवेशयन्त्या पेटिकया बाधितस्त्वं ततोनिर्गत्य तामेवारुज पीडय अश्विनोरनुग्रहात् । कमिव पुरं न यथा शत्रुः पुरं पीडयति एवं

स्वयं स्वात्मानं प्रेष्यति । अथवा गोपवनः सप्तवध्रिमेवं ब्रवीति वां युवयोरवोरक्षणं गमनंवा समीपे तत्र त्रिषु वर्गेषु अन्तिपदित्युत्तरोर्धर्चोन्वितपदाध्याहारेण योज्यः ॥ १८ ॥

॥ इति षष्ठस्य पञ्चमे विंशोवर्गः ॥ २० ॥

विशोविशोवइति पंचदशर्चं चतुर्थंसूक्तं । अत्रेयमनुक्रमणिका—विशोविशोवः पञ्चोनाग्नेयं त्वनुष्टुम्मुखास्तृचाश्चत्वारोन्त्यास्तिस्रोनुष्टुभ आर्क्षस्य श्रुतर्वणोदानस्तुतिरिति । अनुवृत्तेर्गोपवन-ऋषिः आदितस्त्रिषु तृचेषु सर्वाः प्रथमाअनुष्टुभः द्वितीयातृतीये प्राग्वत्सप्तपरिभाषया गायत्र्यौ त्रयोदश्याद्यास्तिस्रोनुष्टुभः अस्योत्तरस्य चाग्निर्देवता अन्त्यास्तिस्रः श्रुतर्वनाम्नोराज्ञोदानस्तुतिः व्योमविश्वदेवस्तुत्पञ्चशारदीयेष्विदंसूक्तमाज्यशस्त्रं । सूत्रितश्च—विशोविशोवोअतिथिमित्या-ज्यमिति ।

तत्र प्रथमा—

विशोविशोवोअतिथिंवाजयन्तःपुरुप्रियम् ।
अग्निंवोदुर्यंवचःस्तुषेशूषस्यमन्मभिः ॥ १ ॥

विशःऽविशः । वः । अतिथिम् । वाजऽयन्तः । पुरुऽप्रियम् ।
अग्निम् । वः । दुर्यम् । वचः । स्तुषे । शूषस्य । मन्मऽभिः ॥ १ ॥

हे अन्ये ऋत्विजो यजमानाश्च वो यूयं वाजयन्तोन्नमिच्छन्तो विशोविशः सर्वस्याः प्रजायाः अतिथिं पूज्यं पुरुप्रियं बहुप्रियमग्निं स्तुत्या परिचरतेतिशेषः । अहंच वोयुष्मदर्थं दुर्यं गुहाहितं वचः स्तुषे शूषस्य सुखस्य लाभाय । कैः साधनैः मन्मभिर्मननीयैः स्तोत्रैः ॥ १ ॥

अथ द्वितीया—

यंजनासोहविष्मन्तोमित्रंनसर्पिरासुतिम् ।
प्रशंसन्तिप्रशस्तिभिः ॥ २ ॥

यम् । जनासः । हविष्मन्तः । मित्रम् । न । सर्पिःऽआसुतिम् ।
प्रऽशंसन्ति । प्रशस्तिऽभिः ॥ २ ॥

यमग्निं जनासो जनाययजमाना हविष्मन्तः सन्तो मित्रंन मित्रमिव आदित्यमिव सखायमिव वा सर्पिरासुतिं सर्पिरासूयते हूयते यस्मिन् तादृशं प्रशंसन्ति स्तुवन्ति । प्रशस्तिभिः स्तुतिभिः स्तुवइतिशेषः ॥ २ ॥

अथ तृतीया–

पन्यांसंजातवेदसंयोदेवतात्युद्यता ।
हव्यान्यैरयद्दिवि ॥ ३ ॥

पन्यांसम् । जातऽवेदसम् । यः । देवऽतांति । उत्ऽयंता ।
हव्यानि । ऐरयत् । दिवि ॥ ३ ॥

पन्यांसं अतिशयेनस्तोतारं साधुकर्त्तमिति यजमानं स्तुवन्तं जातवेदसं जातधनं जातविद्यं वा स्तुवइतिशेषः । योग्निर्देवतातिं देवतातौ यज्ञे उद्यता उद्यतानि हव्यानि हवींषि दिव्यैरयत् प्रेरयति दिवि देवेभ्यः ॥ ३ ॥

अथ चतुर्थी–

आगन्मवृत्रहन्तमंज्येष्ठमग्निमानवम् ।
यस्यश्रुतर्वाबृहन्नार्क्षोअनीकएधते ॥ ४ ॥

आ । अगन्म । वृत्रहन्ऽतमम् । ज्येष्ठम् । अग्निम् । आनवम् ।
यस्य । श्रुतर्वा । बृहन् । आर्क्षः । अनीके । एधते ॥ ४ ॥

वृत्रहन्तमं पापानामतिशयेन हन्तारं ज्येष्ठं प्रशस्यं मानवं मनुष्यसंबन्धिनं तेषां हितकारिणमग्निमागन्म आगतावयं । पूजार्थं बहुवचनं । यस्याग्नेरनीके ज्वालासंघे बृहन्महान् आर्क्षः ऋक्षपुत्रः श्रुतर्वानामराजा एधते वर्धते कर्मकरोतीत्यर्थः । तमग्निमागन्म इतिसमन्वयः । एवं श्रुतर्वाणं भिक्षयागतो गोपवनोग्निं स्तौति ॥ ४॥

अथ पञ्चमी–

अमृतंजातवेदसंतिरस्तमांसिदर्शतम् ।
घृताहवनमीड्यम् ॥ ५ ॥ २१ ॥

अ॒मृतं॑म् । जा॒तऽवे॑दसम् । ति॒रः । तमां॑सि । द॒र्श॒तम् ।
घृ॒तऽआ॑हवनम् । ईड्य॑म् ॥ ५ ॥ २१ ॥

सएवागत्य स्तौति—अमृतं अमरणं जातवेदसं जाततेजआयुपलक्षणंधनं तमांसि ति-रोदर्शतं दर्शयन्तमित्यर्थः घृताहवनं घृतमाहूयते यत्र तं ईड्यं स्तुत्यं ईदृशमागन्मेतिसंबन्धः ॥ ५ ॥

॥ इति षष्ठस्य पञ्चमे एकविंशोवर्गः ॥ २१ ॥

अथ षष्ठी—

स॒बाधो॒यंजना॑इ॒मे॒३ग्निंह॒व्येभि॒रीळ॑ते ।
जु॒ह्वा॒नासो॒य॒तस्रु॑चः ॥ ६ ॥

स॒ऽबाधः॑ । यम् । जना॑ः । इ॒मे । अ॒ग्निम् । ह॒व्येभि॑ः । ईळ॑ते ।
जु॒ह्वा॒नासः॑ । य॒तऽस्रु॑चः ॥ ६ ॥

इमे जनाः सबाधो बाधसहिता अध्वर्य्वादयो यमग्निं हव्येभिर्हविर्भिरीळते स्तुवन्ति । कीदृशाजना जुह्वानासो यागं कुर्वाणाः यतस्रुचः तदर्थं घृतस्रुग्दंडाः तमागन्मेति समन्वयः ॥ ६ ॥

अथ सप्तमी—

इ॒यंते॒नव्य॑सीम॒तिरग्ने॒अधा॒य्य॒स्मदा ।
मन्द्र॒सुजा॑त॒सुक्र॒तोमू॑र॒दस्मा॒ति॑थे ॥ ७ ॥

इ॒यम् । ते॒ । नव्य॑सी । म॒तिः । अग्ने॑ । अधा॑यि । अ॒स्मत् । आ ।
मन्द्र॑ । सुऽजा॑त । सुक्र॑तो॒ इति॑ सुऽक्र॑तो । अमू॑र । दस्म॑ । अति॑थे ॥ ७ ॥

हे अग्ने इयं इदानीं क्रियमाणा नव्यसी नवतरा मतिः स्तुतिस्ते तव स्वभूताअस्मदस्मासु अधायि धृताभूत् वयं तव स्तुतिं कुर्मइत्यर्थः । हे मन्द्र मोदमान सुजात शोभनजनन सुक्रतो शोभनकर्मन् अमूरामूढ दस्म दर्शनीयातिथे अतिथिवत्पूज्येत्यग्नेर्विशेषणानि ॥ ७ ॥

अथाष्टमी–

सातेअग्नेशंतमाचनिष्ठाभवतुप्रिया । तयावर्धस्वसुष्टुतः ॥ ८॥

सा । ते । अग्ने । शम्ऽतमा । चनिष्ठा । भवतु । प्रिया ।
तया । वर्धस्व । सुऽस्तुतः ॥ ८ ॥

हे अग्ने सास्माभिः क्रियमाणास्तुतिः शन्तमा अत्यन्तं सुखकरा चनिष्ठा अतिशयेनान्नवती ते तव प्रिया भवतु । तया स्तुत्या सुष्टुतः सुष्टु स्तुतः सन्वर्धस्व प्रवृद्धोभव ॥ ८ ॥

अथ नवमी–

साद्युम्नैर्द्युम्निनीबृहदुपोपश्रवसिश्रवः । दधीतवृत्रतूर्ये ॥ ९ ॥

सा । द्युम्नैः । द्युम्निनी । बृहत् । उपऽउप । श्रवसि ।
श्रवः । दधीत । वृत्रऽतूर्ये ॥ ९ ॥

सास्माभिः क्रियमाणा स्तुतिः द्युम्नैः द्योतमानैरन्नैरस्मभ्यं प्रदेयैर्द्युम्निनी अन्नवती श्रवसि पूर्वस्मिन् विद्यमानेन्ने पुनरपिबृहन्महत् श्रवोन्नं उपोपदधीत पुनरुपरि धारयतु । कुत्रेति उच्यते–वृत्रतूर्ये संग्रामे शत्रोःसंबन्धिनमिति यावत् ॥ ९ ॥

अथ दशमी–

अश्वमिद्गांरथप्रांत्वेषमिन्द्रंनसत्पतिम् ।
यस्यश्रवांसितूर्वथपन्यंपन्यंचकृष्टयः ॥ १० ॥ २२ ॥

अश्वम् । इत् । गाम् । रथऽप्राम् । त्वेषम् । इन्द्रम् । न ।
सत्ऽपतिम् । यस्य । श्रवांसि । तूर्वथ । पन्यम्ऽपन्यम् ।
च । कृष्टयः ॥ १० ॥ २२ ॥

गां गन्तारमश्वमिव इच्छब्दइवार्थे अश्वमिव तं यथा स्तुवन्ते तथेत्यर्थः रथप्रां रथानामस्मदीयानां पूरयितारं धनैः तथा त्वेषं दीप्तं अग्निं सत्पतिं सतां पालकं इन्द्रं न इन्द्रमिव इमं कृष्टयो मनुष्याः परिचरन्तेतिशेषः । यस्माग्नेर्वशेन श्रवांसि अन्नानि शत्रुसंबन्धीनि तूर्वथ । तथा पन्यंपन्यंच यद्यत्स्तुत्यं धनमस्ति तदपि तूर्वथ हिंस्थ ॥ १० ॥

॥ इति पञ्चमस्य पञ्चमे द्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी–

यंत्वांगोपवनोगिराचनिष्ठदग्नेअङ्गिरः । सपावकश्रुधीहवम् ॥ ११॥

यम् । त्वा । गोपवनः । गिरा । चनिष्ठत् । अग्ने । अङ्गिरः ।
सः । पावक । श्रुधि । हवम् ॥ ११ ॥

हे अग्ने यं त्वा त्वां गोपवनऋषिर्गिरा स्तुत्या चनिष्ठदतिशयेनान्नप्रदातारमकरोत् सतादृशाग्ने अङ्गिरः सर्वत्रगन्तः अङ्गिरसांमध्ये एकवा पावक शोधक हवं गोपवनस्य श्रुधि शृणु॥ ११ ॥

अथ द्वादशी–

यंत्वाजनासईळतेसबाधोवाजसातये । सबोधिवृत्रतूर्ये ॥ १२ ॥

यम् । त्वा । जनासः । ईळते । सऽबाधः । वाजऽसातये ।
सः । बोधि । वृत्रऽतूर्ये ॥ १२ ॥

हे अग्ने यं त्वा त्वां जनासो जनाः स्तोतारो वः वाजसातये अन्नस्यलाभाय सबाधः निर्बन्धरूपबाधोपेताः सन्त ईळते स्तुवन्ति सत्वं वृत्रतूर्ये वैरिनाशनाय पापक्षयायवा बोधि बुध्यस्व । अथवा वृत्रस्य तूर्ये संग्रामे बोधि ॥ १२ ॥

अथ त्रयोदशी–

अहंहुवानआर्क्षेश्रुतर्वणिमदच्युति ।
शर्धांसीवस्तुकाविनांमृक्षाशीर्षाचतुर्णाम् ॥ १३ ॥

अहम् । हुवानः । आर्क्षे । श्रुतर्वणि । मदऽच्युति ।
शर्धांसिऽइव । स्तुकाऽविनाम् । मृक्षा । शीर्षा । चतुर्णाम् ॥ १३ ॥

अहमृषिर्हुवानो हूयमानो यज्ञादिदक्षार्थं श्रुतर्वणि एतन्नाम्नि राजनि मदच्युति शत्रूणां मदस्यच्यावयितरि स्तुकाविनां स्तुकायिनऊर्णायवः स्तुकः केशसंघातः तद्वतां शर्धांसीव उच्छ्रितानि लोमानीव तानि यथा स्पृशन्ति तद्वत् मृक्षा मृक्षाणि मृश्यन्त्वइति मृक्षाः केशाः तद्वन्ति मृक्षाणि शीर्षाणि शिरांसि । केषां चतुर्णां श्रुतर्वणा भदत्तानामश्वानां शिरांसि उन्मृजामीति शेषः । अथवा मृक्षा मृक्षेण म्रक्षनसाधनत्वाद्धस्तोहस्तस्तेनोन्मृजामि ॥ १३ ॥

अथ चतुर्दशी–

मां॑च॒त्वार॑आ॒शवः॒शवि॑ष्ठस्यद्रवि॒त्नवः॑ ।
सु॒रथा॑सोअ॒भिप्रयो॒वक्ष॒न्वयो॒नतुग्र्य॑म् ॥ १४ ॥

माम् । च॒त्वारः॑ । आ॒शवः॑ । शवि॑ष्ठस्य । द्र॒वि॒त्नवः॑ । सु॒ऽरथा॑सः ।
अ॒भि । प्रयः॑ । वक्ष॑न् । वयः॑ । न । तु॒ग्र्य॑म् ॥ १४ ॥

मां शविष्ठस्यातिशयेनान्नवतः श्रुतर्वणोराज्ञः संबन्धिनश्चत्वार आशवोश्वा द्रवित्नवो गमनशीलाः सुरथासः शोभनरथा अश्वाः प्रयोन्नं शत्रूणां संबन्धिनं प्रति अभिवक्षन् अभि-वहन्ति वयोन तुग्र्यं भुज्युं यथाश्विभ्यां प्रेरिताश्वस्तो नावः स्वगृहं प्रापयन् तद्वदिति ॥ १४ ॥

अथ पंचदशी–

स॒त्यमित्त्वा॑महे॑नदि॒परु॑ष्ण्यव॑दे॑दिशम् ।
नेमा॑पोअश्व॒दात॑रः॒शवि॑ष्ठादस्ति॒मर्त्यः॑ ॥ १५ ॥ ॥ २३ ॥

स॒त्यम् । इत् । त्वा॒ । म॒हे॒ऽन॒दि॒ । परु॑ष्णि । अव॑ । दे॒दि॒शम् । न ।
ई॒म् । आ॒पः॒ । अ॒श्व॒ऽदात॑रः । शवि॑ष्ठात् । अ॒स्ति॒ । मर्त्यः॑ ॥ १५ ॥ २३ ॥

हे महेनदि परुष्णि एतन्नामिके त्वा त्वां सत्यमित् सत्यमेव अवदेदिशं आदिशामि वदामि । नद्याकारेण संबोध्यापः संबोधयति–हेआपः ईमस्माच्छविष्ठाद्बलवत्तमाच्छ्रुतर्वणोधिकः कश्चिदश्वदातरः अश्वानांदातृतमो मर्त्योनास्ति परुष्ण्यास्तीरे राज्ञोश्वमेधप्रविमहात्तां सं-बोध्य ब्रूते ॥ १५ ॥

॥ इति प्रथमस्य पञ्चमे त्रयोविंशोवर्गः ॥२३॥

युक्ष्वाहीति षोडशर्चं पंचमं सूक्तं आंगिरसस्य विरूपस्यार्षं गायत्रमाग्नेयं तथाचानुक्रमणिका–युक्ष्वाहि षोडश विरूपइति । दशरात्रे तृतीयेहनीदंसूक्तं आज्यशस्त्रं सूत्रितंच–तृतीये युक्ष्वाहीत्याज्यमिति । प्रातरनुवाकेप्याग्नेयेक्रतौ गायत्रेछन्दसि आश्विनशस्त्रेचेदंसूक्तम् । सूत्रितंच–युक्ष्वाहिमेदंवइति ।

तत्र प्रथमा—

युक्ष्वाहिदेवहूतमाँअश्वाँअग्नेरथीरिव ।
निहोतापूर्व्यःसदः ॥ १ ॥

युक्ष्व । हि । देवऽहूतमान् । अश्वान् । अग्ने । रथीःऽइव ।
नि । होता । पूर्व्यः । सदः ॥ १ ॥

हे अग्ने देवहूतमान् देवानामाह्वातृतमानश्वान् युक्ष्व योजय । रथे रथीरिव यथा रथी स्वाश्वानिष्टदेशगमनाय योजयति तद्वत् । तथा कृत्वा होता त्वं पूर्व्यो मुख्यः सन् निषदः उपविशच । हिपूरणः ॥ १ ॥

अथ द्वितीया—

उतनोदेवदेवाँअच्छावोचोविदुष्टरः ।
श्रद्विश्वावार्याकृधि ॥ २ ॥

उत । नः । देव । देवान् । अच्छ । वोचः । विदुःऽतरः ।
श्रत् । विश्वा । वार्या । कृधि ॥ २ ॥

हे देवाग्ने उतापिच नोस्मान् देवानच्छावोचोभिब्रूयाः सम्यगनुष्ठितयन्तइति । तथा विदुष्टरो विद्वत्तमान्वोचः । तथा कृत्वा विश्वा सर्वाणि वार्या वरणीयानि धनानि देवसम्बन्धीनि श्रत् सत्यानि कृधि कुरु अस्माकं। अथवास्मदीयानि सर्वाणि वरणीयानि हवींषि श्रत् सत्यानि कुरु देवान् प्रापयेत्यर्थः ॥ २ ॥

अथ तृतीया—

त्वंहयद्यविष्ठ्यसहसःसूनवाहुत । ऋतावायज्ञियोभुवः ॥ ३ ॥

त्वम् । ह । यत् । यविष्ठ्य । सहसः । सूनो इति । आऽहुत ।
ऋतऽवा । यज्ञियः । भुवः ॥ ३ ॥

हे अग्ने यविष्ठ्य युवतम सहसः सूनो बलस्यपुत्र आहुत सर्वतोहुत आहुतोवा त्वं यद्यदा ह खलु ऋतावा सत्यवान् यज्ञियो यज्ञार्हश्च भुवो भवसि तदा वार्याणि श्रत्कुर्विति संबंधः॥३॥

दर्शपूर्णमासयोराग्नेयस्यायमग्निरिति वैकल्पिकीयाज्या । सूत्रितंच—अयमग्निः सहस्रिणइति वेदंविष्णुर्विचक्रमइति ।

सैषा चतुर्थी—

अ॒यम॒ग्निः स॑ह॒स्रिणो॒ वाज॑स्य श॒तिन॒स्पतिः॑ । मू॒र्धा क॒वी र॑यी॒णाम् ॥ ४ ॥

अ॒यम् । अ॒ग्निः । स॒ह॒स्रिणः॑ । वाज॑स्य । श॒तिनः॑ । पतिः॑ ।
मू॒र्धा । क॒विः । र॒यी॒णाम् ॥ ४ ॥

अयमग्निः शतिनः सहस्रिणश्च उक्तसंख्योपेतस्य वाजस्यान्नस्य पतिः स्वामी मूर्धा शिरोवदुन्नतः श्रेष्ठः कविर्मेधावी रयीणां धनानामपि पतिरितिशेषः तदुभयंप्रयच्छत्वित्यर्थः ॥४॥

अथ पञ्चमी—

तं ने॒मिमृ॒भवो॑ य॒था न॑मस्व॒ सहू॑तिभिः । नेदी॑यो य॒ज्ञम॑ङ्गिरः ॥५॥२४॥

तम् । ने॒मिम् । ऋ॒भवः॑ । य॒था । आ । न॒म॒स्व॒ । सहू॑तिऽभिः ।
नेदी॑यः । य॒ज्ञम् । अ॒ङ्गि॒रः॒ ॥ ५ ॥ २४ ॥

हे अंगिरः त्वं सहूतिभिः समानाह्वानैरन्यैर्देवैः सह नेदीयोन्तिकतमं तं यज्ञं आनमस्व आनमय ऋभवोनेमिं रथमिव ॥ ५ ॥

॥ इति पञ्चमस्य पंचमे चतुर्विंशोवर्गः ॥ २४ ॥

अथ षष्ठी—

तस्मै॑ नू॒नम॒भिद्य॑वे वा॒चा वि॑रूप॒ नित्य॑या । वृष्णे॑ चोदस्व सुष्टु॒तिम् ॥ ६ ॥

तस्मै॑ । नू॒नम् । अ॒भिऽद्य॑वे । वा॒चा । वि॒ऽरू॒प॒ । नित्य॑या ।
वृष्णे॑ । चो॒द॒स्व॒ । सु॒ऽस्तु॒तिम् ॥ ६ ॥

हे विरूप नानारूपैतन्नामक महर्षे त्वं तस्मै परिचर्याभियवेभिगतदीप्तये वृष्णे वर्षकायाग्नये नित्यया उत्पत्तिरहितया वाचा मंत्ररूपया सुष्टुतिं नूनमिदानीं चोदस्व स्तुहि इत्येवमृषिः स्वात्मानं ब्रवीति । यजमानोवा होतारं विरूपं ॥ ६ ॥

अथ सप्तमी–

कर्मुष्विदस्यसेनयाग्नेरपाकचक्षसः । पणिंगोपुस्तरामहे ॥ ७ ॥

कम् । ऊँ इति । स्वित् । अस्य । सेनया । अग्नेः । अपाकऽचक्षसः ।
पणिम् । गोर्षु । स्तरामहे ॥ ७ ॥

अस्याग्नेरपाकचक्षसः अनल्पचक्षसोग्नेः सेनया ज्वालारूपया गोपु निमित्तेपु कमुष्वि-व् कंखलु पणिं स्तरामहे । स्तरणं हिंसनमिदानीं बलिनमभिभवामेत्यर्थः ॥ ७ ॥

अथाष्टमी–

मानोदेवानांविशःप्रस्नातीरिवोस्राः । कृशंनहासुरघ्न्याः ॥ ८ ॥

मा । नः । देवानाम् । विशः । प्रस्नातीःऽइव । उस्राः ।
कृशम् । न । हासुः । अघ्न्याः ॥ ८ ॥

देवानां सर्वेषां विशः प्रजाभूतान् परिचारकान् नोस्मान्माहासीदग्निः मापरित्यजतु । प्र-स्नातीरुस्राइव पयः क्षरन्तीर्गावइव ता यथा नमुंचंति उभयमपि नपरित्यजत्वित्यर्थः । किमि-व् कृशं अल्पं स्ववत्सं अघ्न्यागावो यथा नहासुर्नपरित्यजंति तद्वत् ॥ ८ ॥

अथ नवमी–

मानःसमस्यदूढ्य१ःपरिद्वेषसोअंहतिः । ऊर्मिर्ननावमावधीत् ॥ ९ ॥

मा । नः । समस्य । दुःऽध्यः । परिऽद्वेषसः । अंहतिः । ऊर्मिः ।
न । नावम् । आ । वधीत् ॥ ९ ॥

समस्य सर्वस्य परिद्वेषसः परितोद्विषतोदुर्ध्यः पापबुद्धेरंहतिर्हननं नः अस्मान्माआव-धीत माहिंस्यात् । नावमूर्मिर्न समुद्रतरंगइव स यथा तां पीडयति तद्वन्मावधीदित्यर्थः । अ-त्र मानः सर्वस्य दुर्धियः इत्यादिनिरुक्तं द्रष्टव्यं ॥ ९ ॥

१ नि० ५. २३. ।

अथ दशमी–

नमस्तेअग्नओजसेगृणन्तिदेवकृष्टयः । अमैरमित्रमर्दय ॥१०॥२५॥

नमः । ते । अग्ने । ओजसे । गृणन्ति । देव । कृष्टयः ।
अमैः । अमित्रम् । अर्दय ॥ १० ॥ २५ ॥

हे अग्ने देव ते तुभ्यं नमोगृणन्ति नमस्कारशब्दमुच्चारयन्ति । किमर्थमोजसे बलाय । के कृष्टयोमनुष्यायजमानाः अतोहमपि गृणामीत्यर्थः । तथा अमैर्बलैः अमित्रं शत्रुं अर्दय नाशय ॥१०॥

॥ इति षष्ठस्य पंचमे पंचविंशोवर्गः ॥ २५ ॥

ग्राम्येणाग्निना वैतानिकस्य संसर्गे अग्नये संवर्गायेष्टिः कार्या । तत्र कुवित्सुनइत्यनुवाक्या मानोअस्मिन्निति याज्या । सूत्रितं च–कुवित्सुनोगविष्टये मानोअस्मिन्महाधनइति ।

सैषैकादशी–

कुवित्सुनोगविष्टयेग्नेसंवेषिषोरयिम् । उरुकृदुरुणस्कृधि ॥ ११ ॥

कुवित् । सु । नः । गोऽइष्टये । अग्ने । सम्ऽवेषिषः ।
रयिम् । उरुऽकृत् । उरु । नः । कृधि ॥ ११ ॥

हे अग्ने त्वं नोस्माकं गविष्टये गवामेषणाय कुविद्बहु रयिं धनं संवेषिषः संप्रापय उरुकृत् त्वं नोस्मान् उरु कृधि कुरु ॥ ११ ॥

अथ द्वादशी–

मानोअस्मिन्महाधनेपरावर्ग्भारभृद्यथा । संवर्गंसंरयिंजय ॥ १२ ॥

मा । नः । अस्मिन् । महाऽधने । परा । वर्क् । भारऽभृत् ।
यथा । सम्ऽवर्गम् । सम् । रयिम् । जय ॥ १२ ॥

नोस्मानस्मिन्महाधने संग्रामे मापरावर्क् मापरित्याक्षीः भारभृद्यथा भारवाही यथा भारमन्ते परित्यजति तद्वत् संवर्गं शत्रुभ्यः सहाच्छिद्यमानं रयिं धनं संजयास्मदर्थम् ॥ १२ ॥

अथ त्रयोदशी–

अन्यमस्मद्भियाइयमग्नेसिषक्तुदुच्छुना । वर्धानोअमवच्छवः ॥१३॥

अन्यम् । अस्मत् । भिये । इयम् । अग्ने । सिसक्तु ।
दुच्छुना । वर्ध । नः । अमऽवत् । शवः ॥ १३ ॥

हे अग्ने त्वदीयेयं दुच्छुना बाधकसंहतिरस्मदन्यं अस्तोतारं भियै भयाय सिषक्तु सेवतां । त्वंच नोस्माकं अमवद्बलोपेतं शवोवेगं वर्ध वर्धय संग्रामे ॥ १३ ॥

अथ चतुर्दशी–

यस्याजुंषन्नमस्विनःशमीमदुर्मखस्यवा । तंघेदग्निर्वृधावति ॥१४॥

यस्य । अजुंषत् । नमस्विनः । शमीम् । अदुःऽमखस्य ।
वा । तम् । घ । इत् । अग्निः । वृधा । अवति ॥ १४ ॥

यस्य नमस्विनो नमस्कारवतो अदुर्मखस्य वा अदुष्टयागस्य वा शमीं कर्म अजुषदसेवत । तं घेद् तमेव यजमानं संग्रामे अग्निर्वृधावति विशेषेण गच्छति अतो नमोयुक्ता अदुर्मखाश्च भवामेति भावः ॥ १४ ॥

अथ पंचदशी–

परस्याअधिसंवतोवराँअभ्यातर । यत्राहमस्मितांअव ॥१५॥

परस्याः । अधि । सम्ऽवतः । अवरान् । अभि ।
आ । तर । यत्र । अहम् । अस्मि । तान् । अव ॥ १५ ॥

हे अग्ने परस्याअन्यायाः संवतः सेनायाः अवरानन्यानस्मदीयान् अभि अभिमुखं आसर्वेतस्तर तारय वैरिसेना अस्मद्भटैः पराभावमेत्यर्थः। यत्र येषु अस्मदीयपरिजनमध्ये अहमस्मि स्वामी तानव रक्ष ॥ १५ ॥

अथ षोडशी–

विद्माहितेपुरावयमग्नेपितुर्यथावसः । अधातेसुम्नमीमहे ॥१६॥२६॥

विद्म । हि । ते । पुरा । वयम् । अग्ने॑ । पितुः । यथा॑ ।
अव॑सः । अध॑ । ते । सुम्नम् । ईमहे ॥ १६ ॥ २६ ॥

हे अग्ने पितुः पालकस्य ते तवावसो वोरक्षणं पुरा यथा तथेदानीमपीति विद्म वयं जानीमः । अथाथ ते तव सुम्नं सुखमीमहे याचामहे । अथवा पितुर्यथेतिदृष्टान्तः—पितुः पालनं पुत्रो यथा वेत्ति तथेत्यर्थः ॥ १६ ॥

॥ इति प्रथमस्य पंचमे षड्विंशोवर्गः ॥ २६ ॥

इमंनुमायिनमिति द्वादशर्चं षष्ठं सूक्तं कुरुसुतिर्नाम काण्वऋषिः गायत्रीछन्दः इन्द्रोदेवता। तथाचानुक्रान्तं—इमंनुद्वादशकुरुसुतिः काण्वइति । व्यूढे दशरात्रे चतुर्थेहनि मरुत्वतीयआद्यस्तृचः सूत्रितंच—इमंनुमायिनंहुवे त्यमुयःसत्रासाहमिति ।

तत्र प्रथमा—

इ॒मं नु मा॒यिनं॑ हुव॒ इन्द्र॒मीशा॑न॒मोज॑सा । म॒रुत्व॑न्तं॒ न वृ॒ञ्जसे॑ ॥ १ ॥

इ॒मम् । नु । मा॒यिन॑म् । हु॒वे॒ । इन्द्र॑म् । ईशा॑नम् ।
ओज॑सा । म॒रुत्व॑न्तम् । न । वृ॒ञ्जसे॑ ॥ १ ॥

इमं मायिनं प्रज्ञावन्तं ओजसा स्वबलेन ईशानं सर्वस्य स्वामिनं मरुत्वन्तं । नेति संप्रत्यर्थे । मरुद्भिस्तद्वन्तमिदानीमिन्द्रं वृंजसे शत्रूणां छेदनाय हुवे आह्वयामि ॥१॥

अथ द्वितीया—

अ॒यमिन्द्रो॑ म॒रुत्स॑खा॒ वि वृ॒त्रस्या॑भिन॒च्छिरः॑ । वज्रे॑ण श॒तप॑र्वणा ॥२॥

अ॒यम् । इन्द्रः॑ । म॒रुत्ऽस॑खा । वि । वृ॒त्रस्य॑ । अ॒भि॒न॒त् ।
शिरः॑ । वज्रे॑ण । श॒तऽप॑र्वणा ॥ २ ॥

अयमिन्द्रो मरुत्सखा मरुद्युक्तोवृत्रस्य व्यभिनत् व्यच्छिनच्छिरः वज्रेण शतपर्वणा शतसंधिना ॥ २ ॥

अथ तृतीया—

वा॒वृ॒धा॒नो म॒रुत्स॒खेन्द्रो॒ वि वृ॒त्रमै॑रयत् । सृ॒जन्त्स॑मु॒द्रिया॑ अ॒पः ॥३॥

वृद्धधानः । मरुत्ऽसखा । इन्द्रः । वि । वृत्रम् ।
ऐरयत् । सृजन् । समुद्रियाः । अपः ॥ ३ ॥

अयमिन्द्रो वा वृधानो वर्धमानो मरुत्सखा मरुत्सहायो वृत्रं मेघं व्यैरयत् विदारितवान्। किंकुर्वन् समुद्रियाः समुद्रमन्तरिक्षं तत्संबन्धिन्यअपः सृजन् असृजन् ॥ ३ ॥

षष्ठेहनि मरुत्वतीये अयं हयेनेति मरुत्वन्निविद्धानीयः । सूत्रितंच—अयंहयेनवाइदमुपनोहरिभिःसुतमिति ।

तत्र प्रथमा सूक्ते चतुर्थी—

अयंहयेनवाइदंस्वर्मरुत्वताजितम् । इन्द्रेणसोमपीतये ॥ ४ ॥

अयम् । ह । येन । वै । इदम् । स्वः । मरुत्वता ।
जितम् । इन्द्रेण । सोमऽपीतये ॥ ४ ॥

अयंह खल्विन्द्रः येन वै येनखलु मरुत्वता मरुद्भिर्युक्तेनेन्द्रेणेदं स्वः स्वर्गाख्यं स्थानं इदं स्वः सर्वं कर्म वा यद्वेदं सर्वं जगत् जितं । किमर्थं सोमपीतये सोमपानाय ॥ ४ ॥

अथ तृचे द्वितीया सूक्ते पंचमी—

मरुत्वन्तमृजीषिणमोजस्वन्तंविरप्शिनम् । इन्द्रंगीर्भिर्हवामहे ॥५॥

मरुत्वन्तम् । ऋजीषिणम् । ओजस्वन्तम् । विऽरप्शिनम् ।
इन्द्रम् । गीःऽभिः । हवामहे ॥ ५ ॥

मरुत्वंतं मरुद्भिस्तद्वन्तं ऋजीषिणं । अभिषुतशेषऋजीषः सच तृतीयसवने पुनः सूयते । तद्वन्तं ओजस्वन्तं ओजोनामाष्टमीदशा शरीरवृद्ध्युपेतमित्यर्थः । विरप्शिनं महत्नामैतत् महान्तं एवं महानुभावमिन्द्रं गीर्भिः स्तुतिभिर्हवामहे आह्वयामः ॥ ५ ॥

अथ तृचे तृतीया सूक्ते षष्ठी—

इन्द्रंप्रत्नेनमन्मनामरुत्वन्तंहवामहे । अस्यसोमस्यपीतये॥६॥२७॥

इन्द्रम् । प्रत्नेन । मन्मना । मरुत्वन्तम् । हवामहे ।
अस्य । सोमस्य । पीतये ॥ ६ ॥ २७ ॥

मरुत्वन्तमिन्द्रं प्रत्नेन पुराणेन मन्मना मननीयेन स्तोत्रेण हवामहे अस्य सोमस्य पीतये पानाय ॥ ६ ॥

॥ इति षष्ठस्य पंचमे सप्तविंशोवर्गः ॥ २७ ॥

पंचमेहनि मरुत्वतीये मरुत्वाँइन्द्रमीढ्वइति तृचोनिविद्धानीयः। सूत्रितंच—मरुत्वाँइन्द्रमीढ्वस्तमिन्द्रंवाजयामसीति।

सैषा तृचे प्रथमा सूक्ते सप्तमी—

मरुत्वाँइन्द्रमीढ्वःपिबासोमंशतक्रतो। अस्मिन्यज्ञेपुरुष्टुत ॥ ७ ॥

मरुत्वान्। इन्द्र। मीढ्वः। पिब। सोमम्। शतक्रतो इति शतऽक्रतो। अस्मिन्। यज्ञे। पुरुऽस्तुत ॥ ७ ॥

हे मीढ्वः फलस्य वृष्टेर्वा सेक्तः शतक्रतो बहुकर्मेन्द्र त्वं मरुत्वान् सोमं पिबास्मिन्यज्ञे। हे पुरुष्टुत बहुभिराहूत ॥ ७ ॥

अथ तृचे द्वितीया सूक्तेष्टमी—

तुभ्येदिन्द्रमरुत्वतेसुताःसोमासोअद्रिवः। हृदाहूयन्तउक्थिनः ॥ ८ ॥

तुभ्य। इत्। इन्द्र। मरुत्वते। सुताः। सोमासः। अद्रिऽवः। हृदा। हूयन्ते। उक्थिनः ॥ ८ ॥

हे अद्रिवोवज्रवन्निन्द्र मरुत्वते तुभ्येत् तुभ्यमेव सोमासः सुताअभिषुताः तेचोक्थिनः शस्त्रवन्तो हृदा मनसा भक्त्या हूयन्ते त्वदर्थम् ॥ ८ ॥

अथ तृचे तृतीया सूक्ते नवमी—

पिबेदिन्द्रमरुत्सखासुतंसोमंदिविष्टिषु। वज्रंशिशानओजसा ॥ ९ ॥

पिब। इत्। इन्द्र। मरुत्ऽसखा। सुतम्। सोमम्। दिविष्टिषु। वज्रम्। शिशानः। ओजसा ॥ ९ ॥

हे इन्द्र मरुत्सखा त्वं सुतमभिषुतं सोमं पिब किमर्थं दिविष्टिषु अस्माकमह्नामभिगमनेषु दिवः स्वर्गस्य वा एषणेषु निमित्तेषु पीत्वा चौजसा बलेन सोमपानजनितेन वज्रं शिशानः तीक्ष्णीकुर्वन् शत्रून् जहीतिभावः ॥ ९ ॥

चतुर्विंशेऽहनि मावःसवने ब्राह्मणाच्छंसिशस्त्रे उत्तिष्ठन्निति तृचः पळहस्तोत्रियः । सूत्रितंच—उत्तिष्ठन्नोजसासहभिधिविश्वाअपद्विषइति ब्राह्मणाच्छंसिनइति ।

अस्मिंस्तृचे प्रथमा सूक्ते दशमी—

उत्तिष्ठन्नोजसासहपीत्वीशिप्रेअवेपयः । सोममिन्द्रचमूसुतम् ॥१०॥

उत्ऽतिष्ठन् । ओजसा । सह । पीत्वी । शिप्रे इति । अवेपयः ।
सोमम् । इन्द्र । चमू इति । सुतम् ॥ १० ॥

हे इन्द्र त्वं पीत्वी पीत्वोजसा बलेन सहोत्तिष्ठन् शिप्रे हनू अवेपयः अकंपयः मदावेशादितिभावः । किं पीत्वा चमू चम्वोरधिषवणफलकयोः सुतं सोमम् ॥ १० ॥

अथ तृचे द्वितीया सूक्ते एकादशी—

अनुत्वारोदसीउभेक्रक्षमाणमकृपेताम् । इन्द्रयद्दस्युहाभवः॥११॥

अनु । त्वा । रोदसी इति । उभे इति । क्रक्षमाणम् ।
अकृपेताम् । इन्द्र । यत् । दस्युऽहा । अभवः ॥ ११ ॥

हे इन्द्र क्रक्षमाणं शत्रूनिविलिखन्तं त्वा त्वां उभे रोदसी उभे अपि द्यावापृथिव्यौ अन्वकृपेतां अनुकल्पयेतां । यद्यदा दस्युहा भवोभवसि तदा ॥ ११ ॥

अथ तृचे तृतीया सूक्ते द्वादशी—

वाचमष्टापदीमहंनवस्रक्तिमृतस्पृशम् । इंद्रात्परितन्वंममे ॥१२॥२८॥

वाचम् । अष्टाऽपदीम् । अहम् । नवऽस्रक्तिम् । ऋतऽस्पृशम् ।
इन्द्रात् । परि । तन्वम् । ममे ॥ १२ ॥ २८ ॥

अष्टापदीं अष्टाभिर्दिग्भिर्विदिग्भिः साष्टापदीं नवस्रक्तिं उपरिस्थितेनादित्येन नवस्रक्तिं आसु दिक्षु व्याप्तामित्यर्थः । ऋतस्पृशं यज्ञस्पृशं वाचं स्तुतिं मया परिपूर्णामिन्द्रात्त्वं तनुं न्यूनां सतीं परिममे अन्यूनेयत्तां करोमीत्यर्थः । कात्स्न्र्येन स्वरूपं स्तुत्या विषयीकर्तुमशक्यत्वादिति भावः ॥ १२ ॥

॥ इति पष्ठस्य पंचमेष्टाविंशोवर्गः ॥ २८ ॥

जज्ञानइत्येकादशर्चं सप्तमं सूक्तं काण्वस्य पुरुसुतेरार्षं आद्यानव गायत्र्यः दशमी बृहती एकादशी सतोबृहती इन्द्रोदेवता । तथाचानुक्रान्तं—जज्ञानएकादशप्रगाथान्तमिति । महाव्रते निष्केवल्ये जज्ञानोनुशतक्रतुरित्येषा । तथैव पंचमारण्यके सूत्रितं—जज्ञानोनुशतक्रतुरित्येकेति ।

सैषा प्रथमा—

जज्ञानोनुशतक्रतुर्विपृच्छदितिमातरम् । कउग्राःकेहशृण्विरे॥१॥

जज्ञानः । नु । शतऽक्रतुः । वि । पृच्छत् । इति । मातरम् ।
के । उग्राः । के । ह । शृण्विरे ॥ १ ॥

अयमिन्द्रो जज्ञानोनु जायमानएव शतक्रतुर्बहुकर्मा इतीत्थं मातरं स्वजननीं विपृच्छत् विपृच्छति । किमिति के उग्रा उद्गूर्णबला लोके केह शृण्विरे श्रूयन्ते गुणैः केविश्रुताइत्यर्थः॥१॥

अथ द्वितीया—

आदींशवस्यब्रवीदौर्णवाभमहीशुवम् । तेपुत्रसन्तुनिष्टुरः ॥ २ ॥

आत् । ईम् । शवसी । अब्रवीत् । और्णऽवाभम् ।
अहीशुवम् । ते । पुत्र । सन्तु । निःऽतुरः ॥ २ ॥

इन्द्रेण पृष्टा शवसी माता आदनंतरमेव ईं एनमिन्द्रमब्रवीत् । किमिति उच्यते—और्णवाभमहीशुवमेतन्नामानावसुरौ विद्यतः तौ उक्तौ । अन्ये च तादृशाः हे पुत्र तव निष्टुरो निस्तारणीयाः सन्त्विति ॥ २ ॥

अथ तृतीया—

समित्तान्वृत्रहाखिदत्खेअराँइवखेदया । प्रवृद्धोदस्युहाभवत्॥३॥

सम् । इत् । तान् । वृत्रऽहा । अखिदत् । खे । अरान्ऽइव ।
खेदया । प्रऽवृद्धः । दस्युऽहा । अभवत् ॥ ३ ॥

तान् जनन्योकान्वृत्रहा इन्द्रः समिव संहैवाखिदव खेदनं नामाकर्षणं । खे रथचक्रस्य नाभौ अरान् चक्रांगभूतान् शंकून् खेदयाइव रज्ज्वेव तथा तान्यथा संखिदन्ति तद्वत् तथा कृत्वादस्युहा शत्रुघातीन्द्रः मवृद्धोभवत ॥ ३ ॥

अथ चतुर्थी–

एकंयाप्रतिधापिबत्साकंसरांसित्रिंशतम् । इन्द्रःसोमस्यकाणुका ॥४॥

एकंया । प्रतिऽधा । अपिबत् । साकम् । सरांसि ।
त्रिंशतम् । इन्द्रः । सोमस्य । काणुका ॥ ४ ॥

अयमिन्द्रः एकया एकेन प्रतिधा प्रतिधानेन साकं सह एकधैव त्रिंशतं सरांसि उक्थपात्राणीत्यर्थः। कीदृशानि सरांसि सोमस्यपूर्णानि सोमरसेन पूर्णानि। काणुका कान्तानि कान्तानिवा सोमेन कृतानि वा सोमपूर्णानि अपिबत् पीतवान् माध्यंदिनसवने। याज्ञिकप्रसिद्ध्यैवं। नैरुक्तप्रसिद्ध्यातु कालाभिमानीन्द्रः त्रिंशदपरपक्षस्याहोरात्रांस्त्रिंशत्पूर्वपक्षस्य च सन्ति तानेकरूपमनुभवतीति एतत्सर्वमेकेन प्रतिधानेनापिबदित्यादि[1] निरुक्ते तद्व्याख्यानेच स्पष्टमुक्तं तदत्र द्रष्टव्यम् ॥ ४ ॥

अथ पञ्चमी–

अभिगन्धर्वमतृणदबुध्नेषुरजःस्वा । इन्द्रोब्रह्मभ्यइद्वृधे ॥ ५ ॥ २९ ॥

अभि । गन्धर्वम् । अतृणत् । अबुध्नेषु । रजःऽसु ।
आ । इन्द्रः । ब्रह्मऽभ्यः । इत् । वृधे ॥ ५ ॥ २९ ॥

अयमिन्द्रो गंधर्वं गामुदकं धारयतीति गंधर्वो मेघस्तं अभ्यातृणत् सर्वतोहिंसितवान् । कुत्र अबुध्नेषु पदनिधानयोग्यस्थानरहितेषु रजःसु लोकेषु अन्तरिक्षप्रदेशेष्वित्यर्थः । किमर्थं ब्रह्मभ्यइत् ब्राह्मणेभ्यएव वृधे वर्धनाय ॥ ५ ॥

॥ इति पष्ठस्य पंचमे एकोनत्रिंशोवर्गः ॥ २९ ॥

---

1 नि० ५. ११. ।

अथ षष्ठी–

निराविध्यद्गिरिभ्य आधारयत्पक्कमोदनम् ।
इन्द्रो बुन्दं स्वाततम् ॥ ६ ॥

निः । अविध्यत् । गिरिऽभ्यः । आ । धारयत् । पक्कम् ।
ओदनम् । इन्द्रः । बुन्दम् । सुऽआततम् ॥ ६ ॥

अयमिन्द्रो गिरिभ्यो मेघेभ्यः सकाशादुदकं निर्गमयितुं निराविध्यत् संप्राहरत् तानेव मेघान् अधारयत्। किंकुर्वन् पक्कं परिपक्कमोदनं कुर्वन् मनुष्याणामर्थाय । केन साधनेनेति तदुच्यते—बुंदं इषुं स्वाततं सुष्ठु सर्वतोविस्तृतं आदायेतिशेषः ॥ ६ ॥

अथ सप्तमी–

शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् । यमिन्द्र चकृषे युजम् ॥ ७ ॥

शतऽब्रध्नः । इषुः । तव । सहस्रऽपर्णः । एकः ।
इत् । यम् । इन्द्र । चकृषे । युजम् ॥ ७ ॥

हे इन्द्र तवेषुः शतब्रध्नः शताग्रः सहस्रपर्णः सहस्रसंख्याकैः पत्रैः संवृतः शीघ्रगमनाय अपरिमितगमनो वा सचैकइत् एकएव यंचेषुं युजं सहायं चकृषे करोषि युद्धाय ॥ ७ ॥

अथाष्टमी–

तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे । सद्यो जात ऋभुष्ठिर ॥ ८ ॥

तेन । स्तोतृऽभ्यः । आ । भर । नृऽभ्यः । नारिऽभ्यः ।
अत्तवे । सद्यः । जातः । ऋभुऽस्थिर ॥ ८ ॥

तेनेषुणा स्तोतृभ्यः अस्मभ्यं नृभ्यो मनुष्येभ्यः पुत्रेभ्य इत्यर्थः। तथा नारिभ्यः स्त्रीभ्यश्चात्तवे अदनाय पर्याप्तं धनमाभराहर । सद्यस्तदानीमेव जातोऽस्माभिः दत्तेन सोमेन प्रवृद्धः सन् हे ऋभुस्थिर प्रभूतःस्थिरश्च संग्रामे सततोऽकः हे तादृशेन्द्र त्वमाभरेति समन्वयः ॥ ८ ॥

अथ नवमी–

एताच्यौत्नानितेकृतावर्षिष्ठानिपरीणसा । हृदावीड्वधारयः ॥ ९ ॥

एता । च्यौत्नानि । ते । कृता । वर्षिष्ठानि । परीणसा ।
हृदा । वीळु । अधारयः ॥ ९ ॥

हे इन्द्र ते त्वया एता एतानि पुरतः सर्वैर्दृश्यमानानि वर्षिष्ठानि अतिशयेन प्रवृद्धानि परीणसा परितोनतानि अतएव च्यौत्नानीति भावः भूमेः कीलवद्धारणानि कृता कृतानि पर्वतास्त्वया कृताइत्यर्थः । या यानि हृदा बुध्या वीळु स्थिराण्यधारयः बुध्या कर्तव्यानीति यान्यधारयस्तानीमानीति ॥ ९ ॥

अथ दशमी–

विश्वेत्ताविष्णुराभरदुरुक्रमस्त्वेषितः ।
शतंमहिषान्क्षीरपाकमोदनंवराहमिन्द्रएमुषम् ॥ १० ॥

विश्वा । इत् । ता । विष्णुः । आ । अभरत् । उरुऽक्रमः ।
त्वाऽइंषितः । शतम् । महिषान् । क्षीरऽपाकम् । ओदनम् ।
वराहम् । इन्द्रः । एमुषम् ॥ १० ॥

अस्याऋचोनैरुक्तैतिहासिकमतभेदेनद्विधायोजना । नैरुक्तपक्षे तावत्–हे इन्द्र ता तानि यानि त्वया सृष्टान्युदकानि सन्ति तानि विष्णुर्व्यापनशीलआदित्यआभरत् आभरति लोकाय प्रयच्छतीत्यर्थः । कीदृशोविष्णुः उरुक्रमोबहुगतिः । किं स्वविरोधेनेत्याह त्वेषितःत्वयाप्रेरितः नकेवलमुदकान्येव । अपिच शतं महिषान् शतसंख्याकान् पशून् महिषशब्दो गवादेरप्युपलक्षकः । अथवा शतशब्दोपरिमितवचनः महिषइति महन्नाम असंख्यातान् महत्तोपेतान् यजमानेभ्यआभरत् ददातीत्यर्थः । किंच क्षीरपाकं क्षीरपक्वमोदनं पायसं एतच्चरुपुरोडाशादेरुपलक्षकं तद्यजमानेभ्यआभरत् । अथवा सर्वार्थं वृष्टिप्रदानद्वारा ओदनं प्राहरत् । किंच इन्द्रोवराहंजलपूर्णं मेघं हन्तीतिशेषः । कीदृशं तं एमुषं आइत्यस्य स्थाने छान्दसएकारः आमुषमुदकस्य मोष-

कमित्यर्थः। निरुक्तपक्षे एवं। ऐतिहासिकपक्षे चरकब्राह्मणे इतिहासः आम्नायते—विष्णुर्यज्ञः सदेवेभ्य आत्मानमन्तरधात्तमन्यदेवतानाविदन् इन्द्रस्त्ववेद् सइन्द्रमब्रवीत्कोभवानिति। तमिन्द्रः प्रत्यब्रवीत् अहं दुर्गाणामसुराणां च हन्ता भवांस्तुक इति। सोब्रवीत् अहं दुर्गादाहर्ता त्वंतु यदि दुर्गाणामसुराणां हन्ता ततोयं वराहोवाममुषएकविंशत्यापुरांपारेश्मयीनां वसति तस्मिन्नसुराणां यत्तु वाममस्ति तमिमं जहीति। तस्येन्द्रस्ताः पुरोभित्वा हृदयमविध्यत् अधि तत्र यदासीत्तद्विष्णुराहरदिति। सोयमितिहासः अस्येदुमातुःसवनेषु विश्वेत्ताविष्णुरित्याभ्यां प्रतिपादितः। तयोर्मध्ये अस्येदुमातुरित्यत्र विष्णुना हेइन्द्र त्वं दुर्गाणां हन्ता इति आत्मानं कथयसि तर्हि वाममुषं वराहमसुरं जहीत्युक्तोर्थो विध्यद्वराहमिति पादेन प्रतिपादितः। इन्द्रेण च विष्णो त्वं दुर्गादाहर्तेतिब्रूषे। मया पुराणि जितानि असुरश्च घातितः तस्य वामं वस्वानयेत्युक्तो विष्णुमूर्तिस्तस्य वराहासुरस्य धनं मुमोष। सोर्थो मुषायद्विष्णुःपचतमिति पादेन सूचितः। सकिं पुनर्मुषितवानिति तदत्रोच्यते—विश्वेत्तेति। हे इन्द्र त्वेषितःत्वया प्रेरितो विष्णुर्यज्ञरूपी त्वेषितः त्वं दुर्गादाहर्ता किल तर्हि त्वं तस्य धनान्याहरेति त्वया प्रेरितः सन् उरुक्रमो भूत्वा विश्वेत्ता यानि त्वया हर्तव्यानि इत्युक्तानि यानि च तत्र स्थितानि सर्वाण्याभरत् आभरतु। कानि तानीति शतं महिषान् अपरिमितान् प्रशस्तान् पदार्थान् तेषां वाहनरूपान् महिषान्वा क्षीरपाकमोदनं च पक्वमात्रमेवोदनं वा भरत्। विध्यद्वराहमित्यत्रोक्तोर्थश्च चरमपादेनोच्यते—इन्द्रस्तु वराहं वराहारं स्वीकृतासुरसर्वस्वं वराहरूपिणं वा एमुषं एमुषनामानं अथवा एमुषं धनानामामोषकं वराहमसुरं हृदये अविध्यदितिशेषः ॥ १० ॥

अथैकादशी—

तु॒वि॒क्षं ते॒ सुकृ॑तं सू॒मयं॒ धनुः॑ सा॒धुर्बु॒न्दो हि॑र॒ण्ययः॑ ।
उ॒भा ते॑ बा॒हू रण्या॒ सुसं॑स्कृत ऋदू॒पे चि॑दृदू॒वृधा॑ ॥ ११॥३०॥

तु॒वि॒ऽक्षम् । ते॒ । सुऽकृ॑तम् । सु॒ऽमय॑म् । धनुः॑ । सा॒धुः । बु॒न्दः ।
हि॒र॒ण्ययः॑ । उ॒भा । ते॒ । बा॒हू इति॑ । रण्या॑ । सुऽसं॑स्कृता ।
ऋ॒दु॒ऽपे॑ । चि॒त् । ऋ॒दु॒ऽवृधा॑ । ११ ॥ ३० ॥

---

१ ऋ० सं० १. ४. २८. ।

एषा निरुक्ते एकमपि पदं विहाय यास्केन व्याख्याता तदेवलिख्यते—तुविक्षं बहुविक्षेपं महाविक्षेपं वा ते सुकृतं सुमयं सुमुखं धनुः साधयिता ते कुन्दोहिरण्मयः उभौ ते बाहू रण्यौ रमणीयौ संग्राम्यौ ऋदूपे अर्दनपातिनौ गमनपातिनौ मर्मण्यर्दनवेधिनौ गमनवेधिनौ वेति॥११॥

॥ इति पष्ठस्य पञ्चमे त्रिंशोवर्गः ॥ ३० ॥

पुरोळाशंनइति दशर्चंषष्टमं सूक्तं काण्वस्य कुरुसुतेरार्षं आद्यानवगायत्र्योदशमी बृहती इन्द्रोदेवता । तथाचानुक्रान्तं—पुरोळाशं दशबृहत्यन्तमिति । सूक्तविनियोगोलैङ्गिकः । महाव्रते निष्केवल्ये गायत्रतृचाशीतौ आद्यास्तिस्रऋचः । तथाच सूत्रितं—पुरोळाशंनोअन्धसइति तिस्रइति ।

तत्र प्रथमा—

पुरोळाशंनोअन्धसइन्द्रंसहस्रमाभर । शताचंशूरगोनाम् ॥ १ ॥

पुरोळाशम् । नः । अन्धसः । इन्द्र । सहस्रम् । आ ।
भर । शता । च । शूर । गोनाम् ॥ १ ॥

हे शूर इन्द्र पुरोळाशं पुरोदीयमानमेतत्संज्ञकं अंधसोन्नं स्वीकृत्य गोनां गवां सहस्रं शता शतानि च नोस्मभ्यं आभराहर । अथवा नोस्मभ्यं पुरतो दीयमानं अंधसोंधोव्यञ्जनं सहस्रं सहस्रसंख्याकं गोसहस्रं चाहरेति योज्यम् ॥ १ ॥

अथ द्वितीया—

आनोभरव्यञ्जनंगामश्वमभ्यञ्जनम् । सचामनाहिरण्यया ॥ २ ॥

आ । नः । भर । विऽअञ्जनम् । गाम् । अश्वम् । अभिऽअञ्जनम् ।
सचा । मना । हिरण्यया ॥ २ ॥

हे इन्द्र त्वंनोस्मभ्यं व्यंजनं गामश्वं अभ्यजनं तैलं चाभर । मना मननीयानि हिरण्यया हिरण्मयानि उपकरणानि सचा सहाभरेति ॥ २ ॥

---

१ नि० ६ ३३ । * हेइन्द्र ते तव धनुः तुविक्ष महाक्षेप सुकृत सुमय सुमुखच ते कुन्दः इषुः साधुः हिरण्यय. हिरण्मय. ते उभा उभौ बाहू रण्या रमणीयौ सुसरक्तौ सुष्ठु अलङ्कृतौ ऋदुपेचित् संग्रामे अर्दनपातिनौ ऋदुवृधा अर्दनवर्धनौ । इतिपुस्तकांतरे उपलभ्यते ।

अथ तृतीया–

उतनः॑कर्णशोभ॑नापुरू॒णिधृष्ण॒वाभ॑र । त्वंहिशृ॑ण्वि॒षेव॑सो ॥ ३ ॥

उ॒त । नः॒ । कर्ण॑ऽशोभ॑ना । पु॒रूणि॑ । धृ॒ष्णो॒ इति॑ । आ ।
भ॒र॒ । त्वम् । हि । शृ॒ण्वि॒षे । व॒सो॒ इति॑ ॥ ३ ॥

उतापिच नोस्मभ्यं कर्णशोभना कर्णाभरणानि पुरूणि बहून्याभर । हे धृष्णो धर्षकेन्द्र वसो वासयितरिन्द्र त्वं हि खलु शृण्विषे श्रूयसे । किमिति उदारोयमिन्द्रइति ॥ ३ ॥

अथ चतुर्थी–

नकीं॑वृधी॒कइ॑न्द्र॒तेनसु॒षान॒सु॒दाउ॒त । नान्यस्त्वच्छू॑र॒वा॒घतः॑ ॥ ४ ॥

नकी॑म् । वृ॒धी॒कः । इ॒न्द्र॒ । ते॒ । न । सु॒ऽसाः । न । सु॒ऽदाः ।
उ॒त । न । अ॒न्यः । त्वत् । शू॒र॒ । वा॒घतः॑ ॥ ४ ॥

हे इन्द्र ते त्वत्तोन्यः कश्चिद्वृधीको वर्धयिता नकीं नैव । तथा सुषाः सुष्ठु संभक्ताः संग्रामादौ त्वत्तोन्योन । उतापिच सुदाः सुदाता न । तथा हेशूर त्वत् त्वत्तोन्यो वाघतः ऋत्विङ्नामैतत् ऋत्विजो यजमानस्य नेता नान्योस्ति त्वामृते ॥ ४ ॥

अथ पञ्चमी–

नकी॒मिन्द्रो॒निक॑र्तवे॒नश॒क्रःपरि॑शक्तवे । विश्वं॑शृणोति॒पश्य॑ति॥५॥३१॥

नकी॑म् । इन्द्रः॑ । निःऽक॑र्तवे । न । श॒क्रः । परि॑ऽशक्तवे ।
विश्व॑म् । शृ॒णो॒ति॒ । पश्य॑ति ॥ ५ ॥ ३१ ॥

अयमिन्द्रो निकर्तवे निकर्तुं नकीं नैव शक्यः । तथा शक्रः शक्तोयं परिशक्तवे परिभावाय नशक्यत इति । सतु विश्वं शृणोति पश्यतिच ॥ ५ ॥

॥ इति पञ्चस्य पंचमे एकत्रिंशोवर्गः ॥ ३१ ॥

अथ षष्ठी–

सम॒न्युंमर्त्या॑ना॒मद॑ब्धोनि॒चि॑कीषते । पु॒रानि॒दश्चि॑कीषते ॥ ६ ॥

सः । मन्युम् । मर्त्यानाम् । अदब्धः । नि ।
चिकीषते । पुरा । निदः । चिकीषते ॥ ६ ॥

सइन्द्रो मन्युं क्रोधं केषां मर्त्यानां अदब्धः केनाप्यहिंसितः सन् निचिकीषते निकरोति । किं मन्युं प्राप्यैव नेत्याह निदोनिन्दायाः पुरा पूर्वमेव चिकीषते यदा तं निन्दितुमिच्छति कश्चित्ततः पूर्वमेव तं निकरोतीत्यर्थः ॥ ६ ॥

अथ सप्तमी—

क्रत्वइत्पूर्णमुदरंतुरस्यास्तिविधतः । वृत्रघ्नःसोमपाव्नः ॥ ७ ॥

क्रत्वः । इत् । पूर्णम् । उदरम् । तुरस्य । अस्ति ।
विधतः । वृत्रघ्नः । सोमपाव्नः ॥ ७ ॥

तुरस्य त्वरमाणस्य वृत्रघ्नो वृत्रं हतवतः सोमपाव्नः सोमपातुरुदरं क्रत्वइत् कर्मणैव पूर्णमस्ति भवति । कस्य कर्मणेति उच्यते—विधतः परिचरतो यजमानस्य । यतः परिचरणाभावे तस्य कुक्षिपूर्त्यभावः अतस्तत्पूर्तये परिचरतेतिशेषः ॥ ७ ॥

अथाष्टमी—

त्वेवसूनिसङ्गताविश्वाचसोमसौभगा । सुदात्वपरिह्वृता ॥ ८ ॥

त्वे इति । वसूनि । सम्ऽगता । विश्वा । च ।
सोम । सौभगा । सुऽदातु । अपरिऽह्वृता ॥ ८ ॥

हे इन्द्र त्वे त्वयि वसूनि धनान्यस्मदिष्टानि संगता संगतानि । तथा हे सोम सोमवन्निन्द्र त्वयि विश्वा सर्वाणि सौभगा सौभाग्यानि संगतानि । तथा सुदातु सुदानान्यपरिह्वृता अकुटिलानि अवसानि कुर्विति भावः । यद्वाचेन्द्रः सोमं पीत्वा सोम इत्यभिहितः सोमश्रुतेः ॥ ८ ॥

अथ नवमी—

त्वामिद्यवयुर्ममकामोगव्युर्हिरण्ययुः । त्वामश्वयुरेषते ॥ ९ ॥

त्वाम् । इत् । यवऽयुः । मम । कामः । गव्युः ।
हिरण्यऽयुः । त्वाम् । अश्वऽयुः । आ । ईषते ॥ ९ ॥

. त्वामित् त्वामेवेपते किं मम कामः सक्रीदशः यवयुः यवेच्छुः सन्नेपते । तथा गव्युः स-न्नेपते । तथा हिरण्ययुश्च सन्नेपते । तथाश्वयुश्च सन्नेपते । तं काममाप्रेच्छं कुर्विति भावः ॥९॥

अथ दशमी—

तवेदिन्द्राहमाशसाहस्तेदात्रंचनाददे ।
दिनस्यवामघवन्त्संभृतस्यवापूर्धियवस्यकाशिना ॥ १० ॥ ३२ ॥

तव । इत् । इन्द्र । अहम् । आऽशसा । हस्ते । दात्रम् ।
चन । आ । ददे । दिनस्य । वा । मघऽवन् ।
समऽभृतस्य । वा । पूर्धि । यवस्य । काशिना ॥ १० ॥ ३२ ॥

हे मघवन् इन्द्र तवेत् तवैवाशसा आशंसनेन त्वमस्मदीयं क्षेत्रं यवसमृद्धं करोषीत्याशं-सनेन हस्ते दात्रं चन लवनसाधनं दात्रमथाददे स्वीकरोमि । किमनेन मयासेन दिनस्य वा पू-र्वमेव छिन्नस्य वा यवस्य संभृतस्य वा पूर्वमेव छित्वा निष्कृतस्य राशीकृतस्य वा यवस्य काशिना मुष्टिना पूर्धि पूरयाशंसनं देहिच ॥ १० ॥

॥ इति पष्ठस्य पंचमे द्वात्रिंशोवर्गः ॥ ३२ ॥

अयं क्रतुरिति नवर्चं नवमं सूक्तं । अत्रेयमनुक्रमणिका—अयंक्रतुर्नवक्रतुर्भार्गवः सौ-म्यमनत्यानुष्टुबिति । भार्गवः क्रतुर्ऋषिः नवम्यनुष्टुप् अष्टौ गायत्र्यः सोमोदेवता विनियोगोलैं-गिकः ।

तत्र प्रथमा—

अयंक्रतुरगृभीतोविश्वजिदुद्भिदित्सोमः । ऋषिर्विप्रःकाव्येन ॥१॥

अयम् । क्रतुः । अगृभीतः । विश्वऽजित् ।
उत्ऽभित् । इत् । सोमः । ऋषिः । विप्रः । काव्येन ॥ १ ॥

अयं सोमः क्रतुः कर्ता सर्वस्य अगृभीतोन्यैरगृहीतः विश्वजित् सर्वस्य जेता उद्भित् फलस्योद्भेदकः अथवा विश्वजिदुद्भिदौ सोमयागौ तयोर्निष्पादकत्वात् तद्रूपो ऋषिर्ज्ञानवान् विप्रः मेधावी विप्रवत्पूज्यः विशेषेण पूरकोवा एवं महानुभावः सोमः काव्येन स्तोत्रेण स्तुत्यो भवतीतिशेषः ॥ १ ॥

अथ द्वितीया—

अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम्।
प्रेमन्धः ख्यन्निः श्रोणो भूत् ॥ २ ॥

अभि। ऊर्णोति। यत्। नग्नम्। भिषक्ति। विश्वम्। यत्।
तुरम्। प्र। ईम्। अन्धः। ख्यत्। निः। श्रोणः। भूत् ॥ २ ॥

अयं सोमो यन्नग्नमस्ति तदभ्यूर्णोति आच्छादयति यन्नग्नमिव विफलं वर्तते तदाच्छादयति फलेन अथवा वस्त्रं जनयन्नाच्छादयति। तथा यत्तुरमातुरं रुग्णं विश्वं तद्भिषक्ति भिषज्यति यद्वद्वारा स्वर्गसाधनेन औषधरूपेण च शरीरसिद्धिसाधनश्च अन्धः सन्नन्धोपि मत्स्यव पश्यति। श्रोणः श्रोणोपि पंगुरपि निर्भूत् निर्भवति निर्गच्छति ॥ २ ॥

अथ तृतीया—

त्वं सोम तनूकृद्भ्यो द्वेषोभ्योन्यकृतेभ्यः। उरु यन्तासि वरूथम् ॥३॥

त्वम्। सोम। तनूकृत्ऽभ्यः। द्वेषःऽभ्यः।
अन्यऽकृतेभ्यः। उरु। यन्ता। असि। वरूथम् ॥ ३ ॥

हे सोम त्वं तनूकृद्भ्यः कृशीकुर्वद्भ्यः अथर्वांगानां विच्छेदकेभ्योन्यकृतेभ्यो द्वेषोभ्यो शत्रुकृतेभ्योपियेभ्यः कृत्येभ्यइत्यर्थः वरूथं वरकं रक्षणं उरुयंतासि बहुकृद्भवसि स्तोतॄणां। अन्यकृतानि हि रक्षांसीति ब्राह्मणम् ॥ ३ ॥

अथ चतुर्थी—

त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन्।
यावीरघस्य चिद्द्वेषः ॥ ४ ॥

त्वम्। चित्ती। तव। दक्षैः। दिवः। आ। पृथिव्याः।
ऋजीषिन्। यावीः। अघस्य। चित्। द्वेषः ॥ ४ ॥

हे ऋजीषिन् तृतीयसवनगतेन ऋजीषेण तद्वन् सोम त्वं तव चित्ती चित्त्या प्रज्ञया दक्षैः बलैश्च दिवआ दिवश्च आ इति चार्थे पृथिव्या आ पृथिव्याश्च सकाशात् अघस्यचिद् स्माकमाहन्तुरपि द्वेषः शत्रोः कर्ता यावीः पृथक्कुरु ॥ ४ ॥

अथ पंचमी—

अर्थिनो॒यन्ति॒चेदर्थं॒गच्छा॒निद्द॒दुषो॑रा॒तिम् ।
व॒वृज्युस्तृष्य॑तः॒काम॑म् ॥ ५ ॥ ३३ ॥

अ॒र्थिनः॑ । यन्ति॑ । च॒ । इत् । अर्थ॑म् । गच्छा॑न् । इत् ।
द॒दुषः॑ । रा॒तिम् । व॒वृज्युः॑ । तृष्य॑तः । काम॑म् ॥ ५ ॥ ३३ ॥

अर्थिनो धनानि कामयमाना यन्ति चेद् यन्ति च अर्थं प्रति गत्वा च ददुषो दातू रातिं दानं गच्छानित् गच्छन्त्येव । गतेषु मध्ये यं हे सोम त्वमनुगृह्णासि तस्य तृष्यतोऽभिक्षमाणस्य कामं ववृज्युः पुनः कामानावर्जयन्ति तावत्पर्यन्तं पूरयन्तीत्यर्थः ॥ ५ ॥

॥ इति षष्ठस्य पंचमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

अथ षष्ठी—

वि॒दद्यत्पू॒र्व्यंन॒ष्टमुदी॑मृता॒युमी॑रयत् ।
प्रेमायु॑स्ता॒री॒दती॑र्णम् ॥ ६ ॥

वि॒दत् । यत् । पू॒र्व्यम् । न॒ष्टम् । उत् । ई॒म् । ऋ॒त॒ऽयुम् ।
ई॒र॒य॒त् । प्र । ई॒म् । आयुः॑ । ता॒री॒त् । अती॑र्णम् ॥ ६ ॥

यद्यदा पूर्व्यं पुराणं नष्टं स्वकीयं धनं विदल्लभते नष्टधनः ईं एनं ऋतायुं नष्टधनलाभार्थं यज्ञकामं उदीरयत् प्रेरयति धनं साधयतीत्यर्थः । तदा ईं अतीर्णं एनं यज्ञारंभिणं आयुः जीवनं प्रतारीत् प्रकर्षेण वर्धयेत् ॥ ६ ॥

अथ सप्तमी—

सु॒शेवो॑नोमृ॒ळ॒याकु॒रदृ॑प्तक्रतुरवा॒तः । भवा॑नःसोम॒शंहृ॒दे ॥ ७ ॥

सुऽशेवः । नः । मृळयाकुः । अदृप्तऽक्रतुः । अवातः ।
भव । नः । सोम । शम् । हृदे ॥ ७ ॥

हे सोमपीतस्त्वं नः अस्माकं हृदे हृदये वर्तमानः शं सुखं भव। किंच नः अस्माकं सुशेवः सुसुखः मृळयाकुः सुखकर्ता अदृप्तक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः ॥ ७ ॥

अथाष्टमी–

मानःसोमसंवीविजोमाविबीभिषथाराजन् ।
मानोहार्दित्विषावधीः ॥ ८ ॥

मा । नः । सोम । सम् । वीविजः । मा । वि । बीभिषथाः ।
राजन् । मा । नः । हार्दि । त्विषा । वधीः ॥ ८ ॥

हे सोमपीतस्त्वं नोस्मान्मासंवीविजश्चलितांमाकार्षीः। राजन् सोमास्मान् माविबीभिषथाः भीतान्माकुरु। नोस्माकं हार्दि हृदये त्विषा दीप्त्या मावधीः ॥ ८ ॥

अथ नवमी–

अवयत्स्वेसधस्थेदेवानांदुर्मतीरीक्षे ।
राजन्नपद्विषःसेधमीढ्वोअपस्रिधःसेध ॥ ९ ॥ ३४ ॥

अव । यत् । स्वे । सधऽस्थे । देवानाम् । दुःऽमतीः । ईक्षे । राजन् ।
अप । द्विषः । सेध । मीढ्वः । अप । स्रिधः । सेध ॥ ९ ॥ ३४ ॥

स्वे सधस्थे स्वकीये सहस्थाने गृहे देवानां दुर्मतीः दुर्मतयो न प्रविशन्त्विति। यदा अवेक्षेहं त्वं वा ईक्षसे तदा हेराजन् द्विषोस्मद्द्वेष्टॄन् अपसेध। हे मीढ्वो सोमरसस्य सेक्तः स्रिधो हिंसकानपसेध भिन्धीत्यर्थः ॥ ९ ॥

॥ इति षष्ठस्य पञ्चमे चतुस्त्रिंशोवर्गः ॥ ३४ ॥

नहन्यमिति दशर्चं दशमं सूक्तं । अत्रेयमनुक्रमणिका–नहन्यंदशैकपूर्णोघसोगायनेन्यादेवीत्रिष्टुबिति। एकपूर्णोमनोधसः पुत्रऋषिः अन्त्यात्रिष्टुप् साप्य देवदेवत्या शिष्टागायत्र्यः

ऐन्द्रः । द्वितीये पर्याये मैत्रावरुणशस्त्रे आदितोष्टर्चः । सूत्रितंच—नह्यन्यं बळाकरमित्यष्टाविति । महाव्रते निष्केवल्ये गायत्रतृचाशीतौ आद्याविनियुक्ता । तथाच पंचमारण्यके शौनकः—नह्य१न्यंबळाकरमित्येतांमत्यवद्धाति ।

तत्र प्रथमा—

नह्य१न्यंबळाकरंमर्डितारंशतक्रतो । त्वंनइन्द्रमृळय ॥ १॥

नहि । अन्यम् । बळा । अकरम् । मर्डितारम् । शतक्रतो इति शतऽक्रतो । त्वम् । नः । इन्द्र । मृळय ॥ १ ॥

हे शतक्रतो त्वत्तोन्यं मर्डितारं सुखयितारं बळा वट् तत्सहकरं नकरोमि तस्मात् हे इन्द्र त्वं नोस्मान्मृळय ॥ १ ॥

अथ द्वितीया—

योनःशश्वत्पुराविथामृध्रोवाजसातये । सत्वंनइन्द्रमृळय ॥ २ ॥

यः । नः । शश्वत् । पुरा । आविथ । अमृध्रः । वाजऽसातये । सः । त्वम् । नः । इन्द्र । मृळय ॥ २ ॥

हे इन्द्र यस्त्वं अमृध्रः शत्रुभिरहिंसितः सन् पुरा पूर्वस्मिन्काले शश्वत् बहुवारं नोस्मान् आविथ रक्षितवानसि । सत्वं नोस्मान्वाजसातये अन्नदानार्थं यद्वा अन्नसंसजनार्थं मृळय सुखयं ॥ २ ॥

अथ तृतीया—

किमङ्गरध्रचोदनःसुन्वानस्यावितेदसि । कुविदिन्द्रणःशकः ॥३॥

किम् । अङ्ग । रध्रऽचोदनः । सुन्वानस्य । अविता । इत् । असि । कुवित् । सु । इन्द्र । नः । शकः ॥ ३ ॥

१ योस्मभोरिस्तकः नोस्मान्वाजसातये अन्नलाभाय पुरा पूर्वमाविथ रक्षितवान्. हे इन्द्र सत्वं नोस्मान् शश्वत्सदा मृळय सुखय । इति व्याख्यानांतर पुस्तकान्तरस्थ ।

अंग हे इन्द्र त्वं रध्रचोदनः रध्रं राधकं चोदयतीति रध्रचोदनः तादृशस्त्वं सुन्वानस्यावितेदसि रक्षक एव भवसि । अतोनोस्माकं कुविद्वहु सु सुष्टु शकः अशकःशक्तोभव बहुधनं कुर्वित्यर्थः अस्मान्वा बहुकुर्विति ॥ ३ ॥

अथ चतुर्थी–

इन्द्रप्रणोरथमवपश्चाच्चित्सन्तमद्रिवः । पुरस्तादेनंमेकृधि ॥ ४ ॥

इन्द्र । प्र । नः । रथम् । अव । पश्चात् । चित् । सन्तम् ।
अद्रिऽवः । पुरस्तात् । एनम् । मे । कृधि ॥ ४ ॥

हे इन्द्र नोरथं प्राव प्ररक्ष । कीदृशं रथं पश्चाच्चित्सन्तं चिदप्यर्थे असत्समानरथानां पश्चाद्भूतमप्येनं मे रथं हे अद्रिवो वज्रवन्निन्द्र पुरस्ताद्वर्तमानं कृधि कुरु ॥ ४ ॥

अथ पञ्चमी–

हन्तोनुकिमाससेप्रथमंनोरथंकृधि । उपमंवाजयुश्रवः ॥५॥३५॥

हन्तो इति । नु । किम् । आससे । प्रथमम् । नः । रथम् ।
कृधि । उपऽमम् । वाजऽयु । श्रवः ॥ ५ ॥ ३५ ॥

हन्तोत्येतदादि मुख्यकृदामन्त्रितेन समानं हन्तेन्द्र नु इदानीं किं त्वं तूष्णीमाससे । तत्र किं करोमीति चेत् उच्यते–नः रथं प्रथमं सर्वेषां मुख्यं कृधि कुरु वाजयु अस्माकमन्नमिच्छच्छ्रवोन्नं हविर्लक्षणं उपमं अन्तिकनामैतत् तवान्तिकभूतं वर्ततइतिशेषः । यस्मादेवं तस्माद्रथं अस्मदीयं प्रथमं कृधीति ॥ ५ ॥

॥ इति पष्ठस्य पंचमे पंचविंशोवर्गः ॥ ३५ ॥

अथ षष्ठी–

अर्वानोवाजयुंरथंसुकरंतेकिमित्परि । अस्मान्त्सुजिग्युपस्कृधि॥६॥

अर्व । नः । वाजऽयुम् । रथम् । सुऽकरम् । ते ।
किम् । इत् । परि । अस्मान् । सु । जिग्युपः । कृधि ॥ ६ ॥

हे इन्द्र नोवाजयुं अन्नेच्छुं रथं अव रक्ष। संग्रामे ते तव किमिव् किमपि सर्वकर्तव्य-जातं परि परितः सुकरं सुखेन कर्तव्यं। तव कर्तुमशक्यं नकिंचिदस्ति। यस्मादेवं तस्मात् अस्मान् सुजिग्युषः सुष्ठु जेतॄन् कृधि कुरु संग्रामे॥ ६॥

अथ सप्तमी—

इन्द्रदृह्यस्वपूरसिभद्रातेएतिनिष्कृतम्। इयंधीर्ऋत्वियावती॥ ७॥

इन्द्रं। दृह्यस्व। पूः। असि। भद्रा। ते। एति। निःऽकृतम्। इयम्। धीः। ऋत्वियऽवती॥ ७॥

हे इन्द्र त्वं दृह्यस्व दृढोभव संग्रामे त्वं पूरसि पूरयसि यथा पुरमविचलितं तद्वत्त्वम-सि। अथवास्मदीये यज्ञे दृढोभव त्वं पुनरन्ययज्ञं जिगमिषुर्माभूः त्वं पूः पूरकःकामानामसि। किमत्र विद्यतइति चेत् उच्यते—निष्कृतं निष्कर्तारं ते त्वां भद्रा कल्याणी इयं धीः स्तुतिः क्रिया वा ऋत्वियावती ऋतुशब्दः कालोपलक्षकः स्वकालोपेता सती एति गच्छति। यद्वा ते निष्कृतं स्थानमेति॥ ७॥

अथाष्टमी—

मासीमवद्यआभागुर्वीकाष्ठाहितंधनम्। अपावृक्ताअरत्नयः॥८॥

मा। सीम्। अवद्ये। आ। भाक्। उर्वी। काष्ठा। हितम्। धनम्। अपऽआवृक्ताः। अरत्नयः॥ ८॥

मास्मान् सीं सर्वतोऽवद्ये निन्दा आभाग् माभजतु माप्नोतु न कुतश्चित्। पापरहितान्कु-र्वित्यर्थः। किंचोर्वी काष्ठा बह्वंतरालआज्यंतः आज्यंतोपि काष्ठेत्युच्यते क्रान्त्वा स्थितोभव-तीति यास्कः। तत्र हितं निहितं शत्रुसंबन्धि धनं अस्माकं भवत्वित्यर्थः। अरत्नयः अरममा-णाःशत्रवः अपावृक्ताः सन्त्विति शेषः॥ ८॥

अथ नवमी—

तुरीयंनामयज्ञियंयदाकरस्तदुश्मसि। आदित्पतिर्नओहसे॥९॥

---

१ नि० २. १५।

तुरीयम् । नाम । यज्ञियम् । यदा । करः । तत् । उश्मसि ।
आत् । इत् । पतिः । नः । ओहसे ॥ ९ ॥

हे इन्द्र त्वं यज्ञियं यज्ञसंबन्धिनं तुरीयं चतुर्थं नाम यदा करः करोषि तदुश्मसि कामयामहे आदिदनंतरमेव नामकामानन्तरमेव पतिः पालकः त्वं नोस्मानोहसे वहसि प्रापयसि । नक्षत्रनाम गुह्यनाम मकाशं नामेति त्रीणि नामानि। सोमयाजीति तुरीयं नाम तद्यज्ञियं ॥ ९ ॥

अथ दशमी—

अवीवृधद्वोअमृताअमंदीदेकद्यूर्देवाउतयाश्चदेवीः ।
तस्माउराधःकृणुतप्रशस्तंप्रातर्मक्षूधियावसुर्जगम्यात् ॥१०॥३६॥

अवीवृधत् । वः । अमृताः । अमन्दीत् । एकऽद्यूः । देवाः ।
उत । याः । च । देवीः । तस्मै । ऊँ इति । राधः । कृणुत ।
प्रऽशस्तम् । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १०॥ ३६ ॥

इयं वैश्वदेवी । हे देवाः हे अमृता अमरणा वोयुष्मानयमवीवृधत् वर्धयति स्तुत्या ।अमंदीत् तर्पयति सोमेन। एकद्यूः ऋषिरहं । उतापिच हे देवीर्देव्यो देवपत्न्यो याश्च यूयं स्थोयुष्मानपि अवीवृधदमन्दीच्च तस्मै राधो धनं प्रशस्तं प्रवृद्धं कृणुत कुरुत । उइति पूरणः एवकारार्थोवा ।प्रातः प्रातरेव मक्षु क्षिप्रं धियावसुः कर्मधनइन्द्रो जगम्यादागच्छतु । इन्द्रस्य देवस्वामित्वादाधिक्यद्योतनाय पुनरभिधानम् ॥ १० ॥

॥ इति पष्ठस्य पंचमे षट्त्रिंशोवर्गः ॥३६ ॥

॥ इत्यष्टमे मंडलेऽष्टमोनुवाकः ॥ ८ ॥

नवमेनुवाके त्रयोदशसूक्तानि । तत्रातूनइन्देति नवर्चं प्रथमं सूक्तं कण्वपुत्रस्य कुसीदिनआर्षं गायत्रमैन्द्रं । तथाचानुक्रम्यते—आतूनोनवकुसीदीकाण्वइति।महाव्रते निष्केवल्ये गायत्रतृचाशीतावेतदादिके द्वे सूक्ते । तथैव पंचमारण्यके सूत्रितंच शौनकेन—आतूनइन्द्रक्षुमंतमिति सूक्ते सदंदोहाइति । द्वितीये पर्याये मैत्रावरुणशस्त्रे आद्यस्तृचः स्तोत्रियः । सूत्रितंच—आतूनइन्द्रक्षुमन्तमाप्रद्रवपरावतइति ।

तत्र प्रथमा–

आतूर्नइन्द्रक्षुमन्तंचित्रंग्राभंसंगृभाय । महाहस्तीदक्षिणेन ॥१॥

आ । तु । नः । इन्द्र । क्षुऽमन्तम् । चित्रम् । ग्राभम् ।
सम् । गृभाय । महाऽहस्ती । दक्षिणेन ॥ १ ॥

हे इन्द्र महाहस्ती महाहस्तवान् त्वं तु तदानीमेव अस्मभ्यं दातुं नोस्मदर्थं क्षुमन्तं शब्दवन्तं स्तुत्यमित्यर्थः । चित्रं चायनीयं ग्राभं ग्राहकं ग्रहणार्हं धनं दक्षिणेन हस्तेन नु क्षिप्रं आसंगृभाय आभिमुख्येन संगृहाण ॥ १ ॥

अथ द्वितीया–

विद्माहित्वातुविकूर्मितुविदेष्णंतुवीमघम् । तुविमात्रमवोभिः ॥२॥

विद्म । हि । त्वा । तुविऽकूर्मिम् । तुविऽदेष्णम् । तुविऽमघम् ।
तुविऽमात्रम् । अवःऽभिः ॥ २ ॥

हे इन्द्र त्वा त्वां विद्म हि जानीमः खलु । कीदृशमिति तुविकूर्मिं बहुकर्माणं तुविदेष्णं बहुमदेयं तुविमघं बहुधनं तुविमात्रं बहुप्रमाणं अवोभिर्युक्तम् ॥ २ ॥

अथ तृतीया–

नहित्वाशूरदेवानमर्तासोदित्सन्तम् । भीमंनगांवारयन्ते ॥ ३ ॥

नहि । त्वा । शूर । देवाः । न । मर्तासः । दित्सन्तम् ।
भीमम् । न । गाम् । वारयन्ते ॥ ३ ॥

हे शूरेन्द्र त्वा त्वां दित्सन्तं दातुमिच्छन्तं देवाः नहि वारयन्ते नानिवारयन्ति । तथा मर्तासो मर्त्या अपि नवारयन्ते । भीमंन गां भयजनकं वृषभं यवसे प्रवृत्तमिव तं यथा वारयितुं न शक्नुवन्ति तद्वत् ॥ ३ ॥

प्रथमेपर्यायेच्छावाकशस्त्रेएवोन्विन्द्रमितितृचः तथाचसूत्रितं–एवोन्विन्द्रंस्तवामेशानंमा-नोअस्मिन्मघवन्निति ।

तृचे प्रथमा सूक्ते चतुर्थी–

एवोन्विन्द्रंस्तवामेशानंवस्वःस्वराजम् । नराधसामहिष्पन्नः ॥ ४ ॥

आ । इत । ॐ इति । नु । इन्द्रम् । स्तवाम । ईशानम् ।

वस्वः । स्वऽराजम् । न । राधसा । मर्धिषत् । नः ॥ ४ ॥

हे अस्मदीयाजनाः एतो आगच्छतैव नु क्षिप्रं । किंकर्तुं स्तवामेन्द्रं । कीदृशं तं वस्वोवसु-नोधनस्य ईशानं स्वामिनं स्वराजं स्वयमेव राजमानं स्वर्गे राजमानं वा । नोस्मानिन्द्रेणानुगृहीतान् राधसा धनेन अन्योधनीनमर्धिषत् नबाधतां आढ्यानामस्मत्समानानामप्याढ्यत्वाय स्तवामेत्यर्थः ॥ ४ ॥

अथ तृचे द्वितीया सूक्ते पंचमी–

प्रस्तोषदुपगासिषच्छ्रवत्सामगीयमानम् । अभिराधसाजुगुरत् ॥५॥३७॥

प्र । स्तोषत् । उप । गासिषत् । श्रवत् । साम । गीयमानम् ।

अभि । राधसा । जुगुरत् ॥ ५ ॥ ३७ ॥

पूर्वमंत्रे स्तवामेत्युक्तं तदेव स्तोत्रमिन्द्रः प्रस्तोषत् प्रस्तुत्या च उपगासिषत् उपगानं च करोतु । तदर्थं गीयमानं साम स्तोत्रं श्रवत् शृणोतु । राधसा धनेन च युक्तोस्मानभिजुगुरदभिगृणातु स्वीकुर्विति ॥ ५ ॥

॥ इति षष्ठस्य पंचमे सप्तत्रिंशोवर्गः ॥ ३७ ॥

अथ तृचे तृतीया सूक्ते षष्ठी–

आनोभरदक्षिणेनाभिसव्येनप्रमृश । इन्द्रमानोवसोर्निर्भाक् ॥६॥

आ । नः । भर । दक्षिणेन । अभि । सव्येन । प्र । मृश ।

इन्द्र । मा । नः । वसोः । निः । भाक् ॥ ६ ॥

हे इन्द्र नोस्मभ्यं आभराहृत्य दक्षिणेन सव्येन च हस्तेन उभाभ्यां हस्ताभ्यां अभिप्रमृश प्रयच्छेत्यर्थः । नोस्मान्वसोर्धनात् मानिर्भाक् मानिर्भाक्षीः ॥ ६ ॥

द्वितीये पर्यायेच्छावाकशस्त्रे उपक्रमस्वेति तृचः । सूत्रितंच–उपक्रमस्वाभरधृषतावदस्मै नव्यमिति ।

सैषा तृचे प्रथमा सूक्ते सप्तमी–

उपक्रमस्वाभरधृषताधृष्णोजनानाम् । अदाशूष्टरस्यवेदः ॥७॥

उप । क्रमस्व । आ । भर । धृषता । धृष्णो इति ।
जनानाम् । अदाशूःऽतरस्य । वेदः ॥ ७ ॥

हे इन्द्र त्वमुपक्रमस्व धनं प्रत्युपगच्छ मद्वचो भव वा दातुं। हे धृष्णो धर्षक शत्रूणां धृषता धृष्टेन चेतसा युक्तः सन् आभराहरच। कस्य धनमाहरेति उच्यते—जनानां मध्ये अदाशूष्टरस्य अत्यन्तमदातृतमस्य वेदोधनं ॥ ७ ॥

अथ तृचे द्वितीया सूक्तेष्टमी—

इन्द्रयउनुतेअस्तिवाजोविप्रेभिःसनित्वः । अस्माभिःसुतंसनुहि ॥८॥

इन्द्र । यः । ऊँ इति । नु । ते । अस्ति । वाजः । विप्रेभिः । सनित्वः ।
अस्माभिः । सु । तम् । सनुहि ॥ ८ ॥

हे इन्द्र योवाजोन्नं विप्रेभिर्मेधाविभिः सनित्वः संभजनीयः ते तवास्ति तं वाजमस्माभिर्याचितः सन् अस्मभ्यं वा सु सुष्ठु सनुहि देहि ॥ ८ ॥

अथ तृचे तृतीया सूक्ते नवमी—

सद्योजुवस्तेवाजाअस्मभ्यंविश्वश्चन्द्राः । वशैश्चमक्षूजरन्ते॥९॥३८॥

सद्यःऽजुवः । ते । वाजाः । अस्मभ्यम् । विश्वऽचन्द्राः ।
वशैः । च । मक्षु । जरन्ते ॥ ९ ॥ ३८ ॥

हे इन्द्र ते तव वाजाः अन्नानि अस्मभ्यं सद्योजुवः शीघ्रं गन्तारोभवन्तु। कीदृशास्ते विश्वचन्द्राः सर्वहिरण्योपेताः बहूनामाह्लादकावा अस्मदीयाश्च जनाः वशैः कामैरनेकैर्युक्ताः मक्षु शीघ्रं जरन्ते स्तुवन्ति ॥ ९ ॥

॥ इति प्रथमस्य पंचमेऽष्टत्रिंशोवर्गः ॥ ३८ ॥

वेदार्थस्य प्रकाशेन तमोहार्दं निवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके पंचमोध्यायः ॥ ५ ॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

आमद्रवेति नवर्चं द्वितीयं सूक्तं। तथाचानुक्रम्यते—आमद्रवेति। ऋषिश्चान्यस्मादिति प-रिभाषया काण्वःकुसीदऋषिः प्राग्वत्समीयपरिभाषया गायत्रीछन्दः अनादेशपरिभाषयेन्द्रोदे-वता। महाव्रते निष्केवल्ये सूक्तविनियोगउक्तः। द्वितीये रात्रिपर्याये मैत्रावरुणशस्त्रे आमद्रवे-तितृचोनुरूपः। सूत्रितंच—आमद्रवपरावतो नह्य१न्यंबळाकरमित्यष्टाविति।

अथ तस्मिन्सूक्ते प्रथमा—

ॐम् आप्रद्रवपरावतोर्वावतश्चवृत्रहन्। मध्वःप्रतिप्रभर्मणि ॥ १ ॥

आ। प्र। द्रव। पराऽवतः। अर्वाऽवतः। च।

वृत्रऽहन्। मध्वः। प्रति। प्रऽभर्मणि ॥ १ ॥

हे वृत्रहन् अपामावरकस्य वृत्रासुरस्य हन्तर्हे इन्द्र प्रभर्मणि प्रकृष्टानि भर्माणि भरणा-नि पशुप्रमहादिसंपादनानि यस्मिन् सप्रभर्मा यज्ञः। यद्वा प्रकृष्टाः कर्मणिकुशला भर्माणः देवा-नां हविः प्रदानेन पोषका ऋत्विजोयस्मिन्निति सवथोक्तः एतादृशे यज्ञे मध्वः मदकरान् सोमान् प्रति परावतः विप्रकृष्टात् दूरस्थादेशादपि अर्वावतश्च समीपस्थादेशादपि आभिमुख्येन प्रद्रव त्वं त्वरया आगच्छ। मध्वइति वाछन्दसीति पूर्वसवर्णदीर्घाभावः ॥ १ ॥

अथ द्वितीया—

तीव्राःसोमासआगहिसुतासोमादयिष्णवः। पिबादधृग्यथोचिषे ॥२ ॥

तीव्राः। सोमासः। आ। गहि। सुतासः। मादयिष्णवः।

पिब। दधृक्। यथा। ओचिषे ॥ २ ॥

हे इन्द्र तीव्राः तीव्रमदाः क्षिप्रं मदकारिणइत्यर्थः। मादयिष्णवः मादनशीला मादन-कारिणोवा इमे सोमासः सोमाः सुतासः त्वदर्थमभिषुताः तस्मादागहि अस्मदीयं यज्ञं प्रत्याग-

च्छ । आगत्यच तान् पिब । सोमपाने कारणमाह—त्वं यथा दधृक् धृष्टः तमीवी प्रगल्भःसन् तान् ओचिषे समवैषि सेवसे ततस्तान्यथाकामंपिबेत्यर्थः । दधृगिति ञिधृषाप्रागल्भ्येइत्यस्माद्- त्विग्दधृगित्यादिना क्विन्प्रत्ययान्तोनिपात्यते । ओचिषे उचसमवाये छान्दसेलेटिरूपम् ॥ २ ॥

अथ तृतीया—

इषामन्दस्वादुतेरंवरायमन्यवे । भुवंत्तइन्द्रशंहृदे ॥ ३ ॥

इषा । मन्दस्व । आत् । ऊँ इति । ते । अरम् । वराय ।
मन्यवे । भुवत् । ते । इन्द्र । शम् । हृदे ॥ ३ ॥

हे इन्द्र इषा सोमलक्षणेनान्नेन मन्दस्व मोदस्व हृष्टोभव । उइत्यवधारणे । आदनन्तरमेव ते तव वराय शत्रुनिवारकाय मन्यवे क्रोधाय ससोमः अरमलं पर्याप्तोभवतु क्रोधशमने समर्थोभवतु । यदा सोमं पिबति तदा मन्युं त्यजतीत्यर्थः । किंच ते तव हृदे हृदये ससोमः शं शंकरः सुखकरोभुवत् भवतु ॥ ३ ॥

तृतीये पर्याये आत्वशत्रवित्यनुरूपस्तृचः । सूत्रितंच—आत्वेतानिषीदतात्वशत्रवागहीति ।

तस्मिन्प्रथमा सूक्ते चतुर्थी—

आत्वंशत्रवागंहिन्युंक्थानिचहूयसे । उपमेरोचनेदिवः ॥ ४ ॥

आ । तु । अशत्रो इति । आ । गहि । नि । उक्थानि ।
च । हूयसे । उपऽमे । रोचने । दिवः ॥ ४ ॥

हे अशत्रो सपत्नरहित अस्य बहुविधबलत्वात् रणाभिमुखं गन्तारः शत्रवो नसन्तीत्यर्थः । तादृशेन्द्र तु क्षिप्रं आगह्यस्मद्यज्ञं प्रत्यागच्छ । यतः दिवः स्वतेजसा दीप्यमानात् द्युलोकात् तत्रस्थैर्देवैरित्यर्थः रोचने अग्निभिर्दीप्यमाने लोकेच उपमे समीपे स्तोतारः स्तोत्रशस्त्रात्मकं शब्दंकुर्वन्त्यत्रेति उपमोयज्ञः तस्मिन्नस्मदीये यज्ञे च उक्थानि त्रिवृत्पञ्चदशादिलक्षणानि स्तोत्राणि प्रति निहूयसे त्वं स्तोतव्यतया नितरामाहूयसे । यस्मादेवं तस्मादागच्छेति समन्वयः ॥४॥

अथ पञ्चमी–

तुभ्यायमद्रिभिःसुतोगोभिःश्रीतोमदायकम् । प्रसोमइन्द्रहूयते॥५॥१॥

तुभ्य॑ । अ॒यम् । अद्रि॑ऽभिः । सु॒तः । गोभिः॑ । श्री॒तः ।
मदा॑य । कम् । प्र । सोमः॑ । इ॒न्द्र॒ । हू॒य॒ते॒ ॥ ५ ॥ १ ॥

हे इन्द्र अद्रिभिरभिषवसाधनैर्ग्रावभिरयं सोमः तुभ्य तुभ्यं त्वदर्थं सुतोभिषुतः ततोद-शापवित्रेण पूत्वा गोभिः गोविकारैः क्षीरादिभिःश्रीतः सः अस्माभिः परावतएव संस्कृतः सोमः तव मदाय मदार्थं कं सुखेन प्रहूयते अग्नौ स्वाहाक्रियते तस्मादागत्य सोमं पिब ॥ ५ ॥

॥ इति षष्ठस्य षष्ठे प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी–

इन्द्रश्रुधिसुमेहवमस्मेसुतस्यगोमतः । विपीतिंतृप्तिमश्नुहि ॥ ६॥

इन्द्र॑ । श्रु॒धि । सु । मे॒ । हव॑म् । अ॒स्मे इति॑ । सु॒तस्य॑ ।
गोऽम॑तः । वि । पी॒तिम् । तृ॒प्तिम् । अ॒श्नु॒हि॒ ॥ ६ ॥

हेइन्द्र मे मदीयं हवं त्वद्विषयमाह्वानं सु सुष्ठुश्रुधि शृणु। तथास्मे अस्माभिः सुतस्याभिषुतस्य गोमतो गव्यक्षीरवतः क्षीरेण मिश्रितस्येत्यर्थः । तादृशस्य सोमस्य पीतिं पानं व्यश्नुहि विविधं प्राप्नुहि । तत्पानेन विविधां तृप्तिं च गच्छ । अश्नूव्याप्तौ व्यत्ययेन परस्मैपदम् ॥ ६ ॥

तृतीये पर्याये एवाच्छावाकशस्त्रे 'यइन्द्रचमसेष्विति तृचः । सूत्रितंच–यइन्द्रचमसे-ष्वासोमः प्रवःसतामिति ।

तत्र प्रथमा सूक्ते सप्तमी–

यइन्द्रचमसेष्वासोमश्चमूषुतेसुतः । पिबेदस्यत्वमीशिषे ॥ ७ ॥

यः । इ॒न्द्र॒ । च॒म॒सेषु॑ । आ । सोमः॑ । च॒मूषु॑ । ते॒ ।
सु॒तः । पिब॑ । इत् । अ॒स्य॒ । त्वम् । ई॒शि॒षे॒ ॥ ७ ॥

हे इन्द्र ते त्वदर्थं सुतोभिषुतो यः सोमः चमसेषु एतन्नामकेषु पात्रेषु तथा चमूषु चम-न्ति यजनयत्रेति चम्वोग्रहाः तेषु चासर्वतोस्ति । अस्य तमेतं सोमं पिबेद् इदवधारणे पिबैव ।

कथमस्य सोमपानयोग्यता तत्राह—हे इन्द्र त्वमीशिषे तस्य त्वमेव ईश्वरो भवसि खलु। यतएवं ततः पिबेति समन्वयः। ईश ऐश्वर्ये लटि ईशःसइतीडागमः ॥ ७ ॥

अथाष्टमी—

योअ॒प्सुच॒न्द्रमा॑इव॒सोम॑श्च॒मूषु॒दद्द॑शे। पिबेद॑स्य॒त्वमी॑शिषे ॥८॥

यः। अ॒प्ऽसु। च॒न्द्रमाः॑ऽइव। सोमः॑। च॒मूषु॑। दद्द॑शे।
पिब॑। इत्। अ॒स्य॒। त्वम्। ई॒शि॒षे॒ ॥ ८ ॥

हे इन्द्र योगृहीतः सोमः चमूषु ग्रहेषु ददृशे अन्तर्दृश्यते। तत्र दृष्टान्तः—चन्द्रमाइव यथा चन्द्रमा अप्सु अन्तरिक्षे निर्मलतया दृश्यते तद्वत्। यद्वा अप्सु उदकेषु चन्द्रमाः प्रतिबिंबतया नानाविधो दृश्यते। तथाष्टग्रहेषु अनेकरूपः सन् दृश्यते तमेवं सोमं पिबैव यतस्त्वमेवेशिषे खलु ॥ ८ ॥

अथ नवमी—

यंते॑श्ये॒नःप॒दाभ॑र॒त्ति॒रोरजां॒स्यस्पृ॑तम्। पिबेद॑स्य॒त्वमी॑शिषे ॥९॥२॥

यम्। ते॒। श्ये॒नः। प॒दा। आ। अभ॑रत्। ति॒रः।
रजां॑सि। अस्पृ॑तम्। पिब॑। इत्। अ॒स्य॒। त्वम्। ई॒शि॒षे॒ ॥९॥२॥

हे इन्द्र श्येनः शंसनीयः पक्षी पक्षिरूपधारिणी गायत्रीत्यर्थः। सपक्षी रजांसि अन्तरिक्षादिलोकस्थितान् सोमपालान् गन्धर्वान् तिरस्तिरस्कुर्वन् अस्पृतं शत्रुभिरस्पृष्टं सन्तं यं सोमं ते त्वदर्थं पदापद्भ्यामाभरत् पदेति सवनद्वयाभिप्रायम् सवनद्वये आहृतं सोमं त्वं पिब। गायत्री पक्षिरूपं धारयित्वा पद्भ्यां सोममाहरत् इत्यत्रार्थे यजुर्ब्राह्मणं—पद्भ्यां द्वेसवने समगृह्णात् मुखेनैकं तस्माद्द्वेसवने शुक्रवती प्रातःसवनंच माध्यंदिनेचेति[1]। तं पिबैव तस्य ईश्वरोभवसि ॥९॥

॥ इति षष्ठस्य षष्ठे द्वितीयोवर्गः ॥ २ ॥

देवानामिति नवर्चं तृतीयं सूक्तं काण्वस्य कुसीदिनआर्षं गायत्रं वैश्वदेवं। तथाचानुक्रम्यते—देवानां वैश्वदेवमिति। दशरात्रेष्टमेहनि वैश्वदेवशस्त्रे इदंसूक्तं वैश्वदेवनिविद्धानं सूत्रितंच—देवानामिदंवइति वैश्वदेवमिति।

---

१ तै० सं० ६. १. ६।

तत्र प्रथमा–

देवानामिदवोमहत्तदावृणीमहेवयम् । वृष्णामस्मभ्यमूतये ॥ १ ॥

देवानाम् । इत् । अवः । महत् । तत् । आ । वृणीमहे ।
वयम् । वृष्णाम् । अस्मभ्यम् । ऊतये ॥ १ ॥

हे देवाः देवानां स्वतेजसा सर्वतोदीप्यमानानां इत् एवार्थे युष्माकमेव महत् व्याप्तं मंहनीयंवा अवः पालनं यद्विद्यते तद्वृष्णां कामानां वर्षितॄणां युष्माकं स्वभूतं तद्रक्षणं यजमाना वयं आवृणीमहे समंतात्संभजामहे । किमर्थमस्मभ्यमूतये पूर्वमस्मभ्यमस्मदर्थमिति साधारण्येनोक्त्वा तद्विशिनष्टि ऊतयइति अस्माकं पालनायेति ॥ १ ॥

अथ द्वितीया–

तेनःसन्तुयुजःसदावरुणोमित्रोअर्यमा । वृधासश्चप्रचेतसः ॥ २ ॥

ते । नः । सन्तु । युजः । सदा । वरुणः । मित्रः ।
अर्यमा । वृधासः । च । प्रऽचेतसः ॥ २ ॥

ते देवाः वरुणः शत्रूणां निवारकः मित्रः सर्वेषां मित्रभूतः अर्यमा सततं गच्छन् एतन्नामकास्ते त्रयोदेवाः सदा सर्वदा सर्वेषु अहःसु नोस्माकं युजः सहायाः सन्तु भवन्तु । अग्निहोत्रादिकर्मणि इन्द्रादिदेवाः सहागमनादि यज्ञपरिसमापनान्तेषु साहाय्यं कुर्वन्त्वित्यर्थः । ततः प्रचेतसः प्रकृष्टज्ञानाः यद्वा चेतः स्तोत्रं शोभनस्तुतयस्तेदेवा वृधासो वर्धकाश्च अस्माकं धनादिदानेन वर्धयितारश्च सन्तु ॥ २ ॥

अथ तृतीया–

अतिनोविष्पितापुरुनौभिरपोनपर्षथ । यूयमृतस्यरथ्यः ॥ ३ ॥

अति । नः । विऽपिता । पुरु । नौभिः । अपः ।
न । पर्षथ । यूयम् । ऋतस्य । रथ्यः ॥ ३ ॥

ऋतस्य सत्यस्य यज्ञस्यवाहे रथ्यो नेतारोदेवाः यूयं विष्पिता विष्पितानि विप्रकृष्टानि विस्तृतानि

पुरु सुपोलुक् पुरूणि बहूनि शत्रुबलानि कर्माणि नोस्मान् यूयमतिपर्षथ बलानिचेव् तेषां व-धेन अतीत्य गमयत । कर्माणिचेत् नोस्मानतिपर्षथ पारं समाप्तिं रक्षणैःगमयत । तत्रदृष्टान्तः— नौभिरपोन यथा नाविकः अपः उदकानि नौभिर्जनान् तीरं प्रति प्रापयति तद्वत् ॥ ३ ॥

अथ चतुर्थी—

वामंनोअस्त्वर्यमन्वामंवरुणशंस्यम् । वामंह्यावृणीमहे ॥ ४ ॥

वामम् । नः । अस्तु । अर्यमन् । वामम् । वरुण ।
शंस्यम् । वामम् । हि । आऽवृणीमहे ॥ ४ ॥

हे अर्यमन्देव वामं वननीयं संभजनीयं धनं नोस्माकं अस्तु भवतु । हे वरुण शंस्यं शंसनीयं स्तुत्यं वामं धनमस्माकमस्तु । कुतः हिशब्दोहेतौ यस्मात्कारणाद्व वयं वामं धनं युष्मानावृणीमहे याचामहे इत्यर्थः तस्मान्नोस्त्वित्याशास्ते ॥ ४ ॥

अथ पंचमी—

वामस्यहिप्रचेतसईशानासोरिशादसः । नेमादित्याअघस्ययत् ॥५॥३॥

वामस्य । हि । प्रऽचेतसः । ईशानासः । रिशादसः ।
न । ईम् । आदित्याः । अघस्य । यत् ॥ ५ ॥ ३ ॥

हे प्रचेतसः प्रकृष्टज्ञानाः शोभनस्तुतयोवा हे रिशादसः रिशतां हिंसतां शत्रूणामसितारः क्षेप्तारोदेवाः यूयं वामस्य वननीयस्य धनस्य ईशानास ईशानाः हिरवधारणे ईशानाएव स्वा-मिनएव भवथ तस्माद्युष्मान्याचामहे इत्यर्थः । ईशानाः ईशऐश्वर्ये अनुदात्तेत् तास्यनुदात्तेदिति स्वरेणाद्युदात्तता भवति न संबुद्धिः । तवो हे आदित्याः अदितेःपुत्रादेवाः ईमेनं याचमानं मां यद्धनं प्राप्नोतु यद्धनमघस्य पापस्य संबन्धि विद्यते ॥ ५ ॥

॥ इति पञ्चस्य षष्ठे तृतीयोवर्गः ॥ ३ ॥

अथ षष्ठी—

वयमिद्वःसुदानवःक्षियन्तोयान्तोअध्वन्ना । देवावृधायहूमहे ॥६॥

वयम् । इत् । वः । सुऽदानवः । क्षियन्तः । यान्तः ।
अध्वन् । आ । देवाः । वृधाय । हूमहे ॥ ६ ॥

हे सुदानवः शोभनदानाः हे देवाः क्षियन्तो गृहेष्वग्निहोत्रार्थं निवसन्तः अध्वन् सुपो-लुक् अध्वनि समिदाहरणार्थं यान्तो गच्छन्तोपि वयं वहव् युष्मानेव वृधाय हविर्भिर्वर्धना-य हूमहे आह्वयामः। यद्वा वयं गृहेषु गृहान्निर्गमनकाले मार्गेषु च वृधाय अस्माकं धनादि-भिर्वर्धनायाह्वयामः ॥ ६ ॥

अथ सप्तमी–

अधिनइन्द्रैषांविष्णोसजात्यानाम् । इतामरुतोअश्विना ॥ ७ ॥

अधि । नः । इन्द्र । एषाम् । विष्णो इति । सऽजात्यानाम् ।
इत । मरुतः । अश्विना ॥ ७ ॥

हे इन्द्र विष्णो मरुतः हे अश्विना अश्विनौ हे इन्द्रादयोदेवाः सजात्यानां समानायां जातौ भवाः सजात्याः भ्रातृमित्रादयः तेषामेषां मध्ये नोस्मान् अधीत यूयं स्तुत्यतया अ-धिगच्छत ॥ ७ ॥

अथाष्टमी–

प्रभ्रातृत्वंसुदानवोधद्विताममान्या । मातुर्गर्भेभरामहे ॥ ८ ॥

प्र । भ्रातृऽत्वम् । सुऽदानवः । अध । द्विता । समान्या ।
मातुः । गर्भे । भरामहे ॥ ८ ॥

हे सुदानवः शोभनदाना आदित्याः अधाथ अस्मत्समागमनानन्तरं वयं समान्या स-मान्येन सुपोडयादेशः। पूर्वं सर्वेषां देवानां सांहत्येन ततोद्विता द्विधा द्विप्रकारेण च मातुरदिते-र्गर्भे संजातं यद्युष्माकं भ्रातृत्वं विद्यते तदिदानीं वयं प्रभरामहे प्रभरणमुच्चारणं प्रकाशनंवा उच्चारयामः प्रकाशयामोवा। सर्वेषां देवानां द्वैधशोजननं तैत्तिरीयके स्पष्टमभिहितं–अदितिः पुत्रकामा साध्येभ्योदेवेभ्यो ब्रह्मौदनमपचदित्युपक्रम्य तस्यैपुपाचार्यमाचाजायेतामित्यादिना[1]॥८॥

अथ नवमी–

यूयंहिष्ठासुदानवइन्द्रज्येष्ठाअभिद्यवः । अधाचिद्वउतब्रुवे ॥९॥४॥

---

१ तै० सं० ६. ५. ६. १

पुरु सुपोलुक् पुरूणि बहूनि शत्रुबलानि कर्माणि नोस्मान् यूयमतिपर्षथ बलानिचेत् तेषां वधेन अतीत्य गमयत। कर्माणिचेत् नोस्मानतिपर्षथ पारं समाप्तिं रक्षणैःगमयत। तत्रदृष्टान्तः— नौभिरपोन यथा नाविकः अपः उदकानि नौभिर्जनान् तीरं प्रति प्रापयति तद्वत् ॥ ३ ॥

अथ चतुर्थी—

वा॒मंनो॑अस्त्वर्यमन्वा॒मंव॑रुण॒शंस्य॑म् । वा॒मंह्या॑वृणी॒महे॑ ॥ ४ ॥

वा॒मम् । नः॒ । अ॒स्तु॒ । अ॒र्य॒म॒न् । वा॒मम् । व॒रु॒ण॒ ।
शंस्य॑म् । वा॒मम् । हि । आ॒ऽवृ॒णी॒महे॑ ॥ ४ ॥

हे अर्यमन्देव वामं वननीयं संभजनीयं धनं नोस्माकं अस्तु भवतु। हे वरुण शंस्यं शंसनीयं स्तुत्यं धामं धनमस्माकमस्तु। कुतः हिशब्दोहेतौ यस्मात्कारणात् वयं वामं धनं युष्मानावृणीमहे याचामहे इत्यर्थः तस्मान्नोस्त्वित्याशास्ते ॥ ४ ॥

अथ पंचमी—

वा॒मस्य॒हिप्रचे॑तस॒ईशा॑नासोरिशादसः । नेमा॑दित्याअ॒घस्य॒यत् ॥५॥३॥

वा॒मस्य॑ । हि । प्र॒ऽचे॒त॒सः॒ । ईशा॑नासः । रि॒शा॒द॒सः॒ ।
न । ई॒म् । आ॒दि॒त्याः॒ । अ॒घस्य॑ । यत् ॥ ५ ॥ ३ ॥

हे प्रचेतसः प्रकृष्टज्ञानाः शोभनस्तुतयोवा हे रिशादसः रिशतां हिंसतां शत्रूणामसितारः क्षेप्तारोदेवाः यूयं वामस्य वननीयस्य धनस्य ईशानासः ईशानाः हिरवधारणे ईशानाएव स्वामिनएव भवथ तस्माद्युष्मान्याचामहे इत्यर्थः। ईशानाः ईशऐश्वर्ये अनुदात्तेत् तास्यनुदात्तेदिति स्वरेणाद्युदात्तता भवति न संबुद्धिः। अतो हे आदित्याः अदितेःपुत्रादेवाः ईमेनं याचमानं मां तद्धनं प्राप्नोतु यद्धनमघस्य पापस्य संबन्धि विद्यते ॥ ५ ॥

॥ इति षष्ठस्य षष्ठे तृतीयोवर्गः ॥ ३ ॥

अथ षष्ठी—

व॒यमिद्वः॑सुदानवःक्षि॒यन्तो॒यान्तो॒अध्व॒न्ना । देवा॑वृ॒धाय॑हूमहे ॥६॥

व॒यम् । इत् । वः॒ । सु॒ऽदा॒न॒वः॒ । क्षि॒यन्तः॑ । यान्तः॑ ।
अध्व॑न् । आ । देवाः॑ । वृ॒धाय॑ । हू॒म॒हे॒ ॥ ६ ॥

हे सुदानवः शोभनदानाः हे देवाः क्षियन्तो गृहेष्वग्निहोत्रार्थं निवसन्तः अध्वन् सुपो-लुक् अध्वनि समिदाहरणार्थं यान्तो गच्छन्तोपि वयं वद्व युष्मानेव वृधाय हविर्भिर्वर्धना-य हूमहे आह्वयामः। यद्वा वयं गृहेषु गृहान्निर्गमनकाले मार्गेषु च वृधाय अस्माकं धनादि-भिर्वर्धनायाह्वयामः ॥ ६ ॥

अथ सप्तमी–

अधिनइन्द्रैषांविष्णोसजात्यानाम्। इतामरुतोअश्विना ॥ ७ ॥

अधि। नः। इन्द्र। एषाम्। विष्णो इति। सऽजात्यानाम्।
इत। मरुतः। अश्विना ॥ ७ ॥

हे इन्द्र विष्णो मरुतः हे अश्विना अश्विनौ हे इन्द्रादयोदेवाः सजात्यानां समानायां जातौ भवाः सजात्याः भ्रातृमित्रादयः तेषामेषां मध्ये नोस्मान् अधीत यूयं स्तुत्यतया अ-धिगच्छत ॥ ७ ॥

अथाष्टमी–

प्रभ्रातृत्वंसुदानवोधद्विताससमान्या। मातुर्गर्भेभरामहे ॥ ८ ॥

प्र। भ्रातृऽत्वम्। सुऽदानवः। अध। द्विता। समान्या।
मातुः। गर्भे। भरामहे ॥ ८ ॥

हे सुदानवः शोभनदाना आदित्याः अधाथ अस्मत्सयागमनानन्तरं वयं समान्या स-मान्येन सुपोड्यादेशः। पूर्वं सर्वेषां देवानां सांहत्येन सतोद्विता द्विधा द्विप्रकारेण च मातुरदिते-र्गर्भे संजातं यद्युष्माकं भ्रातृत्वं विद्यते तदिदानीं वयं प्रभरामहे प्रभरणमुच्चारणं प्रकाशनंवा उच्चारयामः प्रकाशयामोवा। सर्वेषां देवानां द्वंद्वशोजननं तैत्तिरीयके स्पष्टमभिहितं–अदितिः पुत्रकामा साध्येभ्योदेवेभ्यो ब्रह्मौदनमपचदित्युपक्रम्य तस्यैपूपाचार्यमाचाजायेतामित्यादिना॥८॥

अथ नवमी–

यूयंहिष्ठासुदानवइन्द्रज्येष्ठाअभिद्यवः। अधाचिद्वउतब्रुवे ॥९॥४॥

१ तै० सं० ६. ५. ६.।

यूयम् । हि । स्थ । सुऽदानवः । इन्द्रंऽज्येष्ठाः । अभिऽद्यवः ।
अर्ध । चित् । वः । उत । ब्रुवे ॥ ९ ॥ ४ ॥

पूर्वोर्धर्चःसिद्धः हे सुदानवः शोभनदानादेवाः इन्द्रज्येष्ठाः इन्द्रोज्येष्ठोमुख्योयेषां ते तथोक्ताः सर्वेदेवाः इन्द्रनेतृकाइत्यर्थः । तादृशाः अभिद्यवः अभिगतदीप्तयो यूयं स्थ अस्मद्यज्ञे भवथखलु । हिः प्रसिद्धौ । अधचित् अथानन्तरमेव वोयुष्मानहं ब्रुवे स्तौमि । उतापिच पुनःपुनः स्तौमीत्यर्थः ॥ ९ ॥

॥ इति पष्ठस्य षष्ठे चतुर्थोवर्गः ॥ ४ ॥

प्रेष्ठंवइति नवर्चं चतुर्थं सूक्तं कवेःपुत्रस्योशनसआर्षं गायत्रमाग्नेयं—तथानुक्रम्यते—प्रेष्ठमुशनाकाव्यआग्नेयमिति । प्रातरनुवाके आग्नेयेक्रतौ गायत्रेछन्दसि आश्विनशस्त्रे चेदंसूक्तं । सूत्रितंच—युक्ष्वाहि प्रेष्ठंवइति । आभिप्लविकेषूक्थ्येषु मैत्रावरुणे प्रेष्ठंवइतितृचो वैकल्पिकः स्तोत्रियः । सूत्रितंच—प्रेष्ठंवोअतिथिं श्रेष्ठंयविष्ठभारतेति ।

तत्र प्रथमा—

प्रेष्ठंवोअतिथिंस्तुषेमित्रमिवप्रियम् । अग्निंरथंनवेद्यम् ॥ १ ॥

प्रेष्ठम् । वः । अतिथिम् । स्तुषे । मित्रम्ऽइंव । प्रियम् ।
अग्निम् । रथम् । न । वेद्यम् ॥ १ ॥

हे यजमानाः प्रेष्ठं युष्माकं धनदानेन प्रियतमं अतिथिं युष्माभिरतिथिवत् पूज्यं यद्वा अत सातत्यगमने ऋतन्यञ्जीत्यादिना अतेरिथिन् सततं देवानां हविःप्रदातुं गच्छन्तं मित्रमिव सखायमिव प्रियं स्तोतुः प्रीणनकरं रथंन रथमिव वेद्यं वेदोधनं धनहितं लाभहेतुं यथा रथी रथेन धनं लभते तद्वत् स्तोतारोनेनधनं लभन्ते तादृशं धनलाभकारणमग्निं वोयुष्मत्कर्मसिध्यर्थं स्तुषे काव्यउशना स्तौति ॥ १ ॥

अथद्वितीया—

कविमिंवप्रचेतसंयंदेवासोअधंद्विता । निमर्त्येष्वादधुः ॥ २ ॥

कविम्ऽईव । प्रऽचैतसम् । यम् । देवासः । अध ।
द्विता । नि । मर्त्येषु । आऽदधुः ॥ २ ॥

अथापिच देवासोदेवाः इन्द्रादयः यमग्निं मर्त्येषु मनुष्येषु द्विता द्विधान्यादधुः गार्हपत्याहवनीयात्मकत्वेन द्विधा निहितवन्तः। तत्रदृष्टान्तः–कविमिव प्रचेतसं मरुद्विज्ञानं कविं क्रान्तकर्माणं पुरुषं यथा द्विधा कार्यद्वयेऽन्यो नियोजयति तद्वत्। यद्वा दिवि पृथिव्यां च निहितवन्तः भूमौतु हविराहरणार्थं। दिवितु हविः प्रदानार्थं इति द्वैधं विधानं कृतवन्तइत्यर्थः ॥ २ ॥

अथ तृतीया–

त्वंयविष्ठदाशुषोनॄँःपाहिशृणुधीगिरः। रक्षातोकमुतत्मना॥३॥

त्वम्। यविष्ठ। दाशुषः। नॄन्। पाहि। शृणुधि।
गिरः। रक्ष। तोकम्। उत। त्मना ॥ ३ ॥

हे यविष्ठ युवतम यद्वा यौवैस्तुजन्तस्य इष्टनिरूपं देवानां हविषां मिश्रयितृतमाग्ने त्वं दाशुषो हविर्दत्तवतो नॄन् कर्मणां नेतॄन् यजमानान् पाहि धनादिदानेन रक्ष। नॄँःपाहीत्यत्र संहितायां नॄन्पेइति नकारस्य रुत्वं अत्रानुनासिकइति पूर्वस्यानुनासिकः। किंच गिरः त्वद्विषयाः स्तुतीः शृणुधि अवहितः सन् शृणु। श्रु श्रवणे श्रु शृणु पृ इत्यादिना हेर्ध्यादेशः। उतापिच त्मना आत्मनैव स्वयमेव तोकमस्मदीयं तनयं पुत्रं रक्ष पालय। त्मनेति सर्वत्र संबध्यते आत्मना स्वयमेव रक्ष। त्वदन्यं पालयितारं नविद्मः। त्वमेवास्मदीयं स्तोत्रं शृणु ॥ ३ ॥

अथ चतुर्थी–

कयातेअग्नेअङ्गिरऊर्जोनपादुपस्तुतिम्। वरायदेवमन्यवे॥ ४ ॥

कया। ते। अग्ने। अङ्गिरः। ऊर्जः। नपात्। उपऽस्तुतिम्।
वराय। देव। मन्यवे ॥ ४ ॥

हे अंगिरः अंगिरसां वरिष्ठ यद्वा अंगति सर्वत्र गच्छतीत्यंगिराः तादृश हे ऊर्जोनपात् नपादित्यपत्यनाम अन्नस्यपुत्र हविर्भिर्वर्धमानत्वात्। यद्वा नपादिति नप्ता हविर्लक्षणस्यान्नस्य नप्तः–अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायतेवृष्टिरिति। वृष्टेरोषधयः ओषधीभ्यः अग्निरिति अन्नस्यनप्तः हे देव द्योतमानाग्ने वराय सर्वैर्वरणीयाय मन्यवे शत्रूनभिमन्यमानाय ते तुभ्यं कया कीदृश्या वाचा उपस्तुतिमुपस्तोत्रमहंअरेयं त्वं महान् खलु अहमल्पः तदर्थं स्तुतिं कुर्यामिति ऋषिरग्निं प्रतिवदति ॥ ४ ॥

अथ पंचमी–

दाशेमकस्यमनसायज्ञस्यसहसोयहो । कदुवोचइदंनमः॥५॥५॥

दाशेम । कस्य । मनसा । यज्ञस्य । सहसः । यहो इति ।
कत् । ॐ इति । वोचे । इदम् । नमः ॥ ५ ॥ ५ ॥

ऋषिरग्निमभिब्रूते हे सहसोयहो यहुरित्यपत्यनाम बलेन निष्पाद्यमानत्वात् बलस्यपुत्र हे अग्ने कस्य कीदृशस्य यज्ञस्य यज्ञवतो यजनीयदेवयतो यजमानस्य मनसा युक्ताः सन्तो हवींषि तुभ्यं वयं दाशेम प्रयच्छेम पूजायां बहुवचनं । किंच तुभ्यं इदंनमो हविर्नमस्कारंवा कत् कदावा वोचे अहं वदामि । उइति प्रश्ने । ऋषिः कदा यक्ष्यामि कदा स्तोष्यामीत्यग्निंपृच्छति । वोचे वच्यादेशस्य लुङ्यात्मनेपदे उत्तमैकवचने रूपम् ॥५॥

॥ इति पञ्चस्य षष्ठे पञ्चमोवर्गः ॥ ५ ॥

अथ षष्ठी–

अधात्वंहिनस्करोविश्वांअस्मभ्यंसुक्षितीः । वाजद्रविणसोगिरः॥६॥

अध । त्वम् । हि । नः । करः । विश्वाः । अस्मभ्यम् ।
सुऽक्षितीः । वाजऽद्रविणसः । गिरः ॥ ६ ॥

हे अग्ने अधानन्तरं त्वं हिरवधारणे त्वमेवास्मभ्यं करः कुरु देहीत्यर्थः करोतेर्लेटयडागमः। किमित्यपेक्षायामाह–नोस्मदीयागिरस्त्वद्विषया विश्वाः सर्वाः स्तुतीरेवं कुरु यथा सुक्षितीः क्षियन्ति निवसन्तीत्यस्मिंक्षितयोगृहाः शोभननिवासाः यद्वा क्षितयोमनुष्याः कल्याणपुत्रपौत्रादियुक्ताः तथा वाजद्रविणसः अन्नयुक्तधनवतीः अथवा वाजोदीप्तिः सर्वतोदीप्तधनाश्च कुरु त्वमस्माभिः स्तुतः सन् गृहपुत्रान्नधनादीनि देहीत्यर्थः ॥ ६ ॥

अथ सप्तमी–

कस्यनूनंपरीणसोधियोजिन्वसिदंपते । गोषातायस्यतेगिरः ॥७॥

कस्य । नूनम् । परीणसः । धियः । जिन्वसि । दम्ऽपते ।
गोऽसाता । यस्य । ते । गिरः ॥ ७ ॥

हे दंपते गृहपते यदा गार्हपत्ये वर्तसे तदा जायापतिस्वरूपोसि तस्माद्दंपतिशब्देनाग्निरभिधीयते । तथाविध हे अग्ने नूनमिदानीं कस्य कीदृशस्य जनस्य परीणसः बहूनि धियः कर्माणि जिन्वसि प्रीणयसि । यस्य ते तव संबन्धिन्योगिरः स्तुतयः गोसाता गोसातौ गवां लाभे भवन्ति खलु । तस्मात्त्वं कुत्र तिष्ठसि । अस्माकमिदानीं गवेच्छा प्रवर्तते । यद्वा हे अग्ने त्वमिदानीं कस्य कर्माणि प्रीणयसि नकस्यापीत्यर्थः । अस्माकमेव कर्माणि प्रीणयेतिभावः ॥७॥

अग्निमन्थने तंमर्जयन्तसुक्रतुमित्येषा । सूत्रितंच—तंमर्जयन्तसुक्रतुं यज्ञेनयज्ञमयजन्तदेवाइति ।

सैषा सूक्तेष्टमी—

तंमर्जयन्तसुक्रतुंपुरोयावानमाजिषु । स्वेषुक्षयेषुवाजिनम् ॥ ८ ॥

तम् । मर्जयन्त । सुऽक्रतुम् । पुरःऽयावानम् । आजिषु । स्वेषु । क्षयेषु । वाजिनम् ॥ ८ ॥

सुक्रतुं शोभनप्रज्ञं सुकर्माणं वा आजिषु संग्रामेषु पुरोयावानं शत्रुहननार्थं पुरतएवगन्तारं वाजिनं बलवन्तं तं तादृशमग्निं यजमानाः स्वेषु आत्मीयेषु क्षयेषु गृहेषु मर्जयन्त निर्मथितमग्निमलंकुर्वन्ति परिचरन्तीति यावत् ॥ ८ ॥

अथ नवमी—

क्षेतिक्षेमेभिःसाधुभिर्नकिर्यंघ्नन्तिहन्तियः । अग्नेसुवीरएधते ॥ ९ ॥ ६ ॥

क्षेति । क्षेमेभिः । साधुऽभिः । नकिः । यम् । घ्नन्ति । हन्ति । यः । अग्ने । सुऽवीरः । एधते ॥ ९ ॥ ६ ॥

हे अग्ने योमनुष्यः साधुभिः साधयद्भिः क्षेमेभिः पालनैः सह क्षेति स्वगृहे निवसति । तथा यं जनं नकिः नकेचन घ्नन्ति न हिंसन्ति । यएवं हन्ति शत्रून् स्वयमेव हन्ति समनुष्यस्तव स्तोता खलु अन्यथा तस्यैवाघटते । ततः सः स्तोता सुवीरः शोभनपुत्रादियुक्तःसन् एधते आत्मीयगृहेषु धनादिभिर्वर्धते ॥ ९ ॥

॥ इति षष्ठस्य षष्ठे षष्ठोवर्गः ॥ ६ ॥

आमेहवमिति नवर्चं पंचमं सूक्तं कृष्णोनामांगिरसऋषिः गायत्रीछन्दः एतदादीनि त्रीणिसूक्तानि अश्विदेवत्यानि। तथाचानुक्रान्तं—आमेकृष्णआश्विनंहीति। प्रातरनुवाकाश्विने क्रतौ गायत्रेछंदस्याश्विनशस्त्रे चेदंसूक्तं। सूत्रितंच—उदीराथामामेहवमिति।

तत्र प्रथमा—

आमेहवंनासत्याश्विनागच्छतंयुवम्। मध्वःसोमस्यपीतये॥ १॥

आ। मे। हवम्। नासत्या। अश्विना। गच्छतम्। युवम्।
मध्वः। सोमस्य। पीतये॥ १॥

हे नासत्या असत्यमनयोर्नास्तीति नासत्यौ तादृशौ हे अश्विना अश्विनौ युवं युवां मे मदीयं हवमाह्वानं श्रुत्वा यद्वा हवं हूयतेऽनेनेति हवोयज्ञः केवलस्याधिकरणे अप्छान्दसः मदीयं यज्ञं प्रति मध्वः मदकरस्य सोमस्य पीतये पानाय तदर्थमागच्छतम्॥ १॥

अथ द्वितीया—

इमंमेस्तोममश्विनेमंमेशृणुतंहवम्। मध्वःसोमस्यपीतये॥ २॥

इमम्। मे। स्तोमम्। अश्विना। इमम्। मे। शृणुतम्।
हवम्। मध्वः। सोमस्य। पीतये॥ २॥

हे अश्विना अश्विनौ मे मदीयं इमं स्तोमं स्तोत्रं किंच मे मदीयं इममिदमागमनविषयं हवमाह्वानंच शृणुतम्॥ २॥

अथ तृतीया—

अयंवांकृष्णोअश्विनाहवतेवाजिनीवसू। मध्वःसोमस्यपीतये॥ ३॥

अयम्। वाम्। कृष्णः। अश्विना। हवते। वाजिनीवसू
इति वाजिनीऽवसू। मध्वः। सोमस्य। पीतये॥ ३॥

हे वाजिनीवसू अन्नयुक्तधनौ अत्र इनिरनुवादार्थः। यद्वा वाजः यजनं क्रिया तद्वती वाजिनी तद्युक्तधनवन्तौ हे अश्विना अश्विनौ अयं कृष्णोनाम मंत्रद्रष्टाऋषिः वां युवां हवते स्तुतिभिराह्वयति। किमर्थं मध्वः सोमस्य पीतयइति॥३॥

अथ चतुर्थी–

शृणुतंजरितुर्हवंकृष्णस्यस्तुवतोनरा । मध्वःसोमस्यपीतये ॥ ४ ॥

शृणुतम् । जरितुः । हवम् । कृष्णस्य । स्तुवतः ।
नरा । मध्वः । सोमस्य । पीतये ॥ ४ ॥

हे नरा नरौ सर्वस्य नेतारावश्विनौ जरितुः तच्छीलार्थेतृन् व्यत्ययेनान्तोदात्तत्वं । जरितुः स्तवनशीलस्य संप्रति स्तुवतः स्तोत्रं कुर्वतः कृष्णस्य एतन्नामकस्य ऋषेः संबन्धि हवं युष्मद्विषयाह्वानं शृणुतं । यद्वा जरितुः अन्यदेवानां स्तोतुः स्तुवतइदानीं युवयोः स्तोत्रकारिणस्तस्य हवं शृणुतं । शिष्टं गतम् ॥ ४ ॥

अथ पञ्चमी–

छर्दिर्यन्तमदाभ्यंविप्रायस्तुवतेनरा । मध्वःसोमस्यपीतये॥५॥७॥

छर्दिः । यन्तम् । अदाभ्यम् । विप्राय । स्तुवते । नरा ।
मध्वः । सोमस्य । पीतये ॥ ५ ॥ ७ ॥

हे नरा नेतारावश्विनौ विप्राय मेधाविने अतएव स्तुवते स्तोत्रं कुर्वते कृष्णाय ऋषये अदाभ्यं दम्भेथेति व्यत्ययः परैरहिंस्यं छर्दिर्गृहं यन्तं प्रयच्छतं । किमर्थं सोमपानाय स्तोत्रे गृहे दीयमाने सति तदासोमं युवाभ्यां प्रयच्छति ॥ ५ ॥

॥ इति पञ्चस्य षष्ठे सप्तमोवर्गः ॥ ७ ॥

अथ षष्ठी–

गच्छतंदाशुषोगृहमित्थास्तुवतोअश्विना । मध्वःसोमस्यपीतये॥६॥

गच्छतम् । दाशुषः । गृहम् । इत्था । स्तुवतः । अश्विना ।
मध्वः । सोमस्य । पीतये ॥ ६ ॥

हे अश्विना अश्विनौ इत्था इत्थमनेन प्रकारेण स्तुवतः युवयोः स्तोत्रं कुर्वतो दाशुषो हवींषि दत्तवतः यजमानस्य गृहंप्रति गच्छतं युवामागच्छतं । किमर्थं मध्वः सोमस्य पीतयइति ॥ ६ ॥

अथ सप्तमी—

युञ्जाथांरासंभंरथेंवीड्वंङ्गेवृषण्वसू । मध्वःसोमंस्यपीतयें ॥ ७ ॥

युञ्जाथाम् । रासंभम् । रथें । वीळुऽअंङ्गे । वृषण्वसू
इति वृषण्ऽवसू । मध्वः । सोमंस्य । पीतयें ॥ ७ ॥

हे वृषण्वसू वर्षणशीलधनवन्तौ अश्विनौ युवां वीड्वंगेवीळुदृढैः दृढांगोपेते स्वरथे रासभं शब्दायमानं एतन्नामकमश्वं युंजाथां संयोजयतां । किमर्थं मध्वः सोमस्य पीतयइति । रासभावश्विनोरिति रासभावेवाश्विनो रथस्यवाहनौ ॥ ७ ॥

अथाष्टमी—

त्रिवन्धुरेणत्रिवृतारथेनायांतमश्विना । मध्वःसोमंस्यपीतयें ॥ ८ ॥

त्रिऽवन्धुरेणं । त्रिऽवृतां । रथेंन । आ । यातम् । अश्विना ।
मध्वः । सोमंस्य । पीतयें ॥ ८ ॥

हे अश्विना अश्विनौ त्रिवन्धुरेण त्रिफलका संघट्टितेन त्रिवृता त्रिकोणेन यद्वा त्रिवृता त्रीणि कवचादिभिरावरणानि यस्य सतथोक्तः तेन रथेन अस्मयज्ञं प्रत्यायातं युवामागच्छतं च । शिष्टं गतम् ॥ ८ ॥

अथ नवमी—

नूमेगिरोनासत्याश्विनाप्रावंतंयुवम् । मध्वःसोमंस्यपीतयें ॥ ९ ॥ ८ ॥

नु । मे । गिरः । नासत्या । अश्विना । प्र । अवतम् । युवम् ।
मध्वः । सोमंस्य । पीतयें ॥ ९ ॥ ८ ॥

हे नासत्या असत्यरहितौ हे अश्विना अश्विनौ मे मदीयागिरः स्तुतिलक्षणावाचः प्रति युवं युवां नु क्षिप्रं प्रावतं प्रकर्षेण गच्छतं । यद्वा मे गिरः प्रावतं आत्मीयतया प्ररक्षतं । किमर्थं मध्वो मदकरस्य सोमस्य पीतये पानाय तदर्थं सर्वेदेवाः स्तुतिभिराहूताः सन्तोयज्ञं प्रत्यागच्छन्ति स्तुतिभिर्विना नागच्छन्तीति गच्छतं रक्षतंचेति युक्तं भवति ॥ ९ ॥

॥ इति प्रथमस्य षष्ठेऽष्टमोवर्गः ॥ ८ ॥

उभाहिदस्रेति पंचर्चं षष्ठं सूक्तं विश्वकोनाम कृष्णस्यपुत्रः कृष्णएववा ऋषिः जगती-छन्दः । अश्विनौ देवता । तथानुक्रम्यते—उभाहिपंच विश्वकोवा कार्ष्णिजोगतमिति । वि-नियोगोलिंगादवगन्तव्यः ।

तत्र प्रथमा—

उभाहिदुस्राभिषजामयोभुवोभादक्षस्यवचसोबभूवथुः ।
तावांविश्वकोहवतेतनूकृथेमानोवियौष्टंसख्यामुमोचतम् ॥ १ ॥

उभा । हि । दुस्रा । भिषजा । मयःऽभुवा । उभा । दक्षस्य ।
वचसः । बभूवथुः । ता । वाम् । विश्वकः । हवते । तनूऽकृथे । मा ।
नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥ १ ॥

हे अश्विनौ दस्रा दर्शनीयौ यद्वा दसु उपक्षये सर्वेषां शत्रूणामुपक्षपयितारौ भिषजा देवानां वैद्यौ यद्वा भीतीनां त्रासयितारौ यद्वा नराः अश्विनौ स्तुवन्ति तदा तौ तेषां भीतिंसमनयतइत्यर्थः पृषोदरादित्वाद्रूपसिद्धिः । तादृशौ अतएव मयोभुवा मयसः सुखस्य भावयितारौ उभा परस्परं द्वित्वसंख्यापूरकौ उभा उभौ द्वौ युवां दक्षस्य एतन्नामकस्य प्रजापतेःवचसः स्तुतेः संबन्धिनौ बभूवथुः । हि प्रसिद्धौ । पुरा युवां दक्षेणास्ताविषाथां खलु विद्वाद्यौ खलु ता तौ तादृशौ प्रसिद्धौ वां युवां विश्वकः एतन्नामकऋषिः तनूकृथे तनोति कुलमिति तनूः पुत्रः तस्य विष्णाप्वो निमित्तं हवते स्तुतिभिराह्वयति । तस्मात् नोस्माकं सख्या सख्यानि युष्मद्युष्मद्व्यतया जातानि सखित्वानि माबियौष्टं माप्पृथक्कुरुतं । यौतेर्लुङि सिचिरूपं । किंच युवां मुमोचतं अस्मानागन्तुं रथे स्थित्वा अश्वप्रग्रहान्मुंचतं । मुंचतेर्लोटि बहुलंछन्दसीति शपः श्लुः अडागमः । अत्रविष्णापूनामानं पुत्रमुद्दिश्य तस्य पिता विश्वको युवामाह्वयतीत्यात्मानमाह । यद्वा विश्वकस्य पिता कृष्णोनामऋषिः ममपुत्रो विश्वकः पुत्रार्थं युवां अधि ह्वयतीति वदति ॥१॥

अथ द्वितीया—

कथानूनंवांविमनाउपस्तवद्युवंधियंददथुर्वस्यइष्टये ।
तावांविश्वकोहवतेतनूकृथेमानोवियौष्टंसख्यामुमोचतम् ॥ २ ॥

कथा । नूनम् । वाम् । विऽमनाः । उप । स्तवत् । युवम् । धियम् ।
ददथुः । वस्यःऽइष्टये । ता । वाम् । विश्वकः । हवते । तनूऽकृथे ।
मा । नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥ २ ॥

हे अश्विनौ विमनाः एतन्नामकऋषिः नूनं पुरा कथा कथं वां युवामुपस्तवत् कथमुपस्तौत् । तेन स्तुतौ युवं युवां वस्यइष्टये वस्योवसीयः प्रशस्तं धनं तस्याभिलषितस्य इष्टये अभिगमनाय यद्वावशिष्टधनस्यइष्टये प्राप्तये धियं बुद्धिं विमनसे ददथुः अदधाथां खलु । वस्यइति वसुमच्छब्दादीयसुनि विन्मतोर्लुगिति लुक् ईयसुन ईकारलोपश्छान्दसः । तादृशौ युवां विश्वकोहवतइति गतम् ॥ २ ॥

अथ तृतीया—

युवंहिष्मापुरुभुजेममेधतुंविष्णाप्वेददथुर्वस्यइष्टये ।
तावांविश्वकोहवतेतनूकृथेमानोवियौष्टंसख्यामुमोचतम् ॥ ३ ॥

युवम् । हि । स्म । पुरुऽभुजा । इमम् । एधतुम् । विष्णाप्वे । ददथुः ।
वस्यःऽइष्टये । ता । वाम् । विश्वकः । हवते । तनूऽकृथे । मा ।
नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥ ३ ॥

हे पुरुभुजा पुरुभुजौ पुरूणां बहूनां धनादिदानेन भोजयितारौ यद्वा बहूनां स्तोतॄणां पालयितारौ अश्विनौ युवं हिष्मेत्यवधारणे युवामेव इममेधतुं एधतेरेधिवहोश्चतुरिति चतुप्रत्ययः चित्त्वादन्तोदात्तः । इमां धनादिवृद्धिं विष्णाप्वे विष्णोः सर्वेषां देवानां मुख्यत्वात्तद्ग्रहणे सर्वेदेवा गृहीताभवन्ति विष्णादीन् कर्मणा व्याप्नोतीति विष्णापूः पृषोदरादिः । यद्वा विष्णुं सर्वग्रहेषु व्याप्तं सोमं दशापवित्रेण आपुनातीति तस्य चतुर्थी विष्णाप्वइति । एतन्नामकेममपुत्रे पौत्रे वा पुत्राय पौत्राय वा इमां धनादिवृद्धिं ददथुः अदत्तं । किमर्थं वस्यइष्टये वसीयसः प्रशस्तधनस्य इष्टये इच्छां पूरयितुं । क्रियार्थोपपदस्येति चतुर्थी । तावामिति पूर्ववद्व्याख्येयम् ॥ ३ ॥

अथ चतुर्थी—

उतत्यंवीरंधनसामृजीषिणंदूरेचित्सन्तमवसेहवामहे ।
यस्यस्वादिष्ठासुमतिःपितुर्यथामानोवियौष्टंसख्यामुमोचतम् ॥ ४ ॥

उत । त्यम् । वीरम् । धनऽसाम् । ऋजीषिणम् । दूरे । चित् । सन्तम् ।
अवसे । हवामहे । यस्य । स्वादिष्ठा । सुऽमतिः । पितुः । यथा ।
मा । नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥ ४ ॥

हे अश्विनौ उतापिच वीरं कर्मणि समर्थं धनसां धनानां संभक्तारं ऋजीषिणं ऋजीषो-पार्जितसोमिपुत्रः सोमरवद्वन्तं दूरेचित् दूरेएवसन्तं भवन्तं विनष्टमिव त्यं तं विष्णाप्वं अवसेरमाकं रक्षणाय हवामहे आह्वयामः। पुत्रोहि पितरं रक्षते। किंच यस्य पुत्रस्य पौत्रस्य वा सुमतिः शोभना स्तुतिः स्वादिष्ठा स्वादुतमा अतिशयेन देवानां स्वादुकारिणीत्यर्थः। तत्रदृष्टान्तः— पितुर्यथा पितुर्विश्वकस्य स्तुतिर्यथा देवानां प्रीतिकरी तद्वत् तस्मात्तमाह्वयामइतिशेषः। मानोइति गतार्थः ॥ ४ ॥

अथ पंचमी—

ऋतेनदेवःसविताशमायतऋतस्यशृङ्गमुर्वियाविपप्रथे।
ऋतंसासाहमहिचित्पृतन्यतोमानोवियौष्टंसख्यामुमोचतम् ॥ ५॥९॥

ऋतेन । देवः । सविता । शम्ऽआयते । ऋतस्य । शृङ्गम् ।
उर्विया । वि । पप्रथे । ऋतम् । ससाह । महि । चित् । पृतन्यतः ।
मा । नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥ ५ ॥ ९ ॥

ऋषिः सत्यप्रशंसां करोति। हे अश्विनौ देवोद्योतमानः सविता सर्वस्य स्वस्वकर्मणि प्रेरक एतन्नामकोदेवः ऋतेन सत्येन शमायते सायंकाले स्वकिरणसमूहं शमयति। ततोनन्तरं सएव सविता ऋतस्य सत्यस्य शृंगमग्रं उर्विया उरुविस्तीर्णं यथाभवति तथा प्रातःकाले विपप्रथे विशेषेण प्रथयति सर्वतो विस्तारयति। किंच पृतन्यतः पृतनामिच्छतः संयुयुत्सोः शत्रोर्महिचित् महदपि बलं ऋतं सत्यं ससाह स्वयमेवाभिभवति। इत्थमेवं मत्सत्तमभूत् तस्माद्युवामपि तेन ऋतेन नोस्माकं सख्यानि माविर्यौष्टं अत्रागन्तुमस्वरश्मीन्मुंचतमिति ॥ ५ ॥

॥ इति षष्ठस्य षष्ठे नवमोवर्गः ॥ ९ ॥

युत्रीवामिति षळृचं सप्तमं सूक्तं। तथाचानुक्रम्यते—युत्रीषड्वासिष्ठोवा घृम्नीकः प्रियमेधोवा प्रागाथं हेति। वसिष्ठपुत्रो घृम्नीकऋषिः आंगिरसः प्रियमेधोवा। उभयत्र वाशब्दायदोभा-

वपि नस्यातां तदा मकृतआंगिरसः कृष्णएवऋषिः । अयुजोबृहत्यो युजःसतोबृहत्यः । अश्विनौ देवता । प्रातरनुवाके आश्विने क्रतौ बार्हतेछन्दसि आश्विनशस्त्रे चेदंसूक्तं । सूत्रितंच—द्युम्नीवांयत्स्थइति बार्हतइति ।

तत्र प्रथमा—

द्युम्नीवांस्तोमोअश्विनाक्रिविर्नसेकआगतम् ।
मध्वःसुतस्यसदिविप्रियोनरापातंगौराविवेरिणे ॥ १ ॥

द्युम्नी । वाम् । स्तोमः । अश्विना । क्रिविः । न । सेके ।
आ । गतम् । मध्वः । सुतस्य । सः । दिवि । प्रियः ।
नरा । पातम् । गौरौइइव । इरिणे ॥ १ ॥

हे अश्विना अश्विनौ अयमनुक्षीणस्तोत्रो द्युम्नीक एतन्नामकऋषिः वां युवयोः स्तोमः स्तोताभवति युष्मत्स्तुतौ कृतायां स्तोत्राणि नाल्पीभवन्ति किंतु पुनर्वर्धन्तइत्यर्थः । तत्रदृष्टान्तः—क्रिविर्न क्रिविरिति कूपनाम कूपोयथा सेके उदकसेचने वृष्टौ भवन्त्यां नाल्पोदकोभवति तद्वत् । यद्वा वां युवयोः स्तोमः युष्मद्विषयास्तुतिः द्युम्नी अन्नवतीखलु स्तोत्रे कृते तस्माअन्नादिकं प्रयच्छत इत्यर्थः । तस्माद्युवामस्मदीयं यज्ञं प्रत्यागतं स्तोत्राणि श्रोतुमागच्छतं । हे नरा नरौ नेतारौ अश्विनौ सोयं स्तोता दिवि द्योतमानेस्मिन्यज्ञे सुतस्याभिषुतस्य मध्वो मदकरस्य सोमस्य प्रियः स्तोत्रकारित्वेन प्रियतमोभवति । ततस्तेन सुतं सोमं पातं युवां शीघ्रमागत्य पिबतं । तत्रदृष्टान्तः—गौराविव यथा तृषितौ गौरौ एतन्नामकौ मृगौ इरिणे तटाकादिषु उदकपानार्थं शीघ्रमागच्छतस्तद्वत् ॥ १ ॥

अथ द्वितीया—

पिबतंघर्मंमधुमन्तमश्विनाबर्हिःसीदतंनरा ।
तामन्दसानामनुषोदुरोणआनिपातंवेदसावयः ॥ २ ॥

पिबतम् । घर्मम् । मधुऽमन्तम् । अश्विना । आ । बर्हिः ।
सीदतम् । नरा । ता । मन्दसाना । मनुषः ।
दुरोणे । आ । नि । पातम् । वेदसा । वयः ॥ २ ॥

हे अश्विना अश्विनौ मधुमन्तं मदवन्तं मदकारिणमित्यर्थः तादृशं रसवन्तं वा घर्मं वृक्षरणदीप्त्योः पात्रेषु क्षरन्तं सोमं पिबतं । यद्वा मधुमंतं मधुर्मदकरः सोमः तद्वन्तं घर्मं महावीरपात्रगतं क्षीरं पिबतं सोमं चेति ननु साहचर्येण तदसंभवात्। हे नरा नरौ नेतारौ सर्वस्य हे अश्विनौ बर्हिः बर्हिषि यज्ञे आसीदतमुपविशतं । यद्वा पूर्वं द्वितीयं पादं व्याख्याय प्रथमपादो व्याख्येयः । उपसदनानन्तरं सोमपानं युक्तमिति । किंच मनुषो मनुष्यस्य दुरोणे गृहभूतेस्मिन् देवयजने मंदसाना सोमपानेन मोदमानौ ता तौ पूर्वोक्तलक्षणौ युवां वेदसा पुरोडाशादिलक्षणेन हविषा सह वयः सोमरूपमन्नं आनिपातं आगत्य निपातं निपिबतं । यद्वा वेदसा धनेन सह वयोस्माकमायुर्निपातं नितरां रक्षतम् ॥ २ ॥

अथ तृतीया—

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥ ३ ॥

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः ।
अहूषत । ता । वर्तिः । यातम् । उप । वृक्तऽबर्हिषः ।
जुष्टम् । यज्ञम् । दिविष्टिषु ॥ ३ ॥

हे अश्विनौ प्रियमेधाः मेधोयज्ञः प्रियतमयज्ञा यजमानाः । यद्वा प्रियमेधा एतन्नामकऋषिः पूजायां बहुवचनं यद्वारः ऋषिर्वा विश्वाभिरूतिभिः सर्वैः पालनैः सह अथवा अवतिर्याञ्चाकर्मा सर्वैरभिलषितयाजनैः सहिता आहूषत आह्वासिषुः आह्वासीत् आत्मना पालनहेतुकत्वेन यद्वाभिलषितदानाय वां आह्वयन्ति । ता तौ युवां वृक्तबर्हिषः आस्तरणार्थं छिन्नबर्हिषो यष्टुः संबन्धि जुष्टं सर्वैर्देवैः सेवितं पर्याप्तं वा यज्ञं यजनीयं हविः प्रति दिविष्टिषु दिवसानामह्नामागमनेषु प्रातः कालेषु यज्ञेषु वा वर्तिः वर्तन्ते अत्रेति वर्तिर्गृहं तदुपायातं हविः स्वीकरणार्थं युवामागच्छतम् ॥ ३ ॥

अथ चतुर्थी—

पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥ ४ ॥

पिबतम् । सोमम् । मधुऽमन्तम् । अश्विना । आ । बर्हिः ।
सीदतम् । सुऽमत् । ता । वद्धानौ । उप । सुऽस्तुतिम् ।
दिवः । गन्तम् । गौरौऽइव । इरिणम् ॥ ४ ॥

हे अश्विनाश्विनौ मधुमन्तं रसवन्तं मदवन्तंवा सोमं युवां पिबतं ततोबर्हिः बर्हिषि यज्ञे सुमत् शोभनमासीदतं । पश्चात् वद्धानौ सोमपानेन वृद्धौ ता तौ युवां दिवः द्युलोकात् सुष्टुतिं अस्माभिः क्रियमाणां शोभनां स्तुतिं उपगन्तं उपगच्छतं । तत्रदृष्टान्तः—गौराविव यथा गौरमृगौ अन्यस्माद्देशादिरिणं तटाकादिकं प्रति जलपानार्थं आगच्छतस्तद्वत् ॥ ४ ॥

अथ पञ्चमी—

आनूनंयातमश्विनाश्वेभिःप्रुषितप्सुभिः ।
दस्राहिरण्यवर्तनीशुभस्पतीपातंसोममृतावृधा ॥ ५ ॥

आ । नूनम् । यातम् । अश्विना । अश्वेभिः । प्रुषितप्सुऽभिः ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । शुभः ।
पती इति । पातम् । सोमम् । ऋतऽवृधा ॥ ५ ॥

हे अश्विना अश्विनौ युवां प्रुषितप्सुभिः प्सुइति रूपनाम प्रुषप्लुष स्नेहनसेचनपूरणेषु । स्निग्धरूपैर्दीप्तरूपैरित्यर्थः । तादृशैः अश्वेभिः शीघ्रगामिभिरश्वैः सह नूनमिदानीमायातं अस्मदीयं यज्ञं प्रत्यागच्छतं । हे दस्रा दस्रौ दर्शनीयौ उपक्षयितारौ वा हे हिरण्यवर्तनी वर्तते अत्रेति वर्तनी रथः हिरण्मयरथौ हे शुभस्पती उदकस्य कल्याणस्यवा पालयितारौ हे ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ हे अश्विनौ युवां शीघ्रमागत्य सोमं पातं पिबतम् ॥ ५ ॥

अथ षष्ठी—

वयंहिवांहवामहेविपन्यवोविप्रासोवाजसातये ।
तावल्गूदस्रापुरुदंससाधियाश्विनाश्रुष्ट्यागतम् ॥ ६ ॥ १० ॥

वयम् । हि । वाम् । हवामहे । विपन्यवः । विप्रासः ।
वाजऽसातये । ता । वल्गू इति । दस्रा । पुरुऽदंससा । धिया ।
अश्विना । श्रुष्टी । आ । गतम् ॥ ६ ॥ १० ॥

हे अश्विनौ विपन्यवः स्तोतारः अतएव विप्रासो मेधाविनो वयं वाजसातये अन्नलाभाय वां हिरवधारणे युवामेव हवामहे स्तुतिभिराह्वयामः । ता तौ वल्गू वल्गनं कुशलगमनं कुशलगमनशीलौ दस्रा दर्शनीयौ पुरुदंससा बहुकर्माणौ तौ युवां धिया अस्मदीयया स्तुत्या आहूतौ सन्तौ श्रुष्टी श्रुष्टीति क्षिप्रनाम क्षिप्रमस्मभ्यं धनादिदानायागतमागच्छतम् ॥ ६ ॥

॥ इति षष्ठस्य षष्ठे दशमोवर्गः ॥ १० ॥

तंवोदस्ममिति पञ्चमष्टमंसूक्तं गौतमस्य नोधसआर्षं । तथाचानुक्रम्यते—तंवोदस्मं नोधाइति । प्रागाथं हेत्युक्तत्वादेतदादिसूक्तत्रयं प्रागाथं । इन्द्रोदेवता महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तं । तथाच पंचमारण्यके सूत्रितं—तंवोदस्ममृतीषहमानोविश्वासुहव्यइति । अग्निष्टोमे माध्यन्दिनसवने अच्छावाकशस्त्रे तंवोदस्ममिति प्रगाथःस्तोत्रियः । सूत्रितंच—तंवोदस्ममृतीषहं तरवापामिसुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपाविति । चातुर्विंशिकेहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिनो वैकल्पिकःस्तोत्रियोयमेवप्रगाथः विषुवत्यपिमाध्यन्दिनसवने ब्राह्मणाच्छंसिशस्त्रे तंवोदस्ममृतीषहमिति नोधसस्य योनिः शंसनीया तंवोदस्ममृतीषहमभिप्रवःसुराधसमिति।

तत्र प्रथमा—

तंवोदस्ममृतीषहंवसोर्मन्दानमन्धसः ।
अभिवत्संनस्वसरेषुधेनवइन्द्रंगीर्भिर्नवामहे ॥ १ ॥

तम् । वः । दस्मम् । ऋतिऽसहम् । वसोः । मन्दानम् । अन्धसः ।
अभि । वत्सम् । न । स्वसरेषु । धेनवः । इन्द्रम् । गीःऽभिः । नवामहे ॥१॥

नोधाइन्द्रं स्तौति हे ऋत्विग्यजमानाः दस्मं दर्शनीयं ऋतीषहं ऋतयोबाधकाः शत्रवः तेषामभिभवितारं पुनः कीदृशं वसोर्वासयितुर्दुःखस्य निवासयितुः यद्वा वसोः पात्रेनिवसतः तादृशस्य अंधसः सोमलक्षणस्यान्नस्य पानेन मंदानं मोदमानं वः यष्टृयष्टव्यत्वेन युष्मत्संबन्धिनं तं तादृशमिन्द्रं गीर्भिः स्तुतिलक्षणाभिर्वाग्भिरभिनवामहे नूस्तवने नुशब्दे अभिष्टुमः । कुत्रेति स्वसरेषु । अत्रयास्कः—स्वसराण्यहानि भवन्ति स्वयंसारीण्यपिवा स्वरादित्योभवति सएनानिसारयतीति[1] । सूर्यकर्तृकेषु दिवसेषु वयमभिष्टुमः। तत्रदृष्टान्तः—वत्संन यथा धेनवो नवप्रसू-

1 नि० ५. ४.।

तिका धेनवः स्वसरेषु गृहेषु अस्यन्ते प्रेर्यन्ते गावः अत्रेति स्वसराणि गोष्ठानि तेषु वत्समभिलक्ष्य शब्दयन्ति तद्वत् ॥ १ ॥

अथ द्वितीया–

द्युक्षंसुदानुंतविषीभिरावृतंगिरिंनपुरुभोजसम् ।
क्षुमन्तंवाजंशतिनंसहस्रिणंमक्षूगोमन्तमीमहे ॥ २ ॥

द्युक्षम् । सुऽदानुम् । तविषीभिः । आऽवृतम् । गिरिम् । न ।
पुरुऽभोजसम् । क्षुमन्तम् । वाजम् । शतिनम् । सहस्रिणम् ।
मक्षु । गोऽमन्तम् । ईमहे ॥ २ ॥

द्युक्षं दीप्तीनां निवासस्थानं अतिशयितदीप्तमित्यर्थः । यद्वा द्युक्षं दिवि लोके क्षियन्तं निवसन्तं सुदानुं शोभनदानं तविषीभिर्बलैरावृतमाच्छादितं । आवरणेदृष्टान्तः–गिरिंन तविषीभिर्वलयुक्तैर्मेघैरावृतं शिलोच्चममिव स्थितं । पुनःकीदृशं पुरुभोजसं सोमादिहविःप्रदानेन बहुभिर्यजमानैर्भोजयितव्यं यद्वा बहूनां पालयितारमिन्द्रं क्षुमन्तं । टुक्षुशब्दे । शब्दवन्तं अनेन पुत्रादिकं लक्ष्यते स्तोत्रादीनि कुर्वाणं शतिनं सहस्रिणं शतसहस्रसंख्याकधनयुक्तं गोमन्तं गवादियुक्तं वाजमन्नं मक्षु शीघ्रं ईमहे याचामहे । यद्वा पूर्वार्धो वाजविशेषणत्वेन वा योजनीयः । प्रदीप्तं शोभनयोग्यं बलादियुक्तं बहुभिः पुत्रमित्रादिभिर्भोक्तव्यं शब्दादियुक्तमन्नमिन्द्रं याचामहइति ॥ २ ॥

चातुर्विंशिकेहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिनो नत्वाबृहन्तइति वैकल्पिकोनुरूपः । सूत्रितंच–नत्वाबृहन्तो अद्रय उभयंशृणवच्चनइति ।

सैषा तृतीया–

नत्वांबृहन्तोअद्रयोवरंन्तइन्द्रवीळवंः ।
यद्दित्ससिस्तुवतेमावंतेवसुनकिष्टदामिनातिते ॥ ३ ॥

न । त्वा । बृहन्तः । अद्रयः । वरन्ते । इन्द्र । वीळवः ।
यत् । दित्ससि । स्तुवते । माऽवते । वसु । नकिः । तत् । आ ।
मिनाति । ते ॥ ३ ॥

हे इन्द्र बृहन्तो बलेन महान्तः अतएव वीळवः सर्वतोदृढाअपि अद्रयः पर्वताः त्वा त्वां नवरन्ते बलेन ननिवारयन्ति । अनिवारणमेवोत्तरार्धेन विवृणोति स्तुवते त्वद्विषयं स्तोत्रं कुर्वते मावते मत्सदृशायमादृशाय स्तोत्रे यद्वसु यद्धनं दित्ससि त्वं तद्दातुमिच्छसि ते तव देयं तद्धनं नकिर्नकश्चिदामिनाति आभिमुख्येन हिनस्ति । मीञ् हिंसायां । मीनातेर्निगमेइति ह्रस्वः । मावते युष्मदस्मद्भ्यां सादृश्यउपसंख्यानमिति वतुप् ॥ ३ ॥

अथ चतुर्थी–

योद्धासिक्रत्वाशवसोतदंसनाविश्वाजाताभिमज्मना ।
आत्वायमर्कऊतयेववर्ततियंगोतमाअजीजनन् ॥ ४ ॥
योद्धा । असि । क्रत्वा । शवसा । उत । दंसना । विश्वा । जाता ।
अभि । मज्मना । आ । त्वा । अयम् । अर्कः । ऊतये ।
ववर्तति । यम् । गोतमाः । अजीजनन् ॥ ४ ॥

हे इन्द्र । क्रत्वा वृत्रहननादि कर्मणा अपिवा प्रज्ञानेन शवसा आत्मीयेन बलेन योद्धा शत्रूणां संप्रहारकोसि । उतापिच त्वं दंसना स्वकीयेन कर्मणा मज्मना मजमुजिशब्दार्थाः । मजमुजीचेति मजतिः शब्दार्थः । शत्रूणामाक्रोशनसमर्थेन बलेन विश्वा जाता सर्वाणि भूतजातानि अभिभवसि । उक्तार्थस्य विश्वाजातान्यभ्यस्मिमह्नेत्यादिषु इन्द्रेणैवोक्तत्वात् । एतादृशं त्वा त्वामर्कः अर्चपूजायां अर्चनीयः अयं मंत्रः यद्वा अर्कः देवानामर्चकः पूजकः अयं स्तोता ऊतये स्वरक्षणाय आववर्तति आवर्तयति आत्माभिमुख्ये करोतीत्यर्थः । वर्ततेर्लेटि बहुलंछन्दसीति शपः श्लुः । यं त्वां गोतमाः गोतमपुत्रानोधःप्रभृतयः अजीजनन् स्वपक्षे प्रादुरभीभवन् तं त्वां अयं मंत्रः स्तोता वा आवर्तयति ॥ ४ ॥

अथ पञ्चमी–

प्रहिरिरिक्षओजसादिवोअन्तेभ्यस्परि ।
नत्वाविव्याचरजइन्द्रपार्थिवमनुस्वधांववक्षिथ ॥ ५ ॥

१ ऋ० सं० ६. ७. ४ ।

प्र । हि । रि॒रि॒क्षे । ओज॑सा । दि॒वः । अन्ते॑भ्यः । परि॑ ।
न । त्वा॒ । वि॒व्या॒च॒ । रजः॑ । इ॒न्द्र॒ । पार्थि॑वम् ।
अनु॑ । स्व॒धाम् । व॒व॒क्षि॒थ॒ ॥ ५ ॥

हे इन्द्र दिवोद्युलोकस्य पर्यंतेभ्यः ओजसा ह्रिवधारणे स्वबलेनैव परिरिक्षे प्रकर्षेणातिरिक्तोभवसि रिचेर्लेटिबहुलंछन्दसीतिश्लुः । प्रत्ययस्वरः । किंच हे इन्द्र पार्थिवं पृथिव्यां भवो रजोलोकः त्वा त्वां महता स्वशरीरेण नविव्याच नव्याप्नोति द्यावापृथिवीभ्यामपि त्वतः सत्वं बलेन समर्थोभवसीत्यर्थः । एवंभूतःसन् अस्माकं स्वधामन्नमुदकंवा नु ववक्षिथ अनुवोढुमिच्छ । वहेः सन्नंतस्य छान्दसेलिटिरूपं मंत्रत्वादामभावः ॥ ५ ॥

अथ षष्ठी—

नकिः॒परि॑ष्टिर्मघवन्म॒घस्य॑तेय॒द्दा॒शुषे॑द॒शस्य॑सि ।
अ॒स्माकं॑बोध्यु॒चथ॑स्यचो॒दि॒तामंहि॑ष्ठोवाज॑सातये ॥६ ॥ ११ ॥

नकिः॑ । परि॑ष्टिः । म॒घ॒ऽव॒न् । म॒घस्य॑ । ते॒ । यत् । दा॒शुषे॑ ।
द॒शस्य॑सि । अ॒स्माक॑म् । बो॒धि॒ । उ॒चथ॑स्य । चो॒दि॒ता ।
मंहि॑ष्ठः । वाज॑ऽसातये ॥ ६ ॥ ११ ॥

हे मघवन् धनवन्निन्द्र ते तव मघस्य मंहनीयस्य धनस्य परिष्टिः परिबाधको निरोद्धा नकिर्नकश्चिदस्ति यद्यदा दाशुषे हविर्दत्तवते यजमानाय दशस्यसि धनंप्रयच्छसि तदा तस्य निरोधकोनास्तीत्यर्थः । तथासति चोदिता धनानां चोदयिता स्तोतृभ्यः प्रेरयिता अतएव मंहिष्ठोदातृतमो मंहनीयोवा सत्वं अस्माकं संबन्धि उचथस्य स्तोत्रं वाजसातये अन्नलाभाय तदर्थं क्रियमाणमिति बोधि बुध्यस्व स्तोत्रेण स्तुतः सन्नस्मभ्यमन्नादिकं प्रयच्छेतिशेषः । बोधि बुधबोधने भौवादिकः लोटि छान्दसः शपोलुक् ध्यादेशः ॥ ६ ॥

॥ इति पष्ठस्य षष्ठे एकादशोवर्गः ॥ ११ ॥

बृहदिन्द्रायेति सप्तर्चं नवमं सूक्तं नृमेधपुरुमेधावृषी तौचानुक्तत्वादांगिरसौ आदितोद्वे प्रगाथो पंचमीषष्ठ्यावनुष्टुभौ सप्तमीबृहती इन्द्रोदेवता । तथाचानुक्रम्यते—बृहदिन्द्रायसप्त नृमेधपुरुमेधौ अनुष्टुब्बृहत्यंतमिति । चातुर्विंशिकेहनि मरुत्वतीये प्राक्तान्मरुत्वतीयात्प्रगाथादूर्ध्वं द्वौ

मरुत्वतीयौ प्रगाथौ शंसनीयौ बृहदिन्द्रायगायतेत्ययमाद्यः प्रगाथः पृष्ठ्याभिप्लवषडहयोः द्वितीयेहनि अयंप्रगाथः। सूत्रितंच—बृहदिन्द्रायगायत नकिःसुदासोरथमिति मरुत्वतीयऊर्ध्वं निरयादिति।

तत्र प्रथमा—

बृहदिन्द्रा॑यगायत॒मरु॑तोवृत्र॒हन्त॑मम्।
येन॒ज्योति॒रज॑नयन्नृता॒वृधो॑दे॒वंदे॒वाय॒जागृ॑वि ॥ १ ॥

बृ॒हत्। इन्द्रा॑य। गा॒य॒त॒। मरु॑तः। वृ॒त्र॒हन्ऽत॑मम्।
येन॑। ज्योतिः॑। अज॑नयन्। ऋ॒त॒ऽवृधः॑। दे॒वम्।
दे॒वाय॑। जागृ॑वि ॥ १ ॥

हे मरुतः। रुशब्दे मितं रुवंतीति मरुतः। हे मितभाषिणः स्तोतारः वृत्रहन्तमं अतिशयेन पापविनाशनं बृहत्साम इन्द्राय इन्द्रार्थं गायत अस्मदीययज्ञे गानं कुरुत। ऋतावृधः सत्यस्य यज्ञस्यवा वर्धका विश्वेदेवाः देवाय द्योतमानायेन्द्राय देवं देवनशीलं जागृवि सर्वेषां जागरणशीलं ज्योतिः सूर्यं येनसाम्ना अजनयन् इन्द्रार्थमुदपादयन् तत्सामगायतेति ॥ १ ॥

अथ द्वितीया—

अपा॑धमद॒भिश॑स्तीरशस्ति॒हाथेन्द्रो॑द्यु॒म्न्याभ॑वत्।
दे॒वास्त॑इन्द्रस॒ख्याय॑येमिरे॒बृह॑द्भानो॒मरु॑द्गण ॥ २ ॥

अप॑। अ॒ध॒म॒त्। अ॒भिऽश॑स्तीः। अ॒श॒स्ति॒ऽहा। अथ॑।
इन्द्रः॑। द्यु॒म्नी। आ। अ॒भ॒व॒त्। दे॒वाः। ते॒। इ॒न्द्र॒। स॒ख्याय॑।
ये॒मि॒रे॒। बृह॑द्भानो॒ इति॒ बृह॑त्ऽभानो। मरु॑त्ऽगण ॥ २ ॥

अशस्तिहा स्तोत्रशंसनरहितानां शत्रूणां हन्तेन्द्रः अभिशस्तीः शत्रुहिंसायां अभितोहिंसा येषां ते तादृशान् यद्वा अभिशस्तीः शत्रुकृता हिंसाः अपाधमत् अपागमयत् अथ शत्रुहननानन्तरं इन्द्रोद्युम्नी सर्वत्रद्योतमानयशोयुक्तः। यद्वा तेषां धनापहरणेन धनादिमान् आभवत् सर्वतः प्रसिद्धोभवत्। अथोत्तरार्धः प्रत्यक्षकृतः हे बृहद्भानो बृंहणशीलतेजस्क महादीप्तेवा मरु-

ह्रण मरुतां सप्तगणायस्यसन्ति सतथोक्तः तादृश हे इन्द्र देवाः द्योतमानाः सर्वे देवाः सख्याय आत्मनः सखिभावाय ते त्वां येमिरे नियच्छन्ति ॥ २ ॥

अग्निष्टोमे मरुत्वतीये प्रवइन्द्रायेत्ययं मरुत्वतीयः प्रगाथः । सूत्रितंच—प्रवइन्द्रायबृहतइति मरुत्वतीयः प्रगाथइति ।

तत्र प्रथमा सूक्ते तृतीया—

प्रवइन्द्रायबृहतेमरुतोब्रह्मार्चत ।
वृत्रंहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ॥ ३ ॥

प्र । वः । इन्द्राय । बृहते । मरुतः । ब्रह्म । अर्चत । वृत्रम् ।
हनति । वृत्रऽहा । शतऽक्रतुः । वज्रेण । शतऽपर्वणा ॥ ३ ॥

हे मरुतो मितराविणः स्तोतारः बृहते महते वः स्तुत्यस्तोतृत्वलक्षणेन संबन्धेन युष्मदीयायेन्द्राय ब्रह्मसामलक्षणं स्तोत्रं प्रार्चत प्रोच्चारयत । ततो वृत्रहा वृत्रस्य पापस्यवा हन्ता शतक्रतुः शतविधकर्मा बहुविधप्रज्ञोवा इन्द्रः शतपर्वणा शतसंख्याकधारेण वज्रेण एतन्नामकेनायुधेन वृत्रमपामावरकं वृत्राख्यमसुरं हनति युष्माभिरभिष्टुतः सन् हन्तु । हन्तेर्लेटयडागमः ॥३॥

अथ चतुर्थी—

अभिप्रभरधृषताधृषन्मनःश्रवश्चित्तेअसद्बृहत् ।
अर्षन्त्वापोजवसाविमातरोहनोवृत्रंजयास्वः ॥ ४ ॥

अभि । प्र । भर । धृषता । धृषत्ऽमनः । श्रवः । चित् ।
ते । असत् । बृहत् । अर्षन्तु । आपः । जवसा । वि ।
मातरः । हनः । वृत्रम् । जय । स्वः१रिति स्वः ॥ ४ ॥

हे धृषन्मनः शत्रूणां धर्षणशीलमनस्केन्द्र तेचित् तवैव बृहन्महदतिप्रभूतं श्रवोन्नमसदस्ति । तदन्नं धृषता धृष्टेन मनसा युक्तः सन् अस्मभ्यमभिप्रभर अस्याभिमुख्येन प्रकर्षेण संपादय देहीत्यर्थः । हे इन्द्र आपो मातरः अस्माकमुत्पादनहेतुत्वान्मातृभूताः । कथमपां मातृत्वं- अद्भ्यः पृथिवी । पृथिव्याओषधयइत्यादिश्रुतेः [1] । तादृश्यआपः जवसा वेगेन व्यर्षंतु विविधं

[1] तै० आरण्यके.

भूमिं प्रतिगच्छन्तु—कथमापोगच्छन्तीतिचेत् तदाह—वृत्रं अपामावरितारं शत्रुं मेघं हनोजहि ताडय । ततो मेघभेदनेनोदकानि विगच्छन्तु पुनरपि स्वः सर्वं भूतजातं जय ॥ ४ ॥

प्रथमे स्वरसाम्नि निष्केवल्ये यज्जायथाअपूर्व्येति स्तोत्रियः । तथाच सूत्र्यते—तेषां स्तोत्रिया यज्जायथाअपूर्व्येति ।

सैषा सूक्ते पञ्चमी—

यज्जायथाअपूर्व्यमघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्नाउतद्याम् ॥ ५ ॥

यत् । जायथाः । अपूर्व्य । मघऽवन् । वृत्रऽहत्याय । तत् ।
पृथिवीम् । अप्रथयः । तत् । अस्तभ्नाः । उत । द्याम् ॥ ५ ॥

हे अपूर्व्य स्वतोव्यतिरिक्तेन पूर्वेण वर्जित हे मघवन् मंहनीयधनवन्निन्द्र वृत्रहत्याय वृत्रासुरहननाय यद्यदा त्वं जायथाः उत्पन्नः प्रादुर्भूतोसि तत्तदानीमेव पृथिवीं प्रथमानामप्रथयः प्रसिद्धां दृढामकरोः । उतापिच तत्तदानीमेव द्यां द्युलोकमन्तरिक्षेण अस्तभ्नाः निरुद्धामकार्षीः । एतादृशं वीर्यं त्वदन्यस्य नसंभवतीत्यर्थं द्योतयितुमपूर्व्येतिपदम् ॥ ५ ॥

अथ षष्ठी—

तत्तेयज्ञोअजायततदर्कउतहस्कृतिः ।
तद्विश्वमभिभूरसियज्जातंयच्चजन्त्वम् ॥ ६ ॥

तत् । ते । यज्ञः । अजायत । तत् । अर्कः । उत । हस्कृतिः ।
तत् । विश्वम् । अभिऽभूः । असि । यत् । जातम् ।
यत् । च । जन्त्वम् ॥ ६ ॥

हे इन्द्र यद्यदा त्वमजायथाः तत्तदानीं ते त्वदर्थो यज्ञोग्निष्टोमादिरजायत सोमपानार्थमभूत् । उतापिच तदानीं हस्कृतिः । हसे हसने । हासकारी प्रीत्यर्थं क्रियमाणो हर्षस्य सूचकः अर्कः अर्चनीयो मन्त्रोपि अजायत । किंच तदा यज्जातं भूतजातं यच्च जन्त्वं कृत्यार्थेत्वन्प्रत्ययः जनितव्यं विश्वमस्ति तत्सर्वमभिभूरसि स्वमहिम्ना अभिभूतवानसि ॥ ६ ॥

द्रुण मरुतां सप्तगणायस्यसन्ति सतथोक्तः तादृश हे इन्द्र देवाः द्योतमानाः सर्वे देवाः सख्याय आत्मनः सखिभावाय ते त्वां येमिरे नियच्छन्ति ॥ २ ॥

अग्निष्टोमे मरुत्वतीये प्रवइन्द्रायेत्ययं मरुत्वतीयः प्रगाथः । सूत्रितंच—प्रवइन्द्रायबृहतइति मरुत्वतीयः प्रगाथइति ।

तत्र प्रथमा सूक्ते तृतीया—

प्रवृइन्द्राय॑बृह॒तेमरु॑तो॒ब्रह्मा॑र्चत ।
वृत्रंह॑नतिवृत्र॒हाश॒तक्र॑तु॒र्वज्रे॑णश॒तप॑र्वणा ॥ ३ ॥

प्र । वः॒ । इन्द्रा॑य । बृ॒ह॒ते । मरु॑तः । ब्रह्म॑ । अ॒र्च॒त॒ । वृ॒त्रम् ।
ह॒नति॑ । वृ॒त्र॒ऽहा । श॒तऽक्र॑तुः । वज्रे॑ण । श॒तऽप॑र्वणा ॥ ३ ॥

हे मरुतो मितराविणः स्तोतारः बृहते महते वः स्तुत्यस्तोतृत्वलक्षणेन संबन्धेन युष्मदीयायेन्द्राय ब्रह्मसामलक्षणं स्तोत्रं मार्चत प्रोच्चारयत । ततो वृत्रहा वृत्रस्य पापस्यवा हन्ता शतक्रतुः शतविधकर्मा बहुविधप्रज्ञोवा इन्द्रः शतपर्वणा शतसंख्याकधारेण वज्रेण एतन्नामकेनायुधेन वृत्रमपामावरकं वृत्राख्यमसुरं हनति युष्माभिरभिष्टुतः सन् हन्तु । हन्तेर्लेटयडागमः ॥३॥

अथ चतुर्थी—

अ॒भिप्रभ॑रधृष॒ताधृ॑षन्मनः॒श्रवः॑श्चि॒त्तेअ॑सद्बृ॒हत् ।
अर्ष॑न्त्वापो॒जव॑सा॒विमा॒तरो॒हनो॑वृ॒त्रंजया॒स्व॑ः ॥ ४ ॥

अ॒भि । प्र । भ॒र॒ । धृ॒ष॒ता । धृ॒ष॒त्ऽम॒नः॒ । श्रवः॑ । चि॒त् ।
ते॒ । अ॒स॒त् । बृ॒हत् । अर्ष॑न्तु । आपः॑ । जव॑सा । वि ।
मा॒तरः॑ । हनः॑ । वृ॒त्रम् । जय॑ । स्वः॑१रिति॒ स्वः॑ ॥ ४ ॥

हे धृषन्मनः शत्रूणां धर्षणशीलमनस्केन्द्र तेचित् तवैव बृहन्महदतिप्रभूतं श्रवोन्नमसदस्ति । तदन्नं धृषता धृष्टेन मनसा युक्तः सन् अस्मभ्यमभिप्रभर अभ्याभिमुख्येन प्रकर्षेण संपादय देहीत्यर्थः । हे इन्द्र आपो मातरः अस्माकमुत्पादनहेतुत्वान्मातृभूताः । कथमपां मातृत्वं—अद्भ्यः पृथिवी । पृथिव्याओषधयहत्यादिश्रुतेः । तादृश्यआपः जवसा वेगेन व्यर्षन्तु विविधं

१ तै० आरण्यके.

भूमिं प्रतिगच्छन्तु—कथमापोगच्छन्तीतिचेत् तदाह—वृत्रं अपामावरितारं शत्रुं मेघं हनोजहि ताडय। ततो मेघभेदनेनोदकानि विगच्छन्तु पुनरपि स्वः सर्वं भूतजातं जय ॥ ४ ॥

प्रथमे स्वरसाम्नि निष्केवल्ये यज्जायथाअपूर्व्येति स्तोत्रियः। तथाच सूत्र्यते—वेषां स्तोत्रिया यज्जायथाअपूर्व्येति।

सैषा सूक्ते पञ्चमी—

यज्जायथाअपूर्व्यमघवन्वृत्रहत्याय।
तत्पृथिवीमंप्रथयस्तदस्तभ्नाउतद्याम् ॥ ५ ॥

यत्। जायथाः। अपूर्व्य। मघऽवन्। वृत्रऽहत्याय। तत्।
पृथिवीम्। अप्रथयः। तत्। अस्तभ्नाः। उत। द्याम् ॥ ५ ॥

हे अपूर्व्य स्वतोव्यतिरिक्तेन पूर्व्येण वर्जित हे मघवन् मंहनीयधनवन्निन्द्र वृत्रहत्याय वृत्रासुरहननाय यद्यदा त्वं जायथाः उत्पन्नः प्रादुर्भूतोसि तत्तदानीमेव पृथिवीं प्रथमानामप्रथयः प्रसिद्धां दृढामकरोः। उतापिच तत्तदानीमेव द्यां द्युलोकमन्तरिक्षेण अस्तभ्नाः निरुद्धामकार्षीः। एतादृशं वीर्यं त्वदन्यस्य नसंभवतीत्यर्थं द्योतयितुमपूर्व्येतिपदम् ॥ ५ ॥

अथ षष्ठी—

तत्तेयज्ञोअंजायततदर्कउतहस्कृतिः।
तद्विश्वमभिभूरसियज्जातंयच्चजन्त्वम् ॥ ६ ॥

तत्। ते। यज्ञः। अजायत। तत्। अर्कः। उत। हस्कृतिः।
तत्। विश्वम्। अभिऽभूः। असि। यत्। जातम्।
यत्। च। जन्त्वम् ॥ ६ ॥

हे इन्द्र यद्यदा त्वमजायथाः तत्तदानीं ते त्वदर्थो यज्ञोग्निष्टोमादिरजायत सोमपानार्थमभूत्। उतापिच तदानीं हस्कृतिः। हसे हसने। हासकारी प्रीत्यर्थं क्रियमाणो हर्षस्य सूचकः अर्कः अर्चनीयो मन्त्रोपि अजायत। किंच तदा यज्जातं भूतजातं यच्च जन्त्वं कृत्यार्थेत्वप्रत्ययः जनितव्यं विश्वमस्ति तत्सर्वमभिभूरसि स्वमहिम्ना अभिभूतवानसि ॥ ६ ॥

अथ सप्तमी—

आमासुपक्वमैरयआसूर्यरोहयोदिवि।
घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेबृहत् ॥ ७ ॥ १२ ॥

आमासु। पक्वम्। ऐरयः। आ। सूर्यम्। रोहयः।
दिवि। घर्मम्। न। सामन्। तपत। सुवृक्तिऽभिः।
जुष्टम्। गिर्वणसे। बृहत् ॥ ७ ॥ १२ ॥

हे इन्द्र आमासु अपक्वासु गोषु पक्वं पय ऐरयः प्रैरयश्च। तथामंत्रः—आमासुचिद्दधिषेपक्वमन्तरिति। किंच दिवि द्युलोके सूर्यमारोहयश्च पूर्वं पणयोनामासुराः अंगिरसां गाअपहृत्यांधकारावृते कस्मिंश्चित्पर्वते वाः स्थापितवन्तः ततोंगिरसइन्द्रं स्तुत्वा गाः पुनरस्मभ्यमाहरेति तैरुक्तइन्द्रो गवां स्थानं तमसावृतं दृष्ट्वा तत्र गोदर्शनाय द्युलोके सर्वप्रकाशकं सूर्यमारोहितवान् स्थापितवानसि। चादिलोपेविभाषेति पूर्वस्य ऐरयइत्यस्य ननिघातः। अथ परोक्षकृतोर्धर्चः हे स्तोतारः सुवृक्तिभिः शोभनाभिः स्तुतिभिः तपत इन्द्रं तीक्ष्णीकुरुत इन्द्रं स्तुतिभिः प्रवर्धयतेत्यर्थः। तत्रदृष्टान्तः—घर्मंन यथा घर्मं दीपनशीलं प्रवर्ग्यं सामन् सुपांसुलुगिति तृतीयायालुक् सामभिर्यथा तपन्ति तद्वत्। ततो गिर्वणसे गीर्भिर्वननीयायेन्द्राय जुष्टं प्रीतिकरं पर्याप्तं वा बृहत्साम गायत ॥ ७ ॥

॥ इति पञ्चमस्य षष्ठे द्वादशोवर्गः ॥ १२ ॥

आनोविश्वास्विति पञ्चर्चं दशमं सूक्तं नृमेधपुरुमेधावृषी विषमसंख्याकाबृहत्यः समसंख्याकाः सतोबृहत्यः इन्द्रोदेवता तथाचानुक्रान्तं—आनोविश्वासु पञ्चेति। महाव्रते निष्केवल्ये बार्हततृचाशीतौ एतत्सूक्तं सूत्यतेहि पंचमारण्यके—आनोविश्वासुहव्यो यइन्द्रभुजआभरेति।

तत्र प्रथमा—

आनोविश्वासुहव्यइन्द्रःसमत्सुभूषतु।
उपब्रह्माणिसवनानिवृत्रहापरमज्याऋचीषमः ॥ १ ॥

आ। नः। विश्वासु। हव्यः। इन्द्रः। समत्ऽसु। भूषतु। उप।
ब्रह्माणि। सवनानि। वृत्रऽहा। परमऽज्याः। ऋचीषमः ॥ १ ॥

१ ऋ० सं० १.५ २।

ऋपिरनयेन्द्र एवंकरोत्वित्याशास्ते । विश्वासु सर्वासु समत्सु असुरयुद्धेषु हव्यः सर्वैर्देवैरात्मरक्षणार्थमाह्वातव्यः एतादृशइन्द्रः नोस्माकं ब्रह्माणि स्तोत्राणि हवीरूपाण्यन्नानि वा उपाभूषतु उदकं अनुभावयतु सेवतामित्यर्थः । यद्वा एतानि अलंकरोतु तदागमनेन स्तोत्राणि हवींषि वा अलंकृतानि भवन्ति । तथा सवनानि प्रातः सवनादीनि त्रीणिसवनानि च भूषतु । कीदृशइन्द्रः वृत्रहा वृत्रस्यासुरस्य पापस्यवा हन्ता । परमज्याः युद्धेषु शत्रुहननार्थं परमा अविनश्वरी ज्या मौर्वी यस्य सतथोक्तः । यद्वा परमान् बलेन प्रकृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः । ऋचीपमः स्तुत्या समः स्तुतिभिरभिमुखीकरणीय एतादृगिन्द्रः स्तोत्राणि भूषत्विति ॥ १ ॥

अथ द्वितीया–

त्वंदाताप्रथमोराधसामस्यसिसत्यईशानकृत् ।
तुविद्युम्नस्ययुज्यावृणीमहेपुत्रस्यशवसोमहः ॥ २ ॥

त्वम् । दाता । प्रथमः । राधसाम् । असि । आसि । सत्यः ।
ईशानऽकृत् । तुविऽद्युम्नस्य । युज्या । आ । वृणीमहे ।
पुत्रस्य । शवसः । महः ॥ २ ॥

हे इन्द्र प्रथमः सर्वेषां मुख्यस्त्वं राधसां धनानां दातासि यद्वा धनदातॄणां मध्ये त्वं प्रथमआदिमोभवसि । तथा ईशानकृत् तवस्तोतॄनीशानानैश्वर्ययुक्तान् कुर्वन् त्वं सत्यः सत्यकर्मासि यथार्थकर्मा भवसीत्यर्थः । यस्मादेवं तस्माद्वयं तुविद्युम्नस्य बहुधनवतः बहन्नस्यवा शवसोबलस्यपुत्रस्य शत्रुवधार्थं बलकारणत्वेनोत्पन्नत्वात् तत्पुत्रस्य अतएव महोमहतस्तव युज्या योग्यानि धनानि आवृणीमहे संभजामहे ॥ २ ॥

अथ तृतीया–

ब्रह्मातइन्द्रगिर्वणःक्रियन्तेअनतिद्भुता ।
इमाजुषस्वहर्यश्वयोजनेन्द्रयातेअमन्महि ॥ ३ ॥

ब्रह्म । ते । इन्द्र । गिर्वणः । क्रियन्ते । अनतिऽद्भुता । इमा ।
जुषस्व । हरिऽअश्व । योजना । इन्द्र । या । ते । अमन्महि ॥ ३ ॥

हे गिर्वणो गोर्भिर्वननीयेन्द्र अनतिद्रुता सर्वानतिक्रम्य नभवन्ति इन्द्रगुणव्यापकानि यथार्थभूतानीत्यर्थः। तादृशानि यानि ब्रह्म ब्रह्माणि स्तोत्राणि ते त्वदर्थमस्माभिः क्रियन्ते हे हर्यश्व हरिताश्वन हे इन्द्र योजना योजनानि तव सम्यक् योजनशीलानि ता तानीमा इमानि स्तोत्राणि जुषस्व सेवस्व। किंच हे इन्द्र ते त्वदर्थं या यानि स्तोत्राणि अमन्महि वयमुच्चरामः तानि सर्वाणि सेवस्व ॥ ३ ॥

अथ चतुर्थी—

त्वंहिसत्योमघवन्ननानतोवृत्राभूरिन्यृञ्जसे।
सत्वंशविष्ठवज्रहस्तदाशुषेर्वाञ्चंरयिमाकृधि ॥ ४ ॥

त्वम्। हि। सत्यः। मघऽवन्। अनानतः। वृत्रा। भूरि।
निऽऋञ्जसे। सः। त्वम्। शविष्ठ। वज्रऽहस्त। दाशुषे।
अर्वाञ्चम्। रयिम्। आ। कृधि ॥ ४ ॥

हे मघवन् धनवन्निन्द्र सत्यः सत्यकर्मा त्वमेव अनानतः केषामप्यप्रह्वः सन् भूरि भूरीणि वृत्रा वृत्राणि रक्षांसि न्यृंजसे तानि प्रह्वीभावयसि न्यक्करोषीत्यर्थः। हिरवधारणे। हेशविष्ठ बलेनवृद्धतम हे वज्रहस्त वज्रोहस्ते यस्य सतथोक्तः। हे इन्द्र सतादृशस्त्वं दाशुषे तुभ्यं हविर्दत्तवते यजमानाय रयिं धनादिकं अर्वाचं अर्वाचीनं अभिमुखं यथागच्छति तथा आकृधि समन्तात्कुरु ॥ ४ ॥

चातुर्विंशिकेहनिमाध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे त्वमिन्द्रयशाप्रगाथोवैकल्पिकोनुरूपः। सूत्र्यतेच—त्वमिन्द्रयशाअसीन्द्रक्रतुंनआभरेति।

तत्र प्रथमा सूक्ते पंचमी—

त्वमिन्द्रयशाअस्यृजीषीशवसस्पते।
त्वंवृत्राणिहंस्यप्रतीन्येकइदनुत्ताचर्षणीधृता ॥ ५ ॥

त्वम्। इन्द्र। यशाः। असि। ऋजीषी। शवसः। पते। त्वम्।
वृत्राणि। हंसि। अप्रतीनि। एकः। इत्। अनुत्ता। चर्षणिऽधृता ॥ ५ ॥

हे शवसस्पते बलस्य पालयितः हे इन्द्र ऋजीष्युपार्जितोभिषुतः सोमः तद्वान् त्वं यशाः यशस्व्यसि भवसि । कथमस्य यशस्वित्वं तदाह—अप्रतीनि बलिभिरप्यप्रतिगतानि अतएव अनुत्ता अन्यैर्नोदितुमशक्यानि वृत्राणि रक्षांसि त्वमेकइव असहायएव चर्षणिधृता असुरादिहननद्वारेण मनुष्याणां धारकेण वज्रेण हंसि संप्रहरसि । अतएवास्य यशस्वित्वम् ॥ ५ ॥

अथ षष्ठी—

तमुं त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा तं इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ ६ ॥ १३ ॥

तम् । ऊँ इति । त्वा । नूनम् । असुर । प्रऽचेतसम् । राधः ।
भागम्ऽइव । ईमहे । महीऽइव । कृत्तिः । शरणा । ते । इन्द्र ।
प्र । ते । सुम्ना । नः । अश्नवन् ॥ ६ ॥ १३ ॥

हे असुर बलवन् प्राणवन् हे इन्द्र यउक्तगुणोस्ति तं प्रचेतसं प्रकृष्टज्ञानं त्वाउ इत्यवधारणे पितृवत्पोषकं त्वामेव राधः धर्मादिसाधनं धनं नूनमिदानीमीमहे वयं याचामहे । तत्रदृष्टान्तः—भागमिव यथा कश्चित्पितृभागभूतं धनं याचते तद्वत् इन्द्रोयजमानेभ्यः स्तोतृभ्यश्च धनं प्रयच्छत्येव तस्माद्भागभूतं धनं यद्यरोवयं याचामहे । हे इन्द्र महीवकृत्तिः कृत्तिर्यशोवाचर्म वा । कृतीछेदने करणेक्तिन् कृन्तत्यनेनेति ईदृशी कृत्तिरिव ते तव शरणा शरणं गृहमन्तरिक्षे द्युलोके मही महद्वर्तते । अत्रयास्कः—कृत्तिः कृन्ततेर्यशोवान्नंवा महीवकृत्तिःशरणातइन्द्र सुमहत्तइन्द्र शरणमन्तरिक्षे कृत्तिरिवे[1]ति । किंच ते तव स्वभूतानि सुम्ना सुम्नानि पुत्रादिविषयसुखानिच नोस्मान्प्राश्नवत् प्रकर्षेणाश्नुवतां व्याप्नुवन्तु । अश्नोतेर्लेटचडागमः ॥ ६ ॥

॥ इति पञ्चमस्य षष्ठे त्रयोदशोवर्गः ॥ १३ ॥

कन्यावारिति सप्तर्चमेकादशंसूक्तं अत्रेः पुत्री अपालाख्या स्वदोषपरिहारायानेन सूक्तेनेन्द्रंस्तुतवती अतःसैवऋषिः प्रथमाद्वितीयेपंक्ती शिष्टाः पंचानुष्टुभः इन्द्रोदेवता । तथाचानुक्रान्तं—कन्यावाः सप्तात्र्यपालेतिहासऐन्द्रमानुष्टुभं द्विपंक्त्यादीति । विनियोगोलैंगिकः। अत्रे-

[1] नि० ५. २२.।

तिहासमाचक्षते—पुराकिलात्रिसुता अपालाब्रह्मवादिनी केनचित्कारणेन त्वग्दोषदुष्टासती अ-तएवदुर्भगेति भर्त्रापरित्यक्ता पितुराश्रमे त्वग्दोषपरिहाराय चिरकालमिन्द्रमधिकृत्य तपस्तेपे। साकदाचिदिन्द्रस्य सोमःप्रियकरोभवति तमिन्द्राय दास्यामीतिबुध्या नदीतीरंमत्यागमत्। सा तत्रस्नात्वा पथि सोममप्यलभत तमादाय गृहंप्रत्यागच्छन्ती मार्गएव तं चखाद तद्भक्षणकाले दंतघर्षणजातंशब्दं ग्राव्णां सोमाभिषवध्वनिमिति मत्वा तदानीमेवेन्द्रः समागमत् आगत्य ता-मुवाच किमत्रग्रावाणोभिषुण्वन्तीति। सामत्यूचे अत्रिकन्यास्नानार्थमागत्य सोमंदृष्ट्वा तंभक्षयति तद्भक्षणजोध्वनिरेव नतु ग्राव्णांसोमाभिषवध्वनिरिति। तथा प्रत्युक्तइन्द्रः पराङ्मवर्तत गच्छ-न्तमिन्द्रं सापुनरब्रवीत्। किमर्थं निवर्तसे त्वंतु सोमपानाय गृहंगृहंप्रति गच्छसि तदानीमत्रा-पि ममदंष्ट्राभ्यां अभिषुतं सोमंपिब धानादींश्च भक्षयेति। सैवमिन्द्रमनाद्रियमाणासती पुनर-प्याह—अत्रागतं त्वामिन्द्रं इति नजानामि त्वयि गृहं आगते बहुमानं करिष्यामीतीन्द्रमुक्त्वा अत्रसमागतः इन्द्रएव नान्यइतिनिश्चित्य स्वास्येनिहितं सोममाह—हे सोम त्वमाग-तायेन्द्राय पूर्वं शनैः ततः शनकैः क्षिप्रं परिस्रवेति। ततइन्द्रस्तां कामयित्वा तस्या आस्यएव दंष्ट्राभिषुतं सोममपात् ततइन्द्रेण सोमेपीतेसति त्वग्दोषादहं भर्त्रा परित्यक्तासती इदानीमिन्द्रेण संगता इति अपालायामुक्तायामिन्द्रस्तांव्याजहार। किंकामयसे तदहंकरिष्यामीत्युक्ते सा वर-मवीकमत। ममपितुः शिरोरोमवर्जितं तस्योपरं क्षेत्रं फलादिरहितं ममगुह्यस्थानमप्यरो-मशं एतानि रोमफलादियुक्तं कुर्वित्युक्तायां तत्पितृशिरःस्थितां खलतिमपहाय क्षेत्रंच फलादि-युक्तंकृत्वा एतस्यास्त्वग्दोषपरिहाराय स्वकीयरथच्छिद्रे शकटस्य युगस्यच छिद्रे एतां त्रिवारं निश्चकर्ष। तस्याः पूर्वोभिहतायाः त्वक् शल्यको द्वितीया गोधा तृतीया कृकलासोभूत्। ततइ-न्द्रस्तामप्यपालां सूर्यसदृशत्वचमकरोदित्यैतिहासिकीकथा। एतच्च शाट्यायनब्राह्मणेस्पष्ट-मुक्तं—तद्ब्राह्मणं तत्तदृग्व्याख्यानसमये दर्शयिष्ये। एषोर्थः कन्यावारित्यादिषु ऋक्षु प्रतिपाद्यते।

तत्र सूक्ते प्रथमा—

कन्या॒३॒॑वार॑वाय॒ती सोम॒मपि॑स्रु॒ताऽवि॑दत्।
अस्तं॒भर॑न्त्यब्रवी॒दिन्द्रा॑य सुनवै त्वा श॒क्राय॑ सुनवै त्वा ॥१॥

क॒न्या॑। वाः। अ॒व॒ऽयती। सोम॑म्। अपि॑। स्रु॒ता।
अ॒वि॒द॒त्। अस्त॑म्। भर॑न्ती। अ॒ब्र॒वी॒त्। इन्द्रा॑य। सु॒न॒वै॒।
त्वा॒। श॒क्राय॑। सु॒न॒वै॒। त्वा॒ ॥ १ ॥

वाः उदकं प्रति अवायती स्नानार्थमभ्यवगच्छन्ती कन्या अपालानामस्त्री सुता सुतौ मार्गे सोममप्यविदत्। विदृलृलाभे अलभत लडिरूपं। तं सोमं अस्तं गृहंप्रति भरन्ती आहरन्ती सा सोममब्रवीत्।हे सोम त्वा त्वामिन्द्राय सुनवै ममदन्तैरेवाभिषुणवै। पुनर्हे सोम त्वा त्वां शक्राय समर्थायेन्द्राय सुनवै इदानीमेवाभिषवं करवै। सोमभक्षणकाले दंतैर्दंतध्वनिं ग्रावध्वनिमिति मत्वेन्द्रः तामगमत्। एषोर्थः शाट्यायनब्राह्मणे स्पष्टमभिहितः–सातीर्थमभ्यवयन्ती सोमांशुमविन्दत्तंसमखादत्तस्यैहग्रावाणइव दन्ताऊदुः सइन्द्रः आद्रवत् ग्रावाणोवैवदन्तीति। सातमभिव्याजहार कन्यावारवायतीसोममपिसुवाविददित्यस्यैतइदं ग्रावाणइव दन्तावदन्तीति विदित्वेन्द्रः पराङावर्तत तमब्रवीदसौयएषिवीरक इत्यादिनेति ॥ १ ॥

अथ द्वितीया–

असौयएषिवीरकोगृहंगृहंविचाकशत्।
इमंजम्भसुतंपिबधानावन्तंकरम्भिणमपूपवन्तमुक्थिनम्॥२॥

असौ। यः। एषि। वीरकः। गृहम्ऽगृहम्। विऽचाकशत्। इमम्।
जम्भेऽसुतम्। पिब। धानाऽवन्तम्। करम्भिणम्।
अपूपऽवन्तम्। उक्थिनम् ॥ २ ॥

सा शक्रमब्रवीत्–हेइन्द्र वीरको वीरः समर्थस्त्वं योसौ त्वं विचाकशत् काश्दीप्तौ। यङ्लुकि शतरि रूपं धातोर्ह्रस्वश्छान्दसः। अत्यर्थं दीप्यमानः सन् गृहंगृहं यजमानगृहंप्रति सोमपानाय त्वमेषि गच्छसि।अतस्त्वमत्रापि जंभसुतं ममदन्तैरभिषुतमिमं सोमं पिब। कीदृशं धानावन्तं धानाभृष्टयवास्तद्वन्तं करंभिणं सक्तुमन्तं अपूपवन्तं पुरोडाशादिसहितं उक्थिनं स्तोत्रादियुक्तमेतादृशं सोममत्रैव पिबेति। सा सोमेनसह धानादीनवेदयत् स्तोत्रंचाकार्षीदित्यर्थः॥२॥

अथ तृतीया–

आचनत्वाचिकित्सामोधिचनत्वानेमसि।
शनैरिवशनकैरिवेन्द्रायेन्दोपरिस्रव ॥ ३ ॥

आ। चन। त्वा। चिकित्सामः। अधि। चन। त्वा। न। इमसि।
शनैःऽइव। शनकैःऽइव। इन्द्राय। इन्दो इति। परि। स्रव ॥ ३ ॥

पुनरपि सा तमनाद्दत्याह—हे इन्द्र चनेति निपातसमुदायोवधारणार्थे त्वा त्वामाचिकित्सामोज्ञातुमिच्छामएव ममगृहमागच्छ तं त्वामिन्द्रइति जानीमएव इहमागंएवागतं त्वा त्वां नाधीमसि नाधिगच्छामः। अत्रापि चनेत्यवधारणे। इह त्वामिन्द्रइति नजानीमः। इत्यपाला तमिन्द्रमुक्त्वा स्वास्येस्थितंसोमं मत्याह—हे इन्दो क्षरणशील सोम अस्माआगतायेन्द्राय तदर्थं पूर्वं शनैः मन्दंमन्दं ततः शनकैरिव कुत्सितार्थे अकच् कुत्सितं शनैः शनकैः क्षिप्रमित्यर्थः क्षिप्रमेव त्वं परिस्रव मदीयदंष्ट्राभिरभिषूयमाणःसन् परितः क्षरेति। तथा यज्ञेष्वपि ग्रावभिरभिषूयमाणः सोमः प्रथमं शनैः परिस्रवति ततः शनकैः क्षिप्रमिति तदभिप्रायेणोक्तं। ततइन्द्रः एतद्वाक्यं श्रुत्वा तदानीमेवमभिषुतं सोमं यज्ञस्थानीयादपालामुखादेवापासीत्। उक्तार्थः शाट्यायनकब्राह्मणे स्पष्टमभ्यधायि—अनाद्रियमाणैव तमब्रवीद्दाचनत्वाचिकित्सामोधिचनत्वानेमसीति पुरामां सर्वंयचांपालास्तौतीत्युपपर्यावर्ततं शनैरिव शनकैरिवेन्द्रायेन्दोपरिस्रवेति हवाअस्यैमुखात्सोमं निरधयत्सोमपीथइहवाअस्यभवति यएवंविद्वान् स्त्रीमुपजिघ्रतीति ॥ ३ ॥

अथ चतुर्थी—

कुविच्छकत्कुवित्करत्कुविन्नोवस्यसस्करत् ।
कुवित्पतिद्विषोयतीरिन्द्रेणसंगमामहै ॥ ४ ॥

कुवित् । शकत् । कुवित् । करत् । कुवित् । नः । वस्यसः । करत् ।
कुवित् । पतिऽद्विषः । यतीः । इन्द्रेण । सम्ऽगमामहै ॥ ४ ॥

सोमं पीतवानिन्द्रोस्मानेवं करोत्वित्याह—सइन्द्रः कुविद्बहुवारमस्मान् शकत् शक्तान् समर्थान् करोतु । किंच कुवित् बहुचास्मभ्यं करत् करोतु। किंच सएवेन्द्रोनोस्मान् कुवित् बहुकृत्वा वस्यसः वसीयसः अतिशयेन वसुमतः करोतु। करोतेः शक्नोतेश्च लेटच्यडागमः। इदानीमात्रेयी अहमेवंकरिष्यामीति वदति पूर्वं कुविद्बहु पतिद्विषः त्वग्दोषात् पतिभिर्भर्तृभिः बहुवारं द्विष्टाः अतएव यतीः पतिभ्यः सकाशादितोगच्छन्त्योवयं कैश्चित् अप्यनूह्यमानाः सत्यः संपतोन्द्रेण सह संगमामहै संगच्छामहे सर्वत्र पूजायें बहुवचनं। संगमशब्देनेन्द्रोपादानकमवेति ॥ ४ ॥

अथ पंचमी—

इमानित्रीणिविष्टपातानीन्द्रविरोहय ।
शिरस्ततस्योर्वरामादिदंमउपोदरे ॥ ५ ॥

इमानि । त्रीणि । विष्टपा । तानि । इन्द्र । वि । रोहय । शिरः ।
ततस्य । उर्वराम् । आत् । इदम् । मे । उप । उदरे ॥ ५ ॥

इन्द्रेण किंकामयसे तद्दास्यामीत्युक्ता सा वरमनया प्रार्थयते । हे इन्द्र इमानि त्रीणि विष्टपा विष्टपानि स्थानानि सन्ति तानि त्रीणि स्थानानि विरोहय उत्पादय । कानि तानि ततस्य मम पितुः रोमवर्जितं शिरः खलतिमित्यर्थः तच्चापगमय रोमशं कुर्वित्यर्थः । उर्वरां तस्यऊपरं क्षेत्रं सर्वसस्याढ्यं कुरु । आदनन्तरं मे मम उपोदरे उप उदरस्य समीपे यदिदं स्थानं गुह्यमित्यर्थः तच्च त्वग्दोषेसत्यसंजातरोमकं तदपि त्वग्दोषपरिहारेण रोमयुक्तं कुरु । एतानि त्रीणि स्थानानि । एषोऽर्थः शाट्यायनके प्रपंचेनोक्तः—तामब्रवीदपाले किं कामयसीति साब्रवीदिमानित्रीणि विष्टपेति खलविर्हास्यैपिता सतंहास्वलतिं चकारोर्वराहास्य नजसे सोजद्य उपस्थेहास्यै रोमाणि नासुस्तान्युह जज्ञिरइत्यस्योत्तराभूयसे निर्वचनायासौचयानइति ॥ ५ ॥

अथ षष्ठी—

असौचयानउर्वरादिमांतन्वंममं ।
अथोततस्ययच्छिरःसर्वातारोमशाकृधि ॥ ६ ॥

असौ । च । या । नः । उर्वरा । आत् । इमाम् । तन्वम् । मम ।
अथो इति । ततस्य । यत् । शिरः । सर्वा । ता । रोमशा । कृधि ॥ ६ ॥

उक्तमेवार्थमनयाविवृणोति नोस्माकं पितुर्यासा उर्वरा यदिदमूपरं क्षेत्रमस्ति आदनन्तरं मम इमां तन्वं इदं त्वग्दोषदुष्टं गुह्यस्थानं अथो अथापिच ततस्य तातस्य यच्छिरोरोमवर्जितमस्ति एतानि सर्वा सर्वाणि तानीमानि त्रीणि स्थानानि रोमशा रोमशानि कृधि कुरु ॥ ६ ॥

अथ सप्तमी—

खेरथस्यखेनसःखेयुगस्यशतक्रतो ।
अपालामिन्द्रत्रिष्पूत्व्यकृणोःसूर्यत्वचम् ॥ ७ ॥ १४ ॥

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ।
अपालाम् । इन्द्र । त्रिः । पूत्वी । अकृणोः । सूर्यऽत्वचम् ॥ ७ ॥ १४ ॥

अनया अपालां सूर्यसदृशमभामकरोदित्याह–हे शतक्रतो हे शतसंख्याकयज्ञ बहुविधप्रज्ञवा हे इन्द्र रथस्य स्वकीयस्य खे पृथुतरेछिद्रे तथा अनसः शकटस्य खे तदपेक्षया अल्पे छिद्रे युगस्य खेच अल्पतरे सूक्ष्मे छिद्रे रथशकटयुगानां छिद्रेषु त्वग्दोषपरिहाराय त्रिः त्रिवारं निष्कर्षेण पूत्वी पूत्वा शोधयित्वा ततः अपालमितन्नामिकामविद्युतां ब्रह्मवादिनीं सूर्यत्वचं सूर्यसमानत्वचमकृणोः अकरोः कल्याणतमरूपभाजमकरोरित्यर्थः। शाट्यायनब्राह्मणे स्पष्टमभिहितं–तांखेरथस्याध्यबृहत्सागोधाभवत्तां खेनसोऽस्यबृहत्सासंश्लिष्टकाभवत्तदेषाभ्यनूच्यते खेरथस्यखेनसइति तस्यैह यत्कल्याणतमं रूपाणां तद्रूपमासेति। त्वग्दोषापनयनायाक्षादिद्वारेष्वतिकर्षणमिति। यस्त्वग्दोषदूषितःसन् एतत्सूक्तं पठति तस्य त्वग्दोषमपगमय्य सूर्यसदृशकान्तिमिन्द्रः करोतीति सूक्तंप्रशस्यते ॥ ७ ॥

॥ इति षष्ठस्य षष्ठे चतुर्दशोवर्गः ॥ १४ ॥

पांतमावइति त्रयस्त्रिंशदृचं द्वादशं सूक्तं आंगिरसस्य श्रुतकक्षस्य सुकक्षस्यवार्षं ऐन्द्रं आद्यानुष्टुप् शिष्टागायत्र्यः तथानुक्रम्यते–पांतं त्रयस्त्रिंशच्छ्रुतकक्षः सुकक्षोवाद्यानुष्टुबिति। महाव्रते गायत्रतृचाशीतौ प्रथमावर्जमिदंसूक्तमुत्तरंच। पंचमारण्यके सूत्रितंच–पुरुहूतंपुरुष्टुतमिति शेषइति। प्रथमेरात्रिपर्याये होतुः शस्त्रे आद्यौ तृचौ स्तोत्रियानुरूपौ। सूत्रितंच–पांतमावो अंधसोपादुशिग्र्यंधसइति।

तत्र प्रथमा–

पान्त॒मा वो॒ अन्ध॑स॒ इन्द्र॑म॒भि प्र गा॑यत।
वि॒श्वा॒साहं॑ श॒तक्र॑तुं॒ मंहि॑ष्ठं चर्षणी॒नाम् ॥ १ ॥

पान्त॑म्। आ। वः॒। अन्ध॑सः। इन्द्र॑म्। अ॒भि। प्र। गा॒य॒त।
वि॒श्व॒ऽसह॑म्। श॒तऽक्र॑तुम्। मंहि॑ष्ठम्। च॒र्ष॒णी॒नाम् ॥ १ ॥

हे ऋत्विजः वोयुष्मदीयं अंधसः सोमलक्षणमन्नं आपांतं आभिमुख्येन पिबंतं। पा पाने छान्दसः शपोलुक् सर्वेविधयश्छन्दसिविकल्प्यन्तेइति नलोकाव्ययेति षष्ठीप्रतिषेधाभावः। ततोन्धसइत्यस्य कर्तृकर्मणोरितिषष्ठी। सोममाभिमुख्येन पिबन्तमेतादृशमिन्द्रं प्रगायत प्रकर्षेणाभिष्टुत। कीदृशं विश्वसहं सर्वेषां शत्रूणामभिभवितारं सर्वेषां भूतजातानां वा। अतएव श-

तक्रतुं बहुविधप्रज्ञानं बहुविधकर्माणं वा चर्षणीनां मनुष्याणां मंहिष्ठं धनस्यदातृतमं । यद्वा यजमानानां यष्टव्यत्वेन पूजनीयमिन्द्रं गायतेति समन्वयः ॥ १ ॥

अथ द्वितीया

पुरुहूतंपुरुष्टुतंगाथान्यंसनश्रुतम् । इन्द्रइतिब्रवीतन ॥ २ ॥

पुरुऽहूतम् । पुरुऽस्तुतम् । गाथान्यम् । सनऽश्रुतम् ।
इन्द्रः । इति । ब्रवीतन ॥ २ ॥

हे ऋत्विग्यजमानाः पुरुहूतं यज्ञेषु बहुभिराहूतं पुरुष्टुतं बहुभिः स्तोत्रशस्त्रादिभिः स्तुतं अतएव गाथान्यं गानयोग्यं गातव्यं सनश्रुतं सनातनतया प्रसिद्धं एवंविधं देवं इन्द्रइति यूयं ब्रवीतन ब्रूयात । ब्रूञ् व्यक्तायां वाचि इत्यस्य लोटि व्यत्ययेन प्थमस्तनबादेशः अतएव गुणः ॥२॥

अथ तृतीया—

इन्द्रइन्नोमहानांदातावाजानांनृतुः । महाँअभिज्ञ्वायमत् ॥ ३ ॥

इन्द्रः । इत् । नः । महानाम् । दाता । वाजानाम् । नृतुः ।
महान् । अभिज्ञु । आ । यमत् ॥ ३ ॥

इन्द्रइव पूर्वोक्तलक्षणइन्द्रएव नोस्मभ्यं महानां महतां वाजानामन्नानां यद्वा महानां वर्णव्यत्ययः मघानां धनानां वाजानामन्नानांच दाता भवतु । कीदृशः नृतुः नृतिशृध्योः कूरितिकूप्रत्ययः ह्रस्वश्छान्दसः । सर्वस्य नर्तयिता यद्वा नृणये औणादिकः तुप्रत्ययः धातोर्ह्रस्वश्छान्दसः स्तोतृभ्यो गवादिनेता अतएव महान् सइन्द्रः अभिज्ञु अभिगतजानुकं अस्मभ्यं आयमत् आयच्छतु ददातु । यद्वा सइन्द्रः अभिज्ञु अस्मदभिमुखं आगच्छत् धनं स्वहस्तयोः परिगृह्य अस्मानयतु धनं गृहीत्वा अस्मभ्यं ददात्वित्यर्थः ॥ ३ ॥

अथ चतुर्थी—

अपाद्युशिप्र्यन्धसःसुदक्षस्यप्रहोषिणः । इन्दोरिन्द्रोयवाशिरः॥४॥

अपात् । ऊँ इति । शिप्री । अन्धसः । सुऽदक्षस्य ।
प्रऽहोषिणः । इन्दोः । इन्द्रः । यवऽआशिरः ॥ ४ ॥

शिक्ष । नः । इन्द्र । रायः । आ । पुरु । विद्वान् ।
ऋचीषम । अव । नः । पार्ये । धने ॥ ९ ॥

हे ऋचीषम स्तुत्यासम यद्वा ईषगतिहिंसादर्शनेषु अस्मादम् प्रत्ययः सर्वैर्गन्तव्य दर्शनीय वा उक्तगुणोपेत हे इन्द्र विद्वान् सर्वविषयज्ञानवान् त्वं शत्रुभ्यआहृत्य रायोधनानि नोस्मभ्यं पुरुबहुवारं शिक्ष प्रयच्छ। यद्वा पुरुइति रायोविशेषणं बहूनि धनानि प्रयच्छ। किंच पार्ये पाराः शत्रवः तत्रभवे धने आजिहीर्षिते शत्रुधने नोस्मानव रक्ष शत्रून्हत्वा तद्धनेनास्मान्पालयेत्यर्थः॥९॥

अथ दशमी–

अतंश्चिदिन्द्रणउपायाहिशतवाजया। इषासहस्रवाजया॥१०॥१६॥

अतः। चित्। इन्द्र। नः। उप। आ। याहि। शतऽवाजया।
इषा। सहस्रऽवाजया॥ १०॥ १६॥

हे इन्द्र अतश्चिदस्मादधुलोकादेव। यद्वा अस्माच्छत्रुस्थानात् शतवाजया शतसंख्याकबलयुक्तेन तथा सहस्रवाजया वाजोन्नं सहस्रसंख्यान्नवता बहुबलान्नेन इषा अन्नरसेन युक्तः सन् नोस्मानुपायाहि अधिकं आभिमुख्येन आगच्छ ॥ १० ॥

॥ इति पष्ठस्य षष्ठे षोडशोवर्गः ॥ १६ ॥

अथैकादशी–

अयामधीवतोधियोर्वद्भिःशक्रगोदरे। जयेमपृत्सुवज्रिवः॥ ११॥

अयाम। धीऽवतः। धियः। अर्वत्ऽभिः। शक्र।
गोऽदरे। जयेम। पृत्ऽसु। वज्रिऽवः॥ ११॥

हे शक्र समर्थेन्द्र धीवतः छन्दसीरइति मतुपोवत्वं कर्मकरणात् कर्मवन्तोवयं धियः युद्धजयार्थं कर्माणि अयाम गच्छाम। ततः गोदरे दृविदारणे अचइतिप्रत्ययः गवां पर्वतानां दरयितः हे वज्रिवः वज्रवन्। यद्वा वजनं गमनं वज्रः तद्वान् कुलिशः तद्वन्निन्द्र पृत्सु संग्रामेषु अर्वद्भिः सर्वतोगन्तृभिः त्वया दत्तैरश्वैः जयेम वयं त्वत्प्रसादाच्छत्रून् जेष्यामः ॥ ११ ॥

अथ द्वादशी–

वयमुंत्वाशतक्रतोगावोनयवंसेष्वा । उक्थेषुंरणयामसि ॥ १२॥

वयम् । ऊँ इति । त्वा । शतक्रतो इति शतऽक्रतो । गार्वः ।
न । यवंसेषु । आ । उक्थेषुं । रणयामसि ॥ १२ ॥

हे शतक्रतो बहुप्रज्ञान बहुकर्मवन् वा इन्द्र त्वा सर्वतः उ इत्यवधारणे त्वामेव उक्थेषु स्तोत्रशस्त्रादिकेषु वयं रणयामसि इदंतोमसिः । आरणयामः शब्दयामः रमयामइत्यर्थः । तत्रदृष्टान्तः–गावेन यथा गोपालो यवसेषु तृणविशेषेषु गावो गाः पशूनासमन्तात् रमयति तद्वद् । गावइति सर्वविधीनां छन्दसि विकल्पितत्वात् ओत्वाभावः ॥ १२ ॥

अथ त्रयोदशी–

विश्वाहिमर्त्यत्वनानुकामाशंतक्रतो । अगंन्मवज्रिन्नाशसंः॥१३॥

विश्वा । हि । मर्त्यऽत्वना । अनुऽकामा । शतक्रतो इति
शतऽक्रतो । अगंन्म । वज्रिन् । आऽशसंः ॥ १३ ॥

हे शतक्रतो बहुप्रज्ञेन्द्र मर्त्यत्वना मर्त्यत्वानि सुपांसुलुगिति विभक्तेराकारादेशः संज्ञापूर्वकस्य विधेरनित्यत्वाद्दीर्घाभावः । विश्वाहि विश्वान्येव मर्त्यत्वानि अनुकामाकामानभिलाषाननुगतानि कामोपेतानीत्यर्थः । मनुष्याश्चैतानि कामयन्तइत्यर्थः । तथासति हे वज्रिन् वज्रवन्निन्द्र वयमाशसः आशंसनानि धनादिकामानगन्म अवगच्छामः । गमेर्लेडि बहुलंछन्दसीति शपोलुक् म्वोश्चेति मकारस्य नकारः ॥ १३ ॥

अथ चतुर्दशी–

त्वेसुपुंत्रशवसोवृत्रन्कामंकातयः । नत्वामिन्द्रातिरिच्यते ॥ १४॥

त्वे इति । सु । पुत्र । शवसः । अवृंत्रन् । कामंऽकातयः ।
न । त्वाम् । इन्द्र । अति । रिच्यते ॥ १४ ॥

हे शवसस्पुत्र बलनिमित्तमुत्पन्नत्वाद्बलस्यपुत्रेन्द्र कामकातयः कैगै शब्दे कामपराः कातयः शब्दायेषां भवन्ति ते तथोक्ताः तादृशामनुष्याः त्वे त्वयि स्ववृत्रन् स्वस्वकामाभि-

शिप्री शिप्रेहनूनासिकेवा शोभनहनुः यद्वा शिप्राः शीर्षण्याः सुशिरस्त्राणः सइन्द्रएव प्रहोषिणः प्रकर्षेण देवान् हविर्भिर्जुहुतः सुदक्षस्य एतन्नामकस्य ऋषेः संबन्धि यवाशिरः श्रीञ्पाके आङ्पूर्वस्य अपस्पृधेथामानृचुरित्यादिना धातोः शिरादेशः यवैरामिश्रितं यवैः सह पक्वं इन्दोः सर्वतः पात्रेषु क्षरन्त अन्धसः सोमलक्षणमन्नमपादपिबत् । यद्वा अस्यसोमस्य भागमिन्द्रार्थं परिकल्पितं सोमांशमपिबत् । उइत्यवधारणे ॥ ४ ॥

अथ पञ्चमी–

तम्वभिप्रार्चतेन्द्रंसोमस्यपीतये । तदिद्ध्यस्यवर्धनम् ॥ ५ ॥ १५ ॥

तम् । ऊँ इति । अभि । प्र । अर्चत । इन्द्रम् । सोमस्य ।
पीतये । तत् । इत् । हि । अस्य । वर्धनम् ॥ ५ ॥ १५ ॥

हे ऋत्विजः तमु तमेवेन्द्रं अभ्याभिमुख्येन प्रार्चत प्रकर्षेण स्तुत । किमर्थं सोमपीतये अत्रागत्य सोमपानाय । किमर्थं सोमपानायेति विशेष्यते तदाह–तदित् तत्सोमपानमेव अस्येन्द्रस्य वर्धनं वर्धकं भवति खलु तस्मात्सोमपानजहर्षाय प्रार्चत ॥ ५ ॥

॥ इति पञ्चस्य षष्ठे पञ्चदशोवर्गः ॥ १५ ॥

अथ षष्ठी–

अस्यपीत्वामदानांदेवोदेवस्यौजसा । विश्वाभिभुवनाभुवत् ॥ ६ ॥

अस्य । पीत्वा । मदानाम् । देवः । देवस्य । ओजसा ।
विश्वा । अभि । भुवना । भुवत् ॥ ६ ॥

देवोद्योतमानइन्द्रः अस्य अस्माभिर्दीयमानस्य सोमस्य मदानां मदकरान् रसान् पीत्वा पानं कृत्वा । यद्वा अस्य एतं सोमं पीत्वा । तथा मदानां मदसाधनादीनि भक्षयित्वा देवस्य गृहेषु शोभमानस्य । यद्वा देवनशीलस्य देवैः काम्यमानस्य सोमस्य पानजातेन ओजसा बलेन विश्वा भुवना सर्वाणि भुवनानि भूतजातानि अभिभुवत् अभिभवति । सोमस्य तामदइन्द्रश्चकारेत्यादि[1] । सोमपानमदे सर्वाणिवृत्रहननादिकर्माणि चकारेति । एवमत्रापि सर्वाणि भूताभिभवनादीनि कर्माण्यकार्षीदिति ॥ ६ ॥

1 ऋ० सं० २ ६ १५ ।

प्रथमेपर्याये होतुःशस्त्रे त्यमुवःसत्रासाहमित्यादि सूक्तशेषः । सूत्रितंच—त्यमुवःसत्रासाहमि-ति सूक्तशेषोभित्यंमपमिति । अतोयमिच्छायाकातिरिक्तोक्थ्ये त्यमुवःसत्रासाहमिति तृचोवैक-ल्पिकःस्तोत्रियः । सूत्रितंच—त्यमुवःसत्रासाहं सत्रातेअनुकृष्टयइतिवा स्तोत्रियानुरूपाविति । व्यूढस्य दशरात्रस्य चतुर्थेहनि निष्केवल्ये एषएवतृचोनिविद्धानीयः । सूत्रितंच—इमंनुमायिनं-हुवे त्यमुवःसत्रासाहमिति ।

तत्र प्रथमा सूक्ते सप्तमी—

त्यमुं॑वः सत्रा॒साहं॒ विश्वा॑सु गी॒र्ष्वाय॑तम् । आच्या॑वयस्यू॒तये॑ ॥ ७ ॥

त्यम् । ॐ॒ इति॑ । वः॒ । स॒त्रा॒ऽसह॑म् । विश्वा॑सु । गीः॒षु॑ ।
आ॒ऽय॑तम् । आ । च्य॒व॒य॒सि॒ । ऊ॒तये॑ ॥ ७ ॥

यजमानः स्तोतारं संबोध्याह हे स्तोतः सत्रासाहं सत्राशब्दोबहुवाची बहूनामभिभवि-तारं । यद्वा शत्रून् स्वबलेन संगत्य जेतारं वोयुष्मदीयेषु विश्वासु गीर्षु सर्वेषु स्तोत्रेषु आयतं विस्तृतं सर्वेरिन्द्रएव स्तूयते तस्मात्तेषु विततं त्यं उइत्यवधारणे तमेवेन्द्रं ऊतये अस्मद्रक्षणाय आच्यावयसि । च्युङ् ष्रुङ् गतौ । त्वदीयैः स्तोत्रैर्यतं मत्याभिमुख्येनागमय ॥ ७ ॥

अथाष्टमी—

यु॒ध्मं सन्त॑मन॒र्वाणं॑ सोम॒पामन॑पच्युतम् । नर॑मवा॒र्यक्र॑तुम् ॥ ८ ॥

यु॒ध्मम् । सन्त॑म् । अ॒न॒र्वाण॑म् । सो॒म॒ऽपाम् । अन॑पऽच्युतम् ।
नर॑म् । अ॒वा॒र्यऽक्र॑तुम् ॥ ८ ॥

एवंगुणोपेतं इन्द्रं आगमयेत्याह—युध्मं शत्रूणां संप्रहारकं सन्तं अतएवानर्वाणमन्यैरप्र-त्यृतं अनभिगतं तस्मात् अनपच्युतं संग्रामेषु शत्रुभिरहिंसितं सोमपां सोमस्य पातारं अस्य सोमस्य मदे सति अवार्यक्रतुं भटैरनिवारणीयकर्माणं नरं सर्वस्य नेतारं एतादृग्गुणोपेतमिन्द्र-मागमयेति पूर्वेणसह संबन्धः ॥ ८ ॥

अथ नवमी—

शिक्षा॑ ण इन्द्र रा॒य आ पु॑रु वि॒द्वाँ ऋ॑चीषम । अवा॑ नः॒ पार्ये॒ धने॑ ॥ ९ ॥

पूरणार्थं सुष्ठु वर्तन्ते तस्मान्मर्त्यत्वानि कामोपेतानीत्युत्पन्नं । वृतुवर्तने लङि छान्दसोविकरण-स्यलुक् बहुलंछन्दसीति रुडागमः । यतएवं ततः हे इन्द्र त्वां कश्चिदपि देवोनातिरिच्यते बलेन धनेनवा अतिरिक्तः समर्थोनास्ति ॥ १४ ॥

अथ पंचदशी–

सनोवृषन्त्सनिष्ठयासंघोरयाद्रवित्न्वा । धियाविड्ढिपुरंध्या ॥१५॥१७॥

सः । नः । वृषन् । सनिष्ठया । सम् । घोरया । द्रवित्न्वा ।
धिया । अविड्ढि । पुरम्ऽध्या ॥ १५ ॥ १७ ॥

हे वृषन् कामानां वर्षितरिन्द्र सपूर्वोक्तलक्षणस्त्वं सनिष्ठया षणुदाने धनादेर्दातृतमया घोरया सपत्नानां भयकारिण्या अतएव द्रवित्न्वा द्रावयित्र्या शत्रूणां पलाययित्र्या । द्रवतेरि-त्नुच्प्रत्ययः । पुरंध्या बहूनां धारयित्र्या पोषयित्र्या धिया तादृशेन कर्मणा नोस्मान् समवि-ड्ढि समन्तात्पालय । अवतेर्लेटि बहुलंछन्दसीति शपोलुक् बहुलवचनात्सिपइडागमः । अस्मान् धनदानादिना रक्षेत्यर्थः ॥ १५ ॥

॥ इति षष्ठस्य षष्ठे सप्तदशोवर्गः ॥ १७ ॥

अथ षोडशी–

यस्तेनूनंशतक्रतविन्द्रद्युम्नितमोमदः । तेननूनंमदेमदेः ॥ १६ ॥

यः । ते । नूनम् । शतक्रतो इति शतऽक्रतो । इन्द्र ।
द्युम्निऽतमः । मदः । तेन । नूनम् । मदे । मदेरिति मदेः ॥ १६ ॥

अत्र सोमः स्तूयते–हे शतक्रतो शतविधप्रज्ञान हे इन्द्र द्युम्नितमः यशस्वितमः योमदः माद्यत्यनेनेति मदःसोमः यः सोमः नूनं पुरा ते त्वदर्थमस्माभिरभिषुतोस्ति । तेन अस्माभिः प्रदीयमानसोमेन नूनमिदानीं मदे तत्पानेन मदे तव संजाते सति अस्मानपि मदेः धनादिदा-नेन त्वं मादय । मदीहर्षे अत्रान्तर्णीतण्यर्थः । बहुलमितिशप् ॥ १६ ॥

अथ सप्तदशी–

यस्तेचित्रश्रवस्तमोयइन्द्रवृत्रहन्तमः । यओजोदातमोमदः ॥१७॥

यः । ते । चित्रश्रवःऽतमः । यः । इन्द्र । वृत्रहन्ऽतमः ।
यः । ओजःऽदातमः । मदः ॥ १७ ॥

हे इन्द्र चित्रश्रवस्तमः अतिशयेन नानाविधकीर्तिः योमदः सोमः ते त्वदर्थमस्माभिरभिषुतः यः सोमः वृत्रहन्तमः अतिशयेन पापानां हन्ता । किंच यः सोमः ओजोदातमः अतिशयेन बलस्य दाता तेनास्माभिर्दीयमानेन सोमेन त्वं मादयेरिति पूर्वेणसंबन्धः ॥ १७ ॥

अथाष्टादशी—

विद्माहियस्तेअद्रिवस्त्वादत्तःसत्यसोमपाः । विश्वासुदस्मकृष्टिषु ॥ १८ ॥

विद्म । हि । यः । ते । अद्रिऽवः । त्वाऽदत्तः । सत्य । सोमऽपाः ।
विश्वासु । दस्म । कृष्टिषु ॥ १८ ॥

हे अद्रिवः अद्रिवज्रः तद्वन् हे सत्य यथार्थकर्मन् सोमपाः सोमस्यपातः दस्म दर्शनीय यद्वा शत्रूणामुपक्षपयितरिन्द्र विश्वासु कृष्टिषु सर्वेषु सोमस्यदातृषु यजमानेषु त्वादत्तः त्वयादत्तः ते त्वदीयोयोरयिरस्ति तं विद्महि यद्यपरोवयं अपि जानीमएव । यद्वा हे इन्द्र सर्वेषु यष्टृषु मध्ये वयं ते त्वदीयमेव नान्यदीयमिति तं सोमं जानीमएव । यः सोमः त्वादत्तः अस्माभिस्त्वदर्थं दीयते अत्र त्वादेशश्छान्दसः ॥ १८ ॥

प्रथमेपर्यायेच्छावाकस्य इन्द्रायमद्वनेसुतमिति स्तोत्रियः । सूत्रितंच—इन्द्रायमद्वनेसुतमिन्द्रमिद्गाथिनो बृहदिति ।

तत्र प्रथमा सूक्ते एकोनविंशी—

इन्द्रायमद्वनेसुतंपरिष्टोभन्तुनोगिरः । अर्कमर्चन्तुकारवः ॥ १९ ॥

इन्द्राय । मद्वने । सुतम् । परि । स्तोभन्तु । नः ।
गिरः । अर्कम् । अर्चन्तु । कारवः ॥ १९ ॥

मद्वने मायतेः क्वनिप् मदनशीलायेन्द्राय तदर्थं सुतमभिषुतं सोमं नोस्मदीया गिरः स्तुतिलक्षणावाचः परिष्टोभन्तु स्तोभतिः स्तुतिकर्मा परितः सोमं स्तुवन्तु । ततः कारवः स्तुतिकारिणः स्तोतारश्च अर्कं सर्वैरर्चनीयं सोममर्चन्तु पूजयन्तु ॥ १९ ॥

अथ विंशी—

यस्मिन्विश्वाअधिश्रियोरणन्तिसप्तसंसदः। इन्द्रंसुतेहवामहे॥२०॥१८॥

यस्मिन्। विश्वाः। अधि। श्रियः। रणन्ति। सप्त।
सप्तऽसंसदः। इन्द्रम्। सुते। हवामहे ॥ २० ॥ १८ ॥

यस्मिन्निन्द्रे विश्वाः सर्वाः श्रियः कान्तयः अधि अधिकं भवन्ति अतिशयेन तेजस्वीत्यर्थः। किंच सप्त सप्तसंख्याकाः संसदः सम्यग्यज्ञेषु कर्मकरणार्थं सीदन्तीति संसदो होत्रकाः यस्मिन् रणन्ति सोमप्रदानार्थं रमन्ते। यद्वा यं शब्दयन्ति स्तुवन्ति तं पूर्वोक्तलक्षणमिन्द्रं सुते सोमेभिषुते सति हवामहे वयं सोमपानायाह्वयामः ॥ २० ॥

॥ इति षष्ठस्य षष्ठेऽष्टादशोवर्गः ॥ १८ ॥

अथैकविंशी—

त्रिकद्रुकेषुचेतनंदेवासोयज्ञमत्नत। तमिद्वर्धन्तुनोगिरः ॥ २१ ॥

त्रिऽकद्रुकेषु। चेतनम्। देवासः। यज्ञम्। अत्नत।
तम्। इत्। वर्धन्तु। नः। गिरः ॥ २१ ॥

हे देवासो देवा इन्द्रादयः त्रिकद्रुकेषु आभिप्लविकेष्वहस्सु ज्योतिर्गौरायुरिति त्रिकद्रुकाः तेषु चेतनं चितीसंज्ञाने चेतन्ति जानन्ति अनेन स्वर्गादिकमिति चेतनः ज्ञानसाधनं यज्ञं अत्नत अतन्वत स्वैः स्वैः कर्मभिः पात्रैश्च विस्तारितवन्तः। तनुविस्तारे लङि बहुलंछन्दसीति विकरणस्यलुक् तनिपत्योश्छन्दसीति उपधालोपः। तमिद तमेव अस्मदीयं यज्ञं नोस्माकं गिरः स्तुतिलक्षणावाचो वर्धंतु वर्धयन्तु ॥ २१ ॥

अथ द्वाविंशी—

आत्वाविशन्त्विन्दवःसमुद्रमिवसिन्धवः। नत्वामिन्द्रातिरिच्यते॥२२॥

आ। त्वा। विशन्तु। इन्दवः। समुद्रम्ऽइव। सिन्धवः।
न। त्वाम्। इन्द्र। अति। रिच्यते ॥ २२ ॥

हे इन्द्र इन्दवः स्रवन्तः अस्माभिर्दीयमानाः सोमाः त्वा त्वां आविशन्तु सर्वतः प्रविशन्तु। तत्रदृष्टान्तः—समुद्रमिवसिन्धवः स्यन्दमाना नद्योयथा समुद्रं जलाशयं सर्वतःप्रविशन्ति तद्वत्। यतएवं तस्मात् हे इन्द्र त्वां कश्चिदपि देवोबलेन धनेनवा नातिरिच्यते नातिरिक्तोस्ति सामर्थ्यवान् त्वत्तोधिकोनास्तीत्यर्थः॥ २२॥

अथ त्रयोविंशी—

विव्यक्थमहिनावृषन्भक्षंसोमस्यजागृवे। यइन्द्रजठरेषुते॥२३॥

विव्यक्थ। महिना। वृषन्। भक्षम्। सोमस्य।
जागृवे। यः। इन्द्र। जठरेषु। ते॥ २३॥

हे वृषन् कामानांवर्षितः हे जागृवे जागरणशीलेन्द्र त्वं तस्य सोमस्य भक्षं पानं प्रति महिना स्वमहिम्ना विव्यक्थ सर्वतो व्याप्तवानसि। व्यचेर्लिटि थलि अभ्यासस्योभयेषामिति संप्रसारणं। हे इन्द्र यः सोमः ते जठरेषु उदरेषु प्रविशति तस्य पानं व्याप्तवानसीतिशेषः॥२३॥

अथ चतुर्विंशी—

अरंतइन्द्रकुक्षयेसोमोभवतुवृत्रहन्। अरंधामभ्यइन्दवः॥ २४॥

अरम्। ते। इन्द्र। कुक्षये। सोमः। भवतु। वृत्रऽहन्।
अरम्। धामऽभ्यः। इन्दवः॥ २४॥

हे वृत्रहन् वृत्रस्यापामावरकस्यासुरस्य पापस्यवा हन्तर्हे इन्द्र सोमोस्माभिर्दीयमानस्ते तव कुक्षये अरमलं पर्याप्तोभवतु। किंच इन्दवः सर्वतः क्षरणशीलाः सोमाः तवधामभ्यः नानाविधेभ्यःशरीरेभ्यःतव तेजोभ्योवा अरमलं पर्याप्ताभवन्तु। अनेन तेजसा हविर्भोक्तृत्वमस्तीति सूचितं। अस्मदीयाः सोमाएव तवकुक्षये देहेभ्योपि पर्याप्ताभवन्तु नान्यदीया इतिभावः॥२४॥

अथ पञ्चविंशी—

अरमश्वायगायतिश्रुतकक्षोअरंगवे। अरमिन्द्रस्यधाम्ने॥ २५॥

अरम्। अश्वाय। गायति। श्रुतऽकक्षः। अरम्।
गवे। अरम्। इन्द्रस्य। धाम्ने॥ २५॥

श्रुतकक्षोनामकऋषिः गवाश्वादिलाभार्थमिन्द्रं स्तौति—अयं श्रुतकक्षः एतन्नामकऋषिः अश्वाय इन्द्रेण दीयमानायाश्वाय एतदर्थं अरमलं गायति इन्द्रविषयं स्तोत्रं करोति । तथा गवे अरमलं गायति इन्द्रस्य इन्द्रकर्तृकाय धाम्ने गृहाय तदर्थं च अरं पर्याप्तं स्तौति । यदश्वादिकमिन्द्रः प्रयच्छति तस्मै गायतीति । यद्वा इन्द्रस्येति कर्मणि षष्ठी गवादिलाभार्थमिन्द्रं स्तौति ॥ २५ ॥

अथ षड्विंशी—

अरं॒हि ष्मा॑सु॒तेषु॑णः॒सोमे॑ष्विन्द्र॒भूष॑सि । अरं॑तेशक्रदा॒वने॑॥२६॥१९॥

अर॑म् । हि । स्म॒ । सु॒तेषु॑ । नः॒ । सोमे॑षु । इ॒न्द्र॒ । भूष॑सि ।
अर॑म् । ते॒ । श॒क्र॒ । दा॒वने॑ ॥ २६ ॥ १९ ॥

हे इन्द्र सुतेष्वभिषुतेषु नोऽस्मदीयेषु सोमेषु । हिष्मेत्यवधारणे त्वमेव तेषां पाने अलं पर्याप्तोभूषसि भवसि । यद्वा सोमेष्वभिषुतेषु सत्सु नोऽस्माकं पर्याप्तं धनं भूषसि । भूषतौ त्वं भावय । तथा हे शक्र समर्थेन्द्र दावने धनादिकस्य दात्रे ते तुभ्यं अस्माभिर्दीयमानाः सोमाः अरमलं पर्याप्ता भवन्तु ॥ २६ ॥

॥ इति पञ्चमस्य षष्ठे एकोनविंशोवर्गः ॥ १९ ॥

अथ सप्तविंशी—

परा॒काता॑च्चिदद्रिव॒स्त्वांन॑क्षन्तनो॒गिरः॑ । अरं॑गमाम॒तेव॒यम् ॥२७॥

प॒रा॒काता॑त् । चि॒त् । अ॒द्रि॒ऽवः॒ । त्वाम् । न॒क्ष॒न्त॒ । नः॒ ।
गिरः॑ । अर॑म् । ग॒मा॒म॒ । ते॒ । व॒यम् ॥ २७ ॥

हे अद्रिवः वज्रवन्निन्द्र नोऽस्मदीयागिरः इतोनिर्गताः स्तुतयः पराकातात् । चिदप्यर्थः । अतिदूरादपि त्वां नक्षन्त व्याप्नुवन्तु किमुत समीपस्थं त्वां अश्नुवन्तामिति । नक्षतेर्व्याप्तिकर्मणो नशादेर्वा लेटि सिपि रूपं । एवं सति स्तोतारो वयं त्वदीयं धनमरमलं पर्याप्तं गमाम त्वत्तो गच्छाम ॥२७॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिन एवाह्यसिपीरयुरिति वैकल्पिकः स्तोत्रियः । सूत्रितं च—एवाह्यसिपीरयुरेवाह्यस्यद्यूनेति ।

अथवा यागादिकर्मपरित्यागेनालस्यमिच्छन् नास्तिको ब्राह्मणइव त्वं मोषु भुवः सुष्टु मा भवः। सर्वदा अस्मत्कर्मान्वितो भवेत्याशासनं। तदेवाह—सुतस्याभिषुतस्य ततो गोमतः गव्येन क्षीरेण दध्नावा मिश्रणवतः सोमस्य पानेन मत्स्व माद्य। हृष्टोभव ॥ ३० ॥

अथैकत्रिंशी—

मानंइन्द्राभ्याऽऽदिशःसूरोअक्तुष्वायंमन्। त्वायुजावनेमतत्॥३१॥

मा। नः। इन्द्र। अभि। आऽदिशः। सूरः। अक्तुषु।
आ। यमन्। त्वा। युजा। वनेम। तत्॥ ३१ ॥

हे इन्द्र आदिशः आदेष्टारः समन्तादायुधान्यतिविसृजन्तः सूरः सूगतौ सर्वत्र सरणशीलाराक्षसाः अक्तुषु रात्रिषु दिवापि नोस्माकं माभ्यायमन् आभिमुख्येन मा नियन्तारोभवन्तु। यद्यागताश्चेत् तदा तद्रक्षःकुलं त्वा त्वया युजा सहायेन वयं वनेम अहन्म। क्षय कथकुय हिंसार्थाः। वनचेति पठितत्वात्सिद्धार्थः ॥ ३१ ॥

अथ द्वात्रिंशी—

त्वयेदिन्द्रयुजावयंप्रतिब्रुवीमहिस्पृधः। त्वमस्माकंतववस्मसि॥३२॥

त्वया। इत्। इन्द्र। युजा। वयम्। प्रति। ब्रुवीमहि।
स्पृधः। त्वम्। अस्माकम्। तव। स्मसि॥ ३२ ॥

हे इन्द्र त्वयैव। इदवधारणे। त्वयैव युजा सहायेन स्पृधः स्पर्धमानान् शत्रून् वयं प्रतिब्रुवीमहि निराकुर्वीमहि। प्रतिवचनं निराकरणं। उत्तरार्धेन इन्द्रसाहाय्यमेव प्रतिपादयति—हे इन्द्र त्वमस्माकं भवसि स्तुत्यस्तोतृयष्टृयष्टव्यतया त्वमस्माकं भवसि। वयं तवस्मसि भवामः। तथारण्यके—त्वमिदं सर्वमसि तवेदयमसः त्वमस्माकमसीति। तस्मात्त्वया सहायेन शत्रून्हन्यामेति ॥ ३२ ॥

अथ त्रयस्त्रिंशी—

त्वामिद्धित्वायवोनुनोनुवतश्चरान्। सखायइन्द्रकारवः॥३३॥२०॥

त्वाम् । इत् । हि । त्वाऽयवः । अनुऽनोनुवतः । चरान् ।
सखायः । इन्द्र । कारवः ॥ ३३ ॥ २० ॥

हे इन्द्र कर्मोपद्रवपरिहारादनन्तरं त्वायवः त्वां धनादिदानार्थं कामयमानाः अतएव अनुनोनुवतः नौतेर्यङ्लुगन्तस्य शतरिरूपं । अनुक्रमेण पुनःपुनः स्तुतिंकुर्वन्तः तस्मात्तव सखायः सखिभूताः कारवः स्तोतारः त्वामित् इदवधारणे त्वामेव चरान् स्तुतिभिः परिचरन्तु खलु । हीति प्रसिद्ध्यर्थः । चरतेर्लेटयडागमः । हियोगादनिघातः ॥ ३३ ॥

॥ इति षष्ठस्य षष्ठे विंशोवर्गः ॥ २० ॥

उद्धेति चतुस्त्रिंशदृचं त्रयोदशंसूक्तं सुकक्षस्यार्षं गायत्रमैन्द्रं अन्त्यास्त्विन्द्रऋभुदेवताका । तथाचानुक्रान्तं—उद्धचतुस्त्रिंशत्सुकक्षोन्त्यैन्द्रार्भवीति । द्वितीयेपर्याये होतुःशस्त्रे उत्तमावर्जमेतत्सूक्तं । सूत्रितंच—उद्धेदभीत्युत्तमामुद्धरेदिति । महाव्रतेप्यस्यविनियोगः पूर्वसूक्तेनसहोक्तः । ज्योतिष्टोमे ब्राह्मणाच्छंसिशस्त्रे आद्यस्तृचः । सूत्रितंच—उद्धेदभीतितिस्र इन्द्रक्रतुविदंसुतमिति याज्येति । तथासोर्यामे मैत्रावरुणातिरिक्तोक्थे अयंतृचोनुरूपः । सूत्रितंच—यद्द्यकच्चवृत्रहन्नुद्धेदभिश्रुतामघमानोविश्वाभिरिति ।

तत्र प्रथमा—

उद्धेदभिश्रुतामघंवृषभंनर्यापसम् । अस्तारमेषिसूर्य ॥ १ ॥

उत् । घ । इत् । अभि । श्रुतऽमघम् । वृषभम् ।
नर्यऽअपसम् । अस्तारम् । एषि । सूर्य ॥ १ ॥

सुकक्ष इन्द्रगुणानाह—हे सूर्य द्वादशसु भानुषु इन्द्रोपि सूर्यात्मना पठितः तस्मात्सूर्यात्मक सुवीर्य हे इन्द्र श्रुतमघं सर्वदा देयत्वेन विख्यातधनं अतएव वृषभं याचमानानां धनस्य वर्षितारं नर्यापसं नरहितं नर्यं नरहितकर्माणं अस्तारं दानशौंडं औदार्यवन्तं एतादृशानुभावं अभितः उदेषि । इदवधारणे । त्वमेव तस्ययज्ञे सूर्यात्मना उद्गतोसि । घेति प्रसिद्धौ ॥ १ ॥

अथ द्वितीया—

नवयोनवतिंपुरोबिभेदबाह्वोजसा । अहिंचवृत्रहावधीत् ॥ २ ॥

नर्व । यः । नवतिम् । पुरः । बिभेर्द । बाहुऽओजसा ।
अहिम् । च । वृत्रऽहा । अवधीत् ॥ २ ॥

यइन्द्रः नव नवतिं नवनवतिसंख्याकाः एकोनशतसंख्याकाः शंबरस्य पुरः पुरीः बाह्वोजसा स्वबाहुबलेनैव बिभेद दिवोदासाय भिनत्तिस्म । तथाचमंत्रः—दिवोदासायनवतिंचनवेन्द्रःपुरोव्यैरच्छंबरस्येति[1] । सवृत्रहा वृत्रासुरस्यहन्ता सइन्द्रः अहिंच न केनाप्यहन्तव्यं मेघं अपामावरकं वृत्रं वा अवधीत् सइन्द्रोस्माकं धनं ददात्वित्युत्तरेण संबन्धः ॥ २ ॥

अथ तृतीया—

सनइन्द्रःशिवःसखाश्वावद्गोमद्यवमत् । उरुधारेवदोहते ॥ ३ ॥

सः । नः । इन्द्रः । शिवः । सखा । अश्वऽवत् । गोऽमत् ।
यवऽमत् । उरुधाराऽइव । दोहते ॥ ३ ॥

सपूर्वोक्तलक्षणः शिवः कल्याणतमः सखा यद्वयथव्यस्तोवृस्तुल्यलक्षणेन संबन्धेनास्माकं मित्रभूतः एतादृशइन्द्रः अश्ववत् अश्वयुक्तं गोमत् पश्वादिसहितं यवमत् । अयवादिष्वइति च प्रतिषेधान्मतुपो वत्वाभावः । यवइति धान्यविशेषः धान्ययुक्तं धनं नोस्मभ्यं दोहते । दोग्धु ददातु । दृष्टान्तः—उरुधारेव दोहनकाले प्रभूतपयोधारा यद्वा बहूनां पोषयित्री गौः यथा वत्सस्य पयोदोग्धि तथा प्रभूतं धनमस्माकं दोग्धु ददातु । दुहेर्लेट्यडागमः ॥ ३ ॥

अप्तोर्यामे मैत्रावरुणातिरिक्तोक्थे यदद्येतितृचःस्तोत्रियः सूत्रंतुपूर्वेण तृचेन सहोदाहृतम् ।

तस्मिन्प्रथमा सूक्ते चतुर्थी—

यदद्यकच्चवृत्रहन्नुदगाअभिसूर्य । सर्वंतदिन्द्रतेवशे ॥ ४ ॥

यत् । अद्य । कत् । च । वृत्रऽहन् । उत्ऽअगाः । अभि ।
सूर्य । सर्वम् । तत् । इन्द्र । ते । वशे ॥ ४ ॥

---

1 ऋ० सं० २. ६. २४. ।

हे वृत्रहन् वृत्रस्यापामावरकस्य मेघस्य हन्तः हे सूर्य सूर्यात्मकेन्द्र अद्यास्मिन्दिने यत् कच्च यत्किंचित् पदार्थजातमभि अभिमुखीकृत्य उदगाः इणगतौ उत्पूर्वः तस्य लुङि गादेशः। स्वतेजसा उद्गतः प्रादुर्भूतोसि तदा तत्सर्वं स्थावरजंगमात्मकं जगत् ते तव वशेभवति त्वदधीनं भवति। उदितेसूर्ये त्वदर्थं प्राक्कर्म कुर्वन्ति जुह्वति च ॥ ४ ॥

अथ पंचमी–

यद्वाप्रवृद्धसत्पतेनमराइतिमन्यसे। उतोतत्सत्यमित्तव॥५॥२१॥

यत्। वा। प्रऽवृद्ध। सत्ऽपते। न। मरै। इति। मन्यसे।
उतो इति। तत्। सत्यम्। इत्। तव॥ ५ ॥ २१ ॥

वाशब्दः समुच्चये अपिच हे प्रवृद्ध स्वबलेन प्रवर्धमान सत्पते सतांपते स्वप्रकाशाधिक्येन सतां नक्षत्राणां पते हे इन्द्र नमरै इति मनुष्यवद्वार्धकेनाहं नम्रिये इति यद्यदि मन्यसे बुध्यसे। मृङ्प्राणत्यागे लेटचडागमः वैतोन्यत्रेत्यैकारः। उतो अपिच तव तत् नम्रिये इति मननं सत्यमित् यथार्थमेव। इन्द्रो नम्रियत इत्यर्थे मंत्रान्तरं–नह्यस्याअपरंचनजरसामरतेपतिंरिति॥५॥

॥ इति पष्ठस्य षष्ठे एकविंशोवर्गः ॥ २१ ॥

अथ षष्ठी–

येसोमासःपरावतियेअर्वावतिसुन्विरे। सर्वांस्ताँइन्द्रगच्छसि॥६॥

ये। सोमासः। पराऽवति। ये। अर्वाऽवति। सुन्विरे।
सर्वान्। तान्। इन्द्र। गच्छसि॥ ६ ॥

हे इन्द्र ये सोमासः सोमाः परावति विप्रकृष्टेतिदूरदेशे ये सोमाः अर्वावति अन्तिकतमे देशे च सुन्विरे छन्दसि द्विर्वचनस्य विकल्पितत्वादत्रद्विर्वचनाभावः सुनोतेः कर्मणि लिटि व्यत्ययेनश्नुः येसोमाः ऋत्विग्भिरभिपूयन्ते सर्वान् दूरे समीपेचाभिपूयमाणांस्तान् सोमान् गच्छसि तत्पानार्थं युगपत् प्राप्नोषि। अनेनेन्द्रस्य सर्वगतत्वं सूचितम् ॥ ६ ॥

अप्तोर्यामे ब्राह्मणाच्छंसिनोतिरिक्तोक्थ्ये तमिन्द्रंवाजयामसीति स्तोत्रियस्तृचः। सूत्रितं च–तमिन्द्रंवाजयामसि महाँइंद्रोयओजसेति। व्यूळ्हस्य दशरात्रस्य पंचमेहनि निष्केवल्ये अयमेवतृचोनिविद्धानीयः। सूत्रितंच व्यूळ्हस्येतिखंडे–मरुत्वांइन्द्रमीढ्वस्तमिन्द्रंवाजयामसीति।

1 ऋ० सं० ८. ४. ३.।

तत्र प्रथमा सूक्ते सप्तमी—

तमिन्द्रंवाजयामसिमहेवृत्रायहन्तवे । सवृषांवृषभोभुवत् ॥ ७ ॥

तम् । इन्द्रम् । वाजयामसि । महे । वृत्राय । हन्तवे ।
सः । वृषा । वृषभः । भुवत् ॥ ७ ॥

यजमानाआहुः तं पूर्वोक्तलक्षणमिन्द्रं वाजयामसि वाजयामः सोमेन स्तुतिभिर्वा वाजवन्तं बलवन्तं कुर्मः । किमर्थं महे महते वृत्राय अपामावरकं वृत्रासुरं हन्तवे हन्तुं सोमपानेन मत्तः स्तुतिभिर्वा स्तुतःसन् वृत्रहन्तवे वाजयामसि वाजवन्तं करोतीत्यर्थे तत्करोतीति णिच् णाविष्ठवदितिणेरिष्ठवद्भावात् टेरिति टिलोपः विन्मतोर्लुगितिवचनान्मतुपोलुक् । वृषा धनानां सेक्ता दाता सइन्द्रः वृषभः अस्माकं स्तोतॄणां सोमस्यदातॄणां धनादिसेचको दाता भुवत् भवतु ॥ ७ ॥

अथाष्टमी—

इन्द्रःसदामनेकृतओजिष्ठःसमदेहितः । द्युम्नीश्लोकीससोम्यः॥८॥

इन्द्रः । सः । दामने । कृतः । ओजिष्ठः । सः । मदे ।
हितः । द्युम्नी । श्लोकी । सः । सोम्यः ॥ ॥ ८ ॥

सइन्द्रः दामने स्तोतृभ्यो धनादिदानायैवकृतः प्रजापतिना सृष्टः किंच ओजिष्ठः ओजस्वितमः सएवेन्द्रः मदे माद्यन्त्यनेनेति मदः सोमः तस्मिंश्च प्रजापतिना सृष्टिकाले हितः सोमपानार्थंच निहितइत्यर्थः । द्युम्नी द्युम्नं द्योततेर्यशोवान्नंवेति । यशस्वी अन्नवान्वा अतएव श्लोकी श्लोकः स्तुतिः तद्वान् सइन्द्रः सोम्यः सोमार्होभवति ॥ ८ ॥

अथ नवमी—

गिरावज्रोनसंभृतःसबलोअनपच्युतः । ववक्षऋष्वोअस्तृतः ॥९॥

गिरा । वज्रः । न । सम्ऽभृतः । सऽबलः । अनपऽच्युतः ।
ववक्षे । ऋष्वः । अस्तृतः ॥ ९ ॥

गिराःस्तुतिलक्षणया वाचा स्तोतृभिः संभृतः उत्पादितः तीक्ष्णीकृतः । तत्रदृष्टान्तः—व-ज्रेण वज्रायुधं यत्कर्तृभिर्निशितधारो यथाभवति तीक्ष्णीक्रियते तद्वत् स्तोतृभिः स्तुत्या सं-भृतः अतएव सबलः बलसहितः तस्मादनपच्युतः परैरपच्युतः अनभिगतइत्यर्थः तादृशः क-ण्वोमहान् दीप्यमानोवा अस्तृतः युद्धे शत्रुभिरहिंसितइन्द्रः ववक्षे स्तोतृभ्योधनादिकं वो-ढुमिच्छति ॥ ९ ॥

अथ दशमी—

दुर्गेचिन्नःसुगंकृधिगृणानइन्द्रगिर्वणः। त्वंचमघवन्वशः॥१०॥२२॥

दुःऽगे । चित् । नः । सुऽगम् । कृधि । गृणानः । इन्द्र । गिर्वणः । त्वम् । च । मघऽवन् । वशः । १० ॥ २२ ॥

हे गिर्वणः गीर्भिर्वननीयेन्द्र गृणानः स्तोतृभिः स्तूयमानस्त्वं नोस्माकं दुर्गेचित् दुर्गमे-पि मार्गे सुगं सुगमं पन्थानं कृधि तथाकुरु । हेमघवन् धनवन्निन्द्र त्वं चशब्दश्चेदर्थे यदि व-शः सोमपानार्थं त्वमदातृनस्मान् कामयेथाः तदा पन्थानं शोभनगमनं कुरुष्व वशेर्लेटयडाग-मः चशब्दयोगादनिघातः ॥ १० ॥

॥ इति षष्ठस्य षष्ठे द्वाविंशोवर्गः ॥ २२ ॥

अथैकादशी—

यस्यतेनूचिदादिशंनमिनन्तिस्वराज्यम्। नदेवोनाधिगुर्जनः॥११॥

यस्य । ते । नु । चित् । आऽदिशम् । न । मिनन्ति । स्वऽराज्यम् । न । देवः । न । अधिऽगुः । जनः ॥ ११ ॥

हे इन्द्र यस्य ते तव आदिशं आदिशति नयति सर्वत्र अनयेति आदिग्बलं औणादि-कः करणेप्रत्ययः । यद्वा आदेशएवादिक् आज्ञा भावेक्विप् त्वदीयामाज्ञां नूचिदिदानीं पुराच नमिनन्ति केचिदपि न हिंसन्ति । किंच स्वराज्यं तव स्वभूतं राज्यंच यद्वा स्वशब्देन स्वर्गो-भिधीयते स्वर्गस्वामित्वं च । नहिंसन्ति हिंसकानाह नदेवः त्वदन्योदेवोपिच तथाप्यधिगुःअ-धृतगमनः संग्रामेष्वरसाणो वीरोपि नच जनः मादृशैर्तोमनुष्योपि एवं नमिनन्तीत्यर्थः ॥ ११ ॥

अथ द्वादशी–

अधा॑ते॒अप्र॑तिष्कुतं॑दे॒वीशुष्मं॑सपर्य॑तः । उ॒भेसु॑शिप्र॒रोद॑सी ॥ १२॥

अध॑ । ते॒ । अप्र॑तिऽस्कुतम् । दे॒वी इति॑ । शुष्म॑म् ।
स॒प॒र्य॒तः । उ॒भे इति॑ । सु॒ऽशि॒प्र॒ । रोद॑सी॒ इति॑ ॥ १२ ॥

हे सुशिप्र सुहनो शोभनशिरस्त्राणेन्द्र अधापिच देवी देव्यौ स्वतेजसा दीप्यमाने उभे रोदसी द्यावापृथिव्यौ अप्रतिष्कुतं स्कुइति सौत्रोधातुः स्तंभनेवर्तते शत्रुभिरप्रतिरोधनीयं ते त्वदीयं शुष्मं परबलशोषकं बलं सपर्यतः पूजयतः त्वदधीनेएव भवतः ॥ १२ ॥

अथ त्रयोदशी–

त्वमे॒तद॑धारयः॒कृ॒ष्णासु॒रोहि॑णीषुच । परु॑ष्णीषु॒रुश॒त्पयः॑ ॥ १३ ॥

त्वम् । ए॒तत् । अ॒धा॒र॒यः॒ । कृ॒ष्णासु॑ । रोहि॑णीषु ।
च॒ । परु॑ष्णीषु । रुश॑त् । पयः॑ ॥ १३ ॥

अस्य सामर्थ्यमेवोपपादयति हे इन्द्र कृष्णासु कृष्णवर्णासु गोषु तथा रोहिणीषु वर्णादनुदात्तात्तोपधात्तोनइतिङीप् रोहितवर्णासुच परुष्णीषु गोषु रुशत् रोचतेर्दीप्तिकर्मणः दीप्यमानं श्वेतं एतत्परिदृश्यमानं पयः क्षीरं त्वमधारयः धारयसि तस्मात् त्वद्बलं पूजयतइति समन्वयः ॥ १३ ॥

अथ चतुर्दशी–

विय॒दहे॒रध॑त्वि॒षोविश्वे॑दे॒वासो॒अक्र॑मुः । वि॒दन्मृ॒गस्य॒ताँअमः॑॥१४॥

वि । यत् । अहेः॑ । अध॑ । त्वि॒षः । विश्वे॑ । दे॒वासः॑ ।
अक्र॑मुः । वि॒दत् । मृ॒गस्य॑ । तान् । अमः॑ ॥ १४ ॥

अधापिच अहेः अहन्तव्यस्य वृत्रासुरस्य त्विषः तेजोरूपादुच्छ्वासाद्भीताः यद्वा तस्य प्रभावेन परिगमिता विश्वे सर्वे देवासो देवाः यद्यदा व्यक्रमुः विविधं पादविहरणमकुर्वन् स्वस्थानं परित्यज्यान्यदेशमगच्छन्नित्यर्थः। तदानीं मृगस्य। एवंतान् भीषयितुं वृत्रो मृगरूपोभवत्

तद्रूपस्य संबन्धि अमः सर्वतोगमनशीलं बलं तज्जातं भयं वा तान् सर्वान् देवान् विदत् अविन्दत् प्राप्नोदित्यर्थः। तस्यासुरस्येन्द्रो निवारकोहन्ता भवदित्युत्तरेण संबन्धः ॥ १४ ॥

अथ पंचदशी–

आदुमेनिवरोभुवद्वृत्रहादिष्टपौंस्यम् । अजातशत्रुरस्तृतः॥१५॥२३॥

आत् । उँ इति । मे । निऽवरः । भुवत् । वृत्रऽहा । अदिष्ट । पौंस्यम् । अजातऽशत्रुः । अस्तृतः ॥ १५ ॥ २३ ॥

आत् उइत्यवधारणे देवानां भीत्या सर्वतोगमनानन्तरमेव मे स्तोतृस्तुत्यलक्षणेन संबन्धेन मम संबन्धी अयमिन्द्रः निवरः वृत्रासुरस्य निवारयिता हन्ता भुवत् अभवत्। ततो वृत्रहा वृत्रस्य हन्तेन्द्रः पौंस्यं पुंसः कर्म पौंस्यं। यद्वा स्त्रीपुंसाभ्यामिति भवार्थेस्नञ् नकारस्य मकारो वर्णव्यत्ययेन। पुंसोन्द्रेभवं। यद्वा बलनामैतत् स्वबलं अदिष्ट यस्य राज्ये दिशति निदधाति तद्राज्यं स्ववशमकरोत् इत्यर्थः। ततः प्रभृति इन्द्रः अजातशत्रुः अनुत्पन्नशत्रुः अस्तृतः संग्रामे परैरहिंसितश्चाभवत् ॥ १५ ॥

॥ इति प्रथमस्य षष्ठे त्रयोविंशोवर्गः॥ २३ ॥

अथ षोडशी–

श्रुतंवोवृत्रहन्तमंप्रशर्धंचर्षणीनाम् । आशुषेराधसेमहे ॥ १६ ॥

श्रुतम् । वः । वृत्रहन्ऽतमम् । प्र । शर्धम् । चर्षणीनाम् । आ । शुषे । राधसे । महे ॥ १६ ॥

हे ऋत्विग्यष्टारः श्रुतं बलवत्तया प्रसिद्धं अतएव वृत्रहन्तमं अतिशयेन वृत्रहन्तारं शर्धं बलभूतं वेगवन्तं वा एतादृशमिन्द्रं चर्षणीनां मनुष्याणां वो युष्माकं आशुषे। अश्नोतेर्लेटि उत्तमपुरुषैकवचने सिप् व्यत्ययेन उपत्ययः बहुलंछन्दसीतिपडागमः। तमिन्द्रं स्तुतिभिः प्रीणयित्वा युष्मभ्यं प्रकर्षेण अश्नवै प्रयच्छामीत्यर्थः। किमर्थं महे महते राधसे धनाय धनं युष्मभ्यं दातुम् ॥१६॥

अथ सप्तदशी–

अयाधियाचंगव्ययापुरुणामन्पुरुष्टुत । यत्सोमेसोमआभवः॥१७॥

अया। धिया। च। गव्यऽया। पुरुऽनामन्। पुरुऽस्तुत। यत्।
सोमेऽसोमे। आ। अभवः ॥ १७॥

हे पुरुनामन् बहुविध शक्र वृत्रहादिनामोपेत। यद्वा बहुस्तुतिमन् नामयन्ति स्तुत्यं देवं वशं नयन्त्यनेनेति नाम स्तोत्रं। अतएव पुरुष्टुत बहुभिरभिष्टुतेन्द्र सोमेसोमे अस्मदीयेषु सोमेषु त्वं यद्यदा आभवः तेषां पानार्थं समन्तादभवः तदा वयमया अनया कीदृश्या गव्यया गाआत्मनइच्छन्त्या धिया अनया बुद्ध्या युक्ता भवेम सोमं पीतवति त्वयि वयं गवादियुक्ता भवेमेत्यर्थः ॥ १७॥

अथाष्टादशी–

बोधिन्मनाइदस्तुनोवृत्रहाभूर्यासुतिः। शृणोतुशक्रआशिषम् ॥१८॥

बोधित्ऽमनाः। इत्। अस्तु। नः। वृत्रऽहा। भूरिऽआसुतिः।
शृणोतु। शक्रः। आऽशिषम् ॥ १८ ॥

अथ परोक्षकृतः वृत्रहा वृत्रहन्ता भूर्यासुतिः बहुषुदेशेषु इन्द्रार्थं सोमआसूयतेभिषूयत इति तादृशः। यद्वा बहूनि सोमादिहवींषि इन्द्रार्थं आसूयन्ते हूयन्तेइति तादृशः बोधिन्मनाः बुधअवगमने औणादिकइनिप्रत्ययः यस्य मनः स्तोतॄणामभिमतं बुध्यते जानातीति तथोक्तः इदवधारणे नोस्माकं बोधिन्मना एवास्तु सर्वदास्मदभीप्सितानि जानात्वेवेत्यर्थः। यद्वा एतादृशइन्द्रो नोस्माकं यज्ञेभवत्विति। ततः शक्रः संग्रामे शत्रुहननसमर्थइन्द्रः आशिषं अस्मदीयां स्तुतिं आशासनं वा शृणोतु ॥ १८ ॥

ज्योतिष्टोमे चातुर्विंशिकेहनि माध्यन्दिने मैत्रावरुणस्य कयात्वंनऊत्येति तृचोनुरूपः सूत्रितंच–होत्रकाणां कयानश्चित्रआभुवत् कयात्वंनऊत्येति।

तत्र प्रथमा सूक्ते एकोनविंशी–

कयात्वंनऊत्याभिप्रमन्दसेवृषन्। कयास्तोतृभ्यआभर ॥ १९॥

कया। त्वम्। नः। ऊत्या। अभि। प्र। मन्दसे।
वृषन्। कया। स्तोतृऽभ्यः। आ। भर ॥ १९ ॥

हे वृषन् कामानां वर्षितरिन्द्र कया केन ऊत्या अव रक्षणादिषु गत्यर्थे ऊतियूतीत्यादिना निपातितः केनाभिगमनेन नोस्मानभि अभितः प्रमन्दसे प्रकर्षेण मादयसि अस्मदीयं यज्ञं प्रति सोमपानार्थमागमनेनवा त्वदीयस्तुतिश्रवणार्थमागमनेनवा कदास्मान् प्रमादयसीति। किंच कया केनाभिगमनेन स्तोतृभ्योस्मभ्यं धनमाभर आभिभार्षि इतीन्द्रं स्तोता पृच्छति ॥ १९ ॥

अथ विंशी–

कस्यवृषासुतेसचानियुत्वान्वृषभोरणत् । वृत्रहासोमपीतये॥२०॥२४॥

कस्य । वृषा । सुते । सचा । नियुत्वान् । वृषभः ।
रणत् । वृत्रऽहा । सोमऽपीतये ॥ २० ॥ २४ ॥

वृषा इन्द्रः कस्य यजमानस्य सचा सुते ऋत्विग्भिः सहाभिषुते सोमे अनेन तद्वान्यक्षोलक्ष्यते कस्य यज्ञे सोमपीतये सोमपानाय तदर्थं रणत् रमते। कीदृशः नियुत्वान् नितरां युवन्ति मिश्रयन्ति स्वबलेन शत्रूनिति नियुतः मरुतः तद्वान्। यद्वा नियुतइति वायोर्वाहनाश्वाः सवायुः कदाचित्संग्रामे इन्द्राय स्वाश्वानदात् तद्वान् वृषभः धनानामपां वा वर्षकः वृत्रहा वृत्रस्य हन्तेन्द्रः कस्य यज्ञे रमते इदानीं नोस्मदीयं यज्ञं प्रत्यागच्छतु। यद्वा कस्याध्वरे रमते नकुत्रापि। किंतु अस्मद्यज्ञे एव सोमपानार्थं संक्रीडते ॥ २० ॥

॥ इति पञ्चस्य षष्ठे चतुर्विंशोवर्गः ॥ २४ ॥

अथैकविंशी–

अभीषुणस्त्वंरयिंमन्दसानःसहस्रिणम् । प्रयन्ताबोधिदाशुषे॥२१॥

अभि । सु । नः । त्वम् । रयिम् । मन्दसानः । सहस्रिणम् ।
प्रऽयन्ता । बोधि । दाशुषे ॥ २१ ॥

हे इन्द्र त्वं मन्दसानः अस्माभिर्दत्तेन सोमेन मोदमानः सन् सहस्रिणं सहस्रसंख्याकं रयिं धनं नोस्मभ्यं सु सुष्ठु अभ्याभर। तदेवाह–त्वं दाशुषे हविर्दत्तवते यजमानाय प्रयन्ता धनादेः प्रदाता कर्मणोनियन्तावा भवासीति बोधि बुध्यस्व। बुधअवगमने भौवादिकः लोटि छान्दसो विकरणस्यलुक् हेर्धिः धित्वेधकारलोपश्छान्दसः ॥ २१ ॥

अथ द्वाविंशी–

पत्नीवन्तःसुताइमउशन्तोयन्तिवीतये । अपांजग्मिर्निचुम्पुणः॥२२॥

पत्नीऽवन्तः । सुताः । इमे । उशन्तः । यन्ति । वीतये ।
अपाम् । जग्मिः । निऽचुम्पुणः ॥ २२ ॥

पत्नीवन्तः सोमसेकार्थे पत्न्यः पालयित्र्यः आपोवसतीवर्यः एकधनाश्च तद्वन्तः सुता अस्माभिरभिषुताः इमे गृहस्थाः चमसस्थाश्च सोमाः उशन्तः आत्मनः पानं कामयमानाः सन्तो यन्ति इन्द्रं गच्छन्ति । किमर्थं वीतये आत्मनः पानाय । किंच निचुम्पुणः निचांतपृणइति यास्कः । चमुअदने निचांतोभक्षितः पृणः प्रीणयिता यद्वा निचमनेन प्रीणातीति भक्षणेन तर्पयतीति निचुंपुणः । अभिषुतस्य सोमस्य अप्सुप्रक्षेपासंभवात् सामर्थ्यादृजीषरूपः सोमोगृह्यते । तादृशः सोमः अपांजग्मिः अपामितिनलोकाव्ययेतिषष्ठीप्रतिषेधाभावश्छान्दसः अपइत्यर्थः । यद्वा अपांमध्यं वा अपःप्रतिवा जग्मिः गमनशीलः साधुगन्तावा सोमश्चेन्द्रं गच्छति सहावभृथकाले ऋजीषमप्सुप्रास्यन्तीति वचनादप्सु ऋजीषरूपः प्रक्षिप्यते । तदाह अपांजग्मिरिति ॥२२॥

अथ त्रयोविंशी–

इष्टाहोत्राअसृक्षतेन्द्रंवृधासोअध्वरे । अच्छावभृथमोजसा॥२३॥

इष्टाः । होत्राः । असृक्षत । इन्द्रम् । वृधासः । अध्वरे ।
अच्छ । अवऽभृथम् । ओजसा ॥ २३ ॥

अपांजग्मिरिति सामर्थ्यादवभृथदिनएवकुर्वन्तीत्युक्तं तत्प्रसंगादाह—अध्वरेस्मदीये यज्ञे वृधासो हविर्भिरिन्द्रं वर्धयन्तः इष्टा इष्टवन्तो यागं कृतवन्तः सप्तसंख्याका होत्राः होत्रका अवभृथमन्त्यदिवसं अच्छ प्रति ओजसा स्वतेजसा सहिता इन्द्रमसृक्षत विसृजन्ति । यावदवभृथं सप्तहोत्रका यजन्तीति ॥ २३ ॥

अथ चतुर्विंशी–

इहत्यासधमाद्याहरीहिरण्यकेश्या । वोळ्हामभिप्रयोहितम्॥२४॥

---

१ नि ५. १७.।

इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या ।
वोळ्हाम् । अभि । प्रयः । हितम् ॥ २४

एषाव्याख्याता । अत्रापि वाक्यार्थोविधीयते—सधमाद्या इन्द्रेणसह हविर्भिस्तर्पयितव्यौ यद्वा संग्रामे सहमाद्यन्तौ हिरण्यकेश्या हिरण्मयस्कन्धगतकेशवन्तौ त्या तौ प्रसिद्धौ हरी हरितवर्णावेतन्नामकावश्वौ इहास्मिन्यज्ञे हितं हितकरं प्रयो हवीरूपमन्नं अभिलक्ष्य वोळ्हां इन्द्रं वहतां प्रापयतामिति ॥ २४ ॥

अथ पञ्चविंशी—

तुभ्यंसोमाःसुताइमेस्तीर्णंबर्हिर्विभावसो । स्तोतृभ्यइन्द्रमावह॥२५॥२५॥

तुभ्यम् । सोमाः । सुताः । इमे । स्तीर्णम् । बर्हिः । विभावसो इति विभाऽवसो । स्तोतृऽभ्यः । इन्द्रम् । आ । वह ॥ २५ ॥ २५ ॥

हे विभावसो विशेषेण भासमान वसुमन् यद्वा विशिष्टाभा विभाः प्रकृष्टदीप्तयः निवसन्ति अत्रेति विभावसुरग्निः हे तादृशाग्ने तुभ्यं त्वदर्थं इमे सोमाः सुताः अभिषुताः तथा बर्हिः स्तीर्णं तस्मात्स्तोतृभ्योस्मभ्यं अस्मदर्थं इन्द्रं सोमपानार्थमावह आहूय यज्ञं प्रति प्रापयेत्यर्थः ॥२५॥

॥ इति प्रथमस्य षष्ठे पंचविंशोवर्गः ॥ २५ ॥

अथ षड्विंशी—

आतेदक्षंविरोचनादधद्रत्नाविदाशुषे । स्तोतृभ्यइन्द्रमर्चत ॥२६॥

आ । ते । दक्षम् । वि । रोचना । दधत् । रत्ना । वि । दाशुषे । स्तोतृऽभ्यः । इन्द्रम् । अर्चत ॥ २६ ॥

ऋषिर्कृत्विग्यजमानान्प्रत्याह । हे यष्टः दाशुषे इन्द्राय हविर्दत्तवते ते तुभ्यं रोचना रोचनं दीप्यमानं दक्षं बलं आभिमुख्येन विदधत् इन्द्रोविदधातु यद्वा रोचनमिति स्वर्गः देवतेजसा दीप्तं रोचननामानं लोकं विदधातु । तथा रत्ना रत्नानि च तुभ्यं करोतु । डुधाञ्धारणपोषणयोः । लेटि घोर्लोपोलेटिवेत्याकारलोपः अडागमः । हे स्तोतारः स्तोतृभ्यः इन्द्रविषयस्तोत्रकारिभ्योयुष्मभ्यंच बलरत्नादिकं इन्द्रः कुरुतां तस्मात्तमिन्द्रं यूयमर्चत हविर्भिः स्तुतिभिश्च पूजयत ॥ २६ ॥

अथ सप्तविंशी—

आतेदधामीन्द्रियमुक्थाविश्वाशतक्रतो । स्तोतृभ्यइन्द्रमृळय॥२७॥

आ । ते । दधामि । इन्द्रियम् । उक्था । विश्वा । शतक्रतो इति शतऽक्रतो । स्तोतृऽभ्यः । इन्द्र । मृळय ॥ २७ ॥

हे शतक्रतो इन्द्र ते तव इन्द्रियं वीर्यवन्तं सोमं विश्वा उक्था सर्वाणि स्तोत्राणि आदधामि संपादयामि । हे इन्द्र त्वं स्तोतृभ्यः मृळय सुखय ॥ २७ ॥

अथाष्टाविंशी—

भद्रंभद्रंनआभरेषमूर्जंशतक्रतो । यदिन्द्रमृळयासिनः ॥ २८ ॥

भद्रम्ऽभद्रम् । नः । आ । भर । इषम् । ऊर्जम् । शतक्रतो इति शतऽक्रतो । यत् । इन्द्र । मृळयासि । नः ॥ २८ ॥

हे शतक्रतो शतविधकर्मन् शतप्रज्ञ वा इन्द्र भद्रंभद्रं कल्याणतमं अथ सुखोत्पादकं वा धनं नोऽस्मभ्यमाभर आसंपादय देहि । तथा इषमन्नं ऊर्जमन्नरसं यद्वा बलवदन्नं च देहि नोऽस्मान् यद्यदि मृळयासि सुखयसि तर्हि तव धनादिकं देहीति । मृळसुखने ण्यन्तस्य लेट्यडागमः ॥ २८ ॥

अथैकोनत्रिंशी—

सनोविश्वान्याभरसुवितानिशतक्रतो । यदिन्द्रमृळयासिनः॥२९॥

सः । नः । विश्वानि । आ । भर । सुवितानि । शतक्रतो इति शतऽक्रतो । यत् । इन्द्र । मृळयासि । नः ॥ २९ ॥

हे शतक्रतो इन्द्र सपूर्वोक्तलक्षणस्त्वं विश्वानि सर्वाणि सुवितानि सुष्ठु ईयते प्राप्यते येष्विति सुवितानि मंगलानि सुपूर्वादितेः क्तेमत्यये उवङादेशः सर्वानभ्युदयान्नोऽस्मभ्यमाभर आहर । हे इन्द्र यदि नोऽस्मान् सुखयसि तर्हि धनादिसहितानभ्युदयान्देहीति ॥ २९ ॥

अथ त्रिंशी–

त्वामिद्वृत्रहन्तमसुतावन्तोहवामहे । यदिन्द्रमृळयासिनः॥३०॥२६॥

त्वाम् । इत् । वृत्रहन्ऽतम । सुतऽवन्तः । हवामहे ।
यत् । इन्द्र । मृळयासि । नः ॥ ३० ॥ २६ ॥

हे वृत्रहन्तम अतिशयेन वृत्रस्यापामावरकस्य हन्तरिन्द्र सुतवन्तोभिषुतसोमवन्तो वयं त्वामिद्व त्वामेव हवामहे अस्मद्यज्ञमागत्य सोमपानायाह्वयामः। हे इन्द्र नोस्मान्यदि सुखयसि तर्हि आह्वयामहति ॥ ३० ॥

॥ इति पञ्चस्य षष्ठे षड्विंशोवर्गः ॥ २६ ॥

व्यूळ्हेदशरात्रस्य षष्ठेहनि निष्केवल्ये उपनोहरिभिरिति तृचोनिविद्धानीयः।सूत्रितंच–अयंहपेनवाइदमुपनोहरिभिःसुतमिति।

तत्र प्रथमा सूक्ते एकत्रिंशी–

उपनोहरिभिःसुतंयाहिमदानांपते । उपनोहरिभिःसुतम् ॥ ३१ ॥

उप । नः । हरिऽभिः । सुतम् । याहि । मदानाम् ।
पते । उप । नः । हरिऽभिः । सुतम् ॥ ३१ ॥

हे मदानांपते माद्यन्त्यनेनेति मदाः सोमाः मदोनुपसर्गे इति करणे अप्प्रत्ययः सोमानां स्वामिन्निन्द्र हरिभिः । आशतेनहरिभिरित्यादिषु।बहूनामश्वानां श्रुतेस्तत्रापि शतसहस्रसंख्याकैरश्वैः सह नोस्माकं यज्ञे सुतमभिषुतं सोममुपयाहि तत्पानार्थं शीघ्रमायाहि पुनरुपनइत्यादरार्थः ॥ ३१ ॥

अथ द्वात्रिंशी–

द्विताया॑वृत्रहन्तमोविदइन्द्रःशतक्रतुः । उपनोहरिभिःसुतम्॥३२॥

द्विता । यः । वृत्रहन्ऽतमः । विदे । इन्द्रः । शतऽक्रतुः ।
उप । नः । हरिऽभिः । सुतम् ॥ ३२ ॥

---

१ ऋ० सं० २. ६. २२.

वृत्रहन्तमोतिशयेन वृत्रस्यहन्ता शतक्रतुः नानाविधकर्मा यइन्द्रः द्विता द्विधाविदे वृत्रवधादौ उग्रकर्मा जगद्रक्षणकाले शान्तकर्मेति द्विप्रकारेण सर्वैर्ज्ञायते। विदज्ञाने कर्मणिविहितस्य क्तप्रत्ययस्य लोपस्तआत्मनेपदेष्विति तलोपः सत्वं हरिभिः सह सुतं सोममुपयाहि ॥ ३२ ॥

अथ त्रयस्त्रिंशी–

त्वंहिवृ॑त्रहन्नेषांपातासोमा॑नामसि । उप॑नोहरि॑भिःसुतम् ॥ ३३ ॥

त्वम् । हि । वृत्रऽहन् । एषाम् । पाता । सोमा॑नाम् ।
असि । उप॑ । नः । हरि॑ऽभिः । सुतम् ॥ ३३ ॥

हे वृत्रहन् वृत्रस्य पापस्यवा हन्तरिन्द्र हिशब्दोहेत्वर्थे यस्मात्त्वं एषामस्मदीयानां सोमानां पाता पानकर्तासि भवसि एषामिति इदमोन्वादेशे अशादेशः अनुदात्तश्च। अतस्त्वमश्वैः सह सोमं पातुमुपयाहि आगच्छ ॥ ३३ ॥

व्यूढस्य दशरात्रस्य नवमेहनि वैश्वदेवे अभिप्लवतृचस्य इन्द्रइषेददातुनस्त्वेनोरत्नानि धत्तनेति द्वेऋचावावाग्न्यौ। सूत्रितंच–इन्द्रइषेददातुनस्त्वेनोरत्नानिधत्तनेत्येकाद्वेचेति।

सैषा सूक्ते चतुस्त्रिंशी–

इन्द्र॑इषेद॑दातुनऋभुक्षणमृभुंर॒यिम् । वाजीद॑दातुवाजिन॑म्॥३४॥२७॥

इन्द्र॑ः । इषे । ददातु । नः । ऋभुक्षण॑म् । ऋभुम् ।
र॒यिम् । वाजी । ददातु । वाजिन॑म् ॥ ३४ ॥ २७ ॥

इन्द्रएव अस्माभिः स्तुतः इद्धःसन् ऋभुक्षणं वाक्पूर्वस्येति दीर्घाभावः यागादिकर्मकरणेन महान्तं सर्वेषां भ्रातृणां श्रेष्ठंवा अथवा तृतीयसवने प्रजापतिसवित्रोर्मध्ये सोमपात्रत्वान्महान्तं रयिं दातारं ऋभुं सोमपानेनामर्त्यत्वं प्राप्तं तादृशं एवन्नामकं देवं नोस्मभ्यमिषे अन्नार्थं ददातु प्रयच्छतु। तथा वाजी बलवानिन्द्रः वाजिनं बलवन्तं अन्नवन्तंवा वाजनामानं कनीयांसं भ्रातरंच अस्माकमन्नलाभाय ददातु ॥ ३४ ॥

॥ इति पञ्चस्य षष्ठे सप्तविंशोवर्गः ॥ २७ ॥

॥ इति अष्टमे मंडले नवमोनुवाकः ॥ ९ ॥

दशमेऽनुवाके दशसूक्तानि तत्र गौर्धयतीति द्वादशर्चमाद्यं सूक्तं आंगिरसस्य बिंदुनाम्नः पूतदक्षनाम्नोवा आर्षं गायत्रं मरुद्देवताकं। तथाचानुक्रम्यते—गौर्धयति द्वादशर्बिंदुः पूतदक्षोवा मारुतमिति सूक्तविनियोगोलैंगिकः। प्रातःसवने सोमातिरिक्तएकं शस्त्रमुपजायते तत्रायतृचोनुरूपः। सूत्रितंच—अस्तिसोमोअयंसुतो गौर्धयतिमरुतामिति स्तोत्रियानुरूपाविति।

तत्र प्रथमा—

गौर्धयतिमरुतांश्रवस्युर्मातामघोनाम्। युक्तावह्निरथानाम् ॥ १॥

गौः। धयति। मरुताम्। श्रवस्युः। माता। मघोनाम्।
युक्ता। वह्निः। रथानाम् ॥ १ ॥

मघोनां धनवतां मरुतां माता निर्मात्री गौः पृश्निरूपा। पृश्न्यैवैपयसोमरुतोजाताइति श्रुतेः। यद्वा गौर्माध्यमिकीवाक् तत्रैव मध्यमस्थाने मरुतामपि वर्तमानत्वात्तेषां तत्पुत्रत्वमुपचर्यते धयति सोमं पिबति पाययतिवा स्वपुत्रान् मरुतः। किमिच्छन्ती श्रवस्युरन्नं कामयमाना कीदृशी रथानां मारुतानां वह्निः पृषतीभिर्वडवाभिर्वोढ्री संयोजयित्री सायुक्ता सर्वत्र समन्तात्पूज्या भवति ॥ १ ॥

अथ द्वितीया—

यस्यादेवाउपस्थेव्रताविश्वेधारयन्ते। सूर्यामासादृशेकम् ॥ २ ॥

यस्याः। देवाः। उपऽस्थे। व्रता। विश्वे। धारयन्ते।
सूर्यामासा। दृशे। कम् ॥ २ ॥

गौः सर्वदेवमयीत्याह यस्या मरुतां मातुः गोरुपस्थे वर्तमानाः विश्वे सर्वे देवाः व्रता व्रतानि स्वस्वकर्माणि धारयन्ते बिभ्रति इयमेवास्माकं स्वपयोभिश्रितस्य सोमस्य दात्रीति सर्वे तत्समीपे तिष्ठन्तीत्यर्थः। किंच सूर्यामासा माति स्वकलाभिस्तिथीनिति मासश्चंद्रमाः देवताद्वंद्वेचेत्युभयपदप्रकृतिस्वरत्वं। सूर्याचन्द्रमसौ दृशे दर्शनाय सर्वलोकप्रकाशनायच यस्या गोः समीपे कं सुखेन वर्तमानौ भवतः सेयंगौः सोमं धयतीति पूर्वेण समन्वयः ॥ २ ॥

---

१ तै० स०२ २ ११।

अथ तृतीया–

तत्सुनोविश्वेअर्यआसदागृणन्तिकारवः । मरुतःसोमपीतये ॥३॥

तत् । सु । नः । विश्वे । अर्यः । आ । सदा । गृणन्ति ।
कारवः । मरुतः । सोमऽपीतये ॥ ३ ॥

अर्यः स्तोत्रकरणार्थमितस्ततोगन्तारो नोस्मदीया विश्वे सर्वे कारवः स्तोतारः तन्मरुतां बलं सदा सर्वदा सु सुष्ठु आगृणन्ति आभिमुख्येन स्तुतिभिः स्तुवन्ति । किमर्थं सोमपीतये अस्माभिर्दीयमानं सोमं पातुं मरुतएतन्नामकादेवा अस्माभिराह्वातव्याः खलु ततः पुरस्तात्तद्बलं स्तुवन्तीत्यर्थः ॥ ३ ॥

पूर्वमभिहितएवशस्त्रे अस्तिसोमइति स्तोत्रियस्तृचः । सूत्रंतु पूर्वेणसहोदाहृतम् ।

तत्र प्रथमा सूक्ते चतुर्थी–

अस्तिसोमोअयंसुतःपिबन्त्यस्यमरुतः । उतस्वराजोअश्विना ॥४॥

अस्ति । सोमः । अयम् । सुतः । पिबन्ति । अस्य ।
मरुतः । उत । स्वऽराजः । अश्विना ॥ ४ ॥

अयं पुरोवर्ती सोमः सुतोमरुदर्थं अस्माभिरभिषुतोस्ति विद्यते । तस्मादस्य अन्वादेशे एनं सुतं सोमं स्वराजः स्वयं दीप्यमानाः स्वतेजसा नान्यदीयेनेत्यर्थः तादृशाः मरुतः पिबन्ति । उतापिच अश्विना अश्विनौ च सोमं पिबतः ॥ ४ ॥

अथ पंचमी–

पिबन्तिमित्रोअर्यमातनापूतस्यवरुणः । त्रिषधस्थस्यजावतः ॥५॥

पिबन्ति । मित्रः । अर्यमा । तना । पूतस्य । वरुणः ।
त्रिऽसधस्थस्य । जाऽवतः ॥ ५ ॥

नकेवलं मरुतएव सोमपातारः । किंतु एतेपीत्याह–मित्रः सर्वेषां स्वस्वकर्मणि प्रवर्तकत्वात्तत्प्रभूतः अर्यमाच वरुणः दुःखादीनां शत्रूणांवा वरिता निवारकः एतन्नामकास्त्रयोदेवाः तना ततपूर्णात्सुकेनेति तनं दशापवित्रं सुपांसुलुगिति तृतीयायाआदेशः तनायुक्तः तनापूतस्य परिशोधितं त्रिसधस्थस्य सहतिष्ठन्त्यत्रेति सधस्थं स्थानं द्रोणकलशाधवनीयपूतभृदा-

ख्यानि त्रीणि स्थानानि यस्य तत्तथोक्तं तादृशं जानतः स्तुत्यजनवन्तमिमं सोमं पिबन्ति। द्वितीयार्थेपञ्चमी ॥ ५ ॥

अथ षष्ठी–

उतोन्वस्यजोषमाँइन्द्रःसुतस्यगोमतः। प्रातर्होतेवमत्सति॥६॥२८॥

उतो इति। नु। अस्य। जोषम्। आ। इन्द्रः। सुतस्य।
गोऽमतः। प्रातः। होताऽइव। मत्सति॥ ६ ॥ २८ ॥

उतो अपिच इन्द्रः सुतस्य अस्माभिरभिषुतस्य गोमतः गव्यैर्मिश्रणवतः अस्य अ-न्वादेशः पूर्ववद्दशापवित्रेण पूतस्य सोमस्य जोषं पानरूपां सेवां प्रातः प्रातःसवने नु क्षिप्रं आमत्सति मदिस्तुत्यादिषु आभिमुख्येन स्तौति। यद्वा सोममेवकामयते। तत्रदृष्टान्तः–होतेव यथा होता प्रातःसवने देवानभिष्टौति देवान् स्तोतुं वाभिवांछति ॥ ६ ॥

॥ इति पञ्चमस्य षष्ठेष्टाविंशोवर्गः ॥ २८ ॥

अथ सप्तमी–

कदत्विषन्तसूरयस्तिरआपइवस्रिधः। अर्षन्तिपूतदक्षसः ॥ ७ ॥

कत्। अत्विषन्त। सूरयः। तिरः। आपःऽइव। स्रिधः।
अर्षन्ति। पूतऽदक्षसः ॥ ७ ॥

ऋषिर्मरुतो बहुवारंस्तुत्वेदानीमात्मानं वितर्कयति सूरयः प्राज्ञाः आपइव उदकानीव तिरः यथा उदकानि तिर्यग्गच्छन्ति तद्वत्तिरश्चीनगतयः सन्तः कत्कदा अत्विषन्त त्विषदीप्तौ अन्तरिक्षे कदादीप्यन्ते। किंच स्रिधः शत्रूणां शोषकाहन्तारः तइमे मरुतः पूतदक्षसः शुद्धबलाः सन्तः कदावा अर्षन्ति अस्मदीयं यज्ञं प्रत्यागच्छन्ति ॥ ७ ॥

अथाष्टमी–

कद्वोअद्यमहानांदेवानामवोवृणे। त्मनाचदस्मवर्चसाम् ॥ ८ ॥

कत्। वः। अद्य। महानाम्। देवानाम्। अवः।
वृणे। त्मना। च। दस्मऽवर्चसाम् ॥ ८ ॥

हे मरुतः महानां मंहनीयानां महतां वा त्मनाच आत्मनैव अलंकरणैर्विनापि दस्मवर्चसां दर्शनीयतेजस्कानां अतएव देवानां द्योतमानानां वोयुष्माकमवः पालनं कद कदाहं वृणे संभजे। वृङ्संभक्तौ क्र्यादिकः ॥ ८ ॥

अथ नवमी–

आयेविश्वापार्थिवानिपप्रथंन्रोचनादिवः। मरुतःसोमंपीतये ॥ ९ ॥

आ। ये। विश्वा। पार्थिवानि। पप्रथन्। रोचना।
दिवः। मरुतः। सोमंऽपीतये ॥ ९ ॥

ये मरुतः विश्वा विश्वानि पार्थिवानि पृथिव्यां भवानि भूतजातानि दिवः द्युलोकस्य रोचना रोचमानानि ज्योतींषि च आपप्रथन् सर्वत्र विस्तारितान्यकार्षुः। प्रथप्रख्याने ण्यन्तस्य चङि अत्स्मृदृत्वरप्रथम्रदस्तृस्पशामिति अभ्यासस्य अदादेशः चङ्यन्यतरस्यामितिङिच्स्वरेणमध्योदात्तः तादृशान् मरुतोदेवान् सोमपीतये सोमपानायाहमाह्वयामि ॥ ९ ॥

अथ दशमी–

त्यान्नुपूतदक्षसोदिवोवोमरुतोहुवे। अस्यसोमस्यपीतये ॥ १० ॥

त्यान्। नु। पूतऽदक्षसः। दिवः। वः। मरुतः।
हुवे। अस्य। सोमस्य। पीतये ॥ १० ॥

हे मरुतो मितराविण एतन्नामकादेवाः पूतदक्षसः परिशुद्धबलान् दिवः स्वतेजसा दीप्यमानान् यद्वा दिवः द्युलोकस्थितान् त्यान् तान् प्रसिद्धान् वोयुष्मान् नु क्षिप्रं हुवे आह्वयामि। किमर्थं अस्यास्मदीयस्य सोमस्य पीतये पानाय ॥ १० ॥

अथैकादशी–

त्यान्नुयेविरोदसीतस्तभुर्मरुतोहुवे। अस्यसोमस्यपीतये ॥ ११ ॥

त्यान्। नु। ये। वि। रोदसी इति। तस्तभुः। मरुतः।
हुवे। अस्य। सोमस्य। पीतये ॥ ११ ॥

ये मरुतः रोदसी द्यावापृथिव्यौ वितस्तभुः स्वबलेनैव अत्यर्थं स्तब्धे चक्रुः ते रोदसी स्वाधीने अकार्षुरित्यर्थः । त्यान् तान् सर्वतः प्रसिद्धान् नु क्षिप्रं अहं हुवे आह्वयामि । किमर्थं अस्येत्यादि ॥ ११ ॥

अथ द्वादशी—

त्यंनुमारु॑तंग॒णंगि॑रि॒ष्ठांवृष॑णंहुवे । अ॒स्यसोम॑स्यपी॒तये॑ ॥ १२ ॥ २९॥

त्यम् । नु । मारु॑तम् । ग॒णम् । गि॒रि॒ऽस्थाम् । वृष॑णम् ।
हु॒वे । अ॒स्य । सोम॑स्य । पी॒तये॑ ॥ १२ ॥ २९ ॥

त्यं तं सर्वत्रविस्तृतं गिरिष्ठां गिरिषु मेघेषु पर्वतेषु वा तिष्ठन्तं वृषणं उदकानां कामानां वा वर्षितारं मारुतं मरुत्संबन्धिनं गणं संघं नु क्षिप्रं हुवे विंदुरहमाह्वयामि । किं प्रयोजनं अस्य अस्मदीयस्य सोमस्य पीतये पानाय ॥ १२ ॥

॥ इति षष्ठस्य षष्ठे एकोनत्रिंशोवर्गः ॥ २९ ॥

आत्वेति नवर्चं द्वितीयंसूक्तं आनुष्टुभमैन्द्रं तिरश्चीनामांगिरसऋषिः । तथाचानुक्रम्यते— आत्वानव तिरश्चीरांगिरस आनुष्टुभमिति । आभिप्लविकेषूक्थ्येषु तृतीयसवनेच्छावाकस्यात्वा-गिरइति तृचोवैकल्पिकोनुरूपः सूत्र्यतेहि—गायन्तित्वागायत्रिण आत्वागिरोरथीरिवेति ।

तत्र प्रथमा—

आत्वा॒गिरो॑र॒थीरि॒वास्थुः॑सु॒तेषु॑गिर्वणः ।
अ॒भित्वा॒सम॑नूषते॒न्द्र॑व॒त्सन्नमा॒तरः॑ ॥ १ ॥

आ । त्वा॒ । गिरः॑ । र॒थीःऽइ॑व । अस्थुः॑ । सु॒तेषु॑ । गि॒र्व॒णः॒ ।
अ॒भि । त्वा॒ । सम् । अ॒नू॒ष॒त॒ । इन्द्र॑ । व॒त्सम् । न । मा॒तरः॑ ॥ १ ॥

हे गिर्वणः गीर्भिर्वननीयेन्द्र सुतेषु सोमेषु अभिषुतेषु सत्सु गिरोस्माकं स्तुतिलक्षणावाचः त्वा त्वां आस्थुः आभिमुख्येन शीघ्रं तिष्ठन्ति । तत्रदृष्टान्तः—रथीरिव यथा रथवान् रथेन गच्छन् वीरः प्राप्यं देशं क्षिप्रं गच्छति तद्वदस्मागिरोभिगन्तव्यं त्वां स्तुतयोभिगच्छन्ति । किंच हे इन्द्र अस्मदीयागिरः त्वा त्वामभिलक्ष्य समनूषत सम्यक् शब्दायन्ते स्तुवन्तीत्यर्थः । नूतवने

कुटादिः तस्य लुङिरूपं । तत्रदृष्टान्तः—वत्संन मातरः यथा मातरोगावः वत्सं अभिलक्ष्य हंभारवादिशब्दं कुर्वन्ति तद्वत् ॥ १ ॥

अथ द्वितीया—

आत्वांशुक्राअंचुच्यवुःसुतासंइन्द्रगिर्वणः ।
पिबात्वंस्यान्धंसइन्द्रविश्वांसुतेहितम् ॥ २ ॥

आ । त्वा । शुक्राः । अचुच्यवुः । सुतासः । इन्द्र । गिर्वणः ।
पिबं । तु । अस्य । अन्धंसः । इन्द्रं । विश्वांसु । ते । हितम् ॥ २ ॥

हे गिर्वणोगीर्भिर्वननीयेन्द्र शुक्राः ग्रहेषु पात्रेषुच दीप्यमानाः सुतासोस्माभिरभिषुताः सोमाः त्वा त्वां आचुच्यवुः आगच्छन्तु । च्युङ्प्रुङ्गतौ लुङि बहुलंछन्दसीति शपःश्लुः ततस्त्वमस्माभिर्दीयमानस्यास्यांधसः सोमस्य भवदीयं भागं तु क्षिप्रं पिब । यद्वा क्रियाग्रहणंकर्तव्यमिति संप्रदानं चतुर्थ्यर्थे बहुलंछन्दसीति षष्ठी तदिदंसोमरूपमन्नं शीघ्रं पिब । तदेवोपपादयति—हे इन्द्र विश्वासु सर्वासु दिक्षु ते त्वदर्थं सोमपुरोडाशादिहविर्हितं निहितं भवति ॥ २ ॥

अथ तृतीया—

पिबासोमंमदांयकमिन्द्रंश्येनाभृंतंसुतम् ।
त्वंहिशश्वंतीनांपतीराजांविशामसि ॥ ३ ॥

पिबं । सोमंम् । मदाय । कम् । इन्द्रं । श्येनऽआभृतम् । सुतम् ।
त्वम् । हि । शश्वंतीनाम् । पतिः । राजां । विशाम् । असि ॥ ३ ॥

हे इन्द्र त्वं श्येनाभृतं हृग्रहोर्भश्छन्दसीति हकारस्यभकारः द्युलोकात् श्येनरूपया गायत्र्या आहृतं सुतमभिषुतं सोमं मदाय हर्षाय पिब कमितिपूरणः सुखार्थंवा सुखेन सोमं पिब । हिशब्दो हेतौ हि यस्मात्त्वं शश्वतीनां बह्वीनां विशां मरुद्गणानां सर्वेषां देवगणानां च पतिः पालयिता स्वामी असि भवसि तथा राजा स्वतेजसा दीप्यमानश्चासि अतस्त्वं पूर्वं सोमं पिबेति ॥ ३ ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवनेच्छावाकस्य श्रुधीहवंतिरश्च्याइति वैकल्पिकः स्तोत्रियः । सूत्रितंच—श्रुधीहवंतिरश्च्या आश्रुत्कर्णश्रुधीहवमिति ।

तत्र प्रथमा सूक्ते चतुर्थी—

श्रुधीहवंतिरश्च्याइन्द्रयस्त्वांसपर्यति ।
सुवीर्यस्यगोमतोरायस्पूर्धिमहाँअसि ॥ ४ ॥

श्रुधि । हवम् । तिरश्च्याः । इन्द्र । यः । त्वा । सपर्यति ।
सुऽवीर्यस्य । गोऽमतः । रायः । पूर्धि । महान् । असि ॥ ४ ॥

हे इन्द्र यः त्वा त्वां सपर्यति सपरशब्दः कंड्वादिः हविर्भिः परिचरति तादृशस्य तिरश्च्यः एतन्नामकस्य ऋषेः मम हवं स्तुतिभिः त्वद्विषयमाह्वानं श्रुधि शृणु । श्रुत्वाच हे इन्द्र त्वं सुवीर्यस्य शोभनवीर्योपेतस्य यद्वा वीरे पुत्रे भवं वीर्यं सुपुत्रवतः गोमतः गवादिपशुमतः रायोधनस्यदानेन पूर्धि अस्मान्पूरय । एतत्सामर्थ्यं कुतइत्यत्रआह— त्वं महान् गुणाधिकः देवानां श्रेष्ठश्चासि भवसि खलु ॥ ४ ॥

अथ पञ्चमी—

इन्द्रयस्तेनवीयसींगिरंमन्द्रामजीजनत् ।
चिकित्विन्मनसंधियंप्रत्नामृतस्यपिप्युषीम् ॥ ५ ॥ ३० ॥

इन्द्र । यः । ते । नवीयसीम् । गिरम् । मन्द्राम् । अजीजनत् ।
चिकित्वित्ऽमनसम् । धियम् । प्रत्नाम् । ऋतस्य । पिप्युषीम् ॥ ५ ॥ ३० ॥

हे इन्द्र योयजमानो नवीयसीं नवतरां पुनःपुनः क्रियमाणतया मन्द्रां मदकरीं गिरं स्तुतिलक्षणां वाचं ते त्वदर्थं अजीजनत् उदपीपदत् अकार्षीदित्यर्थः । तस्मै स्तोत्रे त्वं प्रत्नां पुरातनं ऋतस्य सत्यस्य संबन्धि यद्वा तृतीयार्थे षष्ठी सत्येन पिप्युषीं प्रवृद्धं लिड्यङोश्चेति प्यायतेःपीभावः तादृशं चिकित्विन्मनसं । कितज्ञाने क्वसौ रूपं आकारस्येकारश्छान्दसः चिकित्वांसि ज्ञातानि सर्वेषां हृदयानिययेति अथवाथा क्रियमाणं यत्तवरक्षणं सर्वेषां हृदयं प्रज्ञापयतीति तत्अतीन्द्रियार्थदर्शकं धियं त्वदीयं रक्षणाख्यं तस्मै कुरु ॥ ५ ॥

॥ इति पञ्चमस्य षष्ठे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी–

तमुष्टवामयंगिरइन्द्रमुक्थानिवावृधुः ।
पुरूण्यस्यपौंस्यासिषासन्तोवनामहे ॥ ६ ॥

तम् । ऊँ इति । स्तवाम । यम् । गिरः । इन्द्रम् । उक्थानि ।
ववृधुः । पुरूणि । अस्य । पौंस्या । सिसासन्तः । वनामहे ॥ ६ ॥

ऋषयः परस्परमाहुः तं पूर्वोक्तलक्षणं उइत्यवधारणे तमेवेन्द्रं स्तवाम स्तुतिभिः स्तुमः । यं इन्द्रं गिरोस्माकं स्तुतयः उक्थानि शस्त्राणिच वावृधुः प्रावर्धयन् तं स्तुमः । ततोवयं अस्येन्द्रस्य पुरूणि बहूनि पौंस्या वीर्याणि सिसासन्तः षणसंभक्तौ सनीडभावपक्षे आत्वेकृते सनोतेरनइति सांहितिकं षत्वं तानि वीर्याणि संभक्तुमिच्छन्तः सन्तः वनामहे तमिन्द्रं स्तुतिभिः संभजामहे ॥ ६ ॥

अथ सप्तमी–

एतोन्विन्द्रंस्तवामशुद्धंशुद्धेनसाम्ना ।
शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ॥ ७ ॥

एतो इति । नु । इन्द्रम् । स्तवाम । शुद्धम् । शुद्धेन । साम्ना ।
शुद्धैः । उक्थैः । ववृध्वांसम् । शुद्धः । आशीःऽवान् । ममत्तु ॥ ७ ॥

अत्रेतिहासमाचक्षते–पुराकिलेन्द्रो वृत्रादिकानसुरान् हत्वा ब्रह्महत्यादिदोषेणात्मानमपरिशुद्धमित्यमन्यत ततस्तद्दोषपरिहारायेन्द्रः ऋषीनवोचत् अपूतं मां युष्मदीयेन साम्ना शुद्धं कुरुतेति । ततस्तेच शुध्युत्पादकेन साम्ना शस्त्रैश्च परिशुद्धमकार्षुः पश्चात्पूतायेन्द्राय यागादिकर्माणि सोमादीनि हवींषि प्राद्गुरिति । एषोर्थः शाट्यायनकब्राह्मणे प्रतिपादितः–इन्द्रोवासुरान्हत्वापूतइवामेध्योमन्यत सोकामयत शुद्धमेव मासंतं शुद्धेन साम्ना स्तुयुरिति । सऋषीनब्रवीत स्तुतमेति ततऋषयःसामापश्यन्तेनास्तुवन्नेतोन्विन्द्रमिति । ततोवाइन्द्रः पूतः शुद्धोमेध्योभवदिति । तथाचास्या ऋचोयमर्थः–ऋषयः परस्परं ब्रुवन्ति नु क्षिप्रमेतो- आगच्छतैव आगत्यच शुद्धेन शुध्युत्पादकेन साम्ना तथा शुद्धैः शुद्धिहेतुभिरुक्थैः शस्त्रैश्चेन्द्रं शुद्धमपापिनं कृत्वा स्तवाम स्तुयाम ततः सामशस्त्रैश्च वावृध्वांसं पापराहित्येन वर्धमानं तमिम-

मिन्द्रं शुद्धः दशापवित्रेण आशीर्वान् आश्रयणवान् गव्यादिभिः छन्दसीरइति मतुपोवत्वं ता- दृशः सोमोमत्तु इन्द्रं मादयतु । मदायतेश्छान्दसः श्लुः ॥ ७॥

अथाष्टमी—

इन्द्र॑शुद्धोन॒आग॑हि॒शुद्धः॑शुद्धाभि॑रू॒तिभिः॑ ।
शुद्धोर॒यिंनिधा॑रयशुद्धोम॑मद्धिसो॒म्यः ॥ ८ ॥

इन्द्र॑ । शुद्धः॑ । नः॒ । आ । ग॒हि॒ । शुद्धः॑ । शुद्धाभिः॑ । ऊ॒तिऽभिः॑ ।
शुद्धः॑ । र॒यिम् । नि । धा॒र॒य॒ । शुद्धः॑ । म॒म॒द्धि॒ । सो॒म्यः ॥ ८ ॥

हे इन्द्र शुद्धः अस्मदीयैः सामभिः शस्त्रैश्च परिशुद्धस्त्वं नोस्मानागहि आगच्छ।शुद्धा- भिरूतिभिः ऊतयोमरुतः अवन्ति सर्वत्रगच्छन्तीतिवा तैर्वि सामभिः शस्त्रैः परिपूताः तैर्मरुद्भिः सह शुद्धः पापरहित स्त्वमागहि आगत्यच शुद्धस्त्वं रयिं धनमस्मासु निधारय नितरां स्था- पय। किंच शुद्धस्त्वं सोम्यः सोमार्होभूत्वा ममद्धि सोमेन माद्य। मदीहर्षे लोटि बहुलंछन्दसी- ति शपःश्लुः ॥ ८ ॥

अथ नवमी—

इन्द्र॑शुद्धोहि॒नोर॒यिंशुद्धोरत्ना॑निदा॒शुषे॑ ।
शुद्धोवृ॒त्राणि॑जिघ्नसेशुद्धोवाज॑सिपासासि ॥ ९ ॥ ३१ ॥

इन्द्र॑ । शुद्धः॑ । हि । नः॒ । र॒यिम् । शुद्धः॑ ।
रत्ना॑नि । दा॒शुषे॑ । शुद्धः॑ । वृ॒त्राणि॑ । जि॒घ्न॒से॒ ।
शुद्धः॑ । वाज॑म् । सि॒सा॒स॒सि॒ ॥ ९ ॥ ३१ ॥

हे इन्द्र शुद्धः हिरवधारणे शुद्धएव त्वं रयिं धनं नोस्मभ्यं प्रयच्छ । तथा शुद्धस्त्वं दा- शुषे हविर्दत्तवते यजमानाय रत्नानि रमणीयानि धनादीनिच देहि । ततः शुद्धः पापरहितस्त्वं वृत्राणि अपामावरकान् कर्मविघ्नकारिणः शत्रून् पापानिवा जिघ्नसे हंसि । ततः शुद्धः शत्रुहन- नदोषपरिहाराय अस्मदीयैः सामभिः शस्त्रैः परिशुद्धस्त्वं वाजमन्नं अस्मभ्यं सिसाससि प्रदा-

तुमिच्छसि । यदा यदा शत्रूनहं हन्यां तदातदा शुष्मुत्पादकैः सामभिः शस्त्रैश्च यूयं मां परिष्कुर्वं कुरुतेति अस्मभ्यमन्नं दातुं इच्छसीत्यर्थः ॥ ९ ॥

॥ इति पञ्चमस्य षष्ठे एकत्रिंशोवर्गः ॥ ३१ ॥

अस्माइत्येकविंशत्यृचं तृतीयं सूक्तं । अत्रानुक्रम्यते-अस्मैसैका द्युतानोवा मारुतस्त्रैष्टुभं चतुर्थीविराळिष्यामीति मारुतः पादः पैरेन्द्राबार्हस्पत्येति । द्युतानाख्यो मरुतांपुत्रऋषिः तिरश्चीर्नामांगिरसोवा । चतुर्थीविराट् शिष्टास्त्रिष्टुभः इन्द्रोदेवता इष्यामिवोमरुतइतिपादोमरुद्देवत्यः अवद्रप्साइत्येषात्विन्द्राबृहस्पतिदेवताका सूक्तविनियोगोलिंगादवगन्तव्यः ।

तस्मिन्सूक्ते प्रथमा-

अ॒स्मा उ॒षास॒ आति॑रन्त॒ याम॒मिन्द्रा॑य॒ नक्त॒मूर्म्याः॑ सु॒वाचः॑ ।
अ॒स्मा आपो॑ मा॒तरः॑ स॒प्त त॑स्थु॒र्नृभ्य॒स्तरा॑य॒ सिन्ध॑वः सुपा॒राः ॥ १ ॥

अ॒स्मै । उ॒षसः॑ । आ । अ॒ति॒र॒न्त॒ । याम॑म् । इन्द्रा॑य । नक्त॑म् । ऊर्म्याः॑ । सु॒ऽवाचः॑ । अ॒स्मै । आपः॑ । मा॒तरः॑ । स॒प्त । त॒स्थुः॒ । नृऽभ्यः॑ । तरा॑य । सिन्ध॑वः । सु॒ऽपा॒राः ॥ १ ॥

इन्द्रसामर्थ्यात् भीताउषसः उषःकालाः अस्मैपूर्वोक्तगुणोपेतायेन्द्राय यामं स्वस्वगमनं आ अतिरन्त तिरतिर्वर्धनकर्मा समन्तादवर्धयन्त । यथा पूर्वमुषन्ति तथेदानीमपि अस्मै उद्गताअभवन् । तथा ऊर्म्याः रात्रिनामैतद् ऋगतिप्रापणयोः अर्तेरुम्चेति मिप्रत्ययः अवेछन्दसीतियत् सर्वैरभिगन्तव्याः रात्रौहि सर्वे स्वनिवासं गच्छन्ति स्वनिलयप्राप्तिहेतुभूताः रात्रयः नक्तं अपररात्रिकाले सुवाचः शोभनवाचोभवन्ति तस्मिन्काले हि सर्वे वेदाध्ययनानि शास्त्रश्रवणचिन्तनादीनि कुर्वन्ति तस्मात्कल्याणवाचोभवन् इन्द्रेनुशासति वेदाद्यनुमाने निरवाअभवन् । तथा आपः आपूर्व्यासो सर्वतोव्याप्तामातरः जगतांनिर्मात्र्यः सप्त सप्तसंख्याकाः सिन्धवः स्पन्दमाना गंगाद्यानद्यः यद्वा सर्पणशीलाः सिन्धवः सरितः वासापावरकस्य अहेः हननेनोत्पादकत्वादस्माइन्द्राय तस्थुः नृभ्यस्तराय मनुष्याणां सुखेन तरणार्थं सुपाराः शोभनपाराः सुखेन सर्तुं योग्याः अभवन्नित्यर्थः ॥ १ ॥

अथ द्वितीया–

अतिविद्धाविथुरेणाचिदस्त्रात्रिःसप्तसानुसंहितागिरीणाम् ।
नतद्देवोनमर्त्यस्तुतुर्याद्यानिप्रवृद्धोवृषभश्चकार ॥ २ ॥

अतिऽविद्धा । विथुरेण । चित् । अस्त्रा । त्रिः । सप्त ।
सानु । समऽहिता । गिरीणाम् । न । तत् । देवः । न । मर्त्यः ।
तुतुर्यात् । यानि । प्रऽवृद्धः । वृषभः । चकार ॥ २ ॥

विथुरेण । वर्णव्यत्ययः । चिदप्यर्थे विधुरेण असहायेनापि अस्त्रा अस्तुक्षेपणे ताच्छीलिकस्तृन् शत्रुक्षेपणशीलेनेन्द्रेण । यद्वा अस्त्रा अस्त्रेण वज्रेण त्रिःसप्त एकविंशतिसंख्यानि संहिता संहितानि एकत्र संघीभूतानि गिरीणां सप्तानां पर्वतानां सानु सानूनि अतिविद्धा अति-
[1] विद्धानि अतीत्य ताडितानि तेन मुक्तोवज्रपातः तानि भित्वागमदित्यर्थः । अत्र तैत्तिरीयकं ब्राह्मणं–दर्भपुंजीलमुद्धृत्य सप्तगिरीन् भित्वा तमहन्नित्यादि । तस्येन्द्रस्य तत्तानि सानुभेदनानि कर्माणि देवइन्द्राद्व्यतिरिक्तोदेवो मर्त्यो मनुष्योवा नतुतुर्यात् नतरेत् तथाकर्तुं नशक्नोतीत्यर्थः । तृप्लवनतरणयोः लिङ्छान्दसः शपःश्लुः बहुलंछन्दसीत्युत्वं । यद्वा तुरत्वरणे जौहोत्यादिकः । प्रवृद्धः सोमपानेन बलेनवा प्रवृद्धः वृषभः कामानामुदकानांवा वर्षकः इन्द्रः यानि कर्माणि चकार कृतवान् तानि देवो मनुष्योवा नतुतुर्यात् नहन्यात् हन्तुं शक्तोनभवेत् । अस्मिन्पक्षे तुरी गतिहिंसात्वरणयोरित्येतस्यरूपं । यथायोग्यं दीर्घाभावोह्रस्वश्छान्दसः न तथाकर्तुं शक्नोतीत्यर्थः ॥ २ ॥

अथ तृतीया–

इन्द्रस्यवज्रआयसोनिमिश्लइन्द्रस्यबाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्यक्रतवोनिरेकआसन्नेषन्तश्रुत्याउपाके ॥ ३ ॥

इन्द्रस्य । वज्रः । आयसः । निऽमिश्लः । इन्द्रस्य । बाह्वोः ।
भूयिष्ठम् । ओजः । शीर्षन् । इन्द्रस्य । क्रतवः । निरेके ।
आसन् । आ । ईषन्त । श्रुत्यै । उपाके ॥ ३ ॥

१ तै० सं० ६. २. ४. ।

उक्तगुणस्य इन्द्रस्य वज्रआयसः अयसा निर्मितः अयोमयइत्यर्थः सवज्रः इन्द्रेण स्व-हस्ते निमिश्लः संमिश्रः अत्यन्तं संबद्धःकृतः अतएव इन्द्रस्य बाह्वोर्भुजयोर्भूयिष्ठं बहुतममोजोवीर्यमस्ति। तथानिरेके निपूर्वाद्रिच्यतेर्वा निस्पूर्वादेतेर्वेति संदेहादनवग्रहः। निर्गमने यदा युद्धार्थमिन्द्रोनिर्गच्छति तदानीमिन्द्रस्य शीर्षन् शिरसि क्रतवः कर्माणि शिरस्त्राणनिधानादीनि। यद्वा शिरइति गलप्रभृत्यूर्ध्वमंगमुच्यते तत्रत्याभ्यामक्षिभ्यां दर्शनप्रेरणादीनि कर्माणि भवन्ति। तथा आसन् आस्यस्य आसन्नादेशः आस्येच यानि कर्माणि युद्धार्थं वाजिनो गजान् संनाहयतेत्यादीनि भवन्ति। किंच श्रुत्यै संग्रामाय निर्गच्छतोनुशासत इन्द्रस्य वाक्यश्रवणार्थं सर्वे उपजीविनो भृत्याः उपाके अन्तिके एयन्त। अयमिंद्रोस्मान् कुत्रकुत्र कार्ये नियोक्ष्यतीत्येतेन मनसा तदन्तिके समन्तादागच्छन्ति। ईयगतिहिंसादर्शनेषु भौवादिकः॥३॥

अथ चतुर्थी–

मन्येत्वायज्ञियंयज्ञियानांमन्येत्वाच्यवनमच्युतानाम्।
मन्येत्वासत्वनामिन्द्रकेतुंमन्येत्वावृषभंचर्षणीनाम्॥४॥

मन्ये। त्वा। यज्ञियम्। यज्ञियानाम्। मन्ये। त्वा। च्यवनम्। अच्युतानाम्। मन्ये। त्वा। सत्वनाम्। इन्द्र। केतुम्। मन्ये। त्वा। वृषभम्। चर्षणीनाम्॥४॥

एतदादयः प्रत्यक्षाः हे इन्द्र त्वा त्वां यज्ञियानां यज्ञार्हाणां देवानामपि यज्ञियं पुरस्तादेव यज्ञार्हमितिमन्ये अवबुध्ये। तथा त्वा त्वां अच्युतानां च्युतिरहितानामपि पर्वतानां च्यवनं च्यावयितारं वज्रेण विभेदकमिति मन्ये जानामि। यद्वा अच्युतानां बलेनच्यावयितुमशक्यानां बलिनां वीराणां अपि स्वबलेन विद्रावयितारमिति जाने। किंच हेइन्द्र सत्वनां सत्वानां पणसंभक्तौ कनिप् संभजमानानां भटानां केतुमुच्छ्रितमिति मन्ये। यद्वा सात्वनां स्तुतिभिर्हविर्भिर्वा संभक्तृणां यष्टॄणां केतुं आत्मनः प्रज्ञापकं तेषां पूजनीयमितिवा मन्ये। तथा त्वा त्वां चर्षणीनां मनुष्याणां वृषभं अभिमतफलवर्षकमिति मन्ये जानामि॥४॥

अथ पंचमी–

आयद्वज्रंबाह्वोरिन्द्रधत्सेमदच्युतमहयेहन्तवाउ।
प्रपर्वताअनवन्तप्रगावःप्रब्रह्माणोअभिनक्षन्तइन्द्रम्॥५॥३३॥

आ । यत् । वज्रम् । बाह्वोः । इन्द्र । धत्से । मदऽच्युतम् ।
अहये । हन्तवै । ऊँ इति । प्र । पर्वताः । अनवन्त । प्र । गावः ।
प्र । ब्रह्माणः । अभिऽनक्षन्तः । इन्द्रम् ॥ ५ ॥ ३२ ॥

हे इन्द्र बाह्वोर्वज्रमायुधं कीदृशं मदच्युतं शत्रूणां मदस्य च्यावयितारं यद्यदा आधत्से आदधासि । किमर्थं अहये अहिनामानमसुरं मेघंवा हन्तवै उइत्यवधारणे हन्तुमेव । किंच यदात्वा इन्द्रेण अहिनामके असुरे हते सति पर्वता जगदापूरकामेघाः मानवन्त नुशब्दे प्रकर्षेणाशब्दयन् यद्यावी । गावः ततस्थान्युदकानि च प्रकर्षेण ध्वनिमकुर्वन् । उदकान्यध्वनयन्नित्यत्र याजुषो-निगमः—यददः संप्रयन्तीरहावनदताहते तस्मादानद्योनामस्थेति । तुरीयःपादः परोक्षः तदानीम-भिनक्षन्तः अभितइन्द्रं स्तुतिभिर्हविर्भिर्गच्छन्तो ब्रह्माणो ब्राह्मणाइन्द्रं पर्यचरन् । यद्वा ब्रह्माणः बृहद्वृद्धो मवृद्धाः पर्वतादयः इन्द्रमस्तुवन् इति ॥ ५ ॥

॥ इति पष्ठस्य षष्ठे द्वात्रिंशोवर्गः ॥ ३२ ॥

अथ षष्ठी—

तमुष्टवामयइमाजजानविश्वाजातान्यवराण्यस्मात् ।
इन्द्रेणमित्रंदिधिषेमगीर्भिरुपोनमोभिर्वृषभंविशेम ॥ ६ ॥

तम् । ऊँ इति । स्तवाम । यः । इमा । जजान । विश्वा । जातानि ।
अवराणि । अस्मात् । इन्द्रेण । मित्रम् । दिधिषेम । गीःऽभिः ।
उपो इति । नमःऽभिः । वृषभम् । विशेम ॥ ६ ॥

परस्परं स्तोतारआहुः तमु तमेवेन्द्रं वयं संहृत्य स्तवाम स्तोत्रं करवाम । यइन्द्रः इमा इमानि भूतानि जजान जनयामास तस्मादस्मादिन्द्रादेव विश्वा विश्वानि सर्वाणि वस्तुजातानि सर्वाणि जगन्तिवा अवराणि अवरकालीनानि पश्चाद्भवानि भवन्ति तेनानेनेन्द्रेण वयं गीर्भिः स्तुतिभिः मित्रं लुप्तभावे प्रत्ययेन निर्देशः मैत्रीं दिधिषेम धारयेम । दिधिष धारणेइति धातुं केचिद्वदन्ति यद्वा मित्रं छान्दसमेकवचनं वयमिन्द्रेणसह मित्राणि सुहृदोभवामेति गीर्भिरिन्द्रं शब्दयेम । धिषशब्दे जौहोत्यादिकः अन्यत्ययेन द्विविकरणाता श्लुश्च शपश्च । ततोनमोभिः क्रियमाणैर्नमस्कारैः दीयमानैर्हविर्भिर्वा वृषभं कामानांवर्षकमिन्द्रं उपोविशेम अस्मदभिमुखमेव कुर्याम ॥ ६ ॥

१तै० सं० ५. ६ १ ।

अथ सप्तमी–

वृत्रस्य॑त्वाश्वसथा॒दीष॑माणा॒विश्वे॑दे॒वाअ॑जहु॒र्येसखा॑यः ।
म॒रुद्भि॑रिन्द्रस॒ख्यंते॑अस्त्वथे॒माविश्वाः॒पृत॑नाजयासि ॥ ७ ॥

वृत्रस्य॑ । त्वा॒ । श्व॒सथा॑त् । ईष॑माणाः । विश्वे॑ । दे॒वाः । अ॒ज॒हुः॒ । ये । सखा॑यः । म॒रुत्ऽभिः॑ । इ॒न्द्र॒ । स॒ख्यम् । ते॒ । अ॒स्तु॒ । अथ॑ । इ॒माः । विश्वाः॑ । पृत॑नाः । ज॒या॒सि॒ ॥ ७ ॥

हे इन्द्र तव ये विश्वेदेवाः प्राक्सखायः संग्रामे सखित्वं कुर्यामिति मित्राणि अभवन् ते सर्वे देवाः वृत्रस्य वृत्रासुरस्य श्वसथात् श्वसेरौणादिकोथप्रत्ययः सर्वानागच्छतोदृष्ट्वा तेषां भीत्युत्पादनाय वृत्रासुरः श्वासमकार्षीत्व श्वासाद्भीताः सन्तः अतएव ईषमाणाः सर्वतः पलायमानाः त्वा त्वामजहुः संग्रामेत्यक्तवन्तः एवंसति हेइन्द्र मरुद्भिः सह सख्यं सखिभावस्ते तवास्तु । ये मरुतस्त्वां नपरित्यजन्ति तैः सहेति । अथानंतरं इमा विश्वाः पृतनाः शत्रुसेना जयासि स्वबलेनाभिभवसि अनेन वृत्रघ्नं तमिन्द्रमाह। अत्र इन्द्रोवैवृत्रंहनिष्यन् इत्यादिब्राह्मणमनुसंधेयम्॥ ७ ॥

अथाष्टमी–

त्रिःष॒ष्टिस्त्वा॑म॒रुतो॑वावृधा॒नाउ॒स्राइ॑वरा॒शयो॑य॒ज्ञिया॑सः ।
उप॑त्वेमः॑कृ॒धिनो॑भाग॒धेयं॒शुष्मं॑तए॒नाह॒विषा॑विधेम ॥ ८ ॥

त्रिः । ष॒ष्टिः । त्वा॒ । म॒रुतः॑ । व॒वृ॒धा॒नाः । उ॒स्राःऽइ॑व । रा॒शयः॑ । य॒ज्ञिया॑सः । उप॑ । त्वा॒ । आ । इ॒मः॒ । कृ॒धि । नः॒ । भा॒ग॒ऽधेय॑म् । शुष्म॑म् । ते॒ । ए॒ना । ह॒विषा॑ । वि॒धे॒म ॥ ८ ॥

प्रसंगादेवावन्तोमरुतः सहायाअभन्नित्याह–हे इन्द्र त्रिः त्रयः त्रयः सुपांसुलुगितिलुः षष्टिः षष्ट्युत्तरं त्रिसंख्याकाः मरुतः । तेच तैत्तिरीयके–ईदृङ्चान्यादृङ्चेत्यादिना नवसुगणेषु सप्तसप्तनिपादिताः । तत्र आदिपंचगणाः संहितायामाम्नायन्ते स्वतवांश्च प्रघासीच सांतपनश्च

गृहमेधीच क्रीडीच शाकीचोज्जेषीचेति। सैन्तिकः षष्ठोगणः ततोधुनिश्च ध्वान्तश्चेत्यायास्त्रपोर-ण्येनुवाक्याः। इत्थं त्रयः षष्टिसंख्याकाः उस्राइवराशयः गावइव संघीभूतास्ते त्वा त्वां वावृधानाः स्वबलेन वर्धितवन्तः तेमरुतः यज्ञियासो यज्ञार्हाअभवन्। तं मरुत्सहायमिन्द्रं त्वा त्वां वयं एमः उपगच्छामः ततस्त्वं नोस्मभ्यं भागधेयं भजनीयं धनं कृधिकुरु। पश्चाद्वयमपि एना एनेन सोमलक्षणेन हविषा ते तुभ्यं शुष्मं शत्रूणां शोषकं बलं विधेम। विधविधाने विदध्म कुर्मइत्यर्थः ॥ ८ ॥

अथ नवमी—

तिग्ममायुधंमरुतामनीकंकस्तइन्द्रप्रतिवज्रंदधर्ष ।
अनायुधासोअसुराअदेवाश्चक्रेणताँअपवपऋजीषिन् ॥ ९ ॥

तिग्मम् । आयुधम् । मरुताम् । अनीकम् । कः । ते । इन्द्र । प्रति ।
वज्रंम् । दधर्ष । अनायुधासः । असुराः । अदेवाः । चक्रेण ।
तान् । अप । वप । ऋजीषिन् ॥ ९ ॥

हे इन्द्र ते तव स्वभूतं तिग्मं तीक्ष्णमायुधं आयुध्यतेनेनेति आयुधं धनुः तत्र मरुतां त्रयःषष्टिसंख्याकानां त्वत्सहायानां अनीकं सैन्यंच त्वदीयं वज्रंच कः कोवा देवोमनुष्योवा प्रतिदधर्ष प्रतिकूलमभिभवति अभिभावुकोनास्तीत्यर्थः। धृषप्रसहने। आधृषाद्वेति विभाषितणिचि तदभावे लिटिरूपं। अतएव अनायुधासः धनुराद्यायुधवर्जिता अदेवाः देववर्जिता देवद्विषोये असुराः सन्ति हे ऋजीषिन् अपार्जितोभिषुत्यः सोम ऋजीषी तद्वन्निन्द्र तानसुरान् चक्रेण चक्रसमानवीर्येण चक्ररूपेण वज्रेण वा अपवप अपगतान्कुरु अपनुदेत्यर्थः ॥ ९ ॥

अथ दशमी—

महउग्रायतवसेसुवृक्तिंप्रेरयशिवतमायपश्वः ।
गिर्वाहसेगिरइन्द्रायपूर्वीर्धेहितन्वेकुविदङ्गवेदत् ॥ १० ॥ ३२ ॥

महे । उग्राय । तवसे । सुऽवृक्तिम् । प्र । ईरय । शिवऽतमाय ।
पश्वः । गिर्वाहसे । गिरः । इन्द्राय । पूर्वीः । धेहि ।
तन्वे । कुवित् । अङ्ग । वेदत् ॥ १० ॥ ३२ ॥

हे स्तोतः महे महते गुणैः उग्राय बलेनोद्गूर्णाय तवसे तुइति धातुर्वृद्ध्यर्थः। मवृद्धाय शिवतमाय कल्याणतमायेन्द्राय सुवृक्तिंशोभनां स्तुतिं मेरय चोदय कुरु। किमर्थं पश्वः पशोः द्विपाच्च चतुष्पाच्च पशोर्मम अस्मदीयाय गवेवा यद्वा पशोरतीन्द्रियार्थं द्रष्टुर्मम धनादिकं दातुं गवे सुखादिकं प्रदातुमिन्द्राय स्तुतिं मेरय। एतदेवाह हे स्तोतः गिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानायेन्द्राय पूर्वीर्बह्वीः गिरः स्तुतीः धेहि कुरु। ततः सइन्द्रः तन्वे तनोति कुलमिति तनूस्तनयः तस्मै पुत्राय स्वशरीराय आत्मनेवा कुवित् बहुनामैतत् बहुधनं अंग क्षिप्रं वेदत् लंभयतु ददातु। विदॢलाभे लेटचडागमः कुविच्छब्दयोगादनिघातः॥ १०॥

॥ इति षष्ठस्य षष्ठे त्रयस्त्रिंशोवर्गः॥ ३३॥

अथैकादशी—

उक्थवाहसेविभ्वेमनीषांद्रुणानपारमीरयानदीनाम्।
निस्पृशधियातन्विश्रुतस्यजुष्टतरस्यकुविदङ्गवेदत्॥ ११॥

उक्थऽवाहसे। विऽभ्वे। मनीषाम्। द्रुणा। न। पारम्। ईरय। नदीनाम्। नि। स्पृश। धिया। तन्वि। श्रुतस्य। जुष्टऽतरस्य। कुवित्। अङ्ग। वेदत्॥ ११॥

हे स्तोतः उक्थवाहसे उक्थैः स्तोत्रशस्त्रादिभिरुह्यमानाय अतएव विभ्वे महते यद्वा शत्रूणामभिभवित्रे इन्द्राय इन्द्रार्थं मनीषां मनसईषां स्तुतिं ईरय मेरय। तत्रदृष्टान्तः—द्रुणानयथा नाविकः नदीनां नदमानानां सरितां पारं तीरंमति पथिकं द्रुणा नावा प्रापयति तद्वदिदं मति स्तुतिं गमयेति। किंच निस्पृश नितरां धनं स्पर्शय गमय तन्वि आत्मनि पुत्रेवा। कीदृशं श्रुतस्य सर्वत्र विश्रुतस्य मसिद्धस्य जुष्टतरस्य अत्यर्थं मीणयितुरिन्द्रस्य स्वभूतं धनं धिया त्वदीयया स्तुत्या कर्मणावा आत्मानं गमय ततस्त्वयाभिष्टुतइन्द्रः कुविद्बहुधनं अंग क्षिप्रं वेदत् लंभयतु ददातु॥ ११॥

अथ द्वादशी—

तद्विविड्ढियत्तइन्द्रोजुजोषत्स्तुहिसुष्टुतिंनमसाविवास।
उपभूषजरितर्मारुवण्यश्रावयावाचंकुविदङ्गवेदत्॥ १२॥

तत् । विविड्ढि । यत् । ते । इन्द्रः । जुजोषत् । स्तुहि । सुऽस्तुतिम् ।
नमसा । आ । विवास । उप । भूष । जरितः । मा । रुवण्यः ।
श्रावय । वाचम् । कुवित् । अङ्ग । वेदत् ॥ १२ ॥

हे ऋत्विक् तत्सोमादिहविः स्तोत्रं वा विविड्ढि व्यापय तानीन्द्रार्थं कुर्वित्यर्थः। ते तव स्वभूतं यद्धविः स्तोत्रं वा इन्द्रो जुजोषत् स्वीकुर्यात् तत्कुरु। जुषी प्रीतिसेवनयोः लेटि शपः श्लुः अडागमश्छान्दसत्वात् अभ्यस्तस्येति गुणप्रतिषेधाभावः। हे स्तोतः सुष्टुतिं सुस्तुतिं शोभनास्तुतिर्यस्य स तथोक्तः तादृशमिन्द्रं स्तुहि। तथा नमसा स्तोत्रेण हविषा वा आविवास इन्द्रमाभिमुख्येन परिचर। विवासतिः परिचरणकर्मा लोटि रूपं। हे जरितः स्तोतः उपभूष भूष अलंकारे अलंकृतो भव मा रुवण्यः धनाभावात् मा ध्वनयः मा रोदीरित्यर्थः। धनागमने कारणमाह— हे स्तोतः वाचं स्तुतिं इन्द्रं श्रावय ज्ञापय ततस्त्वया स्तुत इन्द्रः तुभ्यं कुवित् बहुधनं क्षिप्रं प्रयच्छतु ॥ १२ ॥

पृष्ठ्यषडहगतेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे अवद्रप्सइति तृचः। सूत्रितं च— अवद्रप्सो अंशुमतीमतिष्ठदिति तिस्रोऽच्छा म इन्द्रमिति नित्यमैकाहिकमिति[1]।

तत्र प्रथमा सूक्ते त्रयोदशी—

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥ १३ ॥

अव । द्रप्सः । अंशुऽमतीम् । अतिष्ठत् । इयानः । कृष्णः । दशऽभिः ।
सहस्रैः । आवत् । तम् । इन्द्रः । शच्या । धमन्तम् । अप ।
स्नेहितीः । नृऽमनाः । अधत्त ॥ १३ ॥

अत्रेतिहासमाचक्षते— कृष्णो नामासुरः दशसहस्रसंख्यैरसुरैः परिवृतः सन् अंशुमतीनामधेयाया नद्यास्तीरे अतिष्ठत्। तत्र तं कृष्णमुदकमध्ये स्थितं इन्द्रो बृहस्पतिना सहागच्छत् आगत्य तं कृष्णं तस्यानुचरांश्च बृहस्पतिसहायो जघानेति। केचिदन्यथा वदन्ति— तेषां कथाहेतुः द्रप्स इति उदककणोऽभिधीयते स तु सोमः। द्रप्सश्चस्कन्देत्यादिषु। सोमपरत्वेनोक्तत्वादेवद्-

१ ऋ० सं० ७ ६ २५।

पदमाश्रित्याहुः—अपक्रम्यतुदेवेभ्यः सोमोवृत्रभयार्दितः। नदीमंशुमतींनाम अभ्यतिष्ठत्कुरून्प्रति १ तंबृहस्पतिनैकेन सोऽभ्ययाद्वृत्रहासह। योत्स्यमानंसुसंहृष्टैर्मरुद्भिर्विविधायुधैः २ दृष्ट्वा तानायतःसोमः स्वबलेनव्यवस्थितः। मत्वानोवृत्रमायान्तं जिघांसुमरिसेनया ३ व्यवस्थितंधनुष्मन्तं तमुवाचबृहस्पतिः। मरुत्पतिरयंसोमः मेहिदेवान्पुनर्विभो ४ सोऽब्रवीन्नेतितंशक्रः ओजसैवबलाद्बली। इयायदेवानादाय तंपपुर्विधिवत्सुराः ५ जघ्नुःपीत्वाचदैत्यानां समरेनवतीर्नव। तदवद्रप्सइत्यस्मिन्नृचेसर्वंनिगद्यते ६ एतदनार्षत्वेनादरणीयंभवति। एषोर्थः क्रमेणऋक्षुवक्ष्यते। तथाचास्याऋचोयमर्थः—द्रप्सः द्रुतं सरति गच्छतीतिद्रप्सः पृषोदरादिः द्रुतं गच्छन् दशभिः सहस्रैः दशसहस्रसंख्यैरसुरैः इयानः कृष्णः एतन्नामकःअसुरः अंशुमतीं नामनदीं अवातिष्ठत् अवतिष्ठते ततः शच्या कर्मणा प्रज्ञानेनवा धमन्तं उदकस्यान्तरुच्छ्वसन्तं यद्वा जगद्भीतिकरं शब्दं कुर्वन्तं तं कृष्णासुरं इन्द्रोमरुद्भिःसह आवत् प्राप्नोत्। पश्चात् तं कृष्णासुरं तस्यानुचरांश्च हतवानित्याह—नृमनाः नृषु मनोयस्यसः यद्वा कर्मनेतृषु ऋत्विक्षु एकविधं मनोयस्य सतथोक्तः तादृशः सन् स्नेहितीः स्नेहितिर्वधकर्मसुपठितः सर्वेस्याहिंसित्रीस्तस्यसेनाः अपाधत्त अपधानं हननं अवधीदित्यर्थः। अपस्नेहितिं नृमणाअधद्राइति छन्दोगाः पठंति। तस्यानुचरान्हत्वा तं द्रुतं गच्छन्तमसुरं अपाधत्त हतवान्॥ १३ ॥

अथ चतुर्दशी—

द्र॒प्सम॑पश्यं॒ विषु॑णे॒ चर॑न्तमुपह्व॒रे न॒द्यो॑ अं॒शुमत्याः॑।
नभो॒ न कृ॒ष्णम॑वतस्थि॒वांस॒मिष्या॑मि वो वृषणो॒ युध्य॑ता॒जौ॥ १४ ॥

द्र॒प्सम्। अ॒प॒श्य॒म्। विषु॑णे। चर॑न्तम्। उ॒प॒ऽह्व॒रे। न॒द्यः॑। अं॒शु॒ऽमत्याः॑।
नभः॑। न। कृ॒ष्णम्। अ॒व॒त॒स्थि॒ऽवांस॑म्। इष्या॑मि। व॒ः।
वृ॒ष॒णः॒। युध्य॑त। आ॒जौ॥ १४ ॥

चतुर्थः पादोमारुतः मरुतः प्रति यद्वाक्यमिन्द्रउवाच। तदत्रकीर्त्यते हे मरुतः द्रप्सं द्रुतगामिनं कृष्णमहमपश्यं अदर्शं। कुत्रवर्तमानं विषुणे विष्वगंचने सर्वतोविस्तृतेदेशे यद्वा विषुणे विषमे परैरदृश्ये गुहारूपे देशे चरन्तं परितोगच्छन्तं किंच अंशुमत्याः एतन्नामिकायानद्यो नद्याः उपह्वरे अत्यन्तंगूढे स्थाने नभोन नभसि यथादित्योदीप्यते तद्वत्तत्र दीप्यमानं अवतस्थिवांसं उदकस्यान्तरवस्थितं कृष्णं एतन्नामकं असुरं अपश्यं तस्मिन् दृष्टेसति हे वृषणः कामानामुदकानांवा सेक्तारोमरुतः वोयुष्मान् युद्धार्थं इष्यामि अहमिच्छामि। ततोयूयं तमिमं कृष्णं

आजौ अजन्ति गच्छन्त्यत्रयोद्धारः आयुधानि प्रक्षेपयन्तीतिवा आजिः संग्रामः तस्मिन् युध्यत संहरत वाक्यभेदादनिघातः। केचिदिष्यामिवोमरुतइतिपठन्ति। तत्र हेमरुतः वोयुष्मानिच्छामीत्यर्थोभवति ॥ १४ ॥

अथ पञ्चदशी—

अर्वद्रप्सोअंशुमत्यांउपस्थेधारयत्तन्वंतित्विषाणः।
विशोअदेवीरभ्याचरन्तीर्बृहस्पतिनायुजेन्द्रःससाहे ॥१५॥२४॥

अर्ध। द्रप्सः। अंशुऽमत्याः। उपऽस्थे। अधारयत्। तन्वम्। तित्विषाणः। विशः। अदेवीः। अभि। आऽचरन्तीः। बृहस्पतिना। युजा। इन्द्रः। ससहे ॥ १५ ॥ २४ ॥

अध अथ द्रप्सोद्रुतगामी कृष्णः अंशुमत्यानद्याः उपस्थे समीपे तित्विषाणो दीप्यमानः सन् तन्वं आत्मीयं शरीरं आधारयत् पैरैरहिंस्यत्वेन बिभर्ति। यद्वा यस्मात्स्वर्धं स्वशरीरमाहारादिभिरपोषयत् तत्र इन्द्रोगत्वा बृहस्पतिना एतन्नामकेन देवेन युजा सहायेन अदेवीः अद्योतमानाः कृष्णरूपाइत्यर्थः। यद्वा पापयुक्तत्वादस्तुत्याः आचरन्तीः आगच्छन्तीर्विशः असुरसेनाः अभिससहे जघान। तमवधीदित्यर्थः प्रसंगादवगम्यते ॥१५ ॥

॥ इति षष्ठस्य षष्ठे चतुर्विंशोवर्गः ॥ २४ ॥

अथ षोडशी—

त्वंहत्यत्सप्तभ्योजायमानोशत्रुभ्योंअभवःशत्रुरिन्द्र।
गूळ्हेद्यावापृथिवीअन्वविन्दोविभुमद्भ्योभुवनेभ्योरणंधाः[1] ॥ १६ ॥

त्वम्। ह। त्यत्। सप्तऽभ्यः। जायमानः। अशत्रुऽभ्यः। अभवः। शत्रुः। इन्द्र। गूळ्हे इति। द्यावापृथिवी इति। अनु। अविन्दः। विभुमत्ऽभ्यः। भुवनेभ्यः। रणम्। धाः ॥ १६ ॥

---

१ शाखान्तरे।

हे इन्द्र त्वं खलु त्यत् तत् कर्म कृतवानसि । किंतत् उच्यते—जायमानस्त्वं प्रादुर्भवन्नेव अशत्रुभ्यः शत्रुरहितेभ्यः सप्तभ्यः कृष्णवृत्रनमुचिशंबरादिसप्तभ्योबलवद्भ्यः शत्रुभ्यः तदर्थं शत्रुरभवः । यद्वा सप्तभ्यः सप्तैवांगिरसः । सप्तभ्यः अंगिरोभ्यः गवानयनार्थं प्रादुर्भवन्नेवाशत्रुभ्योबलवद्भ्यः पणिभ्यः शत्रुरभवः । किंच हे इन्द्र त्वं गूळ्हे तमसा गूढे संवृते द्यावापृथिवी द्यावापृथिव्यौ सूर्यात्मना ते प्रकाश्य अनुक्रमेण अविन्दः अलभथाः । तथा विभुमद्भ्यः महत्त्वयुक्तेभ्योभुवनेभ्योलोकेभ्यः रणं रमणं धाः धारयसि विदधासीत्यर्थः ॥ १६ ॥

अथ सप्तदशी—

त्वंहत्यदंप्रतिमानमोजोवज्रेणवज्रिन्धृषितोजघंथ ।
त्वंशुष्णस्यावातिरोवधत्रैस्त्वंगाइन्द्रशच्येदविन्दः ॥ १७ ॥

त्वम् । ह । त्यत् । अप्रतिऽमानम् । ओजः । वज्रेण । वज्रिन् ।
धृषितः । जघन्थ । त्वम् । शुष्णस्य । अव । अतिरः । वधत्रैः ।
त्वम् । गाः । इन्द्र । शच्या । इत् । अविन्दः ॥ १७ ॥

हे इन्द्र त्वंह त्वंखलु त्यदेतत्कर्माकार्षीः । किंतत् अभिधीयते—यतः हेवज्रिन् वज्रवन्निन्द्र धृषितः धृष्टः संग्रामेषु शत्रुहनने कुशलःसन् । यद्वा धृष्टोधीरःसन् अप्रतिमानं प्रतिमानमुपमा । निरुपमं अस्य सदृशं अन्यदीयं वीर्यं नास्तीत्यर्थः । तादृशं शुष्णस्य ओजोबलं वज्रेणायुधेन जघंथ हतवानसि । अभ्यासाच्चेति हंतेर्घत्वं । पूर्वं शुष्णस्य बलं विनाश्य इदानीं शुष्णमपिहतवानित्याह—त्वं वधत्रैः हननसाधनैः आयुधैः शुष्णस्य । क्रियाग्रहणं कर्तव्यमिति संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी । शुष्णमवातिरः कुत्साय राजर्षये अवाङ्मुखं कृत्वा अवधीः । तथाचनिगमः—कुत्सायशुष्णमशुषंनिबर्हीरिति[1] । तथा हे इन्द्र त्वं शच्या स्वकीयया प्रज्ञया कर्मणावा गाः शत्रून्हत्वा तेषां गाअविन्दः अलभथाः । यद्वा अंगिरसां गाः पणीन् संप्रहृत्य लब्धवानसि ॥ १७ ॥

अथाष्टादशी—

त्वंहत्यद्वृषभचर्षणीनांघनोवृत्राणांतविषोबभूथ ।
त्वंसिंधूँरसृजस्तस्तभानान्त्वमपोअजयोदासपत्नीः ॥ १८ ॥

---

[1] ऋ० सं० ३. ५. १९ ।

त्वम् । ह । त्यत् । वृषभ । चर्षणीनाम् । घनः । वृत्राणाम् ।
तविषः । बभूथ । त्वम् । सिन्धून् । असृजः । तस्तभानान् ।
त्वम् । अपः । अजयः । दासऽपत्नीः ॥ १८ ॥

त्वंखलु त्यत् तत्कर्मकृतवानसि । किंतत् हे वृषभ कामानां वर्षितरिन्द्र चर्षणीनां यन्तॄणां मनुष्याणां भावितानां वृत्राणां उपद्रवाणां घनोहन्ता । अमूर्तार्थेपि छन्दोविषयत्वान्निपातनं । तादृशस्त्वं तविषः प्रवृद्धोबलवान्वा बभूथ बभूविथ । बभूथाततंथेति इडभावोनिपात्यते । ततस्त्वं तस्तभानान् असुरैर्विरुध्यमानाः सिन्धून् सप्तगंगाद्यानदीः सरणायासृजः पश्चात् त्वंदासपत्नीः दासाउपक्षपयितारः शत्रवः तेपतयः स्वामिनोयासांताः । नित्यंसपत्न्यादिष्वित्यत्र दासाच्चेत्युपसंख्यानात् ङीप् । असुरस्वामिकाः अपः अजयः जितवानसि तानसुरान् जित्वा उदकानिच मासृज इत्यर्थः ॥ १८ ॥

अथैकोनविंशी—

समुक्रतूरणितायःसुतेष्वनुत्तमन्युर्योअहेवरेवान् ।
यएकइन्नर्यपांसिकर्तासवृत्रहाप्रतीदन्यमाहुः ॥ १९ ॥

सः । सुऽक्रतुः । रणिता । यः । सुतेषु । अनुत्तऽमन्युः ।
यः । अहाऽइव । रेवान् । यः । एकः । इत् । नरि । अपांसि ।
कर्ता । सः । वृत्रऽहा । प्रति । इत् । अन्यम् । आहुः ॥ १९ ॥

अथ परोक्षकृतः सइन्द्रः सुक्रतुः शोभनप्रज्ञः शोभनकर्मा वा भवति । यः सुतेष्वभिषुतेषु सोमेषु रणिता तत्पानार्थं रमणशीलः । किंच अनुत्तमन्युः परैरनुन्नक्रोधः शत्रुभिर्नेतुमशक्यः तादृशोयः इन्द्रः रेवान् धनवान् । तत्रदृष्टान्तः—अहेव यथा अहानि दिवसाः धनवन्तः दिवसेषुहि धनानि प्रादुर्भवंति न रात्रिषु तद्वत् । तथा यइन्द्रः एकइव असहायएव नरि कर्मनेतरि मनुष्ये अपांसि कर्माणि कर्ता कर्तुंशीलोभवति ताच्छीलिकस्तृन् अतएव षष्ठीप्रतिषेधः । सपूर्वोक्तगुणोपेतइन्द्रः वृत्रहा अपामावरकस्यासुरस्योपद्रवस्य वा हन्तृत्वात् वृत्रहेति सर्वैः श्रूयते तमेवेन्द्रं अन्यं प्रति इदवधारणे अन्यंप्रत्येवाहुः इन्द्रः सर्वमन्यं शत्रुसंघं प्रतिभवति अभिभवत्येवेति वदन्ति ॥ १९ ॥

अथ विंशी–

सवृत्रहेन्द्रश्चर्षणीधृत्तंसुष्टुत्याहव्यंहुवेम ।
सप्राविताम॒घवानोधिवक्तासवाजस्यश्रवस्यस्यदाता ॥ २० ॥

सः । वृत्रऽहा । इन्द्रः । चर्षणिऽधृत् । तम् । सुऽस्तुत्या । हव्यम् । हुवेम । सः । प्रऽअविता । मघऽवा । नः । अधिऽवक्ता । सः । वाजस्य । श्रवस्यस्य । दाता ॥ २० ॥

वृत्रहा वृत्रस्य हन्ता सइन्द्रश्चर्षणीधृत् मनुष्याणां धनादिदानेन पोषको भवति तमिन्द्रं हव्यं आह्वातुं योग्यं वयं सष्टुत्या शोभनया स्तुत्या हुवेम अस्मद्यज्ञेष्वाह्वयामः । किमर्थं यूयमाह्वयथेतिचेत् कारणं ब्रूमः–सइन्द्रः प्राविता प्रकर्षेणास्माकं रक्षिताभवति । किंच मघवा धनवानिन्द्रः नोस्माकमधिवक्ता अधिकं वक्ता बहुमानेन वक्ता भवति । यद्वा धनदानेनास्मानधिकं वक्तुमर्हति । अर्हेकृत्यतृचश्चेति तृच् । किंच सएवेन्द्रः श्रवस्यस्य श्रवसः कीर्तेर्निमित्तस्य वाजस्यान्नस्य । यद्वा श्रवसोन्नस्य हिताय वाजस्य बलस्य दाता भवतिखलु । तस्मादेवंगुणमिन्द्रं वयमाह्वयामः ॥ २० ॥

अथैकविंशी–

सवृत्रहेन्द्रऋभुक्षाःसद्योजज्ञानोहव्योबभूव ।
कृण्वन्नपांसिनर्यापुरूणिसोमोनपीतोहव्यःसखिभ्यः॥२१॥३५॥

सः । वृत्रऽहा । इन्द्रः । ऋभुक्षाः । सद्यः । जज्ञानः । हव्यः । बभूव । कृण्वन् । अपांसि । नर्या । पुरूणि । सोमः । न । पीतः । हव्यः । सखिऽभ्यः ॥ २१ ॥ ३५ ॥

ऋभुक्षाः समहान् । यद्वा ऋभुशब्देन ऋभ्वादयस्त्रयोगृह्यन्ते ऋभुभिः सह क्षियन्ति निवसतीति तादृशः । वृत्रहा सइन्द्रः सद्यस्तदानीमेव जज्ञानः प्रादुर्भवन् हव्यः सर्वैःस्तोतृभिर्यष्टृभिराह्वातव्योबभूव । किंच नर्या नर्याणि नरा मनुष्याः कर्मनेतारः तेभ्योहितानि पुरूणि बहूनि अपांसि कर्माणि कृण्वन् कुर्वन् सखिभ्यः हविःप्रदानेनोपकारकत्वात् मित्रेभ्यः ऋत्विग्भ्यः

हव्यः आह्वातव्यः हवनयोग्योवा बभूव । तत्रदृष्टान्तः—सोमेन यथा पीतःसोमः यद्वद्धव्यः स्वर्गादिफलानि कुर्वन् देवैराह्वातव्योभवति तद्वत् ॥ २१ ॥

॥ इति षष्ठस्य षष्ठे पंचत्रिंशोवर्गः ॥ ३५ ॥

याइन्द्रेति पंचदशर्चं चतुर्थं सूक्तं काश्यपस्य रेभस्यार्षमैन्द्रं । दशम्यतिजगती द्वापंचाशदक्षरा । एकादशीद्वादश्यावुपरिष्टाद्बृहत्यौ त्र्यष्टकांवद्वादशकयत्यौ त्रयोदश्यतिजगती चतुर्दशीत्रिष्टुप् पंचदशी जगती शिष्टाबृहत्यः । तथाचानुक्रम्यते—याइन्द्रपंचोना रेभः काश्यपो बार्हतमतिजगत्युपरिष्टाद्बृहत्यावतिजगतीत्रिष्टुप् जगतीत्यन्तवइति । सूक्तविनियोगोलैंगिकः । महाव्रते निष्केवल्ये बार्हततृचाशीतौ याइन्द्रेत्यादिनवर्चः । तथैवपंचमारण्यके सूत्र्यते—याइन्द्रभुजआभरइति नव सूददोहाइति । चातुर्विंशिकेहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिनो वैकल्पिकानुरूपतृचस्य याइन्द्रेत्यादिके द्वे द्वितीयातृतीये । सूत्र्यतेच—तमिन्द्रंजोहवीमि याइन्द्रभुजआभर इत्येकाद्वेचेति ।

तत्र प्रथमा—

याइन्द्रभुजआभरःस्वर्वाँअसुरेभ्यः ।
स्तोतारमिन्मघवन्नस्यवर्धययेचत्वेवृक्तबर्हिषः ॥ १ ॥

याः । इन्द्र । भुजः । आ । अभरः । स्वःऽवान् । असुरेभ्यः ।
स्तोतारम् । इत् । मघऽवन् । अस्य । वर्धय । ये ।
च । त्वे इति । वृक्तऽबर्हिषः ॥ १ ॥

ऋषिरिन्द्रं प्रार्थयते हे इन्द्र स्वर्वान् सुखवान् स्वर्गवान्वा अथवा स्वशब्दः सर्वपर्यायः सर्वभूतजातमात्मनएवोत्पन्नत्वात् तद्वान् एवंगुणस्त्वं याः यानि भुजो भोक्तव्यानि धनानि असुरेभ्यो बलवद्भ्यो राक्षसेभ्यः आभरः आहरः तान् हत्वा आहृतवानसि । हग्रहोरितिभकारादेशः । अतएव हे मघवन् धनवन्निन्द्र अस्य अन्वादेशे अशादेशः एतस्यास्य धनस्यदानेन स्तोतारमित् तवस्तोत्रकारिणमेव वर्धय वृद्धिमन्तंकुरु । येचान्ये यष्टारः त्वे त्वदर्थं वृक्तबर्हिषः स्तीर्णबर्हिषोभवन्ति अतस्तांश्च धनेन वर्धय ॥ १ ॥

अथ द्वितीया—

यमिन्द्रदधिषेत्वमश्वंगांभागमव्ययम् ।
यजमानेसुन्वतिदक्षिणावतितस्मिन्तंधेहिमापणौ ॥ २ ॥

यम् । इन्द्र । दधिषे । त्वम् । अश्वम् । गाम् । भागम् ।
अव्ययम् । यजमाने । सुन्वति । दक्षिणाऽवति ।
तस्मिन् । तम् । धेहि । मा । पणौ ॥ २ ॥

हे इन्द्र त्वं यमश्वं गमनसाधनान् हरीन् गां अग्निहोत्रकर्मणि पयःप्रदानेनोपकारिकाः गाः अव्ययं व्ययरहितं अविनश्वरं भागं भजनीयं धनं सर्वत्रैकत्वमविवक्षितं एतान् शत्रुभ्यः आहृत्य दधिषे धत्से बिभर्षि । तं सर्वं सुन्वति सोमाभिषवं कुर्वति दक्षिणावति यज्ञे ऋत्विग्भ्योदक्षिणादेयत्वेन तद्वति यजमाने यागंकुर्वाणे तस्मिन् त्वं धेहि । सर्वत्रधनादिदानं माकुर्वित्याह मापणौ पणव्यवहारे ,द्रव्यव्यवहारादयष्टाजनः पणिः तस्मिन् एतत्सर्वं मादेहि ॥ २ ॥

अथ तृतीया—

यइन्द्रसस्त्यव्रतोऽनुष्वापमदेवयुः ।
स्वैःषएवैर्मुमुरत्पोष्यंरयिंसनुतर्धेहितंततः ॥ ३ ॥

यः । इन्द्र । सस्ति । अव्रतः । अनुऽस्वापम् । अदेवऽयुः ।
स्वैः । सः । एवैः । मुमुरत् । पोष्यम् । रयिम् । सनुतः ।
धेहि । तम् । ततः ॥ ३ ॥

हे इन्द्र अदेवयुः देवान् युष्मानकामयमानः अव्रतोव्रतरहितः कर्मरहितोभूत्वा अनुस्वापं अनुवृत्तस्वप्नं यथाभवति तथा यः सस्ति स्वपिति यस्तस्वापे आद्रादिकः सजनः स्वैरात्मीयैः एवैर्गमनैरेव पोष्यं पोषणीयं रयिं स्वीयं धनं मुमुरत् मारयतु विनाशयतु । अमार्गैर्धूर्तादिभिः तस्यधनं नश्यतु नतु देवानां हविःप्रदानेनेति । ततः त्वं तमयष्टारं जनं सनुतरित्यन्तर्हितनाम सनुतः अन्तर्हिते कर्मरहिते कस्मिंश्चिद्देशे धेहि स्थापय ॥ ३ ॥

अथ चतुर्थी—

यच्छक्रासिपरावतियदर्वावतिवृत्रहन् ।
अतस्त्वागीर्भिर्द्युगदिन्द्रकेशिभिःसुतावाँआविवासति ॥४॥

यत् । शक्र । असि । पराऽवति । यत् । अर्वाऽवति ।
वृत्रऽहन् । अतः । त्वा । गीःऽभिः । द्युऽगत् । इन्द्र ।
केशिऽभिः । सुतऽवान् । आ । विवासति ॥ ४ ॥

हे शक्र शत्रुहननसमर्थेन्द्र यद्यदा परावति विप्रकृष्टेविदूरे द्युलोके देशे असि विपसे हे वृत्रहन् वृत्रस्य हन्तरिन्द्र यद्यदि अर्वावति अर्वाचीने तस्मादधरस्तात् स्थिते तदपेक्षया समीपेदेशेन्तरिक्षे भवसि । तस्मादपि अतोस्माद्भूलोकाद्वा द्युगत् गन्त्गवो किपि गमःकाविति अनुनासिकलोपः तुक् सुपांसुलुगितिलुक् । द्युलोकंप्रति गच्छद्भिः स्वभासा सर्वतोगच्छद्भिः केशिभिः केशवद्भिः हरिभिरिवस्थिताभिर्गीर्भिः स्तुतिभिः त्वा त्वां सुतवानभिपुतसोमवान्यजमान आविवासति आत्मीयं यज्ञं प्रत्यागमयति त्वामेवैः स्तोत्रैःपरिचरतीतिवा ॥ ४ ॥

अथ पञ्चमी—

यद्वासिरोचनेदिवःसमुद्रस्याधिविष्टपि ।
यत्पार्थिवेसदनेवृत्रहन्तमयदन्तरिक्षआगहि ॥ ५ ॥३६॥

यत् । वा । असि । रोचने । दिवः । समुद्रस्य । अधि ।
विष्टपि । यत् । पार्थिवे । सदने । वृत्रहन्ऽतम ।
यत् । अन्तरिक्षे । आ । गहि ॥ ५ ॥ ३६ ॥

हे इन्द्र यद्वा यदिवा दिवोद्युलोकस्य रोचने दीपनशीले स्थाने असि भवसि । यद्वा समुद्रस्य मध्ये अधि अधिगते विष्टपि विष्टपे तत्संबद्धे कस्मिंश्चित्स्थाने भवसि । हे वृत्रहन्तम अतिशयेन वृत्रस्यासुरस्य पापस्य वा हन्तरिन्द्र यद्यदिवा पार्थिवे पृथिव्यांभवे सदने स्थाने निषसे यद्वा अन्तरिक्षे तस्मिन् लोके वर्तसे यत्रकुत्र भवसि तथापि अस्मदीयं यज्ञं प्रत्यागहि आगच्छ ॥ ५ ॥

॥ इति पष्ठस्य षष्ठे षट्त्रिंशोवर्गः ॥ ३६ ॥

अथ षष्ठी–

सनःसोमेषुसोमपाःसुतेषुशवसस्पते ।
मादयस्वराधसासूनृतावतेन्द्ररायापरीणसा ॥ ६ ॥

सः । नः । सोमेषु । सोमऽपाः । सुतेषु । शवसः । पते । मादयस्व ।
राधसा । सूनृताऽवता । इन्द्र । राया । परीणसा ॥ ६ ॥

हे सोमपाः सोमस्यपातः हे शवसस्पते बलस्यपालयितरिन्द्र सपूर्वोक्तलक्षणस्त्वं सुतेष्वस्माभिरभिषुतेषु सोमेषु नोस्मान् राधसा बलसाधनान्नेन सूनृतावता अनृतरहितत्वोपेतेन । यद्वा सूनृतेति वाङ्नाम शोभनवाक्ययुक्तेन । अनेन पुत्रादिकं लक्ष्यते पुत्रोपेतेनान्नेन परीणसा बहुनामैतत् बहुना राया धनेनच नोस्मान्मादयस्व मोदय सोमस्य मदात्त्वंयोस्मभ्यमन्नपुत्रधनादिकं देहीत्यर्थः ॥ ६ ॥

अथ सप्तमी–

मानइन्द्रपरावृणग्भवानःसधमाद्यः ।
त्वंनऊतीत्वमिन्नआप्यंमानइन्द्रपरावृणक् ॥ ७ ॥

मा । नः । इन्द्र । परा । वृणक् । भव । नः । सधऽमाद्यः ।
त्वम् । नः । ऊती । त्वम् । इत् । नः । आप्यम् । मा ।
नः । इन्द्र । परा । वृणक् ॥ ७ ॥

हे इन्द्र नो हविषांप्रदातॄनस्मान्मापरावृणक् मापरित्याक्षीः वृजीवर्जने रौधादिकः लुङि रूपं । तदेवाह–त्वं नोस्माकं सोमेन सधमाद्यः सहमादनशीलोभव । किंच हे इन्द्र नोस्मान् त्वमेव ऊती ऊत्यां स्थापय । यद्वा ऊती व्यत्ययेन कर्तरि क्तिचि वा निपातितः त्वमेवास्माकं रक्षिता खलु । तथा त्वमित् इदवधारणे त्वमेवास्माकमाप्यं ज्ञातेयं त्वमेव बन्धुरित्यर्थः । अतएव मानइन्द्रपरावृणगिति एषगतोर्थः ॥ ७ ॥

अथाष्टमी–

अस्मेइन्द्रसचासुतेनिषदापीतयेमधु ।
कृधीजरित्रेमघवन्नवोमहदस्मेइन्द्रसचासुते ॥ ८ ॥

अस्मे इति । इन्द्र । सचा । सुते । नि । सद । पीतये ।
मधु । कृधि । जरित्रे । मघऽवन् । अवः । महत् ।
अस्मे इति । इन्द्र । सचा । सुते ॥ ८ ॥

हे इंद्र अस्मे अस्माभिः सचा सह सुतेभिषुते सोमे निषद अस्मदीये यज्ञे निषीद । किमर्थं मधुपीतये मधुनः सुपांसुलुगिति ङसोलुक् मदकरस्य सोमस्य पीतये पानाय । किंच हे मघवन् धनवन्निन्द्र महदवोरक्षणं जरित्रे कृधि कुरु करिष्यन्तति अस्मेइन्द्रसचासुतइति व्याख्यातःपादः ॥ ८ ॥

अथ नवमी–

नत्वादेवासआशतनमर्त्यासोअद्रिवः ।
विश्वाजातानिशवसाभिभूरसिनत्वादेवासआशत ॥ ९ ॥

न । त्वा । देवासः । आशत । न । मर्त्यासः । अद्रिऽवः ।
विश्वा । जातानि । शवसा । अभिऽभूः । असि । न ।
त्वा । देवासः । आशत ॥ ९ ॥

हे अद्रिवो वज्रवन्निन्द्र त्वा त्वां देवासः त्वदन्ये सर्वे देवाः नाशत स्वकर्मणा स्वबलेन वा नव्याप्नुवन्ति । नमर्त्यासो मर्त्या मनुष्याश्च न व्याप्नुवन्ति । कुतएतदवसीयते तदाह–विश्वा विश्वानि सर्वाणि जातानि भूतजातानि शवसा स्वबलेनैवाभिभूरसि अभिभावुकोसि भवसि । तस्मात् नत्वादेवासआशतेतिगतार्थः ॥ ९ ॥

चातुर्विंशिकेहनि माध्यन्दिनसवने ब्राह्मणाच्छंसिनो विश्वाःपृतनाइति वैकल्पिकःस्तोत्रियः । सूत्रितंच–विश्वाःपृतनाअभिभूतरंनरं तमिन्द्रंजोहवीमीति ।

तत्र प्रथमा सूक्ते दशमी–

विश्वा॒:पृत॑नाअभि॒भूत॑रं॒नरं॑स॒जूस्त॑तक्षु॒रिन्द्रं॑जज॒नुश्च॑रा॒जसे॑ ।
क्रत्वा॒वरि॑ष्ठं॒वर॑आ॒मुरि॑मु॒तोग्रमोजि॑ष्ठंत॒वसं॑तर॒स्विन॑म् ॥ १० ॥ ३७ ॥

विश्वा॑: । पृत॑नाः । अ॒भि॒ऽभूत॑रम् । नर॑म् । स॒ऽजूः । त॒त॒क्षुः ।
इन्द्र॑म् । ज॒ज॒नुः । च॒ । रा॒जसे॑ । क्रत्वा॑ । वरि॑ष्ठम् । वरे॑ ।
आ॒ऽमुरि॑म् । उ॒त । उ॒ग्रम् । ओजि॑ष्ठम् । त॒वस॑म् ।
त॒र॒स्विन॑म् ॥ १० ॥ ३७ ॥

विश्वाः सर्वाव्याप्तावा पृतनाः । पृङ्व्यायामे । व्यापियन्त्इति पृतनाः सेनाः सजूः प-रस्परं संगताः सत्यः अभिभूतरं शत्रूणामत्यर्थं अभिभवितारं नरं सर्वस्यनेतारमिन्द्रं ततक्षुः आयुधादिभिस्तीक्ष्णीकुर्वन्ति आयुधवंतमश्ववंतंच चक्रुरित्यर्थः । यद्वा पृतनाइति संग्रामाः व्यापियन्ते अत्रेति पृतनाः संग्रामाः सर्वानेव संग्रामानभिभावुकमिन्द्रं स्तोतारः अन्योन्यं संगताः स्तुतिभिस्तीक्ष्णमकुर्वन् स्तुते सति बलवान् भवतीति । यद्वा यष्टारो हविः प्रदानेन वीर्यवन्तं कुर्वन्तीति । किंच स्तोतारः राजसे राजतेः तुमर्थे असे प्रत्ययः । आत्मनोविराजनार्थं प्रकाशनार्थं सूर्यात्मानमिन्द्रं जजनुः जनयामासुः स्तोत्रेण यज्ञेप्रादुरभा-वयन्नित्यर्थः । उतापिच क्रत्वा स्वीयवृत्रवधादि कर्मणैव वरिष्ठं उरुतमं आमुरिं शत्रूणामाभि-मुख्येन मारयितारमिन्द्रं वरेवरणीये धने स्तोतारश्चक्रुः आत्मनां धनलाभार्थं स्तुवन्तीत्यर्थः । कीदृशं उग्रं उद्गूर्णबलं अतएव ओजिष्ठं ओजस्वितमं तवसं प्रवृद्धं तरस्विनं संग्रामे शत्रुवधार्थं वेगवन्तं इन्द्रं धनार्थं स्तुवन्ति ॥ १० ॥

॥ इति षष्ठस्य षष्ठे सप्तत्रिंशोवर्गः ॥ ३७ ॥

अथैकादशी–

समी॑रे॒भासो॑अस्वर॒न्निन्द्रं॒सोम॑स्यपी॒तये॑ ।
स्व॑र्पतिं॒यदीं॑वृ॒धेधृ॒तव्र॑तो॒ह्योज॑सा॒समू॒तिभि॑: ॥ ११ ॥

सम् । ई॒म् । रे॒भासः॑ । अ॒स्व॒र॒न् । इन्द्र॑म् । सोम॑स्य । पी॒तये॑ ।
स्वः॑ऽपतिम् । यत् । ई॒म् । वृ॒धे । धृ॒तऽव्र॑तः । हि । ओज॑सा ।
सम् । ऊ॒तिऽभिः॑ ॥ ११ ॥

रेभासः रेभृशब्दे शब्दयितारः स्तोतारः यद्वा रेभासः कश्यपपुत्रारेभाः एतन्नामकाऋषयः ईमेनमिन्द्रं समस्वरन् सम्यगशब्दयन् समस्तुवन् । किमर्थं सोमस्य पीतये सोमपानाय । किंच स्वर्पतिं स्वर्गस्यपालयितारं धनस्यस्वामिनंवा ईमेनमिन्द्रं यथदा वृधे हविर्भिर्वर्धनाय संस्तुवन्ति तदा धृतव्रतो धृतकर्मेन्द्रः ओजसा बलेन स्तोतृभिः ऊतिभिर्मरुद्भिः पालनैश्चसह संगच्छते स्तुतिभिर्बलंमरुद्भिः पालनं चेन्द्रस्य भवतीत्यर्थः ॥ ११ ॥

अथ द्वादशी–

नेमिं॒ नम॑न्ति॒ चक्ष॑सा मे॒षं विप्रा॑ अभि॒स्वरा॑ ।
सु॒दी॒तयो॑ वो अ॒द्रुहोऽपि॒ कर्णे॑ तर॒स्विनः॒ समृक्व॑भिः ॥ १२ ॥

ने॒मिम् । न॒म॒न्ति॒ । चक्ष॑सा । मे॒षम् । विप्राः॑ । अ॒भि॒ऽस्वरा॑ ।
सु॒ऽदी॒तयः॑ । वः॒ । अ॒द्रुहः॑ । अपि॑ । कर्णे॑ । त॒र॒स्विनः॑ ।
सम् । ऋक्व॑ऽभिः ॥ १२ ॥

नेमिं अरान् यथा नेमिर्व्याप्नोति तद्वत्सर्वं व्याप्नुवन्तु तादृशं नवनशीलमिन्द्रं चक्षसा दर्शनमात्रेणैव नमन्ति काश्यपरेभाः स्तोतारोवा नमस्कुर्वन्ति ततोविप्रामेधाविनः मेषं इन्द्रोमेषोभूत्वा मेधातिथिं स्वर्गमनयत् तस्मान्मेधातिथेर्मेषभूतमिन्द्रं अभिस्वरा अभिस्वरेण स्तोत्रेण प्रणमन्ति इदानीं यजमानः स्तोतॄनाह–अपिच सुदीतयः शोभनदीप्तयः अद्रुहः कस्याप्यद्रोग्धारो वोयूयं छान्दसोवसादेशः तरस्विनः कर्मसु स्तोत्रेषुवा त्वरायुक्ताः सन्तः इन्द्रस्य कर्णे श्रोत्रसमीपे ऋक्वभिः अर्चनयुक्तैर्मन्त्रैः यद्वा ऋचोवह्व्यो येषुसन्ति तैः शस्त्रादिभिः संस्तुतइन्द्रोयथा युष्मदीयानि स्तोत्रशस्त्रादीनि शृणोति तथा सम्यगभिष्टुतेत्यर्थः ॥ १२ ॥

पूर्वोक्तएवशस्त्रे वैकल्पिकस्यानुरूपतृचस्य तमिन्द्रमित्याद्याः । सूक्तमुदाहृतं ।

सैषा सूक्ते त्रयोदशी—

तमिन्द्रंजोहवीमिमघवानमुग्रंसत्रादधानमप्रतिष्कुतंशवांसि ।
मंहिष्ठोगीर्भिराचयज्ञियोववर्तद्रायेनोविश्वासुपथाकृणोतुवज्री ॥ १३ ॥

तम् । इन्द्रम् । जोहवीमि । मघऽवानम् । उग्रम् । सत्रा ।
दधानम् । अप्रतिऽस्कुतम् । शवांसि । मंहिष्ठः । गीःऽभिः ।
आ । च । यज्ञियः । ववर्तत् । राये । नः । विश्वा । सुऽपथा ।
कृणोतु । वज्री ॥ १३ ॥

तं पूर्वोक्तगुणोपेतमिन्द्रं जोहवीमि यद्वाहं पुनःपुनराह्वयामि ह्वयतेरभ्यस्तस्यचेति संप्रसारणं । कीदृशंमघवानं मंहनीयधनवन्तं उग्रं उद्गूर्णबलं सत्रा सत्यं यथार्थमेवशवांसि बलानि दधानं अतएवाप्रतिष्कुतं शत्रुभिरप्रतिरोधनीयं आह्वयामि । किंच मंहिष्ठः पूज्यतमः दातृतमोवा यज्ञियोयज्ञार्हइन्द्रो गीर्भिरस्मदीयाभिः स्तुतिभिराववर्तच्च यज्ञेषु आभिमुख्येन वर्ततांच । वर्ततेर्ण्यन्तस्य चङिरूपं चवायोगे प्रथमेति ननिघातः चङ्यन्यतरस्यामितिस्वरः । ततोवज्री वज्रवानिन्द्रः नोस्माकं राये धनाय विश्वा विश्वानि सर्वाण्येव सुपथा सुमार्गाणि कृणोतुच करोतु धनं सर्वदिक्स्थमस्मान्प्राप्नोत्वित्यर्थः ॥१३॥

अथ चतुर्दशी—

त्वंपुरइन्द्रचिकिदेनाव्योजसाशविष्ठशक्रनाशयध्यै ।
त्वद्विश्वानिभुवनानिवज्रिन्द्यावारेजेतेपृथिवीचभीषा ॥ १४ ॥

त्वम् । पुरः । इन्द्र । चिकित् । एनाः । वि । ओजसा ।
शविष्ठ । शक्र । नाशयध्यै । त्वत् । विश्वानि । भुवनानि ।
वज्रिन् । द्यावा । रेजेते इति । पृथिवी इति । च । भीषा ॥ १४ ॥

हे शविष्ठ बलवत्तम अतएव हे शक्र शत्रुहननसमर्थ हे इन्द्र त्वं एना अन्वादेशे एतानि पुरः शंबरस्य पुराणि ओजसास्वीयेनैवतेजसा विनाशयध्यै विनाशयितुं चिकित् ज्ञाताभवसि। नशेण्यन्ताव् शध्यैप्रत्ययः। पुनरपि सामर्थ्यं प्रशंसति हे वज्रिन् वज्रवन्निन्द्र विश्वानि सर्वाणि भुवनानि भूतजातानि त्वत् त्वत्तोभीत्या कंपंते। तथा द्यावापृथिवी दिवोद्यावेति द्यावादेशः आद्युदात्तश्च पृथिवी ङीषन्तत्वेनान्तोदात्तः देवताद्वंद्वेचेत्युभयपदप्रकृतिस्वरत्वं विप्रकर्षस्तु छान्दसः। द्यावापृथिवीच भीषा त्वत्तोभीतया रेजेते कंपेते। अरेजेतांरोदसीईतिनिगमः। सर्वेत्वदधीनाइत्यर्थः॥ १४॥

अथ पंचदशी–

त॒न्म॑ ऋ॒तमि॑न्द्र शूर चित्र पात्व॒पो न व॑ज्रिन्दुरि॒ताति॑ पर्षि॒ भूरि॑।
क॒दा न॑ इन्द्र रा॒य आ द॑शस्येर्वि॒श्वप्स्न्य॑स्य स्पृह॒याय्य॑स्य राजन्॥ १५॥ ३८॥

तत्। मा॒। ऋ॒तम्। इ॒न्द्र॒। शू॒र॒। चित्र॒। पा॒तु॒। अ॒पः।
न॒। व॒ज्रि॒न्। दुः॒ऽइ॒ता। अति॑। प॒र्षि॒। भूरि॑। क॒दा। नः॒। इ॒न्द्र॒।
रा॒यः। आ। द॒श॒स्येः॒। वि॒श्वऽप्स्न्य॑स्य। स्पृ॒ह॒याय्य॑स्य।
रा॒ज॒न्॥ १५॥ ३८॥

हे शूर बलवन् चित्र चायनीय विविधरूपवा। इन्द्रोमायाभिःपुरुरूपईयतइत्यादिपुरुरूपत्वात्। बहुविधरूप हे इन्द्र तत् प्रशस्तं त्वदीयं ऋतं सत्यं मा मां पातु सर्वतोरक्षतु। किंच हे वज्रिन् वज्रवन्निन्द्र भूरि सुपोलुक् भूरीणि बहूनि दुरिता दुरितानि पापानि अतिपर्षि अतीत्य पारय। तत्रदृष्टान्तः–अपोन यथा नाविकउदकानि मनुष्यान्पारयति तद्वदस्मान्पापानि पारय। हे राजन् दीप्यमान हे इन्द्र विश्वप्स्न्यस्य प्सइति रूपनाम रूपे साधु प्स्न्यं नकारोपजनश्छान्दसः। बहुरूपं तव स्पृहयाय्यस्य सर्वैः स्पृहणीयं रायः क्रियाग्रहणमिति संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी। तद्धनं नोस्मभ्यं आ आभिमुख्येन कदा दशस्येः कस्मिन्काले प्रय-

१ ऋ० सं० १. २. ३२. । २ ऋ० सं० ४. ५. ३४. ।

च्छेः तदा वष स्वभूतं सत्यं मां रक्षतु मह्यं धनं दत्वा कर्माणि च कारयित्वा मया हेतुभूतेन तुष्टाव्य मां पापरहितं कुर्वित्यर्थः ॥ १५ ॥

॥ इति षष्ठस्य षष्ठेऽष्टत्रिंशोवर्गः ॥ ३८ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके षष्ठोऽध्यायः ॥ ६ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदा योवेदेभ्योऽखिलंजगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ पञ्चस्य सप्तमोध्यायआरभ्यते तत्र इन्द्रायेति द्वादशर्चं पंचमं सूक्तं आंगिरसस्य नृमेधस्यार्षं ऐन्द्रं सप्तमी दशम्येकादश्यौ च तिस्रः ककुभः । मध्यमपादस्य द्वादशाक्षरत्वात् मध्यमश्चेत्ककुब्निति हि तल्लक्षणं । नवमीद्वादश्यौ पुरउष्णिहौ प्रथमपादस्य द्वादशाक्षरत्वात् आद्यश्चेत्पुरउष्णिगिति हि तल्लक्षणं । शिष्टाउष्णिहः । तथाचानुक्रम्यते—इन्द्रायद्वादश नृमेधऔष्णिहं सप्तम्युपान्त्येच ककुभोन्त्यानवम्यौ पुरउष्णिहाविति । महाव्रते औष्णिहतृचाशीताविदंसूक्तं । तथैवपंचमारण्यकेसूत्रितं—इन्द्रायसामगायत सखायआशिषामहीति । आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिन इन्द्रायसामगायतेति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितंच—इन्द्रायसामगायत सखायआशिषामहीति । पूर्वोक्तस्यैव ब्राह्मणाच्छंसिन आभिप्लविकेषूक्थ्येष्वेन्द्रनोगधीति वैकल्पिकःस्तोत्रियः । सूत्रितंच—एन्द्रनोगध्येदमध्वोमदिन्तरमिति । उक्थे तृतीयसवनेच्छावाकस्याधाहीन्द्रेति स्तोत्रियस्तृचः । सूत्रितंच—अधाहीन्द्रगिर्वण इयंतइन्द्रगिर्वणइति । पूर्वोक्तएवशस्त्रे त्वंनइन्द्राभरेतितृचो वैकल्पिकःस्तोत्रियः । सूत्रितंच—त्वंनइन्द्राभर वयमुत्वामपूर्व्य योनइदमिदंपुरेति ।

तत्र प्रथमा—

इन्द्रा॑यसाम॑गायत॒विप्रा॑यबृह॒तेबृ॒हत् ।
धर्म॒कृते॑विप॒श्चिते॑पन॒स्यवे॑ ॥ १ ॥

इन्द्रा॑य । साम॑ । गा॒य॒त॒ । विप्रा॑य । बृ॒ह॒ते । बृ॒हत् ।
ध॒र्म॒ऽकृते॑ । वि॒प॒ःऽचिते॑ । प॒न॒स्यवे॑ ॥ १ ॥

हे उद्गातारः विप्राय मेधाविने बृहते महते धर्मकृते कर्मणः कर्त्रे विपश्चिते विदुषे पनस्यवे स्तुतिमिच्छते इन्द्राय बृहत् बृहन्नामकं साम गायत पठत ॥ १ ॥

अथ द्वितीया—

त्वमिन्द्राभिभूरसित्वंसूर्यमरोचयः ।
विश्वकर्माविश्वदेवोमहाँअसि ॥ २ ॥

त्वम् । इन्द्र । अभिऽभूः । असि । त्वम् । सूर्यम् । अरोचयः ।
विश्वऽकर्मा । विश्वऽदेवः । महान् । असि ॥ २ ॥

हे इन्द्र त्वं अभिभूः शत्रूणामभिभवितासि भवसि । किंच त्वं सूर्यमादित्यमरोचयः तेजोभिरदीपयः । किंच विश्वकर्मा विश्वस्य कर्तासि विश्वदेवः सर्वदेवश्चासि । तथाच यजुर्ब्राह्मणं—अग्निर्वा अन्वन्यादेवता इन्द्रमन्वन्यादिति । अतोमहान् सर्वाधिकोसि ॥ २ ॥

अथ तृतीया—

विभ्राजञ्ज्योतिषास्व१रगच्छोरोचनंदिवः ।
देवास्तइन्द्रसख्याययेमिरे ॥ ३ ॥

विऽभ्राजन् । ज्योतिषा । स्वः । अगच्छः । रोचनम् ।
दिवः । देवाः । ते । इन्द्र । सख्याय । येमिरे ॥ ३ ॥

हे इन्द्र त्वं ज्योतिषा तेजसा दिवआदित्यस्य रोचनं प्रकाशकमधिकरणत्वेन स्वः स्वर्गं विभ्राजन् प्रकाशयन् अगच्छः अप्राप्नोः । किंच देवाः सर्वे ते तव सख्याय मित्रत्वाय येमिरे स्वंस्वमात्मानं नियमितवन्तः । अस्माकमिन्द्रः सखा यथास्यादिति सर्वे देवाः प्रयत्नमकार्षुरित्यर्थः ॥ ३ ॥

अथ चतुर्थी—

एन्द्रंनोगधिप्रियःसत्राजिदगोह्यः ।
गिरिर्नविश्वतस्पृथुःपतिर्दिवः ॥ ४ ॥

आ । इन्द्र । नः । गधि । प्रियः । सत्राऽजित् । अगोह्यः ।
गिरिः । न । विश्वतः । पृथुः । पतिः । दिवः ॥ ४ ॥

---

१ तै० ब्रा० ३. ७. ९. ।

हे इन्द्र प्रियः प्रियतमः सत्राजित् महतां जेता अगोह्यः केनापि गूहितुमशक्यो गिरिर्न पर्वतइव विश्वतः सर्वतः पृथुः पृथुतमोदिवः स्वर्गस्य पतिरीश्वरस्त्वं नोस्मानागधि आगच्छ॥४॥

अथ पंचमी–

अभिहिसत्यसोमपाउभेबभूथरोदसी ।
इन्द्रासिसुन्वतोवृधःपतिर्दिवः ॥ ५ ॥

अभि । हि । सत्य । सोमऽपाः । उभे इति । बभूथ । रोदसी
इति । इन्द्र । असि । सुन्वतः । वृधः । पतिः । दिवः ॥ ५ ॥

हे सत्य सोमपाः सोमस्य पातरिन्द्र यस्त्वं उभे रोदसी द्यावापृथिव्यौ अभि बभूथ सामर्थ्येनाभिभवसि सत्वं सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य वृधोवर्धकोसि दिवः स्वर्गस्यापि पतिरीश्वरोसि ॥ ५ ॥

अथ षष्ठी–

त्वंहिशश्वतीनामिन्द्रदर्तापुरामसि ।
हन्तादस्योर्मनोर्वृधःपतिर्दिवः ॥ ६ ॥ १ ॥

त्वम् । हि । शश्वतीनाम् । इन्द्र । दर्ता । पुराम् । असि ।
हन्ता । दस्योः । मनोः । वृधः । पतिः । दिवः ॥ ६ ॥ १ ॥

हे इन्द्र त्वं शश्वतीनां बह्वीनां पुरां शत्रुनगरीणां दर्तासि दारयिता भवसि । किंच दस्योः उपक्षपयितुरसुरस्य हंतासि घातकोभवसि मनोर्मनुष्यस्य यागादिकं कुर्वतो वृधोवर्धकश्चासि दिवः स्वर्गस्यापि पतिरीश्वरोसि ॥ ६ ॥

॥ इति पष्ठस्य सप्तमे प्रथमोवर्गः ॥ १ ॥

अथ सप्तमी–

अधाहीन्द्रगिर्वणउपत्वाकामान्महःससृज्महे ।
उदेवयन्तउदभिः ॥ ७ ॥

अर्ध । हि । इन्द्र । गिर्वणः । उप । त्वा । कामान् । महः ।
ससृज्महे । उदाऽइव । यन्तः । उदऽभिः ॥ ७ ॥

हे गिर्वणो गीर्भिर्वननीयेन्द्र अधाहि संप्रतिहि त्वा त्वां महोमहतः कामान् कमनीयान् स्तोमान् उपससृज्महे उपसृजामः माप्रयामइत्यर्थः । तत्र दृष्टान्तमाह—उदेव यथा उदकेन यन्तोगच्छन्तः उदभिः अञ्जलिनोत्क्षिप्योदकैः समीपस्थान् पुरुषान् क्रीडार्थं संसृजन्ति तद्वदित्यर्थः ॥ ७ ॥

अथाष्टमी—

वार्णत्वायव्याभिर्वर्धन्तिशूरब्रह्माणि ।
वावृध्वांसंचिदद्रिवोदिवेदिवे ॥ ८ ॥

वाः । न । त्वा । यव्याभिः । वर्धन्ति । शूर । ब्रह्माणि ।
ववृध्वांसम् । चित् । अद्रिऽवः । दिवेऽदिवे ॥ ८ ॥

हे अद्रिवो वज्रिन् शूरेन्द्र वार्ण यथोदकमुदकस्थानं यव्याभिर्नदीभिः। अवनयः यव्याः इति नदीनामसुपाठात्। वर्धन्ति वर्धयन्ति । तथा ब्रह्माणि स्तोत्रैर्ववृध्वांसं चित् यथा निरुदकं देशं नदीभिस्तथा न। किंतु भवृद्धमेव त्वां दिवेदिवे अन्वहं वर्धयन्ति स्तोतारोवर्धयन्ति ॥८॥

अथ नवमी—

युञ्जन्तिहरीइषिरस्यगाथयोरौरथउरुयुगे ।
इन्द्रवाहावचोयुजा ॥ ९ ॥

युञ्जन्ति । हरी इति । इषिरस्य । गाथया ।
उरौ । रथे । उरुऽयुगे । इन्द्रऽवाहा । वचःऽयुजा ॥ ९ ॥

इषिरस्य गमनशीलस्य इन्द्रस्य उरुयुगे महायुगे उरौ महति रथे इन्द्रवाहा इन्द्रस्य वाहनभूतौ वचोयुजा वचनमात्रेणैव युज्यमानौ हरी अश्वौ गाथया स्तोत्रेण स्तोतारोयुञ्जन्ति योजयन्ति ॥ ९ ॥

अथ दशमी–

त्वंनइन्द्राभरँओजोनृम्णंशतक्रतोविचर्षणे ।
आवीरंपृतनाषहम् ॥ १० ॥

त्वम् । नः । इन्द्र । आ । भर । ओजः । नृम्णम् । शतक्रतो
इति शतऽक्रतो । विऽचर्षणे । आ । वीरम् । पृतनाऽसहम् ॥ १० ॥

हे शतक्रतो बहुकर्मन् विचर्षणे विद्रष्टरिन्द्र त्वं नोस्मभ्यमोजोबलं नृम्णं धनं । मयः नृम्णमिति धननामसुपाठात् । आभराहर । वीरं वीर्योपेतं पृतनासहं सेनासहं सेनामभिभवितारं त्वामा याचामहइति शेषः ॥ १० ॥

अथैकादशी–

त्वंहिनःपितावसोत्वंमाताशतक्रतोबभूविथ ।
अधातेसुम्नमीमहे ॥ ११ ॥

त्वम् । हि । नः । पिता । वसो इति । त्वम् । माता । शतक्रतो
इति शतऽक्रतो । बभूविथ । अध । ते । सुम्नम् । ईमहे ॥ ११ ॥

हे वसो वासयितः शतक्रतो बहुकर्मन्निन्द्र त्वं नोस्माकं पिता पितृवत्पालको बभूविथ भव । त्वं माता मातृवद्धारकश्च बभूविथ । अध अथच वयं ते तव स्वभूतं सुम्नं सुखमीमहे याचामहे ॥ ११ ॥

अथ द्वादशी–

त्वांशुष्मिन्पुरुहूतवाजयन्तमुपब्रुवेशतक्रतो ।
सनोरास्वसुवीर्यम् ॥ १२ ॥ २ ॥

त्वाम् । शुष्मिन् । पुरुऽहूत । वाजऽयन्तम् । उप । ब्रुवे ।
शतक्रतो इति शतऽक्रतो । सः । नः । रास्व । सुऽवीर्यम् ॥१२॥ २ ॥

हे शुष्मिन् बलवन् पुरुहूत बहुभिर्यजमानैराहूत शतक्रतो बहुकर्मन्निन्द्र वाजयन्तं बल- मिच्छन्तं त्वामुपब्रुवे उपस्तौमि । स त्वं नोऽस्मभ्यं सुवीर्यं धनं रास्व देहि ॥ १२ ॥

॥ इति पञ्चमस्य सप्तमे द्वितीयोवर्गः ॥ २ ॥

त्वामिदाह्यइत्यष्टर्चं षष्ठं सूक्तं नृमेधस्यार्षं अयुजोबृहत्यः युजः सतोबृहत्यः तथाचानुक्रा- न्तं—त्वामिदाष्टौप्रागाथमिति । चातुर्विंशिकेहनि माध्यन्दिनसवनेच्छावाकस्य त्वामिदाह्यइतिवै- कल्पिकःस्तोत्रियः प्रगाथः । महाव्रतेपि निष्केवल्ये बार्हततृचाशीतावयं प्रगाथः । तथैव पंच- मारण्यके सूत्रितं—त्वामिदाह्योनरइत्येतं प्रगाथं पर्यवदधातीति । चातुर्विंशिकेहनि माध्यन्दि- नसवने ब्राह्मणाच्छंसिनः श्रायन्तइवेति वैकल्पिकःस्तोत्रियःप्रगाथः । सूत्रितंच—श्रायन्तइव- सूर्यं बण्महाँअसिसूर्येति । चातुर्विंशिकेहनि माध्यन्दिने त्वमिन्द्रप्रतूर्तिषु त्वमिन्द्रयशाअसीति । तस्मिन्नेवाहनि निष्केवल्ये वैराजयोनिभूतोयं प्रगाथः शंसनीयः । सूत्रितंच—तयोरक्रियमा- णस्य योनिर्शंसेद्वैरूपवैराजशाक्वररैवतानां चेति ।

तत्र प्रथमा—

त्वामिदाह्योनरोऽपीप्यन्वज्रिन्भूर्णयः ।
सइन्द्रस्तोमवाहसामिहश्रुध्युपस्वसरमागहि ॥ १ ॥

त्वाम् । इदा । ह्यः । नरः । अपीप्यन् । वज्रिन् । भूर्णयः ।
सः । इन्द्र । स्तोमऽवाहसाम् । इह । श्रुधि । उप । स्वसरम् ।
आ । गहि ॥ १ ॥

हे वज्रिन् इन्द्र यं त्वां भूर्णयो हविर्भिर्भरणशीलाः नरः कर्मणां नेतारोयजमाना इदा अद्य ह्यश्च अपीप्यन् सोममपाययन् स त्वं स्तोमवाहसां स्तोत्रवाहकानामस्माकं स्तोत्रं इह यज्ञे श्रुधि शृणु । स्वसरं गृहंच । दुर्योः स्वसराणीति गृहनामसु पाठात् । उपागहि उपागच्छ॥१॥

अथ द्वितीया—

मत्स्वासुशिप्रहरिवस्तदीमहेत्वेआभूषन्तिवेधसः ।
तवश्रवांस्युपमान्युक्थ्यासुतेष्विन्द्रगिर्वणः ॥ २ ॥

मत्स्वं । सुऽशिप्र । हुरिऽवः । तत् । ईमहे । त्वे इति । आ ।
भूषन्ति । वेधसः । तवं । श्रवांसि । उपऽमानि ।
उक्थ्या । सुतेषु । इन्द्र । गिर्वणः ॥ २ ॥

हे सुशिप्र शोभनहनो शोभनोष्णीषिन् वा हरिवः अश्ववन् गिर्वणो गीर्भिर्वननीयेन्द्र त्वे त्वयि वेधसः परिचारका आभूषन्त्याभवन्ति । मत्स्व सोमेन मादयात्मानं । किंच तव त्वां वयमीमहे याचामहे । किंयाच्यमित्यत्राह—सुतेषु सोमेषु अभिषुतेषु सत्सु तव श्रवांस्यन्नानि उपमानि उपमानभूतानि उक्थ्या प्रशंस्यानि च सन्त्विति ॥ २ ॥

अथ तृतीया—

श्रायन्तइवसूर्यंविश्वेदिन्द्रस्यभक्षत ।
वसूंनिजातेजनमानओजसाप्रतिभागंनदीधिम ॥ ३ ॥

श्रायन्तःऽइव । सूर्यम् । विश्वां । इत् । इन्द्रस्य । भक्षत । वसूंनि ।
जाते । जनमाने । ओजसा । प्रति । भागम् । न । दीधिम ॥ ३ ॥

हे अस्मदीयाजनाः श्रायन्तइव सूर्यं यथा समाश्रितारश्मयः सूर्यं भजन्ते तथेन्द्रस्य विश्वेत् विश्वान्येव धनानि भक्षत भजत । सच यानि वसूनि धनानि जाते उत्पन्ने जनमाने जनिष्यमाणे चौजसा बलेन करोति । अतः भागंन पित्र्यं भागमिव तानि धनानि प्रतिदीधिम प्रतिधारयेमेति । यद्वा श्रायन्तइव सूर्यं यथा समाश्रितारश्मयः सूर्यमुपतिष्ठन्ते तथेन्द्रस्य विश्वा विश्वानि विभक्तुमिच्छन्तः समाश्रितामरुतः इन्द्रमुपतिष्ठन्तइतिशेषः । उपस्थायच मरुतो वसून्युदकलक्षणानि धनानि जाते जाताय जनमाने जनिष्यमाणायच मनुष्यायच ओजसा बलेन भक्षत विभजन्ते । तत्रचास्माकं योभागः तं भागं । नेतिसंप्रत्यर्थे । प्रतीत्येष अनु इत्येतस्य स्थाने । अनुदीधिम वयं अनुध्यायाम । तथाचयास्कः—समाश्रिताः सूर्यमुपतिष्ठन्ते अपिवोपमार्थे स्यात्सूर्यमिवेन्द्रमुपतिष्ठन्तेइति । सर्वाणीन्द्रस्यधनानि विभक्ष्यमाणाः सयथा धनानि विभजति जातेच जनिष्यमाणेच तं वयं भागमनुध्यायेमेति ॥ ३ ॥

---

१ नि० ६. ८.

अथ चतुर्थी–

अनर्शरातिंवसुदामुपस्तुहिभद्राइन्द्रस्यरातयः।
सोअस्यकामंविधतोनरोषतिमनोदानायचोदयन् ॥ ४ ॥

अनर्शऽरातिम्। वसुऽदाम्। उप। स्तुहि। भद्राः।
इन्द्रस्य। रातयः। सः। अस्य। कामम्। विधतः।
न। रोषति। मनः। दानाय। चोदयन् ॥ ४ ॥

हे स्तोतारः अनर्शरातिं अपापकदानं अपापिष्ठस्य दातारमित्यर्थः। तथाचयास्कः–अनर्शरातिमनश्लीलदानमश्लीलं पापकमिति। वसुदां धनस्यदातारमिन्द्रं उपस्तुहि यतइन्द्रस्य रातयोदानानि भद्राः कल्याणानि महदैश्वर्यकारीणीत्यर्थः। यतश्च सइन्द्रः स्वकीयं मनोदानाय अभीष्टप्रदानाय चोदयन् प्रेरयन् विधतः परिचरतोस्य स्तोतुः काममिच्छां नरोषति नहिनस्ति ॥ ४ ॥

अथ पंचमी–

त्वमिन्द्रप्रतूर्तिष्वभिविश्वाअसिस्पृधः।
अशस्तिहाजनिताविश्वतूरसित्वंतूर्यतरुष्यतः ॥ ५ ॥

त्वम्। इन्द्र। प्रऽतूर्तिषु। अभि। विश्वाः। असि।
स्पृधः। अशस्तिऽहा। जनिता। विश्वऽतूः। असि। त्वम्।
तूर्य। तरुष्यतः ॥ ५ ॥

हे इन्द्र त्वं प्रतूर्तिषु संग्रामेषु विश्वाः सर्वाः स्पृधोयुद्धकारिणीः शत्रुसेनाः अभ्यसि अभिभवसि। किंच हे तूर्य शत्रूणां बाधकेन्द्र त्वं अशस्तिहा दैत्यानामशस्तीनां हन्तासि। जनिता असुरेभ्यः अशस्तीनां जनिताचासि। विश्वतूः विश्वतः सर्वस्य शत्रुवर्गस्य हिंसिताचासि तरुष्यतो बाधकांश्च बाधमानोसि ॥ ५ ॥

---

१ नि० ६. २३.

अथ षष्ठी—

अनु॑ ते॒ शुष्मं॑ तु॒रय॑न्तमीयतुः क्षो॒णी शिशुं॒ न मा॒तरा॑ ।
विश्वा॑स्ते॒ स्पृधः॑ श्नथयन्त म॒न्यवे॑ वृ॒त्रं यदि॑न्द्र॒ तूर्व॑सि ॥ ६ ॥

अनु॑ । ते॒ । शुष्म॑म् । तु॒रय॑न्तम् । ई॒य॒तुः॒ । क्षो॒णी इति॑ । शिशु॑म् ।
न । मा॒तरा॑ । विश्वाः॑ । ते॒ । स्पृधः॑ । श्न॒थ॒य॒न्त॒ । म॒न्यवे॑ ।
वृ॒त्रम् । यत् । इ॒न्द्र॒ । तूर्व॑सि ॥ ६ ॥

हे इन्द्र ते तव शुष्मं बलं तुरयन्तं हिंसन्तं शत्रुं क्षोणी द्यावापृथिव्यौ मातरा मातरौ शिशुंन शिशुमिव अन्वीयतुः अनुगच्छतः । गमनमात्रे दृष्टान्तः । किंच हेइन्द्र त्वं यद्यस्माद्वृत्रं शत्रुं तूर्वसि हंसि अतस्ते तव मन्यवे क्रोधाय विश्वाः सर्वाः स्पृधः संग्रामकारिण्यः सेनाः श्नथयन्त श्नथिताः खिन्नाभवन्ति ॥ ६ ॥

अथ सप्तमी—

इ॒त ऊ॒ती वो॑ अ॒जरं॑ प्रहे॒तार॒मप्र॑हितम् ।
आ॒शुं जेता॑रं॒ हेता॑रं र॒थीत॑म॒मतू॑र्तं तुग्र्या॒वृध॑म् ॥ ७ ॥

इ॒तः । ऊ॒ती । वः॒ । अ॒जर॑म् । प्र॒ऽहे॒तार॑म् । अप्र॑ऽहितम् । आ॒शुम् ।
जेता॑रम् । हेता॑रम् । र॒थिऽत॑मम् । अतू॑र्तम् । तु॒ग्र्य॒ऽवृध॑म् ॥ ७ ॥

हे अस्मदीयजनाः वोयूयं अजरं जरारहितं प्रहेतारं शत्रूणां प्रेरकं अप्रहितं केनाप्यप्रेषितं आशुं वेगवन्तं जेतारं शत्रूणां हेतारं गन्तारं रथीतमं रथिनां श्रेष्ठं अतूर्तं केनाप्यहिंसितं तुग्र्यावृधं उदकस्य वर्धयितारमिन्द्रं ऊती ऊत्यै रक्षणाय इतः कुरुत पुरस्कुरुतेतियावत् ॥ ७ ॥

अथाष्टमी—

इ॒ष्क॒र्तार॒मनि॑ष्कृतं॒ सह॑स्कृतं श॒तमू॑तिं श॒तक्र॑तुम् ।
स॒मा॒नमिन्द्र॒मव॑से हवामहे॒ वस॑वानं वसू॒जुव॑म् ॥ ८ ॥ ३ ॥

इष्कर्तारम् । अनिःऽकृतम् । सहःऽकृतम् । शतम्ऽऊतिम् ।
शतऽक्रतुम् । समानम् । इन्द्रम् । अवसे । हवामहे ।
वसंवानम् । वसुऽजुवम् ॥ ८ ॥ ३ ॥

इष्कर्तारं शत्रूणां संस्कर्तारं अनिष्कृतं स्वयमन्यैरसंस्कृतं सहस्कृतं बलेनकृतं शतमूर्तिं बहुरक्षणं शतक्रतुं बहुप्रज्ञं बहुकर्माणं वा समानं बहूनां साधारणं वसवानं धनान्याच्छादयन्तं वसुजुवं यजमानेभ्योवसूनां प्रेरयितारमिन्द्रं अवसे रक्षणाय वयं हवामहे ह्वयामः ॥ ८ ॥

॥ इति षष्ठस्य सप्तमे तृतीयोवर्गः ॥ ३ ॥

अयंतइति द्वादशर्चं सप्तमं सूक्तं भृगुगोत्रस्य नेमस्यार्षं अयमस्मिजरितरिति द्वृचेनेन्द्रोनेमसमीपमेत्य स्वकीयं माहात्म्यमब्रोचत् अतस्तस्य द्वृचस्य सएवऋषिः यस्यवाक्यं सऋषिरिति न्यायात्। षष्ठी जगती सप्तम्याद्यास्तिस्रोनुष्टुभः शिष्टास्त्रिष्टुभः इन्द्रोदेवता यद्वाग्वदन्ती देवींवाचमित्येते वाग्देवत्ये शिष्टाऐन्द्र्यः। तथाचानुक्रान्तं—अयंतेद्वादश नेमोभार्गवस्त्रैष्टुभं षष्ठीजगती परास्तिस्रोनुष्टुभः अयमिति द्वृचेनेन्द्र आत्मानमस्तौदुपान्त्येवाच्याविति । वाग्देवत्ये पशौ यद्वाग्वदन्तीति वपायाअनुवाक्या। सूत्रितंच—यद्वाग्वदन्त्यविचेतनानि पतंगोवाचंमनसाबिभर्तीति । पूर्वोक्तएव पशौ देवींवाचमिति हविषोयाज्या । सूत्रितंच—देवींवाचमजनयन्तदेवा जनीयन्तोन्वग्रवइति तिस्रइति । प्रयाणसमये वयसाममनोज्ञावाचः श्रुत्वा एतांजपेत् । सूत्रितंच— कनिक्रदज्जनुषं प्रब्रुवाणइति सूक्ते जपेद्देवींवाचमजनयन्तदेवाइतिचेति ।

तत्र प्रथमा—

अयंतएमितन्वापुरस्ताद्विश्वेदेवाअभिमायन्तिपश्चात् ।
यदामह्यंदीधरोभागमिन्द्रादिन्मयाकृणवोवीर्याणि ॥ १ ॥

अयम् । ते । एमि । तन्वा । पुरस्तात् । विश्वे । देवाः । अभि । मा ।
यन्ति । पश्चात् । यदा । मह्यम् । दीधरः । भागम् । इन्द्र । आत् ।
इत् । मया । कृणवः । वीर्याणि ॥ १ ॥

हे इन्द्र ते तव पुरस्तात् अग्रतः तन्वा पुत्रेणसह अयमहमेमि शत्रूनभिभवितुं गच्छामि । तवाग्रतोगच्छन्तं मां विश्वेदेवाः त्वया सह पश्चादभियन्ति अभिगच्छन्ति यदा त्वं मह्यं भागंधाय नेमाय भागं शत्रुषु स्थितं भागं दीधरः धारयसि आदित् अनन्तरमेव मया सह म-

च्छत्रून् जेतुं वीर्याणि पौरुषाणि कृणवः कुरु । यदि शत्रुषु स्थितं धनं मह्यं दित्ससि तर्हि शत्रुजयार्थं गच्छतः सपुत्रस्य मम साहाय्यं कुर्वितिभावः ॥ १ ॥

अथ द्वितीया–

दधा॑मि ते॒ मधु॑नो भ॒क्षम॑ग्रे॑ हि॒तस्ते॑ भा॒गः सु॒तो अ॑स्तु॒ सोमः॑ ।
अस॑श्च॒ त्वं द॑क्षिण॒तः सखा॒ मेऽधा॑ वृ॒त्राणि॑ जङ्घनाव॒ भूरि॑ ॥ २ ॥

दधा॑मि । ते॒ । मधु॑नः । भ॒क्षम् । अग्रे॑ । हि॒तः । ते॒ । भा॒गः । सु॒तः ।
अ॒स्तु॒ । सोमः॑ । असः॑ । च॒ । त्वम् । द॒क्षि॒ण॒तः । सखा॑ । मे॒ ।
अध॑ । वृ॒त्राणि॑ । ज॒ङ्घ॒ना॒व॒ । भूरि॑ ॥ २ ॥

हे इन्द्र ते तुभ्यं मधुनो मदकरस्य सोमस्य भक्षमग्रे प्रथमं दधामि धारयामि । सुतोऽभिषुतोभागो भजनीयः सोमस्ते तव हृदये हितोनिहितोस्तु भवतु । अपिच त्वं मे मम दक्षिणतो दक्षिणपार्श्वे सखासन् असः स्थितोभव । अध अथ भूरि बहूनि वृत्राण्यस्मदीयान् शत्रून् जंघनाव । त्वमहंचोभावावां हन्वः ॥ २ ॥

अथ तृतीया–

प्र सु स्तोमं॑ भरत वाज॒यन्त॒ इन्द्रा॑य स॒त्यं यदि॑ स॒त्यमस्ति॑ ।
नेन्द्रो॑ अ॒स्तीति॒ नेम॑ उ त्व आह॒ क ईं॑ ददर्श॒ कम॒भि ष्ट॑वाम ॥ ३ ॥

प्र । सु । स्तोम॑म् । भ॒र॒त॒ । वा॒ज॒ऽयन्तः॑ । इन्द्रा॑य । स॒त्यम् । यदि॑ ।
स॒त्यम् । अस्ति॑ । न । इन्द्रः॑ । अ॒स्ति॒ । इति॑ । नेमः॑ । ऊँ इति॑ । त्वः॒ ।
आ॒ह॒ । कः । ई॒म् । द॒द॒र्श॒ । कम् । अ॒भि । स्त॒वा॒म॒ ॥ ३ ॥

हे जना वाजयन्तः संग्राममिच्छन्तोयूयं । पैंस्ये-वाजे इति संग्रामनामसु पाठात् । इन्द्राय सत्यं सत्यभूतं स्तोमं स्तोत्रं सुष्ठु प्रभरत इन्द्रोस्तीत्येवं यदि सत्यमस्ति भवति । इन्द्रास्तित्वे कः संदेहः तत्राह–नेमउ भार्गवोनेम एवेन्द्रोनाम त्वः कश्चिन्नास्तीत्याह । तत्र कारणं दर्शयति–कः ईमेनमिन्द्रं ददर्श अद्राक्षीत् नकोप्यपश्यत् अतः कं वयमभिष्टवाम अभिष्टुमः । तस्मादिन्द्रोनाम कश्चिद्विद्यते इतिवादमात्रं नतु तत्सत्यमित्यर्थः ॥ ३ ॥

अथ चतुर्थी—

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥ ४ ॥

अयम् । अस्मि । जरितरिति । पश्य । मा । इह । विश्वा । जातानि ।
अभि । अस्मि । मह्ना । ऋतस्य । मा । प्रऽदिशः । वर्धयन्ति ।
आऽदर्दिरः । भुवना । दर्दरीमि ॥ ४ ॥

एवं नेमस्यर्षेर्वचनमाकर्ण्य इन्द्रस्तस्य समीपमाजगाम । आगत्य चात्मानमनेन द्वचेन स्तौति—हे जरितः स्तोतः अयमहमस्मि इह तवसमीपे स्थितं मा मां पश्य । विश्वा सर्वाणि जातानि भुवनानि मह्ना महत्त्वेन अभ्यस्मि अहमभिभवामि । किंच मा मां ऋतस्य सत्यस्य यज्ञस्य वा प्रदिशः प्रदेष्टारो विद्वांसः स्तोत्रैर्वर्धयन्ति । अपिच आदर्दिरः आदरणशीलोऽहं भुवना भुवनानि शत्रुभूतानि दर्दरीमि भृशं विदारयामि ॥ ४ ॥

अथ पञ्चमी—

आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमन्तः सखायः ॥ ५ ॥

आ । यत् । मा । वेनाः । अरुहन् । ऋतस्य । एकम् । आसीनम् ।
हर्यतस्य । पृष्ठे । मनः । चित् । मे । हृदे । आ । प्रति । अवोचत् ।
अचिक्रदन् । शिशुऽमन्तः । सखायः ॥ ५ ॥

यद्यदा ये ऋतस्य यज्ञस्य यज्ञं कर्मणि षष्ठी वेनाः कामयमानाः हर्यतस्य कान्तस्यान्तरिक्षस्य पृष्ठे आसीनं उपविष्टं एकं मा मां आ अरुहन् तेषां भवतां आरोहं मनश्चित् मन एव मम हृदे हृदयाय प्रत्यवोचत् अब्रवीत् । अत्राशिषं च ददाह्वानं । शिशुमन्तः पुत्रयुक्ताः सखायः प्रिया अमी अचिक्रदन् मां क्रन्दन्तीति ॥ ५ ॥

अथ षष्ठी–

विश्वेत्तातेसवनेषुप्रवाच्यायाचकर्थमघवन्निन्द्रसुन्वते ।
पारावतंयत्पुरुसंभृतंवस्वपावृणोःशरभायऋषिबन्धवे ॥ ६ ॥ ४ ॥

विश्वा । इत् । ता । ते । सवनेषु । प्रऽवाच्या । या । चकर्थ । मघऽवन् । इन्द्र । सुन्वते । पारावतम् । यत् । पुरुऽसंभृतम् । वसु । अपऽअवृणोः । शरभाय । ऋषिऽबन्धवे ॥ ६ ॥ ४ ॥

स्वसमीपमागतमिन्द्रं दृष्ट्वा सन्तुष्टऋषिरिन्द्रस्य विविधानि कर्माणि दानं च विश्वेत्तातइत्यनेन तृचेन स्तौति–हे मघवन्निन्द्र त्वं सवनेषु यज्ञेषु सुन्वते सोमाभिषवं कुर्वते यजमानाय या यानि कर्माणि चकर्थ अकरोः ते तव ता तानि कर्माणि प्रवाच्या प्रवक्तव्यानि विश्वेत् अनन्तान्येव । किंच त्वं पारावतं परावन्नामकस्य कस्यचिच्छत्रोः स्वभूतं यद्वसु धनमस्ति तत् ऋषिबन्धवे शरभाय शरभनाम्ने ऋषये अपावृणोः अपवृतवानसि पुरुसंभृतं यथा बहुसंभृतं भवति ॥ ६ ॥

॥ इति षष्ठस्य सप्तमे चतुर्थो वर्गः ॥ ४ ॥

अथ सप्तमी–

प्रनूनंधावतापृथङ्नेहयोवोअवावरीत् ।
निषींवृत्रस्यमर्मणिवज्रमिन्द्रोअपीपतत् ॥ ७ ॥

प्र । नूनम् । धावत । पृथक् । न । इह । यः । वः । अवावरीत् । नि । सीम् । वृत्रस्य । मर्मणि । वज्रम् । इन्द्रः । अपीपतत् ॥ ७ ॥

यः शत्रुर्नूनमिदानीं प्रधावत प्रधावति पृथगिह पृथक् न तिष्ठति च वोयुष्मान्नावावरीत् न विवारयति च तस्य वृत्रस्य शत्रोर्मर्मणि मर्मस्थाने इन्द्रो वज्रं कुलिशं न्यपीपतत् नितरां अपातयत् ॥ ७ ॥

अथाष्टमी–

मनोजवाअयमानआयसीमतरत्पुरम् ।
दिवंसुपर्णोगत्वायसोमंवज्रिणआभरत् ॥ ८ ॥

मनःऽजवाः । अयमानः । आयसीम् । अतरत् । पुरम् । दिवम् ।
सुऽपर्णः । गत्वाय । सोमम् । वज्रिणे । आ । अभरत् ॥ ८ ॥

सुपर्णो गरुत्मान् मनोजवाः मनोवेगः अयमानोगच्छन् आयसीं हिरण्मयीं पुरं नगरीं अतरत् अतारीत्। ततोदिवं स्वर्गं गत्वाय गत्वा वज्रिणे इन्द्राय सोममाभरदाहरच्च ॥८॥

अथ नवमी–

समुद्रेअन्तःशयतउद्नावज्रोअभीवृतः ।
भरन्त्यस्मैसंयतःपुरःप्रस्रवणाबलिम् ॥ ९ ॥

समुद्रे । अन्तरिति । शयते । उद्ना । वज्रः । अभिऽवृतः । भरन्ति ।
अस्मै । सम्ऽयतः । पुरःऽप्रस्रवणाः । बलिम् ॥ ९ ॥

योवज्रः समुद्रेअन्तः समुद्रस्यमध्ये शयते शेते यश्च उद्ना उदकेन अभिवृतः अस्मै वज्राय संयतः संग्रामस्य । मगमन् संयतइति संग्रामनामसु पाठात् । पुरः प्रस्रवणाः पुरस्ताद्गच्छन्तः शत्रवो बलिं उपहारं भरन्ति धारयन्ति तस्य छेद्या भवन्तीत्यर्थः ॥ ९ ॥

अथ दशमी–

यद्वाग्वदन्त्यविचेतनानिराष्ट्रीदेवानांनिषसादमन्द्रा ।
चतस्रऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम ॥१०॥

यत् । वाक् । वदन्ती । अविऽचेतनानि । राष्ट्री । देवानाम् । निऽससाद ।
मन्द्रा । चतस्रः । ऊर्जम् । दुदुहे । पयांसि । क्व । स्वित् ।
अस्याः । परमम् । जगाम ॥ १० ॥

राष्ट्री राजनशीला देवानां मन्द्रा मादयित्री वा यद्यदा वाक् अविचेतनानि विज्ञानरहितान् अप्रज्ञातान् अर्थान् वदन्ती प्रज्ञापयन्ती निषसाद यज्ञेनिषीदति तदा चतस्रोदिशः प्रति ऊर्जमन्नं पयांसि तत्कारणभूतान्युदकानि दुदुहे अस्यामाध्यमिकायावाचः स्वभूतं यत्परमं श्रेष्ठं तत्र क्वस्वित् क्वजगाम क्वगच्छतीति नदृश्यतइत्यर्थः । तथाचयास्कः–यद्वाग्वदन्त्यविचेतनान्यवि-

ज्ञातानि राष्ट्रीदेवानां निषसाद मन्द्रा मदनाचतस्रोनुदिशऊर्जं दुदुहे पयांसि क्वस्विदस्याः परमं जगामेति यत्पृथिवीं गच्छतीतिवा यदादित्यरश्मयो हरन्तीतिवेति ॥ १० ॥

अथैकादशी–

देवींवाचमजनयन्तदेवास्तांविश्वरूपाःपशवोवदन्ति ।
सानोमन्द्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥ ११ ॥

देवीम् । वाचम् । अजनयन्त । देवाः । ताम् । विश्वऽरूपाः । पशवः ।
वदन्ति । सा । नः । मन्द्रा । इषम् । ऊर्जम् । दुहाना । धेनुः ।
वाक् । अस्मान् । उप । सुऽस्तुता । आ । एतु ॥ ११ ॥

एषा माध्यमिका वाक् सर्वप्राण्यन्तर्गता धर्माभिवादिनी भवतीति विभूतिमुपदर्शयति । यां देवीं द्योतमानां माध्यमिकां वाचं देवामाध्यमिका अजनयन्त जनयन्ति तां वाचं विश्वरूपाः सर्वरूपाः व्यक्तवाचः अव्यक्तवाचश्च पशवोवदन्ति तत्पूर्वकत्वाद्वाक्प्रवृत्तेः । सा वाग्देवी मन्द्रा मदना स्तुत्या हर्षयित्री वा वृष्टिप्रदानेन नोस्मभ्यं इषमन्नं ऊर्जं पयोघृतादिरूपं रसं च दुहाना क्षरन्ती धेनुः धेनुभूता सुष्टुताऽस्माभिःस्तुताऽस्मान् नेमान् उपैतु उपगच्छतु वर्षणायोद्युक्ता भवत्वित्यर्थः । तथाचयास्कः–देवींवाचमजनयन्तदेवास्तांविश्वरूपाः पशवोवदन्ति व्यक्तवाचश्चाव्यक्तवाचश्च सानोमदनान्नंच रसंच दुहाना धेनुर्वागस्मानुपैतुसुष्टुतेति ॥ ११ ॥

अथ द्वादशी–

सखेविष्णोवितरंविक्रमस्वद्यौर्देहिलोकंवज्रायविष्कभे ।
हनाववृत्रंरिणचावसिन्धूनिन्द्रस्ययन्तुप्रसवेविसृष्टाः ॥१२॥५॥

सखे । विष्णो इति । विऽतरम् । वि । क्रमस्व । द्यौः । देहि ।
लोकम् । वज्राय । विऽस्कभे । हनाव । वृत्रम् । रिणचाव ।
सिन्धून् । इन्द्रस्य । यन्तु । प्रऽसवे । विऽसृष्टाः ॥ १२ ॥ ५ ॥

---

१ नि ११. २८. ।   २ नि० ११. २९. ।

हे सखे विष्णो त्वं वितरमत्यन्तं विक्रमस्व विक्रमं कुरु । हे द्यौः त्वं वज्राय वज्रस्य विष्कंभे विष्कंभनाय लोकं अवकाशं देहि प्रयच्छ । हे विष्णो त्वं चाहं चोभावावां वृत्रमसुरं हनावः हन्वः । सिन्धून् वृत्रावष्टब्धाः नदीश्च रिणचाव नयावः तेमी विसृष्टाः सिन्धवइन्द्रस्य प्रसवे यन्तु प्रेरणे गच्छन्तु ॥ तमिममर्थं संगृह्य श्लोकैः शौनकोदर्शयति—त्रीन्लोकानभिवृत्यैतान् वृत्रस्तस्थौस्वयात्विषा । तंनाशकद्धन्तुमिन्द्रो विष्णुमभ्येत्य सोब्रवीत् (१) वृत्रंहनिष्ये तिष्ठस्व विक्रम्याद्य ममान्तिके । उद्यतस्यतुवज्रस्य द्यौर्ददातुममान्तरं (२) तथेतिविष्णुस्तच्चक्रे द्यौश्चास्यविवरंददौ । तदेतदखिलंप्रोक्तं सखेविष्णोइतिसूचेति (३) ॥ १२ ॥

॥ इति षष्ठस्य सप्तमे पंचमोवर्गः ॥ ५ ॥

ऋधगिति षोडशर्चमष्टमं सूक्तं । अत्रानुक्रम्यते—ऋधक्षोळशजमदग्निर्भार्गवो मैत्रावरुणं प्रागाथं त्रिष्टुबन्तं तृतीयादिगायत्री परासतोबृहती स्तोत्रंराजस्तृक्सपादादित्याश्विन्यौ वायव्ये सौर्यौ बृहत्युपस्या सूर्यप्रभास्तुतिर्वा पावमानी गव्येइति । भृगुगोत्रोजमदग्निर्ऋषिः । चतुर्दश्याद्यास्तिस्त्रस्त्रिष्टुभः त्रयोदशीबृहती शिष्टानामयुजोबृहत्यः युजःसतोबृहत्यः तृतीयागायत्रीस्तोत्रंराजसुगायतेतिपादेनसहिता तेहिन्विरेइत्यादित्यदेवताका । आमेवचांसीतिद्वे अश्विनीदेवताके । आनोयज्ञंदिविस्पृशमितिद्वे वायुदेवत्ये । बण्महाँअसिसूर्येतिद्वे सूर्यदेवताके । इयंयानीत्येषा उषोदेवत्या । यद्वा सूर्यप्रभा अनयास्तूयते अतःसैवदेवता । प्रजाहतिस्रइत्येषापवमानदेवताका । मातारुद्राणामितिद्वे गोदेवत्ये शिष्टाः पंचर्चोमैत्रावरुण्यः । सूक्तविनियोगोलैंगिकः । संग्रामार्थे राज्ञः संनहने प्रयोवांमित्रावरुणेतिद्वे राजानंवाचयेत् । सूत्रितंच—अभीवर्तंवाचयति प्रयोवांमित्रावरुणेतिचद्वेइति । पृष्ठ्यस्य पंचमेहनि प्रउगे वायव्यतृचस्य आनोयज्ञमित्यादिके द्वेऋचावाद्ये । सूत्रितंच—आनोयज्ञंदिविस्पृशमितिद्वे आनोवायोमहेतनइत्येकेति । आश्विनं शंसिष्यन् होता बण्महाँअसीति द्वाभ्यांअग्निंजुहुयात् । सूत्रितंच—बण्महाँअसिसूर्येति द्वाभ्यां इन्द्रंवोविश्वतस्परीतिचेति । माध्यन्दिनसवने सोमातिरेके एकंशस्त्रमुपजायते तत्र बण्महाँअसीति प्रगाथः स्तोत्रियः । सूत्रितंच—बण्महाँअसिसूर्योदुत्यद्दर्शतंवपुरिति प्रगाथौ स्तोत्रियानुरूपाविति । अयमेवप्रगाथश्चातुर्विंशिकेहनि माध्यन्दिने ब्राह्मणाच्छंसिनो वैकल्पिकोनुरूपः । सूत्रितंच—श्रायन्तइवसूर्यं बण्महाँअसिसूर्येति । मधुपर्केगामुत्सृज्य मातारुद्राणामिति जपेत् । सूत्रितंच—मातारुद्राणां दुहितवसूनामिति जपित्वोमुत्सृजतेत्युत्स्रक्ष्यन्निति ।

तत्र प्रथमा–

ऋधगित्थासमर्त्यःशशमेदेवतातये ।
योनूनंमित्रावरुणावभिष्टयआचक्रेहव्यदातये ॥ १ ॥

ऋधक् । इत्था । सः । मर्त्यः । शशमे । देवऽतातये । यः । नूनम् ।
मित्रावरुणौ । अभिष्टये । आऽचक्रे । हव्यऽदातये ॥ १ ॥

यो मनुष्यो नूनं क्षिप्रं हव्यदातये हविषां प्रदात्रे यजमानाय मित्रावरुणौ अभिष्टये अभिमतसिध्यर्थं आचक्रे अभिमुखौ करोति । समर्त्यो मनुष्यः ऋधक् सत्यं इत्था इत्थं देवतातये यज्ञार्थं शशमे हविः संस्करोति ॥ १ ॥

अथ द्वितीया–

वर्षिष्ठक्षत्राउरुचक्षसानराराजानादीर्घश्रुत्तमा ।
ताबाहुतानदंसनारथर्यतःसाकंसूर्यस्यरश्मिभिः ॥ २ ॥

वर्षिष्ठऽक्षत्रौ । उरुऽचक्षसा । नरा । राजाना । दीर्घश्रुत्ऽतमा । ता ।
बाहुता । न । दंसना । रथर्यतः । साकम् । सूर्यस्य । रश्मिऽभिः ॥ २ ॥

वर्षिष्ठक्षत्रौ अतिशयेनवृद्धबलौ उरुचक्षसा महादर्शनौ नरा नेतारौ कर्मणां राजाना दीप्यमानौ दीर्घश्रुत्तमा अतिशयेन विद्वांसौ ता तौ मित्रावरुणौ बाहुता न भुजाविव सूर्यस्यरश्मिभिः करणैः साकं सह दंसना दंसनानि कर्माणि । अपः अप्नः दंस इति कर्मनामसु पाठात् । रथर्यतः प्राप्नुतः यथा बाहू सह कर्म प्राप्नुतः तथा मित्रावरुणौ सह यज्ञं प्राप्नुतइत्यर्थः ॥ २ ॥

अथ तृतीया–

प्रयोवांमित्रावरुणाजिरोदूतोअद्रवत् ।
अयःशीर्षामदेरघुः ॥ ३ ॥

प्र । यः । वाम् । मित्रावरुणा । अजिरः । दूतः ।
अद्रवत् । अयःऽशीर्षा । मदेऽरघुः ॥ ३ ॥

हे मित्रावरुणौ वां युवां अजिरो गमनशीलो यो यजमानः प्राद्रवत् अभिगच्छति सदेवानां दूतोभवति। अयःशीर्षा हिरण्यालंकृतशिराश्च भवति। मदेरघुः मदकरे धने गन्ताच भवति॥३॥

अथ चतुर्थी–

नयःसंपृच्छेनपुनर्हवीतवेनसंवादायरमते।
तस्मान्नोअद्यसमृतेरुरुष्यतंबाहुभ्यांनउरुष्यतम् ॥ ४ ॥

न। यः। सम्ऽपृच्छे। न। पुनः। हवीतवे। न। सम्ऽवादाय।
रमते। तस्मात्। नः। अद्य। सम्ऽऋतेः। उरुष्यतम्।
बाहुऽभ्याम्। नः। उरुष्यतम् ॥ ४ ॥

यः शत्रुः संपृच्छे संप्रश्नाय न रमते न क्रीडते। नच पुनःपुनर्हवीतवे ह्वनाय रमते। नच संवादाय रमते। तस्माच्छत्रोः समृतेः संग्रामात् नोस्मान् अद्य उरुष्यतं हे मित्रावरुणौ युवां रक्षतं। किंच तस्य शत्रोर्बाहुभ्यां नोस्मानुरुष्यतं रक्षतम् ॥ ४ ॥

अथ पंचमी–

प्रमित्रायप्रार्यम्णेसचथ्यमृतावसो।
वरूथ्यंवरुणेछन्द्यंवचःस्तोत्रंराजसुगायत ॥ ५ ॥ ६ ॥

प्र। मित्राय। प्र। अर्यम्णे। सचथ्यम्।
ऋतवसो इत्यृतऽवसो। वरूथ्यम्। वरुणे। छन्द्यम्।
वचः। स्तोत्रम्। राजऽसु। गायत ॥ ५॥ ६ ॥

हे ऋतवसो यज्ञधन मित्राय सचथ्यं सेवार्हं वरूथ्यं यज्ञगृहभवं च स्तोत्रं प्रगायत प्रकर्षेण गायत अर्यम्णेच प्रगायत वरुणे छन्द्यं प्रीणनसाधनं चैतादृशं वचः प्रगायत। प्रगायतेति बहुवचनं पूजार्थं। एतदेव दर्शयति राजसु मित्रादिषु राजसु स्तोत्रं गायत पठत मित्रादीन् त्रीन् राज्ञः स्तुतेति समुदायार्थः ॥ ५ ॥

॥ इति पञ्चस्य सप्तमे षष्ठोवर्गः ॥ ६ ॥

अथ षष्ठी–

तेहिंन्विरेअरुणंजेन्यंवस्वेकंपुत्रंतिसृणाम् ।
तेधामान्यमृताम्र्त्यानामदंब्धाअभिचंक्षते ॥ ६ ॥

ते । हिन्विरे । अरुणम् । जेन्यंम् । वसुं । एकंम् ।
पुत्रम् । तिसृणाम् । ते । धामानि । अमृताः । मर्त्यानाम् ।
अदंब्धाः । अभि । चक्षते ॥ ६ ॥

अरुणमरुणवर्णं जेन्यं जयसाधनं वसु वासकं तिसृणां पृथिव्यादीनामेकं पुत्रं ते देवाहिन्विरे प्रेरयन्ति त्रैलोक्यस्य तमोनिवारणाय । किंच अदब्धाः केनाप्यहिंसिताः अमृताः मरणरहितास्तेदेवाः मर्त्यानां मनुष्याणां धामानि स्थानानि अभिचक्षते अभिपश्यन्ति ॥ ६ ॥

अथ सप्तमी–

आमेवचांस्युद्यताद्युमत्तंमानिकर्त्वा ।
उभायातंनासत्यासजोषसाप्रतिहव्यानिवीतये ॥ ७ ॥

आ । मे । वचांसि । उत्ऽयंता । द्युमत्ऽतंमानि ।
कर्त्वा । उभा । यातम् । नासत्या । सऽजोषसा ।
प्रति । हव्यानि । वीतये ॥ ७ ॥

हे नासत्या नासत्यौ सत्यस्य प्रणेतारौ सजोषसा संगतौ उभा उभौ युवां मे जमदग्नेर्मम उद्यता उद्यतानि द्युमत्तमानि दीप्ततमानि वचांसि स्तोत्ररूपाणि वाक्यानि कर्त्वा कर्माणि चायातं । किंच हव्यानि हवींषि वीतये भक्षणाय प्रतिगच्छतम् ॥ ७ ॥

अथाष्टमी–

यानियद्धामरक्षसंहृयामहेयुवाभ्यांवाजिनीवसू ।
प्राचींहोत्रांप्रतिरन्ताविंतंनराग्रणानाजमदंग्निना ॥ ८ ॥

रातिम् । यत् । वाम् । अरक्षसम् । हवामहे । युवाभ्याम् ।
वाजिनीवसू इति वाजिनीऽवसू । प्राचीम् । होत्राम् ।
प्रऽतिरन्तौ । इतम् । नरा । गृणाना । जमत्ऽअग्निना ॥ ८ ॥

हे वाजिनीवसू अन्नधनावश्विनौ वां युवयोः संबन्धि यदरक्षसं रक्षोवर्जितं दानमस्ति तद्यदा हवामहे याचामहे । एतदेव विशदयति युवाभ्यां क्रियमाणां रातिं दानं हवामहे इति तदानीं प्राचीं प्राङ्मुखां होत्रां स्तुतिं प्रतिरन्तौ वर्धयन्तौ नरा नेतारौ जमदग्निना ऋषिणा गृणाना स्तूयमानौ सन्तौ इतं आगच्छतम् ॥ ८ ॥

अथ नवमी–

आनोयज्ञंदिविस्पृशंवायोयाहिसुमन्मभिः ॥ ।
अन्तःपवित्रउपरिश्रीणानोऽयंशुक्रोअयामिते ॥ ९ ॥

आ । नः । यज्ञम् । दिविऽस्पृशम् । वायो इति । याहि ।
सुमन्मऽभिः । अन्तरिति । पवित्रे । उपरि । श्रीणानः ।
अयम् । शुक्रः । अयामि । ते ॥ ९ ॥

हे वायो त्वं नोस्माकं दिविस्पृशं तं यज्ञमायाहि । किमर्थमागमनमित्यत्राह–सुमन्मभिः सुष्टुतिभिः अन्तः पवित्रे पवित्रस्यमध्ये उपरिश्रीणानः श्रयमाणो निषिच्यमाणोयं शुक्रः सोमस्ते तुभ्यं अयामि नियतआसीदिति ॥ ९ ॥

अथ दशमी–

वेत्यध्वर्युःपथिभीरजिष्ठैःप्रतिहव्यानिवीतये ।
अधानियुत्वउभयस्यनःपिबशुचिंसोमंगवाशिरम् ॥ १० ॥ ७ ॥

वेति । अध्वर्युः । पथिऽभिः । रजिष्ठैः । प्रति । हव्यानि ।
वीतये । अध । नियुत्वः । उभयस्य । नः । पिब ।
शुचिम् । सोमम् । गोऽआशिरम् ॥ १० ॥ ७ ॥

हे नियुत्वः नियुत्संज्ञकाश्ववन्वायो अध्वर्युः हविर्धानाव रजिष्ठैः ऋजुतमैः पथिभिर्मार्गैः देवितिगच्छति वीतये भक्षणाय । तव भक्षणानि हव्यानि हवींषिच प्रतिनयतीतिशेषः । अथ अथ नोस्माकं संचन्विनं उभयस्य उभयविधं सोमं कर्मणिषष्ठी पिव । उभयविधत्वं दर्शयति शुचिं शुद्धं सोमं गवाशिरं गव्येन पयसा मिश्रितं चेति ॥ १० ॥

॥ इति पञ्चस्य सप्तमे सप्तमोवर्गः ॥ ७ ॥

अथैकादशी–

बण्मह्राँअसिसूर्यबळादित्यमह्राँअसि ।
मह्स्तेसतोमहिमापनस्यतेद्धादेवमह्राँअसि ॥ ११ ॥

बट् । मह्रान् । असि । सूर्य । बट् । आदित्य । मह्रान् ।
असि । मह्रः । ते । सतः । महिमा । पनस्यते ।
अद्धा । देव । मह्रान् । असि ॥ ११ ॥

हे सूर्य त्वं महान् तेजसाधिकोसि बट् सत्यं नैतन्मिथ्येत्यर्थः । हे आदित्य अदितेः पुत्र त्वं महान् बलेनाप्यधिकोसि बट् सत्यं । मह्रो महतः सतोभवतः ते महिमा महत्त्वं पनस्यते स्तोतृभिः स्तूयते । हे देव द्योतनादिगुणयुक्त सूर्य त्वं महान् वीर्येणाप्यधिकोसि भवसि । अद्धा सत्यमेव अत्र नसंशयइत्यर्थः । बट् सत्रा अद्धेति सत्यनामसु पाठात् ॥ ११ ॥

अथ द्वादशी–

बट्सूर्यश्रवसामह्राँअसिसत्रादेवमह्राँअसि ।
मह्राद्देवानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यम् ॥ १२ ॥

बट् । सूर्य । श्रवसा । मह्रान् । असि । सत्रा । देव । मह्रान् ।
असि । मह्रा । देवानाम् । असुर्यः । पुरःऽहितः । विऽभु ।
ज्योतिः । अदाभ्यम् ॥ १२ ॥

हे सूर्य त्वं श्रवसा श्रवणेन महान् सर्वाधिकोसि बट् सत्यं । हे देव द्योतमान सूर्य त्वं देवानां मध्ये मह्रा महत्त्वेन महान् अधिकोसि । सत्रा सत्यमेव असुर्यः असुराणां हन्ताचा-

सि । किंच त्वं देवानां पुरोहितो हितोपदेष्टासि । किंच ते ज्योतिस्तेजोविभु महद् अदाभ्यं केनाप्यहिंस्यं च ॥ १२ ॥

अथ त्रयोदशी–

इयंयानीच्यर्किणीरूपारोहिण्याकृता ।
चित्रेवप्रत्यदर्श्यायत्यन्तर्दशसुबाहुषु ॥ १३ ॥

इयम् । या । नीची । अर्किणी । रूपा । रोहिण्या ।
कृता । चित्राऽइव । प्रति । अदर्शि । आऽयती । अन्तः ।
दशऽसु । बाहुषु ॥ १३ ॥

अस्यामृच्युषसःस्तुतिः । सूर्यप्रभायावा । येयं नीची अवाङ्मुखी अर्किणी स्तुतिमती रूपा रूपवती रोहिण्या प्रकाशयुक्ता कृता उषाः सूर्यप्रभावोत्पादिता सा अन्तर्ब्रह्मांडस्यमध्ये बाहुषु बाहुस्थानीयासु दशसु दशसंख्याकासु दिक्षु आयती आगच्छती चित्रेव चित्रागौरिव प्रत्यदर्शि सर्वैरदृश्यत ॥ १३ ॥

अथ चतुर्दशी–

प्रजाहतिस्रोअत्यायमीयुर्न्यन्याअर्कमभितोविविश्रे ।
बृहद्धतस्थौभुवनेष्वन्तःपवमानोहरितआविवेश ॥ १४ ॥

प्रऽजाः । ह । तिस्रः । अतिऽआयम् । ईयुः । नि । अन्याः ।
अर्कम् । अभितः । विविश्रे । बृहत् । ह । तस्थौ । भुवनेषु ।
अन्तः । इति । पवमानः । हरितः । आ । विवेश ॥ १४ ॥

यास्तिस्रः प्रजाः अत्यायमीयुः अत्यायममायन् अन्यास्ताइमाः प्रजाः अर्कमर्चनीयमग्निं अभितोनिविविश्रे अभितोनिविष्टाः ततोनपराबभूवुः । भुवनेष्वन्तर्मध्ये बृहद् महानसावादित्यः प्रजापतिरित्येके तस्थौ प्रकाशयन्नतिष्ठत् हरितोदिशःपवमानोवायुराविवेश आविष्टः । ह्रि पूरणे । तथाचैतस्यब्राह्मणं–प्रजाहतिस्रोअत्यायमीयुरिति यावैताइमाः प्रजास्तिस्रोअत्यायमायंस्तानीमानि वयांसि वंगावगधाश्चेरपादाग्यन्या अर्कमभितोनिविविश्रइति ताइमाः प्रजा अर्कमभितोनिविष्टा

इममेवाग्निं बृहद्भवस्थौ भुवनेष्वन्तरिममङ्ग एवबृहद्भुवनेष्वन्तरसावादित्यः पवमानोहरित आविवेशेति वायुरेव पवमानो दिशोहरित आविष्टइति । वाजसनेयिनोप्यामनन्ति—सतपोतप्यत सप्रजाअसृजत ताअस्यप्रजाः सृष्टाः पराबभूवुः तानीमानिवयांसीत्युपक्रम्य प्रजाहतिस्रोअत्यायमीयुरिति याअमूः प्रजाअत्यायन न्यन्याअर्कमभितोविविश्रइति अग्निर्वाअर्कस्तमिमाः प्रजाअभितोनिविष्टास्ताइमाः पराभूता बृहद्भवस्थौभुवनेष्वन्तरिति प्रजापतिमेवैतदृष्यनूक्तं पवमानो हरितआविवेशेति दिशोवैहरितस्ता अयं पवमानआविष्टइति ॥ १४ ॥

अथ पंचदशी—

मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः ।
प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट॥१५॥

माता । रुद्राणाम् । दुहिता । वसूनाम् । स्वसा । आदित्यानाम् ।
अमृतस्य । नाभिः । प्र । नु । वोचम् । चिकितुषे । जनाय ।
मा । गाम् । अनागाम् । अदितिम् । वधिष्ट ॥ १५ ॥

अस्मिन् हृचे गौःस्तूयते—या गौः रुद्राणां रुद्रपुत्राणां मरुतां माता जननी वसूनां दुहिता पुत्री आदित्यानां स्वसा भगिनी अमृतस्य पयसोनाभिः आयासस्थानं तां अनागां अनागसं अदितिमदीनां गां गोरूपां देवीं मावधिष्ट हे जना माहिंसिष्टेति चिकितुषे चेतनावते जनाय नु इदानीं प्रवोचं अहं मावोचमिति शुश्रूषमाणेभ्यउपदेशः ॥ १५ ॥

अथ षोडशी—

वचोविदंवाचमुदीरयन्तींविश्वाभिर्धीभिरुपतिष्ठमानाम् ।
देवींदेवेभ्यःपर्येयुषींगामामावृक्तमर्त्योदभ्रचेताः॥१६॥८॥

वचःऽविदम् । वाचम् । उत्ऽईरयन्तीम् । विश्वाभिः । धीभिः ।
उपऽतिष्ठमानाम् । देवीम् । देवेभ्यः । परि । आऽईयुषीम् ।
गाम् । आ । मा । अवृक्त । मर्त्यः । दभ्रऽचेताः ॥ १६ ॥ ८ ॥

वचोविदं वचसोलंभयित्रीं वाचमुदीरयन्तीं यवः पीत्वा पश्चाद्वाचमुदीरयन्तीं । क्षुधितोहि जनो न वाचमुदीरयति भुक्त्वा पश्चादुदीरयति । विश्वाभिः सर्वाभिर्धीभिर्वाग्भिः उपतिष्ठमानां दे-

वीं द्योतमानां देवेभ्यो देवार्थं मा मां एयुषीं अवगच्छन्तीं गां दभ्रचेता अल्पबुद्धिर्मर्त्यो मनुष्यः पर्यावृक्त परिवर्जयति ॥ १६ ॥

॥ इति षष्ठस्य सप्तमेऽष्टमोवर्गः ॥ ८ ॥

त्वमग्नइति द्वाविंशत्यृचं नवमं सूक्तं गायत्रमाग्नेयं । भृगुगोत्रः प्रयोगोनामऋषिः बार्हस्पत्यः पावकविशेषेण विशिष्टोऽग्न्याख्योवा । यद्वा सहोनाम्नःपुत्रौ गृहपतियविष्ठसंज्ञकौ द्वावग्नी तौ सहेदं सूक्तमपश्यतां तस्मादस्य तावृषी । अथवा तयोरन्यतरः । तथाचानुक्रान्तं—त्वमग्नेद्व्यधिका भार्गवः प्रयोगो बार्हस्पत्योवाग्निःपावकः सहसस्सुतयोर्वाऽग्न्योर्गृहपतियविष्ठयोर्वान्यतर आग्नेयंत्विति । प्रातरनुवाकस्याग्नेयेक्रतौ गायत्रेच्छन्दसि आदितोऽष्टादशर्चः । सूत्रितंच—त्वमग्नेबृहद्वयइत्यष्टादशार्चेन्तस्त्वेतिसूक्तेइति । देवसुवांहविःष्वग्नेर्गृहपतेरनुवाक्या त्वमग्नेबृहद्वयइत्येषा । सूत्रितंच—त्वमग्नेबृहद्वयो हव्यवाळग्निरजरःपितानइति । अन्वारंभणीयायामग्नेर्भगिनोनुवाक्या आसवंसवितुरित्येषा । सूत्रितंच—आसवंसवितुर्यथा सनोराधांस्याभरेति । आग्निष्टुविकेपृक्थ्येपु तृतीयसवने मैत्रावरुणस्याग्निर्वोवृधन्तमिति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितंच—अग्निंवोवृधन्तमग्नेयंयज्ञमध्वरमिति । दशमेहनि इमंनोयज्ञमिति स्तोकसूक्तस्य द्वितीयस्यस्थाने अग्नेघृतस्येत्येषा । सूत्रितंच—स्तोकसूक्तस्य द्वितीयतृतीययोःस्थानेग्नेघृतस्यधीतिभिरुग्नेसुश्चन्द्रसर्पिषइत्येते इति ।

तत्र प्रथमा—

त्वम॑ग्ने बृ॒हद्वयो॒ दधा॑सि देव दा॒शुषे॑ । क॒विर्गृ॒हप॑ति॒र्युवा॑ ॥ १ ॥

त्वम् । अ॒ग्ने॒ । बृ॒हत् । वयः॑ । दधा॑सि । दे॒व॒ । दा॒शुषे॑ ।
क॒विः । गृ॒हऽप॑तिः । युवा॑ ॥ १ ॥

हे देव द्योतमानाग्ने कविः क्रान्तकर्मा गृहपतिः गृहपालको युवा नित्यतरुणस्त्वं दाशुषे हविषांप्रदात्रे यजमानाय बृहद्वयः महदन्नं दधासि प्रयच्छसीत्यर्थः ॥ १ ॥

अथ द्वितीया—

स न॒ ईळा॑नया स॒ह दे॒वाँ अ॑ग्ने दुव॒स्युवा॑ । चिकि॑द्विभान॒वा व॑ह ॥ २ ॥

सः । नः॒ । ईळा॑नया । स॒ह । दे॒वान् । अ॒ग्ने॒ । दु॒व॒स्युवा॑ ।
चिकि॑त् । वि॒भा॒नो॒ इति॑ विऽभानो । आ । व॒ह ॥ २ ॥

हे विभानो विशिष्टदीप्ते अग्ने सत्वं चिकित्वान् ज्ञाताप्सन् नोस्माकं दुवस्युवा परिचरणशीलया ईळानया स्तुवत्या वाचासह देवानावह ॥ २ ॥

अथ तृतीया—

त्वयाहस्विद्युजावयंचोदिष्ठेनयविष्ठ्य । अभिष्मोवाजसातये ॥३॥

त्वया । ह । स्वित् । युजा । वयम् । चोदिष्ठेन ।
यविष्ठ्य । अभि । स्मः । वाजऽसातये ॥ ३ ॥

हे यविष्ठ्य युवतमाग्ने चोदिष्ठेनातिशयेन धनानां प्रेरयित्रा त्वया युजा स्विद् सहायेनैव वयं भार्गवाः प्रयोगाः बार्हस्पत्याः पावकाः अग्नयोवा वाजसातये अन्नलाभायाभिष्मः शत्रूनभिभवेम ॥ ३ ॥

अथ चतुर्थी—

और्वभृगुवच्छुचिमप्नवानवदाहुवे । अग्निंसमुद्रवाससम् ॥ ४ ॥

और्वभृगुऽवत् । शुचिम् । अप्नवानऽवत् ।
आ । हुवे । अग्निम् । समुद्रऽवाससम् ॥ ४ ॥

समुद्रवाससं समुद्रमध्यवर्तिनं वाडवं शुचिं शुद्धमग्निं और्वभृगुवत् यथा और्वभृगुः अप्नवानवत् यथा अप्नवानः तथा हुवे आह्वयाम्यहं ॥ ४ ॥

अथ पञ्चमी—

हुवेवातस्वनंकविंपर्जन्यक्रन्द्यंसहः । अग्निंसमुद्रवाससम् ॥५॥११॥

हुवे । वातऽस्वनम् । कविम् । पर्जन्यऽक्रन्द्यम् । सहः ।
अग्निम् । समुद्रऽवाससम् ॥ ५ ॥ ११ ॥

वातस्वनं वातसदृशध्वनिं कविं क्रान्तकर्माणं पर्जन्यक्रन्द्यं पर्जन्यसदृशक्रन्दनं सहः सहस्विनं वाडवमग्निं हुवे आह्वयामि । अन्यद्गतम् ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे नवमोवर्गः ॥ ९ ॥

अथ षष्ठी–

आसुवंसंवितुर्यथाभगंस्येवभुजिंहुवे । अग्निंसमुद्रवाससम् ॥ ६ ॥

आ । सवम् । सवितुः । यथा । भगंस्यऽइव ।
भुजिम् । हुवे । अग्निम् । समुद्रऽवांससम् ॥ ६ ॥

सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवं इव भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च समुद्रवाससमग्निं आहुवे आह्वयामि ॥ ६ ॥

अथ सप्तमी–

अग्निंवोवृधन्तंमध्वराणांपुरुतमम् । अच्छानप्त्रेसहस्वते ॥ ७ ॥

अग्निम् । वः । वृधन्तंम् । अध्वराणाम् ।
पुरुऽतमंम् । अच्छं । नप्त्रे । सहस्वते ॥ ७ ॥

अध्वराणामहिंस्यानां बलिनां नप्त्रे बन्धुं सहस्वते बलवन्तं विभक्तिव्यत्ययः वृधन्तं ज्वालाभिर्वर्धमानं पुरुतमं अतिशयेन बहुमग्निं ऋत्विजोवोयूयं अच्छ अभिगच्छत ॥ ७ ॥

अथाष्टमी–

अयंयथानआभुवत्त्वष्टारूपेवतक्ष्या । अस्यक्रत्वायशस्वतः ॥८॥

अयम् । यथा । नः । आऽभुवंत् । त्वष्टां ।
रूपाऽइंव । तक्ष्यां । अस्य । क्रत्वां । यशंस्वतः ॥ ८ ॥

अयमग्निर्नोस्मान् तक्ष्या विकर्तव्यानि रूपेव त्वष्टा रूपाणि वर्धकिरिव यथा येनप्रकारेण आभुवत् आभवति तथैवमग्निं अभिगच्छतेत्यर्थः। किंच वयं अस्याग्नेः क्रत्वा प्रज्ञानेन युक्ताः यशस्वतो यशस्वन्तो भवेमेति शेषः ॥ ८ ॥

अथ नवमी–

अयंविश्वाअभिश्रियोग्निर्देवेषुपत्यते । आवाजैरुपनोगमत् ॥ ९॥

अयम् । विश्वाः । अभि । श्रियः । अग्निः ।
देवेषु । पत्यते । आ । वाजैः । उप । नः । गमत् ॥ ९ ॥

मनुष्याणां विश्वाः सर्वाः श्रियः संपदः देवेषु देवानां मध्ये योयमग्निरभिपत्यते अ-भिगच्छति सोग्निर्नोस्मानपि वाजेरन्नैरुपागमदुपागच्छतु ॥ ९ ॥

अथ दशमी—

विश्वेषामिहस्तुहिहोतॄणांयशस्तमम् । अग्निंयज्ञेषुपूर्व्यम् ॥१०॥१०॥

विश्वेषाम् । इह । स्तुहि । होतॄणाम् ।
यशःऽतमम् । अग्निम् । यज्ञेषु । पूर्व्यम् ॥ १० ॥ १० ॥

विश्वेषां सर्वेषां होतॄणांमध्ये यशस्तमं यशस्वितमं यज्ञेषु पूर्व्यं मुख्यं अग्निमिहास्मदीये यज्ञे हे स्तोतः स्तुहि ॥ १० ॥

॥ इति षष्ठस्य सप्तमे दशमोवर्गः ॥ १० ॥

अथैकादशी—

शीरंपावकशोचिषंज्येष्ठोयोदमेष्वा । दीदायदीर्घश्रुत्तमः ॥ ११ ॥

शीरम् । पावकऽशोचिषम् । ज्येष्ठः । यः ।
दमेषु । आ । दीदाय । दीर्घश्रुत्ऽतमः ॥ ११ ॥

ज्येष्ठो देवानांमुख्यो दीर्घश्रुत्तमो अतिशयेनविद्वानग्निः दमेषु यज्विनां गृहेषु आदीदाय आदीप्यते तं शीरं अनुशायिनं । तथाचयास्कः—अनुशायिनमितिवा शिनमितिवेति । पाव-कशोचिषं पावकदीप्तिं स्तुहीत्यर्थः ॥ ११ ॥

अथ द्वादशी—

तमर्वन्तंनसानसिंगृणीहिविप्रशुष्मिणम् । मित्रंनयातयज्जनम् ॥१२॥

तम् । अर्वन्तम् । न । सानसिम् । गृणीहि ।
विप्र । शुष्मिणम् । मित्रम् । न । यातयत्ऽजनम् ॥ १२ ॥

---

१ नि० ४. १४.

हे विप्र मेधाविन् स्तोतः अर्वन्तंन अश्वमिव सानसिं संभजनीयं शुष्मिणं बलिनं मित्रं न सखायमिव यातयज्जनं हतशत्रुजननं तमग्निं गृणीहि स्तुहि ॥ १२ ॥

अथ त्रयोदशी–

उपत्वाजामयोगिरोदेदिंशतीर्हविष्कृतः। वायोरनीकेअस्थिरन् ॥१३॥

उप। त्वा। जामयः। गिरः। देदिशतीः। हविःऽकृतः।
वायोः। अनीके। अस्थिरन् ॥ १३ ॥

हे अग्ने हविष्कृतो यजमानार्थं गिरः स्तुतयः जामयः स्वसारइव देदिशतीः तवगुणान् दिशन्त्यः त्वा त्वामुपतिष्ठन्ते वायोरनीके समीपे त्वां समेधयन्त्यः अस्थिरन् अतिष्ठंश्च ॥१३॥

अथ चतुर्दशी–

यस्यत्रिधात्ववृतंबर्हिस्तस्थावसंदिनम्। आपश्चिन्निदधापदम्॥१४॥

यस्य। त्रिऽधातु। अवृतम्। बर्हिः। तस्थौ।
असम्ऽदिनम्। आपः। चित्। नि। दध। पदम् ॥ १४ ॥

यस्याग्नेस्त्रिधातु निरवृतं अनावृतंच असंदिनं अबद्धंच प्रस्तरणकालेहि बर्हिरबद्धं भवति बर्हिस्तस्थौ आसनार्थं तिष्ठति। तस्मिन्नग्नावापश्चित् आपोपि पदं स्थानं निदध निदधति आन्तरिक्ष्यामाध्यमिके पदं निदधतीत्यर्थः ॥ १४ ॥

अथ पंचदशी–

पदंदेवस्यमीळ्हुषोनाधृष्टाभिरूतिभिः। भद्रासूर्यइवोपदृक् ॥१५॥११॥

पदम्। देवस्य। मीळ्हुषः। अनाधृष्टाभिः।
ऊतिऽभिः। भद्रा। सूर्यःऽइव। उपऽदृक् ॥ १५ ॥ ११ ॥

मीळ्हुषः कामानां सेक्तुर्देवस्य द्योतमानस्याग्नेः पदं स्थानं अनाधृष्टाभिः शत्रुभिरनाधृष्टाभिः ऊतिभीरक्षाभिः भजनीयं भवतीत्यर्थः तथैवास्योपदृक् उपद्रष्टरपि सूर्यइव यथा सूर्यस्तद्वदा मनुष्यैर्भजनीयाभवति ॥ १५ ॥

॥ इति षष्ठस्य सप्तमे एकादशोवर्गः ॥ ११ ॥

अथ षोडशी–

अग्ने॑घृ॒तस्य॑धी॒तिभि॑स्तेपा॒नोदे॑वशो॒चिषा॑ । आदे॒वान्व॑क्षि॒यक्षि॑च ॥१६॥

अग्ने॑ । घृ॒तस्य॑ । धी॒तिऽभिः॑ । ते॒पा॒नः । दे॒व॒ ।
शो॒चिषा॑ । आ । दे॒वान् । व॒क्षि॒ । यक्षि॑ । च॒ ॥ १६ ॥

हे देव द्योतमानाग्ने घृतस्य दीप्तिसाधनस्याज्यस्य धीतिभिः निधानैः तेपानः तपन् शोचिषा ज्वालया देवान् मत्यावक्षि आवह यक्षि यज च ॥ १६ ॥

अथ सप्तदशी–

तंत्वा॑जनन्तमा॒तरः॑क॒विंदे॒वासो॒अङ्गि॑रः । ह॒व्य॒वा॒ह॒मम॑र्त्यम् ॥१७॥

तम् । त्वा॒ । अ॒ज॒न॒न्त॒ । मा॒तरः॑ । क॒विम् । दे॒वासः॑ ।
अ॒ङ्गि॒रः॒ । ह॒व्य॒ऽवाह॑म् । अम॑र्त्यम् ॥ १७ ॥

हे अंगिरोग्ने कविं क्रान्तकर्माणं अमर्त्यं मरणरहितं हव्यवाहं हविषां वोढारं तं प्रसिद्धं त्वा त्वां देवासोदेवाः मातरइत्वाजनन्त जनयन्ति ॥ १७ ॥

अथाष्टादशी–

प्रचे॑तसंत्वाक॒वेऽग्ने॑दू॒तंवरे॑ण्यम् । ह॒व्य॒वाहं॒निषे॑दिरे ॥ १८ ॥

प्रऽचे॑तसम् । त्वा॒ । क॒वे॒ । अग्ने॑ । दू॒तम् । वरे॑ण्यम् ।
ह॒व्य॒ऽवाह॑म् । नि । से॒दि॒रे॒ ॥ १८ ॥

हे कवे क्रान्तकर्मन्नग्ने प्रचेतसं प्रकृष्टबुद्धिं वरेण्यं वरणीयं दूतं देवानां हव्यवाहं हविषां वोढारं त्वा त्वां निषेदिरे देवानिषीदन्ति ॥ १८ ॥

अथैकोनविंशी–

न॒हिमे॒अस्त्यघ्न्या॒नस्वधि॑ति॒र्वन॑न्वति । अथै॒ताद्दग्भ॑रामिते ॥ १९॥

न॒हि । मे॒ । अस्ति॑ । अघ्न्या॑ । न । स्वऽधि॑तिः । वन॑न्ऽवति ।
अथ॑ । ए॒ता॒दृक् । भ॒रा॒मि॒ । ते॒ ॥ १९ ॥

हे अग्ने मे मम भार्गवस्य प्रयोगस्य ऋषेः अघ्न्या गौः। अघ्न्या उस्रेति गोनामसु पाठात्। नह्यस्ति नविद्यते। यस्याः पयसाज्येनच त्वां यजेय। किंच स्वधितिः परशुः नहि वनन्वति काष्ठानि हन्ति यैःकाष्ठैः त्वां समिन्धीय। अथैतादृक् अग्निहोत्रार्थं पयसोदोग्ध्रीं गां इन्धनसाधनानि काष्ठानि चैतत्सर्वं ते तुभ्यं अहं भरामि ॥ १९ ॥

अथ विंशी–

यदं॑ग्ने॒कानि॒कानि॑चि॒दा ते॒दारू॑णिद॒ध्मसि॑। ताजु॑षस्वयविष्ठ्य ॥२०॥

यत्। अ॒ग्ने॒। कानि॑। कानि॑। चि॒त्। आ। ते॒। दारू॑णि। द॒ध्मसि॑। ता। जु॒षस्व॒। य॒वि॒ष्ठ्य॒॥ २०॥

पूर्वस्यामृच्युक्तार्थस्य विवरणमत्र। हे यविष्ठ्य युवतमाग्ने तुभ्यं यद्यदा कानि कानिचित् यानिकान्यपि दारूणि काष्ठानि आदध्मसि आधारयामि। तदा ता तानि अपरशुवृक्णान्यपि जुषस्व सेवस्व। तथाच यजुर्ब्राह्मणं–नहस्मवै पुराग्निरपरशुवृक्णं दहति तदस्मै प्रयोगएव ऋषिरस्वदयद्यदग्ने यानि कानिचेति समिधमादधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदतइति ॥ २० ॥

अथैकविंशी–

यदत्त्यु॑प॒जिह्वि॑का॒यद्व॒म्रो अ॑ति॒सर्प॑ति। सर्वं॒तद॑स्तु॒तेघृ॒तम् ॥ २१ ॥

यत्। अत्ति॑। उ॒प॒ऽजिह्वि॑का। यत्। व॒म्रः। अ॒ति॒ऽसर्प॑ति ॥ सर्वं॑। तत्। अ॒स्तु॒। ते॒। घृ॒तम्॥ २१ ॥

हे अग्ने यत् काष्ठादिकं उपजिह्विका उपजिघ्रतीत्युपजिह्विका अत्ति भक्षयति यच्च काष्ठादिकं वम्रः वमत्युदकमितिवम्रः। उपजिह्विकावम्रशब्दौ यद्यपि पर्यायौ तथापि पृथगुपादानात् वम्रशब्दस्तद्विशेषे पर्यवस्यति। सोप्यतिसर्पति अतिगच्छति तत्सर्वं ते तव घृतं घृतसदृशमस्तु यथा घृतं तव प्रियकरं भवति तथा प्रियकरं भवत्वित्यर्थः ॥ २१ ॥

1तै० सं० ५. १. १०. १

अथ द्वाविंशी–

अ॒ग्निमिन्धा॑नो॒मन॑सा॒धियं॑सचेत॒मर्त्यः॑ ।
अ॒ग्निमी॑धेवि॒वस्व॑भिः ॥ २२ ॥ १२ ॥

अ॒ग्निम् । इ॒न्धानः॑ । मन॑सा । धिय॑म् । स॒चे॒त॒ । मर्त्यः॑ ।
अ॒ग्निम् । ई॒धे॒ । वि॒वस्व॑ऽभिः ॥ २२ ॥ १२ ॥

मर्त्योमनुष्योऽग्निमिन्धानः काष्ठैःप्रज्वलन् मनसैव श्रद्दधानो धियंकर्मसचेत काले भजेत । विवस्वभिः ऋत्विग्भिश्चाग्निमेव ईधे प्रज्वलति ॥ २२ ॥

॥ इति षष्ठस्य सप्तमे द्वादशोवर्गः ॥ १२ ॥

अदर्शीति चतुर्दशर्चं दशमं सूक्तं काण्वस्य सोभरेरार्षं । अत्रानुक्रम्यते–अदर्शिप्रळूना सोभरिर्बार्हतं पंचमीविराड्रूपा सप्तम्याद्ययुजः सतोबृहत्यः अष्टम्यादियुजः ककुम्भरीयसी ककुबनुष्टुबन्त्याग्निमारुतीति । पंचमीसप्तमीनवम्येकादशीत्रयोदश्यः पंचसतोबृहत्यः अष्टमीद्वादश्यौककुभौ दशमी गायत्री चतुर्दश्यनुष्टुप् शिष्टाबृहत्यः।आग्नेयंत्वित्युक्तत्वादग्निर्देवता अन्त्यायास्त्वग्निर्मरुतश्च। प्रातरनुवाकस्याग्नेयेक्रतौ बार्हतेछन्दस्यादितः सप्तर्चः ।सूत्रितंच–अदर्शिगातुवित्तमइति सप्तेतिबार्हतं। आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य प्रमंहिष्ठायेति वैकल्पिकः स्तोत्रियस्तृचः। सूत्रितंच–प्रमंहिष्ठायगायतप्रसोअग्नेतवोतिभिरिति । अध्यायोपाकरणोत्सर्जनयोः मण्डलान्त्यहोमे आग्नेयाहीत्येषा । सूत्रितंच–माचिदाग्नयोहिमरुत्सखा यत्तेराजन्नग्नेइति ।

तत्र प्रथमा–

अद॑र्शिगातु॒वित्त॑मो॒यस्मि॑न्व्र॒तान्या॑द॒धुः ।
उपो॒षुजा॒तमार्य॑स्य॒वर्ध॑नम॒ग्निंन॑क्षन्तनो॒गिरः॑ ॥ १ ॥

अद॑र्शि । गा॒तु॒वित्ऽत॑मः । यस्मि॑न् । व्र॒तानि॑ । आ॒ऽद॒धुः ।
उपो॒ इति॑ । सु । जा॒तम् । आर्य॑स्य । वर्ध॑नम् ।
अ॒ग्निम् । न॒क्ष॒न्त॒ । नः॒ । गिरः॑ ॥ १ ॥

यस्मिन्नग्नौ व्रतानि कर्माणि आदधुः यजमानाः आदधत् गातुवित्तमोतिशयेन मार्गाणां ज्ञाता सोग्निरदर्शि प्रादुरभूत्। किंच सुजातं सम्यक् प्रादुर्भूतं अस्यार्थस्य उत्तमवर्णस्य वर्धनं वर्धयितारमग्निं नोस्माकं गिरः स्तुतिरूपावाचः उपोवक्षन्त उपगच्छन्त्येव। नक्षगतावितिधातुः॥१॥

अथ द्वितीया–

प्रदैवोदासोअग्निर्देवाँअच्छानमज्मना।
अनुमातरंपृथिवींविवावृतेतस्थौनाकस्यसानवि ॥ २ ॥

प्र। दैवःऽदासः। अग्निः। देवान्। अच्छ। न। मज्मना।
अनु। मातरम्। पृथिवीम्। वि। ववृते। तस्थौ।
नाकस्य। सानवि ॥ २ ॥

दैवोदासः दिवोदासेनाहूयमानोग्निः मातरं। सर्वस्य लोकस्य धारकत्वात् पृथिवी माता। तां पृथिवीमच्छ प्रति देवान् तस्य दिवोदासस्य यज्ञे देवान् अनु प्रति हविर्वोढुं नप्रविववृते यस्मादेनमग्निं दिवोदासो मज्मना बलेनाजुहाव तस्मादयमग्निः नाकस्य स्वर्गस्य सानवि समुच्छ्रिते देशे स्वायतनएव तस्थावतिष्ठत्॥ २ ॥

अथ तृतीया–

यस्माद्रेजन्तकृष्टयश्चर्कृत्यानिकृण्वतः।
सहस्रसांमेधसाताविवत्मनाग्निंधीभिःसपर्यत ॥ ३ ॥

यस्मात्। रेजन्त। कृष्टयः। चर्कृत्यानि। कृण्वतः। सहस्रऽसाम्।
मेधसातौऽइव। त्मना। अग्निम्। धीभिः। सपर्यत ॥ ३ ॥

यस्मात्कारणात् चर्कृत्यानि कर्तव्यानि कर्माणि कृण्वतः कुर्वाणान् मनुष्यान् कृष्टयः इतरेमनुष्या रेजन्त कंपन्ते तस्मादिदानीं हे जना यूयं सहस्रसां गवां धनानांच सहस्रस्य दातारमग्निं मेधसातौ यज्ञे धीभिः कर्तव्यैः कर्मभिः त्मना आत्मनैव सपर्यत परिचरत॥ ३ ॥

अथ चतुर्थी–

प्रयंरायेनिनीषसिमर्तोयस्तेवसोदाशत्।
सवीरंधत्तेअग्नउक्थशंसिनंत्मनासहस्रपोषिणम् ॥ ४ ॥

प्र । यम् । राये । निनीषसि । मर्तः । यः । ते । वसो इति । दाशत् ।
सः । वीरम् । धत्ते । अग्ने । उक्थऽशंसिनम् । त्मना ।
सहस्रऽपोषिणम् ॥ ४ ॥

हे वसो वासकाग्ने त्वं यं तव स्तोतारं राये धनार्थं प्रनिनीषसि प्रनेतुमिच्छसि । यश्च मर्तो मनुष्यस्ते तुभ्यं दाशत् हवींषि प्रयच्छति समनुष्यः उक्थशंसिनं उक्थानां शंसितारं त्मना आत्मनैव सहस्रपोषिणं बहुधनं वीरं पुत्रं धत्ते धारयति ॥ ४ ॥

अथ पंचमी—

सदृळ्हेचिदभितृणत्तिवाजमर्वतासधत्तेअक्षितिश्रवः ।
त्वेदेवत्रासदापुरूवसोविश्वावामानिधीमहि ॥ ५ ॥ १३ ॥

सः । दृळ्हे । चित् । अभि । तृणत्ति । वाजम् । अर्वता । सः ।
धत्ते । अक्षिति । श्रवः । त्वे इति । देवऽत्रा । सदा । पुरुवसो इति
पुरुऽवसो । विश्वा । वामानि । धीमहि ॥ ५ ॥ १३ ॥

हे पुरुवसो बहुधनाग्ने यस्तुभ्यं हवींषि प्रयच्छति सयजमानो दृळ्हेचित् दृढेपि शत्रुपुरे स्थितं वाजमन्नं अर्वताश्वेन अभितृणत्ति हिनस्ति । यथा सयजमानः अक्षिति अक्षीणं श्रवोन्नं धत्ते धारयति । तथावसति तुभ्यं हविषां प्रदातारो वयमपि देवत्रा देवे त्वयि स्थिता विश्वा सर्वाणि वामानि वननीयानि धनानि सदा सर्वदा धीमहि धारयामः ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे त्रयोदशोवर्गः ॥ १३ ॥

अथ षष्ठी—

योविश्वादयतेवसुहोतामन्द्रोजनानाम् ।
मधोर्नपात्राप्रथमान्यस्मैप्रस्तोमायन्त्यग्नये ॥ ६ ॥

यः । विश्वा । दयते । वसु । होता । मन्द्रः । जनानाम् । मधोः ।
न । पात्रा । प्रथमानि । अस्मै । प्र । स्तोमाः । यन्ति । अग्नये ॥ ६ ॥

होता देवानामाह्वाता मन्द्रो मोदमानोऽग्निः विश्वा सर्वाणि वसु वसूनि धनानि जनानां जनेभ्यो दयते प्रयच्छति तस्मा अस्मा अग्नये मघोर्न मदकरस्य सोमस्येव प्रथमानि मुख्यानि पात्रा पात्राणि स्तोमाः प्रयन्ति प्रगच्छन्ति ॥ ६ ॥

अथ सप्तमी—

अश्वंनगीर्भीरथ्यंसुदानवोमर्मृज्यन्तेदेवयवः ।
उभेतोकेतनयेदस्मविश्पतेपर्षिराधोमघोनाम् ॥ ७ ॥

अश्वम् । न । गीःऽभिः । रथ्यम् । सुऽदानवः ।
मर्मृज्यन्ते । देवऽयवः । उभे इति । तोके इति । तनये ।
दस्म । विश्पते । पर्षि । राधः । मघोनाम् ॥ ७ ॥

हे दस्म दर्शनीय विश्पते विशांपते अग्ने यं त्वां सुदानवः शोभनदानाः देवयवो देवानात्मनइच्छन्तो यजमानाः रथ्यं रथस्य वोढारं अश्वंन अश्वमिव गीर्भिः स्तुतिभिः मर्मृज्यन्ते परिचरन्ति । त्वमस्माकं यजमानानां तोके पुत्रे तनये पौत्रे चोभे उभयस्मिन् मघोनां धनवतां यो धनं पर्षि प्रयच्छ ॥ ७ ॥

अथाष्टमी—

प्रमंहिष्ठायगायतऋताव्नेबृहतेशुक्रशोचिषे ।
उपस्तुतासोअग्नये ॥ ८ ॥

प्र । मंहिष्ठाय । गायत । ऋतऽव्ने । बृहते ।
शुक्रऽशोचिषे । उपऽस्तुतासः । अग्नये ॥ ८ ॥

ये यूयं उपस्तुतासः उपस्तोतारो मंहिष्ठाय दातृतमाय ऋताव्ने यज्ञवते सत्यवते वा बृहते महते शुक्रशोचिषे दीप्ततेजसे अग्नये प्रगायत स्तोत्रं पठत ॥ ८ ॥

अथ नवमी—

आवंसतेमघवावीरवद्यशःसमिद्धोद्युम्न्याहुतः ।
कुविन्नोअस्यसुमतिर्नवीयस्यच्छावाजेभिरागमत् ॥ ९ ॥

आ । वंसते । मघऽवा । वीरऽवत् । यशः । समऽइद्धः ।
द्युम्नी । आऽहुतः । कुवित् । नः । अस्य । सुऽमतिः ।
नवीयसी । अच्छ । वाजेभिः । आऽगमत् ॥ ९ ॥

मघवा धनवान् द्युम्नी अन्नवान् यशस्वीवा । तथाचयास्कः—द्युम्नंद्योततेर्यशोवान्नंवेति । समिद्धः संदीप्तः वीरवत् पराक्रमोपेतः आहुतः ऋत्विगादिभिराहूतोग्निः यशोपशस्करं अन्नमावंसते यजमानेभ्यः आप्रयच्छति । अस्याग्नेः नवीयसी नवतरासुमतिः अनुग्रहबुद्धिः नोस्मान् अच्छ प्रति वाजेभिः अन्नैः सह कुवित् बहुवारं सलिलं कुविदिति बहुनामसुपाठाव आगमत् आगच्छतु ॥ ९ ॥

अथ दशमी—

प्रेष्ठमुप्रियाणांस्तुह्यासावातिथिम् । अग्निंरथानांयमम् ॥१०॥१४॥

प्रेष्ठम् । ऊँ इति । प्रियाणाम् । स्तुहि । आऽसाव ।
अतिथिम् । अग्निम् । रथानाम् । यमम् ॥ १० ॥ १४ ॥

हे आसाव स्तोतः प्रियाणां प्रेष्ठं प्रियतमं अतिथिं अभ्यागतं रथानां यमं यन्तारं अग्निमेव स्तुहि ॥ १० ॥

॥ इति षष्ठस्य सप्तमे चतुर्दशोवर्गः ॥ १४ ॥

अथैकादशी—

उदितायोनिदितावेदितावस्वायज्ञियोववर्तति ।
दुष्टरायस्यप्रवणेनोर्मयोधियावाजंसिपासतः ॥ ११ ॥

उत्ऽइता । यः । निःऽदिता । वेदिता । वसु । आ ।
यज्ञियः । ववर्तति । दुस्तराः । यस्य । प्रवणे । न ।
ऊर्मयः । धिया । वाजम् । सिसासतः ॥ ११ ॥

१ नि० ५.५ ।

वेदिता वेत्ता यज्ञियोयज्ञार्होग्निः उदिता उदितानि उद्गतानि निदिता निन्दितानि श्रुतानिच वसु वसूनि धनानि आववर्तति आवर्तयति। धिया कर्मणा वाजं संग्रामं सिषासतः संभक्तुमिच्छतः यस्याग्नेर्ज्वालाः प्रवणेनोर्मयः प्रवणाभिमुखाः समुद्रस्यतरंगाइव दुष्टराः तर्तुमशक्याः तमग्निं हे स्तोतः स्तुहीत्यर्थः ॥ ११ ॥

अथ द्वादशी–

मानोंहृणीतामतिथिर्वसुरग्निःपुरुप्रशस्तएषः।
यःसुहोतास्वध्वरः ॥ १२ ॥

मा। नः। हृणीताम्। अतिथिः। वसुः। अग्निः।
पुरुऽप्रशस्तः। एषः। यः। सुऽहोता। सुऽअध्वरः ॥ १२ ॥

वसुर्वासकः अतिथिरतिथिवत्प्रियः पुरुप्रशस्तः बहुभिः स्तुतः सुहोता सुष्ठु देवानामाह्वाता स्वध्वरः सुयज्ञश्च योग्निः सएषोग्निः नोस्मभ्यं माहृणीतां केनापि नरुध्यतां।केनाप्यनवरुद्धः सन् अग्निः अस्मभ्यमभीष्टं प्रयच्छत्वित्यर्थः ॥ १२ ॥

अथ त्रयोदशी–

मोतेरिषन्येअच्छोक्तिभिर्वसोग्नेकेभिश्चिदेवैः।
कीरिश्चिद्धित्वामीट्टेदूत्यायरातहव्यःस्वध्वरः ॥ १३ ॥

मो इति। ते। रिषन्। ये। अच्छोक्तिऽभिः।
वसो इति। अग्ने। केभिः। चित्। एवैः। कीरिः। चित्।
हि। त्वाम्। ईट्टे। दूत्याय। रातऽहव्यः। सुऽअध्वरः ॥ १३ ॥

हे वसो वासकाग्ने त्वां ये मनुष्याः अच्छोक्तिभिः अभिष्टुतिभिः केभिः कैः सुखकरैः एवैश्चित् अभिगमनैरपि ते स्तोतारो मोरिषन् नैव हिंसन्तां। रातहव्यो दत्तहविष्कः स्वध्वरः शोभनयज्ञः कीरिश्चित् स्तोतापि दूत्याय हविर्वहनादिलक्षणाय दूतकर्मणे त्वामीट्टेहि स्तौतिखलु॥१३॥

अथ चतुर्दशी–

आग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये।
सोमर्यांउपसुष्टुतिंमादयस्वस्वर्णरे ॥ १४ ॥ १५ ॥

आ। अग्ने। याहि। मरुत्ऽसखा। रुद्रेभिः।
सोमऽपीतये। सोभर्याः। उप।
सुऽस्तुतिम्। मादयस्व। स्वःऽनरे॥ १४॥ १५॥

हे अग्ने मरुत्सखा मरुतांप्रियस्त्वं स्वर्नरे अस्माकं यजनलक्षणे कर्मणि सोमपीतये सोमपानाय रुद्रेभीरुद्रैः मरुद्भिः सह आयाहि आगच्छ। सोभर्याः सोभरेर्मम सुष्टुतिं शोभनां स्तुतिं चोपागच्छ। मादयस्व स्तुतिं श्रुत्वा सोमं पीत्वा आत्मानं मादयच॥ १४॥

॥ इति षष्ठस्य सप्तमे पञ्चदशोवर्गः॥ १५॥

॥ इत्यष्टमे मण्डले दशमोनुवाकः॥ १०॥

॥ इति प्रागाथमष्टमं मण्डलं समाप्तम्॥ ८॥

वेदिता वेत्ता यज्ञियोयज्ञार्होऽग्निः उदिता उदितानि उद्गतानि निदिता निन्दितानि श्रुतानि च वसु वसूनि धनानि आववर्तति आवर्तयति । धिया कर्मणा वाजं संग्रामं सिषासतः संभक्तुमिच्छतः यस्याग्नेर्ज्वालाः प्रवणेनोर्मयः प्रवणाभिमुखाः समुद्रस्यतरंगाइव दुष्टराः तर्तुमशक्याः तमग्निं हे स्तोतः स्तुहीत्यर्थः ॥ ११ ॥

अथ द्वादशी–

मानोंहृणीतामतिथिर्वसुरग्निःपुरुप्रशस्तएषः ।
यःसुहोतास्वध्वरः ॥ १२ ॥

मा । नः । हृणीताम् । अतिथिः । वसुः । अग्निः ।
पुरुऽप्रशस्तः । एषः । यः । सुऽहोता । सुऽअध्वरः ॥ १२ ॥

वसुर्वासकः अतिथिरतिथिवत्प्रियः पुरुप्रशस्तः बहुभिः स्तुतः सुहोता सुष्टु देवानामाह्वाता स्वध्वरः सुयज्ञश्च योग्निः सएषोग्निः नोस्मभ्यं माहृणीतां केनापि नरुध्यतां।केनाप्यनवरुद्धः सन् अग्निः अस्मभ्यमभीष्टं प्रयच्छत्वित्यर्थः ॥ १२ ॥

अथ त्रयोदशी–

मोतेरिषन्येअच्छोक्तिभिर्वसोग्नेकेभिश्चिदेवैः ।
कीरिश्चिद्धित्वामीट्टेदूत्यायरातहव्यःस्वध्वरः ॥ १३ ॥

मो इति । ते । रिषन् । ये । अच्छोक्तिऽभिः ।
वसो इति । अग्ने । केभिः । चित् । एवैः । कीरिः । चित् ।
हि । त्वाम् । ईट्टे । दूत्याय । रातऽहव्यः । सुऽअध्वरः ॥ १३ ॥

हे वसो वासकाग्ने त्वां ये मनुष्याः अच्छोक्तिभिः अभिष्टुतिभिः केभिः कैः सुखकरैः एवैश्चित् अभिगमनैरपि ते स्तोतारो मोरिषन् मैव हिंसन्तां । रातहव्यो दत्तहविष्कः स्वध्वरः शोभनयज्ञः कीरिश्चित् स्तोतापि दूत्याय हविर्वहनादिलक्षणाय दूतकर्मणे त्वामीट्टेहि स्तौतिखलु॥१३॥

अथ चतुर्दशी–

आग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये ।
सोभर्याउपसुष्टुतिंमादयस्वस्वर्णरे ॥ १४ ॥ १५ ॥

आ । अग्ने । याहि । मरुत्ऽसखा । रुद्रेभिः ।
सोमऽपीतये । सोभर्याः । उप ।
सुऽस्तुतिम् । मादयस्व । स्वःऽनरे ॥ १४ ॥ १५ ॥

हे अग्ने मरुत्सखा मरुतांप्रियस्त्वं स्वर्नरे अस्माकं यजनलक्षणे कर्मणि सोमपीतये सोमपानाय रुद्रेभीरुद्रैः मरुद्भिः सह आयाहि आगच्छ। सोभर्याः सोभरेर्मम सुष्टुतिं शोभनां स्तुतिं चोपागच्छ। मादयस्व स्तुतिं श्रुत्वा सोमं पीत्वा आत्मानं मादयच ॥ १४ ॥

॥ इति पष्ठस्य सप्तमे पञ्चदशोवर्गः ॥ १५ ॥

॥ इत्यष्टमे मण्डले दशमोनुवाकः ॥ १० ॥

॥ इति प्रागाथमष्टमं मण्डलं समाप्तम् ॥ ८ ॥

अथ पावमान्यं नवमं मण्डलं तत्र सप्तानुवाकाः तत्र प्रथमेनुवाके चतुर्विंशतिसंख्याकानि सूक्तानि। तत्र स्वादिष्ठयेति दशर्चं प्रथमं सूक्तं। अत्रानुक्रम्यते—स्वादिष्ठयादश मधुच्छन्दाइति। वैश्वामित्रोमधुच्छन्दाऋषिः प्रागुक्तसमीपपरिभाषया गायत्रीछन्दः। नवमंमण्डलं पावमानंसौम्यमिति वचनात् पवमानगुणविशिष्टः सोमोदेवता। ग्रावस्तोत्रे अर्बुदसूक्तं प्रागुत्तमाया इदमादिकं सर्वं पावमानं विकल्पेनावपनीयं। सूत्रितंच—प्रैतेवदन्त्वित्यर्बुदं प्रागुत्तमाया आवक्षंजसे प्रवोग्रावाणइति सूक्तयोरन्तरोपरिष्टात् पुरस्ताद्वा पावमानीरोप्ययथार्थमावापग्रहणादिति। उपाकर्मणि मंडलादिग्रहणे आद्या। सूत्रं पूर्वमेवोदाहृतम्।

तत्र प्रथमा—

स्वादिष्ठयामदिष्ठयापवस्वसोमधारया। इन्द्रायपातवेसुतः॥१॥

स्वादिष्ठया। मदिष्ठया। पवस्व। सोम।
धारया। इन्द्राय। पातवे। सुतः॥ १ ॥

हे सोम इन्द्राय पातवे पातुं सुतोभिषुतस्त्वं स्वादिष्ठया स्वादुतमया मदिष्ठया अतिशयेन मादयित्र्या धारया पवस्व क्षर॥ १ ॥

अथ द्वितीया—

रक्षोहाविश्वचर्षणिरभियोनिमयोहतम्। द्रुणासधस्थमासदत्॥२॥

रक्षःऽहा। विश्वऽचर्षणिः। अभि। योनिम्।
अयःऽहतम्। द्रुणा। सधऽस्थम्। आ। असदत्॥ २ ॥

रक्षोहा रक्षसां हन्ता विश्वचर्षणिः विश्वस्यद्रष्टा सोमः अयोहतं हिरण्येनहतं। तथाच ब्राह्मणं—हिरण्यपाणिरभिषुणोतीति। द्रुणा द्रोणकलशेन अधिषवणफलकाभ्यां वा सधस्थं सहस्थानं योनिं अभिषवस्थानं अभ्यासदत् अभ्यासीदति॥ २ ॥

अथ तृतीया—

वरिवोधातमोभवमंहिष्ठोवृत्रहन्तमः। पर्षिराधोमघोनाम्॥ ३ ॥

वरिवःऽधातमः। भव। मंहिष्ठः। वृत्रहन्ऽतमः।
पर्षि। राधः। मघोनाम्॥ ३ ॥

हे सोम त्वं वरिवोधातमः अतिशयेन धनानां दाता भव । वेदः वरिव इति धननामसु पाठात् । मंहिष्ठो दातृतमश्च भव सर्वदातृत्वमत्रोच्यत इत्यपुनरुक्तिः । वृत्रहन्तमोऽतिशयेन शत्रूणां हन्ता भव । किंच मघोनां धनवतां शत्रूणां राधोधनंच पर्षि अस्मभ्यं प्रयच्छ ॥ ३ ॥

अथ चतुर्थी–

अभ्यर्षमहानांदेवानांवीतिमन्धसा । अभिवाजमुतश्रवः ॥ ४ ॥

अभि । अर्ष । महानाम् । देवानाम् । वीतिम् । अन्धसा ।
अभि । वाजम् । उत । श्रवः ॥ ४ ॥

हे सोम त्वं महानां महतां देवानां वीतिं यज्ञं अन्धसा धानाद्यन्नेनसह अभ्यर्ष अभिगच्छ । उतापिच अभिगच्छंस्त्वं वाजं बलं श्रवोऽन्नं वा अभिगमयास्मानित्यर्थः ॥ ४ ॥

अथ पञ्चमी–

त्वामच्छाचरामसितदिदर्थंदिवेदिवे । इन्दोत्वेनआशसः ॥ ५ ॥ १६ ॥

त्वाम् । अच्छ । चरामसि । तत् । इत् । अर्थम् । दिवेऽदिवे ।
इन्दो इति । त्वे इति । नः । आऽशसः ॥ ५ ॥ १६ ॥

हे इन्दो यागेषु क्रियमाण सोम त्वामच्छ त्वां प्रति चरामसि वयं चरामः । दिवेदिवे प्रतिदिनं अस्माकं तदित् तदेव तत्परिचरणमेवार्थं कार्यं नान्यत्कारणमस्ति । नोऽस्माकं आशसः आशंसनान्यपि त्वे त्वय्येव । नान्यत्र ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे षोडशोवर्गः ॥ १६ ॥

अथ षष्ठी–

पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता । वारेणशश्वतातना ॥ ६ ॥

पुनाति । ते । परिऽस्रुतम् । सोमम् । सूर्यस्य । दुहिता ।
वारेण । शश्वता । तना ॥ ६ ॥

हे सोम ते तव परिस्रुतं क्षरन्तं सोमं सोमरसं सूर्यस्य दुहिता श्रद्धादेवी वारेण वलेन शश्वता शश्वतेन तना विस्तृतेन पुनाति । तथाच वाजसनेयिनआमनन्ति–श्रद्धावैसूर्यस्यदुहिता श्रद्धासेनंपुनातीति ॥ ६ ॥

अथ सप्तमी–

तमीमण्वीःसमर्यआगृभ्णन्तियोषणोदश। स्वसारःपार्येदिवि॥७॥

तम्। ईम्। अण्वीः। सऽमर्ये। आ। गृभ्णन्ति। योषणः। दश। स्वसारः। पार्ये। दिवि॥ ७॥

समर्ये समनुष्ये यज्ञे पार्ये दिवि सौत्येहनि योषणः स्त्रियः स्वसारः स्वयंसरन्त्यो दशसंख्याकाः अण्वीः अण्व्योंगुलयः। अग्रुवः अण्व्यइत्यंगुलिनामसुपाठात्। तमीं तमेनं सोमं आगृभ्णन्ति आगृह्णन्ति॥ ७॥

अथाष्टमी–

तमींहिन्वन्त्यग्रुवोधमन्तिबाकुरंदृतिम्। त्रिधातुवारणंमधु॥ ८॥

तम्। ईम्। हिन्वन्ति। अग्रुवः। धमन्ति। बाकुरम्। दृतिम्। त्रिऽधातु। वारणम्। मधु॥ ८॥

तमीं एनं सोमं अग्रुवोंगुलयोहिन्वन्ति अभिषवदेशं प्रति प्रेरयन्ति। प्रेरयित्वाच बाकुरं भासमानं दृतिं दृतिसदृशांशुमेनं सोमं धमन्ति अभिषुण्वन्तिच। यद्यपि धमतिरभिषवणकर्मा नभवति तथाप्यौचित्याद्त्राभिषवपरोभविष्यति। तदेतत्सोमात्मकं मधु वस्तु त्रिधातु त्रिस्थानं। द्रोणकलशः आधवनीयः पूतभृदिति त्रिधातवः। वारणं शत्रूणां वारकंच भवति॥ ८॥

अथ नवमी–

अभीऽममघ्न्याउतश्रीणन्तिधेनवःशिशुम्। सोममिन्द्रायपातवे॥९॥

अभि। इमम्। अघ्न्याः। उत। श्रीणन्ति। धेनवः। शिशुम्। सोमम्। इन्द्राय। पातवे॥ ९॥

उतापिच इममेनं शिशुं बालं सोमं अघ्न्याः अहन्तव्या धेनवोगावः इन्द्राय पातवे पातुमभिश्रीणन्ति स्वकीयेन पयसा संस्कुर्वन्तीत्यर्थः॥ ९॥

अथ दशमी–

अस्येदिन्द्रोमदेष्वाविश्वावृत्राणिजिघ्नते। शूरोमघाचमंहते॥१०॥१७॥

अस्य । इत् । इन्द्रः । मदेषु । आ । विश्वा । वृत्राणि ।
जिघ्नते । शूरः । मघा । च । मंहते ॥ १० ॥ १७ ॥

शूरो वीरइन्द्रः अस्येव अस्य सोमस्यैव मदेषु विश्वा विश्वानि वृत्राणि शत्रून् आजिघ्नते आहन्ति । मघा मघानि धनानिच मंहते यजमानेभ्यः प्रयच्छति ॥ १० ॥

॥ इति पञ्चस्य सप्तमे सप्तदशोवर्गः ॥ १७ ॥

पवस्वेति दशर्चं द्वितीयं सूक्तं काण्वस्य मेधातिथेरार्षं गायत्रं पवमानसोमदेवताकं । तथानुक्रान्तं—पवस्वमेध्यातिथिरिति । उक्तोविनियोगः ।

तत्र प्रथमा—

पवस्वदेववीरतिपवित्रंसोमरंह्या । इन्द्रमिन्दोवृषाविश ॥ १ ॥

पवस्व । देवऽवीः । अति । पवित्रम् । सोम । रंह्या ।
इन्द्रम् । इन्दो इति । वृषा । आ । विश ॥ १ ॥

हे सोम देववीः देवकामस्त्वं रंह्या वेगेन पवित्रं यथा भवति तथा अतिपवस्व अतिक्षर। किंच हे इन्दो वृषा सेचकस्त्वं इन्द्रमाविश प्रविश ॥ १ ॥

अथ द्वितीया—

आवच्यस्वमहिप्सरोवृषेन्दोद्युम्नवत्तमः । आयोनिंधर्णसिःसदः ॥२॥

आ । वच्यस्व । महि । प्सरः । वृषा । इन्दो इति ।
द्युम्नवत्ऽतमः । आ । योनिम् । धर्णसिः । सदः ॥ २ ॥

हे इन्दो सोम महि महान् वृषा कामानां वर्षको द्युम्नवत्तमो यशस्वितमो धर्णसिर्धर्तात्वं प्सरः पानीयं मधु आवच्यस्व अस्मान् प्रत्यागमय । योनिं स्वकीयं स्थानमासदः आसीद च॥२॥

अथ तृतीया—

अधुक्षतप्रियंमधुधारासुतस्यवेधसः । अपोवसिष्टसुक्रतुः ॥ ३ ॥

अधुक्षत । प्रियम् । मधु । धारा । सुतस्य । वेधसः ।
अपः । वसिष्ट । सुऽक्रतुः ॥ ३ ॥

सुतस्याभिषुतस्य वेधसोभिलषितस्य विधातुर्यस्य सोमस्य धारा प्रियं प्रीतिकरं मधु अ-मृतं अधुक्षत दुग्धे सुक्रतुः शोभनकर्मा सोमः अपोवस्तीवरीर्वसिष्ट आच्छादयति ॥ ३ ॥

अथ चतुर्थी–

मृहान्तंत्वामृहीरन्वापोअर्षन्तिसिन्धवः । यद्गोभिर्वासयिष्यसे ॥४॥

मृहान्तम् । त्वा । मृहीः । अनु । आपः । अर्षन्ति ।
सिन्धवः । यत् । गोभिः । वासयिष्यसे ॥ ४ ॥

हे सोम त्वं यदा यज्ञे गोभिः गोविकारैः पयोभिः वासयिष्यसे आच्छादयिष्यसे तत्त-दा महान्तं त्वा त्वामनु प्रति सिन्धवः स्यन्दमानाः महीर्महत्यः आपःअर्षन्ति गच्छन्ति ॥ ४ ॥

अथ पञ्चमी–

समुद्रोअप्सुमामृजेविष्टुम्भोधरुणोदिवः । सोमःपवित्रेअस्मयुः ॥५॥१८॥

समुद्रः । अप्ऽसु । ममृजे । विष्टम्भः । धरुणः । दिवः ।
सोमः । पवित्रे । अस्मऽयुः ॥ ५ ॥ १८ ॥

समुद्रः समुद्रवन्त्यस्मादसाइति समुद्रः विष्टंभोदिवः स्वर्गस्य धरुणोधारकश्च अस्मयुर-स्मत्कामः सोमोप्सूदकेषु ममृजे मृज्यते पवित्रे अभिषिच्यतइत्यर्थः ॥ ५ ॥

॥ इति षष्ठस्य सप्तमेष्टादशोवर्गः ॥ १८ ॥

अथ षष्ठी–

अचिक्रदद्वृषाहरिर्महान्मित्रोनदर्शतः । संसूर्येणरोचते ॥ ६ ॥

अचिक्रदत् । वृषा । हरिः । महान् । मित्रः । न । दर्शतः ।
सम् । सूर्येण । रोचते ॥ ६ ॥

वृषा कामानां वर्षको हरिर्हरितवर्णो महान् सर्वोत्तमो मित्रोन यथासखा तद्वद् दर्शतो दर्शनीयो योयंसोमः अचिक्रदद् शब्दंकरोति सोयंसोमः सूर्येणसह संरोचते दिवि प्रकाशते ॥६॥

अथ सप्तमी–

गिरस्तइन्दओजसामर्मृज्यन्तेअपस्युवः । याभिर्मदायशुम्भसे ॥७॥

गिरः । ते । इन्दो इति । ओजसा । मर्मृज्यन्ते । अपस्युवः ।
याभिः । मदाय । शुंभसे ॥ ७ ॥

हे इन्दो वे तव ओजसा बलेन अपस्युवः कर्मेच्छासंबन्धिन्यः तागिरः स्तुतयोमर्मृज्यन्ते शोध्यन्ते । याभिर्गीर्भिस्त्वं मदाय क्षरन् शुंभसे अलंक्रियसे ॥ ७ ॥

अथाष्टमी—

तंत्वामदायघृष्वंयउलोककृत्नुमीमहे । तवप्रशस्तयोमहीः ॥ ८ ॥

तम् । त्वा । मदाय । घृष्वये । ऊँ इति । लोकऽकृत्नुम् ।
ईमहे । तव । प्रऽशस्तयः । महीः ॥ ८ ॥

हे सोम यस्य तव प्रशस्तयः प्रशंसाः महीर्महत्यः घृष्वये उ त्वत् प्रसादात् शत्रूणां धर्षणशीलाय यजमानायैव लोककृत्नुं उत्तमस्य लोकस्य कर्तारं तं त्वां सोमं मदाय ईमहे वयं याचामहे ॥ ८ ॥

अथ नवमी—

अस्मभ्यमिन्दविन्द्रयुर्मध्वःपवस्वधारया । पर्जन्योवृष्टिमाँइव ॥९॥

अस्मभ्यम् । इन्दो इति । इन्द्रऽयुः । मध्वः । पवस्व ।
धारया । पर्जन्यः । वृष्टिमान्ऽइव ॥ ९ ॥

हे इन्दो सोम इन्द्रयुः इन्द्रकामस्त्वं मध्वोमदकरस्यामृतस्य धारया पर्जन्योवृष्टिमान् इव यथा वर्षवान् पर्जन्योमेघः तथास्मभ्यं मेधातिथिभ्यः पवस्व क्षर ॥ ९ ॥

अथ दशमी—

गोषाइन्दोनृषाअस्यश्वसावाजसाउत । आत्मायज्ञस्यपूर्व्यः ॥१०॥१९॥

गोऽसाः । इन्दो इति । नृऽसाः । असि । अश्वऽसाः । वाजऽसाः ।
उत । आत्मा । यज्ञस्य । पूर्व्यः ॥ १० ॥ १९ ॥

हे इन्दो यज्ञस्य पूर्व्यः प्रत्नः आत्मा आत्मभूतस्त्वं गोपाः अस्मभ्यं गवां दातासि भवसि । नृषाः पुत्राणां दाताचासि । अश्वसाः अश्वानां दाताचासि । उतापिच वाजसाः अन्नानां दाताचासि ॥१०॥

॥ इति षष्ठस्य सप्तमे एकोनविंशोवर्गः ॥१९॥

एषदेवइति दशर्चं तृतीयं सूक्तं आजीगर्तेः शुनःशेपस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रान्तंच—एषशुनःशेपइति । उक्तोविनियोगः ।

तत्र प्रथमा—

एषदेवोअमर्त्यःपर्णवीरिवदीयति । अभिद्रोणान्यासदम् ॥ १ ॥

एषः । देवः । अमर्त्यः । पर्णवीःऽइव । दीयति ।
अभि । द्रोणानि । आऽसदम् ॥ १ ॥

देवोद्योतमानः अमर्त्योमरणरहितः एषसोमो द्रोणानि द्रोणकलशानि अभि अभिलक्ष्य आसदं आसदनार्थं पर्णवीरिव यथा पक्षी तथा वेगेन दीयति गच्छति ॥ १ ॥

अथ द्वितीया—

एषदेवोविपाकृतोतिह्वरांसिधावति । पवमानोअदाभ्यः ॥ २ ॥

एषः । देवः । विपा । कृतः । अति । ह्वरांसि । धावति ।
पवमानः । अदाभ्यः ॥ २ ॥

विपा अंगुल्या । विपः कक्ष्याः इत्यंगुलिनामसुपाठात् । कृतोभिषुतःएषसोमोदेवः पवमानः क्षरन् अदाभ्यः केनाप्यहिंसितश्वसन् ह्वरांसि शत्रूनतिधावति हन्तुमतिगच्छति ॥ २ ॥

अथ तृतीया—

एषदेवोविपन्युभिःपवमानऋतायुभिः । हरिर्वाजायमृज्यते ॥ ३ ॥

एषः । देवः । विपन्युऽभिः । पवमानः । ऋतयुऽभिः ।
हरिः । वाजाय । मृज्यते ॥ ३ ॥

पवमानः क्षरन्नेष सोमोदेवोविपन्युभिः स्तोतृभिः ऋतायुभिः यज्ञकामैर्वा हरिरश्वइव वाजाय संग्रामार्थं मृज्यते स्तुतिभिरलंक्रियते ॥ ३ ॥

अथ चतुर्थी–

एषविश्वा॑निवार्या॒शूरो॒यन्नि॑वसत्व॑भिः । पव॑मानःसिषासति ॥ ४ ॥

एषः । विश्वा॑नि । वार्या॑ । शूरः॑ । यन्ऽइ॑व । सत्व॑ऽभिः ।
पव॑मानः । सि॒षा॒स॒ति॒ ॥ ४ ॥

पवमानः क्षरन् शूरोवीर एषसोमो विश्वानि सर्वाणि वार्या वरणीयानि धनानि सत्वभिर्बलैः यन्निव गच्छन्निव सिषासति अस्मदर्थं संभक्तुमिच्छति ॥ ४ ॥

अथ पञ्चमी–

ए॒षदे॒वोर॑थर्यति॒पव॑मानोदशस्यति । आ॒विष्कृ॑णोतिवग्व॒नुम् ॥५॥ २०॥

ए॒षः । दे॒वः । र॒थ॒र्य॒ति॒ । पव॑मानः ।
द॒श॒स्य॒ति॒ । आ॒विः । कृ॒णो॒ति॒ । व॒ग्व॒नुम् ॥ ५ ॥ २० ॥

पवमानः क्षरन्नेष सोमोदेवो रथर्यति अस्मदीयं यागं प्रत्यागमनाय रथं कामयते । दशस्यति आगत्यच अस्मभ्यमभिलषितं प्रयच्छति । वग्वनुं शब्दं आविः कृणोति अभिषूयमाणः प्रकटयति ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे विंशोवर्गः ॥ २० ॥

अथषष्ठी–

ए॒षविप्रै॑र॒भिष्टु॑तो॒पोदे॒वोविगा॑हते । दध॒द्रत्ना॑निदा॒शुषे॑ ॥ ६ ॥

ए॒षः । विप्रैः॑ । अ॒भिऽस्तु॑तः । अ॒पः । दे॒वः ।
वि । गा॒ह॒ते॒ । दध॑त् । रत्ना॑नि । दा॒शुषे॑ ॥ ६ ॥

विप्रैर्मेधाविभिः स्तोतृभिः अभिष्टुतः परितः स्तुतः एषसोमोदेवो दाशुषे हविषां प्रदात्रे यजमानाय रत्नानि रमणीयानि धनानि दधत् धारयन् प्रयच्छन् अपोवसतीवरीर्विगाहते प्रविशति ॥ ६ ॥

अथ सप्तमी—

एषदिवंविधावतितिरोरजांसिधारया । पवमानःकनिक्रदत् ॥ ७ ॥

एषः । दिवम् । वि । धावति । तिरः । रजांसि ।
धारया । पवमानः । कनिक्रदत् ॥ ७ ॥

धारया पवमानः क्षरन्नेषसोमः कनिक्रदत् अभिषूयमाणः शब्दंकुर्वन् रजांसि लोकान् तिरः तिरस्कुर्वन् यागाद्दिवं स्वर्गं विधावति गच्छति ॥ ७ ॥

अथाष्टमी—

एषदिवंव्यासरत्तिरोरजांस्यस्पृतः । पवमानःस्वध्वरः ॥ ८ ॥

एषः । दिवम् । वि । आ । असरत् । तिरः ।
रजांसि । अस्पृतः । पवमानः । सुऽअध्वरः ॥ ८ ॥

पवमानः क्षरन्नेषसोमः स्वध्वरः सुयज्ञः अस्पृतः केनाप्यहिंसितश्चसन् रजांसि लोकान् तिरः तिरस्कुर्वन् यज्ञाद्दिवं प्रतिव्यासरत् विसरति गच्छति ॥ ८ ॥

अथ नवमी—

एषप्रत्नेनजन्मनादेवोदेवेभ्यःसुतः । हरिःपवित्रेअर्षति ॥ ९ ॥

एषः । प्रत्नेन । जन्मना । देवः । देवेभ्यः ।
सुतः । हरिः । पवित्रे । अर्षति ॥ ९ ॥

हरिर्हरितवर्णोदेवः द्योतमानः एषसोमः प्रत्नेन पुराणेन जन्मना जननेन देवेभ्यो देवार्थं सुतोभिषुतः सन् पवित्रे स्थातुं अर्षति गच्छति ॥ ९ ॥

अथ दशमी—

एषउस्यपुरुव्रतोजज्ञानोजनयन्निषः । धारयापवतेसुतः॥१०॥२१॥

एषः । ऊँ इति । स्यः । पुरुऽव्रतः । जज्ञानः ।
जनयन् । इषः । धारया । पवते । सुतः ॥ १० ॥ २१ ॥

स्वः एषउ ससोमएव पुरुव्रतो बहुकर्मा जज्ञानो जायमानएव इषोन्नानि जनयन् उत्पादयन् सुतोभिषुतःसन् धारया पवते क्षरति ॥ १० ॥

॥ इति षष्ठस्य सप्तमे एकविंशोवर्गः ॥ २१ ॥

सनाचेति दशर्चं चतुर्थं सूक्तं आंगिरसकुलस्य हिरण्यस्तूपस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रान्तंच—सनहिरण्यस्तूपइति । उक्तोविनियोगः ।

तत्र प्रथमा—

सनाचसोमजेषिचपवमानमहिश्रवः । अथानोवस्यसस्कृधि ॥ १ ॥

सनं । च । सोम । जेषि । च । पवमान ।
महि । श्रवः । अथ । नः । वस्यसः । कृधि ॥ १ ॥

हे महिश्रवः महदन्न पवमानसोम सनास्मद्यागे यजनीयान् देवान् भज जेषिच यागविध्वंसकारिणोराक्षसांश्च जय । अथ देवान् प्राप्य राक्षसांश्च जित्वा अनन्तरं नोस्मान् वस्यसः श्रेयस्कृधि कुरु श्रेयोस्मभ्यं देहीत्यर्थः ॥ १ ॥

अथ द्वितीया—

सनाज्योतिःसनास्वर्विश्वाचसोमसौभगा । अथानोवस्यसस्कृधि ॥ २ ॥

सनं । ज्योतिः । सनं । स्वः । विश्वा । च । सोम ।
सौभगा । अथ । नः । वस्यसः । कृधि ॥ २ ॥

हे सोम त्वं ज्योतिस्तेजः सन अस्मभ्यं प्रयच्छ । अपिच स्वः स्वर्गं सन अस्मभ्यं देहि । विश्वा विश्वानि सौभगा सौभाग्यानि च सन । सिद्धमन्यत् ॥ २ ॥

अथ तृतीया—

सनादक्षमुतक्रतुमपसोममृधोजहि । अथानोवस्यसस्कृधि ॥ ३ ॥

सनं । दक्षम् । उत । क्रतुम् । अप । सोम । मृधः ।
जहि । अथ । नः । वस्यसः । कृधि ॥ ३ ॥

हे सोम त्वं दक्षं बलं सनास्मभ्यं देहि । उतापिच क्रतुं प्रज्ञानं सन । मृधोहिंसकान् शत्रून् अपजहि । मारय । सिद्धमन्यत् ॥ ३ ॥

अथ चतुर्थी—

पवीतारःपुनीतनसोममिन्द्रायपातवे । अथानोवस्यसस्कृधि ॥४॥

पविंतारः । पुनीतन । सोमम् । इन्द्राय ।
पातवे । अथ । नः । वस्यसः । कृधि ॥ ४॥

हे पवीतारः सोमाभिषवकर्तारोयूयं इन्द्राय पातवे पातुं सोमं पुनीतन अभिषुणुत । सिद्धमन्यत् ॥ ४ ॥

अथ पञ्चमी—

त्वंसूर्येनआभजतवक्रत्वातवोतिभिः । अथानोवस्यसस्कृधि ॥५॥२२॥

त्वम् । सूर्ये । नः । आ । भज । तव । क्रत्वा । तव ।
ऊतिऽभिः । अथ । नः । वस्यसः । कृधि ॥ ५ ॥ २२ ॥

हे सोम त्वं तव क्रत्वा तवोतिभिः त्वत्कर्तृकेण कर्मणा त्वत्कर्तृकाभीरक्षाभिश्च नोस्मान् सूर्ये आभज प्रापय । सिद्धमन्यत् ॥ ५ ॥

॥ इति पञ्चमस्य सप्तमे द्वाविंशोवर्गः ॥ २२ ॥

अथ षष्ठी—

तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यम् । अथानोवस्यसस्कृधि ॥६॥

तव । क्रत्वा । तव । ऊतिऽभिः । ज्योक् ।
पश्येम । सूर्यम् । अथ । नः । वस्यसः । कृधि ॥ ६ ॥

हे सोम तव क्रत्वा प्रज्ञानेन तवोतिभीरक्षाभिश्च ज्योक् चिरं पश्येम सूर्यं पश्याम द्रक्ष्यामः । सिद्धमन्यत् ॥ ६ ॥

अथ सप्तमी–

अभ्यर्षस्वायुधसोमद्विबर्हसंरयिम् । अथानोवस्यसस्कृधि ॥ ७ ॥

अभि । अर्ष । सुऽआयुध । सोम । द्विऽबर्हसम् ।
रयिम् । अथ । नः । वस्यसः । कृधि ॥ ७ ॥

हे स्वायुध शोभनायुध सोम त्वं द्विबर्हसं द्वयोर्द्यावापृथिव्योः स्थानयोः परिवृढं रयिं धनं अभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥ ७ ॥

अथाष्टमी–

अभ्य१र्षानपच्युतोरयिंसमत्सुसासहिः।अथानोवस्यसस्कृधि॥८॥

अभि । अर्ष । अनपऽच्युतः । रयिम् । समत्ऽसु ।
ससहिः । । अथ । नः । वस्यसः । कृधि ॥ ८ ॥

हे सोम समत्सु संग्रामेषु अनपच्युतः शत्रुभिरनाहतः सासहिः शत्रुणामभिभविता त्वं रयिं धनं अभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥ ८ ॥

अथ नवमी–

त्वांयज्ञैरवीवृधन्पवमानविधर्मणि । अथानोवस्यसस्कृधि ॥ ९ ॥

त्वाम् । यज्ञैः । अवीवृधन् । पवमान ।
विऽधर्मणि । अथ । नः । वस्यसः । कृधि ॥ ९ ॥

हे पवमान सोम यजमानानां विधारणाय प्रवृत्तं त्वां यज्ञैः विधर्मणि आत्मनोविधारणार्थं अवीवृधन् यजमानावर्धयन्ति । सिद्धमन्यत् ॥ ९ ॥

अथ दशमी–

रयिंनश्चित्रमश्विनमिन्दोविश्वायुमाभर ।
अथानोवस्यसस्कृधि ॥ १० ॥ २३ ॥

र॒यिम् । नः॒ । चि॒त्रम् । अ॒श्विन॑म् । इन्दो॒ इति॑ । वि॒श्वऽआ॑युम् ।
आ । भ॒र॒ । अथ॑ । नः॒ । वस्य॑सः । कृ॒धि॒ ॥ १० ॥ २३ ॥

हे इन्दो यागेषु क्रियमाण सोम त्वं चित्रं नानाविधं अश्विनं अश्ववन्तं च विश्वायुं सर्वगामिनं रयिं नोस्मभ्यं आभर आहर । सिद्धमन्यत् ॥ १० ॥

॥ इति षष्ठस्य सप्तमे त्रयोविंशोवर्गः ॥ २३ ॥

समिद्धइत्येकादशर्चं पंचमं सूक्तं काश्यपासितस्य देवलस्यवार्षं अष्टम्याद्याश्चतस्रोनुष्टुभः शिष्टाः सप्तगायत्र्यः नराशंसवर्जिताः समिद्धआदयः क्रमेण प्रत्यृचंदेवताः । तथाचानुक्रान्तं—समिद्धएकादश काश्यपोसितोदेवलोवा विंशतिः सूक्तान्याद्यमाप्रियश्चतुरनुष्टुबन्तमिति । काश्यपस्य पावमानमिदमाप्रीसूक्तं । सूत्रितंच—समिद्धोअग्रेति सर्वेषांयथाऋषिवेति ।

तत्र प्रथमा—

समि॑द्धो वि॒श्वत॒स्पति॒ः पव॑मानो॒ वि रा॑जति । प्री॒णन्वृषा॒ कनि॑क्रदत् ॥१॥

सम्ऽइ॑द्धः । वि॒श्वतः॑ । पतिः॑ । पव॑मानः । वि । रा॒ज॒ति॒ ।
प्री॒णन् । वृषा॑ । कनि॑क्रदत् ॥ १ ॥

आप्रीयसोमस्तुविरत्र समिद्धः सम्यग्दीप्तः विश्वतस्पतिः सर्वतः स्वामी वृषा कामानां वर्षिता पवमानः सोमः कनिक्रदत् अभिषूयमाणः शब्दंकुर्वन् प्रीणन् देवान् प्रीणयन् विराजति यागेषु प्रकाशते ॥ १ ॥

अथ द्वितीया—

तनू॒नपा॒त्पव॑मान॒ः शृङ्गे॒ शिशा॑नो अर्षति । अ॒न्तरि॑क्षेण॒ रार॑जत् ॥२॥

तनू॒ऽनपा॑त् । पव॑मानः । शृङ्गे॒ इति॑ । शिशा॑नः । अ॒र्ष॒ति॒ ।
अ॒न्तरि॑क्षेण । रार॑जत् ॥ २ ॥

तनूनपात् पवमानः सोमः तनूनपादत्रसोमोभवति । तथाचश्रूयते—अद्भ्योंशवोजायन्ते ततः सोमोजायतइति । शृंगे दीप्तउन्नतप्रदेशे । हणिः शृंगाणीति ज्वलनामसुपाठात् । शिशानस्तीक्ष्णीकुर्वन् अन्तरिक्षेण रारजत् अर्षति द्रोणकलशंप्रति गच्छति । तथाचाम्नायते—द्वाभ्यांधाराभ्यां प्लावयन्नंगृह्णातीति ॥ २ ॥

अथ तृतीया—

ई॒ळेन्यः॒ पव॑मानो र॒यिर्वि रा॑जति द्यु॒मान् । मधो॒र्धारा॑भि॒रोज॑सा ॥३॥

ई॒ळेन्यः॑ । पव॑मानः । र॒यिः । वि । रा॒ज॒ति॒ । द्यु॒ऽमान् ।
मधोः॑ । धारा॑भिः । ओज॑सा ॥ ३ ॥

ईळेन्यः स्तुत्यः पवमानः सोमः रयिः अभीष्टस्यदाता द्युमान् दीप्तिमांश्चसन् मधोरुदकस्य धाराभिः सहक्षरन् ओजसा बलेन विराजति प्रकाशते ॥ ३ ॥

अथ चतुर्थी—

ब॒र्हिः प्रा॒चीन॒मोज॑सा॒ पव॑मानः स्तृ॒णन्हरिः॑ । दे॒वेषु॑ दे॒व ई॑यते ॥ ४ ॥

ब॒र्हिः । प्रा॒चीन॑म् । ओज॑सा । पव॑मानः । स्तृ॒णन् ।
हरिः॑ । दे॒वेषु॑ । दे॒वः । ई॒य॒ते॒ ॥ ४ ॥

हरिः हरितवर्णो देवो द्योतमानः सोमः पवमानः देवेषु यज्ञेषु बर्हिः प्राचीनं प्राचीनाग्रं स्तृणन् तारयन् ओजसा बलेन ईयते गच्छति ॥ ४ ॥

अथ पञ्चमी—

उदातै॑र्जिहते बृ॒हद्द्वारो॑ दे॒वीर्हि॑र॒ण्ययीः॑ । पव॑मानेन॒ सुष्टु॑ताः ॥५॥२४॥

उत् । आतैः॑ । जि॒ह॒ते॒ । बृ॒हत् । द्वारः॑ । दे॒वीः । हि॒र॒ण्ययीः॑ ।
पव॑मानेन । सुऽस्तु॑ताः ॥ ५ ॥ २४ ॥

हिरण्ययीः हिरण्मय्यः द्वारो देवीर्द्वारो देव्यः पवमानेन सोमेन सह सुष्टुताः स्तोतृभिः सम्यक् स्तुताः सत्यः बृहत् बृहतीभ्यो महतीभ्यः आतैः आताभ्यो दिग्भ्यः । आता आशा इति दिङ्नामसुपाठात् उज्जिहते उद्गच्छन्ति ॥ ५ ॥

॥ इति पष्ठस्य सप्तमे चतुर्विंशोवर्गः ॥ २४ ॥

अथ षष्ठी—

सु॒शि॒ल्पे बृ॑ह॒ती म॒ही पव॑मानो वृषण्यति । नक्तो॒षासा॒ न द॑र्श॒ते ॥ ६ ॥

सुशिल्पे इति सुऽशिल्पे । बृहती इति । मही इति ।
पर्वमानः । वृषण्यति । नक्तोषसा । न । दर्शते इति ॥ ६ ॥

सुशिल्पे सुरूपे बृहती परिवृढे मही महत्यौ न संप्रतिदर्शनीये नक्तोषासा नक्तोषसौ पवमानः सोमोवृषण्यति कामयते ॥ ६ ॥

अथ सप्तमी—

उभादेवानृचक्षसाहोतारादैव्याहुवे । पर्वमानइन्द्रोवृषा ॥ ७ ॥

उभा । देवा । नृऽचक्षसा । होतारा । दैव्या ।
हुवे । पर्वमानः । इन्द्रः । वृषा ॥ ७ ॥

नृचक्षसा मनुष्याणां द्रष्टारौ दैव्या दैव्यौ देवसंबन्धिनौ होतारा होतारौ उभा उभौ देवा देवौ हुवे आह्वयामि । यज्ञे पवमानः सोमः इन्द्रोदीप्तः । तथाचयास्कः—इन्द्रइरांदृणातीति वेरां ददातीति वेरांदधातीति वेरांदारयतीति वेरांधारयतीति वेन्दवेद्रवतीति वेन्दौरमतइति वेन्धेभूतानीतिवातद्यदेनंप्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमितिविज्ञायतइति । वृषा कामानांवर्षिताच भवति ॥७॥

अथाष्टमी—

भारतीपर्वमानस्यसरस्वतीळामही ।
इमंनोयज्ञमागमन्तिस्रोदेवीःसुपेशसः ॥ ८ ॥

भारती । पर्वमानस्य । सरस्वती । इळा । मही ।
इमम् । नः । यज्ञम् । आ । गमन् । तिस्रः । देवीः । सुऽपेशसः ॥ ८ ॥

भारती भारत्याख्या सरस्वती सरस्वत्याख्याच मही महती इळाख्याच तिस्रः सुपेशसः सुरूपा देवीर्दिव्योनोस्माकं पवमानस्य सोमस्य संबन्धिनं इमं यज्ञं प्रत्यागमन् आगच्छन्तु ॥८॥

अथ नवमी—

त्वष्टारमग्रजांगोपांपुरोयावानमाहुवे ।
इन्दुरिन्द्रोवृषाहरिःपवमानःप्रजापतिः ॥ ९ ॥

---

१ नि० १०.८.।

त्वष्टारम् । अग्रऽजाम् । गोपाम् । पुरःऽयावानम् । आ ।
हुवे । इन्दुः । इन्द्रः । वृषा । हरिः । पवमानः । प्रजाऽपतिः ॥ ९ ॥

अग्रजां अग्रेजातं गोपां प्रजानां पालयितारं पुरोयावानं देवानां पुरस्ताद्गन्तारं त्वष्टारं देवमाहुवे अहमाह्वयामि । यत्ते हरिः हरितवर्णः पवमानः इन्दुः सोमः इन्द्रोदेवानामीश्वरो वृषा कामानांवर्षिताच प्रजापतिः प्रजानां पालयिताच भवतीति ॥ ९ ॥

अथ दशमी–

वनस्पतिंपवमानमध्वासमङ्ग्धिधारया ।
सहस्रवल्शंहरितंभ्राजमानंहिरण्ययम् ॥ १० ॥

वनस्पतिम् । पवमान । मध्वा । सम् । अङ्ग्धि । धारया ।
सहस्रऽवल्शम् । हरितम् । भ्राजमानम् । हिरण्ययम् ॥ १० ॥

हे पवमानसोम हरितं हरितवर्णं हिरण्ययं कदाचिद्धिरण्मयवर्णंच भ्राजमानं दीप्यमानं सहस्रवल्शं सहस्रशाखं वनस्पतिं देवं धारया धारामयेन मध्वा मधुना समङ्ग्धि अंक्ष्व संस्कुर्वित्यर्थः ॥ १० ॥

अथैकादशी–

विश्वेदेवाःस्वाहाकृतिंपवमानस्यागत ।
वायुर्बृहस्पतिःसूर्योग्निरिन्द्रःसजोषसः ॥ ११ ॥ २५ ॥

विश्वे । देवाः । स्वाहाऽकृतिम् । पवमानस्य ।
आ । गत । वायुः । बृहस्पतिः । सूर्यः ।
अग्निः । इन्द्रः । सऽजोषसः ॥ ११ ॥ २५ ॥

हे विश्वेदेवा वायुर्बृहस्पतिश्च सूर्यश्चाग्निरिन्द्रश्च सर्वे यूयं सजोषसः संगताः सन्तः पवमानस्य सोमस्य स्वाहाकृतिं स्वाहाकारं आगत प्रत्यागच्छत ॥ ११ ॥

॥ इति षष्ठस्य सप्तमे पंचविंशोवर्गः ॥ २५ ॥

मन्द्रयेति नवर्चं षष्ठं सूक्तं काश्यपस्यासितस्य देवलस्यार्षं गायत्रं पवमानसोमदेवताकं ।

तत्र प्रथमा–

मन्द्रयांसोमधारंयावृषांपवस्वदेवयुः। अव्योवारेष्वस्मयुः ॥ १ ॥

मन्द्रयां। सोम। धारंया। वृषां। पवस्व।
देवऽयुः। अव्यः। वारेषु। अस्मऽयुः ॥ १ ॥

हे सोम वृषा कामानां वर्षिता देवयुर्देवकामः अस्मयुरस्मत्कामश्च अव्यः अवेर्वारेषु वालेषु दशापवित्रे मन्द्रया मदकरया धारया पवस्व क्षर ॥ १ ॥

अथ द्वितीया–

अभित्यंमद्यंमदमिन्दविन्द्रइतिक्षर। अभिवाजिनोअर्वतः ॥ २ ॥

अभि। त्यम्। मद्यम्। मदम्। इन्दो इति।
इन्द्रः। इति। क्षर। अभि। वाजिनः। अर्वतः ॥ २ ॥

हे इन्दो सोम त्वं इन्द्रईश्वरइतिकृत्वा त्यं तं मद्यं मदकरं मदं रसं अभिक्षर वर्ष। वाजिनोबलवतः अर्वतोश्वांश्चास्मदर्थं अभिक्षरेत्यर्थः ॥ २ ॥

अथ तृतीया–

अभित्यंपूर्व्यंमदंसुवानोअर्षपवित्रआ। अभिवाजमुतश्रवः ॥ ३ ॥

अभि। त्यम्। पूर्व्यम्। मदम्। सुवानः। अर्ष। पवित्रे।
आ। अभि। वाजम्। उत। श्रवः ॥ ३ ॥

हे सोम सुवानोभिषूयमाणस्त्वं पूर्व्यं प्रत्नं त्यं तं प्रसिद्धं मदं मदकरं रसं पवित्रे आसमन्तादभ्यर्ष अभिगमय। वाजं बलमस्मानभ्यर्ष। उतापिच श्रवोन्नमभ्यर्ष ॥ ३ ॥

अथ चतुर्थी–

अनुंद्रप्सासइन्दंवआपोनप्रवतासरन्। पुनानाइन्द्रमाशत ॥ ४ ॥

अनु । द्रप्सासः । इन्दवः । आपः ।
न । प्रऽवता । असरन् । पुनानाः । इन्द्रम् । आशत ॥ ४ ॥

द्रप्सासोद्रुतगतयः पुनानाः क्षरन्तः इन्दवः सोमाः प्रवता प्रवणेन मार्गेण आपोन आपइव इन्द्रं अन्वसरन् अनुगच्छन्ति आशत व्याप्नुवन्तिच ॥ ४ ॥

अथ पंचमी–

यमत्यमिववाजिनंमृजन्तियोषणोदश । वनेक्रीळन्तमत्यविम् ॥५॥२६॥

यम् । अत्यम्ऽइव । वाजिनम् । मृजन्ति । योषणः ।
दश । वने । क्रीळन्तम् । अतिऽअविम् ॥ ५ ॥ २६ ॥

अत्यविं दशापवित्रमतिक्रम्य वनेरण्ये क्रीळन्तं वर्तमानं यं सोमं दशसंख्याका योषणः स्त्रियः अंगुलयइत्यर्थः । तथाच निगमान्तरं–तमीमण्वीःसमर्यआगृभ्णन्तियोषणोदशेति । वाजिनं बलिनमत्यमिव अश्वमिव मृजन्ति पवित्रयन्ति उत्तरयासहान्वयः ॥ ५ ॥

॥ इति पष्ठस्य सप्तमे पड्विंशोवर्गः ॥ २६ ॥

अथ षष्ठी–

तंगोभिर्वृषणंरसंमदायदेववीतये । सुतंभरायसंसृज ॥ ६ ॥

तम् । गोभिः । वृषणम् । रसम् । मदाय ।
देवऽवीतये । सुतम् । भराय । सम् । सृज ॥ ६ ॥

वृषणं कामानांवर्षितारं देववीतये देवानां पानाय सुतमभिषुतं तं रसं भराय संग्रामाय गोभिः पयोभिः संसृज संयोजय ॥ ६ ॥

अथ सप्तमी–

देवोदेवायधारयेन्द्रायपवतेसुतः । पयोयदस्यपीपयत् ॥ ७ ॥

१ ऋ० सं० ६. ७. १७. ।

देवः । देवाय॑ । धार॑या । इन्द्रा॑य । पवते ।
सुतः । पयः॑ । यत् । अस्य । पीपय॑त् ॥ ७ ॥

देवाय द्योतमानायेन्द्राय सुतोभिषुतो देवोद्योतमानः सोमोधारया पवते । क्षरति यद्यस्मा- दस्यसोमस्य पयः पीपयत् इन्द्रमाप्यायितवत् तस्माद्धारया पवतइत्यर्थः ॥ ७ ॥

अथाष्टमी–

आत्मायज्ञस्यरंह्यासुष्वाणःपवतेसुतः । प्रत्नंनिपातिकाव्य॑म् ॥८॥

आत्मा । यज्ञस्य॑ । रंह्या॑ । सुष्वानः ।
पवते । सुतः । प्रत्नम् । नि । पाति । काव्य॑म् ॥ ८ ॥

यज्ञस्यात्मा आत्मभूतः सुतोभिषुतः सोमः सुष्वाणः यजमानेभ्यः कामान् प्रेरयन् रंह्या वेगेन पवते क्षरति प्रत्नं पुरातनं काव्यमात्मनः कवित्वं च निपाति अभिरक्षति ॥ ८ ॥

अथ नवमी–

एवापुनानइन्द्रयुर्मदंमदिष्ठवीतये । गुहाचिद्दधिषेगिरः ॥९॥२७॥

एव । पुनानः । इन्द्रऽयुः । मद॑म् । मदिष्ठ ।
वीतये॑ । गुहा॑ । चित् । दधिषे । गिरः॑ ॥ ९ ॥ २७॥

हे मदिष्ठ अतिशयेन मदकर सोम इन्द्रयुरिन्द्रकामस्त्वं वीतये इन्द्रस्य पानाय एव एवं मदं पुनानः क्षरन् गुहा गुहायां यज्ञशालायामित्यर्थः गिरश्चित् शब्दानपि दधिषे अभिषववे- लायां उपरवेषु धारयसि करोषीत्यर्थः ॥ ९ ॥

॥ इति षष्ठस्य सप्तमे सप्तविंशोवर्गः ॥ २७ ॥

असृग्रमिति नवर्चं सप्तमं सूक्तं । असृग्रमित्यनुक्रान्तं । असितोदेवलोवाऋषिः । तौच क- श्यपगोत्रजौ । गायत्रंछन्दः । पवमानसोमोदेवता । उक्तोविनियोगः ।

तत्रप्रथमा–

असृग्रमिन्दवःपथाधर्मन्नृतस्यसुश्रियः । विदानाअस्ययोजनम् ॥१॥

अस॑ग्रम् । इन्द॑वः । प॒था । धर्म॑न् । ऋ॒तस्य॑ ।
सु॒ऽश्रियः॑ । वि॒दा॒नाः । अ॒स्य॒ । योज॑नम् ॥ १ ॥

सुश्रियः शोभनश्रयणा अस्येन्द्रस्य योजनं संबन्धं विदाना जानन्तइन्दवः सोमाः धर्मन् कर्मणि ऋतस्य यज्ञस्य पथा मार्गेण असृग्रं हविर्धानाः सृज्यन्ते ॥ १ ॥

अथ द्वितीया—

प्रधारामध्वोअग्रियोमहीरपोविगाहते । हविर्हविष्षुवन्द्यः ॥ २ ॥

प्र । धारा॑ । मध्वः॑ । अ॒ग्रि॒यः । म॒हीः । अ॒पः ।
वि । गा॒ह॒ते॒ । ह॒विः । ह॒विष्षु॑ । वन्द्यः॑ ॥ २ ॥

हविःषु हविषांमध्ये वंद्यः स्तुत्योहविः हविरात्मकोमः सोमो महीर्महतीरपोवसतीवरीर्विगाहते तस्य मध्वः सोमस्य अग्रियो मुख्याधाराः प्रपतन्तीत्यर्थः ॥ २ ॥

अथ तृतीया—

प्रयुजोवाचोअग्रियोवृषावचक्रदद्वने । सद्माभिसत्योअध्वरः ॥३॥

प्र । युजः॑ । वा॒चः । अ॒ग्रि॒यः । वृषा॑ । अव॑ ।
च॒क्र॒द॒त् । वने॑ । सद्म॑ । अ॒भि । स॒त्यः । अ॒ध्व॒रः ॥ ३ ॥

एतदेव दर्शयति वृषाकामानां वर्षकः सत्यः सत्यभूतः अध्वरोहिंसावर्जितः अग्रियोमुख्यः सोमः सद्म यज्ञगृहमभि प्रति वने उदके युजोयुक्ताः वाचोवाणीः प्रावचक्रदद् अवक्रंदति शब्दान् करोतीत्यर्थः ॥ ३ ॥

अथ चतुर्थी—

परियत्काव्याकविर्नृम्णावसानोअर्षति । स्वर्वाजीसिषासति ॥४॥

परि॑ । यत् । काव्या॑ । क॒विः । नृम्णा॑ । वसा॑नः ।
अर्ष॑ति । स्वः॑ । वा॒जी । सि॒षा॒स॒ति॒ ॥ ४ ॥

कविः क्रान्तकर्मा सोमो नृम्णा धनानि वसानः आच्छादयन् स्तोतॄणां काव्या काव्यानि कविकर्माणि स्तोत्राणि यद्यदा पर्येषति परिगच्छति तदा स्वः स्वर्गे वाजीबलवानन्नवानेन्द्रः सिषासति यागं प्रत्यागन्तुं स्वकीयं बलं संभक्तुमिच्छति ॥ ४ ॥

अथ पञ्चमी–

पवमानोअभिस्पृधोविशोराजेवसीदति । यदीमृण्वन्तिवेधसः॥५॥२८॥

पवमानः । अभि । स्पृधः । विशः । राजाऽइव ।
सीदति । यत् । ईम् । ऋण्वन्ति । वेधसः ॥ ५ ॥ २८ ॥

यद्यदा ईमेनं सोमं वेधसः कर्मणां कर्तारः ऋण्वन्ति प्रेरयन्ति तदा पवमानः क्षरन्नेषसोमः स्पृधः स्पर्धमानान् यागविघ्नकारिणोराक्षसान् विशः स्पर्धमानान् मनुष्यान् राजेव यथा राजा तद्वदभिसीदति नाशयितुमभिगच्छति ॥ ५ ॥

॥ इति पञ्चस्य सप्तमेऽष्टाविंशोवर्गः ॥ २८ ॥

अथ षष्ठी–

अव्योवारेपरिप्रियोहरिर्वनेषुसीदति । रेभोवनुष्यतेमती ॥ ६ ॥

अव्यः । वारे । परि । प्रियः । हरिः । वनेषु ।
सीदति । रेभः । वनुष्यते । मती ॥ ६ ॥

हरिर्हरितवर्णः प्रियोदेवानां प्रियतमएवसोमो वनेषूदकेषु संपृक्तः अव्यः अवेः वारे वालोपेते परिसीदति निषीदति । किंच रेभोभिषववेलायां उपरवेषु शब्दं कुर्वन् मती मत्या स्तुत्या वनुष्यते सेव्यते ॥ ६ ॥

अथ सप्तमी–

सवायुमिन्द्रमश्विनासाकंमदेनगच्छति । रणायोअस्यधर्मभिः॥७॥

सः । वायुम् । इन्द्रम् । अश्विना । साकम् ।
मदेन । गच्छति । रणं । यः । अस्य । धर्मऽभिः ॥ ७ ॥

योयजमानोस्यसोमस्य धर्मभिः कर्मभिः क्रयणाभिषवादिभिः रण रमते सयजमानो वायुमिन्द्रंच अश्विना अश्विनौच मदेन साकं सह गच्छति प्राप्नोति ॥ ७ ॥

अथाष्टमी–

आमित्रावरुणाभगंमध्वंःपवन्तऊर्मयंः । विदानाअंस्यशक्मंभिः ॥८॥

आ । मित्रावरुणा । भगंम् । मध्वंः । पवन्ते । ऊर्मयंः ।
विदानाः । अस्य । शक्मंऽभिः ॥ ८ ॥

येषां यजमानानां मध्वः सोमस्योर्मयस्तरंगाः मित्रावरुणा मित्रावरुणौ देवौ भगं भगाख्यं देवं च प्रति पवन्ते क्षरन्ति । ते यजमानाः अस्य सोमस्य इमं सोमं विदाना जानन्तः शक्मभिः सुखैः संगच्छन्तइति शेषः ॥ ८ ॥

अथ नवमी–

अस्मभ्यंरोदसीरयिंमध्वोवाजंस्यसातये । श्रवोवसूंनिसंजितम् ॥९॥२९॥

अस्मभ्यम् । रोदसी इति । रयिम् । मध्वंः । वाजंस्य ।
सातये । श्रवंः । वसूंनि । सम् । जितम् ॥ ९ ॥ २९ ॥

हे रोदसी द्यावापृथिव्यौ युवां मध्वोदेवानां मोदयितुर्वाजस्य सोमात्मकस्यान्नस्य सातये लाभाय अस्मभ्यं काश्यपासितेभ्यः काश्यपदेवलेभ्योवा रयिं धनं श्रवोन्नंच वसूनि वासकान्यन्यान्यपि पश्वादीनि धनानि संजितं संजयतं प्रयच्छतमित्यर्थः ॥ ९ ॥

॥ इति षष्ठस्य सप्तमे एकोनत्रिंशोवर्गः ॥ २९ ॥

एते सोमाइति नवर्चं अष्टमं सूक्तं ऋष्याद्याः पूर्ववत् । अनुक्रान्तंच–एते सोमाइति । उक्तः सूक्तविनियोगः । ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे सोमेघृज्यमाने मृजन्तित्वेत्येषा । सूत्रितंच–अथापरमभिरूपं कुर्यादिति गाणगारिराप्यायस्वसमेतुवइति तिस्रो मृजन्तित्वादशक्षिपइति ।

तत्र प्रथमा–

एतेसोमांअभिप्रियमिन्द्रंस्यकामंमक्षरन् । वर्धन्तोअस्यवीर्यम् ॥१॥

एते । सोमाः । अभि । प्रियम् । इन्द्रस्य । कामम् ।
अक्षरन् । वर्धन्तः । अस्य । वीर्यम् ॥ १ ॥

एते अभिषुता इमे सोमाः अस्येन्द्रस्य वीर्यं शक्तिं वर्धन्तो वर्धयन्त इन्द्रस्य कामं काम्यं प्रियं प्रीतिकरं रसं अभ्यक्षरन् अभिपवन्ते अभ्यवर्षन् ॥ १ ॥

अथ द्वितीया—

पुनानासश्चमूषदोगच्छन्तोवायुमश्विना । तेनोधान्तुसुवीर्यम् ॥२॥

पुनानासः । चमूऽसदः । गच्छन्तः । वायुम् ।
अश्विना । ते । नः । धान्तु । सुऽवीर्यम् ॥ २ ॥

ते प्रसिद्धाः सोमाः पुनानासः पुनानाः अभिपूयमाणाः चमूषदः चमसेषु सीदन्तो वायुमश्विना अश्विनौ च गच्छन्तः प्राप्नुवन्तो नोस्मभ्यं सुवीर्यं शोभनवीर्यं धान्तु धारयन्तु प्रयच्छन्त्वित्यर्थः ॥ २ ॥

अथ तृतीया—

इन्द्रस्यसोमराधसेपुनानोहार्दिचोदय । ऋतस्ययोनिमासदम् ॥३॥

इन्द्रस्य । सोम । राधसे । पुनानः । हार्दि । चोदय ।
ऋतस्य । योनिम् । आऽसदम् ॥ ३ ॥

हे सोम पुनानोभिपूयमाणो हार्दि अभिलषितस्त्वं इन्द्रस्य राधसे संराधनाय ऋतस्य यज्ञस्य योनिं स्थानं आसदं यथेन्द्र आसीदति तथेन्द्रं चोदय प्रेरय ॥ ३ ॥

अथ चतुर्थी—

मृजन्तित्वादशक्षिपोहिन्वन्तिसप्तधीतयः । अनुविप्राअमादिषुः ॥४॥

मृजन्ति । त्वा । दश । क्षिपः । हिन्वन्ति । सप्त । धीतयः ।
अनु । विप्राः । अमादिषुः ॥ ४ ॥

हे सोम त्वा त्वां दश दशसंख्याकाः क्षिपोंगुलयः। क्षिशः क्षिप इत्यंगुलिनामसुपाठात्। सृजन्ति परिचरन्ति सप्त सप्तसंख्याकाः धीतयो होत्रकाश्च त्वां हिन्वन्ति स्वस्वव्यापारैः प्रीणयन्ति विप्रामेधाविनश्च त्वामन्वमादिषुः अनुमादयन्ति ॥ ४ ॥

अथ पञ्चमी–

देवेभ्यस्त्वामदायकंसृजानमतिमेष्यः। संगोभिर्वासयामसि॥५॥३०॥

देवेभ्यः। त्वा। मदाय। कम्। सृजानम्। अति।

मेष्यः। सम्। गोभिः। वासयामसि ॥ ५ ॥ ३० ॥

हे सोम मेष्यः अवेर्लोमानि कं उदकं च अतिसृजानं त्वा त्वां देवेभ्यो देवानां विभक्तिव्यत्ययः मदाय मदार्थं गोभिर्गोविकारैः पयोभिः संवासयामसि संवासयामः ॥ ५ ॥

॥ इति पञ्चस्य सप्तमे त्रिंशोवर्गः ॥ ३० ॥

अथ षष्ठी–

पुनानःकलशेष्वावस्त्राण्यरुपोहरिः। परिगव्यान्यव्यत ॥ ६ ॥

पुनानः। कलशेषु। आ। वस्त्राणि। अरुषः। हरिः।

परि। गव्यानि। अव्यत ॥ ६ ॥

पुनानः पूयमानः कलशेषु कुंभेषु निषिच्यमानः अरुषः आरोचमानः हरिर्हरितवर्णः सोमोगव्यानि दध्यादीनि वस्त्राणि वासांसीव पर्यव्यत पर्याच्छादयति ॥ ६ ॥

अथ सप्तमी–

मघोनआपवस्वनोजहिविश्वाअपद्विषः। इन्दोसखायमाविश ॥७॥

मघोनः। आ। पवस्व। नः। जहि। विश्वाः। अप।

द्विषः। इन्दो इति। सखायम्। आ। विश ॥ ७ ॥

हे इन्दो सोम मघोनो धनवतोनोस्मान् प्रत्यापवस्व क्षर। विश्वा विश्वान् द्विषोद्वेष्टृन् अपजहि मारयच सखायं प्रियमिन्द्रं आविश आमुहिच ॥ ७ ॥

अथाष्टमी—

वृष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याअधि।सहोनःसोमपृत्सुधाः॥८॥

वृष्टिम्। दिवः। परि। स्रव। द्युम्नम्। पृथिव्याः। अधि।
सहः। नः। सोम। पृत्ऽसु। धाः॥ ८॥

हे सोम त्वं दिवोद्युलोकाद्वृष्टिं वर्षं परिस्रव वर्ष। पृथिव्याअधि पृथिव्यां। अधिः सप्तम्यर्थानुवादी। द्युम्नमन्नं चोत्पादयेतिशेषः। नोस्माकं सहोबलंच पृत्सु संग्रामेषु धाः धेहि॥८॥

अथ नवमी—

नृचक्षसंत्वावयमिन्द्रपीतंस्वर्विदम्। भक्षीमहिप्रजामिषम्॥९॥३१॥

नृऽचक्षसम्। त्वा। वयम्। इन्द्रऽपीतम्। स्वःऽविदम्।
भक्षीमहि। प्रऽजाम्। इषम्॥ ९॥ ३१॥

हे सोम नृचक्षसं नृणां द्रष्टारं स्वर्विदं सर्वज्ञं इन्द्रपीतं इन्द्रेण पीतं त्वा त्वां पिबन्तोवयं काश्यपासिताः काश्यपादेवलावा प्रजां पुत्रादिकामिषमन्नंच भक्षीमहि भजेमहि॥ ९॥

॥ इति षष्ठस्य सप्तमे एकत्रिंशोवर्गः॥ ३१॥

परिप्रियेति नवर्चं नवमं सूक्तं ऋष्याद्याः पूर्ववत्।परिप्रियेत्यनुक्रान्तं।उक्तोविनियोगः।

तत्र प्रथमा—

परिप्रियादिवःकविर्वयांसिनप्त्योर्हितः।सुवानोयातिकविक्रतुः॥१॥

परि। प्रिया। दिवः। कविः। वयांसि। नप्त्योः। हितः।
सुवानः। याति। कविऽक्रतुः॥ १॥

कविर्मेधावी कविक्रतुः क्रान्तप्रज्ञः क्रान्तकर्मा वा सोमो नप्त्योरधिषवणफलकयोर्हितोनिहितः सुवानोभिषूयमाणो दिवोद्युलोकस्य परिप्रिया अतिप्रियाणि वयांसि ग्राव्णः तथा चमंत्रवर्णः—वयांसिश्येनाअनिभयः पर्वतानांककुभइति। याति गच्छति॥ १॥

अथ द्वितीया–

प्रप्रक्षयायपन्यसेजनायजुष्टोअद्रुहे । वीत्यर्षचनिष्ठया ॥ २ ॥

प्रऽप्र । क्षयाय । पन्यसे । जनाय । जुष्टः । अद्रुहे ।
वीती । अर्ष । चनिष्ठया ॥ २ ॥

हे सोम मम अत्यन्तं क्षयाय तव निवासभूताय अद्रुहे अद्रोग्धेच पन्यसे स्तोत्रे जनाय मनुष्याय वीती वीत्यै भक्षणाय जुष्टः पर्याप्तस्त्वं चनिष्ठया अन्नवत्तमया धारया अर्ष यागं प्रतिगच्छ ॥ २ ॥

अथ तृतीया–

ससूनुर्मातराशुचिर्जातोजातेअरोचयत् । महान्महीऋतावृधा॥३॥

सः । सूनुः । मातरा । शुचिः । जातः । जाते इति ।
अरोचयत् । महान् । मही इति । ऋतऽवृधा ॥ ३ ॥

जातउत्पन्नः शुचिर्विशुद्धोमहान् हविरुत्तमः ससोमाख्यः सूनुः पुत्रो मही महत्यौ ऋतावृधा यज्ञस्यवर्धयित्र्यौ जाते विश्वस्यजनयित्र्यौ मातरा आत्मनोमातरौ द्यावापृथिव्यावरोचयत् रोचयति दीपयति ॥ ३ ॥

अथ चतुर्थी–

ससप्तधीतिभिर्हितोनद्योअजिन्वदद्रुहः । याएकमक्षिवावृधुः॥४॥

सः । सप्त । धीतिऽभिः । हितः । नद्यः । अजिन्वत् ।
अद्रुहः । याः । एकम् । अक्षि । ववृधुः ॥ ४ ॥

याः नद्योयमेकं मुख्यं सोमं अक्षि अक्षीणं ववृधुः वर्धयन्ति ससोमो धीतिभिरंगुलिभिः । रशना धीतय इत्यंगुलिनामसुपाठात् । हितो निहितःसन् अद्रुहो द्रोहवर्जिताः सप्त सप्तसंख्याकानद्योनदीः अजिन्वत् प्रीणयति ॥ ४ ॥

अथ पञ्चमी–

ताअभिसन्तमस्तृतंमहेयुवानमादधुः । इन्दुमिन्द्रतवव्रते॥५॥३२॥

ताः । अभि । सन्तम् । अस्तृतम् । महे । युवानम् ।
आ । दधुः । इन्दुम् । इन्द्र । तव । व्रते ॥ ५ ॥ ३२ ॥

हे इन्द्र तव त्वदीये व्रते कर्मणि ता अंगुल्यः । पूर्वत्र धीतयइत्यंगुलीनामुपात्तत्वात्तच्छब्देनपरामर्शः । सन्तं विद्यमानं अस्तृतमहिंसितं युवानं नित्यतरुणं इन्दुं सोमं महे महते अभिषवादिलक्षणाय कर्मणे अभ्यादधुः ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे द्वात्रिंशोवर्गः ॥३२॥

अथ षष्ठी—

अभिवह्निरमर्त्यःसप्तपश्यतिवावहिः । क्रिविर्देवीरतर्पयत् ॥ ६ ॥

अभि । वह्निः । अमर्त्यः । सप्त । पश्यति । वावहिः ।
क्रिविः । देवीः । अतर्पयत् ॥ ६ ॥

योवह्निः यज्ञस्य धुरोवोढा अमर्त्यो मरणरहितो वावहिः देवानां तृप्तेरत्यन्तं वोढाच सोमः सप्तनदीः अभिपश्यति सोयं क्रिविः कूपरूपेण पूर्णोवस्थितःसन् देवीर्नदीरतर्पयत् तर्पयति ॥६॥

अथ सप्तमी—

अवाकल्पेषुनःपुमस्तमांसिसोमयोध्या । तानिपुनानजङ्घनः ॥७॥

अव । कल्पेषु । नः । पुमः । तमांसि । सोम । योध्या ।
तानि । पुनान । जङ्घनः ॥ ७ ॥

हे पुमः पुमन् सोमकल्पेषु कल्पनीयेषु अहःसु नोस्मानव रक्ष । अपिच पुनान हे पवमान सोम त्वं योध्या योधनीयानि तमांसि रक्षांसि यानि तानि जंघनः नाशय ॥ ७ ॥

अथाष्टमी—

नूनव्यसेनवीयसेसूक्तायसाधयापथः । प्रत्नवद्रोचयारुचः ॥ ८ ॥

नु । नव्यसे । नवीयसे । सुऽउक्ताय । साधय । पथः ।
प्रत्नऽवत् । रोचय । रुचः ॥ ८ ॥

हे सोम नव्यसे नव्याय नूतनाय नवीयसे स्तुत्याय अस्माकं सूक्ताय पथोमार्गान् नु क्षिप्रं साधय अभिगच्छ। अपिच प्रत्नवत् यथा पूर्वं रुचः स्वदीप्तीरोचय प्रकाशय ॥ ८ ॥

अथ नवमी–

पवमानमहिश्रवोगामश्वंरासिवीरवत्। सनामेधांसनास्वः ॥९॥३३॥

पवमान। महि। श्रवः। गाम्। अश्वम्। रासि।
वीरऽवत्। सनं। मेधाम्। सनं। स्वः१रिति स्वः ॥ ९ ॥ ३३ ॥

हे पवमान सोम यस्त्वं वीरवत् पुत्रवत् महि महत् श्रवोन्नं गां चाश्वं च रासि अस्मभ्यं प्रयच्छसि। सत्वं मेधां सनोस्मभ्यं प्रयच्छ। अपिच स्वः यदस्मदभिलषितं तत्सर्वं सन देहि ॥ ९ ॥

॥ इति षष्ठस्य सप्तमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

प्रस्वानासइति नवर्चं दशमं सूक्तं ऋष्याद्याः पूर्ववत् प्रस्वानासइत्यनुक्रान्तं। विनियोगउक्तः।

तत्र प्रथमा–

प्रस्वानासोरथाइवार्वन्तोनश्रवस्यवः। सोमासोरायेअक्रमुः ॥ १ ॥

प्र। स्वानासः। रथाःऽइव। अर्वन्तः। न। श्रवस्यवः।
सोमासः। राये। अक्रमुः ॥ १ ॥

प्रस्वानासोभिषववेलायां उपरवेषु शब्दंकुर्वन्तः सोमासः सोमाः रथाइव यथाशब्दं कुर्वन्तोरथाः अर्वन्तोन यथा शब्दंकुर्वन्तोश्वाः तथा श्रवस्यवः शत्रुभ्योन्नमिच्छन्तो राये यजमानानां धनाय अक्रमुः आगच्छन् ॥ १ ॥

अथ द्वितीया–

हिन्वानासोरथाइवदधन्विरेगभस्त्योः। भरासःकारिणामिव ॥ २ ॥

हिन्वानासः। रथाःऽइव। दधन्विरे। गभस्त्योः।
भरासः। कारिणाम्ऽइव ॥ २ ॥

सोमा रथाइव यथारथास्तथा हिन्वानासो हिन्वाना यागदेशंप्रति गच्छन्तोभरासोभराः कारिणामिव यथा भारवाहानां बाह्वोर्धीयन्ते तथा गभस्त्योः ऋत्विजां बाह्वोः । गभस्ती बाहूइति बाहुनामसुपाठात् । दधन्विरे धीयन्ते ॥ २ ॥

अथ तृतीया–

राजा॑नो॒नप्रश॑स्तिभि॒ःसोमा॑सो॒गोभि॑रञ्जते । य॒ज्ञोनस॒प्तधा॒तृभि॑ः ॥३॥

राजा॑नः । न । प्रश॑स्तिऽभिः । सोमा॑सः । गोभि॑ः ।
अ॒ञ्ज॒ते॒ । य॒ज्ञः । न । स॒प्त । धा॒तृऽभि॑ः ॥ ३ ॥

सोमासः सोमाः प्रशस्तिभिः प्रशस्ताभिः स्तुतिरूपाभिर्वाग्भिः राजानोन यथाराजानः सप्तधातृभिः सप्तहोत्राभिः यज्ञोन यथाच यज्ञस्तथा गोभिर्गोविकारैः पयोभिरंजते अंज्यन्ते संस्क्रियन्तइत्यर्थः ॥ ३ ॥

अथ चतुर्थी–

परि॑सुवा॒नास॒इन्द॑वो॒मदा॑यब॒र्हणा॑गि॒रा । सु॒ताअ॑र्षन्ति॒धार॑या ॥ ४ ॥

परि॑ । सु॒वा॒नास॑ः । इन्द॑वः । मदा॑य । ब॒र्हणा॑ । गि॒रा ।
सु॒ताः । अ॒र्षन्ति॒ । धार॑या ॥ ४ ॥

सुवानासः सुवानाः अभिषूयमाणाः इन्दवः सोमाः बर्हणा महत्या गिरा स्तुतिरूपया वाचा सुताअभिषुताः सन्तोमदाय मदार्थं धारया पर्यर्षन्ति परितोगच्छन्ति ॥ ४ ॥

अथ पंचमी–

आ॒पा॒नासो॑वि॒वस्व॑तो॒जन॑न्तउ॒षसो॒भग॑म् । सूरा॒अण्वं॒वित॑न्वते ॥५॥३४॥

आ॒पा॒नास॑ः । वि॒वस्व॑तः । जन॑न्तः । उ॒षस॑ः । भग॑म् । सूरा॑ः ।
अण्व॑म् । वि । त॒न्व॒ते॒ ॥ ५ ॥ ३४ ॥

विवस्वत इन्द्रस्य आपानासः आपानभूता उषसोभगं जनन्तो जनयन्तः सूराः सरन्तः सोमाः अण्वं वितन्वते अभिषववेलायामुपरवेषु शब्दं कुर्वन्ति ॥ ५ ॥

॥ इति पञ्चस्य सप्तमे चतुस्त्रिंशोवर्गः ॥ ३४ ॥

अथ षष्ठी—

अपद्वारांमतीनांप्रत्नाऋण्वन्तिकारवः । वृष्णोहरंसआयवः ॥ ६॥

अपं । द्वारा । मतीनाम् । प्रत्नाः । ऋण्वन्ति । कारवः ।
वृष्णः । हरंसे । आयवः ॥ ६ ॥

मतीनां स्तुतीनां कारवः कर्तारः ऋत्विजः प्रत्नाः पुराणाः वृष्णः सेचकस्य सोमस्य हरसे हरसः आहर्तारश्च आयवोमनुष्याः द्वारा यज्ञस्य द्वाराणि अपऋण्वंति ॥ ६ ॥

अथ सप्तमी—

समीचीनासआसतेहोतारःसप्तजामयः । पदमेकस्यपिप्रतः ॥ ७॥

सम्ऽईचीनासः । आसते । होतारः । सप्तऽजामयः ।
पदम् । एकस्य । पिप्रतः ॥ ७ ॥

समीचीनासः समीचीनाः जामयो जामिसदृशाः एकस्य सोमस्य पदं स्थानं पिप्रतः पूरयन्तः सप्तहोतारः सप्तहोत्रकाः आसते यज्ञे उपविशन्ति ॥ ७ ॥

अथाष्टमी—

नाभानाभिंनआददेचक्षुश्चित्सूर्येसचा । कवेरपत्यमादुहे ॥ ८ ॥

नाभा । नाभिम् । नः । आ । ददे । चक्षुः । चित् । सूर्ये ।
सचा । कवेः । अपत्यम् । आ । दुहे ॥ ८ ॥

नाभिं यज्ञस्य नाभिभूतं सोमं नोस्माकं नाभा नाभौ अहमाददे पिबामीत्यर्थः । पीतसोमानां अस्माकं चक्षुश्चित् चक्षुरपि सूर्ये सचा संगतं भवति । किंच कवेः क्रान्तकर्मणः सोमस्य अपत्यं अंशुं आदुहे आपूरयामि ॥ ८ ॥

अथ नवमी—

अभिप्रियादिवस्पदमध्वर्युभिर्गुहाहितम् । सूरःपश्यतिचक्षसा॥९॥३५

अभि । प्रिया । दिवः । पदम् । अध्वर्युऽभिः । गुहा ।
हितम् । सूरः । पश्यति । चक्षसा ॥ ९ ॥ ३५ ॥

सूरः सुवीर्यइन्द्रः चक्षसा चक्षुषा दिवोदीप्तस्यात्मनः प्रिया प्रियं पदं अध्वर्युभिः गुहा गुहायां हृदये हितं निहितं पीतं सोममभि पश्यति ॥ ९ ॥

॥ इति पष्ठस्य सप्तमे पंचत्रिंशोवर्गः ॥ ३५ ॥

उपास्माइति नवर्चं एकादशं सूक्तं ऋष्याद्याः पूर्ववत् । उपास्माइत्यनुक्रान्तं । उक्तः सूक्तविनियोगः । अभिष्टवे घर्मदुघोवत्सोपवनीयमाने नमसेदुपेत्येषा । सूत्रितंच—नमसेदुपसीदतसंजानाना उपसीदन्नभिस्विति ।

तत्र प्रथमा—

उपास्मैगायतानरःपवमानायेन्दवे । अभिदेवाँइयक्षते ॥ १ ॥

उप । अस्मै । गायत । नरः । पवमानाय । इन्दवे ।
अभि । देवान् । इयक्षते ॥ १ ॥

हे नरोनेतारो यज्ञस्य देवानिन्द्रादीन् अभीयक्षते आभिमुख्येन यष्टुमिच्छति पवमानाय क्षरते अस्माअभिषूयमाणायेन्दवे सोमाय उपगायत उपगानं कुरुत ॥ १ ॥

अथ द्वितीया—

अभितेमधुनापयोथर्वाणोअशिश्रयुः । देवंदेवायदेवयु ॥ २ ॥

अभि । ते । मधुना । पयः । अथर्वाणः । अशिश्रयुः ।
देवम् । देवाय । देवऽयु ॥ २ ॥

हे सोम ते तव देवं देवनशीलं देवयुं देवयुं देवकामं रसं देवाय देवनशीलायेन्द्राय मधुना पयः गव्येन पयसा अथर्वाणऋषयः अभ्यशिश्रयुः अभ्यश्रीणन् समस्कुर्वन्नित्यर्थः ॥२॥

अथ तृतीया—

सनःपवस्वशंगवेशंजनायशमर्वते । शंराजन्नोषधीभ्यः ॥ ३ ॥

सः । नः । पवस्व । शम् । गवे । शम् । जनाय । शम् । अर्वते ।
शम् । राजन् । ओषधीभ्यः ॥ ३ ॥

हे राजन् दीप्यमान सोम सःप्रसिद्धस्त्वं नोस्मकं गवे शं सुखं पवस्व क्षर। जनाय पुत्रादये च शं पवस्व । अर्वतेश्वायच शं पवस्व । ओषधीभ्यश्च शं पवस्व ॥ ३ ॥

अथ चतुर्थी–

बभ्रवेनुस्वतंवसेरुणायदिविस्पृशे । सोमायगाथमंर्चत ॥ ४ ॥

बभ्रवे । नु । स्वऽतंवसे । अरुणाय । दिविऽस्पृशे ।
सोमाय । गाथम् । अर्चत ॥ ४ ॥

हे स्तोतारः बभ्रवे बभ्रुवर्णाय स्वतवसे स्वबलाय अरुणाय कदाचिदरुणवर्णाय दिविस्पृशे दिवं स्पृशते सोमाय नु क्षिप्रं गाथं स्तुतिरूपां वाचं अर्चत उच्चारयतेत्यर्थः ॥ ४ ॥

अथ पंचमी–

हस्तंच्युतेभिरद्रिभिःसुतंसोमंपुनीतन । मधावाधांवतामधु ॥५॥३६॥

हस्तंऽच्युतेभिः । अद्रिऽभिः । सुतम् । सोमम् । पुनीतन ।
मधौ । आ । धावत । मधु ॥ ५ ॥ ३६ ॥

हे ऋत्विजः हस्तच्युतेभिः हस्तप्रच्युतैः अद्रिभिः अभिषवग्रावभिः सुतमभिषुतं सोमं पुनीतन पवित्रे पावयत । अपिच मधौ मदकरे सोमे मधु गव्यं पयआधावत प्रक्षिपत ॥ ५ ॥

॥ इति षष्ठस्य सप्तमे षट्त्रिंशोवर्गः ॥ ३६ ॥

अथ षष्ठी–

नमसेदुपसीदतदध्नेदभिश्रीणीतन । इन्दुमिन्द्रेदधातन ॥ ६ ॥

नमसा । इत् । उप । सीदत । दध्ना । इत् । अभि ।
श्रीणीतन । इन्दुम् । इन्द्रे । दधातन ॥ ६ ॥

हे ऋत्विजो नमसेत् नमस्कारेणैव उपसीदत सोममुपगच्छत । दध्नेत् दध्नैव अभिश्रीणीतन अभिश्रीणीत । इन्द्रे इन्दुं सोमं दधातन धत्तच ॥ ६ ॥

अथ सप्तमी–

अमित्रहाविचर्षणिःपवस्वसोमशंगवे । देवेभ्योअनुकामकृत् ॥७॥

अमित्रऽहा । विऽचर्षणिः । पर्वस्व । सोम ।
शम् । गवे । देवेभ्यः । अनुकामऽकृत् ॥ ७ ॥

हे सोम अमित्रहा अमित्राणां हन्ता विचर्षणिः विद्रष्टा देवेभ्यः अनुकामकृत् अभीष्टस्य कर्ता त्वं गवेस्माकं शं सुखं पवस्व क्षर ॥ ७ ॥

अथाष्टमी–

इन्द्रायसोमपातवेमदायपरिषिच्यसे । मनश्चिन्मनसस्पतिः ॥ ८ ॥

इन्द्राय । सोम । पातवे । मदाय । परि । सिच्यसे ।
मनःऽचित् । मनसः । पतिः ॥ ८ ॥

हे सोम मनश्चित् मनसोज्ञाता मननस्पतिः ईश्वरः त्वमिन्द्राय इन्द्रस्य पातवे पानाय मदायच परिषिच्यसे परितः पात्रेषु सिच्यसे ॥ ८ ॥

अथ नवमी–

पवमानसुवीर्यंरयिंसोमरिरीहिनः । इन्दविन्द्रेणनोयुजा ॥ ९ ॥ ३७ ॥

पवमान । सुऽवीर्यम् । रयिम् । सोम । रिरीहि । नः ।
इन्दो इति । इन्द्रेण । नः । युजा ॥ ९ ॥ ३७ ॥

हे इन्दो क्लियमान पवमान सोम त्वं सुवीर्यं शोभनवीर्योपेतं रयिं धनं नोस्माकं संबन्धिना इन्द्रेण युजा सहायेन नोस्मभ्यं रिरीहि देहि ॥ ९ ॥

॥ इति षष्ठस्य सप्तमे सप्तत्रिंशोवर्गः ॥ ३७ ॥

सोमाअसृग्रमिति नवर्चं द्वादशं सूक्तं काश्यपाद्याः पूर्ववत् । सोमाअसृग्रमित्यनुक्रान्तं । उक्तोविनियोगः ।

तत्र प्रथमा–

सोमाअसृग्रमिन्दवःसुताऋतस्यसादने । इन्द्रायमधुमत्तमाः ॥ १ ॥

सोमाः । असृग्रम् । इन्दवः । सुताः । ऋतस्य । सदने ।
इन्द्राय । मधुमत्ऽतमाः ॥ १ ॥

सुताः अभिषुताः मधुमत्तमाः अतिशयेन मधुमन्तः इन्दवः सोमाः ऋतस्य यज्ञस्य सादने सदने इन्द्रायेन्द्रार्थं असृग्रं सृज्यन्ते ॥ १ ॥

अथ द्वितीया–

अभिविप्राअनूषतगावोवत्संनमातरः । इन्द्रंसोमस्यपीतये ॥ २ ॥

अभि । विप्राः । अनूषत । गावः । वत्सम् । न । मातरः ।
इन्द्रम् । सोमस्य । पीतये ॥ २ ॥

विप्राः मेधाविनः सोमस्य पीतये पानाय इन्द्रं मातरोजनयित्र्योगावो वत्सं यथा वत्सं प्रति तद्वदभ्यनूषत अभिशब्दयन्ति ॥ २ ॥

अथ तृतीया–   वाणीयुक्ताः

मदच्युत्क्षेतिसादनेसिन्धोरूर्माविपश्चित् । सोमोगौरीअधिश्रितः ॥ ३ ॥

मदऽच्युत् । क्षेति । सदने । सिन्धोः । ऊर्मा । विपःऽचित् ।
सोमः । गौरी इति । अधि । श्रितः ॥ ३ ॥

मदच्युत् मदकरस्य रसस्य च्यावयिता सोमः सादने सदने । संहितायां दीर्घश्छान्दसः स्थाने क्षेति निवसति । एतदेवविवृणोति–सिन्धोर्नद्याः ऊर्मा ऊर्मौ तरंगे वसतीवरीष्वित्यर्थः । विपश्चित् विद्वान् सोमोगौरीअधि गौर्यामधि । अधोवि सप्तम्यर्थानुवादः । माध्यमिकायांवाचि । गौरी गांधर्वीति वाङ्नामसूपाठात् । श्रितोभिश्रयति ॥ ३ ॥

अथ चतुर्थी–

दिवोनाभाविचक्षणोव्योवारेमहीयते । सोमोयःसुक्रतुःकविः ॥ ४ ॥

दिवः । नाभा । विऽचक्षणः । अव्यः । वारे । महीयते ।
सोमः । यः । सुऽक्रतुः । कविः ॥ ४ ॥

यः सुक्रतुः सुप्रज्ञः कविः क्रान्तकर्मा विचक्षणोविद्रष्टा ससोमोदिवोन्तरिक्षस्य नाभा नाभौ नाभिभूते अव्यः अवेः वारे वाले महीयते पूज्यते पूयमानः स्तूयतइत्यर्थः ॥ ४ ॥

अथ पञ्चमी–

यःसोमःकलशेष्वाँअन्तःपवित्रआहितः । तमिन्दुःपरिषस्वजे॥५॥३८॥

यः । सोमः । कलशेषु । आ । अन्तरिति । पवित्रे । आऽहितः ।
तम् । इन्दुः । परि । सस्वजे ॥ ५ ॥ ३८ ॥

यः सोमः कलशेषु कुंभेषु आस्ते यश्च पवित्रे पवित्रस्यान्तर्मध्ये आहितः निहितस्तं स्वांशभूतं सोममिन्दुः सोमोदेवः परिषस्वजे प्रविशति ॥ ५ ॥

॥ इति षष्ठस्य सप्तमेऽष्टात्रिंशोवर्गः ॥ ३८ ॥

अथ षष्ठी–

प्रवाचमिन्दुरिष्यतिसमुद्रस्याधिविष्टपि । जिन्वन्कोशंमधुश्चुतम् ॥ ६॥

प्र । वाचम् । इन्दुः । इष्यति । समुद्रस्य । अधि । विष्टपि ।
जिन्वन् । कोशम् । मधुऽश्चुतम् ॥ ६ ॥

इंदुः सोमः मधुश्चुतं मधुनश्च्यावकं कोशं मेघं । असुरः कोशइति मेघनामसुपाठात् । जिन्वन् प्रीणयन् समुद्रस्यान्तरिक्षस्याधि विष्टपि विष्टब्धे स्थाने वाचं मेष्यति प्रेरयति पवित्रे पूयमानः शब्दं करोतीत्यर्थः ॥ ६ ॥

अथ सप्तमी–

नित्यस्तोत्रोवनस्पतिर्धीनामन्तःसबर्दुघः । हिन्वानोमानुषायुगा ॥७॥

नित्यऽस्तोत्रः । वनस्पतिः । धीनाम् । अन्तरिति । सबःऽदुघः ।
हिन्वानः । मानुषा । युगा ॥ ७ ॥

नित्यस्तोत्रः सन्ततस्तोत्रः सबर्दुघः अमृतस्य दोग्धा वनस्पतिः वनानांपालयिता सोमो मानुषामानुषाणि युगा युगानि अहानिकाहात्मकानि हिन्वानः प्रीणयन् धीनां कर्मणामन्तर्मध्ये निवसतीत्यर्थः ॥ ७ ॥

अथाष्टमी–

अभिप्रियादिवस्पदासोमोहिन्वानोअर्षति। विप्रस्यधारयाकविः॥८॥

अभि। प्रिया। दिवः। पदा। सोमः। हिन्वानः। अर्षति।
विप्रस्य। धारया। कविः॥ ८॥

कविः क्रान्तकर्मा सोमो दिवोन्तरिक्षात् हिन्वानः प्रेर्यमाणो विप्रस्य मेधाविनः स्वस्य धारया प्रिया प्रियाणि पदा पदानि स्थानान्यभ्यर्षति अभिगच्छति॥ ८॥

अथ नवमी–

आपवमानधारयरयिंसहस्रवर्चसम्। अस्मेइन्दोस्वाभुवम्॥९॥३९॥

आ। पवमान। धारय। रयिम्। सहस्रऽवर्चसम्।
अस्मे इति। इन्दो इति। सुऽआभुवम्॥ ९॥ ३९॥

हे पवमान इन्दो सोम त्वं सहस्रवर्चसं बहुदीप्तिं स्वाभुवं शोभनभवनं रयिं धनं अस्मे अस्मासु आधारय प्रक्षिपेत्यर्थः॥ ९॥

॥ इति षष्ठस्य सप्तमे एकोनचत्वारिंशोवर्गः॥ ३९॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ १॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके सप्तमोध्यायः॥ ७॥

॥श्रीगणेशायनमः॥

यस्यनिःश्वसितंवेदा योवेदेभ्योऽखिलंजगत्। निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥१॥
षष्ठस्य सप्तमोध्यायः संग्रहात्संप्रदर्शितः । अथाष्टमःसुमतिना संग्रमेनप्रदर्श्यते ॥ २ ॥
तत्र सोमःपुनानइति नवर्चं त्रयोदशं सूक्तं असितोदेवलोवाऋषिः सोमोदेवता । पवमानगुणः सोमोविज्ञेयः काश्यपावृषी । इतिविद्यादनुक्तेपि लाघवायाद्दह्व्यच्युताव॥१॥ सोमइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

ॐम्सोमः॑पुना॒नोअ॑र्षतिस॒हस्र॑धारो॒अत्य॑विः ।वा॒योरिन्द्र॑स्यनिष्कृ॒तम्॥१॥

सोम॑ः । पु॒ना॒नः । अ॒र्ष॒ति॒ । स॒हस्र॑ऽधारः । अति॑ऽअविः ।
वा॒योः । इन्द्र॑स्य । निः॒ऽकृ॒तम् ॥ १ ॥

अयं पुनानः पावकः सोमः अर्षति गच्छति । कीदृशोयं पवमानः सहस्रधारः अपरिमितधारः । अत्यविः अत्राविशब्देन तल्लोमान्युच्यन्ते अविलोमभिर्निष्पादितं दशापवित्रमित्यर्थः । तदतिक्रम्य गच्छतीति अत्यविः । किमर्थं वायोरिन्द्रस्य च पानायेतिशेषः । किं प्रति निष्कृतं निरित्येष तामित्येतस्मिन्नर्थे । संस्कृतं पात्रं प्रति ॥ १ ॥

अथ द्वितीया—

पव॑मानमवस्यवो॒विप्र॑म॒भिप्रगा॑यत । सु॒ष्वा॒णंदे॒ववी॑तये ॥ २ ॥

पव॑मानम् । अ॒व॒स्य॒वः॒ । विप्र॑म् । अ॒भि । प्र । गा॒य॒त॒ ।
सु॒स्वा॒नम् । दे॒वऽवी॑तये ॥ २ ॥

हे अवस्यवो रक्षणकामा उद्गात्रादयो यूयं पवमानं शोधकं विप्रंविशेषेण देवानांप्रीणयितारं विप्रवच्छुश्रूषा । अथवा विप्रइति मेधाविनाम । मेधाविनं देववीतये देवपानाय सुष्वाणं सूयमानं अभिप्रगायत आभिमुख्येन प्रकर्षेण स्तुत ॥ २ ॥

अथ तृतीया–

पवन्तेवाजसातयेसोमाःसहस्रपाजसः । गृणानादेववीतये ॥ ३ ॥

पवन्ते । वाजऽसातये । सोमाः । सहस्रऽपाजसः ।
गृणानाः । देवऽवीतये ॥ ३ ॥

पवन्ते क्षरन्ते सोमाः । किमर्थं वाजसातये अन्नस्यलाभाय । कीदृशाः सहस्रपाजसो बहुलाः पातृणां बलप्रदाइत्यर्थः । गृणानाः कर्मणिकर्तृप्रत्ययः स्तूयमानाः । पुनः किमर्थं देववीतये देवानां वीतिर्गतिः प्राप्तिर्भक्षणंवा यस्मिन् सदेववीतिर्यज्ञः तदर्थं यज्ञसिद्धिः साक्षात् प्रयोजनं तद्वारा वाजलाभइति ॥ ३ ॥

अथ चतुर्थी–

उतनोवाजसातयेपवस्वबृहतीरिषः । द्युमदिन्दोसुवीर्यम् ॥ ४ ॥

उत । नः । वाजऽसातये । पवस्व । बृहतीः । इषः । रसधाराः -
द्युऽमत् । इन्दो इति । सुऽवीर्यम् ॥ ४ ॥

उतापिच नोस्माकं वाजसातये अन्नलाभाय हे इन्दो सोम बृहतीरिषः महतीरसधाराः द्युमत् दीप्तिमत् सुवीर्यं शोभनसामर्थ्यंच पवस्व क्षर । शोभनसामर्थ्योपेताधाराः पवस्वेत्यर्थः । अथवा वाजसातये संग्रामाय बृहतीरिषो द्युमत्सुवीर्यं संपादयितुं पवस्वेति योज्यम् ॥ ४ ॥

अथ पञ्चमी–

तेनःसहस्रिणंरयिंपवन्तामासुवीर्यम् । सुवानादेवासइन्दवः ॥५॥१॥

ते । नः । सहस्रिणम् । रयिम् । पवन्ताम् । आ ।
सुऽवीर्यम् । सुवानाः । देवासः । इन्दवः ॥ ५ ॥ १ ॥

ते इन्दवः सोमाः नोस्माकं सहस्रिणं सहस्रसंख्योपेतं रयिं धनं सुवीर्यंचापवन्तां । कीदृशास्ते सुवानाः सूयमानाः देवासोद्योतनादिगुणकाः ॥ ५ ॥

॥ इति षष्ठस्याष्टमे प्रथमोवर्गः ॥ १ ॥

अथ षष्ठी—

अत्योहियानानहेतृभिरसृग्रंवाजसातये । विवारमव्यमाशवः ॥६॥

अत्याः । हियानाः । न । हेतृऽभिः । असृग्रम् ।
वाजऽसातये । वि । वारम् । अव्यम् । आशवः ॥ ६ ॥

वाजसातये संग्रामाय हियानाः प्रेर्यमाणाः अत्यान् अश्वाइव ते यथा प्रेरकैः प्रेर्यमाणाः संग्रामाय शीघ्रं धावन्ति तद्वत् हेतृभिः प्रेरकैः प्रेर्यमाणाः आशवः शीघ्रगामिनः सोमाः वाजसातये अन्नलाभाय अव्यं वारं दशापवित्रं व्यसृग्रं व्यतिसृज्यन्ते ॥ ६ ॥

अथ सप्तमी—

वाश्राअर्षन्तीन्दवोभिवत्संनधेनवः । दधन्विरेगभस्त्योः ॥ ७ ॥

वाश्राः । अर्षन्ति । इन्दवः । अभि । वत्सम् । न । धेनवः ।
दधन्विरे । गभस्त्योः ॥ ७ ॥

वाश्राः शब्दयन्तः इन्दवः सोमाः अभ्यर्षन्ति अभिगच्छन्ति पात्रंप्रति । वाश्राः शब्दकारिण्योधेनवोन वा यथा शब्दयन्त्योवत्सं प्रत्यागच्छन्ति तद्वत् तएव गभस्त्योर्बाह्वोः दधन्विरे ध्रियते च ॥ ७ ॥

अथाष्टमी—

जुष्टइन्द्रायमत्सरःपवमानकनिक्रदत् । विश्वाअपद्विषोजहि ॥८॥

जुष्टः । इन्द्राय । मत्सरः । पवमान । कनिक्रदत् ।
विश्वाः । अप । द्विषः । जहि ॥ ८ ॥

इन्द्राय जुष्टः पर्याप्तोमत्सरः सोमोभवतीतिशेषः । मत्सरः सोमोमन्दतेस्तुतिकर्मणइति निरुक्तं[1] । हे पवमान त्वं कनिक्रदत् शब्दयन् विश्वाद्विषः सर्वानस्माकं द्वेष्टूनपजहि ॥ ८ ॥

अथ नवमी—

अपघ्नन्तोअराव्णःपवमानाःस्वर्दृशः । योनावृतस्यसीदत ॥९॥२॥

---

1 नि० २.५.

अपऽघ्नन्तः । अराव्णः । पवमानाः । स्वःऽदृशः । योनौ ।

ऋतस्य । सीदत ॥ ९ ॥ २ ॥

हे पवमानाः अराव्णः अदानान् अयजमानान् अपघ्नन्तोहिंसन्तः स्वर्दृशः सर्वस्यद्रष्टारश्च यूयं ऋतस्ययोनौ यज्ञस्यस्थाने सीदत। अथवा सोमपानार्थं उक्तलक्षणादेवा ऋतस्ययोनौ सीदतेति योज्यम्॥ ९ ॥

॥ इति षष्ठस्याष्टमे द्वितीयोवर्गः ॥ २ ॥

परिप्रेत्यष्टर्चं चतुर्दशं सूक्तं कश्यादिपूर्ववत् । परिप्रासिष्यदित्यनुक्रान्तं । गतोविनियोगः।

तत्र प्रथमा—

परिप्रासिष्यदत्कविःसिन्धोरूर्मावधिश्रितः । कारंबिभ्रत्पुरुस्पृहम्॥१॥

परि । प्र । असिस्यदत् । कविः । सिन्धोः । ऊर्मौ । अधि ।

श्रितः । कारम् । बिभ्रत् । पुरुऽस्पृहम् ॥ १ ॥

परिप्रासिष्यदत् परिप्रस्यन्दते कविर्मेधावी सोमः सिन्धोरूर्मौ तरंगे वसतीवर्युदकरसे अधिश्रितः आश्रितः पुरुस्पृहं बहुभिः स्पृहणीयं कारं शब्दं बिभ्रत् धारयन् परिस्पन्दतइति संबन्धः ॥ १ ॥

अथ द्वितीया—

गिरायदीसबन्धवःपञ्चव्राताअपस्यवः । परिष्कृण्वन्तिधर्णसिम् ॥२॥

गिरा । यदि । सऽबन्धवः । पञ्च । व्राताः । अपस्यवः ।

परिऽकृण्वन्ति । धर्णसिम् ॥ २ ॥

सबन्धवः समानबन्धनाः पंचव्राताः पंचजनाः अपस्यवः कर्मेच्छवोयद्यदीमेनं धर्णसिं धारकं सोमं गिरा स्तुत्या परिष्कृण्वंति अलंकुर्वन्ति अस्योत्तरत्रान्वयः ॥ २ ॥

अथ तृतीया—

आदस्यशुष्मिणोरसेविश्वेदेवाअमत्सत । यदीगोभिर्वसायते ॥३॥

आत् । अस्य । शुष्मिणः । रसे । विश्वे । देवाः ।
अमत्सत । यदि । गोभिः । वसायते ॥ ३ ॥

आत् परिष्करणानन्तरमेव शुष्मिणः बलवतोस्यसोमस्य रसे विश्वेदेवा अमत्सत अमाद्यन्त । यदि यदा गोभिः गोविकारैः विकारे प्रकृतिशब्दः क्षीरादिभिः वसायते आच्छाद्यते ॥३॥

अथ चतुर्थी—

निरिणानोविधावतिजहच्छर्याणितान्वा । अत्रासंजिघ्रतेयुजा ॥ ४॥

निःऽरिणानः । वि । धावति । जहत् । शर्याणि ।
तान्वा । अत्र । सम् । जिघ्रते । युजा ॥ ४ ॥

अयंसोमो निरिणानः दशापवित्रादधोगच्छन् विधावति विविधं धावति । यदा तान्वा तनु दशापवित्रवस्त्रं तत्संबन्धीनि शर्याणि द्वाराणि जहत् अधः सरति । अत्रास्मिन्यज्ञे युजा सखिभूतेनेन्द्रेणसह संजिघ्रते संगतोभवति वस्त्रसुषिरादिनिर्गत्य दशापवित्रादधः सरन् पात्रं विविधंगच्छन् होमद्वारेणेन्द्रेण संगतोभवतीत्यर्थः ॥ ४ ॥

अथ पंचमी—

(नप्तीभिर्योविवस्वतःशुभ्रोनमामृजेयुवा । गाःकृण्वानोननिर्णिजम् ॥५॥३॥).

नप्तीभिः । यः । विवस्वतः । शुभ्रः । न । ममृजे । युवा ।
गाः । कृण्वानः । न । निःऽनिजम् ॥ ५ ॥ ३ ॥

यः सोमो विवस्वतः परिचरणवतो यजमानस्य नप्तीभिः पौत्रस्थानीयाभिः तदृप हस्तः पुत्रः । अंगुलयः पौत्रस्थानीया इत्यभिप्रायः । मामृजे मृज्यते शुभ्रोन दीप्तोश्वोयुवाइवयथा अपमृष्टोश्वो मृज्यते स्वपरिचारकैस्तद्वत् । सएव युवा मिश्रणशीलः सोमो निर्णिजं । निर्णिगिति रूपनाम । स्वकीयं रूपं गाः न कृण्वानः गोविकारांश्च कुर्वाणोभवतीतिशेषः ॥ ५ ॥

॥ इति पञ्चमाष्टमे तृतीयोवर्गः ॥ ३ ॥

अथ षष्ठी—

अतिश्रितीतिरश्चतागव्याजिगात्यण्व्या । वग्नुमियर्तियंविदे ॥ ६॥

अति । श्रिती । तिरश्चता । गव्या । जिगाति । अण्व्या ।

वग्नुम् । इयर्ति । यम् । विदे ॥ ६ ॥

अण्व्या अंगुल्या अभिपूयमाणः सोमः गव्या गव्यानि श्रिती श्रित्यै श्रयणार्थं तिर-श्चता तिरश्चीनं अतिजिगाति । अंशुमतिक्रम्यगच्छति । तथांगुल्याभिपूयमाणो विदे यजमान-स्य ज्ञानार्थं यं वग्नुं शब्दमियर्ति प्रेरयति ॥ ६ ॥

अथ सप्तमी—

अभिक्षिपःसमग्मतमर्जयन्तीरिषस्पतिम् । पृष्ठागृभ्णतवाजिनः॥७॥

अभि । क्षिपः । सम् । अग्मत । मर्जयन्तीः । इषः ।

पतिम् । पृष्ठा । गृभ्णत । वाजिनः ॥ ७ ॥

क्षिपोंगुलयो मर्जयन्तीः अभिमृशन्त्यः इषस्पतिं अन्नानां स्वामिनं सोमं अभि समग्मत अभिसंगच्छन्ते संगत्यच वाजिनोबलवतः सोमस्य पृष्ठा पृष्ठानि गृभ्णत गृह्णन्ति अभिषवांगु-लयः ॥ ७ ॥

अथाष्टमी—

परिदिव्यानिमर्मृशद्विश्वानिसोमपार्थिवा । वसूनियाह्यस्मयुः॥८॥४॥

परि । दिव्यानि । मर्मृशत् । विश्वानि । सोम ।

पार्थिवा । वसूनि । याहि । अस्मऽयुः ॥ ८ ॥ ४ ॥

हे सोम दिव्यानि पार्थिवा पार्थिवानिच विश्वानि सर्वाणि वसूनि धनानि परिमर्मृशत् परिमृशन् परिगृह्णन् अस्मयुरस्मान् कामयमानो याहि आगच्छ । एवमभिपुण्वन् रसं संबो-ध्य ब्रूते ॥ ८ ॥

॥ इति पञ्चस्याष्टमे चतुर्थो वर्गः ॥ ४ ॥

एषधियेत्यष्टर्चं पंचदशं सूक्तं कण्वाद्याः पूर्ववत् । एषधियेत्यनुक्रान्तं गवोविनियोगः ।

तत्र प्रथमा—

एषधियायात्यण्व्याशूरोरथेभिराशुभिः । गच्छन्निन्द्रस्यनिष्कृतम् ॥१॥

एषः । धिया । याति । अण्व्या । शूरः । रथेभिः ।
आशुऽभिः । गच्छन् । इन्द्रस्य । निःऽकृतम् ॥ १ ॥

एषसोमः शूरोविक्रान्तः अण्व्या अंगुल्याभिपुतो धिया कर्मणा याति गच्छति । कं देशं प्रति उच्यते—इन्द्रस्यनिष्कृतं स्थानं दिवं प्रति रथेभीरथैराशुभिः शीघ्रगामिभिः गच्छन् इन्द्रेण रथेवस्थाप्य स्वस्थाननयनाय अंगुल्याभिपूयमाणःसन् होमद्वाराग्निनिष्पीडनद्वारा पात्रं वा गच्छतीत्यर्थः ॥ १ ॥

अथ द्वितीया—

एषपुरूधियायतेबृहतेदेवतातये यत्रामृतासआसते ॥ २ ॥

एषः । पुरु । धियाऽयते । बृहते । देवऽतातये । यत्र ।
अमृतासः । आसते ॥ २ ॥

एषः सोमः पुरु बहुलं धियायते धियं कर्मेच्छति धीशब्दात् यकारोपजनः । यद्वा द्वितीयार्थेतृतीया छान्दसश्चालुक् । कस्मै बृहते महते देवतातये यज्ञाय यत्रयस्मिन्यज्ञे अमृतासः अमृतादेवा आसते वसन्ति तदर्थं ॥ २ ॥

अथ तृतीया—

एषहितोविनीयतेन्तःशुभ्रावतापथा । यदीतुञ्जन्तिभूर्णयः ॥ ३ ॥

एषः । हितः । वि । नीयते । अन्तरिति । शुभ्रऽवता ।
पथा । यदि । तुञ्जन्ति । भूर्णयः ॥ ३ ॥

एष सोमो हितो निहितो हविर्धाने विनीयते तस्मात् स्थानात् आहवनीयंप्रति अन्तः तयोर्मध्यदेशे शुभ्रावता शोभावता पथा मार्गेण यदि यदा तुंजन्ति प्रयच्छन्ति देवेभ्यो भूर्णयो भरणशीलाअध्वर्य्वादयः । तदा विनीयत इतिसमन्वयः ॥ ३ ॥

अथ चतुर्थी–

एषशृङ्गाणिदोधुवच्छिशीतेयूथ्योवृषा । नृम्णादधानओजसा ॥ ४ ॥

एषः । शृङ्गाणि । दोधुवत् । शिशीते । यूथ्यः । वृषा ।
नृम्णा । दधानः । ओजसा ॥ ४ ॥

एषसोमः शृंगाणि शृंगवदुन्नतान् अंशून् अभिषवकाले दोधुवद् धूनोति यूथ्यो यूथार्हो-यूथपतिर्वृषा वृषभोयथा शिशीते तीक्ष्णे शृंगे धूनोति तद्वत् । कीदृशएषः ओजसा बलेन नृम्णा नृम्णानि धनानि दधानोस्मदर्थं धारयन् ॥ ४ ॥

अथ पञ्चमी–

एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः । पतिःसिन्धूनांभवन् ॥ ५ ॥

एषः । रुक्मिऽभिः । ईयते । वाजी । शुभ्रेभिः ।
अंशुऽभिः । पतिः । सिन्धूनाम् । भवन् ॥ ५ ॥

एषसोमो रुक्मिभिः अध्वर्य्वादिभिः सह ईयते गच्छति । कीदृशएषः वाजी वेजनवान् शुभ्रेभिः शुभ्रैः दीप्तैः अंशुभिर्विशिष्टः अथवा रुक्मिभिरित्येतदप्यंशुविशेषणं । सिधूनां स्यन्दमानानां रसानां पतिर्भवन् य ईयतइति ॥ ५ ॥

अथ षष्ठी–

एषवसूनिपिब्दनापरुषायियिवाँअति । अवशादेषुगच्छति ॥ ६ ॥

एषः । वसूनि । पिब्दना । परुषा । ययिऽवान् । अति ।
अव । शादेषु । गच्छति ॥ ६ ॥

एषसोमो वसून्याच्छादकानि पिब्दना पीडितानि रक्षांसि परुषा पर्वणा अति अतिक्रम्य ययिवान् गच्छन् शादेषु शातनीयेषु रक्षःसु अवगच्छति ॥ ६ ॥

अथ सप्तमी–

एतंमृजन्तिमर्ज्यमुपद्रोणेष्वायवः । प्रचक्राणंमहीरिषः ॥ ७ ॥

एतम् । मृजन्ति । मर्ज्यम् । उप । द्रोणेषु । आयवः ।
प्रऽचक्राणम् । महीः । इषः ॥ ७ ॥

आयवो मनुष्या ऋत्विजः एतं सोमं मर्ज्यं मार्जनीयं उपमृजन्ति निष्पीडयन्तीत्यर्थः । कुत्र द्रोणेषु द्रोणकलशेषु । कीदृशं महीरिषः महान्त्यन्नानि प्रचक्राणं कुर्वाणं प्रभूतरसस्राविणमित्यर्थः ॥ ७ ॥

ग्रावस्तोत्रे गणगारिमतेनाभिरूपकरणे मृज्यमाने सोमे एतमुत्यमित्येषा । सूत्रितं च— एतमुत्यं दशक्षिपो मृज्यमानः सहस्रयेति ।

सैषाष्टमी—

एतमुत्यंदशक्षिपोमृजन्तिसप्तधीतयः । स्वायुधंमदिन्तमम् ॥ ८ ॥ ५ ॥

एतम् । ऊँ इति । त्यम् । दश । क्षिपः । मृजन्ति । सप्त ।
धीतयः । सुऽआयुधम् । मदिन्ऽतमम् ॥ ८ ॥ ५ ॥

त्यं तं एतमु एवमेव सोमं दशक्षिपो दशांगुल्यो मृजन्ति परिचरन्ति । सप्तधीतयः सप्तर्त्विजश्च ऋत्विजोंगुलिभिर्मृजन्तीत्यर्थः । कीदृशमेतं स्वायुधं शोभनमायुधं मदिन्तमं मादयितृतमं रक्षोहननसामर्थ्यप्रदर्शनाय स्वायुधशब्दश्रवणम् ॥ ८ ॥

॥ इति षष्ठस्याष्टमे पंचमो वर्गः ॥ ५ ॥

प्रतेसोतार इत्यष्टर्चं षोडशं सूक्तं ऋष्याद्याः पूर्ववत् । प्रतेइत्यनुक्रान्तं । गतो विनियोगः ।

तत्र प्रथमा—

प्रतेसोतारओण्योःरसंमदायघृष्वये । सर्गोनतक्त्येतशः ॥ १ ॥

प्र । ते । सोतारः । ओण्योः । रसम् । मदाय । घृष्वये ।
सर्गः । न । तक्ति । एतशः ॥ १ ॥

हे सोम ते तव रसं सोतारः सोमाभिषवकर्तारः ओण्योः रसं लुप्तोपममेतत् द्यावापृथिव्योरसमुदकमिव अथवा ओण्योर्द्यावापृथिव्योर्मध्ये तयोः संबन्धिनं वा रसं प्रस्रावयन्तीति शे-

पः। किमर्थं वृष्णये शत्रुवर्षणशीलाय मदाय इन्द्रस्य मदाय अभिषवजनितः सोमः सर्गः सृष्टः एतशोन अश्वइव तक्ति गच्छति पात्रं प्रति ॥ १ ॥

अथ द्वितीया–

क्रत्वा॒दक्ष॑स्यर॒थ्य॑म॒पोवसा॑न॒मन्ध॑सा। गो॒षाम॒ण्वे॑षुसश्चि॒म ॥ २ ॥

क्रत्वा॑। दक्ष॑स्य। र॒थ्य॑म्। अ॒पः। वसा॑नम्। अन्ध॑सा।
गो॒ऽसाम्। अण्वे॑षु। स॒श्चि॒म॒ ॥ २ ॥

वयमभिषोतारः दक्षस्य बलस्य रथ्यं नेतारं अपउदकानि रसान् वसानं आच्छादयन्तं अंधसा श्रयणान्नेन सहितं गोषां गवां सोतारं एवमुक्तलक्षणं सोमं क्रत्वा कर्मणा अण्वेषु अंगुलीषु सश्चिम संयोजयामः ॥ २ ॥

अथ तृतीया–

अन॑प्तम॒प्सुदु॒ष्टरं॒सोमं॑प॒वित्र॒आसृ॑ज। पु॒नी॒हीन्द्रा॑य॒पात॑वे ॥ ३ ॥

अन॑प्तम्। अ॒प्ऽसु। दु॒स्तर॑म्। सोम॑म्। प॒वित्रे॑। आ।
सृ॒ज॒। पु॒नी॒हि। इन्द्रा॑य। पात॑वे ॥ ३ ॥

अनप्तं शत्रुभिरनाप्तं अप्स्वान्तरिक्ष्यासु वर्तमानमिति शेषः दुष्टरं अन्यैरनभिभाव्यं नहि सोमं कश्चिदप्यतितरति ईदृशं सोमं पवित्रे दशापवित्रे आसृज प्रक्षिप। हे अध्वर्यो तदोच्यते। इन्द्रायेन्द्रस्य पातवे पातुं पुनीहि ॥ ३ ॥

अथ चतुर्थी–

प्र॒पु॒ना॒नस्य॒चेत॑सा॒सोमः॑प॒वित्रे॒अर्ष॑ति। क्रत्वा॑स॒धस्थ॒मास॑दत् ॥ ४ ॥

प्र। पु॒ना॒नस्य॑। चेत॑सा। सोमः॑। प॒वित्रे॑। अर्ष॑ति। क्रत्वा॑।
स॒धऽस्थ॑म्। आ। अ॒स॒द॒त् ॥ ४ ॥

चेतसा स्तुत्या पुनानस्य पूयमानस्य अंशीभूतः सोमः पवित्रे दशापवित्रे अर्षति गच्छति। अथ पश्चात् क्रत्वा कर्मणा प्रज्ञानेनवा सधस्थं सहस्थानं द्रोणकलशे आसदत् आसीदति ॥ ४ ॥

अथ पंचमी–

प्रत्वानमोभिरिन्दवइन्द्रसोमाअसृक्षत । महेभरायकारिणः ॥ ५ ॥

प्र । त्वा । नमःऽभिः । इन्दवः । इन्द्र । सोमाः । असृक्षत ।
महे । भराय । कारिणः ॥ ५ ॥

हे इन्द्र त्वा त्वां नमोभिर्नमस्कारोपलक्षितैः स्तोत्रैः अथवा अन्नैः सह इन्दवः सोमाः प्रासृक्षत प्राप्नुवन्ति । किमर्थं महे महते भराय संग्रामाय कीदृशाः कारिणो बलकरणशीलाः॥५॥

अथ षष्ठी–

पुनानोरूपेअव्ययेविश्वाअर्षन्नभिश्रियः । शूरोनगोषुतिष्ठति ॥ ६ ॥

पुनानः । रूपे । अव्यये । विश्वाः । अर्षन् । अभि ।
श्रियः । शूरः । न । गोषु । तिष्ठति ॥ ६ ॥

अव्यये अविमये रूपे रूप्यमाणे वस्त्रे पुनानः पूयमानो विश्वाः सर्वाः श्रियः शोभाः अभ्यर्षन् अभिगच्छन् गोषु निमित्तासु शूरोन शूरइव सयथा संग्रामे तिष्ठति तद्वदसौ तिष्ठति पात्रे ॥ ६ ॥

अथ सप्तमी–

दिवोनसानुपिप्युषीधारासुतस्यवेधसः । वृथापवित्रेअर्षति ॥ ७ ॥

दिवः । न । सानु । पिप्युषी । धारा । सुतस्य । वेधसः ।
वृथा । पवित्रे । अर्षति ॥ ७ ॥

दिवोन द्युलोकादन्तरिक्षादिव सानु समुच्छ्रितमुदकं तद्यथा अधोनिपतति तद्वद्वेधसोविधातुः बलस्य कर्तुः सुतस्याभिषुतस्य सोमस्य पिप्युषी आप्याययन्ती धारा वृथा अनायासेनैव पवित्रे दशापवित्रे अर्षति गच्छति ॥ ७ ॥

अथाष्टमी—

त्वंसोमविपुश्चितुंतनांपुनानआयुर्षु । अव्योवारुंविधांवसि॥८॥६ ॥

त्वम् । सोम । विपःऽचितम् । तनां । पुनानः । आयुर्षु ।
अव्यः । वारम् । वि । धावसि ॥ ८ ॥ ६ ॥

हे सोम त्वं विपश्चितं स्तोतारं आयुषु मनुष्येषु मध्ये रक्षसि । अथवा तृतीयार्थे द्वितीया । विपश्चिता अध्वर्युणा तना वस्त्रेण पुनानः पूयमानः अथवा विपश्चितमिन्द्रं प्रीणयितुं तना पुनानः सन् अव्योवारं अवेर्वाले विधावसि विविधं गच्छसि ॥ ८ ॥

॥ इति पष्ठस्याष्टमे पष्ठोवर्गः ॥ ६ ॥

प्रनिम्नेनेवेत्यष्टर्चं सप्तदशं सूक्तं कश्यपायाः पूर्ववत् । प्रनिम्नेनेवेत्यनुक्रान्तं । गतोविनियोगः

तत्र प्रथमा—

प्रनिम्नेनेवुसिन्धवोघ्नन्तोवृत्राणिभूर्णयः । सोमांअसृग्रमाशवः ॥ १ ॥

प्र । निम्नेनंऽइव । सिन्धवः । घ्नन्तः । वृत्राणि । भूर्णयः ।
सोमाः । असृग्रम् । आशवः ॥ १ ॥

निम्नेन प्रवणेन देशेन सिन्धवो नद्यइव तथा वृत्राणि शत्रून् घ्नन्तो भूर्णयः क्षिप्रगमनाः । आशवोव्याप्ताः सोमाः प्रासृग्रं प्रगच्छन्ति द्रोणकलशं प्रति ॥ १ ॥

अथ द्वितीया—

अभिसुवानासइन्दवोवृष्टयःपृथिवीमिव । इन्द्रंसोमासोअक्षरन् ॥२॥

अभि । सुवानासः । इन्दवः । वृष्टयः । पृथिवीम्ऽइव ।
इन्द्रम् । सोमासः । अक्षरन् ॥ २ ॥

सुवानासः सूयमानाः इन्दवो द्रवरूपाः सोमासः सोमाः इन्द्रं प्रीणयितुं अभ्यक्षरन् किमिव वृष्टयः पृथिवीमिव ॥ २ ॥

अथ तृतीया—

अत्यूर्मिर्मत्सरोमदःसोमःपवित्रेअर्षति। विघ्नन्रक्षांसिदेवयुः॥ ३॥

अतिऽऊर्मिः। मत्सरः। मदः। सोमः। पवित्रे। अर्षति।
विऽघ्नन्। रक्षांसि। देवऽयुः॥ ३॥

अत्यूर्मिः अतिक्रान्ता ऊर्मयोयस्मात् सअत्यूर्मिः अतिप्रवृद्धइत्यर्थः। मत्सरो मादनशीलो मदो मदात्मकः सोमः पवित्रे अर्षति गच्छति। किंकुर्वन् रक्षांसि विघ्नन् घातयन् देवयुर्देवान् कामयमानः अर्षतीति संबन्धः॥ ३॥

पवित्रेष्टयां द्वितीयाज्यभागस्याकलशेष्विति याज्या। सूत्रितंच—आकलशेषुधावति पवित्रे-परिषिच्यतइत्येके।

सैषा चतुर्थी—

आकलशेषुधावतिपवित्रेपरिषिच्यते। उक्थैर्यज्ञेषुवर्धते॥ ४॥

आ। कलशेषु। धावति। पवित्रे। परि। सिच्यते।
उक्थैः। यज्ञेषु। वर्धते॥ ४॥

अयं सोमः कलशेष्वाधावति तदर्थं पवित्रे परिषिच्यते अध्वर्युभिः उक्थैः स्तोत्रैः यज्ञेषु निमित्तेषु वर्धते प्रवृद्धोभवति॥ ४॥

अथ पंचमी—

अतित्रीसोमरोचनारोहन्नभ्राजसेदिवम्। इष्णन्त्सूर्यन्नचोदयः॥५॥

अति। त्री। सोम। रोचना। रोहन्। न। भ्राजसे। दिवम्।
इष्णन्। सूर्यम्। न। चोदयः॥ ५॥

हे सोम त्वं त्रीरोचना रोचनानि त्रीन् लोकान् अति अतिक्रम्य रोहन् उपरिस्थं दिवंन द्युलोकंच भ्राजसे प्रकाशयसि। तथा इष्णन् गच्छन् सूर्यंन सूर्यंच चोदयः चोदयसि प्रेरयसि। नशब्दश्चार्थे॥ ५॥

अथ षष्ठी—

अभिविप्रांअनूषतमूर्धन्यज्ञस्यंकारवः। दधानाश्चक्षसिप्रियम्॥६॥

अभि। विप्राः। अनूषत। मूर्धन्। यज्ञस्यं। कारवः।
दधानाः। चक्षसि। प्रियम्॥ ६॥

हे सोम त्वां अभ्यनूषत अभिष्टुवन्ति विप्रामेधाविनः स्तोतारः। कुत्र यज्ञस्य मूर्धन् मूर्धनि शिरोवदुत्तमे अभिषवदिवसइत्यर्थः। कीदृशास्ते कारवः कर्तारः परिचर्यायाः यागानुष्ठातारोवा। चक्षसि द्रष्टरि सोमे प्रियंदधाना अभ्यनूषतेति समन्वयः॥ ६॥

अथ सप्तमी—

तमुंत्वावाजिनंनरोधीभिर्विप्राअवस्यवः। मृजन्तिदेवतातये॥७॥

तम्। ऊँ इति। त्वा। वाजिनम्। नरः। धीभिः। विप्राः।
अवस्यवः। मृजन्ति। देवऽतातये॥७॥

हे सोम तमु तमेव त्वा त्वां वाजिनमन्नवन्तं गमनवन्तं वा नरोनेतारो विप्रामेधाविनः अध्वर्य्वादयः धीभिः कर्मभिर्मृजन्ति शोधयन्ति देवतातये यज्ञार्थं। किमिच्छवः अवस्यवः अन्नमिच्छवः॥७॥

अथाष्टमी—

मधोर्धारामनुंक्षरतीव्रःसधस्थमासंदः। चारुर्ऋतायंपीतये॥८॥७॥

मधोः। धाराम्। अनुं। क्षर। तीव्रः। सधऽस्थम्। आ।
असदः। चारुः। ऋताय। पीतये॥ ८॥ ७॥

हे सोम त्वं मधोर्मधुररसस्य धारामनुक्षर प्रवहन् तीव्रः तीव्ररसः सन् सधस्थं सहस्थानं अभिषवस्थानं पवित्रंवा आसदः आसीद। चारुः चरणशीलःसन् ऋताय यज्ञार्थं पीतये देवानां पानाय॥ ८॥

॥ इति षष्ठस्याष्टमे सप्तमोवर्गः॥ ७॥

परिसुवानइति समर्चं अष्टादशं सूक्तं। ऋष्याद्याः पूर्ववत्। परिसुवानः सोमेत्यनुक्रान्तं। गतोविनियोगः।

तत्र प्रथमा–

परिसुवानोगिरिष्ठाःपवित्रेसोमोअक्षाः । मदेषुसर्वधाअसि ॥ १ ॥

परि । सुवानः । गिरिऽस्थाः । पवित्रे । सोमः । अक्षारिति ।
मदेषु । सर्वऽधाः । असि ॥ १ ॥

अयं सोमः पवित्रे पर्यक्षाः परिक्षरति । सुवानः सूयमानः गिरिष्ठागिरिस्थापी ग्रावसु वर्तमानइत्यर्थः । सत्वं मदेषु मादकेषु स्तोत्रेषु सर्वधाः सर्वदा असि सर्वस्यधाता दाता वा भवसि॥१॥

अथ द्वितीया–

त्वंविप्रस्त्वंकविर्मधुप्रजातमन्धसः । मदेषुसर्वधाअसि ॥ २ ॥

त्वम् । विप्रः । त्वम् । कविः । मधु । प्र । जातम् । अन्धसः ।
मदेषु । सर्वऽधाः । असि ॥ २ ॥

हे सोम त्वं विप्रो विविधं प्रीणयिता विप्रसदृशोवा त्वं च कविर्मेधावी अतस्त्वं अन्धसः अन्नाज्जातं मधु मधुररसं प्रयच्छसीतिशेषः ॥ २ ॥

अथ तृतीया–

तवविश्वेसजोपसोदेवासःपीतिमाशत । मदेषुसर्वधाअसि ॥ ३ ॥

तव । विश्वे । सऽजोपसः । देवासः । पीतिम् । आशत ।
मदेषु । सर्वऽधाः । असि ॥ ३ ॥

हे सोम तव पीतिं पानं विश्वेदेवासोदेवाः सजोपसः समानप्रीतयः सन्तः आशत प्राप्नुवन् ॥ ३ ॥

अथ चतुर्थी–

आयोविश्वानिवार्यावसूनिहस्तयोर्दधे । मदेषुसर्वधाअसि ॥ ४ ॥

आ । यः । विश्वानि । वार्या । वसूनि । हस्तयोः ।
दधे । मदेषु । सर्वऽधाः । असि ॥ ४ ॥

यः सोमो विश्वानि वार्या वरणीयानि वसूनि धनानि स्तोतृहस्तयोरादधे करोति प्रयच्छतीत्यर्थः । मदेषु सर्वधाअसीति सशुष्मीत्युत्तरत्र संबन्धः ॥ ४ ॥

अथ पञ्चमी—

य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ॥ ५ ॥

यः । इमे इति । रोदसी इति । मही इति । सम् । मातराऽइव ।
दोहते । मदेषु । सर्वऽधाः । असि ॥ ५ ॥

यः सोमः इमे मही महत्यौ रोदसी द्यावापृथिव्यौ सं दोहते उभयोः सारं परिगृह्णातीत्यर्थः । मातरेव यथा द्वे मातरौ एकोवत्सोदोहते तद्वत् ॥ ५ ॥

अथ षष्ठी—

परि यो रोदसी उभे सद्यो वाजेभिरर्षति । मदेषु सर्वधा असि ॥ ६ ॥

परि । यः । रोदसी इति । उभे इति । सद्यः । वाजेभिः ।
अर्षति । मदेषु । सर्वऽधाः । असि ॥ ६ ॥

यः सोमः उभे रोदसी द्यावापृथिव्यौ सद्यस्तदानीमेव वाजेभिरन्नैः पर्यर्षति परियच्छति परिगत्य सोमाहुत्या द्यावापृथिव्यावन्नवत्यौ करोतीत्यर्थः ॥ ६ ॥

अथ सप्तमी—

स शुष्मी कलशेष्वा पुनानो अचिक्रदत् । मदेषु सर्वधा असि ॥ ७ ॥ ८ ॥

सः । शुष्मी । कलशेषु । आ । पुनानः । अचिक्रदत् ।
मदेषु । सर्वऽधाः । असि ॥ ७ ॥ ८ ॥

उक्तरीत्या महान् ससोमः शुष्मी बलवान् पुनानः पूयमानः सन् कलशेषु द्रोणकलशेषु आ अचिक्रदत् शब्दं करोति । अत्र सर्वत्र यथोचितमुत्तरपादेनेमः ॥ ७ ॥

॥ इति षष्ठस्याष्टमेऽष्टमोवर्गः ॥ ८ ॥

यत्सोमेति सप्तर्चमेकोनविंशं सूक्तं ऋष्याद्याः पूर्ववत् । यत्सोमेत्यनुक्रान्तं । गतोविनियोगः।

तत्र प्रथमा—

यत्सो॑म चि॒त्रमु॒क्थ्यं॑ दि॒व्यं पार्थि॑वं॒ वसु॑ । तन्नः॑ पुना॒न आ भ॑र ॥ १ ॥

यत् । सो॒म॒ । चि॒त्रम् । उ॒क्थ्य॑म् । दि॒व्यम् । पार्थि॑वम् ।
वसु॑ । तत् । नः॒ । पु॒ना॒नः । आ । भ॒र॒ ॥ १ ॥

हे सोम यच्चित्रं चायनीयं उक्थ्यं स्तुत्यं दिव्यं दिविभवं पार्थिवं पृथिवीसंबद्धं च वसु धनमस्ति तद् नोस्मभ्यं पुनानः पूयमानः सन्नाभर आहर ॥ १ ॥

अथ द्वितीया—

यु॒वं हि स्थः स्व॑र्पती॒ इन्द्र॑श्च सोम॒ गोप॑ती । ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥ २ ॥

यु॒वम् । हि । स्थः । स्वः॑पती॒ इति॒ स्वः॑ऽपती । इन्द्रः॑ । च॒ ।
सो॒म॒ । गोप॑ती॒ इति॒ गोऽप॑ती । ई॒शा॒ना । पि॒प्य॒त॒म् । धियः॑ ॥ २ ॥

हे सोम त्वमिन्द्रश्च युवंहि युवांखलु स्वर्पती स्वर्गस्य स्वामिनौ स्थोभवथः । तथा गोपती गवांपालकौ ईशाना ईश्वरौ सन्तौ धियोस्मदीयानि कर्माणि पिप्यतं प्याययतं ॥ २ ॥

अथ तृतीया—

वृषा॑ पुना॒न आ॒युषु॑ स्त॒नय॒न्नधि॑ ब॒र्हिषि॑ । हरिः॒ सन्योनि॒मास॑दत् ॥३॥

वृषा॑ । पु॒ना॒नः । आ॒युषु॑ । स्त॒नय॑न् । अधि॑ ।
ब॒र्हिषि॑ । हरिः॑ । सन् । योनि॑म् । आ । अ॒स॒द॒त् ॥ ३ ॥

वृषा कामानां वर्षकः सोमः आयुषु मनुष्येषु अध्वर्य्वादिषु पुनानः पूयमानः सन् स्तनयन् शब्दंकुर्वन् अधिबर्हिषि अधीति सप्तम्यर्थानुवादी आस्तीर्णे दर्भे हरिः हरितवर्णः सन् योनिं स्वकीयं स्थानं आसदद् आसीदति ॥ ३ ॥

अथ चतुर्थी—

अवा॑वशन्त धी॒तयो॑ वृष॒भस्याधि॒ रेत॑सि । सू॒नोर्व॒त्सस्य॑ मा॒तरः॑ ॥ ४ ॥

अवावशन्त । धीतयः । वृषभस्यं । अधि ।
रेतंसि । सूनोः । वत्सस्यं । मातरः ॥ ४ ॥

धीतयो धीयमानाः सोमाख्येन वत्सेन पीयमाना वसतीवर्यः । किन् व्यत्ययेनान्तोदात्तः । अधिरेतसि स्वकीयेसारे वृषभस्य वर्षकस्य सोमस्य सोममित्यर्थः अवावशन्त पुनः कामयन्ते सोममाप्याययितुं कामयन्ते इत्यर्थः । तदेवाह—सूनो. स्वपुत्रस्थानीयस्य वत्सस्य सोमस्य मातरोनिर्मात्र्यः मवृद्धिकामा मातृस्थानीयाः अवावशन्तेविसमन्वयः ॥ ४ ॥

अथ पञ्चमी—

कुविद्वृषण्यन्तीभ्यःपुनानोगर्भमादधत् । याःशुक्रंदुहतेपयः ॥५॥

कुवित् । वृषण्यन्तीभ्यः । पुनानः । गर्भम् ।
आऽदधत् । याः । शुक्रम् । दुहते । पयः ॥ ५ ॥

वृषण्यन्तीभ्यः वृषणं सोममात्मनइच्छन्तीभ्यो वसतीवरीभ्यः पुनानः पूयमानो मिश्रयमाणो गर्भं स्वगर्भस्थानीयं रसं कुवित् बहुप्रभूतं आदधत् करोति । याः आपः शुक्रं दीप्तं पयो दुहते स्ववत्साय सोमाय ताभ्योगर्भमादधत् ॥ ५ ॥

अथ षष्ठी—

उपशिक्षापतस्थुषोभियसमाधेहिशत्रुषु । पवमानविदारयिम् ॥ ६ ॥

उप । शिक्ष । अपऽतस्थुषः । भियसम् । आ ।
धेहि । शत्रुषु । पवमान । विदाः । रयिम् ॥ ६ ॥

हे पवमानसोम उपशिक्ष त्वं समीपे कुरु । कान् अपतस्थुषः अपक्रम्य स्थितान् अस्मदभिमवानित्यर्थः शत्रुष्वस्मद्विरोधिषु भियसं भयं आधेहि कुरु जनय । अस्माकं तेषां शत्रूणां रयिं धनं विदाः विन्दसि ॥ ६ ॥

अथ सप्तमी—

निशत्रोःसोमवृष्ण्यंनिशुष्मंनिवयस्तिर । दूरेवासतोअन्तिवा ॥७॥१॥

नि । शत्रोः । सोम । वृष्ण्यम् । नि । शुष्मम् ।
नि । वयः । तिर । दूरे । वा । सतः । अन्ति । वा ॥ ७ ॥ ९ ॥

हे अभिपूयमाणसोम त्वं शत्रोर्वृष्ण्यं वर्षकं बलं नितिर निपूर्वस्तिरतिर्नाशार्थः नाशय । तथा शत्रोः शुष्मं शोषकं तेजः नितिर तस्यैव वयोन्नंच नितिर कीदृशस्य शत्रोः दूरे वासतः अस्मत्तोदूरे वर्तमानस्य अन्तिवा सतः अन्तिके वर्तमानस्य वा ॥ ७ ॥

॥ इति षष्ठस्याष्टमे नवमोवर्गः ॥ ९ ॥

प्रकविरिति सप्तर्चं विंशं सूक्तं ऋष्याद्यः पूर्ववत् । प्रकविरित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

प्रकविर्देववीतयेऽव्योवारेभिरर्षति । साह्वान्विश्वाअभिस्पृधः ॥ १॥

प्र । कविः । देवऽवीतये । अव्यः । वारेभिः ।
अर्षति । सह्वान् । विश्वाः । अभि । स्पृधः ॥ १ ॥

कविर्मेधावी सोमो देववीतये देवानां पानाय अव्यः अवेर्वारेभिः वारैः दशापवित्रैः प्रार्षति प्रकर्षेणगच्छति । साह्वान् शत्रूणां सोढा सोमोविश्वाः स्पृधः सर्वान् संग्रामान् हिंसकान्वा अभिभवतीतिशेषः ॥ १ ॥

अथ द्वितीया—

सहिष्माजरितृभ्यआवाजंगोमन्तमिन्वति । पवमानःसहस्रिणम् ॥२॥

सः । हि । स्म । जरितृऽभ्यः । आ । वाजम् ।
गोऽमन्तम् । इन्वति । पवमानः । सहस्रिणम् ॥ २ ॥

सहिष्म सखलु पवमानः सोमोजरितृभ्यः स्तोतृभ्यः गोमन्तं बहुभिर्गोभिर्युक्तं सहस्रिणं सहस्रसंख्याकं वाजमन्नं आ अभिमुखमिन्वति व्याप्नोति प्रयच्छतीत्यर्थः ॥ २ ॥

अथ तृतीया—

परिविश्वानिचेतसामृशसेपवसेमती । सनःसोमश्रवोविदः ॥ ३ ॥

परि । विश्वानि । चेतसा । मृशसे । पवसे ।
मती । सः । नः । सोम । श्रवः । विदः ॥ ३ ॥

हे सोम त्वं चेतसा स्वकीयेनास्मदनुकूलेन चित्तेन विश्वानि सर्वाणि धनानि परिमृशसे संप्रयच्छसीत्यर्थः । मतो मत्यास्मत्स्तुत्या पवसे क्षरसि रसं । सत्वं हे सोम नोस्मभ्यं श्रवोन्नं विदः देहि ॥ ३ ॥

अथ चतुर्थी–

अभ्यर्षबृहद्यशोमघवभ्द्योध्रुवंरयिम् । इषंस्तोतृभ्यआभर ॥ ४ ॥

अभि । अर्ष । बृहत् । यशः । मघवत्ऽभ्यः ।
ध्रुवम् । रयिम् । इषम् । स्तोतृऽभ्यः । आ । भर ॥ ४ ॥

हे सोम बृहद्यशो महतीं कीर्तिं अभ्यर्ष अभिगमय । मघवद्भ्यो हविष्मद्भ्योस्मभ्यं ध्रुवं रयिं धनंचाभ्यर्ष । किंच इषमन्नं स्तोतृभ्योस्मभ्यमाभराहर ॥ ४ ॥

अथ पञ्चमी–

त्वंराजेवसुव्रतोगिरःसोमाविवेशिथ । पुनानोवह्नेअद्भुत ॥ ५ ॥

त्वम् । राजाऽइव । सुऽव्रतः । गिरः । सोम ।
आ । विवेशिथ । पुनानः । वह्ने । अद्भुत ॥ ५ ॥

हे सोम सुव्रतः सुकर्मा पुनानस्त्वं राजेव गिरोस्मदीयाः स्तुतीः आविवेशिथ आविशसि । हे वह्ने वोढः अद्भुत महन् सोम ॥ ५ ॥

अथ षष्ठी–

सवह्निरप्सुदुष्टरोमृज्यमानोगभस्त्योः । सोमश्चमूषुसीदति ॥ ६ ॥

सः । वह्निः । अप्ऽसु । दुस्तरः । मृज्यमानः ।
गभस्त्योः । सोमः । चमूषु । सीदति ॥ ६ ॥

ससोमो वह्निर्वोढा यज्ञादेः अप्स्वन्तरिक्षे वर्तमानो दुष्टरोदुःखेनान्यैस्तरणीयो गुज्यमानः शोध्यमानो गभस्त्योर्हस्तयोः एवंभूतःसन् सचमूषु पात्रेषु सीदति ॥ ६ ॥

अथ सप्तमी–

क्री॒ळुर्म॒खो न मं॑ह॒युः प॒वित्रं॑ सोम गच्छसि । दध॑त्स्तो॒त्रे सु॒वीर्य॑म् ॥७॥१०॥

क्री॒ळुः । म॒खः । न । मं॒ह॒युः । प॒वित्र॑म् । सो॒म॒ ।
गच्छ॑सि । दध॑त् । स्तो॒त्रे । सु॒ऽवीर्य॑म् ॥ ७ ॥ १० ॥

हे सोम क्रीळुः क्रीडनशीलस्त्वं मंहयुः मंहतिर्दानकर्मा दानेच्छुः मखोन दानमिव पवित्रं गच्छसि । किंकुर्वन् स्तोत्रे स्तुतिकर्त्रे सुवीर्यं शोभनवीर्यं दधत् प्रयच्छन् ॥ ७ ॥

॥ इति षष्ठस्याष्टमे दशमोवर्गः ॥ १० ॥

एतेधावन्तीति सप्तर्चमेकविंशंसूक्तं ऋष्याद्याः पूर्ववत् । एतेधावन्तीत्यनुक्रान्तं । गतोविनियोगः

तत्र प्रथमा–

ए॒ते धा॑व॒न्तीन्द॑वः॒ सोमा॒ इन्द्रा॑य घृ॒ष्वयः॑ । म॒त्स॒रासः॑ स्व॒र्विदः॑ ॥ १ ॥

ए॒ते । धा॒व॒न्ति॒ । इन्द॑वः । सोमाः॑ । इन्द्रा॑य ।
घृ॒ष्वयः॑ । म॒त्स॒रासः॑ । स्वः॒ऽविदः॑ ॥ १ ॥

एतेसोमा इन्द्राय धावन्ति गच्छन्ति । कीदृशाएते इन्दवः क्लेदयितारः दीप्तावा घृष्वयो घर्षणशीलाः मत्सरासो मादयितारः स्वर्विदः स्वर्लोकस्य लंभयितारः ॥ १ ॥

अथ द्वितीया–

प्र॒वृ॒ण्वन्तो॑ अभि॒युजः॒ सुष्व॑ये वरिवो॒विदः॑ । स्व॒यं स्तो॒त्रे व॑य॒स्कृतः॑ ॥२॥

प्र॒ऽवृ॒ण्वन्तः॑ । अ॒भि॒ऽयुजः॑ । सुस्व॑ये ।
व॒रि॒वः॒ऽविदः॑ । स्व॒यम् । स्तो॒त्रे । व॒यः॒ऽकृतः॑ ॥ २ ॥

प्रवृण्वन्तः सुवानं प्रकर्षेण संभजन्तः तथा अभियुजः अभियोजयितारः सुष्वये सुष्ठु अभिषवकर्त्रे वरिवोविदः वरिवइति धननाम तस्य लंभयितारः स्वयं स्तोत्रे वयस्कृतोन्नस्यकर्तारः एते धावन्तीति संबन्धः ॥ २ ॥

अथ तृतीया–

वृथाक्रीळन्तइन्दवःसधस्थमभ्येकमित् । सिन्धोरूर्माव्यक्षरन्॥३॥

वृथा । क्रीळन्तः । इन्दवः । सधऽस्थम् । अभि ।
एकम् । इत् । सिन्धोः । ऊर्मा । वि । अक्षरन् ॥ ३ ॥

वृथा अनायासेन क्रीळन्त इन्दवः सोमाः एकमित् एकमेव सधस्थं सहस्थानं द्रोणकलशं वा अभ्यक्षरन् इतिशेषः । सिन्धोरूर्मा वसतीवरीषु व्यक्षरन् ॥ ३ ॥

अथ चतुर्थी–

एतेविश्वानिवार्यापवमानासआशत । हितानसप्तयोरथे ॥ ४ ॥

एते । विश्वानि । वार्या । पवमानासः ।
आशत । हिताः । न । सप्तयः । रथे ॥ ४ ॥

एते सोमाः पवमानासः पूयमानाः विश्वानि वार्या वार्याणि वरणीयानि धनानि आशत व्याप्नुवन् । रथे हिताः रथायोजितानसप्तयः सप्तयोऽश्वाइव ते यथा रथमभिमतं देशं प्राप्नुवन्ति तद्वद्धनमस्माकं प्रायच्छन्नित्यर्थः ॥ ४ ॥

अथ पंचमी–

आस्मिन्पिशङ्गमिन्दवोदधातावेनमादिशे । योअस्मभ्यमरावा ॥ ५॥

आ । अस्मिन् । पिशङ्गम् । इन्दवः । दधात । वेनम् ।
आऽदिशे । यः । अस्मभ्यम् । अरावा ॥ ५ ॥

हे इन्दवः सोमाः अस्मिन्यजमाने पिशंगं बहुरूपं मणिमुक्ताहिरण्यादिभेदेन नानारूपं वेनं कामयन्तं बहुविधंकामं आदिशे अस्मभ्यमादेशनाय आदधात आयच्छत । योयजमानोऽस्मभ्यं अरावा अदातृशब्दरहितः संपन्नःसन् प्रयच्छति मायकामएवखलु ऋत्विग्भ्यः प्रयच्छति॥५॥

अथ षष्ठी–

ऋभुर्नरथ्यंनवंदधाताकेतमादिशे । शुक्राःपवध्वमर्णसा ॥ ६ ॥

ऋभुः । न । रथ्यम् । नवम् । दधात । केतम् ।

आऽदिशे । शुक्राः । पवध्वम् । अर्णसा ॥ ६ ॥

ऋभुर्न ऋभुर्भासमानो रथस्वामीव सयथा रथ्यं रथस्य नेतारं नवं स्तुत्यं कुशलं सारथिनं अग्र आधत्ते तद्वदस्मदीयेस्मिन् आदिशे स्वामिनि केतं प्रज्ञानं दधात स्थापयत । हे सोमाः योस्मभ्यं प्रयच्छति तस्मिन्नित्यर्थः । हे सोमाः अर्णसा उदकेन शुक्राः दीप्ताः सन्तः पवध्वं क्षरध्वम् ॥ ६ ॥

अथ सप्तमी—

एतउत्येअंवीवशन्काष्ठांवाजिनोंअक्रत । सतःप्रासांविपुर्मतिम् ॥७॥११॥

एते । ॐ इति । त्ये । अवीवशन् । काष्ठाम् । वाजिनः ।

अक्रत । सतः । प्र । असाविषुः । मतिम् ॥ ७ ॥ ११ ॥

त्ये ते एतउ एतेएव सोमाः अवीवशन् कामयन्ते यज्ञं । कांत्याच वाजिनो बलवन्तोन्नवन्तोवा सोमाः काष्ठां अक्रत निवासस्थानं अकुर्वन् द्रोणकलशादुद्गताग्रहानित्यर्थः । सतो यजमानस्य स्तोतुर्वा मतिं बुद्धिं स्तुतिंवा प्रासाविषुः प्रैरयन् ॥ ७ ॥

॥ इति पञ्चस्याष्टमे एकादशोवर्गः ॥ ११ ॥

एतेसोमासइति सप्तर्चं द्वाविंशं सूक्तं ऋष्याद्याः पूर्ववत् । एतेसोमासइत्यनुक्रान्तं । गतो विनियोगः ।

तत्र प्रथमा—

एतेसोमांसआशवोरथांइवप्रवाजिनः । सर्गाःसृष्टाअंहेषत ॥ १ ॥

एते । सोमासः । आशवः । रथाःऽइव । प्र ।

वाजिनः । सर्गाः । सृष्टाः । अहेषत ॥ १ ॥

एते पूयमानाः सोमासः सोमाः सृष्टाः अध्वर्युणा आशवो दशापवित्रादधोगमने शीघ्राः प्राहेषत प्रहेषन्ते । शीघ्रगमने दृष्टान्तद्वयं—आशौ सृष्टाः शीघ्रा रथाइव तथा उक्तलक्षणसर्गा वाजिनइव वेजनयन्तोश्वाइव ॥ १ ॥

अथ द्वितीया—

एतेवातांइवोरवंःपर्जन्यंस्येववृष्टयंः । अग्नेरिवभ्रमावृथां ॥ २ ॥

एते । वाताःऽइव । उरवंः । पर्जन्यस्यऽइव ।
वृष्टयंः । अग्नेःऽइव । भ्रमाः । वृथां ॥ २ ॥

एतेसोमा उरवो महान्तो वाताइव वायवइव वृथा अनायासेन व्यानशुरित्युत्तरत्र संबन्धनीयं । अथवाध्याहारेण निःसरन्तीति योज्यं । तथा पर्जन्यस्य वृष्टयइव वर्षा यथा तथैव । किंच अग्नेरिव भ्रमाः भ्रमणाः ज्वालासंचाराइव ॥ २ ॥

अथ तृतीया—

एतेपूताविपश्चितःसोमांसोदध्यांशिरः । विपाव्यांनशुर्धियंः ॥ ३ ॥

एते । पूताः । विपःऽचितंः । सोमांसः ।
दधिऽआशिरः । विपा । वि । आनशुः । धियंः ॥ ३ ॥

एते सोमासः सोमाः पूताः शुद्धाः विपश्चितः प्राज्ञाः दध्याशिरोदध्याश्रयणाः विपा प्रज्ञानेन धियोस्मदीयानि कर्माणि व्यानशुः व्याप्नुवन्ति ॥ ३ ॥

अथ चतुर्थी—

एतेमृष्टाअमर्त्याःससृवांसोनशश्रमुः । इयंक्षन्तःपथोरजंः ॥ ४ ॥

एते । मृष्टाः । अमर्त्याः । ससृऽवांसंः ।
न । शश्रमुः । इयंक्षन्तः । पथः । रजंः ॥ ४ ॥

एते सोमाः मृष्टाः दशापवित्रेण शोधिताः अमर्त्या अमरणधर्माणः ससृवांसो हविर्धानांसरन्तः पथोमार्गान् रजोलोकांश्च इयक्षन्तो गन्तुमिच्छन्तो न शश्रमुः न शाम्यन्ति ॥ ४ ॥

अथ पञ्चमी—

एतेपृष्ठानिरोदंसोर्विप्रयन्तोव्यांनशुः । उतेदमुत्तमंरजंः ॥ ५ ॥

एते । पृष्ठानि । रोदसोः । विऽप्रयन्तः । वि ।
आनशुः । उत । इदम् । उत्ऽतमम् । रजः ॥ ५ ॥

एते सोमाः रोदसोर्द्यावापृथिव्योः पृष्ठानि विप्रयन्तो विविधं गच्छन्तो व्यानशुः व्यामुवन्ति । उतापिच इदमुत्तमं रजोद्युलोकं व्यानशुः आहुतिद्वारेणेतिभावः । रोदसोरित्यत्रान्तरिक्षोऽभिमतः ॥ ५ ॥

अथ षष्ठी—

तन्तुंतन्वानमुत्तममनुप्रवतआशत । उतेदमुत्तमाय्यम् ॥ ६ ॥

तन्तुम् । तन्वानम् । उत्ऽतमम् । अनु । प्रऽवतः ।
आशत । उत । इदम् । उत्तमाय्यम् ॥ ६ ॥

तन्तुं यज्ञं तन्वानं उत्तमं उत्कृष्टं सोमं अन्वाशत । उतापिच इदं कर्म अनेन सोमेन उत्तमाय्यं उत्तमीकृतं अथवा तन्तुं तन्वानं सोमं प्रवतः अधःस्थिताः सर्वाअन्वाशत । उतेदमुत्तमाय्यं रजोद्युलोकइत्यर्थः सोप्यन्वश्नुते पृथिव्याचान्तरिक्षेण चोत्तमीकृतमुत्तमाय्यम् ॥ ६ ॥

अथ सप्तमी—

त्वंसोमपणिभ्यआवसुगव्यानिधारयः । ततंतन्तुमचिक्रदः ॥ ७ ॥ १२ ॥

त्वम् । सोम । पणिऽभ्यः । आ । वसु । गव्यानि ।
धारयः । ततम् । तन्तुम् । अचिक्रदः ॥ ७ ॥ १२ ॥

हेसोम त्वं पणिभ्योसुरेभ्योलुब्धकेभ्योवा सकाशात् गव्यानि गोहितानि वसु वसूनि गोयूथानि वसूनि चेतिवा आहृत्य धारयोधारयसि । तथा तन्तुं यज्ञं प्रति ततं विस्तृतं यथाभवति तथा अचिक्रदः शब्दमकार्षीः ॥ ७ ॥

॥ इति षष्ठस्याष्टमे द्वादशोवर्गः ॥ १२ ॥

सोमाअसृग्रमिति सप्तर्चं त्रयोविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । सोमाअसृग्रमित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा–

सोमाअसृग्रमाशवोमधोर्मदस्यधारया। अभिविश्वानिकाव्या॥१॥

सोमाः । असृग्रम् । आशवः । मधोः । मदस्य ।
धारया । अभि । विश्वानि । काव्या ॥ १ ॥

आशवः शीघ्राः सोमाः असृग्रं असृग्रन् सृज्यन्ते मधोर्मधुरस्य मदस्य मदकरस्य धारया असृग्रमितिसंबन्धः । किंप्रति उच्यते–अभिलक्षीकृत्य विश्वानि सर्वाणि काव्या काव्यानि स्तोत्राणि प्रतिस्तोत्रसमयइत्यर्थः ॥ १ ॥

अथ द्वितीया–

अनुप्रत्नासआयवःपदंनवीयोअक्रमुः। रुचेजनन्तसूर्यम् ॥ २ ॥

अनु । प्रत्नासः । आयवः । पदम् । नवीयः ।
अक्रमुः । रुचे । जनन्त । सूर्यम् ॥ २ ॥

प्रत्नासः पुराणाः केचिदाशवः शीघ्रगमनाः अश्वाः नवीयो नवतरं पदमन्वक्रमुः अनुक्रमन्ते । रूपकव्याहारेण सोमाःसूयन्ते रुचे दीप्त्यै सूर्यं जनन्त कुर्वन्ति दीप्तं कुर्वन्तीत्यर्थः। सोमाप्यायनेनहि चन्द्रोरोचते ॥ २ ॥

अथ तृतीया–

आपवमाननोभरार्योअदाशुषोगयम्। कृधिप्रजावतीरिषः॥ ३ ॥

आ । पवमान । नः । भर । अर्यः । अदाशुषः ।
गयम् । कृधि । प्रजाऽवतीः । इषः ॥ ३ ॥

हे पवमान सोम त्वं नोस्मभ्यं अर्यः अरेः अदाशुषः अप्रयच्छतो गयं गृहं गृहोपलक्षितं धनं आभर आहर । तथास्मभ्यं प्रजावतीरिषश्च कृधि कुरु ॥ ३ ॥

अथ चतुर्थी–

अभिसोमासआयवःपवन्तेमद्यंमदम्। अभिकोशंमधुश्चुतम् ॥ ४ ॥

अभि । सोमासः आयवः । पवन्ते । मद्यम् । मदम् ।
अभि । कोशम् । मधुऽश्चुतम् ॥ ४ ॥

आयवोमन्तारः सोमासः सोमाः मद्यं मदकरं मदं रसं अभिपवन्ते क्षरन्ति । तथा मधुश्चुतं मधुस्राविणं कोशं । रसाधारेण कोशशब्देन तत्रामिश्रितो रसोलक्ष्यते । तं अभिपवन्त इतिशेषः ॥ ४ ॥

अथ पंचमी–

सोमोअर्षतिधर्णसिर्दधानइन्द्रियंरसम् । सुवीरोअभिशस्तिपाः ॥ ५ ॥

सोमः । अर्षति । धर्णसिः । दधानः । इन्द्रियम् ।
रसम् । सुऽवीरः । अभिशस्तिऽपाः ॥ ५ ॥

सोमोअर्षति गच्छति । कीदृशः सः धर्णसिः धारकः जगतां तथा इन्द्रियं इन्द्रियवर्धकं रसं दधानोधारयन् सुवीरः सुवीर्यः अभिशस्तिपाः अभिशस्तेः पाता अभितोहिंसा ततोरक्षकइत्यर्थः । सोमपानं ब्रह्महत्यादिनिन्दामनुपाहीति मसिद्धं ॥ ५ ॥

अथ षष्ठी–

इन्द्रायसोमपवसेदेवेभ्यःसधमाद्यः । इन्दोवाजंसिषाससि ॥ ६ ॥

इन्द्राय । सोम । पवसे । देवेभ्यः । सधऽमाद्यः ।
इन्दो इति । वाजम् । । सिसाससि ॥ ६ ॥

हे सोम सधमाद्यः सधमादोयज्ञः तदर्हस्त्वं इन्द्राय देवेभ्यश्चान्येभ्यः पवसे क्षरसे । हे तादृशेन्दो सोम अस्मभ्यं वाजमन्नं सिषाससि दातुमिच्छसि ॥ ६ ॥

अथ सप्तमी–

अस्यपीत्वामदानामिन्द्रोवृत्राण्यप्रति । जघानजघनच्चनु ॥ ७ ॥ १३॥

अस्य । पीत्वा । मदानाम् । इन्द्रः । वृत्राणि ।
अप्रति । जघान । जघनत् । च । नु ॥ ७ ॥ १३ ॥

मदानां मदकराणां मध्ये अतिशयेन मदकरं अस्य अमुं सोमं पीत्वा वृत्राणि शत्रून् प्रतिगतः सन् इन्द्रोजघान हतवान् नु क्षिप्रं जघनच्च हन्तुचेदानीमिति ॥ ७ ॥

॥ इति षष्ठस्याष्टमे त्रयोदशोवर्गः ॥ १३ ॥

प्रसोमासइति सप्तर्चं चतुर्विंशं सूक्तं असितोदेवलोवाकाश्यपिः गायत्रीछन्दः सोमोदेवता प्र-सोमासइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

प्रसोमासोअधन्विषुःपवमानासइन्दवः । श्रीणानाअप्सुमृञ्जत ॥१॥

प्र । सोमासः अधन्विषुः । पवमानासः । इन्दवः ।

श्रीणानाः । अप्ऽसु । मृञ्जत ॥ १ ॥

सोमासः सोमाः पवमानासः पूयमाना इन्दवोदीप्ताः सोमाः प्राधन्विषुः धन्वतिर्गतिकर्मा प्रगच्छन्ति । किंच श्रीणानाः गोभिः श्रयमाणाः अप्सु वसतीवरीषु च मृजत मृज्यन्ते ॥ १ ॥

अथ द्वितीया—

अभिगावोअधन्विषुरापोनप्रवतायतीः । पुनानाइन्द्रमाशत ॥ २ ॥

अभि । गावः । अधन्विषुः । आपः । न । प्रऽवता । यतीः ।

पुनानाः । इन्द्रम् । आशत ॥ २ ॥

गावो गमनशीलाइन्दवः अभ्यधन्विषुः अभिगच्छन्ति दशापवित्रं । किमिव प्रवता प्र-वणवता देशेन यन्तीर्गच्छन्त्य आपोन आपइव पश्चात्पुनाना इन्द्रं प्रीणयितुं आशत व्याप्नुवन् आहुतिं प्रणाडचेन्द्रमेवव्याप्नुवन् ॥ २ ॥

अथ तृतीया—

प्रपवमानधन्वसिसोमेन्द्रायपातवे । नृभिर्यतोविनीयसे ॥ ३ ॥

प्र । पवमान । धन्वसि । सोम । इन्द्राय । पातवे ।

नृऽभिः । यतः । वि । नीयसे ॥ ३ ॥

हे पवमानसोम इन्द्रायेन्द्रस्य पातवे पानाय मधन्वसि मगच्छसि आहवनीयंप्रति हविर्धानात्। तदेवाह—नृभिर्नेतृभिर्ऋत्विग्भिर्यतो विनीतो विनीयसे हविर्धानात्। अथवा पवमान मधन्वसि पात्रं प्रति इन्द्रपानाय तदर्थं हविर्धानाद्विनीयसे ॥ ३ ॥

अथ चतुर्थी—

त्वंसो॑मनृ॒माद॑नः॒पव॑स्वचर्षणी॒सहे॑ । सस्नि॒र्योअ॑नु॒माद्यः॑ ॥ ४ ॥

त्वम् । सो॒म॒ । नृ॒ऽमाद॑नः । पव॑स्व । च॒र्ष॒णि॒ऽसहे॑ ।
सस्निः॑ । यः । अ॒नु॒ऽमाद्यः॑ ॥ ४ ॥

हे सोम त्वं नृमादनः नृणां मादयिता त्वं चर्षणीसहे चर्षणयोमनुष्यादिद्वारः तेषां समभिभवित्रे इन्द्राय पवस्व क्षर । यस्त्वं सस्निः शुद्धःअनुमाद्यः स्तुत्यः सपवस्वेति समन्वयः ॥ ४ ॥

अथ पञ्चमी—

इन्दो॒यदद्रि॑भिः॒सु॒तः॒प॒वित्रं॒परि॒धाव॑सि । अर॒मिन्द्र॑स्य॒धाम्ने॑ ॥ ५ ॥

इन्दो॒ इति॑ । यत् । अद्रि॑ऽभिः । सु॒तः । प॒वित्र॑म् ।
परि॒ऽधाव॑सि । अर॑म् । इन्द्र॑स्य । धाम्ने॑ ॥ ५ ॥

हे इन्दो त्वं यद्यदा अद्रिभिर्ग्रावभिः सुतोभिषुतः पवित्रं दशापवित्रं परिधावसि परिगच्छसि । तदा इन्द्रस्य धाम्ने स्थानायाधारकाय उदराय वा अरं पर्याप्तोभवसि ॥ ५ ॥

अथ षष्ठी—

पव॑स्ववृत्रहन्तमो॒क्थेभि॑रनु॒माद्यः॑ । शुचि॑ःपाव॒कोअद्भु॑तः ॥ ६ ॥

पव॑स्व । वृ॒त्र॒ह॒न्ऽत॒म॒ । उ॒क्थेभि॑ः ।
अ॒नु॒ऽमाद्यः॑ । शुचि॑ः । पा॒व॒कः । अद्भु॑तः ॥ ६ ॥

हे वृत्रहन्तम शत्रूणां अतिशयेन हन्तरिन्द्र त्वं पवस्व क्षर । कीदृशस्त्वं उक्थेभिः शस्त्रैः अनुमाद्यः स्तुत्यः शुचिः शुद्धः पावकः अन्यस्यशोधकः अद्भुतो महान् एवं महानुभावः पवस्व ॥ ६ ॥

अथ सप्तमी—

शुचिःपावकउच्यतेसोमःसुतस्यमध्वः । देवावीरघशंसहा ॥७॥१४॥

शुचिः । पावकः । उच्यते । सोमः । सुतस्य ।
मध्वः । देवऽअवीः । अघशंसऽहा ॥ ७ ॥ १४ ॥

सुतस्याभिषुतस्य मध्वः मदकरस्य बल्यात्मकः सोमोरसरूपः शुचिः स्वयं शुद्धः पावकः शोधकश्चोच्यते । तथा देवावीः देवानामविता तर्पयिता अघशंसहा अघं पापं शंसतीत्यघशंसा असुराः तेषां हन्तेति चोच्यते ॥ ७ ॥

॥ इति पष्ठस्याष्टमे चतुर्दशोवर्गः ॥ १४ ॥

॥ इति नवमे मंडले प्रथमोनुवाकः ॥ १ ॥

द्वितीयेनुवाके पट्त्रिंशत्सूक्तानि तत्र पवस्वेति पळ्चं प्रथमं सूक्तं दृळ्हच्युतनाम्नोगस्त्यपुत्रस्यार्पं गायत्रं पवमानसोमदेवताकं । अनुक्रान्तं च—पवस्वपट् दृळ्हच्युतआगस्त्यइति । गतोविनियोगः ।

तत्र प्रथमा—

पवस्वदक्षसाधनोदेवेभ्यःपीतयेहरे । मरुभ्योवायवेमदः ॥ १ ॥

पवस्व । दक्षऽसाधनः । देवेभ्यः । पीतये ।
हरे । मरुत्ऽभ्यः । वायवे । मदः ॥ १ ॥

हे हरे हरितवर्ण पापहर्तर्वा सोम दक्षसाधनः दक्षोबलं तस्यसाधको मदोमदकरश्च त्वं पवस्व क्षर देवेभ्यः इन्द्रादिभ्यः पीतये पानाय । तथा मरुद्भ्योवायवेच पीतये पवस्व ॥ १ ॥

अथ द्वितीया—

पवमानधियाहितो३भियोनिंकनिक्रदत् । धर्मणावायुमाविश ॥२॥

पवमान । धिया । हितः । अभि । योनिम् ।
कनिक्रदत् । धर्मणा । वायुम् । आ । विश ॥ २ ॥

हे पवमान सोम धिया कर्मणा अस्मद्व्यापारेण अंगुल्यावा हिवोभृतःसन् कनिक्रदत् शब्दंकुर्वन् योनिं स्थानं ग्रहं वा अभिविशेतिशेषः। तदेवाह धर्मणा कर्मणा वायुं वायुसंबंधिनं पात्रमित्यर्थः। तदाविश प्रविश ॥ २ ॥

अथ तृतीया–

सं देवैः शोभते वृषा कविर्योनावधिप्रियः। वृत्रहादेववीतमः ॥ ३ ॥

सम्। देवैः। शोभते। वृषा। कविः। योनौ।
अधि। प्रियः। वृत्रऽहा। देवऽवीतमः ॥ ३ ॥

अयं सोमः संशोभते देवैः सह योनौ स्थाने स्वीये अधिष्ठितः वृषा कामानां वर्षकः कविः क्रान्तप्रज्ञः प्रियः प्रियभूतः सर्वेषां। यद्वा प्रीणयिता वृत्रहा वृत्रस्यहन्ता देववीतमः अतिशयेन देवान् कामयमानः एवं महानुभावः सोमः संशोभते ॥ ३ ॥

अथ चतुर्थी–

विश्वारूपाण्याविशन्पुनानोयातिहर्यतः। यत्रामृतासआसते ॥४॥

विश्वा। रूपाणि। आऽविशन्। पुनानः।
याति। हर्यतः। यत्र। अमृतासः। आसते ॥ ४ ॥

विश्वा सर्वाणि रूपाणि आविशन् पुनानः पूयमानोहर्यतः कमनीयः हर्यगतिकान्त्योः। ईदृशोयाति गच्छति यत्रामृतासः अमृतादेवा आसते तिष्ठंति तं देशं याति ॥ ४ ॥

अथ पञ्चमी–

अरुषोजनयन्गिरःसोमःपवतआयुषक्। इन्द्रंगच्छन्कविक्रतुः॥५॥

अरुषः। जनयन्। गिरः। सोमः। पवते।
आयुषक्। इन्द्रम्। गच्छन्। कविऽक्रतुः ॥ ५ ॥

अरुष आरोचमानः सोमोगिरः शब्दान् जनयन् पवते क्षरति। किंकुर्वन् आनुषक् अनुषक्तमिन्द्रं गच्छन् व्याप्नुवन् कविक्रतुः क्रान्तप्रज्ञः ॥ ५ ॥

अथ षष्ठी—

आपवस्वमदिन्तमपवित्रंधारयाकवे। अर्कस्ययोनिमासदम् ॥६॥१५॥

आ । पवस्व । मदिन्ऽतम । पवित्रम् । धारया ।
कवे । अर्कस्य । योनिम् । आऽसदम् ॥ ६ ॥ १५ ॥

हे मदिन्तम मादयितृतम कवे क्रान्तप्रज्ञ सोम त्वं पवित्रं अतिक्रम्य धारया आपवस्व। किमर्थं अर्कस्यार्चनीयस्येन्द्रस्य योनिं स्थानं आसदं प्राप्तुम् ॥ ६ ॥

॥ इति षष्ठस्याष्टमे पञ्चदशोवर्गः ॥ १५ ॥

तममृक्षन्तेति षळृचं द्वितीयंसूक्तं दृळ्हच्युतपुत्रस्य इध्मवाहनाम्नआर्षं गायत्रं पवमानसोमदेवताकं। अनुक्रान्तंच—तममृक्षन्तेध्मवाहो दार्ढच्युतइति। गतोविनियोगः।

तत्र प्रथमा—

तममृक्षन्तवाजिनमुपस्थेअदितेरधि। विप्रासोअण्व्याधिया ॥१॥

तम् । अमृक्षन्त । वाजिनम् । उपऽस्थे ।
अदितेः । अधि । विप्रासः । अण्व्या । धिया ॥ १ ॥

तं वाजिनमश्वं अश्ववदाशुं व्याप्तमित्यर्थः अदितेः पृथिव्याउपस्थे उत्संगे अधीति सप्तम्यर्थानुवादी। अमृक्षन्त शोधितवन्तः। के विप्रासो मेधाविनोध्वर्य्वादयः। केन साधनेन अण्व्या अंगुल्या धिया प्रज्ञया स्तुत्या वा अमृक्षन्त अथवा अण्व्या सूक्ष्मया धिया अंगुल्येति विशेष्यविशेषणभावः ॥ १ ॥

अथ द्वितीया—

तंगावोअभ्यनूषतसहस्रधारमक्षितम्। इन्दुंधर्तारमादिवः ॥ २ ॥

तम् । गावः । अभि । अनूषत । सहस्रऽधारम् ।
अक्षितम् । इन्दुम् । धर्तारम् । आ । दिवः ॥ २ ॥

तं सोमं गावोगंत्र्यः स्तुतयः अभ्यनूषत अस्तुवन्। कीदृशं तं सहस्रधारं बहुधारं अक्षितं अक्षीणं इन्दुं दीप्तं दिवोद्युलोकस्य आधर्तारं सर्वतोधारकं सोमाधारत्वात् द्युलोकवासिनां संस्थानस्य ॥ २ ॥

अथ तृतीया–

तंवे॒धांमे॒धया॑ह्यन्पव॑मान॒मधि॒द्यवि॑ । ध॒र्णसिं॒भूरि॑धायसम् ॥ ३ ॥

तम् । वे॒धाम् । मे॒धया॑ । अ॒ह्य॒न् । पव॑मानम् ।
अधि॑ । द्यवि॑ । ध॒र्णसि॑म् । भूरि॑ऽधायसम् ॥ ३ ॥

वेधां विधातारं पवमानं तं मेधया प्रज्ञया अह्यन् प्रहिन्वन्ति कं प्रति अधिद्यवि द्युलोकं प्रति । पुनः कीदृशं धर्णसिं सर्वस्यधारकं भूरिधायसं बहूनां कर्तारं ॥ ३ ॥

अथ चतुर्थी–

तम॑ह्यन्भु॒रिजो॑र्धि॒यासं॒वसा॑नं॒विव॑स्वतः । पतिं॑वा॒चोअदा॑भ्यम् ॥ ४ ॥

तम् । अ॒ह्य॒न् । भु॒रिजोः॑ । धि॒या । सम्ऽव॑सानम् ।
वि॒वस्व॑तः । पति॑म् । वा॒चः । अदा॑भ्यम् ॥ ४ ॥

तं सोमं विवस्वतः परिचरतः ऋत्विजोभुरिजोर्बाह्वोर्धिया अंगुल्या अह्यन् प्राहिन्वन् । कीदृशं तं संवसानं वसन्तं पात्रे । वाचः स्तुतेःपतिं स्वामिनं अदाभ्यं अदंभनीयम् ॥ ४ ॥

अथ पंचमी–

तंसाना॒वधि॑जा॒मयो॒हरिं॑हिन्व॒न्त्यद्रि॑भिः । ह॒र्य॒तंभूरि॑चक्षसम् ॥ ५ ॥

तम् । सानौ॑ । अधि॑ । जा॒मयः॑ । हरि॑म् । हि॒न्व॒न्ति॒ ।
अद्रि॑ऽभिः । ह॒र्य॒तम् । भूरि॑ऽचक्षसम् ॥ ५ ॥

तं सोमं हरिं हरितवर्णं सानावधि समुच्छ्रितेदेशे अधीति सप्तम्यर्थानुवादी जामयोंगुल्यः हिन्वंति प्रेरयन्ति अधिषुण्वंत्यद्रिभिर्ग्रावभिः । कीदृशं हर्यतं कमनीयं भूरिचक्षसं बहुद्रष्टारं ॥ ५ ॥

अथ षष्ठी–

तंत्वांहिन्वन्तिवेधसःपर्वमानगिराद्धर्धम् । इन्दुविन्द्रायमत्सरम्॥६॥१६॥

तम् । त्वा । हिन्वन्ति । वेधसः । पर्वमान ।
गिराऽवृधम् । इन्दो इति । इन्द्राय । मत्सरम् ॥ ६ ॥ १६ ॥

हे पवमानसोम उक्तगुणविशिष्टं तं त्वा त्वां हिन्वन्ति प्रेरयन्ति कस्मै इन्द्राय के वेधसो-विधातारऋत्विजः । कीदृशं त्वां गिरावृधं स्तुत्या वर्धमानं इंदुं दीप्तं सरूपं वा मत्सरं मद-करं ॥ ६ ॥

॥ इति पञ्चस्याष्टमे षोडशोवर्गः ॥ १६ ॥

एपकविरिति षळृचं तृतीयं सूक्तं नृमेधनाम्नआंगिरसस्यार्षं गायत्रं सौम्यं । एषकविर्नृ-मेधइत्यनुक्रान्तं । उक्तोविनियोगः ।

तत्र प्रथमा–

एषकविरभिष्टुतःपवित्रेअधितोशते । पुनानोघ्नन्नपस्त्रिधः ॥ १ ॥

एषः । कविः । अभिऽस्तुतः । पवित्रे । अधि ।
तोशते । पुनानः । घ्नन् । अप॑ । स्त्रिधः ॥ १ ॥

एषसोमः कविर्मेधावी अभिष्टुतः अभितः स्तुतः पवित्रेअधि दशापवित्रमतीत्य तोशते । गच्छतीत्यर्थः । अथवा यद्यपि तोशतिर्वधकर्मा तथापि हनने गतिसद्भावादत्र गतिमात्रेवर्तते गच्छतीत्यर्थः । किंकुर्वन् पुनानः पूयमानः स्त्रिधः पवित्रेअधि कृष्णाजिने तोशते हन्यते पीड्यवइत्यर्थः । किंकुर्वन् पुनानः पूयमानः स्त्रिधः शत्रूनपघ्नन् अपगमयन् ॥ १ ॥

अथ द्वितीया–

एषइन्द्रायवायवेस्वर्जित्परिषिच्यते । पवित्रेदक्षसाधनः ॥ २ ॥

एषः । इन्द्राय । वायवे । स्वःऽजित् । परि ।
सिच्यते । पवित्रे । दक्षऽसाधनः ॥ २ ॥

एषसोमः स्वर्जित् स्वर्गस्य सर्वस्य वा जेता सोम इन्द्राय वायवेच पवित्रे परिषिच्यते। कीदृश एषदक्षसाधनः बलकारी ॥ २ ॥

अथ तृतीया—

एषनृभिर्विनीयतेदिवोमूर्धावृषासुतः। सोमोवनेषुविश्ववित् ॥ ३ ॥

एषः। नृऽभिः। वि। नीयते। दिवः। मूर्धा।
वृषा। सुतः। सोमः। वनेषु। विश्वऽवित् ॥ ३ ॥

एषसोमो नृभिः कर्मनेतृभिः ऋत्विग्भिर्विनीयते विविधं नीयते। एष कीदृशः दिवोद्युलोकस्य मूर्धा शिरोवत्प्रधानभूतः वृषा अभिमतवर्षकः सुतोभिषुतः। कुत्र नीयते वनेषु वननीयेषु पात्रेषु वनसंभूतद्रुमविकारेषुवा पात्रेषु। विश्ववित् सर्वज्ञएषइति समन्वयः ॥ ३ ॥

अथ चतुर्थी—

एषगव्युरचिक्रदत्पवमानोहिरण्ययुः। इन्दुःसत्राजिदस्तृतः ॥ ४ ॥

एषः। गव्युः। अचिक्रदत्। पवमानः।
हिरण्यऽयुः। इन्दुः। सत्राऽजित्। अस्तृतः ॥ ४ ॥

एषसोमः पवमानः पूयमानः अचिक्रदत् शब्दंकरोति। कथंभूतःसन् गव्युः अस्माकं गाइच्छन् हिरण्ययुः धनमिच्छन् इन्दुर्दीप्तःसन् सत्राजित् महतः शत्रोरसुरादेर्जेता अस्तृतः स्वयमन्यैरहिंस्यश्चसन् ॥ ४ ॥

अथ पञ्चमी—

एषसूर्येणहासतेपवमानोअधिद्यवि। पवित्रेमत्सरोमदः ॥ ५ ॥

एषः। सूर्येण। हासते। पवमानः। अधि।
द्यवि। पवित्रे। मत्सरः। मदः ॥ ५ ॥

एषपवमानः पूयमानः सोमः सूर्येण देवेन अधिद्यवि द्युलोकेन्तरिक्षे पवित्रे हासते परिस्पन्दते मत्सरो मदकरः मदः सोमः यथाध्वर्युहस्ताद्दशापवित्रे परिपतति सोमः तथापि

अन्तरिक्षे सूर्येण पवित्रेत्यप्यतइति भावना वीर्यबलाय। सत्स्वप्यन्यदेवेषु सोमस्रावणे सूर्यस्य कःप्रसंगइति नवाच्यं सूर्यरश्मिभिरेव सोमस्याप्यायनात् ॥ ५ ॥

अथ षष्ठी–

एषशुष्म्यसिष्यददुन्तरिक्षेवृषाहरिः। पुनानइन्दुरिन्द्रमा ॥६॥१७॥

एषः। शुष्मी। असिष्यदत्। अन्तरिक्षे। वृषा।
हरिः। पुनानः। इन्दुः। इन्द्रम्। आ ॥ ६ ॥ १७ ॥

एषशुष्मी बलवान्सोमोन्तरिक्षे दशापवित्रे असिष्यदत् स्यन्दते। कीदृशएषः वृषा वर्षको-हरिर्हरितवर्णः पुनानः पूयमानइन्दुर्दीप्तश्च इन्द्रमा इन्द्रंचाभिगच्छतीतिशेषः। आइतिचार्थे ॥ ६ ॥

॥ इति षष्ठस्याष्टमे सप्तदशोवर्गः ॥ १७ ॥

एषवाजीति षळृचं चतुर्थं सूक्तं प्रियमेधस्यार्षं गायत्रं सौम्यं। एषवाजीप्रियमेधइत्यनुक्रान्तं। गतोविनियोगः।

तत्र प्रथमा–

एषवाजीहितोनृभिर्विश्वविन्मनसस्पतिः। अव्योवारंविधावति ॥ १ ॥

एषः। वाजी। हितः। नृऽभिः। विश्वऽवित्। मनसः।
पतिः। अव्यः। वारम्। वि। धावति ॥ १ ॥

एषसोमो वाजी गमनशीलो नृभिः हितः अध्वर्युभिः पात्रेनिहितः विश्ववित् सर्वज्ञः मनसः स्तोत्रस्य पतिः स्वामी। अथवा सोमस्यमनोभिमानित्वात् मनसः स्वामित्वं। चन्द्रमा मनोभूत्वा हृदयं प्राविशदितिश्रुतेः। तादृशोसौ अव्योवारं अवेर्वालं दशापवित्रं विधावति विविधं गच्छति ॥ १ ॥

अथ द्वितीया–

एषपवित्रेअक्षरत्सोमोदेवेभ्यःसुतः। विश्वाधामान्याविशन् ॥ २ ॥

१ ऐतरेयोपनिषत्.।

एषः । पवित्रे । अक्षरत् । सोमः । देवेभ्यः । सुतः ।
विश्वा । धामानि । आऽविशन् ॥ २ ॥

एषसोमो देवेभ्यो देवार्थं सुतोभिषुतःसन् पवित्रेअक्षरत् स्रवति । विश्वा सर्वाणि धामानि देवशरीराणि आविशन् प्रविशन् प्रवेष्टुमित्यर्थः ॥ २ ॥

अथ तृतीया—

एषदेवःशुभायतेधियोनावमर्त्यः । वृत्रहादेववीतमः ॥ ३ ॥

एषः । देवः । शुभायते । अधि । योनौ ।
अमर्त्यः । वृत्रऽहा । देवऽवीतमः ॥ ३ ॥

एषसोमोदेवः शुभायते शोभते कुत्र अधियोनौ स्वीये स्थाने । कीदृशएषः अमर्त्यः अमरणधर्मा वृत्रहा शत्रुहन्ता देववीतमो विशेषेण देवानां कामयिता ॥ ३ ॥

अथ चतुर्थी—

एषवृषाकनिक्रदद्दशभिर्जामिभिर्यतः । अभिद्रोणानिधावति ॥ ४ ॥

एषः । वृषा । कनिक्रदत् । दशऽभिः । जामिऽभिः ।
यतः । अभि । द्रोणानि । धावति ॥ ४ ॥

एषसोमः वृषा वर्षिता कामानां कनिक्रदत् शब्दंकुर्वन् दशभिर्जामिभिरंगुलिभिः यतोधृतो द्रोणानि द्रुममयानि पात्राण्यभिधावति अभिगच्छति ॥ ४ ॥

अथ पंचमी—

एषसूर्यमरोचयत्पवमानोविचर्षणिः । विश्वाधामानिविश्ववित् ॥ ५ ॥

एषः । सूर्यम् । अरोचयत् । पवमानः ।
विऽचर्षणिः । विश्वा । धामानि । विश्वऽवित् ॥ ५ ॥

एषसोमः सूर्यमरोचयत् रोचयति स्वरसेन । पवमानः पूयमानो विचर्षणिः सर्वस्य द्रष्टा विश्ववित् सर्ववित् । नकेवलं सूर्यं किंतु विश्वा सर्वाणि धामानि तेजःस्थानानि रोचयति ॥ ५ ॥

अथ षष्ठी—

एषशुष्म्यदाभ्यःसोमःपुनानोअर्षति। देवावीरघशंसहा ॥६॥१८॥

एषः । शुष्मी । अदाभ्यः । सोमः । पुनानः ।

अर्षति । देवऽअवीः । अघशंसऽहा ॥ ६ ॥ १८ ॥

एषसोमः शुष्मी बलवान् अदाभ्यः अदंभनीयः पुनानः पूयमानः अर्षति गच्छति देवावीर्देवानामविता अघशंसहा अघान् शंसतीत्यघशंसास्तेषां हन्ता ॥ ६ ॥

॥ इति पञ्चस्याष्टमेऽष्टादशोवर्गः ॥ १८ ॥

प्रास्येति षळृचं पंचमं सूक्तं नृमेधस्यांगिरसस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रम्यतेच—प्रास्यनृमेधइति । गतोविनियोगः ।

तत्र प्रथमा—

प्रास्यधाराअक्षरन्वृष्णःसुतस्यौजसा। देवाँअनुप्रभूषतः ॥ १ ॥

प्र । अस्य । धाराः । अक्षरन् । वृष्णः । सुतस्य ।

ओजसा । देवान् । अनु । प्रऽभूषतः ॥ १ ॥

अस्य सोमस्य वृष्णोवर्षकस्य सुतस्याभिषुतस्य देवाननु प्रभूषतः प्रभवितुमिच्छतः ओजसा स्ववीर्येण धाराः प्राक्षरन् प्रकर्षेण क्षरन्ति ॥ १ ॥

अथ द्वितीया—

सप्तिंमृजन्तिवेधसोगृणन्तःकारवोगिरा। ज्योतिर्जज्ञानमुक्थ्यम् ॥२॥

सप्तिम् । मृजन्ति । वेधसः । गृणन्तः । कारवः ।

गिरा । ज्योतिः । जज्ञानम् । उक्थ्यम् ॥ २ ॥

सप्तिं अश्वस्थानीयं सर्पणस्वभावं वा सोमं मृजन्ति शोधयन्ति । के गृणन्तः स्तुवन्तः वेधसोविधातारः कारवः कर्मकर्तारः अध्वर्य्वादयो गिरा स्तुत्या साधनेन । कीदृशं सप्तिं ज्योतिर्दीप्यमानं सोमं जज्ञानं जायमानं प्रवृद्धमित्यर्थः । अथवा ज्योतिर्जायमानं । अयंवैज्योतिर्मर्त्तोमइतिश्रुतेः । उक्थ्यं स्तुत्यं ॥ २ ॥

अथ तृतीया–

सुषहासोमतानितेपुनानायप्रभूवसो । वर्धासमुद्रमुक्थ्यम् ॥ ३ ॥

सुऽसहा । सोम । तानि । ते । पुनानाय । प्रभुवसो
इति प्रभुऽवसो । वर्ध । समुद्रम् । उक्थ्यम् ॥ ३ ॥

हे सोम प्रभुवसो प्रभूतधन पुनानाय पूयमानस्य ते तव तानि तेजांसि सुषहा शोभनानि भावुकानि । यस्मादेवं तस्मात् समुद्रं समुद्रसदृशं द्रोणकलशं उक्थ्यं स्तुत्यं तं वर्ध वर्धय रसेन ॥ ३ ॥

अथ चतुर्थी–

विश्वावसूनिसंजयन्पवस्वसोमधारया । इनुद्वेषांसिसध्र्यक् ॥ ४ ॥

विश्वा । वसूनि । सम्ऽजयन् । पवस्व । सोम ।
धारया । इनु । द्वेषांसि । सध्र्यक् ॥ ४ ॥

हे सोम विश्वा सर्वाणि वसूनि अस्मदर्थं संजयन् पवस्व क्षर । धारया द्वेषांसि द्वेष्याणि सर्वाणि सध्र्यक् सहैव इनु मेरय दूरदेशंप्रति ॥ ४ ॥

अथ पंचमी–

रक्षासुनोअररुषःस्वनात्समस्यकस्यचित् । निदोयत्रमुमुच्महे ॥ ५ ॥

रक्ष । सु । नः । अररुषः । स्वनात् । समस्य ।
कस्य । चित् । निदः । यत्र । मुमुच्महे ॥ ५ ॥

हे सोम नोस्मान् सु सुष्ठु रक्ष पालय । कस्मात् अररुषः अदातुः स्वनात् शब्दात् निंदारूपात् किमेकस्यादानशीलस्य न समस्य सर्वस्य योस्ति तस्य सर्वस्य कस्यचित् कंचन समुंचनित्यर्थः । नकेवलमदातुः स्वनात् किंतर्हि कस्यचित् कस्यापि निदो निंदकात् रक्ष । यत्र मुमुच्महे यस्मिन् रक्षणेसति वयं मुक्ताभवेम तेन रक्षणेन रक्षयेति ॥ ५ ॥

अथ षष्ठी—

एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया । द्युमन्तं शुष्ममा भर ॥६॥१९॥

आ । इन्दो इति । पार्थिवम् । रयिम् । दिव्यम् । पवस्व ।
धारया । द्युऽमन्तम् । शुष्मम् । आ । भर ॥ ६ ॥ १९ ॥

हे इन्दो क्रियमान सोम त्वं धारया आपवस्व सर्वतः क्षर । पार्थिवं दिव्यंच रयिं धनं द्युमन्तं दीप्तिमन्तं शुष्मं बलं चाभर आहरास्मभ्यं ॥ ६ ॥

॥ इति षष्ठस्याष्टमे एकोनविंशोवर्गः ॥ १९ ॥

प्रधाराइति षळृचं षष्ठं सूक्तं बिन्दुनाम्नआंगिरसस्यार्षं गायत्रं पवमानसोमदेवताकं । प्रधारोबिन्दुरित्यनुक्रमणिका । गतोविनियोगः ।

तत्र प्रथमा—

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति ॥१॥

प्र । धाराः । अस्य । शुष्मिणः । वृथा । पवित्रे ।
अक्षरन् । पुनानः । वाचम् । इष्यति ॥ १ ॥

शुष्मिणोबलवतोस्य सोमस्य धाराः पवित्रे दशापवित्रे वृथा अप्रयत्नेन प्राक्षरन् स्रवन्ति । तदानीं पुनानः पूयमानः सोमो वाचं स्तुतिं स्वीयं ध्वनिं वा इष्यति प्रेरयति ॥ १ ॥

अथ द्वितीया—

इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत् । इयर्ति वग्नुमिन्द्रियम् ॥ २॥

इन्दुः । हियानः । सोतृऽभिः । मृज्यमानः ।
कनिक्रदत् । इयर्ति । वग्नुम् । इन्द्रियम् ॥ २ ॥

अयमिन्दुर्दीप्तः सोमोहियानः प्रेर्यमाणोऽभ्यापियमाणः कैः सोतृभिर्ऋत्विग्भिः पश्चाद्दशापवित्रे मृज्यमानः शोध्यमानः कनिक्रदत् शब्दं कुर्वन् इन्द्रियमिन्द्रस्य संबन्धिनं इन्द्रियमपि करं वग्नुं शब्दमियर्ति प्रेरयति ग्रहणसमये ॥ २ ॥

अथ तृतीया—

आनःशुष्मंनृषाह्यंवीरवन्तंपुरुस्पृहम् । पवस्वसोमधारया ॥ ३ ॥

आ । नः । शुष्मम् । नृऽसह्यम् । वीरऽवन्तम् ।
पुरुऽस्पृहम् । पवस्व । सोम । धारया ॥ ३ ॥

हे सोम त्वं धारया आपवस्व । किं शुष्मं बलं । कीदृशं नृषाह्यं नृणामस्मद्विरोधिना-मभिभावुकं वीरवन्तं पुत्रोपेतं पुरुस्पृहं बहुभिः स्पृहणीयं नोस्माकं शुष्ममापवस्व एतस्यला-भाय पवस्वेत्यर्थः । रसस्त्रावेसति होमद्वारा तत्सिद्धे शुष्मं पवस्वेत्युपचर्यते ॥ ३ ॥

अथ चतुर्थी—

प्रसोमोअतिधारयापवमानोअसिष्यदत् । अभिद्रोणान्यासदम् ॥४॥

प्र । सोमः । अति । धारया । पवमानः ।
असिस्यदत् । अभि । द्रोणानि । आऽसदम् ॥ ४ ॥

अयं पवमानः सोमोधारया अति अतिक्रम्य दशापवित्रं प्रासिष्यदत् प्रस्यन्दते । कि-मर्थं द्रोणानि द्रोणकलशादीनि अभ्यासदं आसादनाय ॥ ४ ॥

अथ पञ्चमी—

अप्सुत्वामधुमत्तमंहरिंहिन्वन्त्यद्रिभिः । इन्दविन्द्रायपीतये ॥५॥

अप्ऽसु । त्वा । मधुमत्ऽतमम् । हरिम् ।
हिन्वन्ति । अद्रिऽभिः । इन्दो इति । इन्द्राय । पीतये ॥ ५ ॥

हे इन्दो सोम अप्सु वसतीवरीषूदकेषु मधुमत्तमं अतिशयेन मधुमन्तं हरिं हरितवर्णं त्वा त्वां अद्रिभिरभिषवग्रावभिर्हिन्वंति प्रेरयन्ति । किमर्थं इन्द्रायेन्द्रस्य पीतये पानाय ॥ ५ ॥

अथ षष्ठी—

सुनोतामधुमत्तमंसोममिन्द्रायवज्रिणे । चारुंशर्धायमत्सरम्॥६॥२०॥

सुनोत॑ । मधु॑मत्ऽतमम् । सोम॑म् । इन्द्रा॑य ।
वज्रिणे॑ । चारु॑म् । शर्धा॑य । म॒त्स॒रम् ॥ ६ ॥ २० ॥

हे ऋत्विजोयूयं मधुमत्तमं मधुररसोपेतं सोमं इन्द्राय वज्रिणे वज्रयुक्ताय सुनोत सुनुत । पुनःकीदृशं चारुं चरणीयं मत्सरं मदकरं शर्धायास्माकं बलाय इन्द्रस्य पानायच सोमं सुनुतेतिब्रूते यजमानः स्तोयान् ॥ ६ ॥

॥ इति षष्ठस्याष्टमे विंशोवर्गः ॥ २० ॥

प्रसोमासइति षळृचं सप्तमं सूक्तं राहूगणस्य गोतमस्यार्षं सौम्यं गायत्रं । प्रसोमासोगोतमइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा–

प्रसोमा॑सःस्वा॒ध्य१॒ः॑पव॑मानासोअक्रमुः । र॒यिंकृ॑ण्वन्ति॒चेत॑नम् ॥ १ ॥

प्र । सोमा॑सः । सु॒ऽआ॒ध्य॑ः । पव॑मानासः ।
अ॒क्र॒मु॒ः । र॒यिम् । कृ॒ण्व॒न्ति॒ । चेत॑नम् ॥ १ ॥

प्राक्रमुः प्रायच्छन्ति कलशंप्रति । केसोमासः सोमाः । कीदृशाः स्वाध्यः सुध्यानाः सुकर्माणोवा पवमानासः पूयमानाः चेतनं प्रज्ञापनं रयिं धनं कृण्वन्ति कुर्वंत्यस्माकम् ॥ १ ॥

अथ द्वितीया–

दि॒वस्पृ॑थि॒व्याअधि॒भवे॑न्दोद्यु॒म्नवर्ध॑नः । भवा॒वाजा॑नां॒पति॑ः ॥ २ ॥

दि॒वः । पृ॒थि॒व्याः । अधि॑ । भव॑ । इन्दो॒ इति॑ ।
द्यु॒म्न॒ऽवर्ध॑नः । भव॑ । वाजा॑नाम् । पति॑ः ॥ २ ॥

हे इन्दो वाजानामन्नानांपतिः स्वामी त्वं दिवोद्युलोकस्य पृथिव्या भूलोकस्यअधि द्युम्नवर्धनो द्योतमानस्य हिरण्यादिलक्षणधनस्य वर्धयिता भव अस्माकं लोकद्वये यत् द्युम्नमस्ति तस्य वर्धयिता भवास्मभ्यमित्यर्थः ॥ २ ॥

अथ तृतीया–

तुभ्यं॒वाता॑अभि॒प्रिय॒स्तुभ्य॑मर्षन्ति॒सिन्ध॑वः । सोम॒वर्ध॑न्ति॒तेमहः॑ ॥ ३ ॥

तुभ्य॑म् । वाताः॑ । अ॒भि॒ऽप्रियः॑ । तुभ्य॑म् ।
अ॒र्ष॒न्ति॒ । सिन्ध॑वः । सोम॑ । वर्ध॑न्ति । ते॒ । महः॑ ॥ ३ ॥

हे सोम तुभ्यं त्वदर्थं वाता वायवः अभिप्रियोभितर्पयितारोभवन्ति । तथा सिन्धवः स्यन्दमाना नद्यः तुभ्यं अर्षन्ति गच्छन्ति अभिषूयमाणस्य तवाप्यायनार्थेवं कुर्वन्तीत्यर्थः । तउभये अमी ते तव महो महत्वं वर्धन्ति वर्धयन्ति ॥ ३ ॥

अथ चतुर्थी–

आप्या॑यस्व॒सम॑तु॒तेवि॒श्वतः॑सोम॒वृष्ण्य॑म् । भवा॒वाज॑स्यसंग॒थे॥४॥

आ । प्या॒यस्व॒ । सम् । ए॒तु॒ । ते॒ । वि॒श्वतः॑ ।
सो॒म॒ । वृष्ण्य॑म् । भव॑ । वाज॑स्य । स॒म्ऽग॒थे ॥ ४ ॥

हे सोम त्वं वायुभिरद्भिश्चाप्यायस्व प्रवृद्धोभव । ते त्वां विश्वतोवृष्ण्यं वर्षयोग्यं बलं समेतु संगच्छतां । संगथे संग्रामे वाजस्यान्नस्य मापको भव ॥ ४ ॥

अथ पञ्चमी–

तुभ्यं॒गावो॑घृ॒तंपयो॒बभ्रो॑दुदु॒ह्रेअक्षि॑तम् । वर्षि॑ष्ठे॒अधि॒सान॑वि ॥ ५॥

तुभ्य॑म् । गाव॑ः । घृ॒तम् । पयः॑ । बभ्रो॒ इति॑ ।
दु॒दु॒ह्रे । अक्षि॑तम् । वर्षि॑ष्ठे । अधि॑ । सान॑वि ॥ ५ ॥

हे बभ्रो बभ्रुवर्ण सोम तुभ्यं त्वदर्थं गावोघृतं पयश्च अक्षितं अक्षीणं दुदुह्रे दुहते वर्षिष्ठे प्रवृद्धे अधिसानवि समुच्छ्रिते प्रदेशे स्थिताय तुभ्यं ॥ ५ ॥

अथषष्ठी–

स्वा॒यु॒धस्य॑तेस॒तोभुव॑नस्यपते॒वय॑म । इन्दो॑सखि॒त्वमु॑श्मसि ॥६॥२१॥

सु॒ऽआ॒यु॒धस्य॑ । ते॒ । स॒तः । भुव॑नस्य । प॒ते॒ ।
व॒यम् । इन्दो॒ इति॑ । स॒खि॒ऽत्वम् । उ॒श्म॒सि॒ ॥ ६ ॥ २१ ॥

हे भुवनस्य भूतजातस्य पते स्वामिन् पालक सोम। सोमस्य जगदाप्यायकत्वं तत्स्वामित्वं। हे इन्द्रो सोम वयं अनुष्ठातारः स्वायुधस्य ते तव सतः सखित्वमुश्मसि कामयामहे ॥६॥

॥ इति पञ्चस्याष्टमे एकविंशोवर्गः ॥ २१ ॥

प्रसोमासइति षळ्चमष्टमं सूक्तं आत्रेयस्य श्यावाश्वस्यार्षं गायत्रं सौम्यं। अनुक्रम्यतेच—प्रसोमासःश्यावाश्वइति। गतोविनियोगः।

तत्र प्रथमा—

प्रसोमासोमदच्युतःश्रवसेनोमघोनः। सुताविदथेअक्रमुः ॥ १ ॥

प्र। सोमासः। मदऽच्युतः। श्रवसे। नः।
मघोनः। सुताः। विदथे। अक्रमुः ॥ १ ॥

सोमासः सोमा मदच्युतो मदस्राविणः सुताअभिषुताः सन्तो विदथे यज्ञे मघोनो हविष्मतो नोस्मान् श्रवसे अन्नाय कीर्तयेवा प्राक्रमुः प्रगच्छन्ति ॥ १ ॥

अथ द्वितीया—

आदींत्रितस्ययोषणोहरिंहिन्वन्त्यद्रिभिः। इन्दुमिन्द्रायपीतये॥२॥

आत्। ईम्। त्रितस्य। योषणः। हरिम्। हिन्वन्ति।
अद्रिऽभिः। इन्दुम्। इन्द्राय। पीतये ॥ २ ॥

आत् अपिच ईं एनं हरिं हरितवर्णं सोमं त्रितस्य ऋषेर्योषणोंगुलय अद्रिभिर्ग्रावभिः हिन्वन्ति प्रेरयन्ति। किमर्थं इन्दुं दीप्तं सोमं इन्द्राय इन्द्रस्य पीतये पानाय ॥ २ ॥

अथ तृतीया—

आदींहंसोयथागणंविश्वस्यावीवशन्मतिम्। अत्योनगोभिरज्यते॥३॥

आत्। ईम्। हंसः। यथा। गणम्। विश्वस्य।
अवीवशत्। मतिम्। अत्यः। न। गोभिः। अज्यते ॥ ३ ॥

आत् अपिच ईमयं सोमो हंसो यथा गणं जनसंघं स्वगतिविशेषेण स्वनेन वा प्रविशति तद्वद्विश्वस्य सर्वस्य स्तोतृजनस्य मतिं स्तुतिं बुद्धिं वा अवीवशत् वशं नयति । सच सोमः अत्योन अश्वइव गोभिर्गव्यैरुदकैर्वा अज्यते सिच्यते स्निग्धीक्रियते ॥ ३ ॥

अथ चतुर्थी—

उभेसोमावचाकशन्मृगोनतक्तोअर्षसि । सीदंन्नृतस्ययोनिमा ॥४॥

उभे इति । सोम । अवऽचाकशत् । मृगः । न ।
तक्तः । अर्षसि । सीदंन् । ऋतस्यं । योनिम् । आ ॥ ४ ॥

हे सोम उभे द्यावापृथिव्यौ अवचाकशत् पश्यतिकर्मैतत् पश्यन् मृगोन मृगइव तक्तोगव्यैः पयआदिभिर्मिश्रितःसन् । दध्ना तनक्तीत्यादौ तथा दृष्टत्वात् । अर्षसि गच्छसि च । किं कुर्वन् ऋतस्य यज्ञस्य योनिं स्थानं आसीदन् आश्रयन् गच्छसि यज्ञसाधनाय गच्छसीत्यर्थः ॥ ४ ॥

अथ पञ्चमी—

अभिगावोअनूषतयोषाजारमिवप्रियम् । अगन्नाजिंयथाहितम् ॥५॥

अभि । गावः । अनूषत । योषां । जारम्ऽइंव ।
प्रियम् । अगंन् । आजिम् । यथां । हितम् ॥ ५ ॥

हे सोम त्वां गावः शब्दाः अभ्यनूषत अभिष्टुवन्ति । योषा प्रियं जारमिव सा यथा तं स्तौति तद्वत् । ससोमः आजिं गंतव्यं हितं मित्रमिव तं यथा अन्यः अगन् स्वहिताय गच्छति तद्वत् । अथवा हितं धनप्रापकत्वेन हितकरं वा आजिं शूरइव अयमागच्छति पात्रं ॥५॥

अथ षष्ठी—

अस्मेधेहिद्युमद्यशोमघवंभ्यश्चमह्यंच । सनिंमेधामुतश्रवंः ॥६॥२२ ॥

अस्मे इति । धेहि । द्युऽमत् । यशः । मघवंतऽभ्यः ।
च । मह्यंम् । च । सनिम् । मेधाम् । उत । श्रवंः ॥ ६ ॥ २२ ॥

हे सोम अस्मे अस्मभ्यं द्युमत् दीप्तिमत् यशोन्नं धेहि देहि । कीदृशेभ्योस्मभ्यं मघवद्भ्यश्च हविर्लक्षणान्नवद्भ्यश्च महंच स्तुतिकर्त्रेच । अथवा मह्यमस्मभ्यमित्यर्थः । अस्मे मघवद्भ्यश्च महंचेति तेषामेवाशंसनाभेदादुभयत्र चशब्दोयुक्तः । किंच सनिं धनं मेधां प्रज्ञां उतापिच श्रवः कीर्तिं च धेहि ॥ ६ ॥

॥ इति षष्ठस्याष्टमे द्वाविंशोवर्गः ॥ २२ ॥

प्रसोमासइति षळृचं नवमं सूक्तं त्रितस्यार्षं गायत्रं पवमानसोमदेवताकं । प्रसोमासस्त्रितइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

प्रसोमा॑सोविप॒श्चितो॒पां॑नयं॑न्त्यू॒र्मयः॑ । वना॑निमहि॒षाइ॑व ॥ १ ॥

प्र । सोमा॑सः । वि॒पः॒ऽचितः॑ । अ॒पाम् । न ।
य॒न्ति॒ । ऊ॒र्मयः॑ । वना॑नि । म॒हि॒षाःऽइ॑व ॥ १ ॥

विपश्चितोमेधाविनः सोमासः सोमाः प्रयन्ति प्रगच्छन्ति पात्राणिप्रति । किमिव अपामूर्मयः न । तेयथा सन्ततमुद्भवन्ति तद्वत् । बाहुल्येअयं दृष्टान्तः । दर्शितो गमनेदृष्टान्तान्तरमभिधीयते—वनानि महिषाः प्रवृद्धा मृगाइव । अथवा स्वाश्रयात् प्रपतने प्रथमोदृष्टान्तः द्वितीयस्तु दशापवित्रादधः प्रवेशे ॥ १ ॥

अथ द्वितीया—

अ॒भिद्रोणा॑निब॒भ्रवः॑शु॒क्रा ऋ॒तस्य॒धार॑या । वाजं॒गोम॑न्तमक्षरन् ॥ २ ॥

अ॒भि । द्रोणा॑नि । ब॒भ्रवः॑ । शु॒क्राः । ऋ॒तस्य॑ ।
धार॑या । वाज॑म् । गोऽम॑न्तम् । अ॒क्ष॒रन् ॥ २ ॥

उपसर्गश्रुतेरुचितक्रियाध्याहारः । प्रति द्रोणानि द्रोणकलशान् यद्य-
अभि क्षरन्तीविशेषः । उपसर्गश्रुतेरुचितक्रियाध्याहारः । प्रति द्रोणानि द्रोणकलशान् यद्यपि द्रोणकलशएकएव तथापि तत्प्राधान्यादितरेपिपात्रा द्रोणाइत्युच्यन्ते अथवैकस्मिन्नेव पूजार्थं बहुवचनं । के बभ्रवो बभ्रुवर्णाः सोमाः शुक्रादीप्ताः । केन प्रकारेण ऋतस्यामृतस्य धारया धाराकारेण । किंच वाजमन्नं गोमन्तं बहुगोयुक्तं अक्षरन् क्षरन्ति अस्माकं अथवैकमेववाक्यं उक्तविधाः सोमाः द्रोणान् प्रत्यक्षरन् धारया किंकुर्वन्तो गोमन्तं वाजं प्रयच्छन्तइत्यर्थः ॥ २ ॥

अथ तृतीया—

सुताइन्द्रा॑यवा॒यवे॒वरु॑णायम॒रुद्भ्यः॑ । सोमा॑अर्षन्ति॒विष्ण॑वे ॥ ३ ॥

सु॒ताः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय ।
म॒रुत्ऽभ्यः॑ । सोमाः॑ । अ॒र्ष॒न्ति॒ । विष्ण॑वे ॥ ३ ॥

सुता अभिषुताः सोमाः इन्द्राय इन्द्रार्थं वायवेच वरुणायच मरुद्भ्यश्च विष्णवेच एषा-मर्थं अर्षन्ति गच्छन्ति ॥ ३ ॥

अथ चतुर्थी—

ति॒स्रोवाच॒उदी॑रते॒गावो॑मिमन्ति॒धे॒नवः॑ । हरि॑रेति॒कनि॑क्रदत् ॥ ४ ॥

ति॒स्रः । वाचः॑ । उत् । ई॒र॒ते॒ । गावः॑ । मि॒म॒न्ति॒ ।
धे॒नवः॑ । हरिः॑ । ए॒ति॒ । कनि॑क्रदत् ॥ ४ ॥

तिस्रोवाचः ऋगादिभेदेन त्रिविधास्तुतिरुदीरते मोदमयन्ति ऋत्विजः । धेनवः आशिरेण प्रीणयिष्योगावः मिमन्ति शब्दयन्ति दोहार्थं । हरिर्हरितवर्णश्च सोमः कनिक्रदच्छब्दंकुर्वन्नेति गच्छति कलशं ॥ ४ ॥

अथ पञ्चमी—

अ॒भिब्र॒ह्मीर॑नूषतय॒ह्वीरृ॒तस्य॑मा॒तरः॑ । म॒र्मृ॒ज्यन्ते॑दि॒वःशिशु॑म् ॥ ५ ॥

अ॒भि । ब्र॒ह्मीः । अ॒नू॒ष॒त॒ । य॒ह्वीः । ऋ॒तस्य॑ ।
मा॒तरः॑ । म॒र्मृ॒ज्यन्ते॑ । दि॒वः । शिशु॑म् ॥ ५ ॥

ब्रह्मीर्ब्राह्मणप्रेरिताः यह्वीर्महत्यः यह्वइतिमहन्नाम ऋतस्य यज्ञस्य मातरोनिर्मात्र्यः स्तुत-योऽभ्यनूषत स्तुवन्ति । किं दिवोद्युदेवतायाः शिशुं शिशुस्थानीयं सोमं तमेव मर्मृज्यन्ते मृज-न्ति । एतीपस्यामितोदिवि सोमआसीदित्यादिश्रुतेः । द्युशिशुत्वं तस्य ॥ ५ ॥

---

१ तै० ब्रा० ३. २. १.

अथ षष्ठी–

रा॒यःस॑मु॒द्राँश्च॒तुरो॒ऽस्मभ्यं॑सोमवि॒श्वतः॑ । आप॑वस्वसह॒स्रिणः॑ ॥६॥२३॥

रा॒यः । स॒मु॒द्रान् । च॒तुरः॑ । अ॒स्मभ्य॑म् । सो॒म॒ ।
वि॒श्वतः॑ । आ । प॒व॒स्व॒ । स॒ह॒स्रिणः॑ ॥ ६ ॥ २३ ॥

रायो धनस्य संबन्धिनः चतुरः समुद्रान् धनपूर्णानित्यर्थः तादृशान्समुद्रानस्मभ्यमर्थाय हे सोम विश्वतः सर्वतः आपवस्व । तथा सहस्रिणः अपरिमितान्कामानापवस्व आयच्छ । चतुःसमुद्रस्थधनविशेषप्राप्तेः तन्मध्यगतभूमिस्वामित्वमन्तरेणासंभवाच्चतुःसमुद्रमुद्रितभूमंडलस्वामित्वमेवाशास्ते यजमानः ॥ ६ ॥

॥ इति षष्ठस्याष्टमे त्रयोविंशोवर्गः ॥ २३ ॥

प्रसुवानइति षळृचं दशमं सूक्तं श्यावाश्वस्यार्षं पूर्ववत् । प्रसुवानइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा–

प्रसु॒वा॒नोधार॑या॒तनेन्दु॑र्हि॒न्वा॒नोअ॑र्षति । रु॒जद्दृ॒ळ्हाव्योज॑सा ॥ १॥

प्र । सु॒वा॒नः । धार॑या । तना॑ । इन्दुः॑ । हि॒न्वा॒नः ।
अ॒र्ष॒ति॒ । रु॒जत् । दृ॒ळ्हा । वि । ओज॑सा ॥ १ ॥

इंदुः सोमः सुवानः सूयमानः हिन्वानोध्वर्युणा प्रेर्यमाणो धारया तना पवित्रं प्रार्षति गच्छति । अथ प्रत्यक्षेणोच्यते दृह्ळा दृढान्यपि शत्रुपुराणि ओजसा बलेन विरुजत् विरुजति विश्लथयति ॥ १ ॥

अथ द्वितीया–

सु॒तइन्द्रा॑यवा॒यवे॒वरु॑णायम॒रुद्भ्यः॑ । सोमो॑अर्षति॒विष्ण॑वे ॥ २ ॥

सु॒तः । इन्द्रा॑य । वा॒यवे॑ । वरु॑णाय ।
म॒रुत्ऽभ्यः॑ । सोमः॑ । अ॒र्ष॒ति॒ । विष्ण॑वे ॥ २ ॥

अयं सुतोभिषुतः सोम इन्द्रायर्थं अर्षति गच्छति इन्द्राय वायवे वरुणाय मरुद्भ्यश्च विष्णवेच अर्षति गच्छति ॥ २ ॥

अथ तृतीया–

वृषाणंवृषभिर्यतंसुन्वन्तिसोममद्रिभिः। दुहन्तिशक्मनापयः॥३॥

वृषाणम्। वृषऽभिः। यतम्। सुन्वन्ति। सोमम्।
अद्रिऽभिः। दुहन्ति। शक्मना। पयः ॥ ३ ॥

वृषाणं रससेकारं यतं नियतं सोमं वृषभीरसस्यवर्षकैरद्रिभिर्ग्रावभिः सुन्वन्ति शक्मना कर्मणा दुहंत्यध्वर्य्वादयः पयः सोमरसं। सोमं पयोदुहन्तीति द्विकर्मकोयम् ॥ ३ ॥

अथ चतुर्थी–

भुवत्त्रितस्यमर्ज्योभुवदिन्द्रायमत्सरः। संरूपैरज्यतेहरिः ॥ ४ ॥

भुवत्। त्रितस्य। मर्ज्यः। भुवत्। इन्द्राय।
मत्सरः। सम्। रूपैः। अज्यते। हरिः ॥ ४ ॥

त्रितस्य सकृद्वृत्कर्षैः सोमं मत्सरो मदकरः सोमो मर्ज्यो भुवत् शुद्धोभवति तस्य यागार्थं शेषपानार्थंच तथा इन्द्रायेन्द्रपानाय मर्ज्योभुवत् रूपै रूपकैश्च क्षीरादिभिर्हरिर्हरितवर्णः सोमः समज्यते ॥ ४ ॥

अथ पंचमी–

अभीमृतस्यविष्टपंदुहतेपृश्निमातरः। चारुंप्रियतमंहविः ॥ ५ ॥

अभि। ईम्। ऋतस्य। विष्टपम्। दुहते।
पृश्निऽमातरः। चारुं। प्रियऽतमम्। हविः ॥ ५ ॥

ईमेनं सोमं ऋतस्य विष्टपं स्थानं यज्ञाश्रयमित्यर्थः तादृशं पृश्निमातरोमरुतोभिदुहते। किंभूतमिन्द्रादीनां हविर्होमसाधनं चारु रमणीयं सोमं मरुतेरिववृष्ट्या सोमवृद्धेस्तद्दोग्धृत्वं ॥ ५ ॥

अथ षष्ठी—

समेनमह्रुताइमागिरोअर्षन्तिसस्रुतः । धेनूर्वाश्रोअवीवशत् ॥६॥२४॥

सम् । एनम् । अह्रुताः । इमाः । गिरः । अर्षन्ति ।
सऽस्रुतः । धेनूः । वाश्रः । अवीवशत् ॥ ६ ॥ २४ ॥

समर्षन्ति संगच्छन्ते एनं सोमं अह्रुता अकुटिलागिरोस्मदीयाःस्तुतयः सस्रुतः सरंत्यः वाश्र धेनूः प्रीणयित्र्यः स्तुतीर्वाश्रः शब्दयन् अवीवशत् कामयते सोमः ॥ ६ ॥

॥ इति षष्ठस्याष्टमे चतुर्विंशोवर्गः ॥ २४ ॥

आनइति षळृचमेकादशं सूक्तं आंगिरसस्य प्रभूवसोरार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रान्तंच—आनःपवस्वप्रभूवसुरिति । गतोविनियोगः ।

तत्र प्रथमा—

आनःपवस्वधारयापवमानरयिंपृथुम् । ययाज्योतिर्विदासिनः ॥१॥

आ । नः । पवस्व । धारया । पवमान । रयिम् ।
पृथुम् । यया । ज्योतिः । विदासि । नः ॥ १ ॥

हे पवमानसोम त्वं धारया नोस्माकं आपवस्व सर्वतः क्षर । किं रयिं धनं पृथुं विस्तीर्णं यया धारया ज्योतिर्द्योतमानं यज्ञं स्वर्गंवा विदासि लंभयसि नोस्माकं ॥ १ ॥

अथ द्वितीया—

इन्दोसमुद्रमीङ्खयपवस्वविश्वमेजय । रायोधर्तानओजसा ॥ २॥

इन्दो इति । समुद्रम्ऽईङ्खय । पवस्व ।
विश्वम्ऽएजय । रायः । धर्ता । नः । ओजसा ॥ २ ॥

हे इन्दो सोम हे समुद्रमींखय समुद्रमित्युदकनाम ईखयतिर्गतिकर्मा उदकप्रेरक तथा हे विश्वमेजय विश्वस्य सर्वस्यास्मच्छत्रोः कंपयितः सोम त्वं ओजसा त्वदीयेन बलेन नोस्मभ्यं रायो धनस्य धर्ता धारकः पवस्व भवेत्यर्थः । अत्र यद्यप्युदकप्रेरणसर्वशत्रुकंपने संबोधनान्तर्गतत्वादुद्देश्यगते तथापि यजमानस्यापेक्षितेइति रायो धर्तृत्ववदाशास्ये अधिगन्तव्ये ॥ २ ॥

अथ तृतीया–

त्वयावीरेणवीरवोभिष्यामपृतन्यतः । क्षरांणोअभिवार्यम् ॥ ३ ॥

त्वया । वीरेण । वीरऽवः । अभि । स्याम ।
पृतन्यतः । क्षर । नः । अभि । वार्यम् ॥ ३ ॥

हे वीरवो वीरवन् सोम वीरेण त्वया साधनेन पृतन्यतः संग्राममिच्छतः शत्रूनभिष्याम अभिभवेम अतोनोस्माकं वार्यं वरणीयं धनमभिक्षर अभिगमयेत्यर्थः । अथवा वरणीयं सौमाख्यं धनं क्षर पवस्व ॥ ३ ॥

अथ चतुर्थी–

प्रवाजमिन्दुरिष्यतिसिषासन्वाजसाऋषिः । व्रताविदानआयुधा ॥४॥

प्र । वाजम् । इन्दुः । इष्यति । सिसासन् । वाजऽसाः ।
ऋषिः । व्रता । विदानः । आयुधा ॥ ४ ॥

सोमः वाजमन्नं प्रेष्यति प्रेरयति यजमानेभ्यः । किंकुर्वन् सिषासन् यजमानान् संभक्तुमिच्छन् इंद्रशइन्दुर्वाजसाः अन्नस्य दाता ऋषिः सर्वस्यद्रष्टा व्रता व्रतानि कर्माणि आयुधानि च विदानोजानन् ॥ ४ ॥

अथ पञ्चमी–

तंगीर्भिर्वाचमीङ्खयंपुनानंवासयामसि । सोमंजनस्यगोपतिम् ॥५॥

तम् । गीःऽभिः । वाचम्ऽईङ्खयम् । पुनानम् ।
वासयामसि । सोमम् । जनस्य । गोऽपतिम् ॥ ५ ॥

तं सोमं गीर्भिः स्तुतिभिः स्तौमीतिशेषः । किंच याचमींखयं वाचःप्रेरयितारं पुनानं पूयमानं तं सोमं वासयामसि वासयामः श्रयणद्रव्यैः । कीदृशं सोमं जनस्य गोपतिं गवां पालकं यद्वैकमेववाक्यं उक्तविशेषणविशिष्टं सोमं स्तुतिभिर्वासयामइति । माधवस्तु–वाचमितिपृथक्पदं तिङन्तंकृत्वा वाक्यद्वयं चकार ॥ ५ ॥

अथ षष्ठी—

विश्वो॒यस्य॑व्र॒तेजनो॑दा॒धार॒धर्म॑ण॒स्पतेः॑। पु॒ना॒नस्य॑प्र॒भूव॑सोः ॥६॥२५॥

विश्वः॑ । यस्य॑ । व्र॒ते । जनः॑ । दा॒धार॑ । धर्म॑णः ।

पतेः॑ । पु॒ना॒नस्य॑ । प्र॒भुऽव॑सोः ॥ ६ ॥ २५ ॥

विश्वः सर्वोजनो मनुष्यो यजमानः यस्य सोमस्य व्रते कर्मणि दाधार धारयति मन्त्रविशेषं । कीदृशस्य यस्य धर्मणः कर्मणः पतेः पालकस्य पुनानस्य पूयमानस्य प्रभूवसोः प्रभूतधनस्य ॥ ६ ॥

॥ इति षष्ठस्याष्टमे पंचविंशोवर्गः ॥ २५ ॥

असर्जीतिषळृचं द्वादशं सूक्तं ऋष्याद्याः पूर्ववत् । असर्जीत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

अस॑र्जि॒रथ्यो॒यथा॑प॒वित्रे॑च॒म्वोः॑सु॒तः । कार्ष्म॑न्वा॒जीन्य॑क्रमीत् ॥१॥

अस॑र्जि । रथ्यः॑ । य॒था । प॒वित्रे॑ । च॒म्वोः॑ । सु॒तः ।

कार्ष्म॑न् । वा॒जी । नि । अ॒क्र॒मी॒त् ॥ १ ॥

रथ्योयथा रथसंबन्धीअश्वइव सयथा विसृज्यते तद्वत् चम्वोरधिषवणफलकयोः सुतोभिषुतः सोमः असर्जि सृष्टोभूत् पवित्रे । तथा भूतोवाजी वेजनवान् सोमाख्योश्वः कार्ष्मन् कार्ष्मंपुर्द्धं इवेरेतरयर्षणात् अत्र देवानामाकर्षणवति यज्ञाख्ये संग्रामे न्यक्रमीत् नितरां क्रामयति ॥ १ ॥

अथ द्वितीया—

सव॑ह्निः॒सो॑म॒जागृ॑विः॒पव॑स्वदेव॒वीरति॑ । अ॒भिकोश॑म्मधु॒श्चुत॑म् ॥२॥

सः । वह्निः॑ । सो॒म॒ । जागृ॑विः । पव॑स्व । दे॒व॒ऽवीः ।

अति॑ । अ॒भि । कोश॑म् । म॒धु॒ऽश्चुत॑म् ॥ २ ॥

हे सोम सवह्निर्वाहकः जागृविर्जागरूको देववीर्देवकामस्त्वं मधुश्चुतं मधुस्राविकोशं दशापवित्रमतिक्रम्याभिपवस्व द्रोणकलशं प्रति क्षर ॥ २ ॥

अथ तृतीया—

सनोज्योतींषिपूर्व्यपवमानविरोचय । क्रत्वेदक्षायनोहिनु ॥ ३ ॥

सः । नः । ज्योतींषि । पूर्व्य । पवमान । वि ।
रोचय । क्रत्वे । दक्षाय । नः । हिनु ॥ ३ ॥

हे पूर्व्य पुराण पवमान सोम सत्वं नोस्माकं ज्योतींषि दिव्यानि स्थानानि विरोचय प्रकाशय । किंच क्रत्वे कर्मणे यागाय दक्षाय बलाय बलप्रदाय यागायवा नोस्मान् हिनु प्रेरय ॥ ३ ॥

अथ चतुर्थी—

शुम्भमानऋतायुभिर्मृज्यमानोगभस्त्योः । पवतेवारेअव्यये॥४॥

शुम्भमानः । ऋतयुऽभिः । मृज्यमानः ।
गभस्त्योः । पवते । वारे । अव्यये ॥ ४ ॥

ऋतायुभिः यज्ञकामैः ऋत्विग्भिः शुंभमानोलंक्रियमाणः तेषामेव गभस्त्योर्हस्तयोर्मृज्यमानः सोमः अव्यये अविमये वारे वाले दशापवित्रे पवते पूयते ॥ ४ ॥

अथ पञ्चमी—

सविश्वादाशुषेवसुसोमोदिव्यानिपार्थिवा । पवतामान्तरिक्ष्या॥५॥

सः । विश्वा । दाशुषे । वसु । सोमः । दिव्यानि ।
पार्थिवा । पवताम् । आ । अन्तरिक्ष्या ॥ ५ ॥

सोभिपूयमाणः सोमोदाशुषे हविर्दात्रे विश्वा सर्वाणि वसु वसूनि धनानि आपवतां प्रयच्छतु । विश्वानीत्युक्तस्य विवरणं शिष्टं । दिव्यानि दिविभवानि पार्थिवा पृथिवीसंबन्धीनि अंतरिक्ष्या अन्तरिक्षेभवानिच पवतां ॥ ५ ॥

अथ षष्ठी—

आदिवस्पृष्ठमश्वयुर्गव्ययुःसोमरोहसि । वीरयुःशवसस्पते ॥६॥२६॥

आ । दिवः । पृष्ठम् । अश्वऽयुः । गव्यऽयुः ।
सोम । रोहसि । वीरऽयुः । शवसः । पते ॥ ६ ॥ २६ ॥

हे सोम त्वं स्तोतॄणां अश्वयुरश्वमिच्छन् गव्ययुर्गाइच्छन् वीरयुः पुत्रानिच्छन् दिवः पृष्ठं द्युलोकमारोहसि आहुतिद्वारा हे शवसस्पते अन्नस्यपालक ॥ ६ ॥

॥ इति पष्ठस्याष्टमे षड्विंशोवर्गः ॥ २६ ॥

ससुतइति षळृचं षयोदशं सूक्तं रहूगणस्यार्षं गायत्रं सौम्यं अनुक्रम्यतेच—ससुतोरहूगणइति । गतोविनियोगः ।

तत्र प्रथमा—

ससुतःपीतयेवृषासोमःपवित्रेअर्षति । विघ्नन्रक्षांसिदेवयुः ॥ १ ॥

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे ।
अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥ १ ॥

सः सोमः पीतये इन्द्रादिपानाय सुतोभिषुतो वृषा वर्षणः सन् पवित्रे अर्षति गच्छति । किंकुर्वन् रक्षांसि विघ्नन् देवयुर्देवकामः सइत्यन्वयः ॥ १ ॥

अथ द्वितीया—

सपवित्रेविचक्षणोहरिरर्षतिधर्णसिः । अभियोनिंकनिक्रदत् ॥२॥

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति ।
धर्णसिः । अभि । योनिम् । कनिक्रदत् ॥ २ ॥

ससोमो विचक्षणः पश्यतिकर्म एतद् सर्वस्यद्रष्टा हरिर्हरितवर्णः सोमो धर्णसिः सर्वस्य धारकः पवित्रे अर्षति गच्छति पश्चात् कनिक्रदद् शब्दंकुर्वन् योनिं स्थानं द्रोणकलशमभि गच्छति ॥ २ ॥

अथ तृतीया—

सवाजीरोचनादिवःपवमानोविधावति । रक्षोहावारमव्ययम् ॥३॥

सः । वाजी । रोचना । दिवः । पवमानः । वि ।
धावति । रक्षःऽहा । वारम् । अव्ययम् ॥ ३ ॥

सवाजी वेजनवानश्वस्थानीयोदिवः स्वर्गस्य रोचना रोचकः पवमानः पूयमानो विधावति । कीदृशः रक्षोहा रक्षोहन्ता अव्ययं वारं दशापवित्रमतीत्य च धावति ॥ ३ ॥

अथ चतुर्थी—

सत्रितस्याधिसानविपवमानोअरोचयत् । जामिभिःसूर्यंसह ॥४॥

सः । त्रितस्य । अधि । सानवि । पवमानः ।
अरोचयत् । जामिऽभिः । सूर्यम् । सह ॥ ४ ॥

ससोमस्त्रितस्य महर्षेः अधिसानवि समुच्छ्रिते यज्ञे । अधीति सप्तम्यर्थानुवादी । पवमानः पूयमानः जामिभिः मरुद्भिः बन्धुभूतैर्वा स्वतेजोभिः सह सहितःसन् सूर्यमरोचयत् प्रकाशितवान् ॥ ४ ॥

अथ पंचमी—

सवृत्रहावृषासुतोवरिवोविददाभ्यः । सोमोवाजमिवासरत् ॥ ५ ॥

सः । वृत्रऽहा । वृषा । सुतः । वरिवःऽवित् ।
अदाभ्यः । सोमः । वाजम्ऽइव । असरत् ॥ ५ ॥

सवृत्रहा वृषा वर्षकः सुतोभिषुतो वरिवोवित् यष्टृधनस्यलंभकः अदाभ्यः आ दाभ्योन्यैरदंभनीयः सोमो वाजमिव संग्राममश्वइवासरत् गच्छति कलशं ॥ ५ ॥

अथ षष्ठी—

सदेवःकविनेषितो३भिद्रोणानिधावति । इन्दुरिन्द्रायमंहना ॥६॥२७॥

सः । देवः । कविना । इषितः । अभि । द्रोणानि ।
धावति । इन्दुः । इन्द्राय । मंहना ॥ ६ ॥ २७ ॥

ससोमो देवइन्दुः क्रियमानः कविना क्रान्तप्रज्ञेन अध्वर्युणा इषितः प्रेरितःसन् द्रोणानि द्रोणकलशानभिधावति अभिगच्छति । किमर्थं इन्द्रायेन्द्रार्थं मंहना महान् सइति समन्वयः॥६॥

॥ इति षष्ठस्याष्टमे सप्तविंशोवर्गः ॥ २७ ॥

एषइति षळृचं चतुर्दशंसूक्तं ऋष्याद्याः पूर्ववत् । एषउस्यवितइत्यनुक्रान्तं । गतोविनियोगः।

तत्र प्रथमा—

एषउस्यवृषारथोऽव्योवारेभिरर्षति । गच्छन्वाजंसहस्रिणम् ॥ १ ॥

एषः । ॐ इति । स्यः । वृषा । रथः । अव्यः । वारेभिः ।
अर्षति । गच्छन् । वाजम् । सहस्रिणम् ॥ १ ॥

स्यः समसिद्धः एषोभिषुतः सोमोवृषा वर्षितारथोरंहणस्वभावः अव्योवारेभिः अवेर्वालैः दशापवित्रेणार्षति गच्छति कलशं । वाजमन्नं सहस्रिणं सहस्रसंख्याकं यजमानाय मदातुं गच्छन् द्रोणकलशं मविशन्नर्षतीत्यर्थः उपूरणः ॥ १ ॥

अथ द्वितीया—

एतंत्रितस्ययोषणोहरिंहिन्वन्त्यद्रिभिः । इन्दुमिन्द्रायपीतये ॥२॥

एतम् । त्रितस्य । योषणः । हरिम् ।
हिन्वन्ति । अद्रिऽभिः । इन्दुम् । इन्द्राय । पीतये ॥ २ ॥

एतमिन्दुं क्रियमानं हरिं हरितवर्णं सोमं त्रितस्य ऋषेर्योषणोंगुल्योद्रिभिः हिन्वन्ति इन्द्रायेन्द्रस्य पीतये पानाय ॥ २ ॥

अथ तृतीया—

एतंत्यंहरितोदशमर्मृज्यन्तेअपस्युवः । याभिर्मदायशुंभते ॥ ३ ॥

एतम् । त्यम् । हरितः । दश । मर्मृज्यन्ते ।
अपस्युवः । याभिः । मदाय । शुंभते ॥ ३ ॥

एतं त्यं तं सोममध्वर्योर्दश हरितो हरणस्वभावा अंगुलयः अपस्युवः कर्मेच्छवः सतो-मर्मृज्यन्ते शोधयन्ति याभिरिन्द्रस्य मदाय शुंभते दीप्यते शोध्यतइत्यर्थः तं एवमिति संबन्धः ॥ ३ ॥

अथ चतुर्थी–

एषस्यमानुंषीष्वाश्येनोनविक्षुसीदति । गच्छंञ्जारोनयोषितम् ॥४॥

एषः । स्यः । मानुंषीषु । आ । श्येनः । न । विक्षु ।
सीदति । गच्छंन् । जारः । न । योषितम् ॥ ४ ॥

स्यः सएषसोमो मानुषीषु विक्षु प्रजासु यजमानरूपासु अनुग्रहेण आसीदति श्येनोन श्येनइव । पुनः कइव योषितं गच्छन् अभिगच्छन् जारोन जारइव सयथा संकेतितः तस्याः कामपूरणाय गूढोगच्छति तद्वदित्यर्थः ॥ ४ ॥

अथ पंचमी–

एषस्यमद्योरसोवचष्टेदिवःशिशुः । यइन्दुर्वारमाविशत् ॥ ५ ॥

एषः । स्यः । मद्यः । रसः । अव । चष्टे । दिवः ।
शिशुः । यः । इन्दुः । वारम् । आ । अविशत् ॥ ५ ॥

स्यः सएषः मद्योमदनिमित्तोरसोवचष्टे सर्वमवपश्यति दिवः शिशुः द्युपुत्रः । तत्रोत्पत्तेः पुत्रत्वमस्य । यइन्दुर्दीप्तः सोमो वारं दशापवित्रमाविशदाविशति सएषइति ॥ ५ ॥

अथ षष्ठी–

एषस्यपीतयेसुतोहरिरर्षतिधर्णसिः । क्रन्दन्योनिमभिप्रियम् ॥६॥२८॥

एषः । स्यः । पीतये । सुतः । हरिः । अर्षति । धर्णसिः ।
क्रन्दंन् । योनिम् । अभि । प्रियम् ॥ ६ ॥ २८ ॥

एषस्यः ससोमः पीतये पानाय सुतोभिषुतो हरिर्हरितवर्णो धर्णसिर्धारकः प्रियं स्व-प्रियभूतं योनिंस्थानं द्रोणकलशं क्रंदन् शब्दयन् अभ्यर्षति गच्छति ॥ ६ ॥

॥ इति पष्ठस्याष्टमेष्टाविंशोवर्गः ॥ २८ ॥

आशुरर्षेति षळृचं पंचदशं सूक्तं आंगिरसस्य बृहन्मतेरार्षं गायत्रं पवमानसोमदेवताकं । आशुरर्षबृहन्मतिरित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा–

आशुरर्षबृहन्मतेपरिप्रियेणधाम्ना । यत्रदेवाइतिब्रवन् ॥ १ ॥

आशुः । अर्ष । बृहत्ऽमते । परि । प्रियेण ।
धाम्ना । यत्र । देवाः । इति । ब्रवन् ॥ १ ॥

हे बृहन्मते महामते सोम प्रियेण देवानां प्रियतमेन धाम्ना शरीरेण धारया आशुः शीघ्रःसन् पर्यर्ष परिगच्छ । यत्रदेवाइन्द्रादयो वर्तन्ते इतिब्रुवन् ब्रुवन्नुच्चारयन् तां दिशं गच्छामीति ब्रुवन्नित्यर्थः ॥ १ ॥

अथ द्वितीया–

परिष्कृण्वन्ननिष्कृतंजनाययातयन्निषः । वृष्टिंदिवःपरिस्रव ॥२॥

परिऽकृण्वन् । अनिःऽकृतम् । जनाय ।
यातयन् । इषः । वृष्टिम् । दिवः । परि । स्रव ॥ २ ॥

हे सोम अनिष्कृतं संस्कृतं यजमानं स्थानं वा परिष्कृण्वन् संस्कुर्वन् जनाय यागकर्त्रे इषोन्नानि यातयन् निर्गमयन् दिवोन्तरिक्षात् वृष्टिं परिस्रव ॥ २ ॥

अथ तृतीया–

सुतएतिपवित्रआत्विषिंदधानओजसा । विचक्षाणोविरोचयन् ॥ ३॥

सुतः । एति । पवित्रे । आ । त्विषिम् । दधानः । ओजसा ।
विऽचक्षाणः । विऽरोचयन् ॥ ३ ॥

सुतोभिषुतः सोमःसन् पवित्रे दशापवित्रे आइत्यनर्थकः ओजसा बलेन शीघ्रं एति गच्छति । कीदृशःसन् त्विषिं दीप्तिं दधानो धारयन् विचक्षणः सर्वं पश्यन् विरोचयन् दीपयंश्च । किं देवानितिशेषः ॥ ३ ॥

अथ चतुर्थी—

अयंसयोदिवस्परिरघुयामापवित्रआ । सिन्धोरूर्माव्यक्षरत् ॥४॥

अयम् । सः । यः । दिवः । परि । रघुऽयामा । पवित्रे । आ ।
सिन्धोः । ऊर्मा । वि । अक्षरत् ॥ ४ ॥

अयं ससोमः पवित्रे आसिच्यमानइविशेषः । सिंधोर्जलस्याविण्याऊर्मा ऊर्मौ संघाते व्यक्षरत् विविधं क्षरति । सइत्युक्तं कइत्याह—योदिवस्परि द्युलोकस्योपरि रघुयामा लघुगमनः देवमार्गो सोममिति संबन्धः ॥ ४ ॥

अथ पंचमी—,

आविवासन्परावतोअथोअर्वावतःसुतः । इन्द्रायसिच्यतेमधु ॥५॥

आऽविवासन् । पराऽवतः । अथो इति । अर्वाऽवतः ।
सुतः । इन्द्राय । सिच्यते । मधु ॥ ५ ॥

सुतोभिषुतःसोमः परावतः दूरनामैतत् दूरस्थानात् अथो अपिचार्वावतोन्तिकस्थांश्च देवानाविवासन् रसेन परिचरणायेत्यर्थः इन्द्रायेन्द्रार्थं मधु मधुसदृशः सोमः सिच्यते ॥ ५ ॥

अथ षष्ठी—

समीचीनाअनूषतहरिंहिन्वन्त्यद्रिभिः । योनावृतस्यसीदत ॥६॥२९॥

सम्ऽईचीनाः । अनूषत । हरिम् । हिन्वन्ति । अद्रिऽभिः ।
योनौ । ऋतस्य । सीदत ॥ ६ ॥ २९ ॥

समीचीनाः सम्यगंचिताः संगताःस्तोतारोनूषत स्तुवन्ति । किंच सोमं हरिं हरितवर्णं हिन्वन्ति प्रेरयन्ति गमयन्ति अद्रिभिर्ग्रावभिः । यस्मादेवं तस्मात् ऋतस्य यज्ञस्य योनौ स्थाने सीदत निषण्णाभवत हे देवाः ॥ ६ ॥

॥ इति षष्ठस्याष्टमे एकोनत्रिंशोवर्गः ॥ २९ ॥

पुनानइति षळृचं षोडशं सूक्तं काण्वायाः पूर्ववत् । पुनानइत्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

पुनानोअक्रमीदभिविश्वामृधोविचर्षणिः । शुम्भन्तिविप्रंधीतिभिः ॥१॥

पुनानः । अक्रमीत् । अभि । विश्वाः । मृधः । विऽचर्षणिः ।
शुंभन्ति । विप्रम् । धीतिऽभिः ॥ १ ॥

पुनानः पूयमानो विचर्षणिः द्रष्टा सोमः विश्वा सर्वान्मृधोहिंसकान् शत्रूनभ्यक्रमीत् अतिक्रान्तवान् तं विप्रं मेधाविनं धीतिभिः कर्मभिरभिषवादिभिः स्तुतिभिर्वा शुंभन्ति दीपयंत्यलंकुर्वन्ति ॥ १ ॥

अथ द्वितीया—

आयोनिमरुणोरुहद्गमदिन्द्रंवृषासुतः । ध्रुवेसदसिसीदति ॥ २ ॥

आ । योनिम् । अरुणः । रुहत् । गमत् । इन्द्रम् । वृषा ।
सुतः । ध्रुवे । सदसि । सीदति ॥ २ ॥

अयमरुणोरुणवर्णः सोमो योनिं स्थानं द्रोणकलशमारुहदारोहति ततइन्द्रं गमद्गच्छति । कुतः सन्नयं वृषावर्षकः फलानां सुतोभिषुतः सन् गत्वा ध्रुवेसदसि स्थिरेस्थाने द्युलोकाख्ये सीदति निवसति ॥ २ ॥

अथ तृतीया—

नूनोरयिंमहामिन्दोस्मभ्यंसोमविश्वतः । आपवस्वसहस्रिणम् ॥३॥

नु । नः । रयिम् । महाम् । इन्दो इति । अस्मभ्यम् । सोम ।
विश्वतः । आ । पवस्व । सहस्रिणम् ॥ ३ ॥

हे सोमाभिषुतस्त्वं हे इन्दो नोस्मभ्यं नु क्षिप्रं महां महान्तं सहस्रिणं असंख्यातं रयिं धनं विश्वतः आपवस्व सर्वतः परिस्रव ॥ ३ ॥

अथ चतुर्थी—

विश्वासोमपवमानद्युम्नानीन्दवाभर । विदाःसहस्रिणीरिषः ॥ ४ ॥

विश्वा । सोम । पवमान । द्युम्नानि । इन्दो इति ।
आ । भर । विदाः । सहस्रिणीः । इषः ॥ ४ ॥

हे सोम पवमान पूयमान इन्दो दीप्त त्वं विश्वा सर्वाणि बहुविधानि द्युम्नानि द्रविणानि आभराहर । विदाः लंभयच सहस्रिणीः सहस्रसंख्याकानि इषोन्नानि ॥ ४ ॥

अथ पञ्चमी—

सनःपुनानआभररयिंस्तोत्रेसुवीर्यम् । जरितुर्वर्धयागिरः ॥ ५ ॥

सः । नः । पुनानः । आ । भर । रयिम् । स्तोत्रे ।
सुऽवीर्यम् । जरितुः । वर्धय । गिरः ॥ ५ ॥

हे सोम सत्वं नोस्मभ्यं स्तोत्रे स्तोतृभ्यः पुनानः पूयमानोभिपूयमाणः आभराहर । किं रयिं धनं । कीदृशं सुवीर्यं सुपुत्रं । किंच जरितुः स्तोतुर्गिरः स्तुतीः वर्धय ॥५॥

अथ षष्ठी—

पुनानइन्दवाभरसोमद्विबर्हसंरयिम् । वृषन्निन्दोनउक्थ्यम् ॥ ६ ॥ ३० ॥

पुनानः । इन्दो इति । आ । भर । सोम । द्विऽबर्हसम् ।
रयिम् । वृषन् । इन्दो इति । नः । उक्थ्यम् ॥ ६ ॥ ३० ॥

हे इन्दो सोम पुनानः पूयमानस्त्वं आभराहर । किं रयिं धनं । कीदृशं धनं द्विबर्हसं संवयोर्द्युपृथिव्याख्ययोः स्थानयोः परिवृढं । तदेवाह हे इन्दो वृषन् वर्षक नोस्मभ्यं उक्थ्यं स्तुत्यं धनमाभर ॥ ६ ॥

॥ इति षष्ठस्याष्टमे त्रिंशोवर्गः ॥ ३० ॥

प्रयेगावइति षळृचं सप्तदशं सूक्तं काण्वस्य मेध्यातिथेरार्षं गायत्रं पवमानसोमदेवताकं तथाचानुक्रान्तं—प्रयेगावोमेध्यातिथिरिति । गतोविनियोगः ।

तत्र प्रथमा—

प्रयेगावोनभूर्णयस्त्वेषाअयासोअक्रमुः । घ्नन्तःकृष्णामपत्वचम् ॥ १ ॥

प्र । ये । गावः । न । भूर्णयः । त्वेषाः । अयासः ।
अक्रमुः । घ्नन्तः । कृष्णाम् । अप । त्वचम् ॥ १ ॥

ये अभिषुताः सोमाः गावोन उदकानीव तानि यथा तूर्णमधः पतन्ति तद्वत् एवंचोपशी- यन्ते । यद्वा गावः स्वगोष्ठं प्रत्याशु गच्छन्ति तद्वत् । अथवा गावः स्तुतिवाचः तायथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवन्ति तद्वत् । भूर्णयः क्षिप्राः त्वेषाः दीप्ताः अयासः अयाः गमनशीलाः कृष्णां त्वचं कृष्णा त्वग्रक्षाः तं निघ्नंतः । त्वचिः संवरणकर्मा । ईदृग्भूताः सोमाः अक्रमुः तान् स्तुवतेतिशेषः ॥ १ ॥

अथ द्वितीया—

सुवितस्यमनामहेतिसेतुंदुराव्यम् । साह्वांसोदस्युमव्रतम् ॥ २ ॥

सुवितस्य । मनामहे । अति । सेतुम् ।
दुःऽआव्यम् । सह्वांसः । दस्युम् । अव्रतम् ॥ २ ॥

सुवितस्य शोभनंप्राप्तः सुवितः शोभनस्य सोमस्य सेतुं रक्षोविषयं बन्धं दुष्प्रार्ति च रक्षसां बंधनं तेषां हननबुद्धिंच सोमकर्तृका मनामहे स्तुमः । कथंस्तुमइति तदुच्यते अव्रतं दुराव्यं तद्रूपं कर्माणं दस्युं शत्रुं साह्वांसोभिभवन्तः ॥ २ ॥

अथ तृतीया—

शृण्वेवृष्टेरिवस्वनःपवमानस्यशुष्मिणः । चरन्तिविद्युतोदिवि ॥ ३ ॥

शृण्वे । वृष्टेःऽइव । स्वनः । पवमानस्य ।
शुष्मिणः । चरन्ति । विऽद्युतः । दिवि ॥ ३ ॥

शृण्वे श्रूयते किं सोमस्वनः । किमिव वृष्टेर्वर्षणस्य स्वनइव तस्य यथा महान् स्वनः श्रूयते तद्वत् प्रभूतरसापातसमये श्रूयते । कस्य स्वनइति तत्राह पवमानस्य पूयमानस्य शुष्मिणोबलवतः तस्यैव विद्युतोदीप्तयो दिव्यन्तरिक्षे चरन्ति ॥ ३ ॥

अथ चतुर्थी—

आपवस्वमहीमिषंगोमदिन्दोहिरण्यवत् । अश्ववद्वाजवत्सुतः ॥ ४ ॥

आ । पुवस्व । मुहीम् । इषम् । गोऽमंत् । इन्दो इति ।
हिरंण्यऽवत् । अश्वंऽवत् । वाजंऽवत् । सुतः ॥ ४ ॥

हे इन्दो सोम सुतोऽभिषुतस्त्वं महीमिषं महदन्नं आपवस्व । कीदृशमन्नं गोमत् बहुगोभिरुपेतं एवं हिरण्यवत् हिरण्यैः अश्ववत् अश्वैः वाजवत् वाजैर्बलैश्चोपेतं ॥ ४ ॥

अथ पञ्चमी—

सपंवस्वविचर्षणआमुहीरोदंसीपृण । उषाःसूर्योनरश्मिभिः ॥ ५ ॥

सः । पुवस्व । विऽचर्षणे । आ । मुही इति । रोदंसी इति ।
पृण । उषाः । सूर्यः । न । रुश्मिऽभिः ॥ ५ ॥

हे विचर्षणे विद्रष्टः सोम सत्वं पवस्व क्षर रसं । तथा कृत्वा तेनरसेन मही महत्यौ रोदसी द्यावापृथिव्यौ आपृण आपूरय उषाः उषसः एकदेशवाचिनोषःशब्देन तदुपलक्षितमहरुच्यते तत्प्राधान्यात् अहानि रश्मिभिः सूर्योन सूर्यइव ॥ ५ ॥

अथ षष्ठी—

परिणःशर्मयन्त्याधारंयासोमविश्वतः । सर्रारसेवविष्टपम् ॥ ६ ॥ ३१ ॥

परिं । नः । शर्मंऽयन्त्या । धारंया । सोम ।
विश्वतः । सरं । रुसाऽईव । विष्टपम् ॥ ६ ॥ ३१ ॥

हे सोम नोस्मभ्यं शर्मयंत्या सुखयन्त्या धारया विश्वतः सर्वतः परिसर परिचर रसेव रसेनेव विष्टपं भूलोकं । यद्वा रसा नदी स्थानं सा प्रवणरूपमिव ॥ ६ ॥

॥ इति षष्ठस्याष्टमे एकत्रिंशोवर्गः ॥ ३१ ॥

जनयन्निति षड्चमष्टादशंसूक्तं ऋष्याद्याः पूर्ववत् । जनयन्नित्यनुक्रान्तं । गतोविनियोगः ।

तत्र प्रथमा—

जुनयंन्रोचनादिवोजुनयंन्नप्सुसूर्यम् । वसानोगाअपोहरिः ॥ १ ॥

जनयन्। रोचना। दिवः। जनयन्। अप्ऽसु।
सूर्यम्। वसानः। गाः। अपः। हरिः॥ १॥

अयं हरिः सोमो दिवोद्युसंबन्धीनि रोचना रोचनानि नक्षत्रग्रहमंडलानि जनयन् तथा अप्स्वन्तरिक्षे सूर्यं च जनयन् तथा गाः अधोगंत्रीरपोवसानो भूमिमाप्लानेवा आच्छादयन् पवतइत्युत्तरत्र संबंधः॥ १॥

अथ द्वितीया–

एषप्रत्नेनमन्मनादेवोदेवेभ्यस्परि। धारयापवतेसुतः॥ २॥

एषः। प्रत्नेन। मन्मना। देवः। देवेभ्यः।
परि। धारया। पवते। सुतः॥ २॥

एषः देवः सोमः प्रत्नेन पुराणेन मन्मना मननीयेन स्तोत्रेण युक्तः सुतोभिषुतश्च सन् देवेभ्यः परि परितो धारया स्वीयया पवते॥ २॥

अथ तृतीया–

वावृधानायतूर्वयेपवन्तेवाजसातये। सोमाःसहस्रपाजसः॥ ३॥

वावृधानाय। तूर्वये। पवन्ते। वाजऽसातये।
सोमाः। सहस्रऽपाजसः॥ ३॥

वावृधानाय वर्धमानाय तूर्वये क्षिप्राय वाजसातये संग्रामायान्नलाभायवा पवन्ते पूयन्ते के सोमाः। कीदृशाः सहस्रपाजसो परिमितबलाः असंख्यातवेगाइत्यर्थः॥ ३॥

अथ चतुर्थी–

दुहानःप्रत्नमित्पयःपवित्रेपरिषिच्यते। क्रन्दन्देवाँअजीजनत्॥४॥

दुहानः। प्रत्नम्। इत्। पयः। पवित्रे। परि।
सिच्यते। क्रन्दन्। देवान्। अजीजनत्॥ ४॥

प्रत्नमिव पुराणमेव पयोरसं दुहानः दधानः सोमः पवित्रे परिषिच्यते। किंच क्रन्दन् शब्दं कुर्वन् देवानजीजनत् जनयति स्वसमीपे यत्र सोमोभिषूयते तत्र देवानियतं प्रादुर्भवन्ति अतो जनयतीत्युपचर्यते ॥ ४ ॥

अथ पञ्चमी—

अभिविश्वा॑निवार्या॒भिदे॒वाँ॑ऋ॑ता॒वृधः॑ । सोमः॑पुना॒नोअ॑र्षति ॥५॥

अ॒भि । विश्वा॑नि । वार्या॑ । अ॒भि । दे॒वान् ।
ऋ॒त॒ऽवृधः॑ । सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति ॥ ५ ॥

अयं सोमः पुनानः पूयमानो विश्वानि वार्या वरणीयानि धनान्यभ्यर्षति तथा ऋतावृधो यज्ञवर्धकान् देवानभ्यर्षति ॥ ५ ॥

अथ षष्ठी—

गोम॑न्नःसोमवी॒रव॒दश्वा॑व॒द्वाज॑वत्सु॒तः । पव॑स्वबृह॒तीरिषः॑ ॥६॥३२॥

गोऽम॑त् । नः॒ । सो॒म॒ । वी॒रऽव॑त् । अश्वा॑ऽवत् ।
वाज॑ऽवत् । सु॒तः । पव॑स्व । बृ॒ह॒तीः । इषः॑ ॥ ६ ॥ ३२ ॥

हे सोम सुतस्त्वं नोस्मभ्यं गोमत् गोभिर्युक्तं वीरवद्बहुभिः वीरैरुपेतं अश्वावदश्वैर्युक्तं वाजवद्वाजैर्बलैः संग्रामैर्वोपेतं धनं बृहतीरिषः प्रभूतान्यन्नानि पवस्व प्रयच्छेत्यर्थः ॥ ६ ॥

॥ इति षष्ठस्याष्टमे द्वात्रिंशोवर्गः ॥ ३२ ॥

योअत्यइवेति षड्चमेकोनविंशंसूक्तं ऋष्याद्याः पूर्ववत् योअत्यइवेत्यनुक्रान्तं गतोविनियोगः।

तत्र प्रथमा—

योअत्य॑इवमृ॒ज्यते॒गोभि॒र्मदा॑यह॒र्यतः॑ । तंगी॒र्भिर्वा॑सयामसि ॥१॥

यः । अत्यः॑ऽइव । मृ॒ज्यते॑ । गोभिः॑ । मदा॑य ।
ह॒र्यतः॑ । तम् । गीः॒ऽभिः । वा॒सया॒म॒सि ॥ १ ॥

यः सोमः अत्यइव अतनशीलोऽश्वइव गोभिर्वसतीवरीभिरद्भिर्गोविकारैः पयआदिभिर्वा मृज्यते मिश्र्यते किमर्थं मदाय देवानां। कीदृशोयः हर्यतः कान्तः तं सोमं गीर्भिः स्तुतिभिर्वासयामसि वासयामः॥ १॥

अथ द्वितीया—

तन्नोविश्वाअवस्युवोगिरःशुम्भन्तिपूर्वथा। इन्दुमिन्द्रायपीतये॥ २॥

तम्। नः। विश्वाः। अवस्युवः। गिरः। शुम्भन्ति।
पूर्वऽथा। इन्दुम्। इन्द्राय। पीतये॥ २॥

तमिन्दुं सोमं नोस्माकं विश्वाः सर्वाअवस्युवः अवोरक्षणं तदिच्छंत्योगिरः स्तुतयः पूर्वथा पूर्वमिव पूर्वं यथा तथैवेदानीमपि शुंभन्ति दीपयंति किमर्थमिन्द्रायेन्द्रस्य पीतये पानाय॥ २॥

अथ तृतीया—

पुनानोयातिहर्यतःसोमोगीर्भिःपरिष्कृतः। विप्रस्यमेध्यातिथेः॥३॥

पुनानः। याति। हर्यतः। सोमः। गीःऽभिः।
परिऽकृतः। विप्रस्य। मेध्यऽअतिथेः॥ ३॥

पुनानः पूयमानोहर्यतः कमनीयः सोमोगीर्भिः परिष्कृतः स्तुतिभिरलंकृतोयाति कलशंप्रति। किमर्थं विप्रस्य मेधाविनो मेध्यातिथेर्ममयागार्थं यद्वा ममगीर्भिरिति संबंधः॥ ३॥

अथ चतुर्थी—

पवमानविदारयिमस्मभ्यंसोमसुश्रियम्। इन्दोसहस्रवर्चसम्॥४॥

पवमान। विदाः। रयिम्। अस्मभ्यम्। सोम।
सुऽश्रियम्। इन्दो इति। सहस्रऽवर्चसम्॥ ४॥

हे पवमानसोम इन्दोस्मभ्यं सुश्रियं शोभनया श्रिया युक्तं सहस्रवर्चसं प्रभूदीप्तिं रयिं धनं विदाः देहीत्यर्थः॥ ४॥

अथ पंचमी–

इन्दुरत्योनवाजसृत्कनिक्रन्तिपवित्रआ । यदक्षारतिदेवयुः ॥ ५ ॥

इन्दुः । अत्यः । न । वाजऽसृत् । कनिक्रन्ति ।
पवित्रे । आ । यत् । अक्षाः । अति । देवऽयुः ॥ ५ ॥

यः इन्दुः वाजसृत् संग्रामसरणः अत्योन अश्वइव पवित्र आ पवित्रे कनिक्रन्ति शब्दं करोति यथदा अक्षाः क्षरति । क्षरसंचलने इत्यस्माच्छान्दसे लुङि तिपि सिच् बहुलंछन्दसी-तीडभावः इडभावश्च रात्सस्येतिसलोपः । देवयुर्देवकामः सन् तदा अतिशब्दं करोति ॥ ५ ॥

अथ षष्ठी–

पवस्ववाजसातयेविप्रस्यगृणतोवृधे । सोमरास्वसुवीर्यम् ॥६॥३३॥

पवस्व । वाजऽसातये । विप्रस्य । गृणतः ।
वृधे । सोम । रास्व । सुऽवीर्यम् ॥ ६ ॥ ३३ ॥

हे सोम पवस्व क्षर । किमर्थं वाजसातयेन्नस्य लाभाय । तथा गृणतः स्तुवतो विप्रस्य मम मेध्यातिथेर्वृधे वर्धनायच हे सोम सुवीर्यं शोभनवीर्योपेतं पुत्रंच रास्व देहीति ॥ ६ ॥

॥ इति षष्ठस्याष्टमे त्रयस्त्रिंशोवर्गः ॥ ३३ ॥

वेदार्थस्यप्रकाशेन तमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥
इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टकेष्टमोध्यायः ॥ ८ ॥

॥ इतिषष्ठोष्टकः समाप्तः ॥ ६ ॥